निर्वृत्तिकुलीनश्रीशीलाचार्यविरचितवृत्तिविभूषितं
अपश्चिमश्रुतकेवलीभद्रबाहुस्वामिनिर्मितनिर्युक्तियुक्तं

# श्री आचाराङ्ग सूत्रम्

{ आद्याध्ययनचतुष्टयात्मकः
प्रथमो भागः }



अर्थागमः
श्रमण भगवान् महावीरः

सूत्रागमः
पञ्चम गणधर श्री सुधर्मस्वामी

-: प्रकाशक :-
दिव्यदर्शन ट्रस्ट, कलिकुंड

पुरिसा ! तुममेव तुमं मित्तं,
किं बहिया मित्तमिच्छसि?

- अध्य०३

હે પુરૂષ ! તું જ તારો
મિત્ર છે. શા માટે બાહ્ય
મિત્રને તું ઇચ્છે છે ?

णाऽणागमो मच्चुमुहस्स अत्थि।

- अध्य०४

મૃત્યુના મુખમાંથી કોઈ
પાછું ફરી શકતું નથી.


શ્રી ઉમરા જૈન સંઘ મંડન
શ્રી પદ્મપ્રભસ્વામી ભગવાન
ઉમરા.

# અનુગ્રહની છાંયડીએ



પ.પૂ. આ. શ્રી ભુવનભાનુસૂરીશ્વરજી મ.સા. પ.પૂ. આ. શ્રી પ્રેમસૂરીશ્વરજી મ.સા.

પરમપૂજ્ય સિદ્ધાંતદિવાકર

**શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

પરમપૂજ્ય સંઘ-શાસનકૌશલ્યાધાર

**શ્રીમદ્ વિજય જયસુંદરસૂરીશ્વરજી મહારાજા**

પરમપૂજ્ય પાર્શ્વપ્રજ્ઞાલયતીર્થપ્રેરક પંન્યાસપ્રવર

**શ્રીમદ્ વિશ્વકલ્યાણવિજયજી મહારાજા**

પરમપૂજ્ય લઘુ-લઘુહરિભદ્ર પંન્યાસપ્રવર

**શ્રીમદ્ યશોવિજયજી મહારાજા**

श्री भुवनभानुसूरि आगमप्रकाशनश्रेणी - १( १ )

निर्वृत्तिकुलीनश्रीशीलाचार्यविरचितवृत्तिविभूषितं
अपश्चिमश्रुतकेवलीश्रीभद्रबाहुस्वामिनिर्मितनिर्युक्तियुक्तं

# ॥ श्री आचाराङ्गसूत्रम् ॥

## आद्याध्ययनचतुष्टयात्मकः
## प्रथमो भागः

अर्थागमः
**श्रमण भगवान् महावीरः**

सूत्रागमः
**भगवान् सुधर्मस्वामी**

प्रकाशकः
**दिव्यदर्शन ट्रस्ट**
३९, कलिकुंड सोसायटी,
कलिकुंड, धोलका
गुजरात-३८७८१०

श्री भुवनभानुसूरि आगमप्रकाशनश्रेणी - १( १ )

: पूर्वसम्पादक-संशोधका :

आगमप्रज्ञ पूज्य
मुनिप्रवर श्री **जम्बूविजयजी महाराजा**
तथा
पण्डितवर्य श्री **अमृतलाल भोजक**

: नूतनसंस्करणप्रेरका :

न्यायकूर्चालसरस्वती
श्रीमद् विजय **जयसुंदरसूरीश्वरजी** महाराजा
लघु-लघुहरिभद्र पंन्यासप्रवर
गुरूदेवश्री **यशोविजयजी गणिवर्य**

**प्रकाशन वर्ष** : वि. सं. २०६७

**आवृत्ति** : प्रथमा

**प्रतय:** : २५०

**पत्र** : ४६+३६०+७८

**मूल्य** : ३५०/-

© : दिव्यदर्शन ट्रस्ट, धोलका

**अक्षराङ्कन** : **अखिलेशभाई मिश्रा**, अहमदावाद
**जतीनभाई जे. शाह,**
जैनम् आर्ट, वडोदरा
Mob.: 9909015760

**मुद्रक** : **अतुलभाई शेठीया**
नवनीत प्रकाशन, मुंबई
Mob.:9823290180

**आवरणकार** : **किरीटभाई वडेचा**
Mob.:9820073336

प्राप्तिस्थान

**दिव्यदर्शन ट्रस्ट**
३९, कलिकुंड सोसायटी,
मफलीपुर चार रास्ता,
कलिकुंड, धोलका-३८७८१०
Ph.: (02714) 225482

**श्री श्रेयस्कर अंधेरी गुजराती जैन संघ**
१०६, एस. वी. रोड, इर्ला ब्रीज,
विलेपार्ले (प०) मुंबई-४०००५६
(Ph.): 26712631



ૠણમુક્ત્યર્થે
સંસારી માતુશ્રી **નંદિનીબેન**ને
જેમના માટે **ખલીલ ધનતેજવી**ના શબ્દોમાં કહું તો
"हम तो यूँ ही टूटकर बिखर जाते

मगर.....

आँधीयां लाचार थी माँ की दुवाओं के सामने"

Prkashkiya page no. 3

## હાર્દિક અનુમોદના

પરમપૂજ્ય ન્યાયકૂર્ચાલસરસ્વતી, સંઘ-શાસનકૌશલ્યાધાર
શ્રીમદ્ વિજય **જયસુંદરસૂરીશ્વરજી મહારાજા**ની પાવન પ્રેરણાથી
સુરત સ્થિત **શ્રી ઉમરા જૈન સંઘે** પોતાના જ્ઞાનનીધિમાંથી
આ ગ્રંથના પ્રકાશનનો સંપૂર્ણ લાભ લીધેલ છે.
તેમની આ શ્રુતભક્તિની અમે ભૂરી ભૂરી અનુમોદના કરીએ છીએ.

કુમારપાળ વી. શાહ
દિવ્યદર્શન ટ્રસ્ટ

Prkashkiya page no.4

## પ્રકાશકીય

યુગપ્રભાવક શ્રીમદ્ વિજય ભુવનભાનુસૂરિ મહારાજાની જન્મશતાબ્દી વર્ષે **સટીક આચારાંગ સૂત્ર ભા૦૧**ના પ્રકાશન દ્વારા દિવ્યદર્શન ટ્રસ્ટના સોનેરી ઈતિહાસમાં એક અધિક પ્રકરણ આલેખાઈ રહ્યું છે. પરમ પૂજ્ય વર્ધમાનતપોનિધિ ન્યાયવિશારદ શ્રીમદ્ વિજય **ભુવનભાનુ-સૂરીશ્વરજી મહારાજા** દ્વારા સંસ્થાપિત અમારા ટ્રસ્ટ દ્વારા અત્યાર સુધી પૂજ્ય **હરિભદ્રસૂરિ મ.** તથા પૂજ્ય મહોપાધ્યાય **યશોવિજયજી મહારાજા**ના અનેક જટિલ ન્યાયગ્રંથોના હિન્દી-ગુજરાતી અનુવાદો પ્રકાશિત થયા છે. તેમ જ આગમ સાહિત્ય પ્રકાશનના ક્ષેત્રે પણ અમારા ટ્રસ્ટને ઘણા લાંબા સમય પૂર્વે લાભ મળ્યો હતો. આજે **શીલાંકાચાર્ય**વિરચિત ટીકા સહિત **આચારાંગ સૂત્ર**ના પ્રકાશન દ્વારા અમને પુન: આગમભક્તિનો લાભ મળી રહ્યો છે તેનો હૈયે અપાર આનંદ છે.

પરમ પૂજ્ય **શીલાચાર્ય**(=શીલાંકાચાર્ય)વિરચિત ટીકા સહિત **આચારાંગ સૂત્ર**ના પ્રતાકારે તથા પુસ્તકાકારે અનેક પ્રકાશનો અત્યાર સુધી પ્રકાશિત થયા છે. પરંતુ, પ્રસ્તુત પ્રકાશન તેમાં પોતાની વિશિષ્ટ શૈલી દ્વારા આગવું સ્થાન પ્રાપ્ત કરશે એવો અમારો દૃઢ વિશ્વાસ છે. પરમ પૂજ્ય પુનાજિલ્લોદ્ધારક, પાર્શ્વપ્રજ્ઞાલયતીર્થસંસ્થાપક પંન્યાસપ્રવર શ્રી **વિશ્વકલ્યાણવિજય મહારાજા**ના પટ્ટાલંકાર પરમ પૂજ્ય લઘુ-લઘુહરિભદ્ર, ન્યાયમાર્તંડ પંન્યાસપ્રવર શ્રીમદ્ **યશોવિજયજી મહારાજા**ના પાવન આશીર્વાદ તથા અનુજ્ઞાથી તેઓશ્રીના શિષ્ય મુનિરાજે આજથી ૪ વર્ષ પૂર્વે **આચારાંગ ચૂર્ણિ**ના સંશોધનનો પ્રારંભ કર્યો હતો. આચારાંગ ચૂર્ણિના સંશોધન માટે અવારનવાર આચારાંગ ટીકાને પણ અવલોકવાનું થતું તે દરમ્યાન આચારાંગ ટીકામાં પણ કેટલાંક સ્થળે પાઠની સંદિગ્ધતા તેમને જણાતી હતી. તેથી આચારાંગ ચૂર્ણિની સાથે સાથે ટીકાનું પણ જો સંશોધન થાય તો અભ્યાસુ વર્ગને ઘણી સરળતા પડે એવી તેઓશ્રીના ગુરુદેવશ્રી **યશોવિજયજી મ.**ની ભાવનાથી પ્રેરાઇ આચારાંગ ટીકાના સંશોધનની વાત પૂજ્ય આગમપ્રજ્ઞ મુનિરાજશ્રી **જંબૂવિજયજી મહારાજા**ને જણાવી ત્યારે તેઓશ્રીએ જણાવ્યું કે 'આચારાંગ ટીકાના ૧ થી ૪ અધ્યયનનું સંશોધન પંડિતવર્ય શ્રી **અમૃતલાલ ભોજકે** કરેલ છે. તે જ સંશોધન હાલમાં હું પ્રકાશિત કરી રહ્યો છું.' તેથી મુનિરાજશ્રીએ **આચારાંગ શીલાંકાચાર્યટીકા**ના ૫મા અધ્યયનથી સંશોધનનો પ્રારંભ કર્યો. પાંચમાથી નવમા અધ્યયન સુધીનો બીજો ભાગ હાલ મુદ્રણાલયમાં છે. જે ટૂંક સમયમાં જ પ્રકાશિત કરવામાં આવશે.

પંડિત **અમૃતલાલ ભોજક** દ્વારા સંશોધિત તથા પૂ. **જંબૂવિજયજી** મ. દ્વારા સંપાદિત તેમજ **સિદ્ધિ-ભુવન-મનોહર ટ્રસ્ટ** દ્વારા પ્રકાશિત આચારાંગ ટીકાના ૧ થી ૪ અધ્યયનનો પ્રથમ ભાગ ૩ વર્ષ પૂર્વે પ્રકાશિત કરવામાં આવ્યો હતો. તે પુસ્તક અંગે પૂ. જંબૂવિજયજી મહારાજાએ મુનિરાજશ્રીને જણાવ્યું હતું કે 'હજુ આમાં કેટલાક સંસ્કારો કરવા પડે એવા છે તથા કેટલાક સ્થાને મૂળમાં મૂકેલ પાઠો હજુ પણ સંદિગ્ધ છે.' તેમના આ સૂચનને અનુલક્ષીને કેટલાંક સંદિગ્ધ જણાતા

પાઠોનું પુનઃ સંમાર્જન કરી તથા નૂતન પરિશિષ્ટો ઊમેરીને મુનિરાજશ્રીએ પ્રસ્તુત પ્રકાશનની ઉપાદેયતામાં જબ્બર વધારો કર્યો છે. તેથી તેઓને સહસ્રશઃ ધન્યવાદ અર્પીએ છીએ. તથા પૂ. **જંબૂવિજયજી** મહારાજ તથા **સિદ્ધિ-ભુવન-મનોહર ટ્રસ્ટે** પણ આ ગ્રંથ પ્રકાશન કરવાની સહર્ષ અનુમતિ આપી. તેથી તેઓનું પણ ઋણ સદાય અવિસ્મરણપથ ઉપર રહેશે.

પરમ પૂજ્ય સિદ્ધાંત દિવાકર, ગીતાર્થમૂર્ધન્ય, ગચ્છાધિપતિ શ્રીમદ્ વિજય **જયઘોષસૂરીશ્વરજી મહારાજા**ના પટ્ટાલંકાર પરમ પૂજ્ય ન્યાયકૂર્ચાલસરસ્વતી, સંઘ-શાસનકૌશલ્યાધાર શ્રીમદ્ વિજય **જયસુંદરસૂરીશ્વરજી મહારાજા**ની પાવન પ્રેરણાથી શ્રી **ઉમરા જૈન સંઘે** પોતાના જ્ઞાનનિધિમાંથી આ ગ્રંથના પ્રકાશનનો સંપૂર્ણ લાભ લીધેલ છે. તેમની આ શ્રુતભક્તિને હૃદયથી અભિવંદિત કરીએ છીએ.

પ્રાન્તે, પ્રસ્તુત પ્રકાશનના પઠન-પાઠન દ્વારા વાચકવર્ગ શીઘ્રાતિશીઘ્ર પરમપદને પામે એ જ અભ્યર્થના.

✍

**કુમારપાળ વી. શાહ**
**દિવ્યદર્શન ટ્રસ્ટ**



**णमो त्थु णं समणस्स भगवओ महावीरस्स ।**

**अनन्तलब्धिनिधानाय श्री गौतमस्वामिने नमः ।**

**पञ्चमगणधर श्री सुधर्मस्वामिने नमः ।**

**श्रीमद् विजय प्रेम-भुवनभानु-जयघोष-जयसुन्दरसूरि-**

**पंन्यासविश्वकल्याणविजयसद्गुरुभ्यो नमः।**

**परमकृपालु परमतारक गुरूदेव श्रीमद् पंन्यासप्रवर यशोविजयपादपद्मेभ्यो नमः ।**

## 'જિનાગમો વિજયતે' (પ્રસ્તાવના)

અનંત કલ્યાણકારી શ્રમણ ભગવાન **મહાવીર સ્વામી**ની પરમકૃપાથી તથા પરમ પૂજ્ય પરમોપકારી ભવોદધિતારક ગુરૂદેવશ્રી પંન્યાસપ્રવર શ્રીમદ્ **યશોવિજયજી** મહારાજની અસીમકૃપાથી, પંચમ ગણધર ભગવાન **સુધર્માસ્વામી**થી પરંપરાએ પ્રાપ્ત થયેલ શ્રી **આચારાંગ સૂત્ર**ને પંડિતવર્ય શ્રી **અમૃતલાલ ભોજક** વડે અનેક હસ્તલિખિત આદર્શોને આધારે સંશોધિત કરાયેલ તથા આગમપ્રજ્ઞ પૂજ્ય મુનિરાજ શ્રી **જંબૂવિજયજી** મહારાજા વડે સંપાદિત કરાયેલ નિર્વૃત્તિકુલીન શ્રી **શીલાચાર્ય**(પ્રસિદ્ધ નામ શીલાંકાચાર્ય) વિરચિત ટીકા સાથે યુગપ્રભાવક શ્રીમદ્ વિજય **ભુવનભાનુસૂરિ** મહારાજાની જન્મશતાબ્દી વર્ષે આગમાભ્યાસી વર્ગના કરકમળમાં અર્પણ કરતાં અમને અપાર આનંદનો અનુભવ થાય છે.

વિક્રમ સંવત ૨૦૬૨નું મારૂં ચાર્તુમાસ મલાડ, હીરસૂરી જૈન સંઘમાં હતું ત્યારે પૂજ્યપાદ ગુરૂદેવશ્રીએ કહ્યું કે '**આચારાંગ ચૂર્ણિ**નું સંશોધન કર'. ત્યારથી મારા માટે તદ્દન અજાણ એવા આ નવા સંશોધનજગતમાં મારો પ્રવેશ થયો. તે પૂર્વે પૂજ્યપાદ દીક્ષાદાનેશ્વરી **ગુણરત્નસૂરીશ્વરજી** મહારાજના શિષ્યરત્ન પૂજ્યપાદ **પુણ્યરત્નસૂરીશ્વરજી** મહારાજા આચારાંગ ચૂર્ણિનું સંશોધન કરી રહ્યા હતા. લગભગ ૪ અધ્યયન સુધી સંશોધન પૂર્ણ થવા આવ્યું હતું. ત્યાર બાદ સમય-સંજોગના અભાવે કાર્ય આગળ વધી શક્યું નહિ. પૂ. પુણ્યરત્નસૂરીશ્વરજી મહારાજે આ આંતરવ્યથા મારા ગુરૂદેવશ્રીને જણાવી અને ત્યારે પૂ. પુણ્યરત્નસૂરીશ્વરજી મહારાજની સહર્ષ અનુમતિથી તથા પરમકૃપાળુ ગુરૂદેવની અસીમ કૃપાથી આચારાંગ ચૂર્ણિના સંશોધનનો પ્રારંભ થયો.

આચારાંગ ચૂર્ણિના સંશોધન દરમ્યાન ચૂર્ણિમાં આવતા અનેક દુર્ગમ સ્થળોએ વારંવાર આચારાંગ ટીકાને અવલોકવાનું બનતું હતું. તે વખતે આચારાંગ ટીકામાં પણ કેટલાક સ્થળે પાઠોની સંદિગ્ધતા નજર સમક્ષ આવી. તેથી આચારાંગ ટીકાનું પણ સાથે સાથે જો સંશોધન થાય તો અભ્યાસુ વર્ગને અધ્યયનમાં સુગમતા રહે એવી લાગણી ઊંડે ઊંડે રહેતી હતી. દિવ્યપ્રભાવી પૂજ્યપાદ ગુરૂદેવશ્રી મારા મનનો આ વિચાર જાણી ગયા ન હોય તેમ એકવાર પ્રભાસપાટણ

મુકામે મને સામેથી કહ્યું કે 'આચારાંગ ટીકાનું પણ સાથે સાથે જો સંશોધન થાય તો અધ્યેતા વર્ગને ચૂર્ણિનું અધ્યયન સરળ થાય.' 'ભાવતું'તું ને વૈદે કીધું' એવી સ્થિતિ મારા માટે સર્જાઇ. પૂજ્ય ગુરૂદેવશ્રીની ભાવનાને શિરસાવંદ્ય કરી પ્રાચીન-પ્રાચીનતમ તાડપત્રીય હસ્તાદર્શોને મેળવવા પુરુષાર્થ પ્રારંભ્યો. આ અંગે પૂજ્યપાદ **જંબૂવિજયજી** મહારાજાને પૂછાવતાં એમણે જણાવ્યું કે 'આચારાંગ ટીકાના ૧ થી ૪ અધ્યયન સુધીનું સંશોધન પંડિતવર્ય શ્રી **અમૃતલાલ ભોજકે** કરેલ છે. તેની પ્રેસકૉપી પ્રાકૃત ગ્રન્થ પરિષદમાં વિદ્યમાન છે. તથા તે પ્રેસકૉપીના આધારે હું તેનું યથાવત્ સંપાદન કરી રહ્યો છું.' આ સમાચાર પછી આચારાંગ ટીકાનું સંશોધનકાર્ય વધારે સરળ બન્યું. વળી, પૂજ્ય જંબૂવિજયજી મહારાજાએ તે આચારાંગ ટીકાની પ્રેસકૉપી, પોતે સંપાદિત કરેલ ગ્રંથ મોકલાવ્યા તથા તેની C.D.પણ ઉપયોગમાં લઇ શકાશે એવી સહર્ષ અનુમતિ આપી. તેઓશ્રીના આ અસીમ ઉપકારથી ૧ થી ૪ અધ્યયનનું કાર્ય મારા માટે અત્યંત સરળ બની ગયું. તેઓશ્રીનો આ ઉપકાર સદાય માનસપટ ઉપર અંકિત રહેશે. ત્યાર બાદ પાંચમા અધ્યયનથી સંશોધનનો પ્રારંભ કર્યો. હાલ ૫ થી ૯ અધ્યયન સુધીનો બીજો ભાગ પ્રેસમાં છે જે ટૂંક સમયમાં પ્રકાશિત કરવામાં આવશે.

પૂર્વે પૂજ્યપાદ ગુરૂદેવશ્રીની ભાવના હતી કે 'આચારાંગ ટીકા તથા ચૂર્ણિ બન્ને સાથે પ્રકાશિત કરવા. જેથી અધ્યેતા વર્ગને એક જ પુસ્તકમાં સુલભતાથી બન્ને વ્યાખ્યાગ્રંથો મળી રહે.' આ ભાવનાને અનુલક્ષીને ટીકા તથા ચૂર્ણિ બન્નેનું કાર્ય સાથે ચાલતું હતું. પરંતુ, પૂજ્યપાદ તાર્કિકશિરોમણિ આચાર્યદેવ શ્રીમદ્ વિજય **જયસુંદરસૂરીશ્વરજી** મહારાજાએ સૂચન કર્યું કે 'આચારાંગ ટીકા, આચારાંગ ચૂર્ણિ તથા બન્ને સંયુકત હોય એ રીતે પ્રકાશિત કરો. જેથી અભ્યાસુ વર્ગને તમામ સામગ્રી ઉપલબ્ધ બને.' તેથી પૂજ્ય આચાર્યશ્રીની સૂચનાને અનુસારે હાલ **આચારાંગ ટીકા** ૧ થી ૪ અધ્યન પ્રકાશિત કરી રહ્યા છીએ. બાકીના પ્રકાશનો પણ યથાવસર પ્રકાશિત કરવામાં આવશે.

વિક્રમ સંવત્ ૨૦૩૩માં મહાવીર જૈન વિદ્યાલય દ્વારા જૈન આગમ ગ્રંથમાલાનાં ગ્રંથાંક ૨(૧) રૂપે **આચારાંગ સૂત્ર-મૂલ** પૂજ્ય જંબૂવિજયજી મહારાજે પ્રકાશિત કર્યું હતું. તે ગ્રંથની પ્રસ્તાવનામાં પૂજ્ય જંબૂવિજયજી મ.એ આચારાંગ સૂત્ર અંગે વિસ્તૃત છણાવટ કરી છે. જિજ્ઞાસુ વર્ગને તે પ્રસ્તાવના જોવા ખાસ ભલામણ છે. તેમ છતાં, આચારાંગ સૂત્ર અંગે કંઈક જણાવવાની અમારી અદમ્ય ઈચ્છાને અમે રોકી શકતાં નથી.

**આચારાંગ સૂત્ર અંગે કિંચિત્**

શ્રી **આચારાંગ સૂત્ર** એ જૈનપ્રવચનનો સાર છે. ચૌદ પૂર્વધર ભગવાન **ભદ્રબાહુ સ્વામી** આચારાંગ નિર્યુક્તિમાં આચારાંગ સૂત્રનું માહાત્મ્ય દર્શાવતાં જણાવે છે કે[1] 'તીર્થંકર ભગવંતો તીર્થપ્રવર્તનના પ્રારંભમાં જ આચારાંગના અર્થની

---

टि० १.सव्वेसिं आयारो तित्थस्स पवत्तणे पढमयाए । सेसाइं अंगाइं एक्कारस आणुपुव्वीए ॥८॥
आयारो अंगाणं पढमं अंगं दुवालसण्हं पि । एत्थ य मोक्खोवाओ एस य सारो पवयणस्स ॥९॥
आयारम्मि अहीए जं णाओ होइ समणधम्मो उ । तम्हा आयारधरो भण्णइ पढमं गणिट्ठाणं ॥१०॥

પ્રરૂપણા કરે છે. તથા ગણધરો પણ એ જ ક્રમે સૂત્રોની રચના કરે છે. તેમ જ આચારાંગમાં મોક્ષના ઉપાયનું નિદર્શન કરવામાં આવ્યું છે. આચારાંગના અધ્યયનથી જ શ્રમણધર્મનું જ્ઞાન પ્રાપ્ત થાય છે. તેથી આચારધર એ ગણિત્વ = આચાર્યત્વનું પ્રથમ સ્થાન છે.'

આચારાંગ નિર્યુક્તિમાં આચારાંગ સૂત્રના બીજા નામોનો પણ નિર્દેશ કરવામાં આવ્યો છે. જેમ કે, [1]આચાર-આચાલ-આગાલ-આકાર-આશ્વાસ-આદર્શ-અંગ-આચીર્ણ-આજાતિ અને આમોક્ષ. આ ૧૧ પર્યાયવાચી નામોના અર્થ વાચકવર્ગે ટીકા તથા ચૂર્ણિમાંથી જોઇ લેવા વિનંતિ. વિસ્તારભયથી અમે અંહી દર્શાવતા નથી.

દ્વાદશાંગીમાં આચારાંગ સૂત્ર પ્રથમ છે એ તો અત્યંત પ્રસિદ્ધ વાત છે. પરંતુ આચારાંગ સૂત્રની પ્રથમતા કઇ રીતે છે, રચનાની અપેક્ષા એ કે સ્થાપનાની અપેક્ષાએ ? એ અંગે પૂર્વાચાર્યોના વિભિન્ન મત છે. મુખ્ય ૪ મત પ્રવર્તે છે.

[2]**આચારાંગ ચૂર્ણિકારજી**ના મતે સર્વે તીર્થંકર ભગવંતો તીર્થપ્રવર્તનના પ્રારંભમાં આચારાંગનો અર્થ સૌ પ્રથમ કહે છે અને ત્યાર પછી ૧૧ અંગોનો અર્થ કહે છે. અને તે જ ક્રમથી ગણધર ભગવંતો સૂત્રની રચના કરે છે. આચારાંગ વૃત્તિકાર **શીલાચાર્ય**(પ્રસિદ્ધ નામ શીલાંકાચાર્ય) પણ ચૂર્ણિકારજીના મત પ્રમાણે જ આચારાંગ વૃત્તિમાં વિવરણ કરે છે. (જુઓ પૃ૦૧૧ પં૦૫-૭)

[3]**નંદિસૂત્ર** ઉપરની ચૂર્ણિમાં ભગવાન **જિનદાસગણીજી** જણાવે છે કે તીર્થપ્રવર્તનના પ્રારંભમાં તીર્થંકર ભગવંતો પૂર્વગત સૂત્રોનો અર્થ પ્રથમ કહે છે માટે તેને પૂર્વ કહેવામાં આવે છે. જ્યારે ગણધર ભગવંતો સૂત્રની રચના કરે છે ત્યારે આચારાંગ, સૂત્રકૃતાંગ આ ક્રમથી રચના કરે છે. અને સ્થાપના પણ આ જ ક્રમથી રચના કરે છે. અન્ય આચાર્યોના મતે તીર્થંકર ભગવંતો ૧૪ પૂર્વનો અર્થ સૌ પ્રથમ કહે છે અને ગણધર ભગવંતો પણ સૌથી પ્રથમ પૂર્વોની રચના કરે

---

टि० १. आयारो आचालो आगालो आगरो य आसासो । आयरिसो अंगं ति य आइण्णाऽऽजाइ आमोक्खो ॥ २. '.....**सव्वेसिं आयारो** गाहा । सव्वतित्थगरा वि आयारस्स अत्थं पढमं आइक्खंति, ततो सेसगाणं एकारसण्हं अंगाणं, ताए चेव परिवाडीए गणहरा वि सुत्तं गंथंति ।'– आचा०चू०८ ॥ ३. '**से किं तं पुव्वगतं** ? ति, उच्यते– जम्हा तित्थकरो तित्थपवत्तणकाले गणधराण सव्वसुताधारत्तणतो पुव्वं पुव्वगतसुत्तत्थं भासति तम्हा पुव्व त्ति भणिता, गणधरा पुण सुत्तरयणं करेंता आयाराइकमेण रयंति ट्ठवेंति य । अण्णायरियमतेणं पुण पुव्वगतसुत्तत्थो पुव्वं अरहता भासितो, गणहरेहि वि पुव्वगतसुत्तं चेव पुव्वं रइतं, पच्छा आयाराइ । एवमुक्ते चोदक आह– णणु पुव्वावरविरुद्धं, कम्हा ?, जम्हा आयारनिज्जुत्तीए भणितं "**सव्वेसिं आयारो**" [आचा०नि०८] गाहा । आचार्याऽऽह –सत्यमुक्तं, किंतु सा ठवणा, इमं पुण अक्खररयणं पडुच्च भणितं, पुव्वं पुव्वा कता इत्यर्थः ।'– नन्दीसू०चू०पृ०७५, नन्दीसू०हारि०वृ०पृ०८८ ॥

છે, ત્યાર પછી આચારાંગ આદિની રચના કરે છે. નંદિસૂત્ર ઉપરની **હારિભદ્રીય વૃત્તિ**માં પણ આ જ માન્યતાનું સમર્થન કરવામાં આવ્યું છે (જુઓ નંદીહારિભદ્રીય વૃત્તિ પૃ૦૮૮). તથા [1]**સમવાયાંગવૃત્તિ**માં પણ **અભયદેવસૂરીશ્વરજી** મહારાજ આ જ મતની પુષ્ટિ કરે છે.

[2]સમવાયાંગવૃત્તિકાર **અભયદેવસૂરીશ્વરજી**ના બીજા મત પ્રમાણે આચારાંગસૂત્ર સ્થાપનાની અપેક્ષાએ પ્રથમ છે, પરંતુ રચનાની દૃષ્ટિએ બારમું છે.

આ રીતે,

૧. આચારાંગ ચૂર્ણિ-વૃત્તિકારના મતે આચારાંગસૂત્ર અર્થ અને સૂત્રરચનાની અપેક્ષાએ પ્રથમ.

૨. નંદિસૂત્ર ચૂર્ણિકાર-હરિભદ્રસૂરિજીના મતે અર્થરચનાની દૃષ્ટિએ આચારાંગસૂત્ર ૧૪ પૂર્વ પછી અને સૂત્રરચનાની દૃષ્ટિએ પ્રથમ.

૩. અન્ય આચાર્યોના મતે અર્થ-સૂત્રરચનાની દૃષ્ટિએ ૧૪ પૂર્વ પછી.

૪. સમવાયાંગવૃત્તિકાર અભયદેવસૂરિ મ.ની માન્યતા બે પ્રકારની છે. ૧. નંદિચૂર્ણિકારના મત પ્રમાણે તથા ૨.સૂત્રરચનાની દૃષ્ટિએ બારમું અને સ્થાપનાની અપેક્ષાએ પ્રથમ.

શ્રી આચારાંગસૂત્રનું પ્રથમ સૂત્ર છે.

**सुयं मे आउसं । तेण भगवया एवमक्खायं - इहमेगेसिं णो सण्णा भवति ।**

હે આયુષ્યમાન જંબૂ ! મેં સાંભળ્યું છે તે શ્રમણ ભગવાન મહાવીરે આ પ્રમાણે કહ્યું છે કે આ જગતમાં કેટલાંકને (હું ક્યાંથી આવ્યો છું અને ક્યાં જવાનો છું વગેરે) સંજ્ઞા હોતી નથી.

આ સૂત્રથી જંબૂસ્વામીને ઉદ્દેશીને પંચમ ગણધર ભગવાન **સુધર્માસ્વામી** આચારાંગસૂત્રનો પ્રારંભ કરે છે. એટલે આચારાંગ સૂત્રના રચયિતા ભગવાન સુધર્માસ્વામી છે એ નિર્વિવાદપણે માન્ય છે.

આચારાંગ સૂત્રના ૨ શ્રુતસ્કંધ છે. તેમાં પ્રથમ શ્રુતસ્કંધનું નામ **આચાર** છે અને તે શ્રુતસ્કંધના નવ અધ્યયનો હોવાથી **બ્રહ્મચર્ય** એમ બીજા નામે પણ પ્રસિદ્ધ છે. આ પ્રથમ

---

टि० १. 'अथ **किं तत् पूर्वगतम्** ?, उच्चते— यस्मात् तीर्थकरः तीर्थप्रवर्त्तनाकाले गणधराणां सर्वसूत्राधारत्वेन पूर्वं पूर्वगतसूत्रार्थं भाषते तस्मात् पूर्वाणीति भणितानि, गणधराः पुनः श्रुतरचनां विदधाना आचारादिक्रमेण रचयन्ति स्थापयन्ति च, मतान्तरेण तु पूर्वगतसूत्रार्थः पूर्वमर्हता भाषितो गणधरैरपि पूर्वगतश्रुतमेव पूर्वं रचितं पश्चादाचारादि । नन्वेवं यदाचारनियुक्त्यामभिहितं— "**सव्वेसिं आयारो पढमो**" [आचा०नि०८] इत्यादि तत् कथम् ?, उच्यते-तत्र स्थापनामाश्रित्य तथोक्तम, इह त्वक्षररचनां प्रतीत्य भणितं 'पूर्वं पूर्वाणि कृतानि' इति ।'—समवा०सू०वृ०१४७(४), पृ० २४९-५० ॥ २. '.....प्रथममङ्गं स्थापनामधिकृत्य, रचनापेक्षया तु द्वादशमङ्गं प्रथमम्, पूर्वगतस्य सर्वप्रवचनात् पूर्वं क्रियमाणत्वादिति' —समवा०सू०वृ०१३६-२, पृ०२११ ॥

શ્રુતસ્કંધના રચયિતા પંચમ ગણધર ભગવાન સુધર્માસ્વામી છે. જ્યારે દ્વિતીય શ્રુતસ્કંધના રચયિતા વિષે જુદા જુદા ઉલ્લેખો મળે છે. તેની વિસ્તૃત વિવેચના અહીંયા ન કરતાં ૩જા ભાગમાં કરવા ધારીએ છીએ.

આચારાંગ સૂત્રના પ્રથમ શ્રુતસ્કંધમાં નવ અધ્યયનો છે. તેમજ બીજા શ્રુતસ્કંધની પાંચમી ચૂલા **નિશીથસૂત્ર**નું પ્રસ્થાન સ્વતંત્ર રૂપે થતું હોવાથી, તે સિવાયની ચાર ચૂલિકાઓના બનેલા દ્વિતીય શ્રુતસ્કંધના ૧૬ અધ્યયનો છે. આ રીતે આચારાંગ સૂત્રમાં કુલ ૨૫ અધ્યયનો છે. તેમાંથી આ પ્રથમ ભાગમાં પ્રથમ શ્રુતસ્કંધના આદ્ય ૪ અધ્યયનો ટીકા સાથે પ્રકાશિત થઇ રહ્યા છે. બીજા ભાગમાં પ્રથમ શ્રુતસ્કંધના પાંચ થી નવ અધ્યયનો તેની ટીકા સાથે તથા ત્રીજા ભાગમાં સંપૂર્ણ દ્વિતીય શ્રુતસ્કંધ પ્રકાશિત કરવાની ધારણા રાખીએ છીએ.

પ્રથમ શ્રુતસ્કંધના પ્રથમ ચાર અધ્યયનના નામ આ પ્રમાણે છે. **૧. શસ્ત્રપરિજ્ઞા, ૨.લોકવિજય, ૩. શીતોષ્ણીય, ૪. સમ્યક્ત્વ.** સ્થાનાંગ સૂત્ર(સૂ૦૬૬૨)માં, સમવાયાંગ સૂત્ર (સૂ૦૯-૧)માં તથા પ્રશમરતિ પ્રકરણમાં પણ ભગવાન **ઉમાસ્વાતિજીએ** આ જ નામોનો આ જ ક્રમથી ઉલ્લેખ કર્યો છે. તે ચાર અધ્યયનમાં પ્રથમ શસ્ત્રપરિજ્ઞા અધ્યયનના ૭ ઉદ્દેશક છે. બીજા લોકવિજય અધ્યયનના ૬ ઉદ્દેશક છે. જ્યારે ત્રીજા શીતોષ્ણીય અધ્યયનના ૪ ઉદ્દેશક છે. તથા ચોથા સમ્યક્ત્વ અધ્યયનના પણ ૪ ઉદ્દેશક છે. આ રીતે કુલ મળીને ૪ અધ્યયન તથા તેના ૨૧ ઉદ્દેશકો આ પ્રથમ ભાગમાં સમાવિષ્ટ થયા છે.

આચારાંગ નિર્યુક્તિકાર ભગવાન **ભદ્રબાહુ સ્વામી** આ ચારેય અધ્યયનનો સંક્ષિપ્તસાર જણાવતા કહે છે કે 'શસ્ત્રપરિજ્ઞામાં જીવસંયમ એટલે ષટ્કાયની હિંસાનો ત્યાગ કરવો. બીજા અધ્યયનમાં શું કરવાથી જીવ કર્મોથી બંધાય છે. શું કરવાથી કર્મથી મુક્ત થાય છે. તે જાણી લોક=કષાયોનો વિજય કરવો. તેમ જ ત્રીજા શીતોષ્ણીય અધ્યયનમાં અનુકૂળ-પ્રતિકૂળ ઉપસર્ગો આવી પડે તો પણ સમભાવથી તેને સહન કરવા. તથા ચોથા અધ્યયનમાં અન્યધર્મીઓની અણિમાદિ ઋદ્ધિઓ જોઈને સમ્યક્ત્વથી ચલાયમાન ન થવું'. ભગવાન **ઉમાસ્વાતિ વાચકે** પણ પ્રશમરતિ પ્રકરણમાં આ ચાર અધ્યયનનો સંક્ષિપ્તસાર વર્ણવ્યો છે. તે આ પ્રમાણે- ૧. ષડ્જીવનિકાયની યતના, ૨. લૌકિક સંતાન અને ગૌરવનો ત્યાગ, ૩. શીત, ઉષ્ણ આદિ પરીષહોનો વિજય, ૪. અવિકમ્પ્ય-ચલિત ન કરી શકાય એવું અચલ સમ્યક્ત્વ.

આચારાંગ સૂત્ર ઉપર વર્તમાનમાં ચૌદપૂર્વધર ભગવાન ભદ્રબાહુસ્વામી વિરચિત નિર્યુક્તિ,

**આચારાંગ સૂત્રની** પૂર્વાચાર્ય (સંભવત: જિનદાસગણિ મહત્તર) વિરચિત ચૂર્ણિ. નિર્વૃત્તિ-

**વ્યાખ્યાઓ.** કુલીન શ્રીશીલાચાર્ય(પ્રસિદ્ધ નામ શીલાંકાચાર્ય)રચિત વૃત્તિ, ખરતરગચ્છીય આચાર્ય જિનહંસસૂરિરચિત દીપિકા, અંચલગચ્છીય માણિકયશેખરસૂરિસંદબ્ધ દીપિકા

ટિ૦ ૧. જુઓ આચા૦નિ૦૩૩ પૃ૦૧૮. ૨. જુઓ પ્રશમરતિ પ્રકરણ ગા૦૧૧૪.

તથા મુનિહર્ષકલ્લોલવિરચિત અવચૂરિ ઉપલબ્ધ થાય છે.

તદુપરાંત, વિક્રમના બીજા સૈકામાં થઇ ગયેલા પૂર્વમહર્ષિ આચાર્ય **ગંધહસ્તિસૂરિ** એ[1] પણ આચારાંગ સૂત્ર તેમ જ બાકીના ૧૦ અંગો ઉપર વિવરણ રચ્યું હતું એવા ઉલ્લેખો **હિમવંત થેરાવલી**માં મળે છે. તેમ જ શ્રી શીલાચાર્યે(=શીલાંકાચાર્યે) પણ આચારાંગ વૃત્તિના પ્રારંભમાં મંગલ કરતાં જણાવ્યું છે કે '[2]શ્રી ગંધહસ્તિ વડે કરાયેલ શસ્ત્રપરિજ્ઞા અધ્યયનનું વિવરણ અત્યંત વિશાળ તથા ગહન છે. તે વિવરણમાંથી સુખેથી બોધ કરી શકાય તે માટે હું સાર ને ગ્રહણ કરૂં છુ.' તથા આચારાંગ વૃત્તિમાં બીજા લોકવિજય અધ્યયનના વિવરણનો પ્રારંભ કરતી વખતે પણ શ્રી શીલાચાર્યજી જણાવે છે કે '[3]પૂજ્ય ગંધહસ્તિમિશ્ર વડે વિવરણ કરાયેલ શસ્ત્રપરિજ્ઞાવિવરણ અતિગહન છે. (તેથી મારા વડે તેનું) વિવરણ કરાયું. તે પછી હવે હું બાકી રહેલા અધ્યયનનું વિવરણ કરૂં છું.'

આ ઉલ્લેખો ઉપરથી એટલું તો અસંદિગ્ધપણે નિશ્ચિત થાય છે કે પૂજ્ય ગંધહસ્તિમિશ્ર વડે શસ્ત્રપરિજ્ઞા ઉપર વિવરણ રચાયું હતું અને તે વિક્રમના દશમા સૈકા સુધી અર્થાત્ શ્રી શીલાચાર્યજીના સત્તાકાળ સુધી વિદ્યમાન હતું. બાકીના અધ્યયનો ઉપર ગંધહસ્તિસૂરિએ વિવરણ રચ્યુ હતું કે નહીં? તે શંકાના સમાધાન માટે પૂજ્ય આગમપ્રભાકર **પુણ્યવિજયજી** મહારાજા [4]બૃહત્કલ્પસૂત્રના છઠ્ઠા ભાગના આમુખમાં જણાવે છે કે 'જો કે ઉપર હિમવંત થેરાવલીમાં જણાવેલ અગીયાર અંગના વિવરણો પૈકી એક પણ વિવરણ આજે આપણી સામે નથી. તે છતાં આચાર્ય શ્રી શીલાંકે પોતાની આચારાંગ સૂત્ર ઉપરની ટીકાના પ્રારંભમાં "शस्त्रपरिज्ञाविवरणमतिबहु गहनं च गन्धहस्तिकृतम्" એમ જણાવ્યું છે તે જોતાં હિમવંત થેરાવલીમાંનો ઉલ્લેખ તરછોડી નાખવા જેવો નથી, અસ્તુ.'

---

ટિ૦ ૧. 'હિમવંત થેરાવલી' માં નીચે પ્રમાણે ઉલ્લેખ મળે છે-आर्यरेवती नक्षत्राणां आर्यसिंहाख्या: शिष्य अभूवन्, ते च ब्रह्मद्वीपिकाशाखोपलक्षिता अभूवन् । तेषामार्यसिंहानां स्थविराणां मधुमित्रा-ऽऽर्यस्कन्दिलाचार्यनामानौ द्वौ शिष्यावभूताम् । आर्यमधुमित्राणां शिष्या आर्यगन्धहस्तिनोऽतीव विद्वांस: प्रभावकाश्चाभूवन् । तैश्च पूर्वस्थविरोत्तंसोमास्वातिवाचकरचिततत्त्वार्थोपरि अशीतिसहस्रश्लोकप्रमाणं महाभाष्यं रचितम् । एकादशाङ्गोपरि चार्यस्कन्दिलस्थविराणामुपरोधतस्तैर्विवरणानि रचितानि । यदुक्तं तद्रचिताचाराङ्गविवरणान्ते यथा–

'थेरस्स महुमित्तस्स, सेहेहिं तिपुव्वनाणजुत्तेहिं । मुणिगणविवंदिएहिं, ववगयरागाइदोसेहिं ॥
बंभद्दीवियसाहामउडेहिं गंधहत्थिविबुहेहिं । विवरणमेयं रइयं दोसयवासेसु विक्कमओ ॥'

२. शस्त्रपरिज्ञाविवरणमतिबहु गहनं च गन्धहस्तिकृतम् ।
तस्मात् सुखबोधार्थं गृह्णाम्यहमञ्जसा सारम् ॥-आचाराङ्गवृत्ति पृ०१ ॥

३. शस्त्रपरिज्ञाविवरणमतिगहनमितीव किल वृतं पूज्यै: ।
श्रीगन्धहस्तिश्रैर्विवृणोमि ततोऽहमवशिष्टम् ॥-आचाराङ्गवृत्ति पृ०१५३ ॥

૪. જુઓ બૃહત્કલ્પસૂત્ર, છઠ્ઠો ભાગ, આમુખ પૃ૦૩-૪.

પૂ. આગમપ્રભાકરજીના આ વચન મુજબ પૂ. પુણ્યવિજયજીને ગન્ધહસ્તિસૂરિજીએ ૧૧ અંગો ઉપર વિવરણ રચ્યું હતું આ વાત માન્ય હોય તેવું લાગે છે. જો કે, વર્તમાનમાં કેટલાંક વિદ્વાન મહાશયો તથાવિધ અજ્ઞાત કારણે કહેવાતા ઇતિહાસવિદોનું આલંબન લઇને પ્રમાણ રજૂ કર્યા વિના જ હિમવંત થેરાવલીને અર્વાચીન ઠરાવવાનો પ્રયાસ કરી રહ્યા છે તે પ્રયાસ કેટલો સ્તુત્ય ગણાય તેની વિચારણા અમે વાચકવર્ગ ઉપર જ છોડીએ છીએ.

આચારાંગસૂત્ર ઉપર એક પ્રાચીન ચૂર્ણિ પણ વર્તમાનમાં ઉપલબ્ધ થાય છે. તે સંભવતઃ પૂજ્ય જિનદાસગણિ મહત્તરશ્રીએ રચી હોય તેવું લાગે છે. તે અંગે વિસ્તૃત વિવેચના અમે ટૂંક સમયમાં જ પ્રકાશિત થનાર **આચારાંગ ચૂર્ણિ ભાગ - ૧** ની પ્રસ્તાવનામાં કરવા ઇચ્છીએ છીએ. તે સિવાયની અન્ય ચૂર્ણિ અંગે પૂજ્ય ન્યાયત્રિપુટીજી **જૈન પરંપરાનો ઇતિહાસ** ભા-૧માં જણાવે છે કે-

'[૧]તેમણે(=આચાર્યસિદ્ધસેનગણિએ) 'તત્ત્વાર્થસૂત્ર' ઉપર મોટી ટીકા, આચારાંગ સૂત્રની ચૂર્ણિ અને આ૦ જિનભદ્રગણીના જિતકલ્પની ચૂર્ણિની રચના કરી છે.

જો કે તેમની આચારાંગ ચૂર્ણિ મળતી નથી, કિન્તુ આ૦ શીલાંકસૂરિ આચારાંગ સૂત્રના પ્રારંભમાં શસ્ત્રપરિજ્ઞા ઉપર બનેલા ગંધહસ્તિવિવરણને સંભારે છે. એટલે એ રચના ગંધહસ્તિ તરીકે ઓળખાતા આ૦ સિદ્ધસેનગણીની ચૂર્ણિરૂપે હોય, એ બનવાજોગ છે. તેમનો એ ચૂર્ણિરચનાનો યુગ છે.'

આ રીતે ન્યાયત્રિપુટીજી ગંધહસ્તિસૂરિના શસ્ત્રપરિજ્ઞાવિવરણને આચારાંગ ચૂર્ણિ રૂપે દર્શાવી રહ્યા છે. હિમવંત થેરાવલીના નિર્દેશ ઉપરથી આ.ગંધહસ્તિસૂરિનો સત્તાકાળ વિક્રમની બીજી શતાબ્દી જણાય છે. જ્યારે પૂ. ન્યાયત્રિપુટીજી તત્ત્વાર્થસૂત્રના ટીકાકાર આ. સિદ્ધસેનગણિ, જે ગંધહસ્તિરૂપે પ્રસિદ્ધ છે. તેમને આચારાંગ સૂત્રના ચૂર્ણિકાર રૂપે સ્વીકારે છે. આ. સિદ્ધસેનગણિનો સત્તાકાળ વિક્રમસંવત ૭૦૦ની આસપાસનો છે. બન્ને ગંધહસ્તિમાં પ્રાયઃ ૫૦૦ વર્ષનો તફાવત પડે છે. તેથી પૂ. ન્યાયત્રિપુટીજીનું મંતવ્ય સંગત જણાતું નથી. તદુપરાંત, **[૨]સમવાયાંગસૂત્ર**ની ટીકામાં વ્યાખ્યાકાર

---

**ટિ૦** ૧. જુઓ જૈન પરંપરાનો ઇતિહાસ, ભા-૧, પૃ૦૩૮૫-૮૬૧. ૨.'इह च विजयादिषु जघन्यतो द्वात्रिंशत् सागरोपमाण्युक्तानि, गन्धहस्त्यादिष्वपि तथैव दृश्यते' - समवायांगसूत्रवृत्ति, पृ०२६९, पं०७ આ પંક્તિ ઉપર પૂ. જંબૂવિજયજી મ. ની ટિપ્પણ આ પ્રમાણે છે.–

**तत्त्वार्थटीका**कर्त्तुः **सिद्धसेना**चार्यस्य **गन्धहस्ति**नाम्ना प्रसिद्धिरस्ति । किन्तु तत्त्वार्थस्य सिद्धसेनाचार्यविरचितायां टीकायामीदृशः पाठो वर्तते-"विजयादिषु चतुर्षु जघन्येन एकत्रिंशत् उत्कर्षेण द्वात्रिंशत्, सर्वार्थसिद्धे त्रयस्त्रिंशत् सागरोपमाणि अजघन्योत्कृष्टा स्थितिः । **भाष्यकारेण** तु सर्वार्थसिद्धेऽपि जघन्यापि द्वात्रिंशत् सागरोपमाण्यधीता, तत्र विद्मः केनाप्यभिप्रायेण" [तत्त्वार्थटीका ४।३२] । अत इदमभयदेवसूरिवचनं तत्त्वार्थव्याख्याकर्त्तुः सिद्धसेनाचार्यस्य गन्धहस्तित्वप्रसिद्धिबाधकम्, ततः चिन्त्यमिदम् ।

અભયદેવસૂરિએ એક સ્થળે ગંધહસ્તિસૂરિના નામથી પાઠનો નિર્દેશ કર્યો છે. તે પાઠ તત્ત્વાર્થ-ટીકાકાર સિદ્ધસેનગણિના પાઠ કરતાં ભિન્ન છે. તેથી પૂ. આગમપ્રજ્ઞ જંબૂવિજયજી મહારાજાએ તે અભયદેવસૂરિના પાઠના આધારે આ. સિદ્ધસેનગણિની ગંધહસ્તિરૂપે પ્રસિદ્ધિ ઉપર ટિપ્પણમાં પ્રશ્નાર્થ ઉભો કર્યો છે. તેથી આ સિદ્ધસેનગણિએ આચારાંગસૂત્ર ઉપર ચૂર્ણિ બનાવી છે એવું ન્યાયત્રિપુટીજીનું કથન પણ વિચારણીય બને છે. ટૂંકમાં, પૂજ્ય ગન્ધહસ્તિસૂરિએ આચારાંગસૂત્ર ઉપર વિવરણ રચ્યું છે એ વાત નિર્વિવાદપણે સિદ્ધ થાય છે. પણ તે ગન્ધહસ્તિ કોણ ? એ મુદ્દો વિચારણીય બને છે. આ વિષય ઉપર વિશદ વિચારણા કરે એવી વિદ્વત્ જગતને મારી નમ્ર પ્રાર્થના, અસ્તુ.

વર્તમાનમાં જૈનસંઘમાં છેલ્લાં કેટલાંય સૈકાઓથી જે આચારાંગ ટીકાનું અધ્યયન બહુલ પ્રમાણમાં થાય છે. તેના ટીકાકારશ્રીનું પુણ્યનામધેય છે આચાર્ય શ્રી **શીલાચાર્ય**. તેઓ **શીલાકાંચાર્ય**રૂપે પ્રસિદ્ધિને પામ્યા છે. તથા તેમનું બીજું નામ **તત્વાદિત્ય** પણ છે. તે શીલાચાર્ય વડે વિરચિત આચારાંગ ટીકાના પ્રથમભાગનું પ્રકાશન અમે હાલ કરી રહ્યા છીએ. તેમના જીવન-કવન અંગે જે થોડી ઘણી માહિતી પ્રાપ્ત થાય છે તે અમે વાચકવર્ગ સમક્ષ રજૂ કરીએ છીએ.

**ટીકાકાર અને સમય**

વર્તમાનમાં ઉપલબ્ધ થતી આચારાંગ ટીકાના કર્તા **શીલાચાર્ય** નિર્વૃત્તિકુલના છે. તથા તેમણે **વાહરિગણિની** સહાયથી પ્રથમ ૨ અંગ **આચારાંગ** અને **સૂત્રકૃતાંગ** ઉપર વૃત્તિઓ રચી છે.

અમારી પાસે રહેલી ખંભાત, શાંતિનાથ તાડપત્રીય જૈન જ્ઞાનભંડારની ૨ તાડપત્રીયપ્રતો, ભંડારકર ઈન્સ્ટીટ્યુટ, પુનાની ૧ તાડપત્રીય પ્રત તથા જૈસલમેર જિનભદ્રસૂરિ હસ્તલિખિત જ્ઞાનભંડારની ૧ અને સંઘવી પાડાભંડાર, પાટણની ૧ તાડપત્રીય પ્રતો એમ કુલ ૫ તાડપત્રીય પ્રતોમાં તથા કાગળ ઉપર લખાયેલ અન્ય ભંડારોની ૩ પ્રતોમાં સર્વત્ર પ્રથમ શ્રુતસ્કંધના અંતે '...निर्वृत्तिकुलीनश्रीशीलाचार्येण तत्त्वादित्यापरनाम्ना वाहरिसाधुसहायेन कृता टीका परिसमाप्तेति । .....कृतिः शीलाचार्यस्येति' આ પ્રકારનો ઉલ્લેખ મળે છે. દ્વિતીય શ્રુતસ્કંધના અંતે 'इति आचार्यश्रीशीलांक [सीलांग, शीलांग प्र०] विरचितयामाचारटीकायां द्वितीयः श्रुतस्कन्धः समाप्तः' આ પ્રકારનો પાઠ મળે છે. તથા સૂત્રકૃતાંગ ટીકાના અંતે પણ 'कृता चेयं शीलाचार्येण वाहरिगणिसहायेन' આવો પાઠ પ્રાપ્ત થાય છે. 'અહીં ટીકાકારશ્રી પોતાને ક્યાંક શીલાચાર્ય નામથી ક્યાંક શીલાંકાચાર્ય નામથી ઓળખાવે છે. તેથી ટીકાકારનું નામ **શીલાચાર્ય** હોવું જોઈએ અને **શીલાંક** એ સૂચક પદ હોવું જોઈએ. જેમ દાક્ષિણ્યાંકપદથી કુવલયમાલાકાર ઉદ્યોતનસૂરિ, ભવવિરહાંકપદથી યાકિનીમહત્તરાસૂનુ હરિભદ્રસૂરિ, વિમલાંકપદથી વિમલસૂરિ સૂચિત થાય છે. તેમ અહીં પણ શીલાંકપદથી શીલાચાર્ય સૂચિત થાય છે'. એવું પંડિતવર્ય અમૃતલાલ ભોજકનું મંતવ્ય

---

ટિ૰ ૧. જુઓ ચઉપન્નમહાપુરિસચરિયં, પ્રસ્તાવના પૃ૰૫૫.

છે. તથા પૂ. જંબૂવિજયજી મહારાજા પણ આ જ મત ધરાવે છે. તેઓશ્રી આચારાંગ સૂત્ર મૂલની પ્રસ્તાવનામાં જણાવે છે કે [1]'..... તેમનું અત્યારે તો શીલાકાંચાર્ય પ્રસિદ્ધ નામ છે. પરંતુ તેઓશ્રી પોતે જ પોતાને શીલાચાર્ય તરીકે ઓળખાવે છે'. તેથી અમે પણ તેઓના માર્ગને જ અનુસરતા ટીકાકારશ્રીને શીલાચાર્ય એવા નામથી ઓળખાવીએ છીએ.

તેઓશ્રીનો સત્તાસમય વિક્રમસંવત્ ૯૧૮ની આસપાસનો જણાય છે. કારણ કે, ખંભાતસ્થિત શાંતિનાથ તાડપત્રીય જ્ઞાનભંડારની વિ.સ.૧૩૨૭માં લખાયેલ (પાંચમા અધ્યયનથી કરેલ સંશોધનમાં જેની અમે खं૦સંજ્ઞા રાખી છે.) તાડપત્રીય હસ્તપ્રતના પ્રાન્તે નીચે પ્રમાણે પાઠ ઉપલબ્ધ થાય છે. 'शकनृपकालातीतसंवत्सरशतेषु सप्तसु चतुरशीत्यधिकेषु वैशाखपञ्चम्यामाचारटीका हब्धेति ।'

આ પાઠના આધારે પૂજ્ય શીલાચાર્યજીએ શકસંવત્ ૭૮૪ અર્થાત્ વિક્રમસંવત્ ૯૧૮માં આચારાંગ સૂત્ર ઉપરની ટીકા રચી હતી એવું નિશ્ચિત થાય છે. તેથી તેમનો સત્તાકાળ વિક્રમની નવમી શતાબ્દીનો ઉત્તરાર્ધ અને દશમી શતાબ્દીનો પૂર્વાર્ધ હોઈ શકે એવું સહેજે અનુમાન થઈ શકે. જો કે, [2]સંઘવી પાડા, પાટણ ની વિ.સ. ૧૪૬૭ વર્ષમાં લખાયેલ તાડપત્રપ્રત ઉપર આચારાંગ ટીકાના અંતે પૂર્વોક્ત કરતાં જરા જુદો પાઠ, શક સંવત ૭૯૮માં (= વિ.સ. ૯૩૨માં) આચારાંગ ટીકા રચ્યાનો પાઠ મળે છે. તો પણ તે પાઠના કારણે શીલાંકાચાર્યજી ના સત્તાકાળમાં કોઈ ફરક પડતો નથી. એ જ પ્રતમાં પ્રથમ શ્રુતસ્કંધના અંતે આ પ્રમાણે પાઠ મળે છે.

"द्वासप्तत्यधिकेषु हि शतेषु सप्तसु गतेषु गुप्तानाम् । संवत्सरेषु मासि च भाद्रपदे शुक्लपञ्चम्याम् ॥
शीलाचार्येण कृता गम्भुतायां स्थितेन टीकैषा । स्मयगुपयुज्य शोध्यं मात्सर्यविनाकृतैरार्यैः ॥"

આ પાઠમાં ગુપ્તસંવત ૭૭૨માં ગાંભુ નગરમાં આચારાંગ પ્રથમ શ્રુતસ્કંધની ટીકા પૂર્ણ કર્યાનો નિર્દેશ મળે છે. અહીં લખેલ ગુપ્તસંવત એ શકસંવત જ હોય તો વિ.સ. ૯૦૬માં પ્રથમ શ્રુતસ્કંધની ટીકા પૂર્ણ થઈ હશે અને વિ.સ. ૯૧૮માં દ્વિતીય શ્રુતસ્કંધની ટીકા પૂર્ણ થઈ હશે એમ સમયનો તાળો બેસી જાય છે. [3]પૂજ્ય જંબૂવિજયજી મહારાજ, [4]પંડિતવર્ય અમૃતલાલ ભોજક તથા Dr. fit વગેરે વિદ્વાનોનું પણ આ જ મન્તવ્ય છે.

તદુપરાંત, શીલાચાર્યજીએ પોતે બીજા લોકવિજય અધ્યયનમાં ગુણનિક્ષેપના અવસરે પૂજ્ય **સમન્તભદ્રસૂરિ** મહારાજ વિરચિત **બૃહત્સ્વયંભૂસ્તોત્ર**માંથી "[5]नयास्तव स्यात्पदसत्त्वलाञ्छिता" કારિકા તથા તે જ અધ્યયનમાં પૂજ્ય **હરિભદ્રસૂરિ** વિરચિત **ધર્મસંગ્રહણિ**માંથી "[6]ण य किंचि अणुण्णायं ..... । मोत्तु मेहुणभावं न तं विणा रागदोसेहिं" ગાથા ઉદ્ધૃત કરેલી છે. તેના ઉપરથી

---

ટિ૦ ૧. જુઓ **આયારંગ સુત્તં**, પ્રસ્તાવના પૃ૦૪૯. ૨. शपनृपकालातीतसंवत्सरशतेषु सप्तसु अष्टानवत्यधिकेषु वैशाखशुद्धपञ्चम्यामाचारटीका कृतेति । ૩. જુઓ **આયારંગ સુત્તં**, પ્રસ્તાવના, પૃ૦૪૯ પં૦૧૦. ૪. જુઓ **ચઉપન્નમહાપુરિસચરિયં**, પ્રસ્તાવના, પૃ૦૫૪ પં૦૨૫-૨૮. ૫. જુઓ પૃ૦૧૫૯. ૬. જુઓ પૃ૦૨૪૬.

એટલું તો સુપેરે નક્કી કરી શકાય છે કે શીલાચાર્યજી સમન્તભદ્રસૂરિ તથા હરિભદ્રસૂરિના પુરોવર્તી તો નથી જ.

વળી, સૂત્રકૃતાંગની વૃત્તિમાં યાપનીયસંઘાગ્રણી **શાકટાયન**રચિત **કેવલીભુક્તિ પ્રકરણ**માંથી "अपवर्ततेऽकृतार्थं नायुर्ज्ञानादयो न हीयन्ते......॥१६॥" એવી ગાથા ઉદ્ધૃત કરેલી છે. શાકટાયનાચાર્યનો સમય વિક્રમની નવમી શતાબ્દીનો ઉત્તરાર્ધ દશમી શતાબ્દીનો પૂર્વાર્ધ છે. આથી શાકટાયનાચાર્યના સમયની સાથે પણ શીલાર્ચાયજીનો સમય સુસંવાદને પામે છે.

પૂજ્ય શીલાચાર્યજીના ગુરૂ કોણ હતા? તેઓશ્રીની દિક્ષા કયારે થઈ હતી? વગેરે કંઈ પણ માહિતી પ્રાપ્ત થઈ શકતી નથી. માત્ર એટલી માહિતી પ્રાપ્ત થાય છે કે તેઓ એ **ગંભૂતા** (હાલમાં ગાંભુ) નગરીમાં આચારાંગ સૂત્રના પ્રથમ શ્રુતસ્કંધની ઉપર ટીકા પૂર્ણ કરી. તેથી શીલાર્ચાયજીનું વિચરણ તેની આસપાસ રહ્યું હશે તેવું અનુમાન થઈ શકે છે. તદુપરાંત, પ્રથમ શ્રુતસ્કંધને અંતે આચારાંગ ટીકા રચવા **વાહરિસાધુ** એ સહાય કરી છે એમ ઉલ્લેખ કર્યો છે. તથા સૂત્રકૃતાંગ ટીકાને અંતે **વાહરિગણિ**એ સહાય કરી છે એવો નિર્દેશ કર્યો છે. તેના ઉપરથી કલ્પી શકાય છે કે પ્રથમ શ્રુતસ્કંધની ટીકા કાળે વાહરિસાધુ મુનિપદથી અલંકૃત હશે. જયારે સૂત્રકૃતાંગ ટીકાની પૂર્ણાહુતિ અવસર દરમ્યાન વાહરિસાધુ આચાર્યપદથી વિભૂષિત થયા હશે. તેમ જ, શીલાચાર્યજીએ આચારાંગ સૂત્ર ના દ્વિતીય શ્રુતસ્કંધને અંતે વાહરિસાધુની સહાય સંબંધી ઉલ્લેખ કર્યો નથી. તેથી દ્વિતીય શ્રુતસ્કંધની ટીકા રચવા વાહરિસાધુએ સહાય કરી હશે કે નહિ તે નિર્ણીત થઇ શકતું નથી. તેમ છતાં, સૂત્રકૃતાંગ ટીકાને અંતે વાહરિગણિની સહાયનો ઉલ્લેખ કર્યો છે. તેથી સંભવત: આચારાંગના દ્વિતીય શ્રુતસ્કંધની ટીકામાં પણ સહાય કરી હશે એવું સંભવી શકે છે.

**ટીકાકારની અન્ય કૃતિઓ**

આચારાંગ સૂત્રના ટીકાકાર શીલાચાર્યજીએ આચારાંગ સૂત્ર સિવાય દ્વિતીય અંગ સૂત્રકૃતાંગ ઉપર પણ વૃત્તિ રચી છે. એ[1] વાતનો ઉલ્લેખ સૂત્રકૃતાંગ ઉપર ટીકા રચતા પ્રારંભમાં જ જણાવેલ છે. તે સિવાયની કેટલીક કૃતિઓ શીલાંકાચાર્યરચિત રૂપે મળે છે. પરંતુ તે પ્રસ્તુત્ ટીકાકારકૃત છે કે અન્યકૃત છે તેમાં એકમત નથી. પંડિતવર્ય **અમૃતલાલ** ભોજકે **ચઉપન્નમહાપુરિસચરિયં**ની પ્રસ્તાવનામાં આ અંગે વિશદ છણાવટ કરી છે.[3] તે સમાલોચનાના મુખ્ય મુખ્ય અંશો અમે અહીં વાચકવર્ગ સમક્ષ રજૂ કરીએ છીએ.

---

**ટિ૦** ૧. જુઓ સાગરાનંદસૂરિસંપાદિત સૂત્રકૃતાંગ ટીકા પૃ૦૩૪૬A પં૦૭. ૨.... तत्राचाराङ्गं चरण-करणप्राधान्येन व्याख्यातम् । अधुनाऽवसरायातं द्रव्यप्राधान्येन सूत्रकृताख्यं द्वितीयमङ्गं व्याख्यातुमारभ्यत इति — सूत्रकृताङ्गवृतिः, पृ०१ पं०४॥ ૩. પં.અમૃતલાલભાઇની સમાલોચનાના અક્ષરશ: શબ્દો અમે આ ગ્રંથના અંતે પાંચમા પરિશિષ્ટમાં આપેલ છે. અધિક જિજ્ઞાસુઓએ તે પાંચમું પરિશિષ્ટ જોવા નમ્ર વિનંતિ.

૧. [1]**પ્રભાવક ચરિત્ર**ના નિર્દેશ મુજબ **વિશેષાવશ્યકભાષ્ય**ના વૃત્તિકાર **કોટ્યાચાર્ય** એ જ શીલાંકાચાર્ય છે. અને એમણે ૧૧ અંગ ઉપર વૃત્તિ રચી હતી. પ્રભાવક ચરિત્રનો આ નિર્દેશ પં.અમૃતલાલભાઇને સ્વીકાર્ય નથી. તેમ જ, પૂજ્ય સાગરાનંદસૂરિજીએ પણ વિશેષાવશ્યક ભાષ્યની સ્વોપજ્ઞ ટીકાની પ્રસ્તાવનામાં પ્રભાવક ચરિત્રના આ મન્તવ્યને રદિયો આપ્યો છે.

૨. ડૉ. હર્મન જેકોબી, ડૉ. પિટર્સન, ડૉ. લૉયમાન તથા મુનિ જિનવિજયજીના મતે કુવલયમાલાકાર **ઉદ્યોતનસૂરિ**ના ગુરૂ **તત્ત્વાચાર્ય** જ શીલાંકાચાર્ય છે. કારણ કે, આચાર્ય શીલાંકાચાર્યે આચારાંગ સૂત્રના અંતમાં પોતાનું તત્ત્વાદિત્ય એવું બીજું નામ બતાવ્યું છે.

૩. મુનિ જિનવિજયજી, પૂજ્ય સાગરાનંદસૂરિજી તથા મોહનભાઈ દલીચંદ દેસાઈની માન્યતા મુજબ **ચઉપન્નમહાપુરિસચરિયં**ના કર્તા અને આચારાંગવૃત્તિના કર્તા બન્ને એક જ શીલાંકાચાર્ય છે. જ્યારે પં.અમૃતલાલ ભોજકને આ મન્તવ્ય સ્વીકૃત નથી. કારણ કે, ચઉપન્નમહાપુરિસચરિયંના કર્તાએ પોતાનુ બીજું નામ '**વિમલમતિ**' સૂચવ્યું છે. જ્યારે આચારાંગવૃત્તિના કર્તાએ '**તત્ત્વાદિત્ય**' એવું બીજું નામ સૂચવેલ છે.

આ રીતે પં.અમૃતલાલ ભોજક આચારાંગ-સૂત્રકૃતાંગના ટીકાકાર શીલાચાર્યજીને તથા ચઉપન્નમહાપુરિસચરિયંના કર્તા શીલાચાર્યજીને બન્નેને ભિન્ન માને છે. જ્યારે સાગરાનંદસૂરિજી બન્ને એક છે એવી માન્યતા ધરાવે છે. જ્યારે મુનિ જિનવિજય વગેરે વિદ્વાનો કુવલયમાલાકાર ઉદ્યોતનસૂરિ ના ગુરૂ તત્ત્વાચાર્ય અને તત્ત્વાદિત્ય બન્નેને પર્યાયવાચી નામો માની એક જ વ્યક્તિ તરફ અંગુલિનિર્દેશ કરે છે. આ રીતે શીલાચાર્યરચિતકૃતિઓ અંગે વિદ્વાનોમાં એકમત ન હોવાથી વાચક વર્ગે આ વિષયમાં સ્વયં માર્ગાનુસારી પ્રજ્ઞાથી વિમર્શ કરી નિર્ણય કરવો એવી અમારી નમ્ર પ્રાર્થના છે, અસ્તુ.

આચારાંગસૂત્રનો સમાવેશ ચાર અનુયોગમાંથી મુખ્યતયા ચરણ-કરણાનુયોગમાં થાય છે.

**આચારાંગવૃત્તિ અંગે**

તેમ છતાં, તેમાં વૈરાગ્યભરપૂર એવા સૂત્રો ડગલે ને પગલે આવે છે. વિષય-કષાયોની દારૂણતા, સંસારની ભયાનકતા, મૂઢ જીવોની વિડંબણાઓનું પ્રચુર વર્ણન કરવામાં આવ્યું છે. એકેક સૂત્ર આત્મામાં રહેલા અનાદિ મોહ-વાસનાને ક્ષણવારમાં ચૂરેચૂરા કરી નાખવાની પ્રચંડ તાકાત ધરાવે છે. એવા મહામહિમ સૂત્રોના વાક્યાર્થ, મહાવાક્યાર્થ, ઐદમ્પર્યાર્થ જાણવામાં આચારાંગવૃત્તિ એ એક પ્રકૃષ્ટ સાધન છે. વિશદ વિવેચના દ્વારા આચારાંગ વૃત્તિ આપણને પ્રભુ વીરના ઉપદેશના હાર્દ તરફ લઈ જવામાં સહાયક બને છે. પ્રસ્તુત પ્રકાશનમાં ૧ થી ૪ અધ્યયનની વૃત્તિ પ્રકાશિત કરવામાં આવી છે. તે ચારેય અધ્યયનોની વિષય માર્ગદર્શિકા આગળ રજૂ કરી છે. અહીં સંક્ષેપથી તે ચારેય અધ્યયનોના વિષયને દર્શાવીએ છીએ.

---

ટિ૦ ૧. श्री शीलाङ्कः पुरा कोट्याचार्यनाम्ना प्रसिद्धिभुः । वृत्तिमेकादशाङ्ग्या स विदधे धौतकल्मषः ॥ प्रभावकचरित्र, भा०१, पृ०१६४ ॥ ૨. જુઓ પ્રસ્તાવના, પૃ૦૧૬

## ૧. પ્રથમ અધ્યયન: શસ્ત્રપરિજ્ઞા (પૃ૦૧-૧૫૧)

આચારાંગ સૂત્રના પ્રથમ શ્રુતસ્કંધનું પ્રથમ અધ્યયન **શસ્ત્રપરિજ્ઞા** છે. તેમાં સાત ઉદ્દેશક છે. શસ્ત્રપરિજ્ઞા અધ્યયનનો મુખ્ય વિષય છે - જીવહિંસાનો ત્યાગ કઇ રીતે કરવો ? કઇ રીતે જીવહિંસા થાય છે ? જીવહિંસાને કારણે શું ફળ મળે છે ? જીવહિંસાના શસ્ત્રો કયા ? વગેરેનું વિસ્તારથી નિરૂપણ કરવામાં આવ્યું છે. પરંતુ તે બધામાં સૌ પ્રથમ જીવ=આત્મા છે કે નહી ? દાર્શનિક જગતના આ મુખ્ય પ્રશ્નને વિસ્તારથી ચર્ચવામાં આવ્યો છે. શસ્ત્રપરિજ્ઞા અધ્યયનના પ્રથમ ઉદ્દેશકમાં જ આ મુખ્ય મુદ્દાને અનુલક્ષીને વિસ્તૃત ચર્ચા કરવામાં આવી છે. પ્રથમ ઉદ્દેશકના પ્રથમ સૂત્રથી જ આ મુદ્દાને લઇને ગ્રંથનો પ્રારંભ થાય છે. પ્રથમ સૂત્રમાં '**सुयं मे आउसं ! तेण....**' આ સૂત્રદલ દ્વારા ગુરૂકુલવાસની મહત્તા બતાવવામાં આવી છે. આ જ સૂત્રને આધારે પશ્ચાત્કાલીન હરિભદ્રસૂરિ, મહો.યશોવિજયજી મહારાજ જેવા દિગ્ગજ મહાપુરૂષોએ પોતાના ગ્રંથોમાં ગુરૂકુલવાસને જ સંયમજીવનનો મુખ્ય આધારસ્તંભરૂપે સિદ્ધ કર્યો છે. ત્યારબાદ '**इहमेगेसिं नो सण्णा भवति....**' સૂત્ર દ્વારા જાતિસ્મરણ જ્ઞાનની ગૂઢપ્રક્રિયા દર્શાવવામાં આવી છે. અને તે જાતિસ્મરણ જ્ઞાન દ્વારા આત્માની અનુભૂતિને ઉપનિષદોમાં બહુ પ્રસિદ્ધ એવા '**सो हं**' પદ દ્વારા સુંદર રીતે ગૂંથી લેવામાં આવી છે. પ્રાસંગિક રીતે ૩૬૩ પાંખડીઓના મતનું નિરૂપણ કરવામાં આવ્યુ છે. ત્યારબાદ અનેક પ્રકારે આત્માની આત્મકર્તૃત્વની આત્માના પરલોકગમનની સિદ્ધિ કરી અંતે અજ્ઞાની જીવને થતી વિડંબણાઓનું નિરૂપણ કરવા દ્વારા પ્રથમ ઉદ્દેશક પૂર્ણ થાય છે.

આ રીતે પ્રથમ ઉદ્દેશકમાં સામાન્યથી જીવની સિદ્ધિ કર્યા પછી ક્રમશ: ઉદ્દેશકોમાં પૃથ્વી, પાણી, અગ્નિ વગેરે જીવત્વની સિદ્ધિ કરી તેની હિંસામાં કર્મબંધ તથા તે હિંસાથી વિરતિ એ મુખ્ય વિષયને વણી લેવામાં આવ્યો છે. તેમાં સૌ પ્રથમ બીજા ઉદ્દેશકમાં પૃથ્વીકાયનું તેના ભેદ-પ્રભેદ પરિણામ ઉપભોગ વગેરે સાત દ્વારોથી વર્ણન કરવામાં આવ્યું છે. ત્યારબાદ '**अट्टे लोए**' સૂત્ર દ્વારા આર્ત લોકોની અવસ્થા બતાવવામાં આવી છે. સૂ૦૧૨-૧૫માં પૃથ્વીકાયજીવની હિંસા, તેના કારણો તથા તેના ફળનું પ્રતિપાદન કરવામાં આવ્યું છે. અને છેલ્લે પૃથ્વીકાયહિંસાથી વિરત થયેલો જ મુનિ છે એ વાતને ભારપૂર્વક જણાવવામાં આવી છે.

ત્રીજા ઉદ્દેશકમાં અપ્કાય=પાણીના ભેદો, તેનું પરિમાણ, ઉપભોગ અને અપ્કાયની હિંસાના શસ્ત્રો દર્શાવવામાં આવ્યા છે. તેમ જ જુદી જુદી યુક્તિઓ દ્વારા 'પાણી એ જીવ છે' એની સિદ્ધિ કરવામાં આવી છે. સૂ૦૧૯માં અણગારનું સ્વરૂપ વર્ણવામાં આવ્યું છે. સૂ૦૨૦માં 'જે શ્રદ્ધાથી તું પ્રવ્રજિત થયો છે તે શ્રધ્ધાને તું મજબૂતાઇથી પકડી રાખજે' એવો પ્રભુ વીરે કાળજીથી સંદેશ આપ્યો છે. સૂ૦૨૧માં 'અપ્કાયનું અભ્યાખ્યાન ન કરવું' એના દ્વારા અપ્કાયમાં સચેતનત્વને સિદ્ધ કર્યું છે. સૂ૦૨૩-૨૫માં અન્યધર્મીઓનું સ્વરૂપ, તથા સૂ૦૨૬માં પ્રભુ વીરના ~~દૃષ્ટાંત દ્વારા શસ્ત્રથી ઉપહત થયેલ ન હોય તેવું~~ અચિત્ત પાણી પણ સાધુને લેવું કલ્પે નહી. તે વાત રજૂ કરી છે. સૂ૦૨૭-૩૧માં અપ્કાયની હિંસાથી વિરત હોય તે જ મુનિ છે એ વાતનું

સમર્થન પુનઃ કરવામાં આવ્યું છે.

ચોથા ઉદ્દેશકમાં તેઉકાય=અગ્નિના ભેદો, તેમાં યુક્તિ દ્વારા સજીવત્વની સિદ્ધિ, તેના પરિમાણ ઉપભોગ શસ્ત્ર વગેરે દ્વારોનું નિરૂપણ કરવામાં આવ્યું છે. નિર્યુક્તિમાં દ્વારોનું નિરૂપણ કર્યા બાદ સૂ૰૩૨માં 'અગ્નિમાં જીવ નથી' એવું અભ્યાખ્યાન ન કરવું, સૂ૰૩૩માં પ્રમાદી જીવને થતાં નુકશાનો, સૂ૰૩૪-૩૬માં અગ્નિના સમારંભમાં થતી હિંસા, સૂ૰૩૭માં અગ્નિના સમારંભમાં ષટ્કાયની હિંસા, તથા અંતે અગ્નિની હિંસાથી વિરત થયેલો જ મુનિ છે એનું નિરૂપણ કરવામાં આવ્યું છે.

પાંચમાં વનસ્પતિ ઉદ્દેશકમાં પણ પૂર્વની જેમ વનસ્પતિના ભેદો, સચેતનત્વની સિદ્ધિ વનસ્પતિજીવોનું પરિમાણ ઉપભોગ વગેરે દ્વારોથી વિસ્તૃત વર્ણન કરવામાં આવ્યું છે. સૂ૰૪૦માં અણગારનું સ્વરૂપ, સૂ૰૪૧માં વિષય જ સંસારનું કારણ છે એનું સુંદર શૈલીમાં નિરૂપણ કર્યું છે. ત્યાર પછી વનસ્પતિ સમારંભમાં થતાં દોષો વગેરેનું પૂર્વવત્ વર્ણન કર્યું છે.

છઠ્ઠા ઉદ્દેશકમાં પણ પૂર્વ ઉદ્દેશકની જેમ જ નિરૂપણ કર્યું છે. પરંતુ ત્રસકાયને ઉદ્દેશીને કરવામાં આવ્યું છે એટલું વિશેષ જાણવું.

સાતમા ઉદ્દેશકમાં વાયુકાયને ઉદ્દેશીને ભેદો, સજીવત્વનું નિરૂપણ, ઉપભોગ, શસ્ત્ર વગેરે દ્વારો બતાવવામાં આવ્યા છે. વાયુકાય પણ જીવ છે, વાયુના સમારંભમાં પણ હિંસાનું પાપ લાગે છે. વગેરે બાબતોની પ્રરૂપણા કર્યા બાદ ષટ્કાયની હિંસાથી વિરત થયેલ જીવમાં જ સંપૂર્ણ મુનિત્વ રહેલ છે. તે વાતને વારંવાર ઘૂંટવામાં આવી છે.

અધ્યયનના અંતે ઉપસ્થાપનાવિધિ દર્શાવવામાં આવી છે. જેમાં સ્વસામાચારીમાં આવેલ આયંબિલ, નીવિ વગેરે તપ કરવો એ દેખાડવા દ્વારા સામાચારીની પ્રધાનતા બતાવવામાં આવી છે.

## ૨. દ્વિતીય અધ્યયનઃ લોકવિજય (પૃ૰૧૫૩-૨૭૧)

'પંચ મહાવ્રત સ્વરૂપ સંયમમાં રહેલ સાધુએ લોકનો=કષાયનો વિજય કરવો' લોકવિજય અધ્યયનનો આ મુખ્ય પ્રતિપાદ્ય વિષય છે. તેના ૬ ઉદ્દેશકો છે. ૬એ ઉદ્દેશકોના અર્થાધિકાર ક્રમશઃ આ પ્રમાણે છે. ૧. સ્વજનો ઉપર મમત્વ ન કરવું. ૨. સંયમ અરતિ અને અસંયમમાં રતિ ન કરવી. ૩. અભિમાન કરવું નહિ તથા ધનની અસારતા વિચારવી. ૪. કામભોગમાં આસકત ન થવું. ૫. સંયમના પાલન માટે લોકની નિશ્રાએ રહેવું. ૬. લોકનિશ્રાએ વિચરતા હોવા છતાં લોકો ઉપર મમત્વ ન કરવું.

ઉદ્દેશકના અર્થાધિકારનું પ્રતિપાદન કર્યા બાદ નામનિષ્પન્નનિક્ષેપમાં લોક અને વિજય શબ્દના નિક્ષેપા કરવામાં આવ્યા છે. **'जे गुणे से मूलट्ठाणे'** સૂ૰૬૩ અન્તર્ગત સૂત્રસ્પર્શિકનિર્યુક્તિમાં ગુણ શબ્દના ૧૫ નિક્ષેપા, મૂલ શબ્દના ૬ નિક્ષેપા, સ્થાપના શબ્દના ૧૫ નિક્ષેપા, સંસાર શબ્દના

નિક્ષેપા, કર્મ પદના ૧૦ નિક્ષેપા તથા કષાય પદના નિક્ષેપાનું ખૂબ જ વિસ્તારથી વર્ણન કરવામાં આવ્યું છે.

પ્રથમ ઉદ્દેશકમાં પાંચે ઇન્દ્રિયોના વિષયો જ સંસારનું મુખ્ય કારણ છે અને તે વિષયોમાં આસક્ત થયેલ જીવની કેવી કેવી અવસ્થાઓ થાય છે. પ્રમાદને વશ થયેલાઓને કેવી યાતનાઓ ભોગવવી પડે છે વગેરે બાબતોનું હૃદયદ્રાવક વર્ણન કરવામાં આવ્યું છે. ત્યાર પછી 'જયાં સુધી ઇન્દ્રિયો શિથિલ થઇ નથી ત્યાં સુધી આત્મા કલ્યાણ સાધી લે' એવો પ્રેરણાદાયી સંદેશ પ્રભુ વીરે આપ્યો છે.

લોકવિજય અધ્યયનના બીજા ઉદ્દેશકમાં સંયમમાં થતી અરતિનો ત્યાગ કરવાથી પળવારમાં મોક્ષ થાય છે, તીર્થંકરની આજ્ઞા મુજબ પ્રવૃતિ ન કરનારને થતા નુકશાનો, સાધુ કેવા હોય, ધનમાં મૂર્છિત થનાર જીવોના કેવા હાલ-હવાલ થાય છે વગેરે બાબતોનુ નિરૂપણ કર્યું છે.

જયારે ત્રીજા ઉદ્દેશકમાં 'આ જીવે અનંતીવાર ઉચ્ચ-નીચ સ્થાનો પ્રાપ્ત કર્યા છે, તેથી જાતિમદ કે કુળમદ ન કરવો. તેમાં હર્ષ કે શોક ન કરવો. તેમ જ અંધાદિ જીવોની દુર્દશા જોઇ મધ્યસ્થભાવ કેળવવો'. તેઓને કેવી કેવી વિડંબણાઓ ભોગવવી પડે છે તેનો તાદ્દશ ચિતાર આપણી સમક્ષ રજૂ કર્યો છે.

ચોથા ઉદ્દેશકમાં કામ-ભોગમાં આસક્ત બનેલાઓને રોગોની ઉત્પત્તિ થાય છે અને ત્યારે નિકટના સ્નેહી-સ્વજનો પણ છોડીને ચાલ્યા જાય છે, સખત મહેનતથી ભેગું કરેલું ધન પણ જ્યારે સાફ થઇ જાય છે ત્યારે જીવનાં કેવા બેહાલ થાય છે તેનું સ્પષ્ટ ચિત્ર આપણને બતાવવામાં આવ્યું છે.

પાંચમાં ઉદ્દેશકના પ્રારંભમાં શ્રમણના ગુણોનું વર્ણન કરવામાં આવ્યું છે. સાધુની ગોચરી ચર્યા, વસ્ત્ર-આહાર વગેરે કઇ વિધિથી ગ્રહણ કરવા, વગેરે બાબતો બતાવવામાં આવી છે. તથા સાધુ કાલજ્ઞ હોય, બલજ્ઞ હોય, વગેરે દ્વારા સાધુનો આંતરિક ગુણવૈભવ બતાવવામાં આવ્યો છે. તથા ઉદ્દેશકના અંતમાં કામવાસના દુષ્ત્યાજ્ય છે, જીવન ક્ષણભંગુર છે, શરીર ગંદકીથી ભરેલું છે વગેરે વગેરે વૈરાગ્યપ્રેરક ઉપદેશો દ્વારા અનાદિ કાળથી મોહનિદ્રાધીન થયેલ આત્માને જાગૃત કરવાનો પ્રયત્ન કરવામાં આવ્યો છે.

લોકવિજય અધ્યયનના અંતિમ છઠ્ઠા ઉદ્દેશકમાં સમજદાર વ્યક્તિ તે છે જે પાપ કરતો નથી, એક મહાવ્રતના ભંગમાં સર્વમહાવ્રતનો ભંગ, એક કાયની હિંસામાં ષટ્કાયની હિંસા, મમતાનો ત્યાગ કરનારો મુનિ જ મોક્ષમાર્ગનો યથાવસ્થિત દૃષ્ટા છે, તથા સંયમને ગ્રહણ કરીને દેહાધ્યાસ ત્યજવો. તીર્થંકર પરમાત્માની આજ્ઞામાં ન રહેનારા સાધુ કેવા હોય, તેનું વર્તન કેવું હોય ? ભગવાનની આજ્ઞામાં રહેનાર મુનિ સુવસુ છે. તેણે ગરીબ અને શ્રીમંત બન્નેને સમાન આદરભાવથી દેશના આપવી. તથા દેશના આપતી વખતે દ્રવ્ય-ક્ષેત્ર-કાળ-ભાવ જોઇને દેશના

આપવી. અને આ રીતે દેશના આપનાર વીર છે, પ્રશંસનીય છે. વગેરે સરસ મજાની બાબતોનું નિરૂપણ કરવામાં આવ્યું છે.

### ૩. તૃતીય અધ્યયનઃ શીતોષ્ણીય (પૃ૦૨૭૩-૩૧૯)

સંયમમાં સ્થિર રહેલ તથા કષાય વગેરે લોકનો પરાજય કરેલ મુમુક્ષુને કદાચ અનુકૂળ-પ્રતિકૂળ પરીષહ-ઉપસર્ગો ઉત્પન્ન થાય તો તે પરિષહો અને ઉપસર્ગો સમભાવથી સહન કરવાં એ આ અધ્યયનનું મુખ્ય હાર્દ છે. ત્રીજા અધ્યયનના ૪ ઉદ્દેશક છે. પ્રથમ ઉદ્દેશકનો અર્થાધિકાર-ભાવનિદ્રાને વશ થયેલ જીવો સંયમી નથી. બીજા ઉદ્દેશકના અર્થાધિકારરૂપે - ભાવનિદ્રાધીન થયેલ જીવો કેવા દુઃખો ભોગવે છે તે બતાવવામાં આવેલ છે. ત્રીજા ઉદ્દેશકનો અર્થાધિકાર - માત્ર પાપના ત્યાગથી શ્રમણ નથી થવાતું . જ્યારે ચોથા ઉદ્દેશકનો અર્થાધિકાર - કષાયનું વમન કરવું, પાપની વિરતિ કરવી વગેરે.

પ્રથમ ઉદ્દેશકમાં અનેક બાબતોનું નિરૂપણ કરવામાં આવ્યુ છે. જેમ કે, ભાવનિદ્રાને વશ થયેલ અસંયમી છે, સંયમી આત્મકલ્યાણમાં સદા જાગૃત હોય, માયાવી જીવોનો સંસાર દીર્ઘ હોય, કર્મથી ઉપાધી જન્મે છે, ઈત્યાદિ ઈત્યાદિ.

બીજા ઉદ્દેશકમાં પણ કામાસક્તિ એ જ સંસારનું મૂળ છે, બાલ જીવોનો સંગ ન કરવો, સત્યમાં ધીરજ રાખવી, સંકલ્પ-વિકલ્પગ્રસ્ત જીવ અનેક આપત્તિઓનો ભોગ બને છે, તથા વીરનું સ્વરૂપ કેવું હોય વગેરે બાબતો દેખાડવામાં આવી છે.

બીજાની શરમથી, ભયથી પાપનો ત્યાગ કરનાર નિશ્ચિયનયમતે સંયમી નથી, આત્મા જ પોતાનો મિત્ર કે દુશ્મન છે, પોતાના આત્માનું દમન કરવું એ જ મોક્ષનો ઉપાય છે, સત્યને જાણવા પ્રયત્ન કરવો તે જ સંસારતરણનો ઉપાય છે. વગેરે અનેક અનેક જ્વલંતવૈરાગ્યપ્રેરક પ્રભુ વીરના વચનો ત્રીજા ઉદ્દેશકમાં છે.

ચોથા ઉદ્દેશકમાં ક્રોધ વગેરે કષાયનો ત્યાગ કરવો એ જ પ્રભુ વીરનું દર્શન છે. જે સર્વ પ્રકારે એક વસ્તુને જાણે છે તે સર્વજ્ઞ છે, વીરપુરુષ જ મહાયાન = મહાપુરુષરચિત માર્ગ ઉપર ચાલી શકે છે, જે સર્વજ્ઞ છે તેને ઉપાધિ=સંસારભ્રમણ હોતું નથી. એવો સુંદર બોધ રજૂ કરવામાં આવ્યો છે.

### ૪. ચતુર્થ અધ્યયનઃ સમ્યક્ત્વ (પૃ૦૩૨૧-૩૫૯)

સંયમમાં સ્થિર થઈને અનુકૂળ-પ્રતિકૂળ પરીષહ-ઉપસર્ગો સહન કરતાં કરતાં કદાચ અન્ય ધર્મીઓની ઋદ્ધિ, ઐશ્વર્ય, લબ્ધિઓ જોઇને ચિત્તમાં વ્યામોહ ન થાય તે માટે સમ્યક્ત્વ = જૈનદર્શનમાં નિશ્ચિલતા રાખવી એ આ અધ્યયનનો મુખ્ય વિષય છે. ત્રીજા અધ્યયનની જેમ અંહી પણ ૪ ઉદ્દેશક છે. પ્રથમ ઉદ્દેશકમાં સમ્યગ્વાદ = વસ્તુનું યથાવસ્થિતપણે વર્ણન કરવું. બીજા ઉદ્દેશકમાં અન્ય ધર્મીઓના મતની પરીક્ષા કરવામાં આવી છે. ત્રીજા ઉદ્દેશકમાં

.તપણે તપ કરવો, અજ્ઞાન તપથી મોક્ષ થતો નથી એ માન્યતાનું વર્ણન કરવામાં આવ્યું ૮. .થા ઉદ્દેશકમાં સંક્ષેપ વચનોથી નિયમને વર્ણવામાં આવેલ છે. તદુપરાંત, સમ્યક્ત્વ શબ્દનો વાચ્યાર્થ જ્ઞાન-દર્શન-ચારિત્ર ત્રણેય છે. તો શા માટે સમ્યક્ત્વ શબ્દ દર્શનમાં જ રૂઢ છે ? આવી શિષ્યની જિજ્ઞાસાનું સુંદર નિરાકરણ કરવામાં આવ્યું છે. અને તે માટે સમ્યગ્દર્શનની મહત્તા અંધ-ઈતરરાજકુમારના દૃષ્ટાંત દ્વારા બતાવવામાં આવી છે.

સમ્યક્ત્વ અધ્યયનના પ્રથમ ઉદ્દેશકમાં 'કોઇ પણ જીવો ને હણવા નહીં' આવો સર્વ તીર્થંકરોનો મત બતાવવામાં આવ્યો છે. અને સર્વ જીવોની રક્ષા કરવા દ્વારા અપ્રમત થઇને સંયમમાં પરાક્રમ કરવું એ ઉપદેશ આપવામાં આવ્યો છે.

બીજા ઉદ્દેશકના પ્રારંભમાં ખૂબ જ મહત્ત્વનો સંદેશ પ્રભુ વીરે આપ્યો છે. મિથ્યાત્વી માટે જે કર્મબંધનાં સ્થાનો છે તે જ સ્થાનો સમ્યક્ત્વી માટે કર્મનિર્જરાના છે. સમકિતી માટે જે કર્મનિર્જરાના સ્થાનો છે તે સ્થાનો મિથ્યાત્વી માટે કર્મબંધના કારણ બને છે. ત્યાર બાદ અન્યધર્મીઓના અનાર્ય મતનું નિરૂપણ કરી આર્યમતનું સ્થાપન કરવામાં આવ્યું છે.

ત્રીજા ઉદ્દેશકમાં 'શરીરને સુકવી નાખ, આત્માને જીર્ણ કર, ક્રોધનો ત્યાગ કર' વગેરે વૈરાગ્યપ્રેરક વચનો ટાંકવામાં આવ્યા છે.

જ્યારે અંતિમ ચોથા ઉદ્દેશકમાં વીરપુરુષોનો માર્ગ દુરનુચર છે, અજ્ઞાની જીવને ભગવદાજ્ઞાની પ્રાપ્તિ થતી નથી, વીરપુરુષો સત્યનિષ્ઠ હોય છે વગેરે ટંકશાળી ઉપદેશો રજૂ કરવામાં આવ્યા છે.

આચારાંગ સૂત્ર ઉપરની  શીલાચાર્યકૃત ટીકામાં વિશેષતા તો એ છે કે જયાં જયાં પણ પ્રસંગ આવ્યો છે ત્યાં ત્યાં કર્મો વિષે વિસ્તારથી વર્ણન કરવામાં આવ્યું છે. આમ કરવા પાછળ કોઇ ખાસ કારણ જણાતું નથી કદાચ કર્મસાહિત્ય પ્રત્યેનો અપૂર્વ પ્રેમ અથવા તો તે કાળમાં થયેલી કર્મગ્રન્થની રચનાઓ આમાં કારણભૂત હોઇ શકે.

પ્રાન્તે, આચારાંગ ટીકામાં આવતા કેટલાક બેનમૂન દર્શનીય સ્થળો રજૂ કરીએ છીએ. તે સ્થળો અવશ્ય જોવા એવી વાચકવર્ગને અમારી ખાસ ખાસ ભલામણ છે.

* બ્રાહ્મણાદિ ૪ વર્ણોની ઉત્પત્તિ. (પૃ૦૧૪-૧૬)

* પૃથ્વીકાય વગેરે ષટ્કાયમાં યુક્તિઓ દ્વારા જીવત્વની સિદ્ધિ.

* ૩૬૩ પાંખડીઓના મતની પ્રરૂપણા. (પૃ૦૩૧-૩૫)

* જાતિસ્મરણ નિયમા સંખ્યાત ભવનું જ થાય. (પૃ૦૬૮)

* પ્રભુ વીરે પણ શસ્ત્રાનુપહત અચિત પાણી અને તલ વગેરેનો ઉપભોગ કરવાની અનુજ્ઞા ન આપી. (પૃ૦૮૫)

* ઉપસ્થાપના વિધિમાં પણ સામાચારીનું પ્રાધાન્ય. (પૃ૦૧૫૧)
* પુદ્ગલવર્ગણાનું સ્વરૂપ. (પૃ૦૧૮૧)
* સ્થિત્યાદિબંધનિરૂપણ. (પૃ૦૧૭૬-૧૮૧)
* દ્રવ્ય-ભાવઈન્દ્રિયનું અન્ય શ્વેતાંબર ગ્રન્થોમાં ન મળે તેવું સ્વરૂપ. (પૃ૦૧૯૩-૧૯૪)
* દ્રવ્ય-ક્ષેત્ર-કાળ-ભાવ વડે ચતુર્વિધ સામાયિકનું નિરૂપણ. (પૃ૦૨૦૨-૨૦૩)
* ગોત્રકર્મના બંધ-ઉદય-સત્તાના સંવેધ ભાંગા. (પૃ૦૨૧૬)
* પુદ્ગલપરાવર્ત્તનું સ્વરૂપ. (પૃ૦૨૧૭)
* એકમહાવ્રતના ભંગમાં સર્વમહાવ્રતોનો ભંગ. (પૃ૦૨૫૯)
* દેશનાવિધિ. (પૃ૦૨૫૮)
* સત્તાસ્થાનનિરૂપણ. (પૃ૦૨૮૮-૨૯૦)
* બન્ધસ્થાનનિરૂપણ. (પૃ૦૨૯૬-૨૯૭)
* લજ્જા-ભય વગેરેથી સંયમપાલન અંગે વ્યવહાર-નિશ્ચયનયનું મન્તવ્ય. (પૃ૦૩૦૩)
* આશ્રવ-સંવરસ્થાનોની અનૈકાન્તિકતા. (પૃ૦૩૩૩)
* ઉદયસ્થાનનિરૂપણ. (પૃ૦૩૪૮)

આ રીતે પ્રસ્તુત ગ્રન્થનો વિષય, કર્તા, રચનાસમય વગેરે બતાવ્યા પછી સંપાદન અંગેની અમારી પદ્ધતિને **'સંપાદકીય'** લેખમાં અમે અધ્યેતા વર્ગ સમક્ષ રજૂ કરીશુ.

પ્રાન્તે, જિનાજ્ઞાવિરુદ્ધ કંઇ પણ લખાયું હોય તો તેનું ત્રિવિધે ત્રિવિધે મિચ્છામિ દુક્કડં માગું છું.

✍
**અનન્તયશવિજય**
**'જયાનન્દી'**

**વિ.સં.૨૦૬૬**
**રવિયોગ, વિજયા દશમી**

# સંપાદકીય

**સંપાદન પધ્ધતિ અંગે આંશિક રૂપરેખા**

પ્રસ્તુત આચારાંગ ટીકા ભા૰૧ના સંપાદનમાં અમે આગમપ્રજ્ઞ પૂજ્ય મુનિરાજશ્રી **જંબૂ-વિજયજી** મહારાજાની સંપાદન પદ્ધતિ મુજબ જ પદ્ધતિ અપનાવી છે. તેમ છતાં, તેમાં જે કંઇ થોડી ઘણી વિશેષતા છે તે અમે દર્શાવીએ છીએ.

પંડિતવર્ય **અમૃતલાલ મોહનલાલ ભોજક** દ્વારા સંશોધિત, **પૂ.જંબૂવિજયજી મહારાજ** દ્વારા સંપાદિત તથા શ્રી **સિદ્ધિ-ભુવન-મનોહર ટ્રસ્ટ**, અમદાવાદ દ્વારા પ્રકાશિત **સટીક આચારાંગ સૂત્ર ભા-૧**નો જ મુખ્ય આધાર અમે આ પ્રકાશનમાં લીધો છે. તે ગ્રંથની પ્રસ્તાવનામાં પૂ.જંબૂવિજયજી મહારાજા જણાવે છે કે 'વળી, કેટલેય સ્થળે અમને લાગ્યું છે કે તેમણે મૂળમાં લીધેલો પાઠ બરાબર નથી, પણ ટિપ્પણીમાં નોંધેલો પાઠભેદ સારો છે, છતાં અમે કોઇ પણ ફેરફાર કર્યા વિના ખોટો લાગતો પાઠ પણ જેવો ને તેવો મૂળમાં રાખ્યો છે. જ્યાં તેમણે મૂળમાં લીધેલો પાઠ તદ્દન અસંગત લાગ્યો છે તેવા બે-ચાર સ્થળોમાં અમે સુધાર્યો છે.'

અમે પણ પૂર્વે પૂ.જંબૂવિજયજી મ.ના સંપાદનને જ પુન: યથાવત્ પ્રકાશિત કરવાના હતા. પણ, પૂ.જંબૂવિજયજી મ.ના આ કથન પછી અમે બારીકાઇથી અભ્યાસ કર્યો. અમને પણ ઘણા સ્થળે પાઠની અસંગતિ જણાઇ. ત્યારે ટિપ્પણમાં લાગતો સારો પાઠ અમે મૂળમાં રાખ્યો છે અને મૂળમાં રહેલ પાઠને ટિપ્પણમાં સ્થાન આપ્યું છે. અને તે માટે અમારે કેટલાંક સ્થળે ટિપ્પણો પણ બદલવી પડી છે. વળી, પાઠની શુદ્ધિ માટે અમે **મોતીલાલ બનારસીદાસ** દ્વારા પ્રકાશિત સટીક આચારાંગ અને સૂત્રકૃતાંગ પુસ્તકના અંતે પૂ.જંબૂવિજયજી મહારાજે આપેલ શુદ્ધિ-વૃદ્ધિપત્રકનો પણ ઉપયોગ કર્યો છે. તે પત્રકમાંથી પણ ઘણાં સ્થળે પાઠની સંગતિ માટે સહાય મળી. તથા તે પત્રકમાં નોંધેલા પાઠભેદમાં પણ કયાંક કયાંક શંકા લાગતા તે પત્રકના પાઠભેદને પણ કેટલાંક સ્થળે અમે ટિપ્પણમાં સ્થાન આપ્યું છે. પં.અમૃતલાલ ભોજક સંશોધિત ટીકાની પ્રેસકૉપીમાં ઘણા ઘણા પાઠભેદો નોંધવામાં આવ્યા છે. તેમાંથી અર્થની દૃષ્ટિએ વિશિષ્ટ લાગતા પાઠભેદો જ અમે ટિપ્પણમાં લીધા છે. બાકીના ટિપ્પણો જાણવાની જેમને જિજ્ઞાસા હોય તેમણે પૂ.જંબૂવિજયજી મ. સંપાદિત પુસ્તક જોઇ લેવું. તે પ્રેસકૉપીમાં રહેલ **જૈ૰વિ૰પ૰** = જૈન વિષમપદપર્યાય અથવા જૈસલમેર વિષમપદપર્યાય અને **સ૰વિ૰પ૰** = સર્વસિદ્ધાંત વિષમપદપર્યાય ની ટિપ્પણો ⊕ 卐 ✡ ≠ Δ આવા ચિહ્નો મૂળમાં મૂકી અલગ **વિ૰ટિ૰** = વિશેષટિપ્પણ કૉલમમાં મૂકી છે. તેમ જ, તેના જેવી બીજી પણ ટિપ્પણો વિ૰ટિ૰ કૉલમમાં મૂકી છે જેથી અભ્યાસુ વર્ગને તે તે શબ્દના સરળ અર્થો સહેલાઇથી મળી શકે અને અભ્યાસમાં સુગમતા રહે (જુઓ પૃ૰૧,

---

ટિ૰ ૧. જુઓ સિધ્ધ-ભુવન-મનોહર ટ્રસ્ટ પ્રકાશિત સટીક **આચારાંગ સૂત્ર ભા-૧**, પ્રસ્તાવના, પૃ૰૮

વિશેષટિપ્પણી).

આ પ્રસ્તુત પ્રકાશનમાં અમે કેટલાંક પરિશિષ્ટોનો પણ સમાવેશ કર્યો છે. પ્રથમ
**પરિશિષ્ટો** પરિશિષ્ટમાં આચારાંગ ચૂર્ણિ અને આચારાંગ ટીકામાં જ્યાં જ્યાં ચૂર્ણિકાર અને ટીકાકારની વ્યાખ્યામાં ભિન્નતા દેખાઇ તે તે સ્થાનોનો સમાવેશ કર્યો છે.

બીજા પરિશિષ્ટમાં આચારાંગ ટીકામાં જેમનો નિર્દેશ કરવામાં આવ્યો છે તે કથાનકો સમાવિષ્ટ કર્યા છે.

ત્રીજા પરિશિષ્ટમાં અન્ય જૈન, જૈનેતર શાસ્ત્રો સાથે તુલના કરવામાં આવી છે. જેમ કે, આચારાંગ નિર્યુક્તિ ગા૦૨૨-૨૫ માં **વર્ણ-વર્ણાન્તરની ઉત્પત્તિ** બતાવી છે. બરાબર તેના જેવું જ વર્ણન **મહર્ષિવેદવ્યાસ**રચિત **મહાભારત**ના **શાંતિપર્વ**માં મળે છે. તેથી તે વર્ણનને ત્રીજા પરિશિષ્ટમાં લેવામાં આવ્યું છે. વળી, બીજા અધ્યયનમાં ટીકાકાર **શીલાચાર્યજીએ** ઈન્દ્રિયક્ષીણતાના પ્રસંગમાં દ્રવ્ય અને ભાવ ઈન્દ્રિયનું જે વર્ણન કર્યું છે તેવું વર્ણન તત્ત્વાર્થ સૂત્ર ઉપરની દિગંબરીય ટીકાઓમાં છે. તે દિગંબરીય ટીકા તથા શ્વેતાંબરપરંપરામાન્ય ઉદ્ધરણો પણ આપ્યા છે.

ચોથા પરિશિષ્ટમાં પ્રથમ **શસ્ત્રપરિજ્ઞા** અધ્યયન અન્તર્ગત પાંચમાં **વનસ્પતિ ઉદ્દેશક**માં પ્રત્યેક વનસ્પતિના ૧૨ ભેદો બતાવ્યા છે. તે બાર ભેદમાં અનેક વનસ્પતિઓના નામ આપેલ છે. જેમ કે, पिचुमन्द अशोक कपित्थ વગેરે. કયા વૃક્ષને પિચુમન્દ કહેવાય, કયા વૃક્ષને અશોક કહેવાય. તે અંગે પ્રાય: મોટા ભાગનો આગમપ્રેમી વર્ગ અજાણ હશે. તેથી તે તે વૃક્ષના ફોર કલર ફોટા જો આપવામાં આવે તો અશોક વૃક્ષ કેવું હોય તે ખ્યાલમાં આવે એવી મારા ગુરૂદેવશ્રી પંન્યાસ પ્રવર **યશોવિજયજી** મહારાજાની ભાવનાથી પ્રેરાઇ internet ઉપરથી તથા **'વસુંધરાની વનસ્પતિ'** પુસ્તકમાંથી તે તે વૃક્ષના, તેના ફળ-ફુલ, ધાન્ય વગેરેના ફોર કલર ફોટા શ્રાવક પાસે લેવડાવી ચોથા પરિશિષ્ટમાં સમાવેશ કરેલ છે. તેમ જ તે તે વૃક્ષના ગુજરાતી ભાષામાં, હિન્દી ભાષામાં અને અંગ્રેજી ભાષામાં નામો પણ આપેલ છે. કયાંક કયાંક લેટીન ભાષામાં પણ તે તે વૃક્ષના નામો પરિશિષ્ટમાં આપેલ છે. આ પરિશિષ્ટ અંગે એક સ્પષ્ટતા કરવાની કે તે તે વૃક્ષોના સંસ્કૃત નામોથી વર્તમાનમાં પ્રસિદ્ધ એવા વૃક્ષના ફોટાઓ આ પરિશિષ્ટમાં લીધા છે. વૃક્ષોના નામ તથા તે નામ મુજબના વૃક્ષો અંગે ઘણી તકેદારી લીધી છે. પરંતુ, શાસ્ત્રકારને તે તે નામથી અમે લીધેલા વૃક્ષો જ માન્ય છે કે નહિ તે અમે જાણતા નથી. અમે તો માત્ર નામસામ્યથી તે તે વૃક્ષો લીધા છે તે ખ્યાલ રાખવું. આ અંગે એક ઉદાહરણ આપવા માંગું છું. **આચારાંગ નિર્યુક્તિ** ગા૦૧૨૮માં પ્રત્યેક વનસ્પતિના ૧૨ ભેદો બતાવ્યાં. તેમાં વૃક્ષના બે ભેદ બતાવ્યાં ૧. એકાસ્થિક ૨. બહુબીજક. હવે બહુબીજક વર્ગમાં **आमलक**=આમળાનો ઉલ્લેખ આવે છે. પરંતુ, વર્તમાનમાં આમળા તરીકે પ્રસિદ્ધ એવા આમળા

વૃક્ષના ફળમાં તો એક જ ગોટલો મળે છે તો આમળાનો સમાવેશ કઇ રીતે બહુબીજક વર્ગમાં થાય આવી શંકા સહજ ઉદ્દ્ભવે. આ જ અભિપ્રાયથી પૂજ્ય **મલયગિરિજી** મહારાજા **પ્રજ્ઞાપનાસૂત્ર**ની ટીકામાં જણાવે છે કે [1]'....नवरमिहामलकादयो न लोकप्रसिद्धाः प्रतिपत्तव्याः, तेषामेकस्थिकत्वात्, किन्तु, देशविशेषप्रसिद्धा बहुबीजका एव केचन' ।

[2]પૂજ્ય મલયગિરિ મ. પણ આમળા લોકપ્રસિદ્ધ ન લેવા. પરંતુ, દેશવિશેષપ્રસિદ્ધ લેવા એમ જણાવવા દ્વારા તે તે નામથી લોકમાં પ્રસિદ્ધ એવા તે તે વૃક્ષો અંગે પ્રશ્ન ઉભો કરી નિરાકરણ કરે છે. તેથી અમે પણ નામસામ્યથી જે જે વૃક્ષોના ફોટા પરિશિષ્ટમાં લીધા છે તે તે વૃક્ષો શાસ્ત્રકારને માન્ય જ હોય એમ નિશ્ચિત સમજવું નહીં.

પ્રસ્તુત પ્રકાશનનું મૂળ સંશોધન પંડિતવર્ય **અમૃતલાલ** ભોજકે કરેલ છે. તેમણે આચારાંગ **સંપાદનમાં ઉપયુક્ત** ટીકાના સંશોધન માટે ઉપયોગમાં લીધેલ હસ્તપ્રતોને **'ક ખ ગ ઘ'** એવી **હસ્તપ્રતો** સંજ્ઞાઓ આપી છે. તે તે સંજ્ઞાથી કયા કયા ભંડારોની કઈ કઈ હસ્તપ્રતો લીધેલ છે તેનો ઉલ્લેખ તેમણે કયાંય કર્યો નથી. તથા તે અંગેના જાણકાર વ્યક્તિ પણ હાલ કોઇ વિદ્યમાન નથી. તેથી તે તે સંજ્ઞાવાળી હસ્તપ્રતો અંગેની માહિતી આપવામાં પૂજ્ય જંબૂવિજયજી મહારાજે પણ આચારાંગ ટીકાની પ્રસ્તાવનામાં પોતાની અસમર્થતા બતાવી છે[3] માટે અમે પણ આ અંગે વધુ કહેવા અસમર્થ છીએ. પરંતુ, પંડિતવર્યની પ્રેસકૉપી અવલોકતા એટલું જણાય છે કે એમણે આચારાંગ ટીકાના સંશોધન માટે ૬ પ્રતો ઉપયોગમાં લીધી છે. તેમાં ૨ તાડપત્રીય હસ્તપ્રત છે. તે ૨ તાડપ્રત્રીય હસ્તપ્રતોને **'क ख'** સંજ્ઞા આપી છે. બાકીની હસ્તપ્રતો કાગળની હશે તેવું લાગે છે. **'क'** સંજ્ઞક તાડપત્રીય હસ્તાદર્શના પાઠભેદો અમારી પાસે રહેલ ખંભાત, શાંતિનાથ તાડપત્રીય જ્ઞાનભંડારની વિ.સ.૧૩૨૭ વર્ષમાં લખાયેલ હસ્તાદર્શ (પાંચમા અધ્યયનથી જેની અમે સંજ્ઞા $खं_१$ રાખી છે) તેની સાથે સંપૂર્ણ મેળ પડે છે. તેથી **क** સંજ્ઞાથી કદાચ પં.અમૃતલાલશ્રીએ

---

ટિ૦ ૧. જુઓ જિનશાસન આરાધના ટ્રસ્ટ પ્રકાશિત **પ્રજ્ઞાપના સૂત્ર પદ૦૧ સૂત્રગાથા૦૧૫** પૃ૦૬૩. ૨. **'જૈન આગમ વનસ્પતિ કોશ**'માં મુનિ **શ્રીચન્દ્ર'કમલ'** આમળાના બહુબીજત્વ અંગે જણાવે છે કે 'प्रज्ञापना की टीकामें लोकप्रसिद्ध आमला ग्रहण न कर देशविशेषमें होनेवाले आमला का संकेत दिया है । आमले के भीतर एक गुठली होती है और उसमें छ बीजों का उल्लेख मिलता है ।..आमले के अन्दर की गुठली में तीन कोष होते हैं । तथा प्रत्येक कोष में दो-दो त्रिकोणाकार बीज पाए जाते हैं ।(धन्व०वनौ०विभाग १ पृ०३६२)

**— જૈન આગમ વનસ્પતિ કોશ પૃ૦૨૬-૨૭**

૩. પૂજ્ય જંબૂવિજયજી મહારાજે કરેલ સ્પષ્ટતા આ પ્રમાણે છે- 'આ પાંડુલિપિમાં આચારાંગવૃત્તિની क ख ग घ ङ..... વગેરે વગેરે હસ્તલિખિત પ્રતિઓનો ઉપયોગ કરીને અનેક અનેક ટિપ્પણોમાં પં.અમૃતભાઇએ પાઠભેદો આપ્યા છે. પરંતુ क ख ग घ.... વગેરેથી કયા કયા હસ્તલિખિત આદર્શો તેમણે વિવક્ષિત છે તેનું કશું જ સ્પષ્ટીકરણ તેમણે કયાંય કર્યુ નથી. વિક્રમ સં. ૨૦૫૬ મહા વદિ ૧૩ શનિવાર (ઈસ્વીસન તા. ૪-૩-૨૦૦૦)માં તેઓ સ્વર્ગવાસી થઇ ગયા છે. તેમજ તેમના સહયોગી શ્રી લક્ષ્મણભાઇ ભોજક પણ સ્વર્ગવાસી થઇ ગયા છે. એટલે આ क ख આદિ સંકેતોથી શું ગ્રાહ્ય છે તેની અમને કશી જ ખબર નથી'. -પૂ.જંબૂવિજયજી મ. સંપાદિત સટીક આચારાંગ સૂત્ર, પ્રસ્તાવના, પૃ૦૮.

એ જ હસ્તપ્રત ઉપયોગમાં લીધી હશે એવું અમારું માનવું છે. તથા તે જ શાંતિનાથ જ્ઞાનભંડારની બીજી તાડપત્રીય હસ્તપ્રત (જેની અમે સંજ્ઞા $\text{खं}_2$ રાખી છે.) તેના પાઠો **ख** સંજ્ઞક હસ્તપ્રતના પાઠભેદો સાથે બરાબર મેળ બેસે છે. તેથી **ख** સંજ્ઞાથી કદાચ તે હસ્તપ્રત ઉપયોગમાં લીધી હશે એવું અમારું અનુમાન છે. બાકીની **ग घ ङ च** સંજ્ઞાવાળી હસ્તપ્રતો કયા ભંડારની છે તે અમે શોધી શકયા નથી. તદુપરાંત, **छ ज झ ञ ट ठ** સંજ્ઞાવાળી પાંચ હસ્તપ્રતો માત્ર આચારાંગ નિર્યુક્તિની હશે તેવું જણાય છે. કારણ કે, આચારાંગ નિર્યુક્તિના પાઠભેદો વખતે જ તેનો ઉલ્લેખ પ્રેસકૉપીમાં કર્યો છે. આ બધી પણ પ્રતો કયા ભંડારની છે તે અમને ખબર નથી. વળી કયાંક **झअव०** એવી સંજ્ઞાવાળી હસ્તપ્રતના પાઠભેદો પં.અમૃતભાઈએ નોંધ્યા છે. અમારું માનવું છે કે આચારાંગસૂત્ર ઉપર મુનિશ્રી **लक्ष्मीकल्लोले** લખેલી **અવચૂરિ**ના એ પાઠો હશે. અમારી પાસે એ અવચૂરિ હાલ ઉપલબ્ધ ન હોવાથી અમે એ પાઠો અવચૂરિ સાથે મેળવી શક્યા નથી.

આચારાંગ સૂત્રના બીજા ભાગના સંશોધન માટે અમે જે હસ્તપ્રતોનો ઉપયોગ કર્યો છે તથા તેની જે સંજ્ઞાઓ રાખી છે તેનું સ્વરૂપ અમે બીજા ભાગની પ્રસ્તાવનામાં આપશું.

[1] **બૃહત્કલ્પચૂર્ણિ**માં એક મજેની ઉક્તિ આવે છે "वृन्दसाध्यानि कार्याणि". દરેક કાર્ય

**ઉપકારસ્મૃતિ** પછી ભલે તે નાનું હોય કે મોટું પણ એકલપંડે સાધી શકાતું નથી. કાર્ય સાધવા

**યાત્રા** માટે અનેક વ્યક્તિઓ અતિ આવશ્યક છે. એક ગગનચુંબી ઇમારત જોઇને જગત એ ઇમારતને બનાવનાર બિલ્ડરને ધન્યવાદ આપે છે. પણ, ધન્યવાદને પાત્ર તો પડદાની પાછળ રહેનાર તે મજૂરો છે જેમણે પોતાનું લોહી-પાણી એક કરીને ઇમારત બનાવવામાં જાન રેડી છે. પ્રસ્તુત પ્રકાશન અંગે પણ મારે એ જ કહેવું છે. જેઓ કયારેય જાહેરમાં આવવાના નથી તેવી વ્યક્તિઓએ જો આ પ્રકાશનમાં સહાય કરી ન હોત તો માટીપગા એવા મારા માટે મંઝિલ સુધી પહોચવું અશકય બની ગયું હોત માટે સાચા ધન્યવાદને પાત્ર તેઓ જ છે. હું તો માત્ર તેઓના બદલે જશ ખાટી રહ્યો છું.

પરમ કૃપાળુ અરિહંત પરમાત્મા, મુંબઈ વિલેપાર્લામંડન શ્રી **ચિંતામણિ પાર્શ્વનાથ** ભગવાન તથા શ્રમણ ભગવાન **મહાવીર**નો **અદશ્ય** અનુગ્રહ સંપાદન દરમ્યાન સતત ને સતત વરસી રહ્યો હોય તેવો નિર્ભ્રાંત અનુભવ થયો છે.

અનંત લબ્ધિનિધાન **શ્રી ગૌતમસ્વામી** તથા વર્તમાન દ્વાદશાંગીના રચયિતા પંચમ ગણધર શ્રી **સુધર્માસ્વામી**ને પણ આ અણમોલ અવસરે કઈ રીતે ભૂલી શકાય?.

આચારાંગ નિર્યુક્તિના કર્તા ભગવાન **ભદ્રબાહુ સ્વામી** તથા ટીકાકાર શ્રીમદ્ **શીલાંકાચાર્યજી** પણ દિવ્ય સહાય સતત વરસાવતા હોય તેવો અનુભવ થતો રહ્યો છે.

---

ટિ૦ ૧. જુઓ બૃહત્કલ્પચૂર્ણિ, પૃ૦૧૫૯ પં૦૧૪

પરમ પૂજ્ય સિદ્ધાંત મહોદધિ શ્રીમદ્ વિજય **પ્રેમસૂરીશ્વરજી** મહારાજા તથા પરમ પૂજ્ય વર્ધમાન તપોનિધિ શ્રીમદ્ વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજા પણ આ બાળકની ચેષ્ટા જોઈ દેવલોકની અટારીએથી મરક મરક હસતાં હસતાં આશીર્વાદ મોકલાવતા હશે.

પરમ પૂજ્ય સિદ્ધાંતદિવાકર, સર્વાધિકશ્રમણસમુદાયાધિપતિ શ્રીમદ્ **વિજય જયઘોષ-સૂરીશ્વરજી** મહારાજાએ આગમ સંશોધન અંગે પાવન અનુજ્ઞા, આશીર્વાદ આપી પોતાના અતિવિશુદ્ધ પુણ્ય દ્વારા વામન કદના માનવી પાસે વિરાટ કાર્ય કરાવડાવ્યું છે.

પરમ પૂજ્ય ન્યાયકૂર્ચાલસરસ્વતી, તર્કસાહિત્યનિપુણમતિ આચાર્યદેવ શ્રીમદ્ વિજય **જયસુંદરસૂરીશ્વરજી** મહારાજાના સતત વાત્સલ્યમય સાન્નિધ્યએ, પળે પળે અમૂલ્ય માર્ગદર્શને તથા કેટલાંક દુર્ગમ સ્થાનોના સચોટ સમાધાને પ્રસ્તુત પ્રકાશનને સર્વાંગીણ રીતે પરિપૂર્ણ બનાવવામાં અમૂલ્ય સિંહફાળો આપ્યો છે.

પરમ કૃપાળુ પુનાજિલ્લોદ્ધારક, પાર્શ્વપ્રજ્ઞાલયતીર્થપ્રેરક, પંન્યાસપ્રવર દાદાગુરૂદેવશ્રી **વિશ્વકલ્યાણવિજયજી** મહારાજાના પણ સ્નેહાળ આશીર્વાદ તથા વાત્સલ્યના પીયુષપાનથી મારા માટે આ અશક્ય કાર્ય પણ શક્ય બન્યું છે.

પ્રસ્તુત ગ્રંથનું સંપૂર્ણ શ્રેય જો કોઈને પ્રાપ્ત થતું હોય તો તે છે પરમ પૂજ્ય ભવોદધિતારક, લઘુ- લઘુહરિભદ્ર, પરમ કૃપાળુ ગુરૂદેવશ્રી પંન્યાસપ્રવર શ્રીમદ્ **યશોવિજયજી** મહારાજા. તેમણે આ પંગુને એવરેસ્ટ સર કરવાની આજ્ઞા કરી. માત્ર આજ્ઞા આપવાથી અટક્યા નથી. પરંતુ પોતાના આશીર્વાદનું, કૃપાનું જોમ પણ પગમાં આપ્યું. કયાંક ચાલવાની હામ ન રહે તો ખભે ઉંચકીને શિખર સુધી પહોંચાડવાની અપ્રતિમ સહાય પણ કરી છે. તેઓશ્રીના આ ઉપકારોના દેવામાંથી મુક્ત થવાનો માર્ગ મને કોઈ બતાવે?.

મારા સંસારી માતુશ્રી **નંદિનીબેન** તથા પિતાશ્રી **જયંતભાઈ**ને પણ આ મંગલઘડીએ યાદ કરવા ઈચ્છું છું. તેઓના પણ ધાર્મિક પ્રેરણાદાયક પ્રોત્સાહન, અનુભવી માર્ગદર્શન મારા જીવનની અંતરંગ મૂડી બની રહ્યા છે.

આગમ-સંશોધન ક્ષેત્રના દિગ્ગજ પરમ પૂજ્ય આગમપ્રજ્ઞ મુનિરાજશ્રી **જંબૂવિજયજી** મહારાજાને પણ આ મંગલ અવસરે કેમ ભૂલી શકાય ? તેઓશ્રીએ આચારાંગ ટીકાનું પુનઃ સંપાદન કરવાની પાવન અનુજ્ઞા આપી, તે માટે જોઈતી તમામ સામગ્રી ઉપલબ્ધ કરાવી ઉપકારશ્રૃંખલામાં વધારો કર્યો છે. મારૂં અત્યંત દુર્ભાગ્ય છે કે આ ક્ષેત્રમાં તેમના પ્રદીર્ઘ અનુભવનો લાભ મને મળી શક્યો નહીં.

પરમ પૂજ્ય વાત્સલ્યવારિધિ આચાર્યદેવ શ્રીમદ્ વિજય **મુનિચંદ્રસૂરીશ્વરજી** મહારાજા તથા પરમ પૂજ્ય વડીલગુરૂતુલ્ય પંન્યાસપ્રવર શ્રી **અજયસાગરજી** મહારાજાએ પણ ડગલે ને પગલે પોતાના અનુભવોનું, પોતાની પાસે રહેલ સામગ્રીનું નિઃસ્વાર્થભાવે આદાન કરી મને અધિક

ઋણગ્રસ્ત બનાવ્યો છે.

મારા ગુરૂભ્રાતા મુનિરાજશ્રી **નિર્મલયશ**વિજયજી, મુનિરાજશ્રી **જીવબંધુ**વિજયજી, મુનિરાજશ્રી **દિવ્યયશ**વિજયજી, મુનિરાજશ્રી **શ્રુતયશ**વિજયજી, મુનિરાજશ્રી **ભક્તિયશ**વિજયજી, મુનિરાજશ્રી **જ્ઞાનયશ**વિજયજી આદિ તમામ ગુરૂબાંધવોએ આ સંશોધન-સંપાદનયાત્રામાં પ્રત્યક્ષ-પરોક્ષપણે જે સહાય કરી છે તે ક્યારેય સ્મરણપથ પરથી વિલીન થશે નહીં.

પરમ પૂજ્ય આચાર્યદેવ શ્રીમદ્ વિજય જયસુંદરસૂરીશ્વરજી મહારાજાના અંતેવાસી મુનિરાજશ્રી **પ્રેમસુંદર**વિજયજી, મુનિરાજશ્રી **દિવ્યદર્શન**વિજયજી, મુનિરાજશ્રી **દયાસિંધુ**વિજયજી, મુનિરાજશ્રી **કૃપાબિંદુ**વિજયજી, મુનિરાજશ્રી **સુધારસ**વિજયજી, મુનિરાજશ્રી **પ્રિયદર્શી**વિજયજી આદિ તમામે તમામ શિષ્યવર્ગે સંશોધન-સંપાદનમાં જે સહાય કરી છે, જે અનુકૂળતા કરી આપી છે તેની યત્કિંચિત્ પણ ઋણમુક્તિ કરવા માટે પરમકૃપાળુ પરમાત્મા શક્તિ આપે.

તથા મારા અત્યંત અત્યંત નિકટના સ્નેહીસ્વજનતુલ્ય કલ્યાણમિત્ર મુનિરાજશ્રી **કરૂણાદૃષ્ટિવિજયજી** ને તો હું આ મંગલઘડીએ કોઈ એટલે કોઈ રીતે ભૂલી શકતો નથી, તેમનો મારા પ્રત્યેનો પ્રેમાળ સ્વભાવ, નિતાંત સ્નેહ, મારા પ્રત્યેની નિ:સ્વાર્થ લાગણી એ જ મારો મુખ્ય આધારસ્તંભ છે, તેઓના આ ઋણમાંથી મુક્ત થવાની કલ્પના પણ મારા મનને અત્યંત કષ્ટદાયી લાગે છે.

મારું મિત્રવર્તુળ મુનિરાજશ્રી **યશકલ્યાણ**વિજયજી, મુનિરાજશ્રી **સૌમ્યરત્ન**વિજયજી, મુનિરાજશ્રી **ત્રિલોકવલ્લભ**વિજયજી, મુનિરાજશ્રી **તીર્થપ્રેમ**વિજયજી, મુનિરાજશ્રી **જ્ઞાતનંદન**વિજયજી તથા મુનિરાજશ્રી **રૂપાતીત**વિજયજી આદિ મુનિવરોને પણ આ સોહામણા અવસરે યાદ કરવા ઈચ્છું છું.

પરમ પૂજ્ય આચાર્ય **જયસુંદરસૂરીશ્વરજી** મ. તથા મુનિરાજશ્રી **ધર્મરત્નવિજયજી** મ. ની પ્રેરણાથી સુરત, શ્રી **ઉમરા જૈન સંઘે** પ્રસ્તુત પ્રકાશનનો સંપૂર્ણ લાભ લીધો છે. તે ઉમરા જૈન સંઘની આ શ્રુતભક્તિનું અંતરથી અભિવાદન કરૂં છું.

આ સંપાદનને પુન: પ્રકાશિત કરવાની અનુમતિ આપી તે બદલ **સિદ્ધિ-ભુવન-મનોહર ટ્રસ્ટ** તથા તેના સંચાલકો, શ્રીયુત **જીતુભાઈ મણીલાલ સંઘવી** વગેરે તમામ ધન્યવાદને પાત્ર છે.

અમદાવાદ નિવાસી શ્રીમાન્ **અશોકભાઈ ચોકસી** આદિ પરિવારે આચારાંગ ટીકાના પ્રુફો તપાસી આપવામાં સહાય કરી છે પણ તેમનું યોગદાન ભૂલી નહિ શકાય.

સુરત નિવાસી **પીયુષભાઈ સીરોલિયા** પરિવારે તથા વેરાવળ નિવાસી ડો. **સી. પી. મોદી** એ ઈન્ટરનેટ ઉપરથી તથા વસુંધરાની વનસ્પતિ પુસ્તકમાંથી વૃક્ષોના ફોટા મેળવી આપવામાં અમૂલ્ય સહાય કરી છે. તેથી તેઓ પણ ધન્યવાદને યોગ્ય છે. **વસુંધરાની વનસ્પતિ** તથા **જૈન આગમ વનસ્પતિ કોશ** પુસ્તકોનો પણ આમાં યથાયોગ્ય ઉપયોગ કર્યો છે માટે તેઓના સંપાદકોનો પણ આભાર વ્યક્ત કરૂં છું.

ઘાટકોપરનિવાસી સુશ્રાવક **રાજુભાઈ, સુનીલભાઈ, હેમાંગભાઈ, રોહિતભાઈ, ચેતનભાઈ**

તથા **દર્શકુમારે** પણ આ સંપાદનકાર્યમાં સહાય કરવા દ્વારા કેવળજ્ઞાનપ્રાપ્તિને નિકટ બનાવી છે.

વિરતિ ગ્રાફિક્સવાળા **અખિલેશભાઈ** મિશ્રાજીએ ટાઈપસેટીંગ કરી આપીને અત્યંત જટિલ કાર્ય સુગમ બનાવ્યું છે. તથા વડોદરા નિવાસી શ્રીયુત **જતીનભાઈ શાહે** પણ આ ક્ષેત્રમાં બિલકુલ અનુભવ ન હોવા છતાં પણ જે ખંતથી, જે ધીરજથી, જે મહેનતથી, જે આદરભાવથી અનુભવી વ્યક્તિના કાર્યને પણ શરમાવે તેવું સુંદર મજાનું સંપાદન કરી આપ્યું છે. તે બદલ તેઓશ્રી હજારો હજારો ધન્યવાદને પાત્ર છે.

**નવનીત પ્રકાશન**, શ્રીમાન **અતુલભાઈ શેઠીયા**એ પણ જે સુંદર રીતે મુદ્રણ કરી આપ્યું છે. તેમનો આ સહકાર માનસપટ ઉપર સદાય અંકિત રહેશે.

**કિરીટભાઈ વડેચા** એ પ્રસ્તુત ગ્રંથનું આકર્ષક ટાઇટલ પેજ બનાવી આપી ગ્રંથની ઉપાદેયતામાં વધારો કર્યો છે માટે તેઓ પણ ધન્યવાદને પાત્ર છે.

આ સિવાયના નામી-અનામી જે કોઈ પણ વ્યક્તિએ આ કાર્યમાં પ્રત્યક્ષ-પરોક્ષપણે સહાય કરી છે તેમની સહાયની હાર્દિક અનુમોદના કરૂં છું.

પ્રાન્તે, પ્રસ્તુત સંપાદનમાં મારા મતિદોષથી કે અનવધાનથી સંપાદનમાં કોઈ પણ ભૂલ રહેવા પામી હોય તો આચારાંગટીકાના અંતે ટીકાકારશ્રી **શીલાચાર્યજી**એ પ્રયોજેલા '**मात्सर्यविनाकृतैरार्यैः**' વિશેષણોથી વિશિષ્ટ એવા ગીતાર્થ ભગવંતો તે ભૂલો જણાવવા કૃપા કરે. જેથી આગામી પ્રકાશનમાં તેનો સુધારો કરી શકાય.

પરમ તારક જિનાજ્ઞા વિરુદ્ધ કંઈ પણ લખાયું હોય કે છપાયું હોય તેનું ત્રિવિધે ત્રિવિધે અંતઃકરણથી મિચ્છામિ દુક્કડં માગું છું.

પ્રસ્તુત ગ્રંથના ચિંતન-મનન-નિદિધ્યાસન દ્વારા અધ્યેતાવર્ગ શીઘ્રાતિશીઘ્ર પરમપદને પામે એ જ પરમ કૃપાળુ પરમાત્માને પ્રાર્થના.

**વિ, સં. ૨૦૬૬,**
**રવિયોગ, વિજયાદશમી**

**અનન્તયશ વિજય**
**'જયાનન્દી'**

## अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| | પ્રકાશકીય | ५-६ |
| | જિનાગમો વિજયતે(પ્રસ્તાવના) | ७-२३ |
| | સંપાદકીય | २४-३० |
| | अनुक्रमः | ३१-४६ |
| | **प्रथममध्ययनं शस्त्रपरिज्ञा** | **१-१५१** |
| | **प्रथम उद्देशकः** | **१-५०** |
| | वृत्तिकारमङ्गलम् | १ |
| | अनुयोगद्वारनिरूपणम् | २-५ |
| नि०१ | निर्युक्तिकारमङ्गलम् | ६ |
| नि०२ | आचारादीनि निक्षेपपदानि (१०) | ७ |
| नि०३ | चरणे षट्, दिशि सप्त, शेषेषु चत्वारः निक्षेपाः | ७ |
| नि०४ | नामादिचतुष्टयस्य सर्वव्यापित्वम् | ७ |
| नि०५ | आचारा-ऽङ्गयोर्निक्षेपचतुष्टयम् | ७ |
| नि०६ | भावाचारे सप्तद्वाराणि (७) | ८ |
| नि०७ | आचारस्यैकार्थिकानि (१०) | ८-१० |
| नि०८ | प्रवर्तनाद्वारेऽस्य प्रथमत्वम् | ११ |
| नि०९ | प्रथमत्वे हेतुः | ११ |
| नि०१० | आचारायत्तं गणित्वम् | ११ |
| नि०११ | अध्ययनादिभिराचारस्य परिमाणम् | १२ |
| नि०१२-१४ | समवतारद्वारनिरूपणम् | १२ |
| नि०१५ | महाव्रतानां समवतारः | १३ |
| नि०१६-१७ | अङ्गादीनां सारत्वम् | १४ |
| नि०१८ | ब्रह्मनिक्षेपाः (८), स्थापनायां ब्राह्मणोत्पत्तिः | १४ |
| नि०१९ | वर्ण-वर्णान्तरोत्पत्तिः | १५ |

अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| नि०२० | वर्ण-वर्णान्तरसङ्ख्या | १५ |
| नि०२१ | सप्तवर्णप्रदर्शनम् | १५ |
| नि०२२ | वर्णान्तरनामानि | १५ |
| नि०२३-२५ | वर्णान्तरे हेतुः | १६ |
| नि०२६-२७ | वर्णान्तराणां संयोगोत्पत्तिः | १६-१७ |
| नि०२८ | द्रव्य-भावब्रह्मप्ररूपणा | १७ |
| नि०२९ | चरणनिक्षेपाः (६) | १७ |
| नि०३० | त्रिविधभावचरणम् | १८ |
| नि०३१-३२ | अध्ययननामानि | १८ |
| नि०३३-३४ | अध्ययनार्थाधिकाराः | १८ |
| नि०३५ | शस्त्रपरिज्ञाया उद्देशार्थाधिकाराः | १९ |
| नि०३६ | शस्त्रनिक्षेपाः (४), द्रव्य-भावशस्त्रनिरूपणम् | २० |
| नि०३७ | द्रव्य-भावयोर्ज्ञान-प्रत्याख्याने, प्रासादहृष्टान्तः | २० |
| **सू०१** | **ग्रन्थोपन्यासः, केषाञ्चित् सञ्ज्ञाऽभावः** | **२१** |
| नि०३८ | द्रव्य-भावसञ्ज्ञानिरूपणम् | २२ |
| नि०३९ | षोडशविधानुभवनसञ्ज्ञा | २३ |
| **सू०१** | **केषाञ्चित् पूर्वादिदिगागमनसञ्ज्ञाऽभावः** | **२३** |
| नि०४० | दिग्निक्षेपाः (७) | २४ |
| नि०४१ | द्रव्यदिक् | २४ |
| नि०४२ | क्षेत्रदिशो रुचकात् | २४ |
| नि०४३ | क्षेत्रदिग्नामानि | २४-२५ |
| नि०४४-४५ | दिग्-विदिक्स्वरूपम् | २५ |
| नि०४६ | दिक्संस्थानम् | २६ |
| नि०४७-४८ | तापदिक्प्ररूपणा | २६ |
| नि०४९-५० | मेरु-लवणयोरुत्तर-दक्षिणत्वम् | २६ |
| नि०५१ | प्रज्ञापकदिक् (१८) | २६ |
| नि०५२-५८ | प्रज्ञापकदिग्ज्ञानं तन्नामानि च | २७ |

अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| नि०५९ | प्रज्ञापकदिक्संस्थानम् | २८ |
| नि०६० | भावदिग्निरूपणम् (१८) | २८ |
| नि०६१-६२ | प्रज्ञापक-भावदिग्गुणनेनाऽष्टादशा-ऽष्टादशकाः | २९ |
| नि०६३ | ज्ञानसञ्ज्ञाया अस्ति-नास्तित्वम् | २९ |
| **सू०१** | **आत्मन औपपातिकेतरत्वज्ञानाऽभावः पूर्वा-ऽपरभवज्ञानं** | **३०** |
| | ३६३ पाखण्डिन स्वरूपम् | ३१-३५ |
| **सू०२** | **सहसन्मत्यादि-जातिस्मृत्यादिना ज्ञानं, 'सोऽहम्' इत्यस्य जिन-वचनानुसारेणार्थः, पूर्वापरजन्मानुगतस्य आत्मनः प्रतिपादनम्** | **३६-३७** |
| नि०६४-६६ | विशिष्टसञ्ज्ञाकारणनिरूपणम् | ३८ |
| **सू०३** | **आत्मवादिन एव याथार्थ्येन लोक-कर्म-क्रियावादित्वम्** | **४०-४१** |
| **सू०४** | **अनतिशयिनो मतिज्ञानेन आत्मास्तित्वावगमः** | **४२** |
| **सू०५** | **क्रियापरिमाणनिश्चयः** | **४३** |
| **सू०६** | **अपरिज्ञातकर्मणोऽपायाः** | **४३-४५** |
| **सू०७** | **परिज्ञावर्णनम्** | **४६** |
| नि०६७ | सदसन्मतिहेतुभ्यां बन्धज्ञानम् | ४७ |
| **सू०७** | **जीवितस्य परिवन्दनाद्यर्थं कर्म** | **४७-४८** |
| **सू०८** | **क्रियाविशेषपरिमाणनिश्चयः** | **४९** |
| **सू०९** | **परिज्ञातकर्मणो मुनित्वम्** | **५०** |
| | **द्वितीयः पृथिव्युद्देशकः** | **५१-७३** |
| नि०६८ | पृथिव्या निक्षेपादीनि द्वाराणि (९) | ५१ |
| नि०६९ | पृथिव्या निक्षेपचतुष्टयम् | ५१ |
| नि०७० | द्रव्य-भावपृथिवीवर्णनम् | ५२ |
| नि०७१-७३ | सर्वलोके सूक्ष्माः, बादरे श्लश्णा (५) खराः (३६) | ५२-५३ |
| नि०७७-७८ | वर्णादिना योनिभेदः | ५४ |
| नि०७९ | पर्याप्ता-ऽपर्याप्तभेदानां तुल्यत्वम् | ५५ |
| नि०८०-८१ | वृक्षादिदृष्टान्तेन पृथिवीभेददर्शनम् | ५५-५६ |
| नि०८२ | असङ्ख्येयपृथिवीशरीराणां दृश्यत्वम् | ५६ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| नि०८३ | शेषाणामाज्ञाग्राह्यता | ५६ |
| नि०८४ | लक्षणाद्वारे उदय-लेश्याभेदाः (११) | ५७ |
| नि०८५ | शरीरास्थिदृष्टान्तेन कठिनपृथिवीशरीरे चेतनत्वम् | ५७ |
| नि०८६-८८ | पृथिवीकायपरिमाणम् | ५८-४९ |
| नि०८९ | क्षेत्र-कालयोः सूक्ष्म-बादरत्वम् | ५९ |
| नि०९० | कालतः पृथिवीकायपरिमाणम् | ५९ |
| नि०९१ | परस्परावगाहना | ५९ |
| नि०९२-९३ | चङ्क्रमणादिभिः पृथिव्युपभोगः | ६० |
| नि०९४ | सुखार्थं परदुःखोदीरकत्वम् | ६० |
| नि०९५ | समासद्रव्यशस्त्रप्रतिपादनम् | ६० |
| नि०९६ | विभागद्रव्य-भावशस्त्रप्रदर्शनम् | ६१ |
| नि०९७ | पृथ्वीकाये वेदनाः | ६१ |
| नि०९९ | वधद्वारे कुतीर्थिकस्वरूपम् | ६२ |
| नि०१०० | दृष्टन्तगर्भं कुतीर्थिकस्वरूपम् | ६३ |
| नि०१०१ | करणत्रिकेण वधः | ६३ |
| नि०१०२ | पृथ्वीकायवधे निदा-ऽनिदाभ्यां दृश्या-ऽदृश्यान्यजीववधः | ६३ |
| नि०१०३ | पृथिवीवधे तन्निश्रितसूक्ष्मजीववधः | ६४ |
| नि०१०४-१०५ | पृथिवीवधविरता अनगाराः | ६४ |
| **सू०१०** | **लोकस्य आर्त्त-परिद्यूनत्वादि** | **६४-६५** |
| **सू०१०** | **प्रव्यथितपृथ्वीकाये आतुरपरितापनम्** | **६६** |
| **सू०११** | **पृथिव्याः सचेतनत्वमनेकजीवाधिष्ठितत्वं च** | **६७** |
| **सू०१२** | **कुतीर्थिकानामन्यथावादि-कारित्वम्** | **६७** |
| **सू०१३** | **परिवन्दनाद्यर्थं करणत्रिकेण पृथिवीसमारम्भेः,तत्र प्रवृत्तमतेरहितादि** | **६८** |
| **सू०१४** | **सम्बुध्यमानस्य पृथिवीसमारम्भो ग्रन्थादिरूपः** | **६९** |
| **सू०१४** | **गृद्धलोकस्य विरूपरूपैः शस्त्रैः पृथिवीसमारम्भः** | **७०** |
| **सू०१५** | **अन्धादिवत् पृथिवीजीवानामपि वेदनाः** | **७०-७१** |
| **सू०१६** | **पृथिवीजीववधे बन्धः** | **७२** |

अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०१७ | करणत्रिकेण पृथिवीसमारम्भाऽकरणम् | ७२ |
| सू०१८ | पृथिवीदण्डविरतस्य मुनित्वम् | ७२-३ |
| | **तृतीयोऽप्कायोद्देशकः** | ७४-९० |
| नि०१०६ | अप्कायस्य द्वारातिदेशः, विधानादिषु विशेषः | ७४ |
| नि०१०७-१०८ | अप्कायभेदविधानम्, बादराप्कायभेदाः | ७४ |
| नि०१०९ | अप्कायपरिमाणद्वारम् | ७५ |
| नि०११० | अप्कायलक्षणद्वारम् | ७६ |
| नि०१११ | अप्कायोपभोगद्वारम् | ७७ |
| नि०११२ | अप्कायवधे हेतुः | ७७ |
| नि०११३ | समासद्रव्यशस्त्रप्रतिपादनम् | ७८ |
| नि०११४ | विभागद्रव्य-भावशस्त्रनिरूपणम् | ७८ |
| नि०११५ | पृथिवीवदप्कायस्य शेषद्वाराणि | ७८ |
| सू०१९ | अनगारस्वरूपम् | ७८-९ |
| सू०२० | निष्क्रमणकालीनश्रद्धायाः सदाऽनुपालनीयत्वम् | ८० |
| सू०२१ | महापुरुषैराराधितपूर्वोऽयं मार्गः | ८१ |
| सू०२२ | आज्ञयाऽप्कायज्ञानेः संयमः | ८१ |
| सू०२२ | अप्कायलोका-ऽऽत्मयोरभ्याख्यानव्याप्तिः | ८२ |
| सू०२३ | शाक्यादीनामन्यथावादि-कारित्वम् | ८३ |
| सू०२४ | परिवन्दनाद्यर्थं करणत्रिकेणोदकशस्त्रसमारम्भः | ८३ |
| सू०२४ | उदकशस्त्रसमारम्भो अहिता-ऽबोधिलाभाय | ८३ |
| सू०२५ | सम्बुध्यमानस्योदकसमारम्भो ग्रन्थादिरूपः | ८४ |
| सू०२५ | गृद्धलोकस्य विरूपरूपैः शस्त्रैरुदकशस्त्रसमारम्भः | ८४ |
| सू०२६ | अपां सचेतनत्वमितरजीवाश्रितत्वं च | ८४ |
| सू०२६ | 'उदको जीवः' इति जिनप्रवचनमतं, शस्त्रानुपहताचित्तोदकाऽग्राह्यो प्रभुवीरदृष्टान्तः | ८५ |
| सू०२६ | अप्कायशस्त्रदर्शनम् | ८६ |
| सू०२६ | अप्कायवधेऽदत्तादानम् | ८६ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०२७ | अन्यमतप्रदर्शनम् | ८७ |
| सू०२८ | अन्यमतस्यासारत्वम् | ८८ |
| सू०२९ | अप्कायवधे बन्धः | ८९ |
| सू०३० | करणत्रिकेणोदकसमारम्भाऽकरणम् | ८९ |
| सू०३१ | अप्कायवधविरतस्य मुनित्वम् | ८९-९० |
| | **चतुर्थस्तेजस्कायोद्देशकः** | **९१-१०४** |
| नि०११६ | तेजसो द्वारातिदेशः, विधानादिषु नानात्वम् | ९१ |
| नि०११७-१८ | तेजस्कायभेदविधानम्, बादराग्निकायभेदाः | ९१-२ |
| नि०११९ | खद्योतक-ज्वरोष्मवत् तेजसः सचेतनत्वम् | ९३ |
| नि०१२० | अग्निकायपरिमाणम् | ९४ |
| नि०१२१ | अग्नेरुपभोगः (५) | ९४ |
| नि०१२२ | अग्निकायवधे हेतुः | ९४ |
| नि०१२३ | समासद्रव्यशस्त्रनिरूपणम् | ९५ |
| नि०१२४ | विभागद्रव्यशस्त्रप्रतिपादनम् | ९५ |
| नि०१२४ | शेषद्वारातिदेशः | ९५ |
| सू०३२ | अग्निलोका-ऽऽत्माभ्याख्यानव्याप्तिः | ९६ |
| सू०३२ | दीर्घलोकशस्त्रा-ऽशस्त्रखेदज्ञयोर्व्याप्तिः | ९७-८ |
| सू०३३ | प्रमत एव दण्डः | ९९-१०० |
| सू०३४-३६ | तेजस्कायिकजीवसमारम्भे दोषाः | १००-१ |
| सू०३७ | अग्निकायसमारम्भेऽन्यजीववधोऽपि | १०२ |
| सू०३८-३९ | परिज्ञायाग्निकायवधविरतो मुनिः | १०३-४ |
| | **पञ्चमो वनस्पतिकायोद्देशकः** | **१०५-१२४** |
| नि०१२६ | द्वारातिदेशः, विधानादिषु नानात्वम् | १०५ |
| नि०१२७ | वनस्पतिभेदनिरूपणम् | १०५ |
| नि०१२८-३० | बादरप्रत्येकवनस्पतिभेदाः | १०५-७ |
| नि०१३१-२ | शरीरसङ्घातदृष्टान्तः | १०७-८ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| नि०१३३ | पत्रादौ एकजीवत्वम् | १०८ |
| नि०१३४-५ | प्रत्येकतरुजीवपरिमाणम्, शेषाणामाज्ञाग्राह्यत्वम् | १०८-९ |
| नि०१३६-७ | साधारणवनस्पतिलक्षणम् | १०९-१० |
| नि०१३८ | मूल-प्रथमपत्रयोः एकजीवत्वम् | ११० |
| नि०१३९-४० | अनन्तकायलक्षणम् | १११ |
| नि०१४१ | साधारणवनस्पतिभेदाः | ११२ |
| नि०१४२-३ | प्रत्येक-साधारणयोर्दृश्यत्वम् | ११२ |
| नि०१४४-५ | सूक्ष्म-बादरनिगोदपरिमाणम् | ११३ |
| नि०१४६-७ | उपभोगविधिः | ११३-४ |
| नि०१४८ | वनस्पतिवधे हेतुः | ११४ |
| नि०१४९ | वनस्पतिसमासद्रव्यशस्त्रप्रतिपादनम् | ११४ |
| नि०१५० | विभागद्रव्यशस्त्रनिरूपणम् | ११५ |
| नि०१५१ | शेषद्वारातिदेशः | ११५ |
| **सू०४०** | **वनस्पत्यारम्भविरतस्यानगारत्वम्** | **११५-६** |
| **सू०४१** | **शब्दादिगुणा एव आवर्त्तः** | **११७-८** |
| **सू०४१** | **वनस्पतिजन्यशब्दादीनां सर्वदिक्त्वम्** | **११९** |
| **सू०४१** | **अगुप्तोऽनाज्ञाकारी प्रमत्तः** | **१२०** |
| **सू०४२-४४** | **वनस्पतिकायिकजीववधे दोषाः** | **१२०-१** |
| **सू०४५** | **वनस्पतेः सचेतनत्वम्** | **१२१-३** |
| **सू०४६-४८** | **परिज्ञाय वनस्पतिवधविरतस्य मुनित्वम्** | **१२४** |
| | **षष्ठः त्रसकायोद्देशकः** | **१२५-१३७** |
| नि०१५२ | द्वारातिदेशः, विधानादिषु नानात्वम् | १२५ |
| नि०१५३ | लब्धि-गतिभ्यां त्रसानां द्वैविध्यम् | १२५ |
| नि०१५४-५ | त्रसजीवभेदाः | १२६-७ |
| नि०१५६-७ | त्रसजीवलक्षणम् | १२८ |
| नि०१५८ | त्रसजीवपरिमाणम् | १२९ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| नि०१५९ | अविरहितप्रवेश-निर्गमपरिमाणम् | १३० |
| नि०१६० | उपभोग-शस्त्र-वेदनाद्वाराणि | १३० |
| नि०१६१-२ | त्रसजीववधे हेतुः | १३१ |
| नि०१६३ | शेषद्वारातिदेशः | १३१ |
| **सू०४९** | **अण्डजादित्रसजीवभेदाः** | **१३२** |
| **सू०४९** | **सर्वेषां जीवानां दुःखं महाभयम्** | **१३३** |
| **सू०४९** | **आतुरपरितापनम्** | **१३४** |
| **सू०५०-५२** | **त्रसकायिककजीवसमारम्भे दोषाः** | **१३५-६** |
| **सू०५२** | **त्रसजीवहिंसायाः कारणम्** | **१३६** |
| **सू०५३-५५** | **परिज्ञाय त्रसजीववधविरतो मुनिः** | **१३७** |
| | **सप्तमो वायूद्देशकः** | १३८-१५१ |
| नि०१६४ | द्वारातिदेशः, विधानादिषु नानात्वम् | १३८ |
| नि०१६५-६ | वायुकायभेदनिरूपणम् | १३८ |
| नि०१६७ | देवा-ऽन्तर्हितशरीरवद् वायोश्चैतन्यम् | १३९ |
| नि०१६८ | वायुकायजीवपरिमाणम् | १३९ |
| नि०१६९ | बादरवायुकायोपभोगविधिः | १४० |
| नि०१७०-१ | समास-विभागद्रव्यशस्त्रप्रतिपादनम् | १४० |
| नि०१७२ | शेषद्वारातिदेशः | १४१ |
| **सू०५६** | **एजस्य जुगुप्सायां प्रभुः** | **१४१** |
| **सू०५६** | **अध्यात्म-बहिर्ज्ञानयोर्व्याप्तिः** | **१४१** |
| | द्रव्यातङ्के क्षारगलित्पुरुषदृष्टान्तः | १४२ |
| **सू०५६** | **शान्तिगता द्रव्या जीविताऽनवकाङ्क्षिणः** | **१४३** |
| **सू०५७-५९** | **वायुकायिकजीववधे दोषाः** | **१४४** |
| **सू०६०** | **वायुकायवधेऽन्यजीवानामपि वधः** | **१४४** |
| **सू०६१** | **परिज्ञाय वायुकायवधविरतो मुनिः** | **१४४** |
| **सू०६२** | **आचारेऽरममाणानां संसारे सक्तत्वम्** | **१४५-७** |
| **सू०६२** | **परिज्ञाय षट्कायवधविरतस्य मुनित्वम्** | **१४८** |

अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| | ज्ञान–क्रियानयवादः | १४९ |
| | उपस्थापनाविधिः | १५०–१ |
| | **द्वितीयमध्ययनं लोकविजयः** | **१५३–२७१** |
| | **प्रथम उद्देशकः** | **१५३–२०४** |
| | मंगलाचरणम् | १५३ |
| नि०१७३ | उद्देशकार्थाधिकारः | १५४ |
| नि०१७४ | लोक–विजय–गुण–मूलनिक्षेपाः | १५५ |
| नि०१७५ | आद्ययोर्नामनिष्पन्ने, परयोः सूत्रालापे | १५६ |
| नि०१७६–७ | भावकषायलोकविजयेनाधिकार, लोकनिक्षेपातिदेशः | १५६ |
| नि०१७८ | भावलोकविजयेन फलम् | १५७ |
| नि०१७९ | गुणनिक्षेपाः | १५८ |
| नि०१८० | द्रव्यगुणनिरूपणम् | १५८–९ |
| नि०१८१ | जीवगुणस्वरूपम् | १६० |
| नि०१८२ | क्षेत्रादिगुणप्ररूपणा | १६१–३ |
| नि०१८३ | मूलनिक्षेपाः | १६४ |
| नि०१८४ | त्रिविधभावमूलनिरूपणम् | १६४ |
| नि०१८५ | स्थाननिक्षेपाः | १६५–७ |
| नि०१८६ | शब्ददिजन्यकषायाः संसारस्य मूलम् | १६७ |
| नि०१८७ | कर्मपादपानां संसारप्रतिष्ठितमूलम् | १६८ |
| नि०१८८ | अष्टविधकर्मवृक्षा मोहनीयमूलाः | १६८ |
| नि०१८९ | द्विविधो मोहः | १६९ |
| नि०१९० | स्वजन–प्रेष्यादिषु स्थिताः कषायाः | १६९ |
| नि०१९१ | कषायनिक्षेपाः | १७० |
| नि०१९२–३ | संसारस्य पञ्चविधत्वम् | १७१ |
| नि०१९४–५ | कर्मनिक्षेपाः | १७२–१८३ |
| | वर्गणानिरूपणम् | १७३–५ |
| | स्थित्यादिबन्धस्वरूपम् | १७६–१८१ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०६३ | शब्दादिगुणाः संसारमूलस्थानम् | १८३-४ |
| सू०६३ | गुणार्थिनां स्वरूपम् | १८५ |
| सू०६३ | प्रमत्तानामपायः | १८६ |
| नि०१९६-७ | संसारोच्छेदार्थं कषायोन्मूलनं कर्त्तव्यम् | १८७ |
| सू०६४ | मानवानामल्पायुष्कत्वम् | १८९-९० |
| सू०६४ | श्रोत्रादिप्रज्ञानेषु परिहीयमानेषु मूढभावम् | १९१-२ |
| | इन्द्रियभेदनिरूपणम् | १९३-४ |
| सू०६४ | वार्द्धक्ये निजकानां पूर्व-पश्चात्परिवदनम् | १९५-६ |
| सू०६४ | निजकानां त्राण-शरणासमर्थत्वम् | १९७ |
| सू०६५ | प्रमादो न कार्यः | १९८ |
| सू०६६ | प्रमादिनां दोषा अपायाश्च | १९९ |
| सू०६७ | उपादितशेषेण सन्निधिसन्निचयः, तत रोगसमुत्पादः | २०० |
| सू०६८ | पण्डित ! क्षणं जानीहि | २०१-३ |
| सू०६८ | यावच्छ्रोत्रादिप्रज्ञाना अपरिहीना तावदात्मार्थं कर्त्तव्यम् | २०४ |
| | द्वितीय उद्देशकः | २०५-२१४ |
| सू०६९ | अरतित्यागे मोक्षः | २०५ |
| नि०१९६ | अरत्या संयमेऽदृढत्वम् | २०६ |
| सू०७० | अनाज्ञावर्त्तिनां दोषाः | २०८ |
| सू०७१ | लोभमलोभेन जुगुप्समानाः विमुक्ताः | २०९-१० |
| सू०७२-७३ | अर्थलुब्धानां स्वरूपम् | २११-२ |
| सू०७४ | दण्डाद् विरतिरेव आर्यप्रवेदितो मार्गः | २१३ |
| | तृतीय उद्देशकः | २१५-२३० |
| सू०७५ | गोत्रमदो न कार्यः | २१५-८ |
| सू०७६ | समितोऽन्धत्वादिदर्शी | २१९-२१ |
| सू०७७ | परिग्रहसक्तानां मूढत्वम् | २२२ |
| सू०७८(१) | ध्रुवचारिस्वरूपम् | २२३ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०७८ | कालस्यानागमो नास्ति | २२४ |
| सू०७९ | संसारमूढानां स्वरूपम् | २२५-६ |
| सू०७९ | अन्यतीर्थिका अनोघन्तराः | २२७ |
| सू०७९( २ ) | खेदज्ञस्य सर्वज्ञाज्ञायां स्थानम् | २२८ |
| सू०८० | पश्यकस्योपदेशाभावः | २२९ |
| सू०८० | बालस्य दुःखावर्त्तः | २२९-३० |
| | चतुर्थ उद्देशकः | २३१-३८ |
| सू०८१ | भोगिनां रोगोत्पादेऽसहायता | २३१ |
| सू०८२ | सञ्चितस्यापि विनाशः | २३२ |
| सू०८३ | आशा-छन्दयोस्त्यागोपदेशः | २३३ |
| सू०८४ | स्त्रीभिर्लोकः प्रव्यथितः | २३४ |
| सू०८५ | महामोहेऽप्रमादो विधेयः | २३५ |
| सू०८६ | भोगनिरीहस्य गुणाः | २३६-८ |
| | पञ्चम उद्देशकः | २३९-२५७ |
| सू०८७ | पुत्राद्यर्थं कर्म्मसमारम्भाः | २३९-४० |
| सू०८८ | समुत्थित आम-गन्धं परित्यजेत् | २४१ |
| सू०८८ | क्रय-विक्रययोरदृश्यमानः, कालादिज्ञो भिक्षुः | २४२-५ |
| सू०८९ | आहारमात्राज्ञानम् | २४६ |
| सू०८९ | वस्त्रा-ऽऽहारादिग्रहणविधिः | २४७ |
| सू०८९ | कुशलानां नोपलिम्पनम् | २४८ |
| सू०९० | कामानां दुरतिक्रमत्वम् | २४९ |
| सू०९० | कामकामिनां स्वरूपम् | २५० |
| सू०९१ | आयतचक्षुणां लोकदर्शनम् | २५१ |
| सू०९२ | शरीरान्त-र्बहिर्व्याप्तिः | २५२ |
| सू०९२ | मा लालं प्रत्याशीः | २५३ |
| सू०९३ | बहुमायिनामपायाः | २५४ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०९३ | भोगश्रद्धोऽमरायते | २५५ |
| सू०९४ | चिकित्सापण्डितः कायसमारम्भकः | २५६ |
| सू०९४ | अनगारत्वाय बालसङ्गनिषेधः | २५७ |
| | **षष्ठ उद्देशकः** | **२५८-२७१** |
| सू०९५ | सम्बुध्यमानस्य पापाऽकरणम् | २५८ |
| सू०९६ | एककायसमारम्भेऽपरकायसमारम्भः | २५९ |
| सू०९६ | मूढस्यानर्थपरम्परा | २६० |
| सू०९७ | ममायितमतित्यागे दृष्टपथत्वं मुनेः | २६१ |
| सू०९७ | लोकसञ्ज्ञात्यागेन संयमे पराक्रमितव्यम् | २६२ |
| सू०९८(३) | वीरलक्षणम् | २६२ |
| सू०९९ | शब्दादीन् सहमानो नन्दिं निर्विन्दस्व | २६३ |
| सू०९९ | मौनं समादाय कर्म्मशरीरं धुनीयात् | २६३-४ |
| सू०१०० | दुर्वसुमुनिस्वरूपम् | २६४ |
| सू०१०१ | लोकसञ्ज्ञात्ययवानेव वीरः | २६५ |
| सू०१०१ | अनन्यदर्शना-ऽऽरामयोर्व्याप्तिः | २६६ |
| सू०१०२ | तुच्छ-पुण्ययोः समानभावेन कथनम् | २६७-८ |
| सू०१०३ | वीरवर्णनम् | २६९ |
| सू०१०४ | अणोद्घातनखेदज्ञः मेधावी | २६९-७० |
| सू०१०५ | द्रष्टुर्नोपदेशः | २७१ |
| सू०१०५ | बालस्याऽपायाः | २७१ |
| | **तृतीयमध्ययनं शीतोष्णीयम्** | **२७३-३१९** |
| | **प्रथम उद्देशकः** | **२७३-२९०** |
| नि०१९९-२०० | उद्देशकार्थाधिकारप्रतिपादनम् | २७३ |
| नि०२०१ | शीतोष्णयोर्निक्षेपाः | २७४ |
| नि०२०२ | द्रव्य-भावशीतोष्णस्वरूपम् | २७४ |
| नि०२०३ | जीवभावगुणस्य शीतोष्णत्वम् | २७४-५ |

अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| नि०२०४ | स्त्री-सत्कारपरीषहौ शीतलौ, शेषा उष्णाः | २७५ |
| नि०२०५ | तीव्र-मन्दपरिणामानां शीतोष्णत्वम् | २७५ |
| नि०२०६ | धर्म्मा-ऽर्थयोः प्रमत्तः शीतलः, इतर उष्णः | २७६ |
| नि०२०७ | उपशमैकार्थिकानि | २७६ |
| नि०२०८ | संयमः शीतः, असंयम उष्णः | २७६ |
| नि०२०९ | सुखं शीतम्, दुःखमुष्णम् | २७७ |
| नि०२१० | कषाया उष्णाः, तपस्ततोऽप्युष्णतरम् | २७७ |
| नि०२११ | शीतोष्णादिसहः मुनिः स्यात् | २७८ |
| नि०२१२ | शीतान्युष्णानि च विषोढव्यानि | २७८ |
| **सू०१०६** | **सुप्ता अमुनयः, मुनयः सदा जाग्रति** | **२७८** |
| नि०२१३ | सुप्ता अपि मुनयो जागरा एव | २७९ |
| नि०२१४ | सुप्तानामपायाः | २८० |
| नि०२१५ | सचेतनानां कल्याणानि | २८० |
| **सू०१०६** | **अज्ञानात्मकदुःखमहिताय** | **२८१** |
| **सू०१०७** | **आत्मविद् मुनिर्वाच्यः** | **२८२-३** |
| **सू०१०७** | **शीतोष्णत्यागी एव निर्ग्रन्थः** | **२८४** |
| **सू०१०८** | **जरा-मृत्युवशोपनीतो मूढो धर्मानभिज्ञः** | **२८४** |
| **सू०१०८** | **मायिनः पुनर्गर्भगमनम्** | **२८५** |
| **सू०१०९** | **पर्यवजातशस्त्रा-ऽशस्त्रखेदज्ञयोर्व्याप्तिः** | **२८६** |
| **सू०११०** | **अकर्म्मणो व्यवहाराभावः, कर्म्मणोपाधिः** | **२८७** |
| **सू०१११** | **कर्म्ममूला हिंसा** | **२८७** |
| | सत्तास्थाननिरूपणम् | २८८-९० |
| **सू०१११** | **लोकं ज्ञात्वा लोकसञ्ज्ञां त्यक्त्वा संयमे पराक्रमः कार्यः** | **२९०** |
| | **द्वितीय उद्देशकः** | **२९१-३०१** |
| **सू०११२(४)** | **सम्यक्त्वदर्शिनः स्वरूपम्** | **२९१** |
| **सू०११३(५)** | **कामगृद्धिः संसारमूलम्** | **२९२** |

अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०११४(६) | बालसङ्गनिषेधः | २९२-३ |
| सू०११५(७) | अग्रं मूलं च त्यज | २९३ |
| सू०११६ | दृष्टभयो मुनिः | २९४ |
| सू०११६ | निष्कर्मदर्शिनः स्वरूपम् | २९५ |
| | प्रकृतिबन्धस्थानानि | २९६-७ |
| सू०११७ | सत्ये धृतिः कर्त्तव्या | २९७ |
| सू०११८ | अनेकचित्ते पुरुषे दोषाः | २९८ |
| सू०११९ | समुत्थितस्य ज्ञानिनः स्वरूपम् | २९९ |
| सू०१२०(८) | वीरस्वरूपवर्णनम् | ३०० |
| सू०१२१(९) | उन्मज्जनं लब्ध्वा जीवसमारम्भो न कर्तव्यः | ३०१ |
| | तृतीय उद्देशकः | ३०२-३११ |
| सू०१२२ | लोकसन्धिं ज्ञात्वा आत्मौपम्यं समाचरेत् | ३०२ |
| सू०१२२ | न केवलं पापकर्माकरणतया श्रमणः | ३०३ |
| सू०१२३ | आत्मनो विप्रसादः कार्यः | ३०३ |
| सू०१२३(१०) | प्रमादस्त्याज्यः | ३०४ |
| सू०१२३ | आगतिं गतिं परिज्ञाय कञ्चन न हन्यात् | ३०५ |
| सू०१२४(११) | यदस्यातीतं तदागमिष्यति | ३०६ |
| सू०१२४ | विधूतकल्पः सुखानभिलाषी | ३०७ |
| सू०१२४ | अरतावानन्दे चाऽग्रहं परित्याज्यम् | ३०८ |
| सू०१२५ | पुरुषस्य स्वात्मैव मित्रं, बाह्यमित्रेच्छा व्यर्था | ३०९ |
| सू०१२६ | पुरुषस्य आत्मनिग्रहो मोक्षोपायः | ३१० |
| सू०१२७ | सत्ये उपस्थितो मारं तरति | ३१० |
| सू०१२७ | लोकालोकप्रपञ्चाद् मुक्तेरुपायः | ३११ |
| | चतुर्थ उद्देशकः | ३१२-३१९ |
| सू०१२८ | क्रोधादीनां वमनं पश्यकस्य वर्धमानस्वामिनो दर्शनम् | ३१२-३ |
| सू०१२९ | एकज्ञ-सर्वज्ञयोर्व्याप्तिः | ३१४ |
| सू०१२९ | सर्वतः प्रमत्तस्य भयम् | ३१४ |

| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०१२९ | एकनाम-बहुनामयोर्व्याप्तिः | ३१५ |
| सू०१२९ | वीरा महायानं यान्ति | ३१५-७ |
| सू०१३० | क्रोधादिदर्शी मानादिदर्शी भवति | ३१८ |
| सू०१३१ | पश्यकस्य नोपाधिः | ३१९ |
| | **चतुर्थमध्ययनं सम्यक्त्वम्** | **३२१-३५९** |
| | **प्रथम उद्देशकः** | **३२१-३३२** |
| नि०२१६-२१७ | उद्देशकार्थाधिकारनिरूपणम् | ३२१ |
| नि०२१८-१९ | सम्यक्त्वस्य निक्षेपाः | ३२२ |
| नि०२२० | भावसम्यक्त्वस्य त्रैविध्यम् | ३२३ |
| नि०२२१-२२ | अन्धवत् मिथ्यादृष्टेः कार्यासिद्धिः | ३२४ |
| नि०२२३ | सम्यग्दृष्टेः ज्ञानादीनि सफलानि | ३२४ |
| नि०२२४-२५ | सम्यग्दर्शनस्य गुणाः | ३२५ |
| नि०२२६ | कृत्रिमानुष्ठायिनः श्रमणत्वाभावः | ३२६ |
| सू०१३२ | सर्वेषामर्हतामुपदेशः | ३२६ |
| सू०१३२ | उत्थितादीनामुद्दिश्य धर्मप्रवेदनम् | ३२८ |
| नि०२२७-२८ | सर्वेषामर्हतामहिंसोपदेशः | ३२९ |
| सू०१३३ | सम्यग्दर्शनमादाय न गोपनं कर्त्तव्यम् | ३३० |
| सू०१३३ | लोकैषणाया अनाचरणम् | ३३० |
| सू०१३३ | अप्रमत्तेन सदा पराक्रन्तव्यम् | ३३२ |
| | **द्वितीय उद्देशकः** | **३३३-३४५** |
| सू०१३४ | आश्रव-परिश्रवयोर्व्याप्तिः | ३३३ |
| सू०१३४ | ज्ञानिन आख्यानम् | ३३४-५ |
| सू०१३४ | मृत्युमुखस्य अनागमो नास्ति | ३३६ |
| सू०१३४ | इच्छाप्रणीतादीनामपायाः | ३३७ |
| सू०१३५ | क्रूरा-ऽक्रूरकर्मणां फलम् | ३३८ |
| सू०१३६ | अनार्याणां वचनानि | ३३९-४० |
| सू०१३७ | तत्र आर्याणां प्रतिक्षेपः | ३४१ |

अनुक्रमः


| | विषय | पृष्ठाङ्कः |
|---|---|---|
| सू०१३८-३९ | आर्याणां वचनानि | ३४१-३ |
| नि०२२९-२३३ | राहगुप्तकारिता परीक्षा | ३४३ ४ |
| नि०२३४-३५ | शुष्केतरगोलकवत् विरक्ता-ऽविरक्तयोर्लेपालेपौ | ३४४ |
| | **तृतीय उद्देशकः** | **३४६-३५२** |
| सू०१४० | बहिर्लोक उपेक्षणीयः | ३४६ |
| सू०१४० | प्रावादिकानां परिज्ञाकथनम् | ३४७ |
| | प्रकृत्युदयस्थानानि | ३४८ |
| सू०१४१ | आज्ञाकाङ्क्षिणा शरीरधुननं कार्यम् | ३४९ |
| नि०२३६ | शुष्ककाष्ठवद् चरणास्थितसाधूनां कर्म्मक्षपणम् | ३५१ |
| सू०१४१ | जीर्णकाष्ठवदात्मसमाहितैः प्रमथनीयम् | ३५० |
| सू०१४२ | क्रोधपरित्यागायोपदेशः | ३५१-२ |
| | **चतुर्थ उद्देशकः** | **३५३-३५९** |
| सू०१४३ | शरीरस्याऽऽपीडनं प्रपीडनं निष्पीडनं च कर्त्तव्यम् | ३५३ |
| सू०१४३ | दुरनुचरो वीराणां मार्गः | ३५४ |
| सू०१४४ | अज्ञस्य आज्ञालाभो नास्ति | ३५५ |
| सू०१४५ | भोगेच्छाविनिवृत्तानां स्वरूपम् | ३५६ |
| सू०१४५ | वेद्विदां निर्याणम् | ३५७ |
| सू०१४६ | वीराणां सत्यनिष्ठता | ३५८ |
| सू०१४६ | वीराणां ज्ञानम् | ३५८-९ |
| | **परिशिष्टानि** | |
| १. | आचाराङ्गचूर्णि-वृत्तिगतव्याख्यावैषम्यम् | १-१५ |
| २. | कथानकानि | १६-२० |
| ३. | शास्त्रान्तरैः सह तुलना | २१-३० |
| ४. | शस्त्रपरिज्ञाध्ययनान्तर्गतपञ्चमवनस्पत्युद्देशकगतकतिचिद्वृक्षाणां चातुर्वर्णीयछायाचित्राणि | ३१-७० |
| ५. | शीलांकाचार्यकृतकृतिविषयकसमालोचना —ले०अमृतलाल मोहनलाल भोजक | ७१-७४ |
| ६. | सम्पादनोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च | ७५-७७ |

श्रीमद्

# आचाराङ्गसूत्रम्

आयारम्मि अहीए जं णाओ होइ समणधम्मो उ ।
तम्हा आयारधरो भण्णइ पढमं गणिट्ठाणं ॥

— आचाराङ्गनिर्युक्ति

प्रथमं

# शस्त्रपरिज्ञाध्ययनम्

सुयं मे आउसं ! तेण भगवया एवमक्खायं–

– सू०१

॥ अर्हम् ॥

पञ्चमगणधरदेवश्रीसुधर्मस्वामिपरम्परायातं

श्रुतकेवलिभद्रबाहुस्वामिसन्दृब्धनिर्युक्तियुतं

✡श्री≠शीलाचार्यविरचितविवरणविभूषितं

# ॥ श्री आचाराङ्गसूत्रम् ॥

## प्रथमः श्रुतस्कन्धः ।

## प्रथमं शस्त्रपरिज्ञाध्ययनम् ।

### प्रथम उद्देशकः ।

[१]॥ ॐ नमः सर्वज्ञाय ॥

Φजयति समस्तवस्तुपर्यायविचारापास्ततीर्थिकम्,
विहितैकैकΔतीर्थनयवादसमूहवशात् प्रतिष्ठितम् ।
[२]बहुति*[३]थभङ्गिसिद्धसिद्धान्तविधूनित⊕मलमलीमसम्,
तीर्थमनादिनिधनगतमनुपममादिनतं जिनेश्वरैः ॥१॥

**आचारशास्त्रं** सुविनिश्चितं यथा, जगाद **वीरो** जगते हिताय यः ।
तथैव किञ्चिद् गदतः स एव मे, पुनातु धीमान् विनयार्पिता गिरः ॥२॥

**शस्त्रपरिज्ञाविवरण**मतिबहु गहनं च **गन्धहस्ति**कृतम् ।
तस्मात् सुखबोधार्थम्, गृह्णाम्यहमञ्जसा सारम् ॥३॥

---

टि० १. नमः **सर्वविदे** ख घ ङ च । **ॐ नमो वीतरागाय** ग ॥ २. **बहुविधभङ्गसि०** ग घ च ॥ ३. **०थभङ्गसि०** ङ ॥

**वि०टि०** ✡ अत्रेदमवधेयम्- **आचाराङ्ग**सूत्रस्य **शीलाचार्य**विरचितटीकासहितः अध्ययनचतुष्टयात्मको भागः आगमप्रभाकरमुनिराजश्री**पुण्यविजय**जीमहाराजस्य अन्तेवासितुल्येन गृहस्थेन श्रावकेण पं० **अमृतलाल**भाई **मोहनलाल** भोजकेन संशोधितो तेनैव च स्वहस्तेन लिखितोऽस्माकं हस्ते समायातोऽधुना । स यथालब्ध एव सम्प्रति प्रकाश्यते मया **जम्बूविजयेन** । तत्र **क ख ग** इत्यादि संकेतैः बहवः पाठभेदा निर्दिष्टाः । किन्तु तेषां संकेतानां कोऽर्थ इति न ज्ञायतेऽस्माभिः । **क ख ग** इत्यादयो हस्तलिखिता आदर्शाः कुत्रत्या इति वयं न जानीमः । पं० **अमृतलालभाई** महोदयोऽपि दिवंगत इति अत्रार्थे प्रष्टव्यः कोऽपि नास्ति —इति **जम्बूविजयेन** निवेद्यते, तथा कतिचित्करणीयसंस्काराणि कृत्वा **जयानन्द**परनाम्ना **अनन्तयशविजयेन** पुनः सम्पाद्यते ॥ ≠ '**शीलाङ्काचार्य**' इति प्रसिद्धिः ॥ Φ "**जयती**ति स्कन्दकं छन्दः" जै०वि०प० ॥ **जै०वि०प०=जैनसिद्धान्तविषमपदपर्यायनामा** ग्रन्थो ज्ञायते, यद् वा **जैसलमेरविषमपदपर्याय**नामा ग्रन्थो स्यात् ॥ Δ "**तीर्थं** इति मत" जै०वि०प० ॥ * '**तिथुक्**' प्रत्यय अत्र प्रकारवाची ग्राह्यः ॥ ⊕ "**मल** इति बद्धं कर्म, **मलीमसे**ति बध्यमानम्" जै०वि०प० ॥

इह हि राग-द्वेष-मो[1]हाभिभूते[2]न संसारिजन्तुना शारीर-मान[3]सानेकातिकटुकदु:खोपनिपातपीडितेन तदपनयनाय हेयो[4]पादेयपदार्थपरिज्ञाने यत्नो विधेय:; न च न विशिष्टविवेकं ऋते; विशिष्टविवेकश्च न प्राप्ता षातिशयकलापाप्तोपदेशमन्तरेण आप्तश्च राग-द्वेष-मोहादीनां दोषाणाम् आत्यन्तिकप्रक्षयात्, ✎स चाऽर्हत एव, अत: प्रारभ्यत अर्हद्वचनानुयोग:। स च चतुर्धा, तद्यथा—धर्मकथानुयोगो गणितानुयोगो द्रव्यानुयोग: चरणकरणानुयोग: चेति । तत्र धर्मकथानुयोग **उत्तराध्ययना**दिक:, गणितानुयोग: **सूर्यप्रज्ञप्त्या**दिक:, द्रव्यानुयोग: **पूर्वाणि** ✡**सम्मत्या**दिकश्च, चरणकरणानुयोगश्चाऽऽ**चारा**दिक:, स च प्रधानतम:, शेषाणां तदर्थत्वात् । तदुक्तम्—

"**चरणपडिवत्तिहेउं, जेणियरे तिण्णि अनुयोग** ।" [ओघ०नि०भा०६] त्ति ।

तथा— "**चरणपडिवत्तिहेउं, ≠धम्मकहा-[5]कालदिक्खमादीया ।**
**दविए [6]दंसणसोही, दंसणसुद्धस्स चरणं तु** ॥" [ओघ०नि०भा०७]

गणधरैरप्यत एव तस्यैव आदौ प्रणयनमकारि । अत: तत्प्रतिपादकस्य **आचाराङ्ग**स्य अनुयोग: समारभ्यते; स च परमपदप्राप्तिहेतुत्वात् सविघ्न: । तदुक्तम्—

"**श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।**
**अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायका:** ॥"

तस्मादशेषप्रत्यूहोप[7]शमनाय मङ्गलमभिधेयम् । तच्च आदि-मध्या-ऽवसानभेदात् त्रिधा । तत्रादिमङ्गलम्— **सुयं मे आउसं ! तेणं भगवया एवमक्खाय**मित्यादि [अध्य०१ उद्दे०१ सू०१], [8]अत्र च भगवद्वचनानुवादो मङ्गलम् । अथवा **श्रुत**मिति श्रुतज्ञानम्, तच्च Δनन्द्यन्त:पातित्वाद् मङ्गलमिति; एतच्च अविघ्नेन अभिलषितशास्त्रार्थपारगमनकारणम् । मध्यमङ्गलं **लोकसारा**ध्ययनपञ्चमोद्देशकसूत्रम्— **से [9]जहा वि ⊕हरए पडिपुण्णे चिट्ठइ समंसि भोमे उवसंतरए सार[10]क्खमीणे**त्यादि [अध्य०५ उद्दे०५ सू०१६६], अत्र च ह्रदगुणै: [11]आचार्यगुणोत्कीर्तनम्, आचार्यश्च पञ्चनमस्कारान्त:पातित्वाद् मङ्गलमिति:; एतच्च

---

टि० १. ०हाद्यभिभू० क ऋते ॥ २. ०**न सर्वेणापि जन्तुना** ग ॥ ३. ०**सातिक**० क घ । ०**सानेककटु-कदु:खौघनिपा**० ग । ०**सानेककटु**० च ॥ ४. ०**पादेयार्थप**० ख ॥ ५. ०**कालि दिक्ख**० क घ ङ ॥ ६. **दंसणसुद्धी** ग ॥ ७. ०**शमाय** ख ॥ ८. तत्र ख ॥ ९. जहा **केवि** ख ग च ॥ १०. ०**क्खमाणे**० घ ङ ॥ ११. **आचार्यस्य पञ्च**० च ॥

**वि०टि०** ✎ **स च** आत्यन्तिकप्रक्षय: ॥ ✡ "**सम्मतीति** अभयदेवादि" जै०वि०प० ॥ ≠ "**धम्मकहेति** अनेन धर्मकथानुयोगभणन[म्], **कालेति** एतेन गणितानुयोगस्य" जै०वि०प० ॥ Δ "**नन्द्यन्त:** इति नन्दिध्वनिना ज्ञानपञ्चकं गृहीतम्" जै०वि०प० ॥ ⊕ "हरए इति ह्रद:" जै०वि०प० ॥

अभिलषितशास्त्रार्थस्थिरीकरणार्थम् । अवसानमङ्गलं नवमाध्ययने अवसानसूत्रम्— **अभिणिव्वुडे अमाई, आवकहाए भयवं समियासी** [अध्य०९ उद्दे०४ सू०३२२(१०९)], अत्र '**अभिनिर्वृत**'ग्रहणं संसारमहातरुकन्दो○च्छेदाऽविप्रति[1]पत्त्याध्या[?धा]नकारित्वाद् मङ्गलमिति[2]; एतच्च शिष्य-प्रतिशिष्यसन्तानाव्यवच्छेदार्थमिति । अध्ययनगतसूत्रमङ्गलत्व-प्रतिपादनेनैव अध्ययनानामपि मङ्गलत्वं उक्तमेव इति न प्रतन्यते । सर्वमेव वा शास्त्रं मङ्गलम्, ज्ञानरूपत्वात्[3], ज्ञानस्य च निर्जरार्थत्वात्, निर्जरार्थत्वेन च तस्याऽविप्रतिपत्तिः । यत उक्तम्—

**''जं अण्णाणी कम्मं खवेति बहुयाहि वासकोडीहिं ।**
**तं नाणी तिहिं गुत्तो खवेइ ऊसासमेत्तेण ॥''** [बृ०क०भा०११७०, पंचक०भा०१२१३]

मङ्गलशब्दनिरुक्तं च— मां गालयति=अपनयति भवादिति मङ्गलम्, मा भूद् गलः=विघ्नः गालो वा विनाशः शास्त्रस्य इति मङ्गलमित्यादि, शेषं तु आक्षेप-परिहारादिकं अन्यतः अवसेयमिति ।

साम्प्रतं आचारानुयोगः प्रारभ्यते— आचारस्य अनुयोगः-अर्थकथनम्=आचारा-नुयोगः । सूत्राद् अनु-पश्चाद् अर्थस्य योगः=अनुयोगः, सूत्राध्ययनात् पश्चादर्थकथनमिति भावना । अणोः वा लघीयसः सूत्रस्य महताऽर्थेन योगः=अणुयोगः । स चामीभिः द्वारैरनुगन्तव्यः, तद्यथा—

**''निक्खेवेगट्ठ निरुत्त[4] विहि पवित्ती य केन वा कस्स ।**
**तद्दार भेय लक्खण[5] तदरिहपरिसा य सुत्तत्थो ॥''** [दशवै०नि०५, बृ०क०भा०१४९]

तत्र निक्षेपो नामादिः सप्तधा । नाम-स्थापने क्षुण्णे । द्रव्यानुयोगो द्वेधा- आगमतो नोआगमतश्च । तत्र आगमतो ज्ञाता तत्र च अनुपयुक्तः । नोआगमतो ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तोऽनेकधा, द्रव्येण ✡सेटिकादिना द्रव्यस्य आत्म-परमाण्वादेः द्रव्ये निषद्यादौ[6] वा । क्षेत्रानुयोगः— क्षेत्रेण क्षेत्रस्य क्षेत्रे वाऽनुयोगः[7] । एवं कालेन कालस्य काले वाऽनुयोगः= कालानुयोगः । एवं वचनानुयोग एकवचनादिना । भावानुयोगो द्वेधा- आगमतो नोआगमतश्च[8] । तत्रागमतो ज्ञाता उपयुक्तः । नोआगमतस्तु औपशमिकादिभावैः, तेषां वाऽनुयोगः-

---

टि० १. ०च्छेदप्रति० घ । ०च्छेद्यविप्रति० ग च । ०च्छेद्याविप्रति० ङ ॥२. ०मित्येव तच्च ग ॥ ३. ०त् तस्य ज्ञान० ग ङ ॥ ४. ०रुत्ति वि० ख ऋते ॥ ५. तयरि० ग ॥ ६. ०दौ वा । क्षेत्रेण ख । ०दौ । क्षेत्रानु० ग ङ ॥ ७. ०गः क्षेत्रानुयोगः एवं ख च ॥ ८.०श्च । आगम० ख घ ङ च ॥

वि०टि० ○ ''छेद्यविप्रति० इति संशय-विपर्यया-ऽनध्यवसायरहितं ज्ञानम्'' जै०वि०प० ॥
✡ ''सेटिका इति खटिका'' जै०वि०प० ॥

अर्थकथनं=भावानुयोगः । शेष**मावश्यका**नुसारेण [१] नेयम् । केवलं इहानुयोगस्य प्रस्तुतत्वात् तस्य च आचार्याधीनत्वात् **केन** इति द्वारं विव्रियते, तथा उपक्रमादीनि च द्वाराणि प्रचुरतरोपयोगित्वात् प्रदर्श्यन्त इति । तत्र '**केन**' इति कथम्भूतेन ?, यथाभूतेन च सूरिणा व्याख्या कर्तव्या तथा [२] दर्श्यते—

**''देस-कुल-जाति-[३]रूवी संघयण-धिईजुतो अणासंसी ।**
**[४]अविकंथणो अमादी थिरपरिवाडी गहियवक्को ॥**

**जियपरिसो जियनिद्दो मज्झत्थो देस-काल-भावण्णू ।**
**आसन्नलद्धपतिभो नाणाविहदेसभासण्णू ॥**

**पंचविहे आयारे जुत्तो सुत्त-ऽत्थ-तदुभयविहिण्णू ।**
**आहरण-हेउ-कारण-नयनिउणो गाहणाकुसलो ॥**

**ससमय-परसमयविऊ गंभीरो दित्तिमं सिवो सोमो ।**
**गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं ॥''** [बृ०क०भा०२४१-२४४]

आर्यदेशो[५]द्भूतः सुखावबोधवचनो [६]भवत्यतो **देश**ग्रहणम् । पैतृकं [७]**कुलमि**क्ष्वाक्वादि, ज्ञातकुलश्च यथोत्क्षिप्तभारवहने न श्राम्यतीति । मातृकी **जातिः**, तत्सम्पन्नो विनयादिगुणवान् भवति । 'यत्राकृतिस्तत्र गुणा वसन्ति' इति **रूप**ग्रहणम् । **संहनन-धृतियुतो** व्याख्यानादिषु न खेदमेति । **अनाशंसी** श्रोतृभ्यो न वस्त्राद्याकाङ्क्षति । **अविकत्थनः** हित-मितभाषी । **अमायी** सर्वत्र विश्वास्यः । **स्थिरपरिपाटिः** परिचितग्रन्थस्य सूत्रा-ऽर्थगलनाऽसम्भवात् । **ग्राह्यवाक्यः** सर्वत्राऽस्खलिताज्ञः ।

**जितप[८]र्षद्** राजादिसदसि न क्षोभमुपयाति । **जितनिद्रः** अप्रमत्तत्वाद् निद्राप्रमादिनः शिष्यान् सुखेनै[९]व प्रबोधयति । **मध्यस्थः** शिष्येषु समचित्तो भवति । **देश-काल-भावज्ञः** सुखेनैव गुणवद्देशादौ विहरिष्यति । **आसन्नलब्धप्रतिभो** द्राक् परवाद्युत्तरदानसमर्थो भवति । नानाविधदेशभाषाविधिज्ञस्य [१०]नानादेशजाः [११]शिष्याः सुखं व्याख्यामवभोत्स्यन्ते ।

ज्ञानाद्याचारपञ्चकयुक्तः श्रद्धेयवचनो भवति । **सूत्रा-ऽर्थ-तदुभयविधिज्ञ** उत्सर्गा-ऽपवादप्रपञ्चं यथावद् ज्ञापयिष्यति । **हेतूदाहरण-निमित्त-नयप्रपञ्चज्ञः** अनाकुलो हेत्वादीन्

---

**टि०** १. **ज्ञेयम्** ग च ॥ २. **प्रदर्श्यते** ग घ ङ च ॥ ३. **०रूवी संघयणी धीजुतो** ख च । **०रूवी संघयणी धिइजुतो** क ग ॥ ४. **अविकत्थणो** ख ग घ ङ ॥ ५. **०शोद्भवः** सु०ग ॥ ६. **भवतीत्यतो** ग ॥ ७. **कुलमेक्ष्वाक्वादि** क ख च ॥ ८. **०परिषद् रा०** ख ध ङ च ॥ ९. **०व बोध०** ख ग च ॥ १०. **नानविधदे०** च ॥ ११. **शिष्या व्याख्यानं सुखमव०** ग ॥

आचष्टे। **ग्राहणाकुशलो** बह्वीभिर्युक्तिभिः शिष्यान् बोधयति ।

**स्वसमय-परसमयज्ञः** सुखेनैव तत्स्थापनोच्छेदौ करिष्यति । **गम्भीरः** खेदसहः । **दीप्तिमान्** पराधृष्यः । शिवहेतुत्वात् **शिवः**, तदधिष्ठितदेशे मार्याद्युपशमनात् । **सौम्यः** सर्व[1]जनमनो-नयनरमणीयः । **गुणशतकलितः** ⊕प्रश्रयादिगुणोपेतः । एवंविधः सूरिः प्रवचनानुयोगे योग्यो भवति ।

तस्य चानुयोगस्य महापुरस्येव चत्वारि अनुयोगद्वाराणि=व्याख्याङ्गानि भवन्ति, तद्यथा—उपक्रमो निक्षेपोऽनुगमो नयः च । तत्रोपक्रमणम्=उपक्रमः, उपक्रम्यते अनेन अस्माद् अस्मिन् इति वा उपक्रमः, व्याचिख्यासितशास्त्र[2]समीपानयनमित्यर्थः । स च शास्त्रीय-लौकिकभेदाद् द्विधा । तत्र शास्त्रीय- आनुपूर्वी नाम प्रमाणं वक्तव्यता अर्थाधिकारः समवतारश्चेति[3] षोढा । लौकिको नाम-स्थापना-द्रव्य-क्षेत्र-काल-भावभेदात् षोढैव ।

निक्षेपणं अनेन अस्माद् अस्मिन् इति वा निक्षेपः, उपक्रमानीतस्य व्याचिख्यासितशास्त्रस्य नामादिन्यसनमित्यर्थः । स च त्रिविधः[4], तद्यथा— ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च । तत्रौघनिष्पन्नः अङ्ग-ऽध्ययनादिसामान्याभिधानन्यासः । नामनिष्पन्न आचार-शस्त्र-परिज्ञादिविशेषाभिधाननामादिन्यासः । सूत्रालापकनिष्पन्नश्च सूत्रालापकानां नामादिन्यसनमिति ।

अनुगमनं अनेन अस्माद् अस्मिन् इति वा अनुगमः, अर्थकथनमित्यर्थः । स च द्वेधा- निर्युक्त्यनुगमः सूत्रानुगमश्चेति । तत्र निर्युक्त्यनुगमः त्रिविधः, तद्यथा— निक्षेपनिर्युक्त्यनुगम ✡उपोद्घातनिर्युक्त्यनुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमश्च इति । तत्र निक्षेपनिर्युक्त्यनुगमो निक्षेप एव सामान्य-विशेषाभिधानयोः ओघनिष्पन्न-नामनिष्पन्नाभ्यां निक्षेपाभ्यामनुगतः, सूत्रापेक्षया वक्ष्यमाणलक्षणश्चेति । उपोद्घातनिर्युक्त्यनुगमश्च आभ्यां द्वारगाथाभ्याम् अनुगन्तव्यः, तद्यथा—

**"उद्देसे निद्देसे य निग्गमे खेत्त कालपुरिसे य ।**
**कारण पच्चय लक्खण नए समोयारणाणुमए ॥**
**किं कइविहं कस्स कहिं केसु कहं [5]केचिरं हवइ कालं ।**

---

टि० १. ०**जननयन-मनोरम०** ग ॥ २. ०**स्त्रस्य समी०** ग ॥ ३. ०**ति । लौ०** क ग घ ङ च ॥ ४. ०**धः-ओघ०** ख ॥ ५. **केच्चिरं** ग च । **किच्चिरं** घ ङ॥

**वि०टि० ⊕ प्रश्रयः**=विनयः ॥ ✡ वक्ष्यमाणमर्थं मनसि अवधार्य तदर्थं अर्थान्तरकथनं उपोद्घातः ॥

**कइ संतरमविरहियं भवागरिस फासणनिरुत्ती ॥''**

**[ आव०नि०१४०-४१,विशेषाव०भा०१४८४-८५ ]**

सूत्रस्पर्शिकनिर्युक्त्यनुगमः सूत्रावयवानां नयैः साक्षेप-परिहारं अर्थकथनम्। स च सूत्रे सति भवति, सूत्रं च सूत्रानुगमे । स च सूत्रोच्चारणरूपः पदच्छेदरूपश्चेति ।

अनन्तधर्माध्यासितं वस्तु एकेनैव धर्मेण नयन्ति=परिच्छिन्दन्तीति ज्ञानविशेषा नयाः, ते च नैगमादयः सप्तेति ।

साम्प्रतं **आचाराङ्गस्य** उपक्रमादीनां अनु[1]योगद्वाराणां यथायोगं किञ्चिद् बिभणिषुः अशेषप्रत्यूहोपशमनाय मङ्गलार्थं प्रेक्षापूर्वकारिणां च प्रवृत्त्यर्थं सम्बन्धा-ऽभिधेय-प्रयोजनप्रतिपादिकां **निर्युक्तिकारो** गाथामाह–

**[ नि० ] वंदित्तु सव्वसिद्धे जिणे य अणुओगदायए सव्वे ।**
**आयारस्स भगव[2]तो निज्जुत्तिं कित्तइस्सामि ॥१॥**

**वंदित्तु सव्वसिद्धे** इत्यादि । तत्र **वन्दित्वा सर्वसिद्धान् जिनान् च** इति मङ्गलवचनम् । **अनुयोगदायकान्** इति एतच्च ✡सम्बन्धव[3]चनं अपि । **आचारस्य** इति अभिधेयवचनम् । **निर्युक्तिं करिष्ये** इति प्रयोजनकथनमिति तात्पर्यार्थः ।

अवयवार्थस्तु **वन्दित्वा** इति **''वदि अभिवादन-स्तुत्योः''** [पा०धा०१/११] इति अर्थद्वयाभिधायी धातुः, तत्र अभिवादनं कायेन, स्तुतिः वाचा, अनयोश्च मनःपूर्वकत्वात् करणत्रयेणापि नमस्कार आवेदितो भवति । सितं- ध्मातं एषामिति सिद्धाः प्रक्षीणाशेषकर्माणः, सर्वे च ते सिद्धाश्च=**सर्वसिद्धाः**, सर्वग्रहणं तीर्था-ऽतीर्था-ऽनन्तर-परम्परादिसिद्धप्रतिपादकम्, तान् । **वन्दित्वा** इति सम्बन्धः सर्वत्र योज्यः । राग-द्वेषजितो **जिनाः** तीर्थकृतः, तानपि सर्वान् अतीता-ऽनागत-वर्तमानसर्वक्षेत्रगतान् इति। **अनुयोगदायिनः सुधर्मस्वामि**प्रभृतयो यावदस्य भगवतो निर्युक्तिकारस्य **भद्रबाहुस्वामिनः** चतुर्दशपूर्वधरस्य आचार्याः, अतस्तान् सर्वानिति । अनेन च आम्नायकथनेन [4]स्वमनीषिकाव्युदासः कृतो भवति ।

वन्दित्वा इति क्त्वाप्रत्ययस्य उत्तरक्रियासव्यपेक्षत्वाद् उत्तरक्रियामाह- **आचारस्य** यथार्थनाम्नः, **भगवत** इति अर्थ-धर्म-प्रयत्नगुणभाजः, तस्यैवंविधस्य निश्चयेन

टि० १. ०नुयोगं कि० ख ॥ २. ०वओ णिज्जु० ख विना ॥ ३. **०वचनम् । आचा०** क-खप्रत्योः पश्चात् कृतम् ॥ ४. **स्वमनीषिकाया व्यु०** ख ॥

वि०टि० ✡ **''सम्बन्धवचनमपि** इति न केवल(लं)मङ्गलवचनम्, गुरुपर्वक्रमसम्बन्धकथनमपि'' जै०वि०प० ॥

अर्थप्रतिपादिका युक्तिः=**निर्युक्तिः**, तां **कीर्तयिष्ये**=अभिधास्ये इति, अन्तस्तत्त्वेन निष्पन्नां निर्युक्तिं बहिस्तत्त्वेन प्रकाशयिष्यामीत्यर्थः ॥१॥

यथाप्रतिज्ञातमेव बिभणिषुः निक्षेपार्हाणि पदानि तावत् सुहृद् भूत्वा आचार्यः सम्पिण्ड्य कथयति—

**[ नि० ] आयार अंग सुय खंध बंभ चरणे तहेव सत्थे य ।**
**परिण्णाए सन्नाए निक्खेवो तह[१] दिसाणं च ॥२॥**

**आयारे**त्यादि । आचार-अङ्ग-श्रुत-स्कन्ध-ब्रह्म-चरण-शस्त्र-परिज्ञा-सञ्ज्ञा-दिशां[२] निक्षेपः कर्तव्य इति । तत्र आचार-ब्रह्म-चरण-शस्त्र-परिज्ञाशब्दा नामनिष्पन्ने निक्षेपे द्रष्टव्याः । अङ्ग-श्रुत-स्कन्धशब्दा ओघनिष्पन्ने, सञ्ज्ञा-दिक्शब्दौ तु सूत्रालापकनिष्पन्ने निक्षेपे द्रष्टव्यौ इति ॥२॥

[३]एतेषां मध्ये कस्य कतिविधो निक्षेपः ? इत्यत आह—

**[ नि० ] चरण-दिसावज्जाणं निक्खेवो चउविहो[४] उ नायव्वो ।**
**चरणम्मि छव्विहो[५] खलु सत्तविहो होइ उ[६] दिसाणं ॥३॥**

**चरणे**त्यादि । **चरण-दिग्वर्जानां चतुर्विधो निक्षेपः । चरणस्य षड्विधः**, दिक्शब्दस्य सप्तविधो[७] निक्षेपः ॥३॥ अत्र च क्षेत्र-कालादिकं यथासम्भवं आयोज्यम्; नामादिचतुष्टयं[८] तु सर्वव्यापीति दर्शयितुमाह—

**[ नि० ] जत्थ य[९] जं जाणेज्जा निक्खेवं निक्खिवे निरवसेसं ।**
**जत्थ वि य ण जाणेज्जा चउक्कयं निक्खिवे तत्थ ॥४॥**

**जत्थ य जमि**त्यादि । **यत्र** चरण-दिक्शब्दादौ **यं** निक्षेपं क्षेत्र-कालादिकं **जानीयात्** तं तत्र **निरवशेषं निक्षिपेत्** । [१०]यत्र तु विशेषं **न जानीयाद्** आचारा-ऽङ्गादौ **तत्रा**पि नाम-स्थापना-द्रव्य-भावचतुष्कात्मकं निक्षेपं **निक्षिपे**दिति उपदेश इति गाथार्थः ॥४॥ प्रदेशान्तरप्रसिद्धस्य अर्थस्य लाघवमिच्छता **निर्युक्तिकारे**ण गाथा अभ्यधायि—

**[ नि० ] आयारे अंगम्मि य पुव्वुद्दिट्ठो चउक्कनिक्खेवो ।**
**नवरं पुण नाणत्तं भावायारम्मि तं वोच्छं ॥५॥**

---

टि० १. **तहा दि०** ख छ ज ञ ॥ २. **दिशांमिति एतेषां निक्षे०** ख विना ॥ ३. **एषां** ख घ च ॥ ४. **चउक्कओ य ना०** झ । **चउव्विहो** ञ ठ ॥ ५. **छव्विहे** झ । **छव्विहं** ञ ॥ ६. **हु** ख ॥ ७. **सप्तधा नि०** ग ङ विना ॥ ८. **०यं सर्व** कप्रतिं विना ॥ ९. **वि न य जा०** छ ॥ १०. **यत्र निरवशेषं न** घ ङ च ॥

**आयारे** इत्यादि । **क्षुल्लिकाचारकथायां**[1] **आचारस्य पूर्वोद्दिष्टो निक्षेपः । अङ्गस्य**[2] तु **चतुरङ्गाध्ययन** इति, यश्च अत्र विशेषः सोऽभिधीयते **भावाचारविषय** इति ॥५॥

यथाप्रतिज्ञातमाह—

[ नि० ] **तस्सेगट्ठ पवत्तण पढमंग गणी तहेव परिमाणे ।**
**समोतारे सारे या सत्तहिं दारेहिं नाणत्तं ॥६॥**

**तस्से**त्यादि गाथा । **तस्य**=भावाचारस्य **एकार्था**भिधायिनो वाच्याः । तथा केन प्रकारेण प्रवृत्तिः **प्रवर्तना**[3] आचारस्य अभूत्; तच्च वाच्यम् । तथा **प्रथमाङ्गता** च वाच्या । तथा **गणी**=आचार्यः, तस्य कतिथं स्थानमिदं इति च वाच्यम् । तथा **परिमाणम्**=इयत्ता वाच्या । तथा किं क्व **समवतरति** इति एतच्च[4] वाच्यम् । तथा **सारश्च** वाच्यः इति । एभिः द्वारैः ✡पूर्वस्माद् भावाचाराद् अस्य भेदः=नानात्वमिति पिण्डार्थः ॥६॥

अवयवार्थं तु **निर्युक्तिकृद्** एवाभिधातुमाह—

[ नि० ] **आयारो आचालो आगालो आगरो य आसासो ।**
**आयरिसो[5] अंगं[6] ति य आइण्णाऽऽजाई[7][8] आमोक्खो[9] ॥७॥ दारं ॥**

**आयारो**[10] इत्यादि । आचर्यते[11][12] = आसेव्यते **इति आचारः** । स च नामादिश्चतुर्धा । तत्र ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तो द्रव्याचारोऽनया गाथया अनुसर्तव्यः—

**"नामण-धोयण-वासण-सिक्खावण-सुकरणाविरोहीणि ।**
**दव्वाणि जाणि लोए दव्वायारं वियाणाहि॥"** [ दशवै०नि०१८०, निशी०भा०६ ]

भावाचारो द्वेधा- लौकिको लोकोत्तरश्च । तत्र लौकिकः पाषण्डिकादयः पञ्चरात्रादिकं यत् कुर्वन्ति स विज्ञेयः । लोकोत्तरश्च[13] पञ्चधा ज्ञानादिकः । तत्र ज्ञानाचारः- अष्टधा, तद्यथा—

**"काले विणए बहुमाणे उवहाणे तहा अनिण्हवणे ।**
**वंजण अत्थ तदुभए अट्ठविहो णाणमायारो ॥"**

**[ दशवै०नि०१८४, निशी०भा०८, व्यव०भा०६३ ]**

---

टि० १. **क्षुल्लकाचारे क०** ग ॥ २. **०स्य चतु०** च ॥ ३. **०र्तनमाचार०** ग ॥ ४. **०तद्वाच्यम्** ख ॥ ५. **आगरिसो** ख झ । **आदरिसो** ञ ॥ ६. **०गं चिय** झ ॥ ७. **आचिण्णा०** छ ॥ ८. **०इ यामोक्खो** ख ज ञ । **०इ यामोक्खे** झ । **०इ यामुक्खो** ठ ॥ ९. **आमोक्खे** छ ॥ १०. **०यारे इ०** ग घ च ॥ ११. **आचार्यते** ग घ च ॥ १२. **०ते सेव्य०** ख ॥ १३. **०रस्तु प०** ग घ ङ॥

वि०टि० ✡ **"पूर्वस्मादिति क्षुल्लिकाचारात्"** जै०वि०प० ॥

दर्शनाचारोऽपि अष्टधैव, तद्यथा–

**"निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य ।**
**उववूह थिरीकरणे वच्छल्ल पभावणे अट्ठ ॥"**

[आव०नि०१५७५, दशवै०नि०१८२, निशी०भा०२३, व्यव०भा०६४]

चारित्राचारोऽपि अष्टधैव-

**तिण्णेव य गुत्तीओ पंच य समियाओ[1] अट्ठ मिलियाओ ।**
**पवयणमायाउ[2] इमा तासु ठिओ चरणसंपन्नो ॥** [ ]

तपआचारो द्वादशधा[3], तद्यथा–

**"अणसणमूणोदरिया वित्तीसंखेवणं रसच्चाओ ।**
**कायकिलेसो संलीणया य बज्झो तवो होइ ॥**
**पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।**
**झाणं उस्सग्गो वि य अब्भितरओ तवो होइ ॥"** [दशवै०नि०४७-४८]

वीर्याचारस्तु अनेकधा–

**"अणिगूहियबलविरिओ परक्कमइ जो जहुत्तमाउत्तो ।**
**जुंजइ य जहाथामं नायव्वो वीरियायारो ॥"** [दशवै०नि०१८७, निशी०भा०४३]

एष पञ्चविध आचारः[4] । एतत्प्रतिपादकः च अयमेव ग्रन्थविशेषो भावाचारः । एवं सर्वत्र योज्यः ।

इदानीं **आचालः**- आचाल्यतेऽनेन[5] निबिडं कर्मादीति आचालः । सोऽपि चतुर्धा । ✡व्यतिरिक्तो वायुः । भावाचालः तु अयमेव ज्ञानादिः पञ्चधा ।

इदानीं **आगालः**- आगालनम्[6]=आगालः, समप्रदेशाद्यवस्थानम्[7] । सोऽपि चतुर्धा । व्यतिरिक्त उदकादेः निम्नप्रदेशाद्यवस्थानम्[8] । भावागालो ज्ञानादिक एव, तस्यात्मनि[9] रागादिरहिते अवस्थाननिमित्तत्वात्[10] ।

इदानीं **आकरः**- आगत्य तस्मिन् कुर्वन्तीति आकरः, नामादिः । तत्र व्यतिरिक्तो

---

**टि०** १. **०मिईओ** ग च ॥ २. **०माईउ** ख घ ङ । **०मातीउ** च ॥ ३. **०धा-अण०** ख ॥ ४. **०रः, तत्प्र०** ख ॥ ५. **०नेनातिनिबि०** च । **०नेनेति निबि०** ख ग ॥ ६. **आगलन०** ग घ ङ ॥ ७. **०शावस्था०** ख ग ॥ ८. **०शावस्था०** घ ङ च विना ॥ ९. **तस्मादात्मनि** ग ॥ १०. **०नमिति कृत्वा इ०** कप्रतिं विना ॥

**वि०टि०** ✡ "**व्यतिरिक्तो वायुः** इति ज्ञशरीर-भव्यशरीरयोः" जै०वि०प० ॥

रजतादिः । भावाकरोऽयमेव ज्ञानादिः, तत्प्रतिपादकः च अयमेव ग्रन्थः, निर्जरादिरत्नानामत्र लाभात् ।

इदानीं **आश्वासः**- आश्वसन्ति अस्मिन् इति आश्वासः, नामादिः । तत्र व्यतिरिक्तो यानपात्र-द्वीपादिः । भावाश्वासो ज्ञानादिरेव ।

इदानीं **आदर्शः**- [1]आदृश्यते अस्मिन् इति आदर्शः, नामादिः । व्यतिरिक्तो दर्पणः । भावादर्श उक्त एव, यतः अस्मिन् इतिकर्तव्यता दृश्यते ।

इदानीं **अङ्गम्**- अज्यते = व्यक्तीक्रियते अस्मिन् इति अङ्गम्, नामाद्येव । तत्र व्यतिरिक्तं शिरो-बाह्वादि । भावाङ्गं अयमेव आचारः ।

इदानीं **आचीर्णम्**- आचीर्णम्=आसेवितम् । तच्च नामादि षोढा । तत्र व्यतिरिक्तं द्रव्याचीर्णं सिंहादेः तृणादिपरिहारेण पिशितभक्षणम् । क्षेत्राचीर्णं **वाल्हीके**षु सक्तवः, **कोङ्कणे**षु पेया । कालाचीर्णं त्विदम्—

**"सरसो चंदणपंको अग्घति सरसा य गंधकासायी ।**
**पाडल-सिरीस-मल्लिय पियाइँ[2] काले निदाहम्मि ॥"** [　　　]

भावाचीर्णं तु ज्ञानादिपञ्चकम्, तत्प्रतिपादकः च आचारग्रन्थः ।

इदानीं **आजातिः**— आजायन्ते तस्यां इति आजातिः । साऽपि चतुर्धा । व्यतिरिक्ता मनुष्यादिजातिः । भावाजातिस्तु ज्ञानाद्याचारप्रसूतिः अयमेव ग्रन्थ इति ।

इदानीं **आमोक्षः**- आमुच्यन्ते[3] अस्मिन् इति आमोक्षणं वा आमोक्षः, नामादिः । तत्र व्यतिरिक्तो निगडादेः । भावामोक्षः कर्माष्टकोद्वेष्टनमशेषम्, एतत्साधकः च अयमेव आचार इति ।

एते किञ्चिद् विशेषाद् एकमेवार्थं विशिंषन्तः प्रवर्तन्त इति एकार्थिकाः शक्र-पुरन्दरादिवत्, एकार्थाभिधायिनां[4] च छन्दश्चिति-बन्धानुलोम्यादि[5]प्रतिपत्त्यर्थं उद्घट्टनम् ।
उक्तं च—

**"बंधाणुलोमया खलु सत्थम्मि य लाघवं असम्मोहो ।**

---

**टि०** १. आदर्श्यते ख ॥ २. ०इं समए नि० ख ॥ ३. ०न्ते तस्मि० ग ॥ ४. ०नां तु छ० ख । ०नां छ० च ॥ ५. ०लोमादि० ख ॥

**वि०टि०** ✎ एतद्वृत्तिस्तु एवम्—एकार्थिकाभिधाने यान्यर्थपदानि गाथादिभिः बद्धु[?बन्धु]मिष्यन्ते तेषां **बन्धे अनुलोमता** भवति, अननुकूलाभिधानपरिहारेण अनुकूलाभिधाने बन्धो भवतीत्यर्थः । अनुकूलेन

संत[ ?सत्थ ]गुणदीवणा वि य एगत्थ[1]गुणा हवंतेए ॥''

**[ बृ०क०भा०१७३ ]** ॥७॥

इदानीं **प्रवर्त[2]नाद्वारम्**— कदा पुनर्भगवता **आचारः** प्रणीतः ? इत्यत आह—

[ नि० ] **सव्वेसिं आयारो तित्थस्स पवत्तणे पढमयाए ।**
**सेसाइं अंगाइं एक्कारस आणुपुव्वीए ॥८॥ दारं॥**

**सव्वेसिमित्यादि । सर्वेषां** तीर्थकराणां तीर्थप्रवर्तना[3]दौ आचारार्थः **प्रथमतया** अभूद् भवति भविष्यति च, ततः शेषाङ्गार्थ इति । गणधरा अपि अनया एव आनुपूर्व्या सूत्रतया ग्रन्थन्तीति ॥८॥

इदानीं प्रथमत्वे हेतुमाह—

[ नि० ] **आयारो अंगाणं पढमं अंगं दुवालसण्हं पि ।**
**एत्थ य मोक्खोवाओ [4]एस य सारो पवयणस्स ॥९॥ दारं ॥**

**आयारो** इत्यादि । अयं **आचारो** द्वादशानां **[5]अङ्गानां प्रथमं अङ्ग**मिति अनूद्य कारणमाह-यतोऽत्र **मोक्षोपायः** = चरण-करणं प्रतिपाद्यते । **एष च प्रवचन[6]सारः**, प्रधानमोक्षहेतुप्रतिपादनात् । [7]अत्र च स्थितस्य शेषाङ्गाध्ययनयोग्यत्वाद् अस्य प्रथमतया उपन्यास इति ॥९॥

इदानीं **गणिद्वारम्**- साधुवर्गो गुणगणो वा गण इति, सोऽस्य अस्तीति गणी । आचारायत्तं च गणित्वमिति प्रदर्शयन्नाह—

[ नि० ] **आयारम्मि अहीए[8] जं णाओ होइ समणधम्मो उ[9] ।**
**तम्हा आयारध[10]रो भण्णइ पढमं गणिट्ठाणं ॥१०॥ दारं ॥**

**आयारम्मीत्यादि । यस्माद्** आचाराध्ययनात् क्षान्त्यादिकः चरण-करणात्मको वा **श्रमणधर्मः** परिज्ञातो **भवति तस्मात्** सर्वेषां गणित्वकारणानां आचारधरत्वं **प्रथमम्** =

---

टि० १. ०गट्ठगु० ख ग ॥ २. ०र्तनद्वा० ख ॥ ३. ०दाचारा० क ग च ॥ ४. **एसो सारो** ख ठ ॥ ५. **अप्यङ्ग०** ग । **अङ्गानामपि प्रथ०** घ ङ॥ ६. **०नस्य सारः** ग घ ङ॥ ७. **अत्रावस्थित०** घ ङ॥ ८. **०ए पन्नाओ** क ॥ ९. **य** ज ॥ १०. **०रो वुच्चइ** झ ॥

चाभिधानेन बद्धे **सूत्रे** सूत्रस्य **लाघवं** भवति । तथा विवक्षितार्थस्य **असम्मोहः**=निस्सन्दिग्धा प्रतीतिः यथा शक्र इति वा पुरन्दर इति वा इन्द्र इति वा इत्यादि उक्ते शक्रशब्दार्थस्य । तथा **शास्ता**=तीर्थकरः, तस्य **गुणाः**, तेषां **दीपना**=प्रकाशना भवति, यथा- अहो ! भगवान् एकैकस्यार्थस्य बहूनि पर्यायनामानि जानाति स्म । **एते** एकार्थिकानामभिधाने **गुणा भवन्ति** ॥बृ०क०भा०वृ०१७३॥

आद्यं प्रधानं वा **गणिस्थानमि**ति ॥१०॥

इदानीं **परिमाणम्**— किं पुनः अस्य अध्ययनतः पदतः च परिमाणम् ? इति अत आह—

**[नि०] नवबंभचेरमइओ अट्ठारसपयसहस्सिओ वेओ ।**
**हवइ य सपंचचूलो बहु-बहुतरओ पयग्गेणं ॥११॥ दारं ॥**

**नवे**त्यादि । तत्र अध्ययनतो नवब्रह्मचर्याभिधानाध्ययनात्मकोऽयम्[१], पदतोऽष्टादशपदसहस्रात्मकः, **वेद** इति विदन्ति अस्माद् हेयोपादेयपदार्थान् इति वेदः, क्षायोपशमिकभाववर्त्ती अयं आचार इति । सह पञ्चभिः चूडाभिः[२] वर्तत इति **सपञ्चचूडः[३] भवति** । उक्तशेषानुवादिनी चूडा । तत्र प्रथमा—

"**पिंडेसण सेज्जिरिया भासज्जाया[४] य वत्थपाएसा । उग्गहपडिम**"

[**आव०संग्रहणि ४७**] त्ति

सप्ताध्ययनात्मिका, द्वितीया सत्तसत्तिक्कया, तृतीया भावना, चतुर्थी विमुक्तिः, पञ्चमी **निशीथाध्ययनम्** । **बहु-बहुतरओ[५] पदग्गेणं** ति तत्र चतुश्चूलिकात्मकद्वितीयश्रुतस्कन्धप्रक्षेपाद् बहुः, **निशीथाध्ययन**पञ्चमचूलिकाप्रक्षेपाद् बहुतरः, अनन्तगमपर्यायात्मकतया[६] बहुतमश्च, **पदाग्रेण**=पदपरिमाणेन[७] भवतीति ॥११॥

इदानीं उपक्रमान्तर्गतं **समवतार**द्वारम्-तत्रैताश्चूडा नवसु[८] ब्रह्मचर्याध्ययनेषु अवतरन्तीति दर्शयितुमाह—

**[नि०] आयारग्गाणत्थो बंभच्चेरेसु सो समोयरइ ।**
**सो वि य सत्थपरिण्णाए पिंडियत्थो समोयरइ ॥१२॥**

**[नि०] सत्थपरिण्णाअत्थो छस्सु वि काएसु सो समोयरइ ।**
**छज्जीवणियाअत्थो[९] पंचसु वि वएसु ओयरइ ॥१३॥**

**[नि०] पंच य महव्वयाइं समोयरंते[१०] उ सव्वदव्वेसु ।**
**सव्वेसि पज्जवाणं अणंतभागम्मि उ[११] अइंति ॥१४॥**

**आयारे**त्यादि, **सत्थे**त्यादि, **पंचे**त्यादि । उत्तानार्थाः, नवरं **आचाराग्राणि** = चूलिकाः, **द्रव्याणि** धर्मास्तिकायादीनि, **पर्यायाः** अगुरुलघ्वादयः तेषां अनन्तभागे व्रतानां अवतार इति ॥१२-१४॥ कथं पुनः महाव्रतानां सर्वद्रव्येषु अवतारः ? इति तदाह—

---

टि० १. **यम्, अष्टाद०** ख ॥ २. **०श्चूलाभि०** च ॥ ३. **०चूलश्च** च ॥ ४. **भासा वत्थेसणा य पाएसा** ग ङ विना ॥ ५. **०हुययरो पद०** कपुस्तकं विना ॥ ६. **०कविवक्षया ब०** ग ङ ॥ ७. **०दप्रमा०** ग ङ ॥ ८. **नवब्र०** ख ॥ ९. **०वनिकायत्थो** ज ॥ १०. **०ते य स०** ख ठ ॥ ११. **उयइंति** ख । **उयरंति** ठ ॥

**[नि०] छज्जीवणिया [१]पढमे बितिए चरिमे य सव्वदव्वाइं ।**
**सेसा महव्वया खलु [२]तदेकदे[३]सेण दव्वाणं ॥१५॥ दारं ॥**

**छज्जीवणिया** इत्यादि । स्पष्टा ॥१५॥

कथं पुनः महाव्रतानां सर्वद्रव्येषु अवता[४]रः, न सर्वपर्यायेषु इति ?, उच्यते– येनाभिप्रायेण चोदितवान् तं आविःकर्तुमाह–

**''नणु सव्वनहपदेसाणंतगुणं पढमसंजमट्ठाणं ।**
**छव्विहप[५]रिवुड्ढीए छट्ठाणाऽसंखया सेढी ॥**
**अन्ने के पज्जाया [६]जेऽणुवउत्ता चरित्तविसयम्मि ।**
**[७]जे [*]तत्तोऽणंतगुणा जेसिं [८]तमणंतभागम्मि ॥**
**अन्ने केवलगम्म त्ति ते मती ते य के तदब्भहिया ।**
**एवं पि [९]होज्ज तुल्ला णाणंतगुणत्तणं जुत्तं ॥**
**[१०]आ०- [११]सेढी सणाणदंसणपज्जाया तेण तप्प[१२]माणा सा ।**
**इह पुण चरित्तमेत्तोपयोगिणो तेण ते थोवा ॥'' [विशेषाव०भा०२७५५-५८]**

अयं आसां अर्थः लेशतः– **ननु** इति असूयायाम् । संयमस्थानानि असङ्ख्या[१३]तानि द्रव्यार्थतया तावद् भवन्ति । तेषां यद् [१४]जघन्यं तद् अविभागप[१५]लिच्छेदेन बुद्ध्या खण्ड्यमा[१६]नं पर्यायैः अनन्ताविभागप[Δ]लिच्छेदात्मकं भवति । तच्च पर्यायसङ्ख्यया निर्दिष्टं **सर्वाकाशप्रदेशसङ्ख्याया अनन्तगुणम्,** सर्वनभःप्रदेशवर्गीकृतप्रमाणमित्यर्थः । ततो द्वितीयादिस्थानैः असङ्ख्यातगच्छगतैः अनन्तभागादिकया वृद्ध्या षट्स्थानकानां असङ्ख्येयस्थानगता श्रेणिः भवति। एवं चैकमपि स्थानं सर्वपर्यायान्वितं न शक्यते परिच्छेत्तुम्, किं पुनः सर्वाण्यपि इत्यतः ✎ **केऽन्ये पर्या[१७]याः** येषां अनन्तभागे व्रतानि वर्तेरन् इति । स्यान्मतिः- **अन्ये [१८]केवलगम्या** इति, इदमुक्तं भवति– [१९]केवलगम्या–

---

टि० १. ०मे वयम्मि चरिमे बितिए य ख ज झ ठ । ०मे चरिमे बितिए य छ ञ ॥ २. तहेक्कदे० छ । तदिक्कदे० ञ । तदेक्कदे० ख ज झ ठ ॥ ३. ०से य दव्वाइं ख ॥ ४. ०रः इति न सर्व० ग च ऋते ॥ ५. ०रिवड्डीए घ ङ च ॥ ६. जे पज्जत्ता चरि० ख ॥ ७. ते ग च ॥ ८. तयणं० ग च ॥ ९. होंति ख ॥ १०. आ० इति ख ग घ प्रतिषु नास्ति ॥ ११. सेढी सुणा० ग च ॥ १२. ०माणे सा ग ॥ १३. ०ङ्ख्यातपलिच्छेदानि द्रव्या० ख ॥ १४. जघन्यतरं तद् च ॥ १५. ०परिच्छे० ग विना ॥ १६. ०नम् अनन्तावि० ग ॥ १७. ०याः तेषा० ग ॥ १८-१९. केवलिग० क घ ङ॥

वि०टि० * ये तत्तो इति ये पर्याया ततः संयमस्थानात्, तत् चारित्रम् जै०वि०प० ॥ Δ ''पलिच्छेद इति खण्डानि'' जै०वि०प० ॥ ✎ केऽन्ये इति, अणंतभागमित्यादिनिर्युक्तिवचनमाशङ्क्याह परः-केऽन्ये पर्यायाः'' जै०वि०प० ॥

ऽप्रज्ञापनीयपर्यायाणां अपि ☆तत्र प्रक्षेपाद् बहुत्वम्, एवमपि ज्ञान-ज्ञेययोः तुल्यत्वात् तुल्या एव न अनन्तगुणा इति।

अत्र आचार्या[1] आहुः- याऽसौ संयमस्थानश्रेणिः निरूपिता सा सर्वा चारित्रपर्यायैः ज्ञान-दर्शनपर्यायसहितैः परिपूर्णा[2] ❒**तत्प्रमाणा** सर्वाकाशप्रदेशानन्तगुणा, **इह पुनः** ≠**चारित्रमात्रोपयोगित्वात्** पर्यायानन्तभागवृत्तित्वं इत्यदोषः।

इदानीं सारद्वारम्– कः कस्य सारः ? इत्याह–

**[ नि० ]  अंगाणं किं सारो? आयारो, तस्स[3] किं हवइ सारो? ।**
**अणुओगत्थो सारो, तस्स वि य परूवणा सारो ॥१६॥**

**अंगाणमि**त्यादि । स्पष्टा, केवलं **अनुयोगार्थः**=व्याख्यान[4]भूतोऽर्थः, तस्य **प्ररूपणा** [5]यथास्वं विनियोग इति ॥१६॥ अन्यच्च–

**[ नि० ]  सारो परूवणाए चरणं तस्स[6] वि य होइ निव्वाणं ।**
**निव्वाणस्स उ[7] सारो अव्वाबाहं जिणा बेंति ॥१७॥ दारं ॥**

**सारो** इत्यादि । स्पष्टा[8] ॥१७॥

इदानीं श्रुत-स्कन्धपदयोः नामादिनिक्षेपादिकं पूर्ववद् विधेयम्, भावेन च इह अधिकारः, भावश्रुतस्कन्धश्च ब्रह्मचर्यात्मक इत्यतो ब्रह्म-चरणशब्दौ निक्षेप्तव्यौ इत्याह–

**[ नि० ]  बंभम्मि[9][ ?म्मी ] उ[10] चउक्कं ठवणाए होइ बंभणुप्पत्ती ।**
**सत्तण्ह य वण्णाणं नवण्ह वण्णंतराणं च ॥१८॥**

**बंभम्मी**त्यादि । तत्र ब्रह्म नामादि चतुर्धा । [11]तत्र नामब्रह्म ब्रह्म इति अभिधानम् । असद्भावस्थापना अक्षादौ, सद्भावस्थापना प्रतिविशिष्टयज्ञोपवीताद्याकृतिमल्लेप्यादौ द्रव्ये, अथवा **स्थापनायां** व्याख्यायमानायां **ब्राह्मणोत्पत्तिः** वक्तव्या[12], तत्प्रसङ्गेन **च सप्तानां**[13] **वर्णानां नवानां च वर्णान्तराणां** उत्पत्तिः भणनीया इति ॥१८॥ यथाप्रतिज्ञातमाह–

---

टि० १. ०**चार्य आह-या०** ग ॥ २. ०**र्णा तावत्प्र०** ख ॥ ३. **तत्थ किं** ख । **तत्थ हवइ किं सारो** ठ ॥ ४. ०**नरूपोऽर्थः** खप्रतौ प्रत्यन्तरम् ॥ ५. **यथास्थं** ग च ॥ ६. **तस्सेव य होइ** ख ॥ ७. **य** ञ ॥ ८. **स्पष्टैव इ०** ग घ ङ च ॥ ९. **बंभंमि** ञ ॥ १०. **य** ठ ॥ ११. **तत्तु नाम ब्रह्मेत्य०** घ ङ । **तत्र नाम ब्रह्मेत्य** ख ॥ १२. ०**व्या ब्राह्मणोत्पत्तिप्रस०** घ ङ ॥ १३. ०**नां च व०** घ च ॥

**वि०टि०** ☆ "**तत्र** इति प्रज्ञापनीयपर्यायेषु, न हि ज्ञानमन्तरेण चारित्रं भवतीति आह **ज्ञान-ज्ञेययो**रित्यादि, कथमुक्तं **निर्युक्तिकृता सव्वेसिं पज्जवाण**मित्यादि इति पराभिप्रायः" जै०वि०प० ॥ ❒ "**तत्प्रमाणा** इति प्रज्ञापनीयाऽप्रज्ञापनीयपर्यायप्रमाणा" जै०वि०प० ॥ ≠ "**चारित्रमात्र** इति सर्वेषां ज्ञान-दर्शनपर्यायाणामपेक्षया चारित्रपर्यायाणामनन्तभागत्वम्, तेन यदुक्तं **निर्युक्तिकृता** तद् घटत एव" जै०वि०प० ॥

[ नि० ] **एक्का मणुस्सजाई रज्जुप्पत्ती[१]य दो कया उसहे ।**
**तिण्णेव सिप्पवणिए सावगधम्मम्मि चत्तारि ॥१९॥**

**एक्का** इत्यादि । यावद् **नाभेयो** भगवान् नाद्यापि रा[२]जलक्ष्मीं अध्यास्ते तावद् **एकैव मनुष्यजातिः** । तस्यैव **राज्योत्पत्तौ** भगवन्तमेव आश्रित्य ये स्थिताः ते क्षत्रियाः, शेषाश्च शोचनाद् रोदना[३]च्च शूद्राः । पुनः अग्न्युत्पत्तौ अयस्कारादिशिल्पवाणिज्यवृत्त्या वेशनाद् वैश्याः । भगवतो ज्ञानोत्पत्तौ **भरत**काकणीलाञ्छनात् श्रावका एव ब्राह्मणा जज्ञिरे, एते शु[४]द्धाः, त्रयश्चान्ये गाथान्तरितगाथया प्रदर्शयिष्यन्ते ॥१९॥

साम्प्रतं वर्ण-वर्णान्तरनिष्पन्नं सङ्ख्यानमाह—

[ नि० ] **संजोगे सोलसगं सत्त य वन्ना उ नव य अंतरिणो ।**
**एए [५]दो वि विगप्पा ठवणाबंभस्स नायव्वा ॥२०॥**

**संजोगे** इत्यादि । **[६]संयोगेन षोडश** वर्णाः समुत्पन्नाः । तत्र **सप्त वर्णाः, [७]नव तु वर्णान्तराणि** । एतच्च वर्ण-वर्णान्तरविकल्पद्वयं स्थापनाब्रह्म इति ज्ञातव्यम् ॥२०॥

साम्प्रतं पूर्वसूचितं वर्णत्रयमाह, यदि वा प्रागुद्दिष्टान् सप्त वर्णानाह—

[ नि० ] **प[८]गई चउक्कगाणंतरे य ते होंति स[९]त्त वन्ना [१०]उ ।**
**आणं[११]तरेसु चरिमो वण्णो खलु होइ नायव्वो ॥२१॥**

**पगई** इत्यादि । **प्रकृतयः च[१२]तस्त्रः** ब्राह्मण-क्षत्रिय-वैश्य-शूद्राख्याः । आसामेव चतसृणां अनन्तरयोगेन प्रत्येकं वर्णत्रयोत्पत्तिः, तद्यथा— द्विजेन क्षत्रिययोषितो जातः प्रधानक्षत्रियः सङ्करक्षत्रियो वा । एवं क्षत्रियेण वैश्ययोषितः, वैश्येन शूद्र्याः प्रधान-सङ्करभेदौ वक्तव्यौ इति **एवं सप्त वर्णा भवन्ति** । अनन्तरेषु योगेषु भ[१३]वाः = **आनन्तराः**, तेषु चरमवर्णव्यपदेशो भवति- ब्राह्मणेन क्षत्रियायाः क्षत्रियो भवतीत्यादि, स च स्वस्थाने प्रधानो भवतीति भावः ॥२१॥ इदानीं वर्णान्तराणां नवानां नामानि आह—

[ नि० ] **अं[१४]बट्ठुग्गणिसाया अजोगवं मागहा य सूया य ।**
**[१५]खत्ता वेदेहा वि य चंडाला नवमगा होंति ॥२२॥**

---

टि० १. ०त्तीइ दो ख ठ ॥ २. राज्यल० क ॥ ३. ०नात् शू० क॥ ४. **शुद्धास्त्रयः वर्णा अन्ये** ख ॥ ५. **दोण्णि विग०** ञ ॥ ६. **संयोगात् षोडश वर्णाः । तत्र** ख ॥ ७. **नव वर्णा०** ख च ॥ ८. **०गतिय च०** ञ ॥ ९. **०त्त नायव्वा** ॥ ख ॥ १०. **य** ञ ॥ ११. **०तरे उ च०** क छ ञ । **०तरिओ च०** झ ॥ १२. **०तस्त्रोऽपि ब्रा०** ग घ ङ ॥ १३. **०वा अन०** ख ॥ १४. **०बट्ठुग०** छ ॥ १५. **खत्ता य विदेहा** ख । **खत्त वइदेहा** छ । **खत्ता च विदेहा** झ । **खत्ता वतिदेहा** ञ ॥

**अम्बेत्यादि** । [1]**अम्बष्ठ उग्रः निषादः अयोगवं**[2] **मागधः सूतः क्षत्ता वैदेहः चाण्डालः** च इति ॥२२॥ कथमेते भवन्ति ? इत्याह–

[ नि० ]    **एगंतरिए**[3] **इणमो** [4]**अंबट्ठो चेव होइ उग्गो य**[5] **।**
**[6]बीयंतरिय निसाओ [7]परासवं तं च पुण**[8] **एगे**[9] **॥२३॥**

[ नि० ]    **पडिलोमे सुद्दाई अजोगवं मागहो य** [10]**सूओ य ।**
**एगंतरिए खत्ता** [11]**वेदेहा चेव** [12]**नायव्वा ॥२४॥**

[ नि० ]    **बितियंतरिए नियमा चंडालो**[13] **सो य होइ नायव्वो ।**
**अणुलोमे पडिलोमे एवं एए भवे भेया ॥२५॥**

**एगंते**त्यादि, **पडिलोमे** इत्यादि, **बीयंतरिए** इत्यादि । आसामर्थो यन्त्रकादवसेयः, तच्चेदम्–

| | | | |
|---|---|---|---|
| ब्राह्म० पु०-वैश्यस्त्री=अम्बष्ठः | क्षत्रि०पु०-शूद्रा स्त्री=उग्रः | बाह्म०पु०-शूद्रस्त्री=निषादः [14]परासवो वा | शूद्रपु०-वैश्यस्त्री=[15]अयोगवं |
| वैश्यपु०-क्षत्रियस्त्री =मागधः | क्षत्रियपुरु०-ब्राह्मणस्त्री=सूतः | शूद्रः पुरुषःक्षत्रियस्त्री=क्षत्ता | |
| वैश्यपु०-ब्राह्म०स्त्री=वैदेहः | शूद्रःपु०-ब्राह्म०स्त्री=चाण्डालः | | |

॥२३-२५॥

एतानि नव वर्णान्तराणि । इदानीं वर्णान्तरसंयोगोत्पत्तिमाह–

[नि०]    **उग्गेणं खत्ताए सोवागो वेणवो विदेहेणं ।**
**[16]अंबट्ठी [17]सुद्दीए [18]व बोक्कसो जो निसाएणं ॥२६॥**

[नि०]    **[19]सुद्देण निसाईए [20]कुक्कुडओ सो [21]उ होइ नायव्वो ।**

---

टि० १. **अम्बुष्ठ्यः** उ० च । **उम्बष्ठ** घ ॥ २. **०गवः मा०** ङ ॥ ३. **०ण इमो अं०** क छ ॥ ४. **अंबुट्ठो** ख ज झ । **अंबोट्ठो** ञ । ५. **उ** ख ॥ ६. **बिइयंत०** ख ज ठ ॥ ७. **परोम( स? )वं** क । **परासरं तं** झ ञ ॥ ८. **०ण वेगे** ठ ॥ ९. **एगो** क ञ ॥ १०. **सूए य** ञ ॥ ११. **वेदेहो** ञ ॥ १२. **नायव्वो** ञ ॥ १३. **०लो एस हो०** ञ । **०लो सो वि हो०** ठ ॥ १४. **परासरो वा** क ख च ॥ १५. **०गवः** च ॥ १६. **अंबुट्ठी** ख ज । **अम्बोट्ठी** छ ॥ १७. **सूईए** ख ञ ठ ॥ १८. **य बुक्कसो** ठ विना ॥ १९. **सूएण** ख ञ ठ ॥ २०. **कुक्कुरओ** ख ञ ठ ॥ २१. **वि** ठ । **य** ख ॥

**[1]एसो उ बिइयभेओ चउव्विहो होइ नायव्वो ॥२७॥**

**उग्गेणे**त्यादि, **सुद्देण** इत्यादि । अनयोरप्यर्थो यन्त्रकादवसेयः, तच्चेदम्—

| | | | |
|---|---|---|---|
| उग्रपु०-क्षत्ता स्त्री=श्वपाकः | वैदेहपु०-क्षत्तास्त्री =वैणवः | निषादपु[2]०-अम्बष्ठी[3] स्त्री शूद्री वा=बोक्कसः | [4]शूद्रपुरु-निषादस्त्री =कुक्कुडः[5] |

॥२६-२७॥

गतं स्थापनाब्रह्म । इदानीं द्रव्यब्रह्मप्रतिपादनायाह—

[ नि० ] **[6]दव्वं सरीरभविओ अन्नाणी बत्थिसंजमो चेव ।**
**भावे उ बत्थिसंजम[7] नायव्वो संजमो चेव ॥२८॥ दारं ॥**

**दव्वमि**त्यादि । ज्ञशरीर-भव्यशरीरव्यतिरिक्तं **शाक्य-परिव्राजका**दीनां अज्ञाना-नुगतचेतसां बस्तिनिरोधमात्रं विधवा-प्रोषितभर्तृकादीनां च कुलव्यवस्थार्थं कारिता-ऽनुमतियुक्तं द्रव्यब्रह्म । भावब्रह्म **तु** साधूनां **बस्तिसंयमः**, अष्टादशभेदरूपोऽपि अयं **संयम एव**, सप्तदश[8]विधसंयमाभिन्नरूपत्वाद् अस्य इति । अष्टादश भेदास्त्वमी—

**"दिव्यात् कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम् ।**
**औदारिकादपि तथा तद् ब्रह्माष्टादशविकल्पम् ॥" [प्रशम० १७७]** ॥२८॥

चरणनिक्षेपार्थमाह—

[ नि० ] **चरणम्मि होइ छक्कं गइमाहा[9]रे गुणे य [10]चरणं च ।**
**खेत्तम्मि जम्मि खेत्ते काले कालो जहिं[11] जो उ ॥२९॥**

**चरणम्मी**त्यादि । चरणं नामादि षोढा । व्यतिरिक्तं द्रव्यचरणं त्रिधा भवति गति-भक्षण-गुणभेदात् । तत्र गतिचरणं गमनमेव । आहारचरणं मोदकादेः । गुणचरणं द्विधा-लौकिकं लोकोत्तरं च । लौकिकं यद् द्रव्यार्थं हस्तिशिक्षादिकं वैद्यकादिकं वा शिक्षन्ते । लोकोत्तरं साधूनां अनुपयुक्त[12]चरणं **उदायिनृपमारका**देः वा । क्षेत्रचरणं यस्मिन् क्षेत्रे गत्याहारादि चर्यते व्याख्यायते वा, शब्दसामान्यान्तर्भावाद् वा शालिक्षेत्रादिचरणमिति । कालेऽपि एवमेव ॥२९॥ [13]भावचरणमाह—

टि० १. **एसो बिइओ भेओ** ख ज ठ । **एसो उ ठिईभेओ** छ । **एसो विगइभीओ** झ ॥ २. **०पु आंसु स्त्री सूता स्त्री वा बोक्सः** क । **०पु अंब० स्त्री सूता स्त्री बोकसः** ग च ॥ ३. **अम्बष्ठा** ख । **अम्बुष्ठी** घ ॥ ४. **सूतपुः नि०** ग च ॥ ५. **कुक्कुटः** ख । **कुक्कुरक** घ ङ । **कुकुडक** ग । **कुर्कुडः** च ॥ ६. **दव्वे स०** छ ॥ ७. **०जमो ना०** ख ज झ ठ । **०जमु ना०** ञ ॥ ८. **०शसंय०** ख ॥ ९. **०हारो गुणो य** क-ञप्रतिभ्यामृते ॥ १०. **चरणाइ** झ । **चरणे वा** ञ ॥ ११. **०हिं होति** ञ ॥ १२. **०युक्तं च०** घ ॥ १३. **भावमाह** ग घ ङ॥

[नि०] **भावे गइ[1] आहारे गुणे गुणवओ पसत्थ[2] अपसत्था ।**
**गुणचरणेण पसत्थेण बंभचेरा[3] णव हवंति ॥३०॥**

**भावे** इत्यादि । भावचरणं अपि गत्याहारगुणभेदात् त्रिधा । तत्र गतिचरणं साधोः उपयुक्तस्य युगमात्र[4]दृष्टेः गच्छतः । भक्षणचरणमपि शुद्ध[5]पिण्डं उपभुञ्जानस्य । गुणचरणं अप्रशस्तं मिथ्यादृष्टीनाम्, सम्यग्दृष्टीनामपि सनिदानम् । प्रशस्तं तेषामेव कर्मोद्वेष्टनार्थं मूलोत्तरगुणकलापविषयम् । इह च अनेनैव अधिकारः, यतो नवापि अध्ययनानि मूलोत्तरगुणस्थापकानि निर्जरार्थं अनुशील्यन्ते ॥३०॥

एतेषां च अन्वर्थाभिधानानि दर्शयितुमाह–

[नि०] **सत्थपरिण्णा लोगविजओ य सीओसणिज्ज सम्मत्तं ।**
**तह लोगसारणामं धुयं तहा[6] महपरिन्ना य ॥३१॥**

[नि०] **अट्ठमए[7] य विमोक्खो उवहाणसुयं च नवमगं[8] होइ ।**
**इय[9] एसो आयारो आयारग्गाणि सेसाणि ॥३२॥**

**सत्थे**त्यादि, **अट्ठमए** इत्यादि । स्पष्टे, केवलं **इति एष** नव अध्ययनरूप **आचारः**, द्वितीयश्रुतस्कन्धाध्ययनानि तु **शेषाणि आचाराग्राणी**ति ॥३१-३२॥

साम्प्रतं उपक्रमान्तर्गतः अर्थाधिकारो द्वेधा- अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च । तत्राद्यमाह–

[नि०] **जियसंजमो य लोगो जह बज्झइ जह य तं[10] पयहियव्वं ।**
**सुह-दुक्खतितिक्खा वि य सम्मत्तं लोगसारो य[11] ॥३३॥**

[नि०] **निस्संगया य छट्ठे मोहसमुत्था परीसहुवसग्गा ।**
**निज्जाणं[12] अट्ठमए नवमे य जिणेण[13] एवं[14] ति ॥३४॥ दारं ॥**

**जिय०** इत्यादि, **निस्संगे**त्यादि । तत्र **शस्त्रपरिज्ञा**यां अयं अर्थाधिकारः– **जियसंजमो** त्ति जीवेषु संयमो = जीवसंयमः, तेषु हिंसादिपरिहारः । स च जीवास्तित्वपरिज्ञाने सति भवति, अतो जीवास्तित्व-विरतिप्रतिपादनं अत्र अर्थाधिकारः १ ।

---

टि० १. **गइमाहारो गुणा गुण०** कादर्शं विना ॥ २. **०त्थमप०** कप्रतिमृते ॥ ३. **०चेरे ण०** झ ॥ ४. **०त्रदत्तदृष्टे०** ग ङ ॥ ५. **शुद्धं पि०** घ ङ ॥ ६. **तह महाप०** ख ज झ ठ ॥ ७. **०मव[?ओ] य** छ ॥ ८. **०गं भणियं । इच्चेसे** ख ज झ ठ । **०गं भणियं । इय** ञ ॥ ९. **ईएसो** छ ॥ १०. **तं विजहि०** क ञ ठ । **तं पजहि०** ख । **तं पइहि०** ज झ ॥ ११. उ क । १२. **णिव्वाणं** ख ज ञ ठ विना ॥ १३. **जिणाणए बेंति** क । **जिणाण** ञ ॥ १४. **एयं ति** ख ज झ ॥

**लोकविजये** तु **'लोगो जह बज्झइ जह य तं पयहियव्वं'** ति विजितभावलोकेन संयमस्थितेन लोको यथा बध्यते अष्टविधेन कर्मणा, यथा च तत् प्रहातव्यं तथा ज्ञातव्यमिति अयं अर्थाधिकारः २ । तृतीये तु अयम्— संयमस्थितेन जितकषायेण अनुकूल-प्रतिकूलोपसर्गनिपातेषु[1] **सुख-दुःखतितिक्षा** विधेया इति ३ । चतुर्थे तु अयम्— प्राक्तनाध्ययनार्थसम्पन्नेन तापसादिकष्टतपःसेविनां अष्टगुणैश्वर्यं उद्वीक्ष्यापि दृढ**सम्यक्त्वेन** भवितव्यमिति ४ । पञ्चमे तु अयम्— चतुरध्ययनार्थस्थितेन असारपरित्यागेन **लोकसार**-रत्नत्रय[2]युक्तेन भाव्यमिति ५ ।

षष्ठे तु अयम्— प्रागुक्तगुणयुक्तेन **निसङ्गता**युक्तेन अप्रतिबद्धेन[3] भाव्यमिति ६ । सप्तमे तु अयम्— संयमादिगुणयुक्तस्य कदाचित् **मोहसमुत्थाः परीषहा उपसर्गा** वा प्रादुर्भवेयुः ते सम्यक् सोढव्याः ७ । अष्टमे तु अयम्—**निर्याणम्**[4]=अन्तक्रिया, सा सर्वगुण[5]संयुक्तेन सम्यग् विधेया इति ८ । नवमे तु[6] अयम्— अष्टाध्ययनप्रतिपादितोऽर्थः सम्य[7]**गेवं वर्धमानस्वामि**ना विहित इति, तत्प्रतिपादनं[8] च[9] शेषसाधूनां उत्साहार्थम्, तदुक्तम्—

**"तित्थयरो चउणाणी सुरमहिओ सिज्झियव्व य धुयम्मि[10] ।**
**अणिगूहियबलविरिओ सव्वत्थामेसु उज्जमइ ॥**
**किं पुण अवसेसे[11]हि य दुक्खक्खयकारणा सुविहिएहिं ।**
**होइ ण उज्जमियव्वं सपच्चवायम्मि माणुस्से ? ॥"**

**[आचा०नि०२७८-७९]** ॥३३-३४॥

साम्प्रतं उद्देशार्थाधिकारः **शस्त्रपरिज्ञाया** अयम्—

[नि०] **जीवो छक्कायपरूवणा य तेसिं वहे[12] य बंधो त्ति ।**
**विरईए अहिगारो सत्थपरिण्णाए[13] कायव्वो ॥३५॥**

**जीवो** इत्यादि । तत्र प्रथमोद्देशके सामान्येन जीवास्तित्वं प्रतिपाद्यम् । शेषेषु तु षट्सु विशेषेण पृथिवीकायाद्यस्तित्वमिति । सर्वेषां च अवसाने बन्ध-विरतिप्रतिपादनमिति; एतच्च अन्ते उपात्तत्वात् प्रत्येकं उद्देशार्थेषु योजनीयम्; प्रथमोद्देशके जीवः, तद्वधे बन्धः, विरतिश्च इत्येवमिति ॥३५॥

तत्र शस्त्र-परिज्ञा इति द्विपदं नाम, [14]शस्त्रस्य निक्षेपमाह—

---

टि० १. ०पाते सु० कपुस्तकं विना ॥ २. **०त्रयोद्युक्तेन** क-खआदर्शौ विना ॥ ३. **०न भवितव्यम्** कप्रतिमृते ॥ ४. **निर्वाणम्** क ख ॥ ५. **०गुणेन सम्य०** ख । **०गुणयु०** ग घ ङ च ॥ ६. **०यनेन प्र०** च ॥ ७. **०गेव व०** घ ङ ॥ ८. **तत्प्रदर्शनं** ग ॥ ९. **०नं चाशेष०** च ॥ १०. **धुतम्मि** ग घ ङ ॥ ११. **०सेहिं दु०** कपुस्तकमृते ॥ १२. **वहेण ब०** क-ठपुस्तके विना ॥ १३. **०ण्णाय का०** ख ॥ १४. **शस्त्रनि०** क ॥

[नि०] **दव्वं सत्थग्गि[1]विस[2]न्नेहंबिलखारलोणमादीयं ।**
**भावो [3]उ दुप्पउत्तो वाया काओ अविरई य ॥३६॥**

**दव्वमि**त्यादि । शस्त्रस्य निक्षेपो नामादिः चतुर्धा । व्यतिरिक्तं द्रव्यशस्त्रं **खड्गाद्यग्नि-विष-स्नेहा-ऽम्ल-क्षार-लवणादिकम्** । भावशस्त्रं तु **दुष्प्रयुक्तो भावः** =अन्तकरणं तथा **वाक्-कायौ[4] अविरतिश्च** इति जीवोपघातकारित्वादिति भावः ॥३६॥

परिज्ञापि चतुर्धा इत्याह–

[नि०] **दव्वं जाणण पच्चक्खाणे [5]भविए सरीर उवगरणे ।**
**भावपरिण्णा जाणण पच्च[6]क्खाणे य भावेणं ॥३७॥**

**दव्वमि**त्यादि । तत्र द्रव्यपरिज्ञा द्विधा– ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च । ज्ञपरिज्ञा आगम-नोआगमभेदाद् द्विधा । आगमतो ज्ञाता अनुपयुक्तः । नोआगमतः त्रिधा । तत्र व्यतिरिक्ता [7]द्रव्यज्ञपरिज्ञा यो यद् द्रव्यं जानीते सचित्तादि सा परिच्छेद्यद्रव्यप्राधा[8]न्याद् द्रव्यज्ञपरिज्ञा इति । प्रत्याख्यानपरिज्ञाऽपि एवमेव । तत्र व्यतिरिक्ता द्रव्यप्रत्याख्यानपरिज्ञा [9]देहोपकरणपरिज्ञानम्, उपकरणं च रजोहरणादि, साधकतमत्वात् । भावपरिज्ञाऽपि द्विधैव– ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च। (तत्र भावज्ञपरिज्ञा आगम-नोआगमभेदाद् द्विधा ।) तत्र आगमतो ज्ञाता उपयुक्तश्च। नोआगम[10]तः तु इदमेव अध्ययनं ज्ञान-क्रियारूपम्, नोशब्दस्य मिश्रवाचित्वात् । प्रत्याख्यानभावपरिज्ञाऽपि तथैव। आगमतः पूर्ववत् । नोआगमतस्तु प्राणातिपातनिवृत्तिरूपा मनो-वाक्-कायकृत-कारिता-ऽनुमतिभेदात्मिका ज्ञेया इति ॥३७॥

गतो नामनिष्पन्नो निक्षेपः । साम्प्रतं आचारादिप्रदानस्य सुखप्रतिपत्तये दृष्टान्तोपन्यासेन विधिः आख्यायते यथा– कश्चिद् राजा अभिनवनगरनिवेशेच्छया भूखण्डानि विभज्य समतया प्रकृतिभ्यो दत्तवान् तथा कचवरापनयने शल्योद्धारे [11]भूमिस्थिरीकरणे पक्वेष्टकापीठ-प्रासादरचने रत्नाद्युपादाने चोपदेशं च दत्तवान्। ताश्च प्रकृतयः तदुपदेश[12]द्वारेण तथैव कृत्वा यथाभिप्रेतान् भोगान् बुभुजिरे । अयमत्र अर्थोपनयः– राजसदृशेन सूरिणा प्रकृतिसदृशस्य शिष्यगणस्य भूखण्डसदृशः संयमो मिथ्यात्वकचवराद्यपनीय सर्वोपधाशुद्धस्य आरोपणीयः, तं च सामायिकसंयमं स्थिरीकृत्य पक्वेष्टकापीठतुल्यानि व्रतानि आरोपणीयानि, ततः प्रासादकल्पोऽयमाचारो विधेयः । तत्रस्थश्च शेष[13]शास्त्रादिरत्नानि आदत्ते निर्वाणभाग् भवति ।

टि० १. **०विसंनेहंबिललोणखारमा०** ञ ॥ २. **०न्नेहिंबि०** ख झ ॥ ३. **य** ठ ॥ ४. **०याविर०** ख ग ॥ ५. **दविए** ख ज ठ ॥ ६. **०क्खाणं च भा०** कप्रतेर्विना ॥ ७. **०व्यज्ञानपरि०** ग घ ङ च ॥ ८. **०न्याद् द्रव्यपरि०** कादर्शमृते ॥ ९. **देह उप०** ख ग च ॥ १०. **०तश्चेदमेवा०** ख ॥ ११. **भूस्थिरी०** कपुस्तकं विना ॥ १२. **०देशानुसारेण** ग ॥ १३. **०शास्त्ररत्ना०** ख ॥

साम्प्रतं सूत्रानुगमे अस्खलितादिगुणलक्षणोपेतं सूत्रमुच्चारणीयम्, लक्षणं त्विदम्–

"**अप्पग्गंथमहत्थं बत्तीसादोसविरहियं जं च ।**
**लक्खणजुत्तं सुत्तं अट्ठहि य गुणेहिं उववेयं ॥**"

[आव०नि०८८०, बृ०क०भा०-२७७]

इत्यादि । तच्चेदं सूत्रम्–

**[सू० ] सुयं मे आउसं ! तेणं भगवया एवमक्खायं– इहमेगेसिं नो सन्ना भवति ।**

**सुयं मे आउसं ! तेणं भगवया एवमक्खायं– इहमेगेसिं नो सन्ना भवति ।** अस्य संहितादिक्रमेण व्याख्या- संहिता उच्चारितैव । पदच्छेदः तु अयम्- श्रुतं मया आयुष्मन्, तेन भगवता एवं आख्यातम्- इह एकेषां नो सञ्ज्ञा भवति। एकं तिङन्तम्, शेषाणि सुबन्तानि । गतः[1] सपदच्छेदः सूत्रानुगमः ।

साम्प्रतं सूत्रपदार्थः समुन्नीयते– भगवान् **सुधर्मस्वामी जम्बू**नाम्न इदमाचष्टे यथा- **श्रुतम्**=आकर्णितं अवगतं[2] अवधारितमिति यावद्, अनेन स्वमनीषिकाव्युदासः । **मया** इति साक्षात्, न पुनः पारम्पर्येण । **आयुष्मन्** इति जात्यादिगुणसम्भवे अपि दीर्घायुष्कत्व-[3] गुणोपादानं दीर्घायुः अविच्छेदेन शिष्योपदेशप्रदायको यथा स्यात् । इह आचारस्य व्या- चिख्यासितत्वात् तदर्थस्य च तीर्थकृत्प्रणीतत्वादिति सामर्थ्यप्रापितं **तेन** इति तीर्थकरमाह । [4]यदि वा **आमृशता** भगवत्पादारविन्दमिति, अनेन विनय आवेदितो भवति । **आवसता** वा तदन्तिक इति, अनेन तु गुरुकुलवासः कर्तव्य इति आवेदितं भवति[5] । एतच्च अर्थद्वयं **आमुसंतेण आवसंतेण** इति एतत्पाठान्तरं आश्रित्य अवगन्तव्यमिति । **भगवता** इति भगः ऐश्वर्यादिषडर्थात्मकः, सः अस्य अस्ति इति भगवान्, तेन । **एवम्** इति[6] वक्ष्यमाणविधिना **आख्यात**मिति अनेन कृतकत्वव्युदासेन[7] अर्थरूपतया आगमस्य नित्यत्वमाह। **इह** इति क्षेत्रे प्रवचने आचारे शस्त्रपरिज्ञायां वा आख्यातमिति सम्बन्धः । यदि वा **इह** इति संसारे, **एकेषां** ज्ञानावरणीयावृतानां प्राणिनां **नो सञ्ज्ञा** भवति, सञ्ज्ञानं सञ्ज्ञा स्मृति अवबोध इति अनर्थान्तरम्, सा नो[8] जायत इत्यर्थः । उक्तः पदार्थः । पदविग्रहस्य तु सामासिकपदाभावाद् अप्रकटनम् ।

इदानीं चालना– ननु च अकारादिकप्रतिषेधकलघुशब्दसम्भवे सति किमर्थं

---

टि० १. **गतश्च पदच्छेदः । साम्प्र०** ख ॥ २. **०वधारि०** ख ॥ ३. **०युष्मत्त्वगु०** ग घ ङ ॥ ४. **अथवा** ख ॥ ५. **०ति । इत्येतच्चा०** ख ॥ ६. **०ति अनेन वक्ष्य०** ख ॥ ७. **०नागमस्यार्थरूपतया नित्यत्वमित्यर्थः । इह** ख ॥ ८. **नोपजायत** च ॥

नोशब्देन प्रतिषेधः ? इति । अत्र प्रत्यवस्था- सत्यमेवम्, किन्तु प्रेक्षापूर्वकारितया नोशब्दोपादानम्, सा चेयम्- अन्येन[1] प्रतिषेधे[2] सर्वनिषेधः स्यात्, यथा-'न घटः=अघटः' इति चोक्ते सर्वात्मना घटनिषेधः । स च नेष्यते, यतः **प्रज्ञापना**यां दश सञ्ज्ञाः सर्वप्राणिनां अभिहिताः तासां सर्वासां प्रतिषेधः प्राप्नोतीति कृत्वा । ताश्चेमाः—

"**कइ णं भंते ! सन्नाओ पन्नत्ताओ ? गोयमा ! दस सन्नाओ पन्नत्ताओ, तं जहा- आहारसन्ना भयसन्ना मेहुणसन्ना परिग्गहसन्ना कोहसन्ना माणसन्ना मायासन्ना लोहसन्ना ओहसन्ना लोगसन्न** [**स्था०सू०१०/७५२, प्रज्ञा०सू० ८/७२५**] त्ति ।

आसां च प्रतिषेधे स्पष्टो दोषः, अतो **नो**शब्देन प्रतिषेधनमकारि । यतोऽयं सर्वनिषेधवाची देशनिषेधवाची च, तथा हि- नोघट इत्युक्ते[3] घटाभावमात्रं प्रतीयते, अर्थ-प्रकरणादिप्रसक्तनिषेधेन चाप्रसक्तस्य विधानम्, स पुनर्विधीयमानः प्रतिषेध्यावयवो ग्रीवादिः प्रतिषेध्यादन्यो वा पटादिः प्रतीयते[4], तथा चोक्तम्—

"**प्रतिषेधयति समस्तं ≠प्रसक्तमर्थं च जगति नोशब्दः ।**
**स पुनस्तदवयवो वा तस्मादर्थान्तरं वा स्यात् ॥**" [　　　] इति ।

एवमिहापि न सर्वसञ्ज्ञानिषेधः, अपि तु विशिष्टसञ्ज्ञानिषेधः, यया आत्मादिपदार्थस्वरूपं गत्या-ऽऽगत्यादिकं ज्ञायते तस्या निषेध इति ।

साम्प्रतं **निर्युक्तिकृत्** सूत्रावयवनिक्षेपार्थमाह—

**[ नि० ]　　दव्वे सच्चित्ताई भावे अणुभवण जाणणा सन्ना ।**
**मइ होइ जाणणा पुण अणुभवणा कम्मसंजुत्ता ॥३८॥**

**दव्वे** इत्यादि । सञ्ज्ञा नामादिभेदात् चतुर्धा । नाम-स्थापने क्षुण्णे । ज्ञशरीर-भव्यशरीर[5]व्यतिरिक्ता सचित्ता-ऽचित्त-मिश्रभेदात् त्रिधा । सचित्तेन हस्तादिद्रव्येण पान-भोजनादिसञ्ज्ञा, अचित्तेन ध्वजादिना, मिश्रेण प्रदीपादिना, सञ्ज्ञानं=सञ्ज्ञा अवगम इति कृत्वा ।

भावसञ्ज्ञा पुनः द्विधा- अनुभवनसञ्ज्ञा ज्ञानसञ्ज्ञा च। तत्र अल्पव्याख्येयत्वात्[6] तावद् ज्ञानसञ्ज्ञां दर्शयति- **मइ होइ जाणणा पुण** त्ति मननं=मतिः अवबोधः । सा च मतिज्ञाना[7]दिपञ्चधा । तत्र केवलसञ्ज्ञा क्षायिकी, शेषास्तु क्षायोपशमिक्यः । अनुभवनसञ्ज्ञा

---

**टि०** १. **अन्यप्रति०** ख ॥ २. **०धेन स०** ग ङ च ॥ ३. **इति घटा०** ख ॥ ४. **०ते इति तथा** ग ॥ ५. **०र-तद्व्यति०** क ॥ ६. **त्वाद् ज्ञान०** ख ॥ ७. **०नादिः प०** ख ग ॥

**वि०टि०** ≠ "**प्रसक्तमर्थं च** इति शब्दात् प्रसक्तनिषेधेनाऽप्रसक्तविधानमाह" जै०वि०प० ॥

तु स्वकृतकर्मोदयादिसमुत्था जन्तोः जायते ॥३८॥ सा च षोडशभेदा इति दर्शयति—

[नि०] [१]आहार भय परिग्गह मेहुण सुह दुक्ख मोह वितिगिच्छा ।
[२]कोह माण माय लोभे सोगे लोगे य [३]धम्मोघे ॥३९॥

**आहारे**त्यादि । आहाराभिलाषः=**आहार**सञ्ज्ञा, सा च तैजसशरीरनामकर्मोदयाद् असातोदयात् च भवति । **भय**सञ्ज्ञा त्रासरूपा । **परिग्रह**सञ्ज्ञा मूर्च्छारूपा । **मैथुन**सञ्ज्ञा स्त्र्यादिवेदोदयरूपा, एताः च मोहनीयोदयात् । **सुख-दुःख**सञ्ज्ञे साता-ऽसातानुभवरूपे वेदनीयोदयजे। **मोह**सञ्ज्ञा मिथ्यादर्शनरूपा मोहोदयात् । **विचिकित्सा**सञ्ज्ञा चित्तविप्लुतिरूपा मोहोदयाद् ज्ञानावरणीयोदयात् च । **क्रोध**सञ्ज्ञा अप्रीतिरूपा । **मान**सञ्ज्ञा गर्वरूपा । **माया**सञ्ज्ञा [४]वक्रतारूपा । **लोभ**सञ्ज्ञा गृद्धिरूपा। **शोक**सञ्ज्ञा विप्रलाप-वैमनस्यरूपा । एता मोहोदयजाः । **लोक**सञ्ज्ञा स्वच्छन्दघटितविकल्परूपा लौकिकाचरिता, यथा-न सन्ति अनपत्यस्य लोकाः, श्वानो यक्षाः, विप्रा देवाः, काकाः पितामहाः, बर्हिणां पक्षवातेन गर्भ [५]इत्यादिका ज्ञानाव[६]रणक्षयोपशमाद् मोहोदयात् च भवति । **धर्म**सञ्ज्ञा क्षमाद्यासेवनरूपा मोहनीयक्षयोपशमाद् जायते । एताश्च अविशेषोपादानात् पञ्चेन्द्रियाणां [७]सम्यग्दृशां मिथ्यादृशां च द्रष्टव्याः । **ओघ**स[८]ञ्ज्ञा तु अव्यक्तोपयोगरूपा वल्लीविताना-ऽऽरोहणा[९]दिलिङ्गा ज्ञानावरणीयाल्पक्षयोपशमसमुत्था द्रष्टव्या इति । इह पुनः ज्ञानसञ्ज्ञया अधिकारः, यतः सूत्रे सैव निषिद्धा, **इह एकेषां नो सञ्ज्ञा**=ज्ञानं अवबोधो **भवती**ति ॥३९॥ प्रतिषिद्धज्ञानविशेषावगमार्थमाह सूत्रम्—

**तं जहा— पुरत्थिमातो वा दिसातो आगतो अहमंसि, दाहिणाओ वा दिसाओ आगतो अहमंसि, पच्चत्थिमातो वा दिसातो आगतो अहमंसि, उत्तरातो वा दिसातो आगतो अहमंसि, उड्ढातो वा दिसातो आगतो अहमंसि, अधेदिसातो वा आगतो अहमंसि, अन्नतरीतो दिसातो वा अणुदिसातो वा आगतो अहमंसि, एवमेगेसिं णो णातं भवति ।**

**तं जहे**त्यादि **णो णायं भवती**ति यावत् । **तद्यथा** इति प्रतिज्ञातार्थोदाहरणम् । **पुरत्थिमाउ** त्ति प्राकृतशैल्या **मागधदेशीभाषा**नुवृत्त्या पूर्वस्या दिशो अभि[१०]धायकात् पुरत्थिमाशब्दात् पञ्चम्यन्तात् तसा निर्देशः । **वा**शब्द उत्तरपक्षापेक्षया विकल्पार्थः, यथा

---

टि० १. **आधार** छ ॥ २. **कोह माण माया लोभे** क झ ॥ ३. **धम्मोहे** कप्रतिमृते ॥ ४. **वक्ररूपा** ख ॥ ५. **इत्येवमादिका** ग ङ ॥ ६. **०रणीयक्षयो०** ख । **०रणीयाल्पक्षयो०** घ ङ ॥ ७. **सम्यग्-मिथ्यादृशां द्र०** ग च विना ॥ ८. **०ज्ञा अव्य०** ख ॥ ९. **०दिरूपा** घ ङ ॥ १०. **०धानात्** क ॥

लोके—'भोक्तव्यं वा शयितव्यं वे'ति एवं पूर्वस्या वा दक्षिणस्या वा इति । दिशतीति दिक्, अतिसृजति व्यपदिशति द्रव्यं द्रव्यभागं वा इति भावः । तां **निर्युक्तिकृद्** निक्षेप्तुमाह—

[नि०] **णामं ठवणा दविए खेत्ते तावे य पन्नवग भावे ।**
**एस दिसाणिक्खेवो सत्तविहो होइ नायव्वो ॥४०॥**

**नामम**इत्यादि । नाम-स्थापना-द्रव्य-क्षेत्र-ताप-प्रज्ञापक-भावरूपः **सप्तधा**[1] **दिग्निक्षेपो ज्ञातव्यः** । तत्र सचित्तादेः द्रव्यस्य दिग् इति अभिधानं नामदिक् । **चित्रलिखितजम्बूद्वीपा**देः दिग्विभागस्थापनं स्थापनादिक् ॥४०॥

[2]द्रव्यदिग्निक्षेपार्थमाह—

[नि०] **तेरसपएसियं खलु तावइएसुं भवे पएसेसुं ।**
**जं दव्वं [3]ओगाढं जहन्नगं तं दसदि[4]सागं ॥४१॥**

**तेरसे**त्यादि । द्रव्यदिग् द्वेधा- आगमतो नोआगमतश्च । आगमतो ज्ञाता अनुपयुक्तः, नोआगमतो ज्ञशरीर-भव्यशरीरव्यतिरिक्ता तु इयम्— **त्रयो[5]दशप्रादेशिकं** द्रव्यं आश्रित्य या प्रवृत्ता । **खलुः** अवधारणे, त्रयोद[6]शप्रादेशिकमेव दिक्, [7]न तु द[8]शप्रादेशिकं यत् कैश्चिद् उक्तमिति । प्रदेशाः= परमाणवः, तैः निष्पादितं कार्य**द्रव्यं तावत्सु** एव क्षेत्र**प्रदेशेषु अवगाढं जघन्यं** द्रव्यं आश्रित्य दशदिग्विभागपरिकल्पनातो द्रव्यदिग् इयमिति । तत्स्थापना—  त्रिबाहुकं नवप्रदेशिकं अभिलिख्य चतसृषु दिक्षु एकैकगृहवृद्धिः कार्या ॥४१॥

क्षेत्रदिशमाह—

[नि०] **अट्ठपएसो रुयगो तिरियं लोयस्स मज्झयारम्मि ।**
**एस पभवो दिसाणं [9]एसेव भवे अणुदिसाणं ॥४२॥**

**अट्ठे**त्यादि । तिर्यग्लोकमध्ये रत्नप्रभापृथिव्या उपरि बहु[10]मध्यदेशे[11] मेर्वन्तः द्वौ सर्वक्षुल्लकप्रतरौ तयोः उपरितनस्य चत्वारः प्रदेशा गोस्तनाकारसंस्थानाः, अधस्तनस्यापि चत्वारः तथाभूता एव इति एषः अष्टाकाशप्रदेशात्मकः चतुरस्त्रो **रुचको दिसामनुदिशां** च **प्रभवः**=उत्पत्तिस्थानम् ॥४२॥ अभिधानानि आह—

[नि०] **इं[12]दग्गेयी जम्मा य नेरई वारुणी य वायव्वा ।**

---

टि० १. ०धा निक्षे० क ॥ २. द्रव्यनिक्षे० क ॥ ३. तूगाढं छ ॥ ४. ०सामं ञ ॥ ५.-६ ०शप्रदे० ग घ ङ च ॥ ७. न पुनर्दश० कप्रतेर्विना ॥ ८. ०शप्रदे० ख घ ङ॥ ९. एसो य भवे झ ॥ १०. ०मध्ये दे० च ॥ ११. ०शे सर्वतो द्वौ क्षुल्ल० ख ॥ १२. ०दग्गीई ज झ । ०दग्गीयी ञ ॥

**सोमा ईसाणा वि य विमला य तमा य बोद्धव्वा ॥४३॥**

**इंदग्गेई** इत्यादि । आसामाद्या **ऐन्द्री** विजयद्वारानुसारेण शेषाः प्रदक्षिणतः सप्त अवसेयाः । ऊर्द्ध्वं **विमला, तमा** चाध इति । स्थापना[१] चेयम्–



॥४३॥

आसामेव स्वरूपनिरूपणाय आह–

[नि०] **दुपएसा[२]इ दुरुत्तर एगपएसा अणुत्तरा चेव ।**
**चउरो चउरो य दिसा[३] चउराइ अणुत्तरा दोण्णि[४] ॥४४॥**

**दुपए** इत्यादि । चतस्रो मह०ादिशो **द्विप्रदेशाद्या** द्विद्विप्रदेशोत्तरवृद्धाः, विदिशःचतस्र एकप्रदेशरचनात्मिकाः **अनुत्तरा**=वृद्धिरहिताः, उर्द्ध्वा-ऽधोदिग्द्वयं तु अनुत्तरमेव चतुष्प्रदेशादि-रचनात्मकम् ॥४४॥ किञ्च–

[नि०] **अंतो[५] सादीयाओ बाहिरपासे अपज्जवसियाओ[६] ।**
**सव्वाणंतपदेसा सव्वा य[७] भवंति कडजुम्मा[८] ॥४५॥**

**अंतो** इत्यादि । सर्वा अपि **अन्तः** मध्ये **सादिकाः**, रुचकाद्या इति कृत्वा, बहिः च अलोकाकाशाश्रयणाद् **अपर्यवसिताः** । सर्वाः च दशापि **अनन्तप्रदेशा**त्मिका भवन्ति[९] । **कडजुम्म** त्ति सर्वासां दिशां प्रत्येकं ये प्रदेशाः ते चतुष्ककेन अपह्रियमाणाः चतुष्कावशेषा भवन्ति[१०], तत्प्रदेशात्मिकाश्च दिश आगमसञ्ज्ञया **कडजुम्म** त्ति शब्देन अभिधीयन्ते, तथा **चागमः–**

''**कइ णं भंते ! जुम्मा पण्णत्ता ? गोयमा ! चत्तारि जुम्मा पण्णत्ता, तं जहा- कडजुम्मे** ≠**तेओए दावरजुम्मे[११] कलिओए । से केणऽट्ठेणं भंते ! एवं वुच्चति ? गोयमा ! जे णं रासी चउक्कगावहारेणं अवहीरमाणे अवहीरमाणे चउपज्जवसिए सिया से णं कडजुम्मे, एवं तिपज्जवसिते तेओए, दुपज्जवसिते दावरजुम्मे[१२], एगपज्जवसिते कलिओए[१३]**'' [ **व्या०प्रज्ञ०२५/४/७३५** ] त्ति ॥४५॥

पुनरपि आसां संस्थानमाह–

---

टि० १. ०नायम् ङ ॥ २. ०साय दु० क ख ॥ ३. ०सा पुव्वाय अणु० ख । ०सा चउरो य अणु० झ ॥ ४. दिण्णि क । दुण्णि ठ ॥ ५. अंते झ ॥ ६. य पज्ज० क झ ॥ ७. उ ञ ॥ ८. ०डजम्मा झ ॥ ९. ०न्ति । सव्वा य भवंति कड० खपुस्तकमृते ॥ १०. ०वन्तीति कृत्वा तत्प्र० ग ॥ ११. बायरजुम्मे ग घ ङ च ॥ १२. बादरजुम्मे कप्रत्या विना ॥ १३. कलितोते त्ति ङ ॥

वि०टि० ≠ ''तेओए इति त्रेतायुग्म द्वापरयुग्म कलियुग्म'' जै०वि०प० ॥

[नि०]  **सगडु[१]ड्ढिसंठियाओ महादिसाओ[२] य होंति चत्तारि ।**
**मुत्तावली[३] य चउरो दो चेव[४] य होंति रुयगनिभा ॥४६॥**

**सगडुद्धी**त्यादि । **महादिशः चतस्त्रो**ऽपि **शकटोद्धिसंस्थानाः**, विदिशः च[५] मुक्तावलीनिभाः, उर्द्धा-ऽधोदिग्द्वयं रुचकाकारमिति ॥४६॥

तापदिशमाह-

[नि०]  **जस्स जओ आइच्चो उएइ[६] सा तस्स होइ पुव्वदिसा[७] ।**
**जत्तो अत्थमेई[८] अवरदिसा सा उ नायव्वा ॥४७॥**

[नि०]  **दाहिणपासम्मि य दाहिणा दिसा उत्तरा य[९] वामेणं ।**
**एया चत्तारि दिसा तावक्खेत्ते उ अक्खाया ॥४८॥**

**जस्से**त्यादि, **दाहिणे**त्यादि । तापयतीति **तापः**=आदित्यः, तदाश्रिता दिक्=**तापदिक्**, शेषं सुगमम्, केवलं **दक्षिणपार्श्वा**दिव्यपदेशः पूर्वाभिमुखस्य[१०] इति द्रष्टव्यः ॥४७-४८॥ तापदिगङ्गीकरणेन अन्योऽपि व्यपदेशो भवतीति प्रसङ्गत आह-

[नि०]  **जे मंदरस्स पुव्वेण मणुस्सा[११] दाहिणेण[१२] अवरेणं ।**
**जे यावि उत्तरेणं सव्वेसिं उत्तरो[१३] मेरू ॥४९॥**

[नि०]  **सव्वेसिं[१४] उत्तरेणं मेरू लवणो य होइ दाहिणओ ।**
**पुव्वेणं[१५] तु उदेती[१६] अवरेणं[१७] अत्थमइ[१८] सूरो ॥५०॥**

**जे मंदरस्से**त्यादि, **सव्वेसिमि**त्यादि । **ये मन्दरस्य**=मेरोः **पूर्वेण मनुष्याः** क्षेत्रदिगङ्गीकरणेन, रुचकापेक्षं पूर्वादित्वं[१९] वेदितव्यम्, तेषां **उत्तरो मेरुः दक्षिणेन लवण** इति तापदिगङ्गीकरणेन । शेषं स्पष्टम् ॥४९-५०॥

प्रज्ञापकदिशमाह-

[नि०]  **जत्थ य जो पन्नवओ कस्सइ[२०] साहइ दिसाण[२१] उ निमित्तं ।**
**जत्तोमुहो य ठायइ[२२] सा पुव्वा पच्छओ अवरा ॥५१॥**

---

टि० १. ०डुद्धिसं० ख झ ञ ठ ॥ २. ०ओ हवंति च० ञ ठ ॥ ३. ०वलिया च० ख ज झ । ०वलीउ च० ञ ॥ ४. ०व हवंति रु० ञ ॥ ५. चतस्त्रोऽपि मुक्ता० ख ॥ ६. उवेति ञ ॥ ७. पुव्वा उ ञ ॥ ८. ०त्थमइ उ अव० ठ ॥ ९. उ ठ ॥ १०. ०मुखेषु द्रष्ट० ख ॥ ११. मणूसा कप्रतिमृते ॥ १२. दक्खिणेण ञ ॥ १३. उत्तरे ख ज झ ठ विना ॥ १४. ०सिमुत्त० ञ ॥ १५. ०णं उद्वेती अ० ख ज ठ ॥ १६. उवेई ञ ॥ १७. ०रेण य अ० ज झ ञ ॥ १८. ०त्थमे सू० झ ञ ॥ १९. पूर्वादिदिक्त्वं ङ ॥ २०. वि छ ज ठ । य ञ ॥ २१. ०सासु य नि० कप्रत्या विना ॥ २२. ठाती ख छ । ठाई ज झ ञ ठ ॥

**जत्थ** इत्यादि । **प्रज्ञापको यत्र** क्वचित् स्थितो **दिशां** बलात् **कस्यचिद् निमित्तं कथयति** स **यदभिमुखः**[१] **तिष्ठति सा पूर्वा**, पृष्ठतः च **अपरा** इति । निमित्तकथनं चोपलक्षणम्, अन्योऽपि व्याख्याता ग्राह्य इति ॥५१॥

शेषदिक्साधनार्थमाह—

[नि०] **दाहिणपासम्मि य[२] दाहिणा दिसा उत्तरा य[३] वामेणं ।**
**एतासिमंतरेणं[४] अन्ना चत्तारि विदिसाओ ॥५२॥**

[नि०] **एतासि[५] चेव अट्ठण्हमंतरा अट्ठ होंति अन्नाओ ।**
**सोलस सरीरउस्सयबाहल्ला सव्वतिरियदिसा ॥५३॥**

[नि०] **हेट्ठा पादतलाणं अहोदिसा सीसउवरिमा उड्ढा[६] ।**
**एया अट्ठारस वी पन्नवगदिसा मुणेयव्वा ॥५४॥**

[नि०] **एवं विगप्पियाणं[७] दसण्ह अट्ठण्ह चेव य[८] दिसाणं ।**
**नामाइं[९] वोच्छामि[१०] अहक्कमं आणुपुव्वीए ॥५५॥**

[नि०] **पुव्वा य पुव्वदाहिण[११] दक्खिण[१२] तह दक्खिणावरा[१३] चेव ।**
**अवरा य अवरउत्तर उत्तर पुव्वुत्तरा चेव ॥५६॥**

[नि०] **सामुत्थाणी कविला खेलेज्जा खलु तहेव अहिधम्मा ।**
**परिता[१४] धम्मा य तहा सावित्ती पुन्नवित्ती[१५] य ॥५७॥**

[नि०] **हेट्ठा नेरइयाणं अहोदिसा उवरिमा[१६] य देवाणं ।**
**एयाइं नामाइं पन्नवगस्सा दिसाणं तु ॥५८॥**

**दाहिणे**त्यादि, **एयासिमि**त्यादि, **हेट्ठा** इत्यादि, **एवमि**त्यादि, **पुव्वा** इत्यादि । **सामुत्थाणी**त्यादि, **हेट्ठे**त्यादि । एताः सप्त गाथाः कण्ठ्याः, नवरं द्वितीयगाथायां सर्वतिर्यग्दिशां बाहल्यं पिण्डः शरीरोच्छ्रयप्रमाणमिति ॥५२-५८॥

साम्प्रतं आसां संस्थानमाह—

---

टि० १. ०**मुखः कथयति सा** ख ॥ २-३. उ ठ ॥ ४. **एया** ख ॥ ५. **एएसिं** ख ॥ ६. **उड्ढा** कपुस्तकादृते ॥ ७. **पकप्पियाणं** ख ठ ॥ ८. **वि** ख ॥ ९. **नामाई** ञ ॥ १०. **वुच्छामि जह०** ठ ॥ ११. **पुव्वदक्खिण** ख ज झ ठ ॥ १२. ०**ण तह दक्खिण दक्खिणा०** ठ ॥ १३. ०**णापरा** ञ ॥ १४. ०**रित्तध०** छ ॥ १५. **पण्णवित्ती** ख झ ॥ १६. ०**माण दे०** झ । ०**गा उ दे०** ठ ॥

[नि०] **सोलस[१] वी तिरियदिसा सगडुद्धी[२]संठिया मुणेयव्वा ।
दो मल्लगमूलाओ उड्ढं च अहे[३] वि य दिसाओ ॥५९॥**

**सोलस** इत्यादि । **षोडशापि तिर्यग्दिशः शकटोद्धिसंस्थाना बोद्धव्याः**, प्रज्ञापकप्रदेशे सङ्कटा बहिर्विशालाः, नारक-देवाख्ये द्वे एव उर्द्धा-ऽधोगामिन्यौ शरावाकारे[४] स्तः, यतः शिरोमूले पादमूले च स्वल्पत्वाद् मल्लक-बुध्नाकारे, गच्छन्त्यौ च विशाले भवत इति । आसां सर्वासां तात्पर्यं यन्त्रकादवसेयम्, ≠तच्चेदम्–




॥५९॥

भावदिग्निरूप[५]णाय आह–

[नि०] **मणुया [६]तिरिया काया[७] तहग्गबीया चउक्कगा चउरो ।
देवा नेरइ[८]या या अट्ठारस हों[९]ति भावदिसा ॥६०॥**

**मणुया** इत्यादि । **मनुष्याः** चतुर्भेदाः तद्यथा– सम्मूर्छनजाः कर्मभूमिजा अकर्मभूमिजा अन्तरद्वी[१०]पजाश्चेति । तथा **तिर्यञ्चः** द्वीन्द्रियाः त्रीन्द्रियाः चतुरिन्द्रियाः पञ्चेन्द्रियाश्चेति चतुर्धा । **कायाः** पृथिव्यप्-तेजो-वायवः चत्वारः । तथाऽग्र-मूल-स्कन्ध-पर्वबीजाश्चत्वार एव । एते षोडश देव-नारकप्रक्षेपाद् **अष्टादश** । एभिः भावैः भवनाद् जीवो व्यपदिश्यत इति भावदिग् अष्टाद[११]शविधा इति ॥६०॥

अत्र च सामान्यदिग्ग्रहणेऽपि यस्यां दिशि जीवानां अविगानेन गत्या-ऽऽगती स्पष्टे सर्वत्र सम्भवतः तयैव इहाधिकार इति तामेव **निर्युक्तिकृत्** साक्षाद् दर्शयति, भावदिक् च अविनाभाविनी सामर्थ्याद् अधिकृता एव, यतः तदर्थमन्या दिशः चिन्त्यन्त [१२]इति अत आह–

---

टि० १. ०स वि य ति० झ ञ ॥ २. ०डुद्धीसं० ख ज झ ठ ॥ ३. ०हे य वि दि० ख । ०हे च्चिय दि० झ ॥ ४. ०रे भवतः, यतः ख च ॥ ५. ०णार्थमाह ख ग ॥ ६. तिदिया छ । इंदिय ज ॥ ७. ०या अग्गा बी० ख छ ठ । ०या अग्ग बी० ज । ०या तउ अग्गबी० झ ॥ ८. ०इआ वा ख ॥ ९. होइ छ । हुंति झ ठ ॥ १०. ०पकाश्चेति ख ॥ ११. ०शभेदेति ख ग च ॥ १२. इत्याह ख ॥

वि०टि० ≠ अत्र 'तच्चेदमधस्तनपत्रे' इति खंभातस्थप्रतौ पाठः ॥

[नि०] **पन्नवगदिसट्ठारस भावदिसाओ वि[१] तत्तिया चेव ।**
**एक्केक्कं विंधिज्जा भवंति अट्ठारसऽट्ठारा ॥६१॥**

[नि०] **पन्नवगदिसाए पुण अहिगारो एत्थ होइ कायव्वो ।**
**जीवाण पोग्गलाण य एयासु गयागई अत्थि ॥६२॥**

**पन्नवगे**त्यादि, **पन्नवगदिसाए** इत्यादि । प्रज्ञापका[२]पेक्षया अष्टादशभेदा दिशः, अत्र च **भावदिशोऽपि तावत्**प्रमाणा **एव** प्रत्येकं सम्भवन्ति अत **एकैकां** प्रज्ञापकदिशं भावदिगष्टादशकेन **विंध्येत्**[३]=ताडयेत्[४], ततो**ऽष्टादश अष्टादशकाः**, ते च सङ्ख्यया त्रीणि शतानि चतुर्विंशत्यधिकानि [५]भवन्तीति । एतच्चोपलक्षणम्, तापदिगादौ अपि यथासम्भवं आयोजनीयमिति । क्षेत्रदिशः[६] तु चतसृष्वेव महादिक्षु सम्भवः, न विदिगादिषु, तासां [७]एकप्रदेशिकत्वात् चतुष्प्रदेशिकत्वात् चेति भावार्थः । अयं च दिक्संयोगकलापः **अन्नयरीओ दिसाओ आगओ अहमंसि** इत्यनेन परिगृहीतः ॥६१-६२॥

सूत्रावयवार्थः च अयम्– इह **दिग्ग्रहणात्** प्रज्ञापकदिशः, चतस्रः पूर्वादिका, ऊर्द्धा[९]-ऽधोदिशौ च परिगृह्यन्ते, भावदिशः तु अष्टादशापि । **अनुदिग्ग्रहणात्** प्रज्ञापकविदिशो द्वादशेति । तत्र असञ्ज्ञिनां नैषो अवबोधो अस्ति, सञ्ज्ञिनामपि केषाञ्चिद् भवति[१०] केषाञ्चिद् न इति यथा–'अहममुष्या दिशः समागत इह' इति ।

'**एवमेगेसिं[११] नो नायं भवति**' त्ति । [१२]**एवम्**=अनेन प्रकारेण प्रतिविशिष्टदिग्-विदिगागमनं **न एकेषां** विदितं **भवति** इति एतदुपसंहारवाक्यम् ।

एतदेव **निर्युक्तिकृ**दाह–

[नि०] **केसिंचि नाणसण्णा[१३] अत्थी[१४] केसिंचि[१५] नत्थि जीवाणं ।**
**कोऽहं परम्मि लोए आसी कयरा[१६] दिसाओ वा[१७] ॥६३॥**

**केसिमि**त्यादि । **केषाञ्चिद् जीवानां** ज्ञानावरणीयक्षयोपशमवतां **ज्ञानसञ्ज्ञा अस्ति, केषाञ्चित्**[१८] तु तदावृतिमतां **न** भवतीति । यादृशी[१९] सञ्ज्ञा न भवति तां दर्शयति– **कोऽहं परस्मिन् लोके** जन्मनि मनुष्यादिः **आसम्** ? अनेन भावदिग् गृहीता । **कतरस्या**

---

टि० १. य ञ ॥ २. ०पनापे० घ ॥ ३. विन्ध्यात् ख ग ॥ ४. ०येद्, अतो० ख ॥ ५. सन्तीति घ ङ च ॥ ६. दिशि तु च० खपुस्तकादृते ॥ ७. ०कप्रादे० च ॥ ८. ०ति गाथाद्वयार्थः ग । ०ति भावावाद्वयार्थः ङ ॥ ९. ऊर्धाधो[?ऊर्ध]दिगधोदिक् च परि० ङ ॥ १०. ०ति यथा ख च ॥ ११. ०सिं नो सन्नायं ख ॥ १२. एवमित्यनेन ख ग ॥ १३. णानसत्था क । नाणचिन्ता झ ॥ १४. अत्थि उ के० ञ ॥ १५. केसिं च झ ॥ १६. कइरा ख ज ठ ॥ १७. य ञ ॥ १८. ०त् तदा० ख ॥ १९. यादृग्भूता संज्ञा ख ग ॥

**वा दिशः** समायात इति अनेन तु प्रज्ञापकदिग् उपात्ता इति । यथा कश्चिन् मदिरामदा-घूर्णित[1]लोललोचनो अव्यक्तमनोविज्ञानो रथ्यामार्गनिपतितः छर्द्याकृष्टश्वगणा[2]वलिह्यमानवदनो गृहमानीतो मदात्यये न जानाति कुतो अहमागतः ? इति, तथा प्रकृतो मनुष्यादिरपीति[3] गाथार्थः ॥६३॥ न केवलमेषैव सञ्ज्ञा नास्ति, अपरापि नास्तीति **सूत्रकृदाह—**

## अत्थि मे आया ओववाइए, नत्थि मे आया उववाइए, कोऽहं आसी ? के वा इओ चुए इह पेच्चा भविस्सामि ? ॥१॥

**अत्थि मे आया ओववाइए, नत्थि मे आया उववाइए, कोऽहं आसी ? के वा[4] इओ चुए इह पेच्चा भविस्सामि** त्ति । **अस्ति**=विद्यते, **मम** इत्यनेन षष्ठ्यन्तेन शरीरं निर्दिशति, मम अस्य शरीरस्य अधिष्ठाता, अतति=गच्छति सततगतिप्रवृत्त **आत्मा**=जीवो अस्तीति । किम्भूतः ? **'औपपातिकः'** उपपातः=प्रादुर्भावः जन्मान्तरसङ्क्रान्तिः, उपपाते[5] भवः=**औपपातिक** इति, अनेन संसारिणः स्वरूपं दर्शयति । स एवम्भूत आत्मा मम अस्ति **नास्तीति** चैवम्भूता सञ्ज्ञा केषाञ्चिद् अज्ञानावष्टब्धचेतसां न जायत इति । तथा **कोऽहं** नारक-तिर्यङ्-मनुष्यादिः[6] **आसं** पूर्वजन्मनि ? **को वा**[7] **इतः**=मनुष्यादेः जन्मनः[8] **च्युतः**=विनष्टः **इह**[9] संसारे **प्रेत्य**=जन्मान्तरे **भविष्यामि**=उत्पत्स्ये[10] ? इत्येषा च सञ्ज्ञा न भवतीति। इह च यद्यपि सर्वत्र भावदिशा अधिकारः प्रज्ञापक[11]दिशा च तथापि पूर्वसूत्रे साक्षात् प्रज्ञापकदिग् उपात्ता, अत्र तु भावदिग् इति अवगन्तव्यम् ।

ननु चात्र संसारिणां दिग्-विदिगागमनादिका विशिष्टा सञ्ज्ञा निषिध्यते न सामान्यसञ्ज्ञेति, एतच्च सञ्ज्ञिनि धर्मिणि आत्मनि सिद्धे सति भवति, **"सति धर्मिणि धर्माश्चिन्त्यन्ते"** [ ] इति वचनात्। स च प्रत्यक्षादिप्रमाणा[12]गोचरत्वाद् दुरुपपादः, तथा हि— न असौ अध्यक्षेण अर्थसाक्षात्कारिणा विषयीक्रियते, तस्य अतीन्द्रियत्वात्, अतीन्द्रियत्वं च स्वभावविप्रकृष्टत्वात् । अतीन्द्रियत्वादेव च तदव्यभिचारिकार्यादिलिङ्ग[13]सम्बन्ध[14]-ग्रहणासम्भवाद् नाऽपि अनुमानेन । तस्य अप्रत्यक्षत्वे तत्सामान्य[15]ग्रहणशक्त्यनुपपत्तेः नाऽपि उपमानेन । आगमस्य अपि विवक्षायां प्रतिपाद्यमानायां अनुमानान्तर्भावाद् अन्यत्र[?त्वे] च बाह्ये अर्थे सम्बन्धाभावाद् अप्रमाणत्वम्, प्रमाणत्वे वा परस्परविरोधित्वाद् नाऽपि आगमेन ।

---

टि० १. ०तलोच० च ॥ २. ०णापलि० ग ङ॥ ३. ०ति भावार्थः घ ङ च ॥ ४. ०रं दर्शयति क ॥ ५. ०पातैर्भव क ॥ ६. ०ष्यादिः पूर्वजन्मन्यासम् ? को वा ख ग ॥ ७. वा देवादिरितो मनु० ख ग च । ०दिरतो मनु० घ ङ॥ ८. ०न्मतः ग घ ङ॥ ९. इह च सं० घ ङ॥ १०. उत्पत्स्यामि ? इत्ये० ख ॥ ११. ०पका दि० ग ङ। ०पकादिका दि० ख घ च ॥ १२. ०माणगोचरातीतत्वाद् ख ग घ ङ॥ १३. ०ङ्गग्रहणा० ख ॥ १४. ०न्धसम्यग्ग्रहणा० घ ङ॥ १५. तत्समानग्रह० ख ॥

तदन्तरेणापि सकलार्थोपपत्तेः नाऽपि अर्थापत्त्या । तदेवं प्रमाणपञ्चकातीतत्वात् षष्ठप्रमाणविषयत्वाद् अभाव एवात्मनः । प्रयोगश्चायम्– नास्ति आत्मा, प्रमाणपञ्चक-विषयातीतत्वात् खरविषाणवत् । तदभावे च विशिष्टसञ्ज्ञाप्रतिषे[1]धासम्भवेन अनुत्थानमेव सूत्रस्येति ।

एतत् सर्वमनुपासितगुरोः वचः, तथा हि– प्रत्यक्ष एवात्मा, तद्गुणस्य ज्ञानस्य स्वसंवित्सिद्धत्वात्, संविन्नि[2]ष्ठा हि विषयव्यवस्थितयः, घट-पटादीनामपि रूपादिगुणप्रत्यक्ष-त्वाद् एव अध्यक्षत्वमिति । मरणाभावप्रसङ्गात् च न भूतगुणः चैतन्यं आशङ्कनीयम्, तेषां सदा सन्निधानस[3]म्भवात् इति । हेयोपादेयपरिहारोपादानप्रवृत्तेः च अनुमानेन परात्मनि सिद्धिः भवति, एवं अनयैव दिशा उपमानादिकमपि[4] स्वधिया[5] स्वविषये यथासम्भवमायोज्यम्, केवलं मौनीन्द्रेण[6] अनेनैव[7] आगमेन विशिष्टसञ्ज्ञानिषेधद्वारेण 'अहम्' इति च[8] आत्मोल्लेखेन आत्मसद्भावः प्रतिपादितः, शेषागमानां च अनाप्तप्रणीतत्वाद् अप्रामाण्यमेव इति ।

अत्र च **अस्ति आत्मा** इत्यनेन क्रियावादिनः सप्रभेदाः, **नास्ति** इत्यनेन च अक्रियावादिनः, एतदन्तःपातित्वात् चाज्ञानिका वैनयिकाश्च सप्रभेदा[9] उपक्षिप्ताः । ते चामी–

**''असियसयं किरियाणं अकिरियवाईण होइ चुलसीई ।**
**अण्णाणिय सत्तट्ठी वेणइयाणं च बत्तीसा ॥''** [ सूत्रकृ०नि०११९ ]

तत्र जीवा-ऽजीवा-ऽऽश्रव-बन्ध-पुण्य-पाप-संवर-निर्जरा-मोक्षाख्या नव पदार्थाः स्व-परभेदाभ्यां नित्या-ऽनित्यविकल्पद्वयेन च काल-नियति-स्वभावेश्वरा-ऽऽत्माश्रयणाद् अशीत्युत्तरं भेदशतं भवति क्रियावादिनाम्, एते च अस्तित्ववादिनो अभिधीयन्ते[10] । इयमत्र भावना–अस्ति जीवः स्वतो नित्यः कालतः १, अस्ति जीवः स्वतोऽनित्यः कालतः २, अस्ति जीवः परतो नित्यः कालतः ३, अस्ति जीवः परतोऽनित्यः कालतः ४; एवं कालेन[11] चत्वारो भेदा लब्धाः । एवं नियति-स्वभावेश्वरा-ऽऽत्मभिरपि एकैकेन चत्वारो विकल्पा लभ्यन्ते। एते च पञ्च चतुष्कका विंशतिः भवति । इयं च जीवपदार्थेन लब्धा। एवमजीवादयोऽपि अष्टौ प्रत्येकं विंशतिभेदा भवन्ति । ततश्च नव विंशतयः शतमशीत्युत्तरं भवति १८०। तत्र स्वत इति[12] स्वेनैव रूपेण जीवो अस्ति, न परोपाध्यपेक्षया[13] ह्रस्वत्व-

टि० १. **०धाभावसम्भ०** ग घ ङ च ॥ २. **०ष्ठाश्च वि०** ख ग च ॥ ३. **०म्भवातः** क ॥ ४. **०पि स्वविष०** क घ ङ च ॥ ५. **०या यथा०** ख ग ॥ ६. **०नीन्द्राणामनेनै०** क ॥ ७. **०नैव विशि०** ख ॥ ८. **चागमोल्ले०** क ॥ ९. **०दा आक्षिप्ताः** ख ॥ १०. **०न्ते । अस्ति जी०** ख ॥ ११. **०न चत्वारश्चत्वारो** ग ॥ १२. **०ति तत्र स्वेनैव स्वरूपे०** ख ॥ १३. **पररूपव्यपेक्ष०** क ॥

दीर्घत्वे इव, नित्यः=शाश्वतो न क्षणिकः, पूर्वोत्तरकालयोः अवस्थिततत्वात्, कालत इति काल एव विश्वस्य स्थित्युत्पत्तिप्रलयकारणम्, उक्तं च–

≠"**कालः पचति भूतानि कालः संहरते प्रजाः ।**

**कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥**" [ महाभा० १/१/२४८-५० ]

स चातीन्द्रियो युगपच्चिरक्षिप्रक्रियाभिव्यङ्ग्यो हिमोष्ण-वर्षाव्यवस्थाहेतुः क्षण-लव-मुहूर्त-यामा-ऽहोरात्र-पक्ष-मासर्त्वयन-संवत्सर-युग-कल्प-पल्योपम-सागरोपमा[1]-ऽवसर्पिण्यु-त्सर्पिणी-पुद्गलपरावर्ता-ऽतीता-ऽनागत-वर्तमान-सर्वाद्धा[2]व्यवहाररूपः । द्वितीयविकल्पे तु कालाद् एव आत्मनो अस्तित्व[3]मभ्युपेयम्, किन्तु अनित्यो असाविति विशेषोऽयं पूर्वविकल्पात् । तृतीयविकल्पे तु परत एव अस्तित्वमभ्युपगम्यते, कथं पुनः परतो अस्तित्वं आत्मनो अभ्युपेयते ? ननु एतत् प्रसिद्धमेव सर्वपदार्थानां परपदार्थस्वरूपापेक्षया स्वरूपपरिच्छेदः, यथा– दीर्घत्वापेक्षया ह्रस्वत्वपरिच्छेदो ह्रस्वत्वापेक्षया च दीर्घत्वस्येति । एवमेव च अनात्मनः स्तम्भ-कुम्भादीन् समीक्ष्य तद्व्यतिरिक्ते[4] वस्तुनि आत्मबुद्धिः प्रवर्तत इति, अतो यदात्मनः स्वरूपं तत् परतः एवावधार्यते, न स्वत[5] इति । तुर्यविकल्पोऽपि प्राग्वद् इति चत्वारो विकल्पाः । तथा अन्ये नियतित एवात्मनः स्वरूपमवधारयन्ति, का पुनरियं नियतिः ? इति, उच्यते– पदार्थानां अवश्यन्तया यद्यथाभवने प्रयोजककर्त्री नियतिः, उक्तं च–

"**प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः,**
**सोऽवश्यं भवति नृणां शुभोऽशुभो वा ।**
**भूतानां महति कृतेऽपि हि प्रयत्ने,**
**नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥**" [ ]

इयं च **मस्करिपरिव्राणमता**नुसारिणी[7] प्राय इति । अपरे पुनः स्वभावादेव संसार-व्यवस्थामभ्युपयन्ति । कः पुनरयं स्वभावः ? वस्तुनः स्वत एव तथापरिणतिभावः स्वभावः[8], उक्तं च–

"**कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च ।**

---

टि० १. ०**पमोत्सर्पिण्यवसर्पिणी-पु०** ख ग ॥ २. ०**द्धादिव्यव०** ग घ ङ ॥ ३. ०**त्वमात्मनोऽभ्यु०** घ ङ ॥ ४. ०**रिक्तवस्तु०** ख ॥ ५. **स्वतः । तुर्य०** क च ॥ ६. **चतुर्थविकल्पेऽपि** ग ॥ ७. ०**णी । अपरे** क ॥ ८. ०**वः । कः कण्ट०** ख ॥

**वि०टि०** ≠ तुलना- कालः सृजति भूतानि कालः संहरते प्रजाः। संहरन्तं प्रजाः कालं कालः शमयते पुनः॥ कालः सुप्तेषु जागर्ति कालो हिं दुरतिक्रमः। कालः सर्वेषु भूतेषु चरत्यविधृतः समः॥ [महाभा०१/१/२४८,२५०]

**स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः ॥ [ ]**

**स्वभावतः प्रवृत्तानां, निवृत्तानां स्वभावतः ।**
**नाहं कर्तेति भूतानां, यः पश्यति स पश्यति ॥ [ ]**

**केनाञ्जितानि नयनानि मृगाङ्गनानां,**
**कोऽलङ्करोति रुचिराङ्गरुहान् मयूरान् ।**
**कश्चोत्पलेषु दलसन्निचयं करोति,**
**को [१]वा करोति विनयं कुलजेषु पुंसु ॥''[ ]**

तथा अन्ये अभिदधते— [२]सर्वमेतत् जीवादि ईश्वरात् [३]प्रवृत्तं तस्मादेव स्वरूपे अवतिष्ठते । कः पुनः अयं ईश्वरः ?— अणिमाद्यैश्वर्ययोगाद् ईश्वरः, उक्तं च—

**''[४]अज्ञो जन्तुरनीशः स्यादात्मनः सुख-दुःखयोः ।**
**ईश्वरप्रेरितो [५]गच्छेत् श्वभ्रं वा स्वर्गमेव वा ॥'' [ महाभा०वन०३०/२८ ]**

तथा अन्ये ब्रुवते— न जीवादयः पदार्थाः कालादिभ्यः स्वरूपं प्रतिपद्यन्ते, किं तर्हि ? आत्मनः, कः पुनः अयं आत्मा ?, आत्माद्वैतवादिनां विश्वपरिणतिरू[६]पः, यत उक्तम्—

**''एक एव हि भूता[७]त्मा देहे देहे व्यवस्थितः ।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥''**

**[ त्रिपुराता०उप०५/१२, ब्रह्मबिन्दूप०११ ]**

तथा **''पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्'' [ ऋग्वेद १०/९०/२ ]** इत्यादि । एवमस्ति अजीवः स्वतो नित्यः कालत [८]इत्येवं सर्वत्र योज्यम् ।

तथा अक्रियावादिनः=नास्तित्ववादिनः, तेषामपि जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षाख्याः सप्त पदार्थाः स्व-परभेदद्वयेन तथा काल-यदृच्छा[९]-नियति-स्वभावेश्वरा-ऽऽत्मभिः षड्भिः चिन्त्यमानाः चतुरशीतिविकल्पा भवन्ति, तद्यथा— नास्ति जीवः स्वतः कालतः, नास्ति जीवः परतः कालतः इति कालेन द्वौ लब्धौ । एवं यदृच्छादिष्वपि द्वौ द्वौ भेदौ प्रत्येकं भवतः । [१०]सर्वे जीवपदार्थे द्वादश भवन्ति । एवमजीवादिषु अपि प्रत्येकं द्वाद[११]शैव । सप्त द्वादशकाः चतुरशीतिः ८४। अयमत्रार्थः-नास्ति जीवः स्वतः कालत इति । इह पदार्थानां लक्षणेन सत्ता निश्चीयते, कार्यतो वा । न

---

टि० १. वा दधाति ख ग ॥ २. समस्तमेत० ख ग ॥ ३. प्रसूतम् ख ग घ ॥ ४. अन्यो घ ङ च ॥ ५. ०त् स्वर्गं वा श्वभ्रमेव वा ख ॥ ६. ०पः, उक्तं च—एक ख । ०प आत्मा, उक्तं च—एक ग ङ ॥ ७. ०त्मा भूते भूते व्य० ख घ ङ ॥ ८. इत्येतत् स० घ ॥ ९. ०च्छानियत्यादि० ग ङ ॥ १०. सर्वेऽपि जी० ग घ ङ ॥ ११. ०शैते । सप्त ख घ । ०शैव । ते सप्त ङ ॥

चात्मनः तादृग् अस्ति किञ्चिल्लक्षणं येन सत्तां [1]प्रतिपद्येमहि, नापि कार्यं अणूनामिव[2] [3]महीध्रादि सम्भवति, यच्च लक्षण-कार्याभ्यां [4]नाधिगम्यते वस्तु तद् [5]नास्त्येव यथा [7]वियदिन्दीवरम्, तस्माद् नास्ति आत्मा इति । द्वितीयवि[6]कल्पोऽपि यच्च स्वतो नात्मानं बिभर्ति गगनारविन्दादिकं तत् परतोऽपि नास्त्येव, अथवा सर्वपदार्थानामेव परभागादर्शनात् सर्वार्वाग्भागसूक्ष्मत्वात् चोभयानुपलब्धेः सर्वानुपलब्धितो नास्तित्वमध्यवसीयते, उक्तं च–

"**यावद् दृश्यं [8]परस्तावद् भागः स च न दृश्यते** ।" [     ] इत्यादि ।

तथा यदृच्छातोऽपि नास्तित्वं आत्मनः । का पुनः यदृच्छा ? अनभिसन्धिपूर्विका अर्थप्राप्तिः यदृच्छा,

"**अतर्कितोपस्थितमेव सर्वं, चित्रं जनानां सुख-दुःखजातम् ।**
**काकस्य तालेन यथाभिघातो, न बुद्धिपूर्वोऽत्र वृथाभिमानः ॥**
**सत्यं पिशाचाः स्म वने वसामो, भेरीं कराग्रैरपि न स्पृशामः ।**
**यदृच्छया सिद्ध्यति लोकयात्रा, भेरीं पिशाचाः [9]परिताडयन्ति ॥**" [     ]

यथा काकतालीयं अबुद्धिपूर्वकम्, न काकस्य बुद्धिः [10]अस्तीति[11] मयि तालं पतिष्यति, नापि तालस्य अभिप्रायः काकोपरि पतिष्यामि, अथ च तत् तथैव भवति। एवं अन्यदपि अतर्कितो[12]पनतं अजाकृपाणीयं ≠आतुरभेषजीयम् Φअन्धकण्टकीयमित्यादि द्रष्टव्यम् । एवं सर्वं जाति-जरा-मरणादिकं लोके यादृच्छिकं काकतालीयादिकल्पं अवसेयमिति । एवं नियति-स्वभावेश्वरा-ऽऽत्मभिः अपि आत्मा निराकर्तव्यः ।

तथा अज्ञानिकानां [13]सप्तषष्टि[14]भेदाः, ते चामी– जीवादयो नव पदार्थाः, उत्पत्तिश्च दशमी, सद् १ असत् २ सदसद् ३ अवक्तव्यः ४ सदवक्तव्यः ५ असदवक्तव्यः ६ सदसदवक्तव्यः ७ इति एतैः सप्तभिः प्रकारैः विज्ञातुं न शक्यन्ते, न च विज्ञातैः प्रयोजनमस्ति । भावना चेयम्– सन् जीव इति को वेत्ति ? किं वा तेन ज्ञातेन ? असन् [15]जीव इति को जानाति ? किं वा तेन ज्ञातेन ? इत्यादि । एवमजीवादिषु अपि प्रत्येकं सप्त

---

टि० १. **प्रपद्ये०** ख ॥ २. **०व महामहीध्रा०** घ ङ ॥ ३. **महीरन्ध्रादि** च ॥ ४. **नाभिग०** ग ॥ ५. **०व वियदिन्दीवरवत् । तस्मा०** ख ग ॥ ६. **०कल्पेऽपि** घ ङ ॥ ७. **०नं विनक्ति ग०** च ॥ ८. **परं ताव०** च ॥ ९. **परिवादयन्ति** घ ङ च ॥ १०. **०रस्ति नापि तालं पित्सति, नापि तालस्या०** ग ॥ ११. **०ति ममोपरि तालं** च ॥ १२. **०पगमजा०** ङ ॥ १३. **०ष्टिर्भेदाः** ग घ ङ ॥ १४. **दा भवन्ति ते चा०** ख ङ ॥ १५. **जीवः को वेत्ति ? किं वा** ग ॥

**वि०टि०** ≠ "**आतुर** इति कुट्टि[?ष्टि]नो गरलमिश्रोदकपानं प्रगुणतावत्" जै०वि०प० ॥
Φ "**अन्धकण्टक** इति मृत्युपातप्रविष्टाक्षिकण्टकाकर्षणेन पटलनिर्गमवत्" जै०वि०प० ॥

विकल्पाः । नव सप्तकाः त्रिषष्टिः । अमी चान्ये चत्वारः त्रिषष्टिमध्ये प्रक्षिप्यन्ते, तद्यथा– सती भावोत्पत्तिरिति को जानाति ?, किं वा तया ज्ञातया ?; एवमसती सदसती अवक्तव्या भावोत्पत्तिरिति को वेत्ति ?, किं वा[१] तया ज्ञातया ? इति । शेषविकल्पत्रयं तु उत्पत्त्युत्तरकालं पदार्थावयवापेक्षं[२] अतोऽत्र न सम्भवतीति नोक्तम् । एतच्चतुष्टयप्रक्षेपात् सप्तषष्टिः भवति । तत्र सन्[३] जीव इति को वेत्ति ? इति अस्य अयमर्थः– न कस्यचिद् विशिष्टं ज्ञानमस्ति योऽतीन्द्रियान् जीवादीन् अवभोत्स्यते, न च तैः ज्ञातैः किञ्चित् फलमस्ति, तथा हि– यदि नित्यः सर्वगतोऽमूर्तो ज्ञानादिगुणोपेत एतद्गुणव्यतिरिक्तो वा ततः कतमस्य पुरुषार्थस्य सिद्धिः ? इति तस्माद् अज्ञानमेव श्रेयः । अपि च तुल्येऽपि अपराधे अकामकरणे लोके स्वल्पो दोषः, लोकोत्तरेऽपि आकुट्टिका-ऽनाभोग-सहसाकारादिषु क्षुल्लक-भिक्षु-स्थविरोपाध्याय-सूरीणां यथाक्रमं उत्तरोत्तरं प्रायश्चित्तमिति । एवमन्येषु अपि विकल्पेषु आयोज्यम् ।

तथा वैनयिकानां द्वात्रिंशद् भेदाः, ते चानेन विधिना भावनीयाः– सुर-नृप-यति-ज्ञाति[४]-स्थविरा-ऽधम-मातृ-पितृषु अष्टसु मनो-वाक्-काय-प्रदानचतुर्विधविनयकरणात्, तद्यथा[५]– देवानां विनयं करोति मनसा वाचा कायेन तथा देश-कालोपपन्नदानेन[६] इति एवमादि । एते च विनयादेव स्वर्गा-ऽपवर्गमार्गं[७] अभ्युपयन्ति[८] । नीचैर्वृत्त्यनुत्सेकलक्षणो विनयः । सर्वत्र चैवंविधेन विनयेन[९] देवादिषु उपतिष्ठमानः[१०] स्वर्गा-ऽपवर्गभाग् भवति[११], उक्तं च–

**"विणया नाणं णाणाओ दंसणं दंसणाओ[१२] चरणं च ।**
**चरणाहिंतो मोक्खो मोक्खे सोक्खं अणाबाहं ॥" [ ]**

अत्र च क्रियावादिनां अस्तित्वे सत्यपि केषाञ्चित् सर्वगतो(ऽसर्वगतो) नित्योऽनित्यः कर्ताऽकर्ता मूर्तोऽमूर्तः श्यामाकतन्दुलमात्रोऽङ्गुष्ठपर्वमात्रो दीपशिखोपमो[१३] हृदयाधिष्ठान इत्यादिको अस्ति चौपपातिकश्च । अक्रियावादिनां तु आत्मैव न विद्यते, कुतः पुनरौपपातिकत्वम् ? । अज्ञानिकाः तु नात्मानं प्रति विप्रतिपद्यन्ते, किन्तु तज्ज्ञानं अकिञ्चित्करं एषामिति । वैनयिकानामपि न आत्मास्तित्वे विप्रतिपत्तिः, किन्तु अन्यद् मोक्षकारणं[१४] विनयाद् ऋते न सम्भवतीति[१५] प्रतिपन्नाः ।

---

टि० १. **वा ज्ञात०** क घ ङ। **वाऽनया ज्ञा०** ग च ॥ २. **०पेक्ष्यम०** च ॥ ३. **सज्जीव** क ॥ ४. **०ज्ञानि०** ग ॥ ५. **तद्यथा** इति न वर्तते ङपुस्तके ॥ ६. **०पन्नेन दाने०** क-चप्रतिभ्यामृते ॥ ७. **०र्गमभ्यु०** ग घ च ॥ ८. **०न्ति । सर्वत्र** ख ॥ ९. **०न स्वर्गा०** ख ॥ १०. **०ष्ठन् स्वर्गा०** घ च ॥ ११. **०ति । विणया** क ॥ १२. **०णा हि च०** ङ ॥ १३. **०पमानो हृ०** घ च ॥ १४. **मोक्षसाधनं** ख ग ॥ १५. **०ति विप्रति०** क ॥

[1]तत्र अनेन सामा[2]न्यात्मास्तित्वप्रतिपादनेन अक्रियावादिनो निरस्ता द्रष्ट[3]व्याः । किञ्च आत्मास्तित्वानभ्युपगमे[4] च—

"**शास्ता शास्त्रं शिष्यः प्रयोजनं वचन-हेतु-दृष्टान्ताः ।**
**सन्ति न शून्[5]यं वदतस्[≠]तदभावादप्रमाणं स्यात् ॥**
**प्रति[6]षेद्धृ-प्रतिषेधौ स्तश्चेच्छून्यं कथं भवेत् सर्वम् ।**
**[Φ]तदभावेन तु सिद्धा अप्रतिषिद्धा जगत्यर्थाः ॥"** [ ]

एवं शेषाणामपि अत्रैव यथासम्भवं निराकरणमुत्प्रेक्ष्यमिति ॥१॥

गतं आनुषङ्गिकम् । प्रकृतमनुश्रियते- तत्र इह **एवमेगेसिं [7]नो नायं भवइ** इत्यनेन केषाञ्चिदेव सञ्ज्ञानिषेधात् केषाञ्चित् तु भवतीति उक्तं भवति । तत्र सामान्यसञ्ज्ञायाः प्रतिप्राणिसिद्धत्वात् तत्कारणपरिज्ञानस्य च इह अकिञ्चित्करत्वात्, विशिष्टसञ्ज्ञायाः तु केषाञ्चिदेव भावात् त[8]स्याः तु भवान्तरगाम्यात्मस्पष्टप्रतिपादने सोपयोगित्वात् सामान्य-सञ्ज्ञाकारणप्रतिपादनं अनादृत्य विशिष्टसञ्ज्ञायाः कारणं **सूत्रकृद्** दर्शयितुमाह—

**[ सू० ] से ज्जं पुण जाणेज्जा सहसम्मुइयाए परवागरणेणं अण्णेसिं वा अंतिए सोच्चा, तं जहा- पुरत्थिमातो वा दिसातो आगतो अहमंसि एवं दक्खिणाओ वा पच्चत्थिमाओ वा उत्तराओ वा उड्ढाओ वा अहाओ वा अन्नतरीओ दिसाओ वा अणुदिसाओ वा आगतो अहमंसि, एवमेगेसिं णातं भवति । अत्थि मे आया उववाइए जो इमाओ दिसाओ वा अणुदिसाओ वा अणुसंचरति सव्वाओ दिसाओ सव्वाओ अणुदिसाओ सो हं ॥२॥**

**से ज्जं पुण जाणेज्ज** त्ति सूत्रं यावत् **सोऽहमिति** । **से** इति निर्देशो **मागध**शैल्या प्रथमैकवचनान्तः । **स** [9]इति अनेन च यः प्रागनिर्दिष्टो ज्ञाता विशिष्टक्षयोपशमादिमान् स प्रत्यवमृश्यते । **यद्** इति अनेनापि यत् प्रागनिर्दिष्टं दिग्-विदिगागमनम्, तथा कोऽहं अभूवं अतीतजन्मनि देवो ना[10]रकः तैर्यग्योनो मनुष्यो वा ? स्त्री पुमान् नपुंसको वा ? को [11]वा अमुतो मनुष्यजन्[12]मनः प्रभ्रष्टोऽहं प्रेत्य देवादिः भविष्यामि ? इत्येतत् परामृश्यते ।

---

टि० १. **तत्रान्येन** घ ङ॥ २. **०न्यास्तित्व०** क ॥ ३. **०व्याः । आत्मास्ति०** क-खप्रती ऋते ॥ ४. **०मे-शास्ता** ख ॥ ५. **०न्यं ब्रुवत०** ख ग ॥ ६. **०षेध्यप्र०** ग ङ॥ ७. **नो संज्ञा भवति** ख ॥ ८. **०स्याश्च भ०** कपुस्तकमृते ॥ ९. **इत्येतेन च** घ ङ॥ १०. **०ग्योनिर्मनु०** ग घ ॥ ११. **वा मृतो मनु०** क ग च ॥ १२. **०न्मतः प्र०** ग ॥

**वि०टि०** ≠ आत्मनः इत्यर्थः ॥ Φ सर्वशून्याभावेन इत्यर्थः ॥

**जानीयाद्**=अवगच्छेत्, इदमुक्तं भवति— न कश्चिद् अनादौ संसृतौ पर्यटन् असुमान् दिगागमनादिकं जानीयात् । यः पुनः जानीयात् स एवम्—

**सह** [1]**सम्मुइय** त्ति । **सह**शब्दः सम्बन्धवाची, **सद्** इति प्रशंसायाम्, **मतिः**=ज्ञानम् । [2]अयमत्र वाक्यार्थः— आत्मना **सह** सदा या सन्मतिर्वर्तते तया **सन्मत्या** कश्चित् जानीते । **सह**शब्दविशेषणात् च सदा आत्मस्वभावत्वं मतेरावेदितं भवति, न पुनः यथा **वैशेषिकाणां** व्यतिरिक्ता सती समवायवृत्त्या आत्मनि समवेता इति । यदि वा [3]**सम्मइए** त्ति स्वकीयया मत्या=स्वमत्या इति । तत्र भिन्नमपि अश्वादिकं स्वकीयं दृष्टं अतः सहशब्दविशेषणम् सहशब्दश्चासमस्त इति । सत्यपि चात्मनः सदा मतिसन्निधाने प्रबलज्ञानावरणावृतत्वाद् न सदा विशिष्टो अवबोध इति । सा पुनः सन्मतिः स्वमतिः वा अवधि-मनःपर्याय-केवलज्ञान-जातिस्मरणभेदात् चतुर्विधा ज्ञेया । तत्र अवधि-मनःपर्याय-केवलानां स्वरूपमन्यत्र विस्तरेण उक्तम्, जातिस्मरणं तु आभिनिबोधिकविशेषः ।

तदेवं चतुर्विधया मत्या आत्मनः कश्चिद् विशिष्टदिग्गत्या-ऽऽगती जानाति । [4]कश्चिच्च **परः**=तीर्थकृत् सर्वज्ञः, तस्यैव परमार्थतः परशब्दवाच्यत्वात् परत्वम्, तस्य तेन वा **व्याकरणम्**=उपदेशः, तेन जीवान् तद्भेदान् च पृथिव्यादीन् तद्गत्या-ऽऽगती च जानाति । अपरः पुनः **अन्येषां** तीर्थकरव्यतिरिक्तानां अतिशयज्ञानिनां **अन्तिके श्रुत्वा** जानातीति ।

यच्च जानाति तत् सूत्रावयवेन दर्शयति—

**तद्यथा— पूर्वस्या दिश आगतोऽहमस्मि, एवं दक्षिणस्याः पश्चिमाया उत्तरस्या ऊर्द्ध**दिशो-**ऽधो**दिशो**ऽन्यतरस्या दिशोऽनुदिशो** [5]**वा** [6]**आगतो अहमस्मी**ति **एवमेकेषां** विशिष्टक्षयोपशमादिमतां तीर्थकरा-ऽन्यातिशयज्ञानिबोधितानां च [7]**ज्ञातं भवति** ।

तथा प्रतिविशिष्टदिगागमनपरिज्ञानानन्तरं [8]एषां एतदपि [9]ज्ञातं भवति, यथा— **अस्ति मे** अस्य शरीरकस्य अधिष्ठाता ज्ञान-दर्शनोपयोगलक्षणः **उपपादुकः** भवान्तरसङ्क्रान्तिभाग् असर्वगतो भोक्ता मूर्तिरहितो अविनाशी शरीरमात्रव्यापी इत्यादि गुणवान् **आत्मा** इति । स च द्रव्य-कषाय-योगोपयोग-ज्ञान-दर्शन-चारित्र-वीर्यात्मभेदाद् अष्टधा । तत्र उपयोगात्मना बाहुल्येन इहाधिकारः । शेषाः तु तदंशतया उपयुज्यन्त [10]इति उपन्यस्ताः । तथा अस्ति च मम आत्मा, **यो अमुष्या दिशो अनुदिशश्च** सकाशाद् **अनुसञ्चरति** गतिप्रायोग्य-

---

टि० १. **सम्मइए त्ति** ख विना । **सम्मइय त्ति** ग ॥ २. **अत्र वा०** ग ॥ ३. **०म्मईए त्ति** च । **०म्मइय त्ति** ख ॥ ४. **०श्चिच्च परतः परः** ख । **०श्चित् परतः तीर्थ०** ग ॥ ५. वा गतो वाऽऽगतो **वाऽहम०** ख ॥ ६. **०तो वाऽह०** घ ॥ ७. **ज्ञानं** ख ॥ ८. **एतेषामे०** ख । **एतदपि** ग । **एषां तद०** च ॥ ९. **ज्ञानं** ख च ॥ १०. **इति** । **तथा** ख ॥

कर्मोपादानाद् अनु-पश्चात् सञ्चरति=**अनुसञ्चरति** । पाठान्तरं वा **अनुसंसरइ** त्ति दिग्-विदिगागमनं भावदिगागमनं वा स्मरतीत्यर्थः । साम्प्रतं सूत्रावयवेन पूर्वसूत्रोक्तमेव अर्थमुपसंहरति–

**सर्वस्या दिशः सर्वस्याश्चानुदिशो** य आगतो अनुसञ्चरति[१] अनुसंस्मरतीति वा **सोऽहम्** इति आत्मोल्लेखे, अहंप्रत्ययग्राह्यत्वाद् आत्मनः । अनेन च पूर्वाद्याः प्रज्ञापकदिशः सर्वा गृहीताः भावदिशश्चेति ॥२॥

इममेव अर्थं **निर्युक्तिकृद्** दर्शयितुमना गाथात्रितयमाह–

[नि०] **जाणइ सयं मतीए अन्नेसिं वा वि अंतिए[२] सोच्चा ।**
**जाणगजणपन्नविओ[३] जीवं तह जीवकाए य ॥६४॥**

[नि०] **एत्थ य सह[४] सम्मुइय त्ति जं पयं तत्थ जाणणा होइ ।**
**ओही[५] मणपज्जवणाण केवले जाइसरणे[६] य ॥६५॥**

[नि०] **परवइवागरणं पुण जिणवागरणं जिणा परं नत्थि ।**
**अन्नेसिं सोच्च[७] त्ति य जिणेहिं सव्वो परो अन्नो ॥६६॥**

**जाण०**[८] इत्यादि, **एत्थ चे**त्यादि, **परे**त्यादि । कश्चिद् अनादिसंसृतौ पर्यटन् अवध्यादिकया चतुर्विधया स्वकीयया **मत्या जानाति** । अनानुपूर्वीन्यायप्रकटनार्थं पश्चादुपात्तमपि **अन्येषाम्** इत्येतत् पदं तावदाचष्टे– **अन्येषां वा** अतिशयज्ञानिनां **अन्तिके श्रुत्वा** जानाति । तथा **जाणगजणपण्णविओ** इत्यनेन परव्याकरणं उपात्तम्, तेन अयमर्थः–**ज्ञायकः**[९]=तीर्थकृत्, तत्[१०]**प्रज्ञापितश्च** जानाति । यद् जानाति तत् स्वत एव दर्शयति– सामान्यतो **जीवम्** इत्यनेन[११] अधिकृतोद्देशकस्य अर्थाधिकारमाह, **तथा जीवकायांश्च** पृथिवी[१२]कायादीन् इत्यनेन च उत्तरेषां षण्णामपि उद्देशकानां यथाक्रमं अधिकारार्थं आह इति ।

**अत्र च सह सम्मुइए**[१३] **त्ति** सूत्रे **यत् पदं तत्र**[१४] **जाणण** त्ति ज्ञानमुपात्तं **भवति,** "**मन ज्ञाने**[१५]"[पा०धा०४/११७६] मननं मतिरिति कृत्वा । तच्च किम्भूतम् ? इति

---

टि० १. ०रतीति अनु० ख ॥ २. अंतिये ख ॥ ३. ०णतिजण० ख ॥ ४. सह सम्मुइए त्ति जं पयं सुए तत्थ ञ । ...सम्मुइयं ति ज... ख ज । ...सहस्समइयाए जं... झ ॥ ५. उवही झ ॥ ६. जायस० झ ॥ ७. सोउं ति य ख ज । सोव( च्च )त्ति य झ । सोउ ति य ञ ऋते ॥ ८. जाणइ इत्यादि, सहेत्यादि, परे० क ख ग ॥ ९. ज्ञापकः कपुस्तकमृते ॥ १०. तत्प्रतिज्ञा० ख ॥ ११. ०नेन चाधिकृ० ख विना ॥ १२. ०थिव्य[ ?प् ]काया० क ॥ १३. सम्मइए ग । समुइए घ । सम्मए ङ । समइए च ॥ १४. ०त्र च जा० क ॥ १५. मनि ज्ञाने ग । मनं ज्ञाने ङ ॥

दर्शयति— **अवधि-मनःपर्याय-केवल**[1]**-जातिस्मरण**रूपमिति । तत्र अवधिज्ञानी सङ्ख्येयानसङ्ख्येयान्[2] वा भवान् जानाति । एवं मनःपर्यायज्ञान्यपि । [3]केवलज्ञानी तु नियमतो अनन्तान् । जाति[4]स्मरस्तु नियमतः सङ्ख्येयानिति । शेषं स्पष्टम् ।

अत्र [5]च सहसम्मत्यादिपरिज्ञाने सुखप्रतिपत्त्यर्थं त्रयो दृष्टान्ताः प्रदर्श्यन्ते, तद्यथा—

**वसन्तपुरे** नगरे **जितशत्रू** राजा । **धारिणी** महादेवी । तयोः **धर्मरुच्य**भिधानः सुतः । स च राजा अन्यदा तापसत्वेन प्रव्रजितुमिच्छुः **धर्मरुचिं** राज्ये स्थापयितुं उद्यतः । तेन च जननी पृष्टा—"किमिति तातो [6]राज्यश्रियं त्यजति ?" । तया उक्तम्—"किमनया चपलया नारकादिसकलदुःखहेतुभूतया स्वर्गा-ऽपवर्गमार्गार्गलया अवश्यमपायिन्या परमार्थत इहलोकेऽपि अभिमानमात्रफल[7]या ?, अतो विहाय एनां सकलसुख[8]साधकं धर्मं कर्तुमुद्यतः"। **धर्मरुचिः** [9]तमाकर्ण्य उक्तवान्—"यद्येवं किमहं तातस्य अनिष्टो येन एवम्भूतां सकलदोषा[10]श्रयिणीं मयि नियोजयति, सकलकल्याणहेतो धर्मात् प्रच्यावयति ?" इत्यभिधाय पित्रानुज्ञातः तेन सह तापसाश्रममगात् । तत्र च [11]सकलां तापसक्रियां यथोक्तां पालयन्नास्ते । अन्यदा चामावास्यायाः [12]पूर्वेऽह्नि एकेन तापसेन उद्घुष्टम्, यथा—"भो भोः तापसाः ! श्वोऽनाकुट्टिः भवि[13]ता, तद् अद्यैव कुश-कुसुम-समित्-क[14]न्द-फल-मूलाद्याहरणं कुरुत" इति । [15]एतच्च आकर्ण्य **धर्मरुचि**ना जनकः पृष्टः—"तात ! का इयं अनाकु[16]ट्टिः नाम ?" । तेनोक्तम्—"[17]पुत्र ! लतादीनामच्छेदनं (अनाकुट्टिः, आकुट्टिस्तु छेदनम्,) तद्धि अमावास्यादिके विशिष्टे पर्वदिवसे न वर्तते, सावद्यत्वात् छेदनादिक्रियायाः "। श्रुत्वा चैतद् असौ अचिन्तयत्—"यदि पुनः [18]सर्वदाऽनाकुट्टिः स्याच्छोभनं भवेत् "। एवमध्यवसायिनः [19]तस्यां अमावास्यायां [20]तपोव[21]नासन्नपथेन गच्छतां साधूनां दर्शनमभूत् । ते च तेनाभिहिताः— "किमद्य भवतामनाकुट्टिः [22]न जाता, येनाटवीं प्रस्थिताः ?"। [23]तैरभिहितं यथा—"अस्माकं [24]यावज्जीवमेव अनाकुट्टिः" इत्यभिधाय अतिक्रान्ताः साधवः । तस्य च तदाकर्ण्य ईहा-

---

टि० १. ०लज्ञान-जाति० च ॥ २. ०ङ्ख्येयांश्च भवा० घ ङ च ॥ ३. केवली तु ख ग ॥ ४. ०स्मरणस्तु क-खप्रतिभ्यामृते ॥ ५. च सम्म० ख ॥ ६. राज्यं त्यज० च ॥ ७. ०या इत्यतो ख ग ङ ॥ ८. ०साधनं ग ॥ ९. तथाक० ग ङ । तदाक० च ॥ १०. ०श्रयणीं ग ङ । ०श्रयणीयां मयि च ॥ ११. सकलास्तापसक्रिया यथोक्ताः पा० ग ङ ॥ १२. पूर्वाह्ले ए० ख । पूर्वाह्णे केनचित् ताप० ग ङ ॥ १३. ०ता अतोऽद्यैव समित्-कुश-कन्द-फलाद्या० ख । ०ता अतोऽद्यैव समित्-कुसुम-कुश-कन्दफल-मूलाद्या० ग ङ ॥ १४. ०न्द-मूल-फलाद्या० घ च ॥ १५. एतच्च धर्म० ख च ॥ १६. ०ट्टिरिति ? तेनो० ख ग ॥ १७. पुत्र ! कन्दफलादीना० ग ॥ १८. सर्वथाऽना० च ॥ १९. ०स्याममावा० क ॥ २०. तपोधना० ख ग ॥ २१. ०थेनागच्छ० क ॥ २२. न सञ्जाता ख ग ॥ २३. तैरप्यभि० ख ग ॥ २४. ०वमना० कप्रत्या विना ॥

ऽपोहविमर्शेन जातिस्मरणमुत्पन्नं यथा–"अहं जन्मान्तरे प्रव्रज्यां कृत्वा देवलोकसुखमनुभूय इहागतः" इति । एवं तेन विशिष्टदिगागमनं स्वमत्या जातिस्मरणरूप[१]या ज्ञातं प्रत्येकबुद्धश्च जातः । एवमन्येऽपि **वल्कलचीरि-श्रेयांस**प्रभृतयोऽत्र योज्या इति ।

परव्याकरणे तु इदमुदाहरणम्– **गौतमस्वामि**ना भगवान् **वर्धमानस्वामी** पृष्टः– "भगवन्! किमिति मे केवलज्ञानं नोत्पद्यते ?"। भगवता [२]व्याकृतम्[३]–"गौतम! भवतोऽतीव ममोपरि स्नेहोऽस्ति तद्वशात्" । तेनोक्त[४]म्–"भगवन् ! एवमेतत्, किंनिमित्तः पुनरसौ मम भगवदुपरि स्नेहः ?"; ततो भगवता तस्य बहुषु भवान्तरेषु पूर्वसम्बन्धः समावेदितः– "**चिरसं[५]सिट्ठोऽसि मे गोयमा ! चिरपरिचिओऽसि मे गोयमा !**" [**व्या०प्रज्ञ०१४।७।५२१**] इति एवमादि । तच्च तीर्थकृ[६]त्प्रतिपादितं आकर्ण्य **गौतमस्वामि**नो विशिष्टदिगागमनादिविज्ञानमभूद् इति ।

अन्यश्रवणे तु इदमुदाहरणम्– **मल्लिस्वामि[७]न्या** षण्णां राजपुत्राणां उद्वाहार्थं आगतानां अवधिज्ञानेन तत्प्रतिबोधनार्थं यथा जन्मान्तरे सहितैः एव प्रव्रज्या कृता यथा च तत्फलं देवलोके **जयन्ता**[८]भिधाने विमाने अनुभूतं तथा आख्यातम्। तच्च आकर्ण्य ते लघुकर्मत्वात् प्रतिबुद्धा विशिष्टदिगागमनविज्ञानं च सञ्जातम् । उक्तं च–

"**किं [९]थ तयं पम्हुट्ठं जं च तया भो जयंतपवरम्मि ।**
**वुत्था समयनिबद्धं देवा तं संभरह जातिं ॥**" [**ज्ञाताधर्म०१।८**] इति गा[१०]थात्रयतात्पर्यार्थः ॥६४–६६॥

साम्प्रतं प्रकृतमनुश्रियते– यो हि **सोऽहम्** इति अनेन अहङ्कारज्ञानेन आत्मोल्लेखेन [११]पूर्वादिः दिश आगतं आत्मानं अविच्छिन्नसन्ततिपतितं द्रव्यार्थतया नित्यं पर्यायार्थत[१२]या तु अनित्यं जानाति स पर[१३]मार्थत आत्मवादीति **सूत्रकृद्** दर्शयति–

## [सू०] से आयावादी लोयावादी कम्मावादी किरियावादि ॥३॥

**'से आयावादी [१४]लोयावादी कम्मावादी किरिया[१५]वादि'** त्ति । **स** इति यो भ्रान्तः पूर्वं नारक-तिर्य[१६]ग्-मनुष्या-ऽमराद्यासु भावदिक्षु पूर्वाद्यासु च प्रज्ञापकदिक्षु

---

टि० १. ०**पा विज्ञा**० ग च ऋते ॥ २. **व्याहृतम्** च ॥ ३. ०**म्-भो गौ**० कपुस्तकाद्विना ॥ ४. ०**क्तम्-किंनिमि**० ख ॥ ५. ०**संसट्ठो**० ख ॥ ६. ०**कृद्व्याकरणमाक**० ख ग ॥ ७. ०**मिना ष**० कआदर्शाहते ॥ ८. ०**भिधानेऽनु**० क ङ । ०**भिधविमा**० ख । ०**भिधानविमा**० ग ॥ ९. **च** ग घ च ॥ १०. ०**थातात्प**० घ ङ ॥ ११. **पूर्वाद्या दिश** ख ॥ १२. ०**या अनि**० च ॥ १३. ०**मार्थेनाऽऽत्म**० ख । ०**मार्थतयाऽऽत्म**० च ॥ १४. **लोयवादी कम्मवादी** ख ॥ १५. ०**वादीति** ख च । ०**वादी त्ति** ग घ ङ ॥ १६. ०**ग्-नरा-ऽम**० कपुस्तकेन विना ॥

अक्षणिका-ऽमूर्तादिगुणोपेतं आत्मानं[1] वेत्ति स एवम्भूतः **आत्मवादी** इति आत्मानं वदितुं शीलं अस्य इति; यः पुनः एवम्भूतं आत्मानं नाभ्युपगच्छति[2] सो अनात्मवादी नास्तिक इत्यर्थः । योऽपि सर्वव्यापिनं नित्यं क्षणिकं वा आत्मानं अभ्युपैति सोऽपि अनात्मवादी एव, यतः सर्वव्यापिनो निष्क्रियत्वाद् भवान्तरसङ्क्रान्तिः[3] न स्यात् , सर्वथा नित्यत्वेऽपि[4] "**अप्रच्युता-ऽनुत्पन्न-ऽस्थिरैकस्वभावं नित्यम्**" [ ] इति कृत्वा मरणाभावेन भवान्तरसङ्क्रान्तिरेव[5] न स्यात्, सर्वथा क्षणिकत्वेऽपि[6] निर्मूलविनाशात् सोऽहम् इत्यनेन पूर्वोत्तरानुसन्धानं न स्यात् ।

य एव चात्मवादी स एव परमार्थतो **लोकवादी**, यतो लोकयतीति लोकः प्राणिगणः, तं वदितुं शीलं अस्य इति; अनेन च **आत्माद्वैतवादि**[7]निरासेन आत्मबहुत्वं उक्तम्। यदि वा **लोकापाती**[8], लोकः- चतुर्दशरज्ज्वात्मकः प्राणिगणो वा, तत्र आपतितुं शीलं अस्य इति; अनेन च विशिष्टाकाशखण्डस्य लोकसञ्ज्ञा[9] आवेदिता । तत्र च जीवास्तिकायस्य सम्भवेन जीवानां गमना-ऽऽगमनं आवेदितं भवति ।

य एव च दिगादिगमनपरिज्ञानेन आत्मवादी लोकवादी च संवृत्तः स एव असुमान् **कर्मवादी**, कर्म ज्ञानावरणीयादि, तद् वदितुं शीलं अस्य इति । यतो हि प्राणिनो मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैः पूर्वं गत्यादियोग्यानि कर्माणि आददते पश्चात् तासु तासु विरूपरूपासु योनिषु उत्पद्यन्ते । कर्म च प्रकृति-स्थिति-अनुभाव-प्रदेशात्मकं अवसेयमिति । अनेन च [10]काल-यदृच्छा[11]-ऽऽत्म-नियतीश्वरादिवादिनो निरस्ता द्रष्टव्याः ।

तथा य एव कर्मवादी स एव **क्रियावादी**, यतः कर्म योगनिमित्तं बध्यते, योगश्च व्यापारः, स च क्रियारूपः, अतः कर्मणः कार्यभूतस्य वदनात्[12] तत्कारणभूतायाः क्रियाया अपि असौ एव परमार्थतो वादीति। क्रियायाश्च कर्मनिमित्तत्वं प्रसिद्धं **आगमे**, स चायं **आगमः—**

**"जाव णं भंते एस जीवे सया ≠समियं एयइ वेयइ चलइ [13]फंदइ कंदइ तिप्पति**

---

टि० १. ०त्मानमवैति स ग घ ङ च ॥ २. ०ति स नात्म० घ ङ॥ ३. ०न्तरे स० ङ॥ ४. ०त्वे अप्र० क ॥ ५. ०न्तिरपि न ख ॥ ६. क्षणविनाशेऽपि निर्मूलत्वात् सोऽहं० क ॥ ७. ०तनिरा० ख॥ ८. ०ती लोकयतीति लोकः च० ख । ०तीति लोकः ग ॥ ९. ०ज्ञा निवे० ख ॥ १०. काल-नियति-यदृच्छा-ईश्वरा-ऽऽत्मवादिनो ख ॥ ११. ०च्छा-नियतीश्वरा-ऽऽत्मवादिनो ग घ ङ च ॥ १२. ०त् कार० क ॥ १३. फंदइ तिप्पइ कंपइ जीवो जं जं भावं ख । फंदइ तिप्पति जीवो तं तं ग । फंदइ घट्टइ तिप्पति जीवो तं तं घ ङ च ॥

वि०टि० ≠ "समियमिति यावज्जीवम्" जै०वि०प० ॥

**जाव तं तं भावं परिणमति ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, नो[१] णं अबंधए''** [व्या०प्रज्ञ०३।४।१५२] त्ति।

एवं च कृत्वा य एव कर्मवादी स एव क्रियावादीति । अनेन च **साङ्ख्या**भिमतं आत्मनो अक्रियावादित्वं निरस्तं भवति ॥३॥

साम्प्रतं पूर्वोक्तां क्रियां आत्मपरिणतिरूपां विशिष्टकालाभिधायिना तिङ्प्रत्ययेन अभिदधद् अहंप्रत्ययसाध्यस्य आत्मनः तद्भवे एव अवधि-मनःपर्याय-केवलज्ञान-जातिस्मरणव्यतिरेकेण एव त्रिकालसंस्पर्शिना मतिज्ञानेन सद्भावावगमं दर्शयितुमाह—

[सू०] **अकरिसुं च हं काराविसुं च हं करओ यावि समणुण्णे भविस्सामि ॥४॥**

'**अकरिसुं[२] च[३] हं काराविसुं[४] च[५] हं करओ यावि[६] समणुण्णे भविस्सामि**' त्ति । इह भूत-वर्तमान-भविष्यत्कालापेक्षया कृत-कारिता-ऽनुमतिभिः नव विकल्पाः सम्भवन्ति । ते चामी—अहं अकार्षं अचीकरं अहं कुर्वन्तं अन्यं अन्वज्ञासिषमहम्, करोमि कारयामि अनुजानामि अहमिति, करिष्यामि अहं कारयिष्यामि अहं कुर्वन्तं अन्यं अनुज्ञास्यामि अहमिति । एतेषां च मध्ये आद्यन्तौ सूत्रेण एव उपात्तौ, तदुपादानात् च तन्मध्यपातिनां सर्वेषां ग्रहणम् । अस्यैव अर्थस्य आविष्करणाय द्वितीयो विकल्पः **कारावेसुं[७] चऽहमि**ति सूत्रेणैव[८] उपात्तः । एते च **च**कारद्वयोपादानाद्[९] **अपि**शब्दोपादानात् च मनो-वाक्-कायैः चिन्त्यमानाः सप्तविंशतिः[१०] भेदा भवन्ति । अयमत्र भावार्थः— **अकार्षं अहं** इति अत्र अहं इति अनेन आत्मोल्लेखिना विशिष्टक्रियापरिणतिरूप आत्मा अभिहितः । ततश्चायं भावार्थो भवति—स एवाहं[११] येन मया अस्य देहादेः पूर्वं[१२] यौवनावस्थायां इन्द्रियवशगेन विषयविषमोहितान्धचेतसा[१३] तत्तदकार्यानुष्ठानपरायणेन[१४] आनुकूल्यमनुष्ठितम्, उक्तं च—

> **''विहवावलेवनडिएहिं[१५] जाइं कीरंति जोव्वणमएण ।**
> **वयपरिणामे सरियाइं[१६] ताइं हियए खुडुक्कंति[१७]≠ ॥''** [        ]

तथा **अचीकरं अहं** इत्यनेन[१८] परो अकार्यादौ[१९] प्रवर्तमानो मया प्रवृत्तिं कारितः, तथा

---

टि० १. नो उ णं क ॥ २. ०करिंसु ख । ०करिस्सं ग घ ङ च ॥ ३-५. व हं ग घ । च अहं च ॥ ४. ०राविंसुं चाहं करओ चावि ख । ०रावेस च घ । ०रावेसं च ङ च ॥ ६. आवि ग घ ङ च ॥ ७. ०राविंसु चाहमिति ख । ०रावेसं च च । ०वेसु च घ । वेसुं चाहं ग ॥ ८. सूत्रेणोपात्तः क-खप्रती ऋते ॥ ९. द्वया-ऽपिश० ख ॥ १०. ०तिभेदा ख ग ॥ ११. ०हं मया च ॥ १२. पूर्वयौ० क घ ॥ १३. विषमोहि० ग । विषयमोहि० घ ॥ १४. ०नानुष्ठि० घ ॥ १५. ०वभरिएहिं ख ॥ १६. भरियाइं ख । वरियाइं ग ॥ १७. खुडक्कंति ख । खड्डुक्कंति ङ ॥ १८. इति परो० क ॥ १९. ०दौ प्रवृत्तमा० क । ०दौ वर्त० घ ॥

वि०टि० ≠ खुडुक्कंति = खटके छे इति गुर्जरभाषायाम् ॥

कुर्वन्तं अन्यं अनुज्ञातवान्[१] इत्येवं कृत-कारिता-ऽनुमतिभिः भूतकालाभिधानम् । तथा करोमि इत्यादिना वचनत्रिकेण वर्तमानकालोल्लेखः । तथा करिष्यामि कारयिष्यामि **कुर्वतो** अन्यान् प्रति **समनुज्ञः**[२] अनुज्ञापरायणो **भविष्यामि** इति अनागतकालोल्लेखः । अनेन च कालत्रयसंस्पर्शेन देहेन्द्रियातिरिक्तस्य आत्मनो भूत-वर्तमान-भविष्यत्कालपरिणतिरूपस्य अस्तित्वावगतिः आवेदिता भवति। सा च न एकान्त[३]क्षणिक-नित्यवादिनां सम्भवतीति अतोऽनेन ते निरस्ताः, क्रियापरिणामेन आत्मनः परिणामित्वाभ्युपगमादिति । एतदनुसारेणैव सम्भवानुमानाद् अतीता-ऽनागतयोरपि[४] कालयोः आत्मास्तित्वं अवसेयम् । यदि वा अनेन क्रियाप्रबन्धप्रतिपादनेन कर्मण उपादानभूताया[५]: क्रियायाः स्वरूपं आवेदितमिति ॥४॥

अथ किं एतावत्य एव क्रियाः उत अन्या अपि सन्ति ? इति, एतावत्य[६] एव इत्याह—

**[ सू० ] एयावंति सव्वावंति लोगंसि कम्मसमारंभा परिजाणितव्वा भवंति ॥५॥**

**एयावंती**त्यादि । **एतावन्तः सर्वे**ऽपि **लोके** प्राणिसङ्घाते **कर्मसमारम्भाः** =क्रियाविशेषा ये प्रागुक्ताः अतीता-ऽनागत-वर्तमानभेदेन कृत-कारिता-ऽनुमतिभिश्च, अशेषक्रियानुयायिना च करोतिना सर्वेषां सङ्ग्रहादिति एतावन्त एव **परिज्ञातव्या भवन्ति,** नान्य इति । परिज्ञा च ज्ञ-प्रत्याख्यानभेदाद् द्विधा । तत्र ज्ञपरिज्ञया आत्मनो बन्धस्य च अस्तित्वं एतावद्भिरेव सर्वैः कर्मसमारम्भैः ज्ञातं भवति । प्रत्याख्यानपरिज्ञया च सर्वे पापोपादानहेतवः कर्मसमारम्भाः प्रत्याख्यातव्या इति ॥५॥

इयता सामान्येन जीवास्तित्वं प्रसाधितम् । अधुना तस्य एव आत्मनो दिगादि-भ्रमण[७]हेतूपप्रदर्शनपुरस्सरं अपायान् प्रदर्शितुमाह । यदि वा यः तावद् आत्म-कर्मादिवादी स दिगा[८]दिभ्रमणात् मोक्ष्यते, इतरस्य तु विपाकान्[९] दर्शयितुमाह—

**[ सू० ] अपरिण्णायकम्मे खलु अयं पुरिसे जो इमाओ दिसाओ वा अणुदिसाओ वा अणुसंचरति सव्वाओ दिसाओ सव्वाओ अणुदिसाओ सहेति, अणेगरूवाओ जोणीओ संधेति, विरूवरूवे फासे पडिसंवेदयति ॥६॥**

**अपरिन्नाय०**[१०] इत्यादि । **यो**[११] **अयं** पुरि शयनात् पूर्णः सुख-दुःखानां वा=**पुरुषः**

---

टि० १. ०निति भू( कृ )त० क ॥ २. समनुज्ञापरा० क ग ङ । समनुज्ञानपरा० ख ॥ ३. ०न्तनित्यक्षणिकवा० ख ॥ ४. ०पि भवयो० ख विना ॥ ५. ०याः सम्प्रदानमावे० च ॥ ६. एता एवे० ङ ॥ ७. ०मणे हे० च ॥ ८. ०गादिपरिभ्र० ग च ॥ ९. ०न् प्रदर्श० ख घ ङ ॥ १०. ०न्नायए इत्या० ख । ०न्नाएत्या० च ॥ ११. सोऽयं क ख ॥

जन्तुः मनुष्यो वा, प्राधान्यात् च पुरुषस्य उपादानम्, उपलक्षणं[१] चैतत्, सर्वोऽपि चतुर्गत्यापन्नः प्राणी गृह्यते, **दिशो अनुदिशो वा अनुसञ्चरति, सेः अपरिज्ञातकर्मा** अपरिज्ञातं कर्म्म अनेन इति **अपरिज्ञातकर्मा, खलुः** अवधारणे, अपरिज्ञातकर्मैव दिगादौ भ्राम्यति, नेतर इति । उपलक्षणं चैतत्, अपरिज्ञातात्मा अपरिज्ञातक्रियश्च इति । यश्च अपरिज्ञातकर्मा स **सर्वा दिशः सर्वाः** च **अनुदिशः सहैति**[२]=स्वयंकृतेन कर्मणा सह अनुसञ्चरति, **सर्व**ग्रहणं सर्वासां प्रज्ञापकदिशां भावदिशां च उपसङ्ग्रहार्थम् ।

स यदाप्नोति तद् दर्शयति—

**अणेगरूवाओ**[३] **जोणीओ संधेइ** त्ति । **अनेकं** सङ्कट-विकटादिकं **रूपं** यासां ताः तथा, यौति=मिश्रीभवति औदारिकादिशरीरवर्गणापुद्गलैः असुमान् यासु ता योनयः प्राणिनां उत्पत्तिस्थानानि। अनेकरूपत्वं[४] च आसां संवृत-विवृतोभय-शीतोष्णोभयरूपतया । यदि वा चतुरशीतियोनिलक्षभेदेन[५], ते चामी चतुरशीतिलक्षाः[६]—

**"[*]पुढवि जल जलण मारुय एक्केक्के सत्त**[७] **जोणिलक्खाओ ।**
**वण पत्तेय अणंते दस चोद्दस जोणिलक्खा उ ॥**
**विगिलिंदिएसु दो दो चउरो चउरो य णारय-सुरेसु ।**
**तिरिएसु होंति चउरो चोद्दस लक्खा य मणुएसु ॥"** [बृहत्सं० ३५१-३५२]

तथा शुभा-ऽशुभभेदेन योनीनामनेकरूपत्वं[८] गाथाभिः प्रदर्श्यते—

**"सीयादी जोणीओ चउरासीती य सयसहस्सेहिं**[९] **।**
**असुहाओ य सुहाओ तत्थ सुहाओ इमा जाण**[१०] **॥**
**अस्संखाउमणुस्सा राईसर संखमादियाऊणं**[११] **।**
**तित्थयरनामगोयं सव्वसुहं होइ नायव्वं ॥**

**तत्थ वि य जातिसंपन्नयादि सेसा उ होंति असुहाओ ।**
**देवेसु किब्बिसादी सेसाओ होंति उ**[१२] **सुहाओ ॥**
**पंचिंदियतिरिएसुं हय-गयरयणा**[१३] **हवंति उ**[१४] **सुहाओ ।**
**सेसाओ असुहाओ**[१५] **हवंति एगिंदियादीया ॥**

---

टि० १. **सोऽपरिज्ञातं क०** ख॥ २ **सहेति** घ-ङआदर्शा ऋते ॥ ३. **०रूयाओ** क ॥ ४. **०कस्वरू०** ङ ॥ ५. **०तिलक्ष०** घ ङ ॥ ६. **०तिर्लक्षाः** ग ॥ ७. **सत्त सत्तलक्खा** उ ख विना । ८. **०कत्वं गा०** ख ॥ ९. **०हस्साइं** ग ॥ १०. **जाणे** घ । **जाणो** च ॥ ११. **०दिआऊणं** ग घ ङ । **०दिआयूणं** च ॥ १२-१४ **य** ग ॥ १३. **०रयणे** ग ङ ॥ १५. **०ओ सुभवन्नेगिं०** कआदर्शाद् विना ॥

**वि०टि०** * 'पुढवि-दग-अगणि-मारुय एक्केक्के सत्त जोणिलक्खओ' इति बृहत्सङ्ग्रहण्यौ पूर्वार्धम् ॥

**देविंद-चक्कवट्टित्तणाइं मोत्तुं[1] च तित्थयरभावं ।**
**अणगारभाविया[2] वि य सेसा उ[3] अणंतसो पत्ता ॥ [        ]**

एताश्च अनेकरूपा योनीः दिगादिषु पर्यटन् अपरिज्ञातकर्मा असुमान् **संधेई** त्ति सन्धयति[4] सन्धिं करोति आत्मना सह अविच्छेदेन सङ्घटयतीत्यर्थः[5] । **संधावइ** त्ति वा पाठान्तरम्[6], संधावति=पौनःपुन्येन ता[7] गच्छतीत्यर्थः ।

तत्सन्धाने[8] च यदनुभवति तद् दर्शयति—

**विरूपं** बीभत्सं अमनोज्ञं **रूवं** स्वरूपं येषां स्पर्शानां दुःखोपनिपातानां ते तथा[9], स्पर्शाश्रिता दुःखोपनिपाताः **स्पर्शा** इत्युक्ताः, "तात्स्थ्यात् तद्व्यपदेशः" इति कृत्वा, उपलक्षणं चैतद् मानस्योऽपि वेदना ग्राह्याः । अतस्तान् एवम्भूतान् **स्पर्शान् प्रतिसंवेदयति** =अनुभवति । **प्रति**ग्रहणात् प्रत्येकं शारीरान् मानसान् च दुःखोपनिपातान् अनुभवति इत्युक्तं भवति । **स्पर्श**ग्रहणं चेह सर्वसंसारान्तर्वर्तिजीवराशिसङ्ग्रहार्थम्, स्पर्शनेन्द्रियस्य सर्वजीवव्यापित्वात् । अत्र[10] इदमपि वक्तव्यम्— सर्वान् विरूपरूपान् रस-गन्ध-रूप-शब्दान् प्रतिसंवेदयतीति । विरूपरूपत्वं च स्पर्शानां कार्यभूतानां विचित्रकर्मोदयात् कारणभूताद् भवतीति वेदितव्यम्, विचित्रकर्मोदयात् च अपरिज्ञातकर्मा संसारी स्पर्शादीन् विरूपरूपान् तेषु तेषु योन्यन्तरेषु विपाकतः परिसंवेदयति[11], आह च—

**"तैः कर्मभिः स जीवो विवशः संसारचक्रमुपयाति ।**
**द्रव्य-क्षेत्रा-ऽद्धा-भावभिन्नमावर्तते बहुशः ॥**

**नरकेषु देवयोनिषु तिर्यग्योनिषु च मनुजयोनिषु च ।**
**पर्यटति घटीयन्त्रवदात्मा बिभ्रच्छरीराणि ॥**

**सततानुबद्धमुक्तं[12] दुःखं नरकेषु तीव्रपरिणामम् ।**
**तिर्यक्षु भय-क्षुत्-तृड्-वधादिदुःखं सुखं चाल्पम् ॥**

**सुख-दुःखे मनुजानां मनः-शरीराश्रये बहुविकल्पे ।**
**सुखमेव हि देवानां दुःखं स्वल्पं च[13] मनसि भवम् ॥**

**कर्मानुभावदुःखित एवं मोहान्धकारगहनवति ।**
**अन्ध इव दुर्गमार्गे भ्रमति हि संसारकान्तारे ॥**

---

टि० १. मुत्तूण तित्थ० घ च ॥ २. **०या इ य मोत्तूणमणं०** क ॥ ३. य घ च॥ ४. **०यते** ख ॥ ५. **सङ्घट्टय०** ग ॥ ६. **०म् पौनः०** क ख ॥ ७. **तां** क । **वा** घ ङ ॥ ८. **०न्धानेन च** ख घ ङ ॥ ९. **०था दुःखो०** ग ॥ १०. **अत्रैतदपि** ग॥ ११. **०यतीति आह** घ ङ च ॥ १२. **०बन्धमु०** च ॥ १३. तु ख घ ङ ॥

दुःखप्रतिक्रियार्थं सुखाभिलाषा[१]च्च पुनरपि तु जीवः ।
[२]प्राणिवधादीन् दोषानधितिष्ठति मोह[३]सम्पन्नः ॥

बध्नाति ततो बहुविधमन्यत् पुनरपि नवं सुबहु कर्म ।
तेनाथ पच्यते पुनरग्नेरग्नि प्रविश्येव ॥

एवं कर्माणि पुनः पुनः स बध्नंस्तथैव मुञ्चंश्च ।
सुखकामो बहुदुःखं संसारमनादिकं भ्रमति ॥

एवं भ्रमतः संसारसागरे दुर्लभं मनुष्यत्वम् ।
संसार[४]महत्त्वा-ऽधार्मिकत्व-दुष्कर्म[५]बाहुल्यैः ॥

आर्यो देशः कुल-रूप-संपदा-ऽऽयुश्च दीर्घमारोग्यम् ।
यतिसंसर्गः श्रद्धा धर्मश्रवणं च मतितैक्ष्ण्यम् ॥ [  ]

एतानि दुर्लभानि प्राप्तवतोऽपि दृढ[६]मोहनीयस्य ।
कुपथाकुलेऽर्हदुक्तोऽतिदुर्लभो जगति सन्मार्गः ॥" [  ]

यदि वा यो अयं पुरुषः सर्वा दिशा अनुदिशश्च अनुसञ्चरति तथा अनेकरूपा योनीः सन्धावति विरूपरूपांश्च स्पर्शान् [७]प्रतिसंवेदयति सः **अविज्ञातकर्मा** अविज्ञातं=अविदितं कर्म=क्रिया व्यापारो मनो-वाक्-कायलक्षणः अकार्षमहं करोमि करिष्यामीति एवंरूपो जीवोपमर्दात्मकत्वेन बन्धहेतुः सावद्यो येन सो अयं अविज्ञातकर्मा । अविज्ञातकर्मत्वेन च तत्र तत्र कर्मणि जीवोपमर्दादिके प्रवर्तते येन येन अस्य अष्टविधकर्मबन्धो भवति, तदुदयात् च अनेकरूपयोन्यनुसन्धानं विरूपरूपस्पर्शानुभवश्च भवतीति ॥६॥

यद्येवं ततः किम् ? इत्यत आह—

**[ सू० ]  तत्थ खलु भगवता परिण्णा पवेदिता ।**

**तत्थे**त्यादि । **तत्र** कर्मणि व्यापार अकार्षमहं करोमि करिष्यामि इ[८]त्यादि आत्मपरिणतिस्वभावतया मनो-वाक्-कायव्यापाररूपे, **भगवता वीरवर्धमानस्वामि**ना, परिज्ञानं=**परिज्ञा**, सा प्रकर्षेण प्रशस्ता आदौ वा वेदिता=**प्रवेदिता** । एतच्च **सुधर्मस्वामी** [९]**जम्बूस्वामि**नाम्ने कथयति । सा च द्विधा— ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च । तत्र ज्ञपरिज्ञया 'सावद्यव्यापारेण बन्धो भवति' इत्येवं भगवता परिज्ञा प्रवेदिता प्रत्याख्यानपरिज्ञया च 'सावद्ययोगा बन्धहेतवः प्रत्याख्ये[१०]या एवंरूपा च' इति ।

---

**टि०** १. ०**षाय पु०** ख॥ २. **प्राणव०** क-गपुस्तके ऋते ॥ ३. ०**सञ्छन्नः** कप्रत्या विना ॥ ४. ०**रबहुत्वा०** ख ॥ ५. ०**बाहल्यैः** घ ॥ ६. ०**ति तन्मा०** ख ॥ ७. **प्रतिवे०** ख ॥ ८. ०**त्यात्म०** ग ङ ॥ ९. **जम्बूनाम्ने** कपुस्तकं विना ॥ १०. ०**य इत्येवं** कप्रतिमृते ॥

अमुमेवार्थं **निर्युक्तिकृद्** आह–

[नि०] **तत्थ अकारि करिस्सं ति बंधचिंता कया पुणो होइ ।**
**सहसम्मुइया[1] जाणइ कोई पुण हेउजुत्तीए ।।६७।।** दारं ।।

**तत्थे**त्यादि । **तत्र** कर्मणि क्रियाविशेषे, किम्भूत इत्याह– **अकारि करिस्सं** ति । **अकारि** इति कृतवान्, **करिस्सं** ति करिष्यामीति । अनेन अतीता-ऽनागतोपादानेन तन्मध्यवर्तिनो वर्तमानस्य कारिता-ऽनुमत्योः च उपसङ्ग्रहाद् नवापि भेदा आत्म-परिणामत्वेन योगरूपा उपात्ता द्रष्टव्याः । तत्र अनेन आत्मपरिणामरूपेण क्रियाविशेषेण **बन्धचिन्ता कृता भवति**=बन्धस्य उपादानं उपात्तं भवति, "**कर्म योगनिमित्तं बध्यते**" [ ] इति वचनात् । एतच्च **कश्चित् जानाति** आत्मना **सह** या **सन्मतिः स्वमतिः** वा अवधि-मनःपर्याय-केवल-जातिस्मरणरूपा, तया जानाति कश्चित् च पक्ष[2]-धर्मा-ऽन्वय-व्यतिरेकलक्षणया **हेतुयुक्त्या** इति ।।६७।।

अथ किमर्थमसौ कटुकविपाकेषु कर्माश्रव[3]हेतुभूतेषु क्रियाविशेषेषु प्रवर्तते ? इत्याह–

**इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्ख-पडिघातहेतुं ।।७।।**

**इमस्से**त्यादि । तत्र **जीवितमि**ति जीव[4]न्ति अनेन आयुःकर्मणा इति **जीवितं** प्राणधारणम् । एतच्च प्रतिप्राणिस्वसंविदितमिति कृत्वा प्रत्यक्षासन्नवाचिना इदमा[5] निर्दिशति । **च**शब्दो वक्ष्यमाणजात्यादिसमुच्चयार्थः, **एव**कारोऽवधारणे, **अस्यैव जीवित[6]स्य** अर्थे परिफल्गुसारस्य तडिल्लताविलसितचञ्चलस्य बह्वपायस्य दीर्घसुखार्थं क्रियासु प्रवर्तते, तथा हि–'जीविष्यामि अहं अरोगः, सुखेन भोगान् भोक्ष्ये'; ततो व्याध्यपनयनार्थं स्नेहपान-लावकपिशितभक्षणादिषु क्रियासु प्रवर्तते तथा अल्प[7]सुखकृते अभि[8]मानग्रहाकुलितचेता बह्वारम्भपरिग्रहाद् बह्व[9]शुभं कर्म्म आदत्ते, उक्तं च–

"**द्वे वाससी प्रवरयोषिदपायशुद्धा, शय्याऽऽसनं करिवरस्तुरगो रथो वा ।**
**काले भिषग् नियमिताशन-पान[10]वृत्तिः, राज्ञः पराक्यमिव सर्वमवैहि शेषम् ।।**
**तुष्ट्यर्थमन्नमिह यत् प्रणिधिप्र[11]योग-सन्त्रासदोषकलुषो नृपतिस्तु भुङ्क्ते ।**
**यद् निर्भयः प्रशमसौख्य[12]रतिश्च भैक्ष्यम्, तत्स्वादुतां भृशमुपैति न पार्थिवान्नम्।।**

---

टि० १. ०सम्मइया ठ । ०सम्मुयया झ ।। २. पक्षद्वयधर्मा० ग ।। ३. ०वभूते० घ च ।। ४. ०वत्यने० च ।। ५. ०मा दिशति च ।। ६ ०तव्यस्या० क ।। ७. ०ल्पस्य सुखस्य कृ० ख घ ङ । ०ल्पसुखस्य कृ० ग ।। ८. ०मानाग्र० क ।। ९. ०शुभक० ख ।। १०. ०पानमात्रा । रा० ग घ ङ । ०पानवृत्तिं । रा० च ।। ११. ०योगैः स० ग ।। १२. ०रतश्च ग ।।

**भृत्येषु मन्त्रिषु सुतेषु मनोरमेषु, कान्तासु वा मधुमदाङ्कुरितेक्षणासु ।**
**विश्रम्भमेति न कदाचिदपि क्षितीशः, सर्वाभिशङ्कितमतेः कतरत् तु सौख्यम् ?''** ॥
[ ]

तदेवं[1] अनवबुद्धतरुणकिशलयपलाशचञ्चलजीवितरतयः कर्माश्रवेषु जीवितोपमर्दादिरूपेषु प्रवर्तन्ते । तथा[2] अस्यैव जीवितस्य **परिवन्दन-मानन-पूजनार्थं** हिंसादिषु प्रवर्तन्ते । तत्र **परिवन्दनं**=संस्तवः प्रशंसा, तदर्थं आचेष्टते, तथा हि—'अहं मयूरादिपिशिताशनाद् बली तेजसा देदीप्यमानो देवकुमार इव[3] लोकानां प्रशंसास्पदं भविष्यामी'ति[4] । **माननम्**- अभ्युत्थाना-ऽऽसनदाना-ऽञ्जलिप्रग्रहादिरूपम्, तदर्थं च आचेष्टमानः कर्म्म आचिनोति । तथा **पूजनं**[5] द्रविण-वस्त्रा-ऽन्न-पान-सत्कार-प्रणामसेवाविशेषरूपम्, तदर्थं च प्रवर्तमानः क्रियासु कर्माश्रवैः आत्मानं सम्भावयति, तथा हि—"वीरभोग्या वसुन्धरा" इति मत्वा पराक्रमते, दण्डभयात् च सर्वाः प्रजा बिभ्यतीति दण्डयति इत्येवं राज्ञाम्, अन्येषामपि यथासम्भवं आयोजनीयम् । अत्र च वन्दनादीनां [6]द्वन्द्वसमासं कृत्वा तादर्थ्ये चतुर्थी विधेया । परिवन्दन-मानन-पूजनाय जीवितस्य कर्माश्रवेषु[7] [8]प्रवर्तन्त इति समुदायार्थः ।

न केवलं परिवन्दनाद्यर्थमेव कर्म्म आदत्ते, अन्यार्थमपि आदत्त इति दर्शयति—जातिश्च मरणं च मोचनं च=**जाति-मरण-मोचनमि**ति समाहारद्वन्द्वात् तादर्थ्ये चतुर्थी, एतदर्थं च[9] क्रियासु प्रवर्तमानाः प्राणिनः कर्म्म आददते । तत्र[10] जात्यर्थं ≠**क्रौञ्चारि**[11]वन्दनादिकाः क्रिया विधत्ते, तथा यान् यान् कामान् [12]ब्राह्मणादिभ्यो ददाति तान् तान् अन्यजन्मनि पुनः जातो भोक्ष्यते, तथा **मनुना** अप्युक्तम्—

''**वारिदस्तृप्तिमाप्नोति, सुखमक्षय्यमन्नदः ।**
**तिलप्रदः प्रजामिष्टामायुष्कमभयप्रदः**⊕ ॥'' [**मनुस्मृ०४।२२९**]

अत्र च एकमेव सुभाषितं **अभयप्रदानमि**ति तुषमध्ये कणिकावदिति । एवमादि-कुमार्गोपदेशाद् हिंसादौ प्रवृत्तिं विदधाति । तथा मरणार्थमपि[13] पितृपिण्डदानादि[14]षु क्रियासु प्रवर्तते, यदि वा मम अनेन सम्बन्धी व्यापादितः तस्य वैरनिर्यातनार्थं वध-बन्धादौ प्रवर्तते,

**टि०** १. **०मनुबद्धत०** क ॥ २. **०तथास्यापि जी०** ख ॥ ३. **इव प्रशंसास्पदं लोकानां भवि०** ख ॥ ४. **०ति । तथा मान०** ख ॥ ५. **०नं पूजा द्रवि०** ख ॥ ६. **द्वन्द्वं स०** ख ॥ ७. **०षु वर्त०** क ॥ ८. **वर्तत** ग ङ विना ॥ ९. **च प्राणिनः क्रियासु प्रवर्तमानाः कर्मा०** कप्रत्या विना ॥ १०. **तत्र** इति नास्ति खपुस्तके ॥ ११. **०ञ्चादिव०** ग ॥ १२. **ब्राह्मणेभ्यो** च ॥ १३. **०पि पिण्ड०** ख ॥ १४. **०दिक्रिया०** ङ ॥

**वि०टि०** ≠ स्वामिकार्त्तिकः ॥ ⊕ '**आयुष्कमभयप्रदः**' **इति** पादः अधुना **मनुस्मृतौ** २३२तमगाथायां उपलभ्यते, न तु २२९तमगाथायाम् ॥

यदि वा मरणनिवृत्त्यर्थं आत्मनो **दुर्गाद्युपयाचितं** अजादिना[१] विधत्ते **यशोधर**卐 इव पिष्टमयकुक्कुटेन। तथा मोक्षाय[२] अज्ञानावृतचेतसः पञ्चाग्नितपो अनुष्ठानादिषु प्राण्युपमर्दकारिषु प्रवर्तमानाः कर्म्म आददते, यदि वा जाति-मरणयोः विमोचनाय[३] हिंसादिकाः क्रियाः कुर्वन्ति[४]।

**जाइ-मरण-भोयणाए**[५] त्ति वा पाठान्तरम्। तत्र **भोजनार्थं** कृष्यादिकर्मसु प्रवर्तमाना वसुधा-जल-ज्वलन-पवन-वनस्पति-द्वि-त्रि-चतुः-पञ्चेन्द्रियव्यापत्तये व्याप्रियन्त इति।

तथा **दुःखप्रतिघातं** उररीकृत्य आत्मपरित्राणार्थं आरम्भं आसेवन्ते, तथा हि— व्याधिवेदनार्ता लावकपिशित-मदिरादि आसेवन्ते, तथा वनस्पतिमूल-त्वक्-पत्र-निर्यासादिसिद्धΦशतपाकादितैलार्थं अग्न्यादिसमारम्भेण पापं कुर्वन्ति[६] स्वतः, कारयन्ति अन्यैः, कुर्वतो अन्यान् समनुजानत इति एवं अतीता-ऽनागतकालयोरपि मनो-वाक्-काययोगैः[७] कर्मादानं विदधतीति आयोजनीयम्। तथा दुःखप्रतिघातार्थमेव सुखोत्पत्त्यर्थं च कलत्र-पुत्र-गृहोपस्करादि[८] आददते, तल्लाभ-पालनार्थं च तासु तासु क्रियासु प्रवर्तमानाः पापकर्म्म आसेवन्ते इति, उक्तं च—

"**आदौ प्रतिष्ठाऽधिगमे प्रयासो दारेषु पश्चाद् गृहिणः सुतेषु।**
**कर्तुं पुनस्तेषु गुणप्रकर्षं चेष्टा तदुच्चैःपदलङ्घनाय॥**" [ ]

तदेवम्भूतैः क्रियाविशेषैः कर्म्म उपादाय नानादिक्षु अनुसञ्चरन्ति, अनेकरूपासु च योनिषु सन्धावन्ति, विरूपरूपांश्च स्पर्शान्[९] प्रतिसंवेदयन्ति[१०] इत्येतद् क्रियाविशेषनिवृत्तिः विधेया॥७॥ एतावन्त एव[११] क्रियाविशेषा इति दर्शयितुमाह—

**[सू० ] एतावंति सव्वावंति लोगंसि कम्मसमारंभा परिजाणियव्वा भवंति॥८॥**

**एतावंतीत्यादि**[१२]। **एयावंती सव्वावंती** इति एतौ शब्दौ **मागधदेशीभाषाप्रसिद्ध्या**[१३] **एतावन्तः सर्वे**ऽपि इति एतत्पर्यायौ। एतावन्त एव सर्वस्मिन् **लोके**=धर्मा-ऽधर्मास्तिकायावच्छिन्ने नभःखण्डे, ये पूर्वं प्रतिपादिताः **कर्मसमारम्भाः**=क्रियाविशेषाः, न एतेभ्योऽधिकाः केचन सन्तीति एवं **परिज्ञातव्या भवन्ति**, सर्वेषां पूर्वत्रोपादानादिति भावः। तथा हि— आत्म-परोभयैहिका-ऽऽमुष्मिका-ऽतीता-ऽनागत-वर्तमानकाल-कृत-कारिता-

---

टि० १. ०ना **बलिं वि०** क-खप्रतिभ्यामृते॥ २. **मोक्षार्थमज्ञा०** ख। **मुक्त्यर्थमज्ञा०** ग घ ङ च॥ ३. ०**ना हिं०** ख॥ ४. **कुर्वते** कप्रतेर्विना॥ ५. **०ए इति वा** ख॥ ६. **कुर्वते** ख॥ ७. **०कायैः कर्मा०** क॥ ८. **०पस्कारा०** ग ङ॥ ९. **०न् संवे०** क॥ १०. **०न्ति। एवं ज्ञात्वा** ख॥ ११. **एव च क्रि०** ख-घप्रतिभ्यामृते॥ १२. **एयावंती सव्वावंतीत्यादि एतौ** क॥ १३. **०सिद्धौ ए०** ग॥

**वि०टि०** 卐 "**यशोधर इव** इति समरादित्यकथायां यशोधरो राजा" जै०वि०प०॥ Φ "**सिद्ध** इति सिद्धार्थं कृतम्" जै०वि०प०॥

ऽनुमतिभिः आरम्भाः क्रियन्ते, [1]ते च सर्वेऽपि प्रागुपात्ता यथासम्भवं आयोज्या इति ॥८॥

एवं सामान्येन जीवास्तित्वं प्रसाध्य तदुपमर्दकारिणां च क्रियाविशेषा[2]णां बन्धहेतुत्वं प्रदर्श्य उपसंहारद्वारेण विरतिं प्रतिपादयन्नाह–

**[सू०] जस्सेते लोगंसि कम्मसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ॥९॥**

**जस्से**त्यादि । भगवान् समस्तवस्तुवेदी केवलज्ञानेन साक्षाद् उपलभ्य एवमाह– **यस्य** मुमुक्षोः, **एते** पूर्वोक्ताः, [3]**कर्मसमारम्भाः**=क्रियाविशेषाः, **कर्मणो** वा ज्ञाना[4]वरणीयाद्यष्टप्रकारस्य **समारम्भाः**=उपादानहेतवः, ते च क्रियाविशेषा एव, **परिः** समन्ताद्, **ज्ञाताः**=परिच्छिन्नाः कर्मबन्धहेतुत्वेन **भवन्ति**, **हुः** अवधारणे, मनुते मन्यते वा जगतः त्रिकालावस्थां इति **मुनिः**, **स** एव मुनिः ज्ञपरिज्ञया **परिज्ञातकर्मा** प्रत्याख्यानपरिज्ञया च प्रत्याख्यातकर्मबन्धहेतुभू[5]तसमस्तमनो-वाक्-कायव्यापार इति ।

अनेन च मोक्षाङ्गभूते ज्ञान-क्रिये उपात्ते भवतः, न हि आभ्यां विना मोक्षो भवति, यत उक्तम्–"≠ज्ञान-क्रियाभ्यां मोक्षः" इति । **इति**शब्दः एतावान् अयं आत्मपदार्थविचारः [6]कर्मबन्धहेतुविचारश्च सकलोद्देशकेन परिसमापित [7]इति प्रदर्शकः । यदि वा **इति** एतद् अहं **ब्रवी[8]मि** यत् प्रागुक्तं यच्च वक्ष्ये तत् सर्वं भगवदन्तिके साक्षात् श्रुत्वा इति ॥९॥

॥ [9]प्रथमोद्देशकः [10]समाप्तः ॥

---

**टि०** १. ते सर्वे ख ॥ २. ०णां **कर्मबन्ध०** ख ॥ ३. **कर्मारम्भाः** क ॥ ४. **०नाद्यावर०** घ च ॥ ५. **०तमनो०** क ॥ ६. **कर्मसम्बन्ध०** ख ॥ ७. इति । यदि ख ॥ ८. **०मि इति यत्** क । **०मि यच्च प्रा०** घ ॥ ९. **शस्त्रपरिज्ञायां प्रथमोद्देशकः समाप्त इति** घ च । ..**०शक उक्तः** ॥ ग ङ ॥ १०. **समाप्त** इति कपुस्तके नास्ति ॥

**वि०टि०** ≠ तुलना -**नाण-किरियाहिं मोक्खो** [ विशेषाव०भा०३ ] ॥

## ॥ द्वितीयः पृथिव्युद्देशकः ॥

उक्तः प्रथमोद्देशकः । साम्प्रतं द्वितीयः प्रस्तूयते । अस्य[1] च अयं अभिसम्बन्धः– प्रथमोद्देशके सामान्येन जीवास्तित्वं प्रसाधितम्; इदानीं तस्य एव एकेन्द्रियादिपृथिव्याद्यस्तित्वप्रतिपिपादयिषया आह । यदि वा प्राक् परिज्ञातकर्मत्वं मुनित्वकारणं उपादेशि, यः पुनः अपरिज्ञातकर्मत्वाद् मुनिः न भवति विरतिं न प्रतिपद्यते स पृथिव्यादिषु बम्भ्रमीति । अथ क एते पृथिव्यादयः ? इत्यतः तद्विशेषास्तित्वज्ञापनार्थं इदं उपक्रम्यत इति। अनेन[2] सम्बन्धेन आयातस्य अस्य उद्देशकस्य चत्वारि अनुयोगद्वाराणि[3] वाच्यानि यावत् नामनिष्पन्ने निक्षेपे **पृथिव्युद्देशक** इति । तत्र उद्देशकस्य निक्षेपादिः[4] अन्यत्र प्रतिपादितत्वाद् नेह प्रदर्श्यते । पृथिव्याः तु यद् निक्षेपादि सम्भवति तद् **निर्युक्तिकृद्** दर्शयितुमाह–

[नि०] **पुढवीए निक्खेवो परूवणा लक्खणं परीमाणं ।**
**उवभोगो सत्थं वेयणा य वहणा णिवित्ती[5] य ॥६८॥**

**पुढवीए[6]** इत्यादि । प्राग् जीवोद्देशके जीवस्य प्ररूपणा किं न कृता ? इति, एतच्च न आशङ्कनीयम्, यतो जीवसामान्यस्य विशेषाधारत्वात्, विशेषस्य च पृथिव्यादिरूपत्वात् सामान्यजीवस्य च उपभोगादेः असम्भवात् पृथिव्यादिचर्चयैव तस्य[7] चिन्तितत्वादिति ।

तत्र **पृथिव्या** नामादि**निक्षेपो** वक्तव्यः । **प्ररूपणा** सूक्ष्म-बादरादिभेदा । **लक्षणं** साकारा-ऽनाकारोपयोग-काययोगादिकम् । **परिमाणं** संवर्तितलोकप्रतरासङ्ख्येयभागमात्रादिकम् । **उपभोगः** शयना-ऽऽसन-चङ्क्रमणादिकः । **शस्त्रं** स्नेहा-ऽम्ल-क्षारादि । **वेदना** स्वशरीराव्यक्तचेतनानुरूपा सुख-दुःखानुभवस्वभावा । **वधः** कृत-कारिता-ऽनुमतिभिः उपमर्दनादिकः । **निवृत्तिः** अप्रमत्तस्य मनो-वाक्-कायगुप्त्या अनुपमर्दादिका इति समासार्थः ॥६८॥

व्यासार्थं तु **निर्युक्तिकृद्** यथाक्रममाह–

[नि०] **णामं ठवणा पुढवी य[8] दव्वपुढवी य भावपुढवी य ।**
**एसो खलु पुढवीए निक्खेवो चउव्विहो होइ ॥६९॥**

---

टि० १. **तस्य** कप्रतिमृते ॥ २. **अनेनाभिसम्ब०** क-खप्रती ऋते ॥ ३. **०णि भवन्ति या०** क ॥ ४. **०पादेरन्य०** खपुस्तकं विना ॥ ५. **णियत्ती** ज ॥ ६. **०वीओ इ०** ख । **०वीएत्यादि** ङ च ॥ ७. **०स्य चर्चितत्वा०** ख ॥ ८. छआदर्शं विना सर्वास्वपि प्रतिषु **य** इति नास्ति ॥

**नाममि**त्यादि । स्पष्टा ॥६९॥ नाम-स्थापने क्षुण्णत्वाद् अनादृत्य आह—

[नि०]　　**दव्वं सरीरभविओ भावेण य होइ पुढविजीवो उ[1] ।**
**जो पुढविनामगोयं कम्मं वेतेति सो जीवो ॥७०॥ दारं ॥**

**दव्वमि**त्यादि । तत्र द्रव्यपृथिवी आगमतो नोआगमतश्च[2] । तत्र चागमतो ज्ञाता अनुपयुक्तः, नोआगमतस्तु पृथिवीपदार्थज्ञस्य शरीरं जीवाऽपेतम्, तथा पृथिवीपदार्थज्ञत्वेन भव्यः बालादिः, ताभ्यां विनिर्मुक्तो[3] द्रव्यपृथिवीजीवः एकभविको बद्धायुष्को अभिमुखनामगोत्रश्च । भावपृथिवीजीवः पुनः **यः पृथिवीनामादिकर्म्म[4]** उदीर्णं **वेदयति** ॥७०॥

गतं निक्षेपद्वारम् । साम्प्रतं प्ररूपणाद्वारम्—

[नि०]　　**दुविहा य[5] पुढविजीवा सुहुमा तह बायरा य लोगम्मि ।**
**सुहुमा य सव्वलोए दो चेव य बायरविहाणा ॥७१॥**

**दुविहे**त्यादि । **पृथिवीजीवा द्विविधाः—सूक्ष्मा बादराश्च** । सूक्ष्मनामकर्मोदयात् सूक्ष्माः, बादरनामकर्मोदयात् तु बादराः । कर्मोदयजनिते एवैषां सूक्ष्म-बादरत्वे, न तु आपेक्षिके बदरा-ऽऽमलकयोरिव । तत्र **सूक्ष्माः** समुद्गक[6]पर्याप्तप्रक्षिप्तगन्धावयववत् सर्वलोकव्यापिनः । बादरास्तु मूलभेदाद् द्विधा इति ॥७१॥ आह—

[नि०]　　**दुविहा बायरपुढवी समासओ सण्हपुढवि खरपुढवी ।**
**सण्हा य पंचवण्णा[7] खरा य छत्तीसइविहाणा ॥७२॥**

**दुविहा** इत्यादि । **समासतः**=सङ्क्षेपाद् **द्विविधा बादरपृथिवी**—श्लक्ष्णबादरपृथिवी खरबादरपृथिवी च । तत्र श्लक्ष्णबादरपृथिवी कृष्ण-नील-लोहित-पीत-शुक्लभेदात् पञ्चधा[≠] । इह च गुणभेदाद् गुणिभेदो अभ्युपगन्तव्यः । खरबादरपृथिव्याः तु अन्येऽपि

---

टि० १. **य** क । २. **०श्च । आगमतो ज्ञाता तत्रनुप०** खङ्घते ॥ ३. **वियुक्तो** च ॥ ४. **०र्मोदयं वे०** क-खपुस्तके विना ॥ ५. उ ठ ॥ ६. **०कपर्याप्तिप्र०** ख च । **०कप्रक्षि०** ग घ ॥ ७. **०ण्णा अवरा छत्ती०** ठ ॥

**वि०टि०.** ≠ श्रीमति **प्रज्ञापनोपाङ्गे** श्लक्ष्णबादरपृथिवीकायिकाः सप्तप्रकारा निरूपिताः, तद्यथा—"से किं तं सण्हबायरपुढविकाइया ? सण्हबायरपुढविकाइया सत्तविहा पन्नत्ता, तं जहा—किण्हमत्तिया १ नीलमत्तिया २ लोहियमत्तिया ३ हालिद्दमत्तिया ४ सुक्किलमत्तिया ५ पंडुमत्तिया ६ पणगमत्तिया ७ ॥ से त्तं सण्हबादरपुढविकाइया ॥" (प्रज्ञा० प० २६ सू० १४) । तथो**त्तराध्ययने**ष्वपि सप्तैव प्रकाराः समाख्याताः, तद्यथा—"सण्हा सत्तविहा तहिं ॥७१॥ किण्हा नीला य रुहिरा य, हालिद्दा सुक्किला तहा पंडु-पणगमट्टिया....॥७२॥ षट्त्रिंशत्तमे **जीवाजीवविभक्त्य**भिधानेऽध्ययने च ॥

*षट्त्रिंशद्विशेषभेदाः सम्भवन्तीति ॥७२॥ तानाह—

[नि०] **पुढवी य सक्करा वालुगा य उवले सिला य लोणूसे ।**
**अय तंब तउय सीसय रुप्प सुवन्ने य वइरे य ॥७३॥**

[नि०] **हरियाले हिंगलोए मणोसिला सासगंजण पवाले ।**
**अब्भपडलऽब्भवालुय बायरकाए मणिविहाणा ॥७४॥**

[नि०] **गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य ।**
**[1]चंदण गेरुय हंसग भुयमोय मसारगल्ले य ॥७५॥**

[नि०] **चंदप्पभ वेरुलिए जलकन्ते चेव सूरकन्ते य ।**
**एए [2]खरपुढवीए नामा छत्ती[3]सइं होंति ॥७६॥**

**पुढवी**त्यादि, **हरियाले**त्यादि, **गोमेज्जे**त्यादि, **चंदप्पभे**त्यादि गाथाश्चतस्रः । अत्र च प्रथमगाथया पृथिव्यादयः चतुर्दश भेदाः परिगृहीताः, द्वितीयगाथया तु अष्टौ हरिता-लादयः, तृतीयगाथया दश गोमेदकादयः, तुर्यगाथया चत्वारः चन्द्रकान्तादयः । अत्र च पूर्वगाथाद्वयेन सामान्यपृथिवीभेदाः प्रदर्शिताः, उत्तरगाथाद्वयेन मणिभेदाः प्रदर्शि[4]ताः । स्पष्टत्वाद् न विवृताः ॥७३-७६॥

---

टि० १. **मरकयमसारगल्ले भुयमोयग इंदनीले य** ॥७५॥ ख ज । ....**इंदगले( ल्ले? ) य** ॥७५॥ झ ॥ २. **खलु पुढ०** क ॥ ३. **०सयं** क ठ । **०स ते** ञ ॥ ४. **०ताः । एते स्पष्टा इति कृत्वा न विवृताः** कपुस्तकमृते ॥

**वि०टि० * भगवति प्रज्ञापनोपाङ्गे** खरबादरपृथ्वीकायिकास्त्वनेकधा प्ररूपिताः, तद्यथा— "से किं तं खरबादरपुढविकाइया ? खरबादरपुढविकाइया अणेगविहा पण्णत्ता, तं जहा—

पुढवी य सक्करा वालुया य उवले सिला य लोणुसे ॥
अय तंब तउय सीसय रुप्प सुवन्ने य वइरे य ॥१४॥१॥
हरियाले हिंगुलए मणोसिला सासगंजणपवाले ॥
अब्भपडलऽब्भवालुय बायरकाए मणिविहाणा ॥८॥२॥
गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य ॥
मरगयमसारगल्ले भुयमोयग इंदनीले य ॥९॥३॥
चंदण गेरुय हंसगब्भ पुलए सोगंधिए य बोधव्वे ॥
चंदप्पभ वेरुलिए जलकंते सूरकंते य ॥९॥४॥
जे यावन्ने तहप्पगारा ॥" (प्रज्ञा० प० २७ सू० १५) ॥

एवं सूक्ष्म-बादरभेदान् प्रतिपाद्य पुनर्वर्णादिभेदेन पृथिवीभेदान् दर्शयितुमाह–

**[नि०] वण्ण रस गंध फासे जोणिप्पमुहा भवंति संखेज्जा ।**
**णेगाइं सहस्साइं होंति विहाणम्मि एक्केक्के ॥७७॥**

**वन्न** इत्यादि । तत्र वर्णाः शुक्लादयः पञ्च, रसाः तिक्तादयः पञ्च, गन्धौ सुरभि-दुरभी, स्पर्शा मृदु-कर्कशादयोऽष्टौ । तत्र वर्णादिके एकैकस्मिन् **योनिप्रमुखाः**= योनिप्रभृतयः **सङ्ख्येया** भेदा **भवन्ति** । सङ्ख्येयस्य अनेकरूपत्वाद् विशिष्टसङ्ख्यार्थमाह–**अनेकानि सहस्राणि एकैकस्मिन्** वर्णादिके **विधाने** भेदे **भवन्ति**, योनितो गुणतश्च भेदानामिति । एतच्च सप्तयोनिलक्षप्रमाणत्वात् पृथिव्या एवं भावनीयमिति । उक्तं च **प्रज्ञापनायाम्**–

**"तत्थ णं जे ते पज्जत्तगा एएसि णं वण्णाएसेणं गंधाएसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं संखेज्जाइं**[1] **जोणिप्पमुहसयसहस्साइं, पज्जत्तयनीसाए**[2] **अपज्जत्तया ≠वक्कमंति जत्थेगो तत्थ नियमा असंखेज्जा, से त्तं खरबायरपुढविकाइया ।"**
**[प्रज्ञा०सू०१।२५(३)]**

इह च संवृतयोनयः[3] पृथिवीकायिकाः । सा पुनः सचित्ता अचित्ता मिश्रा वा । तथा पुनः शीता उष्णा शीतोष्णा वा इति एवमादिका द्रष्टव्या इति ॥७७॥

एतदेव भूयो **निर्युक्तिकृत्** स्पष्टतरमाह–

**[नि०] वन्नम्मि य एक्केक्कं गंधम्मि रसम्मि तह य फासम्मि ।**
**णाणत्ती कायव्वा विहाणए**[4] **होइ एक्केक्के ॥७८॥**

**वन्नम्मी**त्यादि । वर्णादिके **एकैकस्मिन् विधाने** = भेदे सहस्राग्रशो **नानात्वं** विधेयम्, तथा हि–कृष्णो वर्ण इति सामान्यम्, तस्य च भ्रमरा-ऽङ्गार-कोकिल-गवल-कज्जलादिषु प्रकर्षा-ऽप्रकर्षविशेषाद् भेदः कृष्णः कृष्णतरः कृष्णतम इत्यादि । एवं नीलादिषु अपि आयोज्यम् । तथा रस-गन्ध-स्पर्शेषु सर्वत्र पृथिवीभेदा वाच्याः । तथा वर्णादीनां परस्परसंयोगाद् धूसर-केसर-कर्बुरादिवर्णान्तरोत्पत्तिः । एवमुत्प्रेक्ष्य वर्णादीनां

---

**टि०** १. ०ज्जायं ङ। ०ज्जाति ग च ॥ २. **०यणिस्साते** ङ ॥ ३. **०यः खरबादरपृथिवीकायिका उक्ताः । सा** ख ॥ ४. **०णओ** क ॥

**वि०टि०** ≠ "**वक्कमंति** इति उत्पद्यन्ते" जै०वि०प० ॥

प्रत्येकं प्रकर्षा-ऽप्रकर्षतया परस्परानुवेधेन च बहवो भेदा वाच्याः ॥७८॥

पुनरपि पर्याप्तकादि[1]भेदेन भेदमाह—

[नि०] **जे बायरे विहाणा पज्जत्ता त्तिया अपज्जत्ता ।**
**सुहुमा वि होंति दुविहा पज्जत्ता चेवऽपज्जत्ता ॥७९॥**

**जे बादर** इत्यादि । **यानि** बादरपृथिवीकाये **विधानानि**=भेदाः प्रतिपादिताः तानि यावन्ति पर्याप्तकानां **तावन्ति** एव अपर्याप्तकानामपि । अत्र च भेदानां तुल्यत्वं द्रष्टव्यम्, न तु जीवानाम्, यत एकपर्याप्तकाश्रयेण असङ्ख्येया अपर्याप्तका भवन्ति। **सूक्ष्मा अपि** पर्याप्तका-ऽपर्याप्तकभेदेन **द्विविधा** एव, किन्तु अपर्याप्तकनिश्रया पर्याप्तकाः समुत्पद्यन्ते, यत्र चैको अपर्याप्तकः तत्र नियमादसङ्ख्येयाः पर्याप्तकाः स्युः । पर्याप्तिस्तु—

''**आहार-सरीरिंदिय-ऊसास-वयो-मणोभिणिव्वत्ती ।**
**होइ जओ ≠दलियाओ करणं पइ सा उ पज्जत्ती ॥**'' [**बृहत्सं०३३९**]

जन्तुः उत्पद्यमानः पुद्गलोपादानेन करणं निर्वर्तयति, तेन च करणविशेषेण आहारमवगृह्य पृथक् खल-रसादिभावेन परिणतिं नयति स तादृक्करणविशेष आहारपर्याप्ति-शब्देन उच्यते; एवं शेषपर्याप्तयोऽपि वाच्याः । तत्र एकेन्द्रियाणां आहार-शरीरेन्द्रियो-च्छ्वासाभिधानाः चतस्रो भवन्ति । एताश्च अन्तर्मुहूर्तेन जन्तुः आदत्ते । अनाप्तपर्याप्तिः =अपर्याप्तकः, अवाप्तपर्याप्तिस्तु पर्याप्तक इति । अत्र च पृथिव्येव कायो येषामिति विग्रहः ॥७९॥

यथा सूक्ष्म-बादरादयो भेदाः सिद्ध्यन्ति तथा प्रसिद्धभेदेन उदाहरणेन दर्शयितुमाह—

[नि०] **रुक्खाणं [2]गुच्छाणं गुम्माण लयाण वल्लि-वलयाणं ।**
**जह दीसइ [3]णाणत्तं पुढविक्काए तहा [4]जाण ॥८०॥**

**रुक्खाणमि**त्यादि । **यथा** वनस्पतेः वृक्षादिभेदेन स्पष्टं **नानात्वमु**पलभ्यते **तथा पृथिवीकाये**ऽपि **जानीहि** । [5]तत्र **वृक्षाः** चूतादयः, [6]**गुच्छाः** वृन्ताकी-सल्लकी-कर्पास्यादयः,

---

टि० १. ०भेदानाह ख । **०भेदाद् भेद०** ग घ ङ च ॥ २. **गच्छाणं** क झ ञ ठ विना ॥ ३. **णाणत्ती** छ ज झ ॥ ४. **जाणे** ख ॥ ५. **तथा** च॥ ६. **गच्छाः** क-गपुस्तके ॥

**वि०टि०** ≠ ''**दलियाओ** इति तत्तनि(न्नि)ष्पत्तियोग्यवर्गणारूपात् तस्य दलिकस्य स्वस्वविषये प्रणमंतं प्रति यत् करणं शक्तिरूपं सा पर्याप्तिरुच्यते'' जै०वि०प० ॥

**गुल्मानि** नवमालिका-कोरण्टकादीनि, **लताः** पुन्नागा-ऽशोकलताः, **वल्ल्यः** त्रपुषी-वालुङ्की-कोशातक्याद[1]यः, **वलयानि** केतकी-कदल्यादीनि ॥८०॥

पुनरपि वनस्पतिभेददृष्टान्तेन पृथिव्या भेदमाह—

[नि०] **ओसहि तण सेवाले पणगविहाणे य कंदमूले य ।**
**जह दीसइ [2]णाणत्तं पुढविक्काए तहा जाण ॥८१॥**

**ओसही**त्यादि । **यथा** हि वनस्पतिकायस्य औषध्यादिको भेदः एवं पृथिव्या[3] अपि द्रष्टव्यः । तत्र **औषध्यः** शाल्याद्याः, **तृणानि** दर्भादीनि, **शैवलं** जलोपरि मलरूपम्, **पनकः** काष्ठादावुल्लीविशेषः पञ्चवर्णः, **कन्दः** सूरणकन्दादिः, **मूलम्** उशीरादीति ॥८१॥

एते च सूक्ष्मत्वाद् न एक-द्व्यादिकाः समुपलभ्यन्ते, यत्सङ्ख्याः तु उपलभ्यन्ते तद् दर्शयितुमाह—

[नि०] **एक्कस्स दोण्ह तिण्ह व संखेज्जाण व ण [4]पासिउं सक्का ।**
**दीसंति सरीराइं पुढविजियाणं असंखाणं ॥८२॥**

**एगस्से**त्यादि । स्पष्टा ॥८२॥ कथं पुनः इदं अवगन्तव्यं 'सन्ति पृथिवीकायिकाः' ? इति, उच्यते— तदधिष्ठितशरीरोपलब्धेः अधिष्ठातरि प्रतीतिः, गवा-ऽश्वादौ इव इति । एतद् दर्शयितुमाह—

[नि०] **एएहिं सरीरेहिं पच्चक्खं ते परूविया होंति ।**
**सेसा आणागेज्झा[5] चक्खुप्फासं न ते इंति ॥८३॥**

**एएहि** इत्यादि । **एभिः** असङ्ख्येयतया उपलभ्यमानैः पृथिवी-शर्करादिभेदभिन्नैः **शरीरैः ते** शरीरिणः शरीरद्वारेण **प्रत्यक्षं**=साक्षात् **प्ररूपिताः**=प्रख्यापिता **भवन्ति** । **शेषास्तु** सूक्ष्मा **आज्ञाग्राह्या** एव द्रष्टव्याः, यतः **ते चक्षुःस्पर्शं न** आगच्छन्ति। **स्पर्श**शब्दः विषयार्थः ॥८३॥ प्ररूपणाद्वारानन्तरं लक्षणद्वारमाह—

[नि०] **उवओग जोग अज्झवसाणे मइ सुय अचक्खुदंसे य ।**
**अट्ठविहोदयलेसा सण्णुस्सासे कसाए य ॥८४॥**

---

टि० १. **०क्याद्याः** कागदीयादर्शेषु ॥ २. **णाणत्ती** छ ज झ ॥ ३. **०व्यामपि** ख ॥ ४. **पासियं** ज ॥ ५. **०ज्झा उ चक्खुफासं न तो ति ( ते तिं )ति** ज ॥

**उवओगे**त्यादि । तत्र पृथिवीकायादीनां स्त्यानर्द्ध्युदयाद्[1] या च यावती च उपयोगशक्तिः अव्यक्ता ज्ञान-दर्शनरूपा इत्येवमात्मक **उपयोगो** लक्षणम् । तथा **योगः** कायाख्य एक एव औदारिक-तन्मिश्र-कार्मणात्मको वृद्धयष्टिकल्पो जन्तोः सकर्मकस्य आलम्बनाय व्याप्रियते । तथा **अध्यवसायाः** सूक्ष्मा आत्मनः परिणामविशेषाः, ते च लक्षणम्, अव्यक्तचैतन्यपुरुषमनःसमुद्भूतचिन्ताविशेषा इव अनभिलक्ष्याः ते अभिगन्तव्याः । तथा साकारोपयोगान्तःपातिमति-श्रुताऽज्ञानसमन्विताः पृथ्वीकायिका बोद्धव्याः । तथा स्पर्शनेन्द्रियेण अचक्षुर्दर्शनानुगता बोद्धव्याः । तथा ज्ञानावरणीयाद्यष्टविधकर्मोदयभाजः[2] तावद् बन्धभाजश्च । तथा **लेश्याः** अध्यवसायविशेषरूपाः कृष्ण-नील-कापोत-तैजस्यः चतस्रः ताभिः अनुगताः । तथा दशविध**सञ्ज्ञा**नुगताः, ताश्च आहारादिकाः प्रागुक्ता एव । तथा **सूक्ष्मोच्छ्वास**-निःश्वासानुगताः, उक्तं च—

**''पुढविकाइया णं भंते ! जीवा आणवंति वा पाणवंति वा ऊससंति वा नीससंति वा ? गोतमा ! अविरहियं संतयं चेव आणवंति वा पाणवंति वा ऊससंति वा नीससंति वा''** । [ व्या०प्रज्ञ०९।३४।३९१ ]

**कषाया** अपि सूक्ष्माः क्रोधादयः । एवं एतानि जीवलक्षणानि उपयोगादीनि कषायपर्यवसानानि पृथिवीकायिकेषु सम्भवन्ति । ततश्च एवंविधजीवलक्षणकलापसमनुगतत्वाद् मनुष्यवत् सचित्ता पृथिवीति ।

ननु च तद् इदं असिद्धं असिद्धेन साध्यते, तथा हि—न हि उपयोगादीनि लक्षणानि पृथ्वीकाये प्रव्यक्तानि समुपलक्ष्यन्ते, सत्यमेतद्, अव्यक्तानि तु दृश्यन्ते[3], यथा कस्यचित् पुंसः हृत्पूरव्यतिमिश्रमदिरातिपानपित्तोदयाकुलीकृतान्तःकरणविशेषस्य अव्यक्ता चेतना, न च एतावता तस्य अचिद्रूपता, एवं अत्रापि अव्यक्तचेतनासम्भवो अभ्युपगन्तव्यः ।

ननु च अत्र उच्छ्वासादिकं अव्यक्तचेतनालिङ्गं अस्ति, न चेह तथाविधं किञ्चित् चेतनालिङ्गं अस्ति ?; नैतदेवम्, इहापि समानजातीयलतोद्भेदादिकं अर्शोमांसाङ्कुरवत् चेतनाचिह्नं अस्ति एव, अव्यक्तचेतनानां हि सम्भावितैकचेतनालिङ्गानां वनस्पतीनामिव चेतना अभ्युपगन्तव्या इति, वनस्पतेश्च चैतन्यं विशिष्टर्तुपुष्पफलप्रदत्वेन[4] स्पष्टम्, साधयिष्यते च । ततः अव्यक्तोपयोगादिलक्षणसद्भावात् सचित्ता पृथ्वीति स्थितम् ॥८४॥

---

टि० १. **०नर्द्ध्याद्युदयाद्** क-खपुस्तके विना ॥ २. **ज्ञानदर्शनावर०** ग ॥ ३. **विद्यन्ते** कप्रतिमृते ॥ ४. **०शिष्टार्थपु०** ख ॥

ननु च अश्मलतादेः कठिनपुद्गलात्मिकायाः कथं चेतनत्वम् ? इति, अत्राह[1]–

[नि०] **अट्ठी जहा सरीरम्मि अणुगयं चेयणं खरं दिट्ठं ।**
**एवं जीवमणुगयं[2] पुढविसरीरं खरं होइ ॥८५॥**

**अट्ठिमि**त्यादि । **यथा अस्थि** शरीरानुगतं सचेतनं **खरं दृष्टं एवं जीवानुगतं पृथ्वीशरीरम**पीति ॥८५॥ साम्प्रतं लक्षणद्वारानन्तरं परिमाणद्वारमाह–

[नि०] **जे बायरपज्जत्ता पयरस्स असंखभागमेत्ता ते ।**
**सेसा तिन्नि वि रासी वीसुं लोया[3] असंखेज्जा ॥८६॥**

**जे बायरे**त्यादि । तत्र पृथिवीकायिकाः चतुर्धा, तद्यथा–बादराः पर्याप्ता अपर्याप्ताश्च, तथा सूक्ष्मा[4] अपर्याप्ताः पर्याप्ताश्च । तत्र **ये बादराः पर्याप्ताः ते** संवर्तितलोक**प्रतरासङ्ख्येयभागमात्र**वर्तिप्रदेशराशि[5]प्रमाणा भवन्ति, **शेषास्तु त्रयोऽपि राशयः** प्रत्येकं असङ्ख्येयानां लोकानां आकाशप्रदेशराशिप्रमाणा भवन्ति । यथानिर्दिष्ट-क्रमेण[6] च एते यथोत्तरं बहुतराः, यत उक्तम्–

"**सव्वत्थोवा बायरपुढविकाइया पज्जत्ता, बादरपुढविकाइया अपज्जत्ता असंखेज्जगुणा, सुहुमपुढविकाइया अपज्जत्ता असंखेज्जगुणा, सुहुमपुढविकाइया पज्जत्ता असंखेज्जगुणा ।**" [**प्रज्ञा०सू०३।२५०(२)**] ॥८६॥

*प्रकारान्तरेणापि राशित्रयस्य प्रमाणं[7] दर्शयितुमाह–*

[नि०] **पत्थेण व कुडवेण[8] व जह कोइ मिणिज्ज सव्वधन्नाइं ।**
**एवं मविज्जमाणा हवंति लोगा असंखेज्जा ॥८७॥**

**पत्थे**त्यादि । **यथा प्रस्थादिना कश्चित् सर्वधान्यानि मिनुयाद् एवं** असद्भावप्रज्ञापनाङ्गीकरणाद् लोकं कुडवीकृत्य अजघन्योत्कृष्टावगाहनान् पृथिवीकायिकान् जीवान् यदि मिनोति ततः असङ्ख्येयान् लोकान् पृथिवीकायिकाः पूरयन्ति ॥८७॥

पुनरपि प्रकारान्तरेण परिमाणमाह–

---

टि० १. **अत आह** कप्रतिमनादृत्य ॥ २. **जीवाणुगयं** ख ज झ ठ ॥ ३. **लोए** झ ञ ॥ ४. **सूक्ष्माः पर्याप्ता अपर्याप्ताश्च** ग ङ॥ ५. **०शिपरिमाणा** ख ॥ ६. **०णैवैते** ग ॥ ७. **परिमाणं** कसंज्ञकादर्शेन विना ॥ ८. **कुलवेण** ख । **कुडएण** ज झ । **कुलएण** ठ विना ॥

[नि०] लोगागासपएसे एक्केक्कं[1] निक्खिवे पुढविजीवं ।
एवं[2] मविज्जमाणा हवंति लोगा असंखेज्जा ॥८८॥

**लोए**त्यादि । स्पष्टा ॥८८॥ साम्प्रतं कालतः प्रमाणं[3] निर्दिदिक्षुः क्षेत्र-कालयोः सूक्ष्म-बादरत्वमाह–

[नि०] निउणो य[4] होइ कालो तत्तो णिउणयतरं[5] हवइ खेत्तं ।
अंगुलसेढीमेत्ते उसप्पिणीओ[6] असंखेज्जा ॥८९॥

**निउणे**त्यादि । **निपुणः**=सूक्ष्मः **कालः** समयात्मकः, **ततो**ऽपि सूक्ष्मतरं **क्षेत्रं भवति,** यतो **अङ्गुलीश्रेणिमात्र**क्षेत्रप्रदेशानां समयापहारेण **असङ्ख्येया उत्सर्पिण्यवसर्पिण्यो** अपक्रामन्तीति, अतः कालात् क्षेत्रं सूक्ष्मतरम् ॥८९॥

प्रस्तुतं कालतः परिमाणं दर्शयितुमाह–

[नि०] अणुसमयं च पवेसो णिक्खमणं चेव पुढविजीवाणं ।
काए कायट्ठितिया चउरो लोया असंखेज्जा ॥९०॥

**अणुसमयमि**त्यादि । तत्र जीवाः पृथिवीकाये अनुसमयं प्रविशन्ति निष्क्रामन्ति च । एकस्मिन् समये कियतां निष्क्रमः प्रवेशश्च १-२ ?; तथा विवक्षिते च समये कियन्तः पृथिवीकायपरिणताः सम्भवन्ति ३ ?; तथा कियती च कायस्थितिः ४ ? इति; एते चत्वारोऽपि विकल्पाः कालतो अभिधीयन्ते। तत्र असङ्ख्येयलोकाकाशप्रदेशपरिमाणाः[7] समयेन उत्पद्यन्ते विनश्यन्ति च। पृथिवीत्वेन परिणता अपि असङ्ख्येयलोकाकाशप्रदेशप्रमाणाः। तथा कायस्थितिरपि मृत्वा मृत्वा असङ्ख्येयलोकाकाशप्रदेशप्रमाणं कालं तत्र तत्र उत्पद्यन्त इति ॥९०॥

एवं क्षेत्र-कालाभ्यां प्रमाणं[8] प्रतिपाद्य परस्परावगाहनाप्रतिपिपादयिषया आह–

[नि०] बायरपुढविक्काइयपज्जत्ता अन्नमन्नमोगाढा ।
सेसा ओगाहंती सुहुमा पुण सव्वलोयम्मि ॥९१॥[9] दारं ॥

टि० १. **एक्केक्के** क-छ-ञप्रतीर्विना ॥ २. **एवं गणिज्ज०** झ ञ ॥ ३. **परिमाणं** ख ॥ ४. **इ** झ । **उ** ञ ठ ॥ ५. **०यरयं ह०** ठ ॥ ६. **ओसप्पिणिओ** ख ज ॥ ७. **०शपरिमाणं** कपुस्तकेन विनाऽन्यत्र ॥ ८. **परिमाणं** कप्रतिं विमुच्यान्यत्र ॥ ९. नास्तीयं गाथा झसंज्ञकादर्शे ॥

**बायरे**त्यादि । **बादरपृथिवीकायिकः पर्याप्तो** यस्मिन् आकाशखण्डे अवगाढः तस्मिन् एव आकाशखण्डे अपरस्यापि बादरपृथिवीकायिकस्य शरीरमवगाढमिति । **शेषाः** तु अपर्याप्ताः पर्याप्तकनिश्रया समुत्पद्यमाना अनन्तरप्रक्रियया पर्याप्तकावगाढाकाश-प्रदेशावगाढाः । **सूक्ष्माः पुनः सर्वस्मिन् अपि** लोके अवगाढा इति ॥९१॥ उपभोगद्वारमाह—

[नि०] **चंकमणे य ट्ठाणे णिसीयण तुयट्टणे य[1] कयकरणे ।**
**उच्चारे पासवणे उवकरणाणं च[2] निक्खिवणे ॥९२॥**

[नि०] **आलेवण पहरण भूसणे य कयविक्कए किसीए य ।**
**भंडाणं[3] पि य करणे उवभोगविही मणुस्साणं ॥९३॥**

**चंकमणे**त्यादि, **आलेवणे**त्यादि । चङ्क्रमण-ऊर्द्धस्थान-निषीदन-त्वग्वर्तन-कृतकपुत्रककरण-उच्चार-प्रश्रवण-उपकरणनिक्षेप-आलेपन-प्रहरण-भूषण-क्रय-विक्रय-कृषीकरण-भण्डकघटनादिषु[4] **उपभोगविधिः मनुष्याणां** पृथिवीकायेन भवतीति ॥९२-९३॥

यद्येवं ततः किम् ? इति अत आह—

[नि०] **एएहिं कारणेहिं[5] हिंसंती पुढविकाइए जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं उदीरंति ॥९४॥** दारं ॥

**एएहिमि**त्यादि । **एभिः** चङ्क्रमणादिभिः **कारणैः पृथिवीजीवान् हिंसन्ति** । किमर्थम् ? इति दर्शयति— **सातं**=सुखं आत्मनो **अन्विषन्तः** परदुःखानि अजानानाः कतिपयदिवसरमणीयभोगाशाकर्षितसमस्तेन्द्रियग्रामा विमूढचेतस इति। **परस्य**=पृथिव्याश्रितजन्तुराशेः, **दुःखम्**=असातलक्षणं, तद् **उदीरयन्ति**[6]=उत्पादयन्तीति । अनेन भूदानजनितः शुभफलोदयः प्रत्युक्त इति ॥९४॥

अधुना शस्त्रद्वारं— शस्यते अनेन इति शस्त्रम्, तच्च द्विधा—द्रव्यशस्त्रं भावशस्त्रं च । द्रव्यशस्त्रमपि समास-विभागभेदाद् द्विधैव । तत्र समासद्रव्यशस्त्रप्रतिपादनाय आह—

[नि०] **हल-कुलिय[7]-विस[8]-कुद्दाला अलित्त-मिगसिंग-कट्ठमग्गी य ।**
**उच्चारे पासवणे एयं तु समासओ सत्थं ॥९५॥**

---

टि० १. **य करणे य** छ ॥ २. तु ख ज झ । पि ञ ॥ ३. **०णंकियकरणे** क ॥ ४. **०घट्टना०** घ ङ ॥ ५. **०हिं वि हंसं०** ञ ॥ ६. **०न्ति ईरयन्ती०** ग ॥ ७. **०लियाविस-कुद्दालऽलित्तमिग०** ठ ॥ ८. **०सकोद्दा[?कुदा]लयखणित्तमिग०** ञ ॥

हलेत्यादि । तत्र **हल-कुलिक-विष-कुद्दाला-ऽलित्रक-मृगशृङ्ग-काष्ठा-ऽग्नि-उच्चार-प्रश्रवणा**दिकं **एतत् समासतः**=सङ्क्षेपतः **द्रव्यशस्त्रम्** ॥९५॥

विभागद्रव्यशस्त्रप्रतिपादनाय आह—

[नि०] **किंची सकायसत्थं किंची परकाय तदुभयं किंचि ।**
**एयं तु दव्वसत्थं भावे उ असंजमो सत्थं ॥९६॥** दारं ॥

**किंचीत्यादि** । **किञ्चित् स्वकायशस्त्रं** पृथिव्येव पृथिव्याः । **किञ्चित् परकायशस्त्रं** उदकादि । **तदुभयं किञ्चिद्** इति भूदकं मिलितं भुवः । **एतच्च** सर्वमपि **द्रव्यशस्त्रम्** । **भावे पुनः असंयमः** दुष्प्रयुक्ता मनो-वाक्-कायाः **शस्त्र**मिति ॥९६॥

वेदनाद्वारमाह—

[नि०] **पायच्छेयण भेयण जंघोरू तह[1] य अंगमंगेसु ।**
**जह होंति नरा दुहिया पुढविक्काए[2] तहा जाण ॥९७॥**

**पाए**त्यादि । **यथा** पादादिकेषु अङ्ग-प्रत्यङ्गेषु छेदन-भेदनादिकया क्रियया **नरा दुःखिताः तथा पृथिवीकाये**[3]ऽपि वेदनां **जानीहि** ॥९७॥

यद्यपि पाद-शिरो-ग्रीवादीनि अङ्गानि पृथिवीकायिकानां न सन्ति[4] तथापि तच्छेदनानुरूपा वेदना अस्ति एव इति दर्शयितुमाह—

[नि०] **नत्थि य सि[5] अंगमंगा तयाणुरूवा य वेयणा तेसिं ।**
**केसिंचि उदीरेंती केसिं[6] चऽइवायए पाणे ॥९८॥**

**नत्थि य स्ये**[?**सी**]त्यादि । पूर्वार्धं गतार्थम् । **केषाञ्चित्** पृथिवीकायिकानां तदारम्भिणः पुरुषा वेदनां **उदीरयन्ति, केषाञ्चित्** तु **प्राणान्** अपि **अतिपातयेयु**रिति ।

---

टि० १. तहेव अंगुवंगेसु ख ठ । तहेव अंगवंगेसु ज झ । तहेव अंग० ञ ॥ २. ०क्कायं तहा । क ॥ ३. पि जानीहि वेदनाम् क ॥ ४. सम्भवन्ति ख ॥ ५. से अंगोवंगा ख । सि अंगुवंगा ठ । सि यंग० ञ ॥ ६. ०सिंचि उ वायओ पा० ख । ०सिंचि य वा० झ । ०सिंचि इ वा० ठ ॥

तथा हि– **भगवत्यां**[*] दृष्टान्त उपात्तो[1] यथा चतुरन्तचक्रवर्तिनो[2] गन्धपेषिका यौवनवर्तिनी बलवती आर्द्रामलकप्रमाणं सचित्तपृथिवीगोलकं एकविंशतिकृत्वो गन्धपट्टके कठिनशिलापुत्रकेण पिंष्यात्, ततः तेषां पृथिवीजीवानां कश्चित् सङ्घट्टितः कश्चित् परितापितः कश्चिद् व्यापादितः, अपरः किल तेन शिलापुत्रकेण न स्पृष्टोऽपीति ॥९८॥ वधद्वारमाह–

[नि०] **पवयंति य अणगारा ण य तेहिं गुणेहिं जेहिं अणगारा ।**
**पुढविं विहिंसमाणा ण[3] होंति वायाए अणगारा ॥९९॥**

**पवयंती**त्यादि । इह हि एके कुतीर्थिका यतिवेषं आस्थाय[4] एवं **च प्रवदन्ति**– 'वयम् **अनगाराः**=प्रव्रजिताः'। **न च तेषु गुणेषु** निरवद्यानुष्ठानरूपेषु वर्तन्ते **येषु अनगाराः** । यथा च अनगारगुणेषु न वर्तन्ते तद् दर्शयति–यतः ते अहर्निशं पृथिवीजीवविपत्तिकारिणो दृश्यन्ते गुद-पाणि-पादप्रक्षालनार्थम्, अन्यथाऽपि निर्लेप-निर्गन्धत्वं कर्तुं शक्यम् । अतश्च यतिगुणकलापनिरपेक्षा[5] **न** वाङ्मात्रेण युक्तिशून्येन[6] **अनगारा भवन्ती**[7]ति । अनेन प्रयोगः सूचितः । तत्र गाथापूर्वार्धेन प्रतिज्ञा, पश्चार्धेन हेतुः, उत्तरगाथार्धेन साधर्म्यदृष्टान्तः । स चायं प्रयोगः–कुतीर्थिका यत्यभिमानवादिनोऽपि यतिगुणेषु न वर्तन्ते, पृथिवीहिंसाप्रवृत्तत्वाद्, इह ये ये पृथिवीहिंसाप्रवृत्ताः ते ते यतिगुणेषु न वर्तन्ते, गृहस्थवत् ॥९९॥

---

**टि०** १. **उक्तो यथा** च ॥ २. **०रङ्गच०** घ ङ ॥ ३. **ण हु ते वा०** ख ठ ॥ ४. **आधायैवं** च ॥ ५. **०पशून्या न** कप्रतिं विमुच्यान्यत्र ॥ ६. **०क्तिनिरपेक्षेणानगा०** कप्रतिमृतेऽन्यत्र ॥ ७. **०गारत्वं बिभ्रतीति** क ख । **०गारता भवतीति** ग घ । ङसंज्ञादर्शे पाठत्रुटिः ॥

**वि०टि०** ✳ तत्सूत्रं त्वेवम्–पुढविकाइयस्स णं भंते ! केमहालिया सरीरोगाहणा पन्नत्ता ? गोयमा ! से जहानामए रन्नो चाउरंतचक्कवट्टिस्स वन्नगपेसिया तरुणी बलवं जुगवं जुवाणी अप्पायंका वन्नओ....जाव निउणसिप्पोवगया नवरं चम्मेट्टदुहणमुट्ठियसमाहयणिचयगत्तकाया न भण्णति सेसं तं चेव....जाव निउणसिप्पोवगया तिक्खाए वयरामईए सण्हकरणीए तिक्खेणं वइरामएणं वट्टावरएणं एगं महं पुढविकाइयं जतुगोलासमाणं गहाय पडिसाहरिय २ पडिसंखिविय २.... जाव इणमेव त्ति कट्टु त्तिसत्तक्खुत्तो उप्पीसेज्जा तत्थ णं गोयमा ! अत्थेगतिया पुढविकाइया आलिद्धा अत्थेगइया पुढविकाइया नो आलिद्धा, अत्थेगइया संघट्टिया अत्थेगइया नो संघट्टिया, अत्थेगइया परियाविया अत्थेगइया नो परियाविया, अत्थेगइया उद्दविया अत्थेगइया नो उद्दविया, अत्थेगइया पिट्ठा अत्थेगइया नो पिट्ठा, पुढविकाइयस्सं णं गोयमा एमहालिया सरीरोगाहणा पण्णत्ता । [व्या०प्रज्ञ०१९।३।६४३] ॥

इदमत्र अवधेयम्- अत्र **भगवत्यां** गन्धपेषिकास्थाने वर्णकपेषिकापाठं तथा आर्द्रामलकप्रमाणस्थाने जतुगोलकप्रमाणपाठं गृहीतं इति एतावान् विशेषः॥

साम्प्रतं दृष्टान्तगर्भं निगमनमाह–

[नि०] **अणगारवाइणो पुढविहिंसगा णिग्गुणा अगारिसमा ।**
**णिद्दोस त्ति य मइला विरइदुगुंछाए मइलतरा ॥१००॥**

**अणे**त्यादि । **अनगारवादिनः** 'वयं यतय' इति वदनशीलाः पृथिवीकाय-विहिंसकाः सन्तो **निर्गुणाः**, यतोऽतः **अगारिसमा** गृहस्थतुल्या भवन्ति । अभ्युच्चयमाह– सचेतना पृथिवी इति एवं ज्ञानरहितत्वेन तत्समारम्भवर्तिनः सदोषा अपि सन्तो **'वयं निर्दोषा' इति** एवं मन्यमानाः स्वदोषप्रेक्षाऽविमुखत्वात् **मलिनाः**=कलुषितहृदयाः । पुनश्च अतिप्रगल्भतया साधुजनाश्रिताया निरवद्यानुष्ठानात्मिकाया **विरतेः जुगुप्सया**=निन्दया **मलिनतरा** भवन्ति । अनया च साधुनिन्दया अनन्तसंसारित्वं प्रदर्शितं भवतीति ॥१००॥

एतच्च गाथाद्वयं सूत्रोपात्तार्थानुसारि अपि वधद्वारावसरे निर्युक्तिकृता अभिहितम्, तस्य स्वयमेव उपात्तत्वेन तद्व्याख्यानस्य न्याय्यत्वात् । तच्चेदं सूत्रम्—**लज्जमाणा पुढो पास अणगारा मो त्ति एगे पवदमाणे** [सू०१२]त्यादि ।

अयं च वधः कृत-कारिता-ऽनुमतिभिः भवतीति तदर्थमाह–

[नि०] **केई सयं वहंती केई अन्नेहि तुं वधावेंति ।**
**केई अणुमन्नंती पुढविक्कायं वहेमाणा ॥१०१॥**

**के०** इत्यादि । स्पष्टा ॥१०१॥ तद्वधेऽन्येषामपि तदाश्रितानां वधो भवतीति दर्शयितुमाह–

[नि०] **जो पुढवि समारभए[1] अन्ने वि हु[2] सो समारभइ काए ।**
**अणियाए अ णियाए दिस्से य तहा अदिस्से य ॥१०२॥**

**जो** इत्यादि । **यः पृथिवीकायं समारभते**=व्यापादयति तथा **स अन्यानपि** अप्काय-द्वीन्द्रियादीन् **समारभते**=व्यापादयति, उदुम्बरफलभक्षणप्रवृत्तः तत्फलान्तःप्रविष्ट-त्रसजन्तुभक्षणवदिति । तथा *__अणियाए य नियाए__* त्ति अकारणेन कारणेन च, यदि वा

---

टि० १. ०मारंभति ज ठ ॥ २. य ठ ॥

वि०टि० * **णीयाए चेव अणियाए** त्ति, द्विविधा वेदना तत्र **निदया** आभोगतः, **अनिदया** त्वनाभोगतः [समवा०सू०वृ०१५३ पृ०२७८] ॥

असङ्कल्पेन सङ्कल्पेन च पृथिवीजन्तून् समारभते । तदारम्भवांश्च **दृश्यान्** दर्दुरादीन् **अदृश्यान्** पनकादीन् समारभते, व्यापादयतीत्यर्थः ॥१०२॥ एतदेव स्पष्टतरमाह—

[नि०] **[१]पुढवी समारभंता हणंति तन्निस्सि[२]ते बहू जीवे ।**
**सुहुमे य बायरे [३]या पज्जत्ते [४]वा अपज्जत्ते ॥१०३॥ दारं ॥**

**[५]पुढवी**त्यादि । स्पष्टा । अत्र च सूक्ष्माणां वधः परिणामाऽशुद्धत्वात् तद्विषयनिवृत्त्यभावेन द्रष्टव्य इति ॥१०३॥ विरतिद्वारमाह—

[नि०] **एवं वियाणिऊणं पुढवी[६]ओ निक्खिवंति जे दंडं ।**
**तिविहेण सव्वकालं मणेण वायाए काएणं ॥१०४॥**

**एवमि**त्यादि । **एवम्** इति उक्तप्रकारानुसारेण पृथिवीजीवान् **विज्ञाय** तद्वधं बन्धं च विज्ञाय **पृथिवीतो निक्षिपन्ति ये दण्डं** पृथिवीसमारम्भाद् व्युपरमन्ति ते **ईदृक्षा अनगारा भवन्ती**ति [७]उत्तरगाथायां वक्ष्यति । **त्रिविधेन** इति कृत-कारिता-ऽनुमतिभिः **सर्वकालमि**ति यावज्जीवमपि **मनसा वाचा कायेन** इति ॥१०४॥ अनगारभवने उक्तशेषमाह—

[नि०] **गुत्ता गुत्तीहिं सव्वाहिं, समिया समिईहिं संजया ।**
**जयमाणगा सुविहिया एरिसिया होंति अणगारा ॥१०५॥**

**गुत्ता** इत्यादि । तिसृभिः मनो-वाक्-काय**गुप्तिभिः गुप्ताः**, तथा पञ्चभिः ईर्यासमित्यादिभिः **समिताः**, सम्यग् उत्थान-शयन-चङ्क्रमणादिक्रियासु यताः=**संयताः**, **यतमानाः**=सर्वत्र प्रयत्नकारिणः, **शोभनं विहितं** सम्यग्दर्शनाद्यनुष्ठानं येषां ते त[८]था, **ईदृक्षा अनगारा भवन्ति,** न तु पूर्वोक्तगुणाः पृथिवीकायसमारम्भिणः **शाक्यादय** इति ॥१०५॥

गतो नामनिष्पन्नो निक्षेपः । अधुना सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रं उच्चार्यते, तच्चेदम्—

**[ सू० ] अट्टे लोए परिजुण्णे दुस्संबोधे अविजाणए ।**

**अट्टे**त्यादि । अस्य च अयं अभिसम्बन्धः— इह अनन्तरसूत्रे **परिज्ञातकर्मा मुनिः**

---

टि० १. **पुढविं** क-छप्रती विना ॥ २. **०स्सिए य बहुजीवे** ठ ॥ ३. **वा** छ झ ॥ ४. **या** क-छपुस्तके विना ॥ ५. **०ढविमित्या०** कप्रत्या ऋते ॥ ६. **०वीए नि०** छ-जप्रती ऋते ॥ ७. **०त्तरार्धेन वक्ष्य०** ख ॥ ८. **०था । ते ईदृ०** क-घ-चप्रतीर्विना ॥

भवति इति उक्तम्, यः तु अपरिज्ञातकर्मा स भावार्तो भवतीति । तथा आदिसूत्रेण सम्बन्धः, **सुधर्मस्वामी जम्बूनाम्ने** इदमाचष्टे— **श्रुतं मया,** किं तत् श्रुतम् ? पूर्वोद्देशकार्थं प्रदर्श्य इदमपि इति **अट्टे**त्यादि। परम्परसम्बन्धस्तु **इहमेगेसिं नो सन्ना भवती**ति उक्तम्, कथं पुनः सञ्ज्ञा न भवतीति ? आर्तत्वात्, तदाह—

**अट्टे**त्यादि । आर्तो नामादिश्चतुर्धा । नाम-स्थापने क्षुण्णे । ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तो नोआगमतो द्रव्यार्तः शकटादिचक्राणां उद्धिमूले वा यो लोहमयः पट्टो दीयते स द्रव्यार्तः । भावार्तस्तु[1] द्विधा— आगमतो नोआगमतश्च । तत्र आगमतो ज्ञाता आर्तपदार्थज्ञः तत्र च उपयुक्तः । नोआगमतः तु औदयिकभाववर्ती राग-द्वेषग्रहपरिगृहीतान्तरात्मा प्रियविप्र-योगादिदुःखसङ्कटनिमग्नो भावार्त इति व्यपदिश्यते, अथवा शब्दादिविषयेषु विष-विपाकसदृशेषु तदाकाङ्क्षत्वाद्[2] हिता-हितविचारशून्यमना भावार्तः कर्म्म उपचिनोति, यत उक्तम्—

"**सोइंदियवसट्टे[3] णं भंते ! जीवे किं बंधइ ? किं चिणाइ ? किं उवचिणाइ ? गोयमा ! अट्ठ कम्मपयडीओ सिढिलबंधणबद्धाओ धणियबंधणबद्धाओ पकरेइ... जाव अणाइयं च णं अणवयग्गं दीहमद्धं चाउरंतसंसारकंतारमणुपरियट्टइ** ।"

[ **व्या०प्रज्ञ०१२।२।४४२** ]

एवं स्पर्शनादिषु अपि आयोजनीयम् । एवं क्रोध-मान-माया-लोभ-दर्शनमोहनीय-चारित्रमोहनीयादिभिः भावार्ताः संसारिणो जीवा इति, उक्तं च—

"**राग-द्दोस-कसाएहिं इंदिएहिं य पंचहिं ।**
**दुहा वा मोहणिज्जेण अट्टा संसारिणो जिया ।।**" [ ]

यदि वा ज्ञानावरणीयादिना शुभा-ऽशुभेन अष्टप्रकारेण कर्मणा आर्तः । कः पुनरेवं-विधः ? इत्यत[4] आह— लोकयतीति **लोकः** एक-द्वि-त्रि-चतुः-पञ्चेन्द्रियजीवराशिरित्यर्थः । [5]अत्र **लोक**शब्दस्य नाम-स्थापना[6]-द्रव्य-क्षेत्र-काल-भव-भाव-पर्यायभेदाद् अष्टधा निक्षेपं प्रदर्श्य अप्रशस्तभावोदयवर्तिना लोकेन इह अधिकारो वाच्यः ।

यस्माद् यावान् आर्तः सर्वोऽपि **परिद्यून**[7] इति । **परिद्यूनो** नाम परिपेलवो निस्सारः

---

**टि०** १. **०र्तश्च** च ॥ २. **०काङ्क्षित्वाद्** घ ङ च ॥ ३. **०वसगे** क । **०वसट्टे** ग ॥ ४. **इत्याह** ख । **इत्यत्राह** ग ॥ ५. **अथ** ख ॥ ६. **०पने क्षुण्णत्वाद् अनादृत्य द्रव्य-क्षेत्र०** ख ॥ ७. **परिदून** क । ग-घ प्रत्योः पाठभङ्गः ॥

औपशमिकादिप्रशस्तभावहीनो अव्यभिचारिमोक्षसाधनहीनो वेति । स च द्विधा द्रव्य-भावभेदात् । तत्र सचित्तद्रव्यपरिद्यूनो जीर्णशरीरः स्थविरकः जीर्णवृक्षो वा, अचित्त-द्रव्यपरिद्यूनो जीर्णपटादिः । भावपरिद्यून औदयिकभावोदयात् प्रशस्तज्ञानादिभावविकलः । कथं विकलः ? अनन्तगुणपरिहाण्या, तथा हि– पञ्च-चतुः-त्रि-द्वि-एकेन्द्रियाः क्रमशो ज्ञानविकलाः । तत्र सर्वनिकृष्टज्ञानाः सूक्ष्मनिगोदा अपर्याप्तकाः प्रथमसमयोत्पन्नाः, उक्तं च–

**"सर्वनिकृष्टो जीवस्य दृष्ट उपयोग एव वीरेण ।**
**सूक्ष्मनिगोदापर्याप्तानां स भवति विज्ञेयः ॥** [ ]
**तस्मात् प्रभृति ज्ञानविवृद्धिर्दृष्टा जिनेन जीवानाम् ।**
**लब्धिनिमित्तैः करणैः कायेन्द्रिय-वाङ्-मनो-दृग्भिः ॥"** [ ]

स च विषय-कषायार्तः प्रशस्तज्ञानद्यूनः किमवस्थो भवति ? इति दर्शयति–

**दुस्सम्बोध** इति । दुःखेन सम्बोध्यते=धर्मचरणे प्रतिपत्तिं[1] कार्यत इति **दुस्सम्बोधो मेतार्य**वदिति । यदि वा **दुस्सम्बोधः** यो बोधयितुं अशक्यः **ब्रह्मदत्त**वदिति । किमित्येवं ? यतः– **अवियाणए** त्ति विशिष्टावबोधरहितः ।

स चैवंविधः किं विदध्यात् ? इत्याह–

## अस्सिं लोए पव्वहिए तत्थ तत्थ पुढो पास आतुरा परितावेंति ॥१०॥

**अस्मिन्** पृथिवीकाय**लोके प्रव्यथिते**=प्रकर्षेण व्यथिते, सर्वस्य आरम्भस्य तदा-श्रयत्वादिति प्रकर्षार्थः, तत्तत्प्रयोजनतया खननादिभिः पीडिते नानाविधशस्त्रोद्भीते वा । **"व्यथ भय-चलनयोः"** [पा०धा०१।७६४] इति कृत्वा व्यथितं = भीतमिति । **तत्थ तत्थ** इति तेषु तेषु कृषि-खनन-गृहकरणादिषु **पृथग्** विभिन्नेषु कार्येषु उत्पन्नेषु **पश्य** इति विनेयस्य लोकाऽकार्यप्रवृत्तिः प्रदर्श्यते। सिद्धान्तशैल्या एकादेशेऽपि प्रकृते[2] बह्वादेशो भवतीति **आतुराः** विषय-कषायादिभिः **अस्मिन्** पृथिवीकाये विषयभूते सामर्थ्यात् पृथिवीकायं **परितापयन्ति** परिः=समन्तात् तापयन्ति=पीडयन्तीत्यर्थः । बहुवचननिर्देशस्तु तदारम्भिणां बहुत्वं गमयति । यदि वा **लोक**शब्दः प्रत्येकं अभिसम्बध्यते कश्चित् लोको

---

टि० १. प्रभृ[ ?वृ ]त्तिं क ॥ २. ०प्राकृते ग ङ च ॥

वि०टि० ≠ "**तस्मात् प्रभृति** इति प्रथमसमयमादिं कृत्वा" जै०वि०प० ॥

विषयकषायादिभिरार्तः[1] अपरस्तु कायजीर्णः कश्चिद् दुःखसम्बोधः तथाऽपरो विशिष्टज्ञानरहितः, एते सर्वेऽपि **आतुरा** विषय-जीर्णदेहादिभिः[2] सुखाप्तये **अस्मिन्** पृथिवीकायलोके विषयभूते पृथिवीकायं नानाविधैरुपायैः **परितापयन्ति**=पीडयन्तीति सूत्रार्थः ॥१०॥

**ननु** च एकदेवताविशेषावस्थिता पृथिवीति शक्यं प्रतिपत्तुम्, न पुनरसङ्ख्येयजीवसङ्घातरूपा इति, एतत् परिहर्तुकाम आह–

**[ सू० ] संति पाणा पुढो सिता ॥११॥**

**संतीत्यादि** । **सन्ति**=विद्यन्ते, **प्राणाः**=सत्त्वाः, **पृथक्**=पृथग्भावेन अङ्गुलाऽसङ्ख्येयभागस्वदेहावगाहनया पृथिव्या**श्रिताः**[3], **सिता** वा सम्बद्धा इत्यर्थः । अनेन एतत् कथयति– न एकदेवता पृथिवी, अपि तु प्रत्येकशरीरपृथिवीकायात्मिका इति । तदेवं सचेतनत्वं अनेकजीवाधिष्ठितत्वं च पृथिव्या आविष्कृतं भवतीति ॥११॥

एतच्च ज्ञात्वा तदारम्भनिवृत्तान् दर्शयितुमाह–

**[ सू० ] लज्जमाणा पुढो पास ।**

**लज्जमाणा पुढो पास** त्ति । लज्जा द्विविधा–लौकिकी लोकोत्तरा च । तत्र लौकिकी स्नुषा-सुभटादेः श्वशुर-सङ्ग्रामविषया, लोकोत्तरा सप्तदशप्रकारः संयमः, तदुक्तम्–"**लज्जा दया संजम**[4] **बंभचेरमि**"[**दशवै०९।१।१३**]त्यादि । **लज्जमानाः** संयमानुष्ठानपराः, यदि वा पृथिवीकायसमारम्भरूपाद् असंयमानुष्ठाद् लज्जमानाः, **पृथग्** इति प्रत्यक्षज्ञानिनः परोक्षज्ञानिनश्च, अतस्तान् लज्जमानान् **पश्य** इत्यनेन शिष्यस्य कुशलानुष्ठानप्रवृत्तिविषयः प्रदर्शितो भवतीति ।

कुतीर्थिकास्तु अन्यथावादिनो अन्यथाकारिण इति दर्शयितुमाह–

**'अणगारा मो' त्ति एगे पवयमाणा, जमिणं विरूवरूवेहिं सत्थेहिं पुढविकम्मसमारंभेणं पुढविसत्थं समारंभमाणे अणेगरूवे पाणे विहिंसति ॥१२॥**

**अणगारा** इत्यादि । न विद्यते अगारं=गृहं एषां[5] इति **अनगाराः**, 'यतयः **स्मो**

---

टि० १. ०र्तः कश्चित् तु कायपरिजीर्णः अपरो दुःसम्बोधः ख घ ङ च ॥ २. ०र्णभेदा देहा० च ॥ ३. ०श्रिता वा सि० ख ॥ ४. संजमो ग घ ॥ ५. एषां ते अन० क-गप्रती ऋते ॥

वयम्' इत्येवं प्रकर्षेण वदन्तः=**प्रवदन्त** इति, **एके शाक्या**दयो ग्राह्याः । ते च 'वयमेव जन्तुरक्षणपराः क्षपितकषाया-ऽज्ञानतिमिराः' इति एवमादि प्रतिज्ञामात्रं अनर्थकं आरटन्ति ।

यथा कश्चिद् अत्यन्तशुचिः बौद्रः चतुःषष्टिमृत्तिकास्नायी गोशवस्य अशुचितया परित्यागं विधाय पुनः कर्मकरवाक्यात् चर्मा-ऽस्थि-पिशित-स्नाय्वादेः यथास्वं उपयोगार्थं[1] सङ्ग्रहं कारितवान् । तथा च तेन शुच्यभिमानमुद्वहताऽपि किं तस्य परित्यक्तम् ?; एवमेते अपि **शाक्या**दयो अनगारवादं उद्वहन्ति, न चानगारगुणेषु मनागपि वर्तन्ते, न च[2] गृहस्थचर्यां मनागपि अतिलङ्घयन्तीति दर्शयति—

**यद्**=यस्माद्, **इमम्** इति सर्वजनप्रत्यक्षं पृथिवीकायं, **विरूपरूपैः**=नानाप्रकारैः **शस्त्रैः** हल-कुद्दाल-खनित्रादिभिः **पृथिव्या**श्रयं **कर्म**=क्रियां समारभमाणा विहिंसन्ति । तथा अनेन च **पृथ्वीकर्मसमारम्भेण पृथ्वीशस्त्रं समारभमाणो**=व्यापारयन् पृथिवीकायं नानाविधैः शस्त्रैः व्यापादयन् **अनेकरूपान्** तदाश्रितान् उदक-वनस्पत्यादीन् **विविधं हिनस्ति** नानाविधैः उपायैः व्यापादयति[3] इत्यर्थः ॥१२॥

एवं **शाक्या**दीनां[4] पार्थिवजन्तुवैरिणां अयतित्वं प्रतिपाद्य साम्प्रतं[5] सुखाभिलाषितया कृत-कारिता-ऽनुमतिभिः मनो-वाक्-कायलक्षणां प्रवृत्तिं दर्शयितुमाह—

**[सू० ] तत्थ खलु भगवता परिण्णा पवेदिता । इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेउं से सयमेव पुढविसत्थं समारंभति अण्णेहिं वा पुढविसत्थं समारंभावेति अण्णे वा पुढविसत्थं समारंभंते समणुजाणति ।**

**तत्थे**त्यादि । **तत्र** पृथिवीकायसमारम्भे, **खलु**शब्दः वाक्यालङ्कारे, **भगवता** श्री**वर्धमानस्वामि**ना, परिज्ञानं=**परिज्ञा**, सा **प्रवेदिता** इति । इदमुक्तं भवति—भगवता इदमाख्यातं यथा एभिः[6] वक्ष्यमाणैः कारणैः कृत-कारिता-ऽनुमतिभिः सुखैषिणः पृथ्वीकायं *समारभन्ते । तानि चामूनि—*

---

टि० १. **०पभोगा०** च ॥ २. **वा** घ च ॥ ३. **०यन्तीत्यर्थः** क ख ॥ ४. **०नां पृथिवीजन्तु०** ख ॥ ५. **सम्प्रति** क-गप्रती ऋते ॥ ६. **एभिः का०** ख ॥

वि०टि० ≠ "**बोद्रः** इति मूर्खः" जै०वि०प० ॥ ✻ टीकाकृदभिप्रायेण '**....विरूवरूवेहिं सत्थेहिं पुढविकम्म समारभमाणा विहिंसन्ति । पुढविकम्मसमारंभेण ....**' पाठो ज्ञेयः; एवमग्रेऽपि अवगन्तव्यम् ॥

**अस्यैव जीवितस्य**[1] परिपेलवस्य **परिवन्दन-मानन-पूजनार्थं** तथा **जाति-मरण-मोचनार्थं दुःखप्रतिघातहेतुं** च सुखलिप्सुः दुःखद्विट् **स्वयं**=आत्मना **एव पृथिवीशस्त्रं समारभते**, तथा **अन्यैश्च पृथ्वीशस्त्रं समारम्भयति, पृथ्वीशस्त्रं समारभमाणानन्यांश्च** स एव **समनुजानीते**। एवं अतीता-ऽनागताभ्यां मनो-वाक्-कायकर्मभिः आयोजनीयम् ।

तदेवं प्रवृत्तमतेः यद् भवति तद् दर्शयितुमाह—

**तं से अहिताए, तं से अबोहीए ॥१३॥**

**तं से अहियाए, तं से अबोहीए । तत्** पृथिवीकायसमारम्भणं, **से**=तस्य कृत-कारिता-ऽनुमतिभिः पृथ्वीशस्त्रं समारभमाणस्य आगामिनि काले **अहिताय** भवति, **तदेव** च **अबोधि**लाभाय इति । न हि प्राणिगणोपमर्दनप्रवृत्तानां अणीयसाऽपि हितेन आयत्यां[2] योगो भवतीति उक्तं भवति ॥१३॥

यः पुनर्भगवतः सकाशात् तच्छिष्यानगारेभ्यो वा विज्ञाय पृथ्वीसमारम्भं पापात्मकं भावयति स एवं मन्यत इत्याह—

**[ सू० ] से तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति—एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु निरए ।**

**से त्त**मित्यादि । **सः** ज्ञातपृथ्वीजीवत्वेन विदितपरमार्थः पृथ्वीशस्त्रसमारम्भं अहितं **सम्यग्** अव**बुध्यमानः आदानीयं**=ग्राह्यं सम्यग्दर्शनादि, **सम्यगुत्थाय**=अभ्युपगम्य, केन प्रत्ययेन ? इति दर्शयति— **श्रुत्वा**=अवगम्य, साक्षाद् **भगवतो अनगाराणां** वा समीपे, ततः **इह** मनुष्यजन्मनि **एकेषां** प्रतिबुद्धतत्त्वानां साधूनां **ज्ञातं भवती**ति ।

यद् ज्ञातं भवति तद् दर्शयितुमाह—

**एसे**त्यादि । य **एष** पृथ्वीशस्त्रसमारम्भः, **खलुः** अवधारणे, कारणे कार्योपचारं कृत्वा **नड्वलोदकपादरोग**[3][4]न्यायेन एष एव **ग्रन्थः** अष्टप्रकारकर्मबन्धः। तथैष एव पृथ्वीसमारम्भो मोहहेतुत्वाद् **मोहः** कर्मबन्धविशेषो दर्शन-चारित्रभेदो अष्टाविंशतिविधः ।

---

**टि०** १. ०**तव्यस्य** ख । ०**तस्य पेल०** क ॥ २. ०**यत्या** घ ॥ ३. ०**दकं पा०** कसंज्ञकादर्शेन विना ॥ ४. ०**ग इति न्या०** घ ङ च ॥

तथैष एव मरणहेतुत्वाद् **मारः** आयुष्ककर्मक्षयलक्षणः । तथैष एव नरकहेतुत्वाद् **नरकः** सीमन्तकादिः भूभागः, अनेन च असातावेदनीयमुपात्तं भवति । कथं पुनः एकप्राणि-व्यापादनप्रवृत्तौ अष्टविधकर्मबन्धं करोति ? इति, उच्यते— मार्यमाणजन्तुज्ञानावरोधित्वाद् ज्ञानावरणीयं बध्नाति, एवं अन्यत्रापि आयोजनीयमिति ।

अन्यदपि तेषां ज्ञातं भवतीति दर्शयितुमाह—

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं पुढविकम्म-समारंभेणं पुढविसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥१४॥**

**इच्चत्थमित्यादि** । **इत्येवमर्थम्** आहारभूषणोपकरणार्थं तथा परिवन्दन-मानन-पूजनार्थं दुःखप्रतिघातहेतुं च **गृद्धः**=मूर्च्छितः, **लोकः**= प्राणिगणः । एवंविधेऽपि अतिदुरितनिचयविपाकफले पृथ्वीकायसमारम्भे अज्ञानवशाद् मूर्च्छितस्तु एतद् विधत्त इति दर्शयति— **यद्**=यस्माद्, **इमं** पृथ्वीकायं, **विरूपरूपैः शस्त्रैः** [1]पृथ्वीकायं समारभमाणो **हिनस्ति,** [2]पृथ्वीकायसमारम्भेण च पृथिव्येव शस्त्रं स्वकायादेः पृथिव्यां वा शस्त्रं हल-कुद्दालादि, तत् समारभते, **पृथिवीशस्त्रं समारभमाणः** च **अन्यान् अनेकरूपान् प्राणिनः** द्वीन्द्रियादीन् **विविधं हिनस्ती**ति ॥१४॥

स्यादारेका- ये हि न पश्यन्ति न शृण्वन्ति न जिघ्रन्ति न गच्छन्ति कथं पुनस्ते वेदनां अनुभवन्तीति ग्रहीतव्यम् ?, अमुष्यार्थस्य प्रसिद्धये दृष्टान्तमाह—

**[ सू० ] से बेमि—अप्पेगे अंधमब्भे अप्पेगे अंधमच्छे, अप्पेगे पादमब्भे २, अप्पेगे गुप्फमब्भे २, अप्पेगे जंघमब्भे २, अप्पेगे जाणुमब्भे २, अप्पेगे ऊरुमब्भे २, अप्पेगे कडिमब्भे २, अप्पेगे णाभिमब्भे २, अप्पेगे उदरमब्भे २, अप्पेगे पासमब्भे २, अप्पेगे पिट्ठिमब्भे २, अप्पेगे उरमब्भे २, अप्पेगे हिययमब्भे २, अप्पेगे थणमब्भे २, अप्पेगे खंधमब्भे २, अप्पेगे बाहुमब्भे २, अप्पेगे हत्थमब्भे २, अप्पेगे अंगुलिमब्भे २, अप्पेगे णहमब्भे २, अप्पेगे गीवमब्भे २, अप्पेगे हणुमब्भे २, अप्पेगे होट्ठमब्भे २, अप्पेगे दंतमब्भे २, अप्पेगे जिब्भमब्भे २, अप्पेगे तालुमब्भे २, अप्पेगे गलमब्भे २, अप्पेगे गंडमब्भे २, अप्पेगे कण्णमब्भे**

---

टि० १. **पृथिवीकर्म समा०** क-खप्रती ऋतेऽन्यत्र ॥ २. **पृथिवीकर्मसमा०** ख घ च ॥

**२, अप्पेगे णासमब्भे २, अप्पेगे अच्छिमब्भे २, अप्पेगे भमुहमब्भे २, अप्पेगे णिडालमब्भे २, अप्पेगे सीसमब्भे २, अप्पेगे संपमारए, अप्पेगे उद्दवए ॥१५॥**

**से बेमी**त्यादि । **सो**ऽहं पृष्टो भवता पृथ्वीकायवेदनां **ब्रवीमि** । अथवा[1] **से** इति तच्छब्दार्थे वर्तते, यत् त्वया पृष्टः **तदहं ब्रवीमि** । **अपि**शब्दः यथानामशब्दार्थे, यथा नाम कश्चित् जात्यन्धो बधिरो मूकः कुष्ठी पङ्गुः अनभिनिर्वृत्तपाण्याद्यवयवविभागो **मृगापुत्र**वत् पूर्वकृताशुभकर्मोदयाद् हिता-ऽहित-प्राप्ति-परिहारविमुखो अतिकरुणां दशां प्राप्तः तमेवंविधं अन्धादिगुणोपेतं कश्चित् कुन्ताग्रेण **अब्भे** इति आभिन्द्यात्, तथाऽपरः कश्चिद् अन्धं **आच्छिन्द्यात्** । स च भिद्यमानाद्यवस्थायां न पश्यति, न शृणोति, मूकत्वाद् नोच्चैः रारटीति, किमेतावता तस्य वेदनाऽभावो जीवाभावो वा शक्यो विज्ञातुम् ? एवं पृथ्वीजीवा अपि अव्यक्तचेतना जात्यन्ध-बधिर-मूक-पङ्ग्वादिगुणोपेतपुरुषवदिति ।

यथा वा पञ्चेन्द्रियाणां परिस्पष्टचेतनानां **अप्पेगे पायमब्भे** इति यथा नाम कश्चित् **पादमाभिन्द्याद् आच्छिन्द्याद्** वा इति । एवं **गुल्फा**दिषु अपि आयोजनीयमिति[2] । एवं **जङ्घा-जानु-ऊरु-कटी-नाभि-उदर-पार्श्व-पृष्ठ-उरो-हृदय-स्तन-स्कन्ध-बाहु-हस्ता-ऽङ्गुलि-नख-ग्रीवा-हनुक-ओष्ठ**[3]-(दन्त-)**जिह्वा-तालु-गल-गण्ड-कर्ण-नासिका-ऽक्षि-भ्रू-ललाट-शिरः**प्रभृतिष्ववयवेषु भिद्यमानेषु छिद्यमानेषु वा वेदनोत्पत्तिः लक्ष्यते । एवं एषां उत्कटमोहा-ऽज्ञानभाजां स्त्यानर्द्ध्युदयाद्[4] अव्यक्तचेतनानां अव्यक्तैव वेदना भवतीति ग्राह्यम् ।

अत्रैव दृष्टान्तान्तरं दर्शयितुमाह—

**अप्पेगे संपमारए अप्पेगे उद्दवए** । यथा नाम कश्चित् **सम्**=एकीभावेन **प्रकर्षेण** प्राणानां **मारणम्**=अव्यक्तत्वापादनं कस्यचित् कुर्यात्, मूर्च्छामापादयेदित्यर्थः[5] । तथाऽवस्थं च यथा नाम कश्चिद् **अपद्रापयेत्**[6]=प्राणेभ्यो व्यपरोपयेत् । न च असौ तां वेदनां[7] स्फुटं अनुभवति, अस्ति चाव्यक्ता तस्यासौ वेदनेति[8] । एवं पृथिवीजीवानामपि द्रष्टव्यमिति ॥१५॥

पृथिवीकायिकानां जीवत्वं प्रसाध्य तथा नानाविधशस्त्रसम्पाते वेदनां च आविर्भाव्य अधुना तद्वधे बन्धं[9] दर्शयितुमाह—

---

टि० १. **यदि वा** ख घ ङ च ॥ २. **०ति दर्शयति । एवं** कप्रत्या विना ॥ ३. **०ष्ठ-तालु-जिह्वा-गल०** क ग ॥ ४. **०नर्द्ध्याद्युदया०** ग च ॥ ५. **०मासाद०** क ॥ ६. **०द्रावयेत्** ख ॥ ७. **०नां अनुभ०** ख ॥ ८. **चेतनेति ॥** ख च ॥ ९. **०न्धं प्रतिपादयन्नाह** घ ङ च ॥

**[सू० ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाता भवंति ॥१६॥**

**एत्थ सत्थे**त्यादि । **अत्र**=पृथ्वीकाये[1] **शस्त्रं** द्रव्य-भावभिन्नम्[2], तत्र द्रव्यशस्त्रं स्वकाय-परकाय-उभयरूपम्, भावशस्त्रं तु असंयमो दुःप्रणिहितमनो-वाक्-कायलक्षणः । एतद् द्विविधमपि शस्त्रं **समारभमाणस्य इत्येते** खनन-कृष्याद्यात्मकाः **समारम्भा** बन्धहेतुत्वेन **अपरिज्ञाताः**=अविदिता **भवन्ति** । एतद्विपरीतस्य परिज्ञाता भवन्तीति दर्शयितुमाह—

**एत्थे**त्यादि । **अत्र**=पृथिवीकाये, द्विविधमपि **शस्त्रं असमारभमाणस्य**= अव्यापारयत **इत्येते** प्रागुक्ताः कर्म**समारम्भाः परिज्ञाताः**=विदिता **भवन्ति** ॥१६॥

अनेन च विरत्यधिकारः प्रतिपादितो भवतीति तामेव विरतिं स्वनामग्राहमाह—

**[सू० ] तं परिण्णाय मेहावी णेव सयं पुढविसत्थं समारभेज्जा, णेवऽण्णेहिं पुढविसत्थं समारभावेज्जा, णेवऽण्णे पुढविसत्थं समारभंते समणुजाणेज्जा ॥१७॥**

**तमि**त्यादि । **तं** पृथिवीकायसमारम्भे बन्धं **परिज्ञाय** असमारम्भे च अबन्धमिति, **मेधावी**=कुशलः एतत् कुर्यादिति दर्शयति—**नैव पृथिवीशस्त्रं** द्रव्य-भावभिन्नं **समारभेत,** नापि तद्विषयो **अन्यैः** समारम्भः कारयितव्यः, **न** च **अन्यान् पृथिवीशस्त्रं समारभमाणान् समनुजानीयात्** । एवं मनो-वाक्-काय-कर्मभिः अतीता-ऽनागतकालयोरपि[3] आयोजनीयम् ॥१७॥ ततश्चैवं कृतनिवृत्तिः असौ मुनिरिति व्यपदिश्यते, न शेष इति दर्शयन् उपसञ्जिहीर्षुराह—

**[सू० ] जस्सेते पुढविकम्मसमारंभा परिण्णाता भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ॥१८॥**

**जस्से**त्यादि । **यस्य** विदितपृथ्वीजीववेदनास्वरूपस्य, **एते पृथ्वी**विषयाः **कर्मसमारम्भाः** खनन-कृष्याद्यात्मकाः कर्मबन्धहेतुत्वेन **परिज्ञाता भवन्ति** ज्ञपरिज्ञया[4],

---

टि० १. ०ये **द्विविधमपि शस्त्रं** ख ॥ २. **०वशस्त्रम्** क ॥ ३. **अनागता-ऽतीतकाल०** क घ ङ ॥ ४. **०या, तथा प्रत्या०** ख ग च ॥

प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति, हुः अवधारणे, **स** एव **मुनिः** द्विविधयाऽपि परिज्ञया परिज्ञातं कर्म सावद्यानुष्ठानं अष्टप्रकारं वा कर्म येन स **परिज्ञातकर्मा**, नापरः **शाक्यादिः**, **ब्रवीमि इति** पूर्ववदिति ॥१८॥

**॥ शस्त्रपरिज्ञाया[1] द्वितीय[2] उद्देशकः समाप्तः[3] ॥ छ ॥**

---

१. ०ज्ञायां ग घ ङ ॥ २. ०तीयोद्दे० ख च ॥ ३. ०प्त इति ॥ च ॥

## ॥ तृतीयो अप्कायोद्देशकः ॥

गतः पृथिव्युद्देशकः । साम्प्रतमप्कायोद्देशकः समारभ्यते[१] । तस्य[२] च अयं अभिसम्बन्धः— इह अनन्तरोद्देशके पृथ्वीकायजीवाः प्रतिपादिताः, तद्वधे बन्धो विरतिश्च । साम्प्रतं क्रमायातस्य अप्कायस्य जीवत्वं तद्वधे बन्धो विरतिश्च प्रतिपाद्यते इति। अनेन सम्बन्धेन आयातस्य अस्योद्देशकस्य चत्वारि अनुयोगद्वाराणि वाच्यानि । तत्र नामनिष्पन्ने निक्षेपे **अप्कायोद्देशकः** । तत्र पृथिवीकायजीवस्वरूपसमधिगतये[३] यानि नव निक्षेपादीनि द्वाराणि उक्तानि अप्कायेऽपि तान्येव समानतया[४] अतिदेष्टुकामः कानिचिद् विशेषाभिधित्सया उद्धर्तुकामश्च **निर्युक्तिकारो** गाथामाह—

[नि०] **आउस्स वि दाराइं ताइं जाइं हवंति पुढवीए ।**
**णाणत्ती उ[५] विहाणे परिमाणुवभोग-सत्थे य ॥१०६॥**

**आउस्से**त्यादि । **अप्कायस्यापि तानि** एव **द्वाराणि भवन्ति यानि पृथिव्याः** प्रतिपादितानीति । **नानात्वं** भेदरूपं **विधान-परिमाण-उपभोग-शस्त्र**विषयं द्रष्टव्यम् । **च**शब्दाद् लक्षणविषयं च । **तु**शब्दो अवधारणार्थः[६], एतद्गतमेव नानात्वम्, नान्यगतमिति ॥१०६॥ तत्र **विधानं**=प्ररूपणा, तद्गतं नानात्वं दर्शयितुमाह—

[नि०] **दुविहा[७] य आउजीवा सुहुमा तह बायरा य लोयम्मि ।**
**सुहुमा य सव्वलोए पंचेव[८] य बायरविहाणा ॥१०७॥**

**दुविहा ये**त्यादि । स्पष्टा ॥१०७॥ तत्र पञ्च बादरविधानानि दर्शयितुमाह—

[नि०] **सुद्धोदए य उस्सा[९] हिमे य महिया य हरतणू चेव ।**
**बायर आउविहाणा पंचविहा वण्णिया एए ॥१०८॥ दारं ॥**

**सुद्धोदये**त्यादि । **शुद्धोदकं** तडाग-समुद्र-नदी-ह्रदाऽवटादिगतं अवश्यायादिरहितमिति। **अवश्यायः** रजन्यां यः स्नेहः पतति । **हिमं** तु शिशिरसमये शीतपुद्गलसम्पर्काद् जलमेव कठिनीभूतमिति । गर्भमासादिषु सायं प्रातः वा धूमिकावपातो[१०] **महिका** इत्युच्यते । वर्षा-शरत्कालयोः हरिताङ्कुरमस्तकस्थितजलबिन्दुः भूमिस्नेहसम्पर्कोद्भूतो

---

टि० १. **प्रारभ्यते** ख ग च ॥ २. **अस्य** ग ॥ ३. **०समभिगतये** ख ॥ ४. **०या निर्देष्टुकामः** च ॥ ५. **य** ख ॥ ६. **०णार्थे एत०** च ॥ ७. **०हा आउज्जीवा** क ठ । **०हा इहाऽऽउजीवा** ख ॥ ८.

**हरतणु**शब्देन अभिधीयते । एवमेते पञ्च बादराप्कायविधयो व्यावर्णिताः ॥१०८॥

ननु च ≠**प्रज्ञापना**यां बादराप्कायभेदा बहवः परिपठिताः, तद्यथा— करक-शीत-उष्ण-क्षार-क्षत्र-कटु-अम्ल-लवण-वरुण-कालोद-पुष्कर-क्षीर-घृत-इक्षुरसादयः । कथं पुनस्तेषामत्र सङ्ग्रहः ? उच्यते— करकः तावत् कठिनत्वाद् हिमान्तःपाती, [1]शेषाश्च स्पर्श-रस-स्थान-वर्णमात्रभिन्नत्वाद् न शुद्धोदकमतिवर्तन्ते । यद्येवं **प्रज्ञापना**यां किमर्थोऽपरभेदानां पाठः ?, उच्यते— स्त्री-बाल-मन्दबुद्ध्यादिप्रतिपत्त्यर्थमिति । इहापि कस्मान्न तदर्थं पाठः ? इति, उच्यते— **प्रज्ञापनाध्ययन**मुपाङ्गत्वाद् आर्षम्, तत्र च युक्तः सकलभेदोपन्यासः स्त्र्याद्यनुग्रहाय, निर्युक्तयस्तु सूत्रार्थं पिण्डीकुर्वन्त्यः प्रवर्तन्त इत्यदोषः ।

[2]एते बादराप्कायाः समासतो द्वेधा—पर्याप्तका अपर्याप्तकाश्च । तत्र अपर्याप्तका वर्णादीन् असम्प्राप्ताः । पर्याप्तकास्तु वर्ण-गन्ध-रस-स्पर्शादिभिः सहस्राग्रशो भिद्यन्ते । ततश्च सङ्ख्येयानि योनिप्रमुखानि शतसहस्राणि भवन्ति भेदानामिति अवगन्तव्यम् । संवृतयोनयश्च एते । सा च योनिः सचित्ता-ऽचित्त-मिश्रभेदात् त्रिधा, पुनश्च शीत-उष्ण-उभयभेदात् त्रिधैव । एवं गण्यमाना योनीनां सप्त लक्षा भवन्ति । प्ररूपणानन्तरं परिमाणद्वारमाह—

[नि०] **जे बायरपज्जत्ता पयरस्स असंखभागमेत्ता ते ।**
**सेसा तिन्नि वि रासी वीसं लोगा असंखेज्जा ॥१०९॥** दा०॥

**जे बायरे**त्यादि । **ये** बादराप्कायपर्याप्तका **ते** संवर्तितलोकप्रतरासङ्ख्येय-भागवर्तिप्रदेशराशिपरिमाणाः । **शेषाः** तु **त्रयोऽपि राशयः विष्वक्**= पृथग् असङ्ख्येय-लोकाकाशप्रदेशराशिपरिमाणा इति । विशेषश्चायम्— बादरपृथिवीकायपर्याप्तकेभ्यो बादराप्कायपर्याप्तका असङ्ख्येयगुणाः, बादरपृथ्वीकायापर्याप्तकेभ्यो बादराप्कायापर्याप्तका असङ्ख्येयगुणाः, सूक्ष्मपृथिवीकायापर्याप्तकेभ्यः सूक्ष्माप्कायापर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवीकायपर्याप्तकेभ्यः सूक्ष्माप्कायपर्याप्तका विशेषाधिकाः ॥१०९॥

साम्प्रतं परिमाणद्वारानन्तरं चशब्दसूचितं लक्षणद्वारमाह—**जहे**त्यादि । अथवा पर

---

**टि०** १. **शेषास्तु** ख ग च ॥ २. **त एते बा०** कप्रतिमृते ॥

**वि०टि०** ≠ से किं तं बादरआउकाइया ? बादरआउकाइया अणेगविहा पन्नत्ता, तं जहा-उस्सा हिमए महिया करए हरतणुए सुद्धोदए सीतोदए उसिणोदए खारोदए खट्टोदए अंबिलोदए लवणोदए वारुणोदए खीरोदए घओदए खोतोदए रसोदए, जे यावन्ने तहप्पगारा ॥ (**प्रज्ञा० प० २८ सू० १६**) ॥

आक्षिपति—नाप्कायो जीवः, [1]तल्लक्षणायोगात्, प्रश्रवणादिवदिति । अस्य हेतोः असिद्धतोद्भावनार्थं दृष्टान्तद्वारेण लक्षणमाह—

[नि०] **जह हत्थिस्स सरीरं [2]कललावत्थस्स अहुणो[ ?ऽहुणु ]ववन्नस्स ।**
**[3]जह वोदगअंडस्स व एसुवमा आउजीवाणं ॥११०॥** दारा ॥

**जहे**त्यादि । **यथा हस्तिनः शरीरं कललावस्थायां अधुनोत्पन्नस्य** द्रवं चेतनं च दृष्टम् ; एवं [4]अप्कायोऽपि इति । **यथा वा** उदकप्रधानं अण्डकं **उदकाण्डकम्** अधुनोत्पन्नमित्यर्थः, तन्मध्ये व्यवस्थितं रसमात्रं असञ्जातावयवं अनभिव्यक्तचञ्च्वादिप्रविभागं चेतनावद् दृष्टम् । **एषा** एव **उपमा अब्जीवानाम**पि इति । **हस्तिशरीरकलल**ग्रहणं च महाकायत्वात् तद् बहु भवतीत्यतः सुखेन प्रतिपद्यते । **अधुनोपपन्न**ग्रहणं सप्ताहपरिग्रहार्थम्, यतः सप्ताहमेव कललं भवति, परतस्तु अर्बुदादि । अण्डकेऽपि ⊕उदकग्रहणं एवमर्थमेव । प्रयोगश्चायम्—सचेतना आपः, शस्त्रानुपहतत्वे सति द्रवत्वात्, हस्तिशरीरोपादानभूतकललवत् । Δविशेषणोपादानात् प्रश्रवणादिव्युदासः । तथा सात्मकं तोयम्, अनुपहत[5]द्रवत्वात्, अण्डकमध्य[6]स्थितकललवदिति । तथा आपो जीवशरीराणि, छेद्यत्वाद् भेद्यत्वाद् उत्क्षेप्यत्वाद् भोज्यत्वाद् भोग्यत्वाद् घ्रेयत्वाद् रसनीयत्वात् स्पर्शनीयत्वात् [7]दृश्यत्वाद् [8]द्रव्यत्वाद्, एवं सर्वेऽपि शरीरधर्मा हेतुत्वेन उपन्यसनीयाः, गगनवर्जभूतधर्माश्च रूपवत्त्वा-ऽऽकारवत्त्वादयः । सर्वत्र चायं दृष्टान्तः—सास्ना-विषाणादिसङ्घातवदिति । ननु च रूपवत्त्वा-ऽऽकारवत्त्वाद[9]यो धर्माः परमाणुष्वपि दृष्टा इति अनैकान्तिकता ?; नैतदेवम्, यदत्र छेद्यत्वादि हेतुत्वेन उपन्यस्तं तत् सर्वं इन्द्रियव्यवहारानुपाति, न च तथा परमाणवः, [10]अतः कारणाद् अतीन्द्रियपरमाणुव्यवच्छेदः । यदि वा नैवासौ विपक्षः, सर्वस्य पुद्गलद्रव्यस्य द्रव्यशरीराभ्युपगमात्, जीवसहिताऽ-सहितत्वं [11]तु विशेषः, उक्तं च—

---

टि० १. **तल्लक्षणरहितत्वात्** ख च ॥ २. **कललाकलियस्स** अहु० छ ज ॥ ३. होइ **उदगंडगस्स य एसुवमा सव्वजीवाणं** ख ठ ।....**व तओवमा आउजी०** छ । ....**य तओवमा आउजी०** ज झ । ...**वि तयोवमा आउजी०** ञ ॥ ४. **०प्कायेऽपीति** क ॥ ५. **०द्रव्यत्वात्** ख ग घ ॥ ६. **०स्थकलल० ख च** ॥ ७. **दृश्यद्रव्यत्वाद्** क घ ॥ ८. द्रवत्वाद् च ॥ ९. **०यो भूतधर्माः** ख ग च ॥ १०. **अतः प्रकरणाद्** कप्रतिमृते ॥ ११. **च** घ ङ ॥

वि०टि० ⊕ "**उदकग्रहणमेव** इति सप्ताहःपरिग्रहार्थम्" जै०वि०प० ॥ Δ '**शस्त्रानुपहतत्वमि**'ति विशेषणम् ॥

**"तणवो ऽणब्भाइविगारमुत्तजाइत्तओ ऽणिलंता उ ।**

**सत्था-ऽसत्थहया उ, निज्जीव-सजीवरूवा उ ॥" [विशेषाव०१७५९]**

एवं शरीरत्वे सिद्धे सति प्रमाणम्—सचेतना हिमादयः, [1]कदाचिद् अप्कायत्वाद्, इतरोदकवदिति । तथा सचेतना आपः, क्वचित् खातभूमिस्वाभाविकसम्भवत्वात्, दर्दुरवत् । अथवा सचेतना अन्तरिक्षोद्भवा आपः, स्वाभाविकव्योमसम्भूत[2]सम्पातित्वाद्, मत्स्यवत्, अत एते एवंविधलक्षणभाक्त्वाद् जीवा भवन्ति अप्कायाः ॥११०॥

साम्प्रतं उपभोगद्वारमाह—

[नि०] **ण्हाणे पियणे तह धोयणे य भत्तकरणे य सेए य ।**
**आउस्स उ परिभोगो गमणा-ऽऽगमणे [3]य जाणाणं ॥१११॥**

**ण्हाणे** इत्यादि । स्नान-पान-धावन-भक्तकरण-सेक-यानपात्रोडुप-गमना-ऽऽगमनादिः उपभोगः ॥१११॥ ततश्च तत्परिभोगाभिलाषिणो जीवा एतानि कारणानि उद्दिश्य अप्कायवधे प्रवर्तन्त इति दर्शयितुमाह—

[नि०] **एएहिँ कारणेहिं हिंसंती आउकाइए जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं उदीरेंति ॥११२॥** दारा॥

**एएहीत्यादि** । **एभिः** स्नाना-ऽवगाहनादिकैः **कारणैः** उपस्थितैः विषयविष-मोहितात्मानो निष्करुणा **अप्कायिकान् जीवान् हिंसन्ति**=व्यापादयन्ति । किमर्थं ? इति [4]आह— **सातं**=सुखं, तद् आत्मनः **अन्वेषयन्तः**=प्रार्थयन्तः, हिता-ऽहितविचारशून्यमनसः कतिपयदिवसस्थायि[5]रम्ययौवनदर्पाध्मातचेतसः [6]सदसद्विवेकरहिताः तथा विवेकिजन-संसर्गविकलाः **परस्य**=अप्कायादेः जन्तुगणस्य, **दुःखम्** असातलक्षणं, तद् **उदीरयन्ति,** असातावेदनीयं उत्पादयन्तीत्यर्थः । उक्तं च—

**"एकं हि चक्षुरमलं सहजो विवेकस्तद्वद्भिरेव सह संवसतिर्द्वितीयम् ।**
**एतद् द्वयं भुवि न यस्य स तत्त्वतोऽन्धस्तस्याऽपमार्गचलने खलु कोऽपराधः ?" ॥[ ]**॥११२॥

इदानीं शस्त्रद्वारमुच्यते—

---

**टि०** १. **क्वचिद्** क-खप्रतिभ्यां विना ॥ २. **०सम्पातत्वाद्** ख घ ङ ॥ ३. **य णावाणं** कप्रत्या विना ॥ ४. **दर्शयति** ख च ॥ ५. **०रमणीययौवन०** ख च ॥ ६. **सन्तः सद्विवेक०** ख-गप्रती ऋते ॥

**वि०टि०** ≠ "**औ( अ )णब्भा** इति अनभ्रादिविकारमूर्तिजातित्वात्" जै०वि०प० ॥ Φ "**अन( नि )लंता** इति पृथिव्यप्-तेजो-वायवः" जै०वि०प० ॥

[नि०] **उस्सिंचण गालणा धोयणे य उवकरण कोस[1] भंडे य ।**
**बायर आउक्काए एयं तु समासओ सत्थं ॥११३॥**

**उस्सिंचणे**त्यादि । शस्त्रं द्रव्य-भावभेदाद् द्विधा । द्रव्यशस्त्रं अपि समास-विभागभेदाद् द्विधैव । तत्र समासतो द्रव्यशस्त्रमिदम्– ऊर्द्ध सेचनम्=**उत्सेचन**म्, कूपादेः कोशादिना उत्क्षेपणमित्यर्थः । **गालनं** घनमसृणवस्त्राद्धान्तेन । **धावनं** वस्त्राद्युप**करण**-चर्म**कोश**–घटादि**भण्डक**विषयम् । एवमादिकं **बादराऽप्काये एतत्** पूर्वोक्तं **समासतः** सामान्येन **शस्त्रम्** । **तु**शब्दो विभागापेक्षया विशेषणार्थः ॥११३॥ विभागतस्तु इदम्–

[नि०] **किंची सकायसत्थं किंची परकाय तदुभयं किंचि ।**
**एयं तु दव्वसत्थं [2]भावे तु अस्संजमो सत्थं ॥११४॥**

**किंची**त्यादि । **किञ्चित् स्वकायशस्त्रं** ≠नादेयं तडागस्य । **किञ्चित् परकायशस्त्रं** मृत्तिका–स्नेह–क्षारादिकम् । **किञ्चित्** चोभयम् उदकमिश्रा मृत्तिका उदकस्य इति । **भावशस्त्रं त्वसंयमः** प्रमत्तस्य दुष्प्रणिहितमनो–वाक्–कायलक्षण इति ॥११४॥

शेषद्वाराणि पृथिवीकायवद् नेतव्यानि इति दर्शयितुमाह–

[नि०] **सेसाणि उ दाराइं ताइं जाइं हवंति पुढवीए ।**
**एवं आउद्देसे निज्जुत्ती कित्तिया[3] होइ ॥११५॥**

**सेसाणी**त्यादि । **शेषाणि** इति उक्तशेषाणि निक्षेप–वेदना–[4]वध–निवृत्तिरूपाणि । **तानि** एव अत्रापि द्रष्टव्यानि **यानि [5]पृथिव्यां भवन्ती**ति । **एवं** उक्तप्रकारेण **अप्कायोद्देशके निर्युक्तिः**=निश्चयेन अर्थघटना **कीर्तिता**=प्रदर्शिता **भवती**ति ॥११५॥

साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्–

**[सू०] से बेमि– से जहा वि अणगारे उज्जुकडे णियागपडिवण्णे अमायं कुव्वमाणे वियाहिते ॥१९॥**

**से बेमी**त्यादि । अस्य च अयमभिसम्बन्धः–इह अनन्तरोद्देशके परिसमाप्तिसूत्रे 'पृथिवीकायसमारम्भव्यावृत्तो मुनिः' इत्युक्तम्, न च एतावता सम्पूर्णो मुनिर्भवति, यथा च

---

टि० १. **मत्त भंडे य** ख ठ ॥ २. **भावे य असंजतो** ज झ ठ ॥ ३.०**या एसा** ख । ०**या हुंति** ज झ । ०**या हुस्स** ञ ॥ ४. ०**बन्ध०** ख ग ॥ ५. **पृथिव्या** ग ॥

वि०टि० ≠ **'नदीसम्बन्धिनम्'** इत्यर्थः ॥

भवति तथा दर्शयति[१] । तथा आदिसूत्रेण[२] सम्बन्धः— **सुधर्मस्वामी** इदमाह **श्रुतं मया** भगवदन्तिके यत् प्राक् प्रतिपादितं अन्यच्च इदमिति । एवं परम्परसूत्रसम्बन्धोऽपि [Δ]प्राग्वद् वाच्यः ।

**से** शब्दः तच्छब्दार्थे[३], स यथा पृथ्वीकायसमारम्भव्यावृत्त्युत्तरकालं सम्पूर्णानगार-व्यपदेशभाग् भवति **तदहं ब्रवीमि** । **अपिः** समुच्चये[४], यथा च अनगारो न भवति तथा च ब्रवीमि **अणगारा मो[५] त्ति एगे पवदमाणे**त्यादिना इति । न विद्यते अगारं गृहमस्य[६] इति **अनगारः** । इह च यत्यादिशब्दव्युदासेन अनगारशब्दोपादानेन एतदाचष्टे—गृहपरित्यागः प्रधानं मुनित्वकारणम्, तदाश्रयत्वात् सावद्यानुष्ठानस्य ।

निरवद्यानुष्ठायी च[७] मुनिरिति दर्शयति— **उज्जुकडे** त्ति । ऋजुः=अकुटिलः संयमो दुष्प्रणिहितमनो-वाक्-कायनिरोधः सर्वसत्त्वसंरक्षणप्रवृत्तत्वाद् दयैकरूपः सर्वत्र अकुटिल-गतिरिति यावत्, यदि वा मोक्षस्थानगमनर्जुश्रेणिप्रतिपत्तिः[८] सर्वसंवरसंयमात्, कारणे कार्योपचारं कृत्वा संयम एव सप्तदशप्रकार ऋजुः, तं करोतीति **ऋजुकृत्**, ऋजु-कारीत्यर्थः । अनेन च इदमुक्तं भवति— अशेषसंयमानुष्ठायी सम्पूर्णोऽनगारः ।

एवंविधश्च ईदृग् भवतीति दर्शयति—**नियागपडिवण्णे** त्ति । यजनं=यागः, नियतो निश्चितो वा यागः=नियागो मोक्षमार्गः, [≠]सङ्गतार्थत्वाद् धातोः सम्यग्ज्ञान-दर्शन-चारित्रात्मतया गतं सङ्गतमिति । तं नियागं सम्यग्दर्शन-ज्ञान-चारित्रात्मकं मोक्षमार्गं प्रतिपन्नः=**नियागप्रतिपन्नः** । पाठान्तरं वा **निकायप्रतिपन्नः**, निर्गतः कायः औदारिकादिः यस्माद् यस्मिन् वा सति स निकायः=मोक्षः, तं प्रतिपन्नः=**निकायप्रतिपन्नः**, तत्कारणस्य सम्यग्दर्शनादेः स्वशक्त्या अनुष्ठानात् ।

स्वशक्त्या अनुष्ठानं च अमायाविनो भवतीति दर्शयति—**अमायं कुव्वमाणे** त्ति । माया=सर्वत्र स्ववीर्यनिगूहनम्, न माया=**अमाया**, ताम् **कुर्वाणः** अनिगूहितबलवीर्यः संयमानुष्ठाने पराक्रममाणो अनगारो व्याख्यात इति । अनेन च [Φ]तज्जातीयोपादानाद्[९] अवशेषकषायापगमोऽपि द्रष्टव्य इति, उक्तं च—

---

टि० १. **दर्शयितुमाह । तथा०** ख च ॥ २. **०सूत्रेणायं सम्ब०** ग ॥ ३. **०र्थे, तद्यथा पृ०** ख ॥ ४. **०ये । स यथा** ग च ॥ ५. **मो त्तेगे पव०** ख ॥ ६. **गृहमेषामित्यनगाराः । इह** घ ङ ॥ ७. **स** च ॥ ८. **०प्रतिपत्तेः** ख-ङप्रती विना ॥ ९. **०नात् शेष०** कसंज्ञकादर्शमृते ॥

**वि०टि०** Δ अवलोक्यतां द्वितीयोद्देशकप्रथमसूत्रटीका ॥ ≠ "**यज देवपूजा-संगतिकरण-दानेषु**"-**पा०धा० १००२** ॥ Φ "**तज्जातीय** इति कषायजातीय" जै०वि०प० ॥

"**सोही य उज्जुभूयस्स, धम्मो सुद्धस्स चिट्ठइ**"[1] [उत्तरा०३।१२] त्ति ॥१९॥

तदेवं असौ उद्धृतसकलमायावल्लीवितानः किं कुर्यात् ? इत्याह—

**[सू०] जाए सद्धाए णिक्खंतो तमेव अणुपालिया विजहित्ता विसोत्तियं ॥२०॥**

**जाए सद्धाए** इत्यादि । **यया श्रद्धया** प्रवर्धमानसंयमस्थानकण्डकरूपया[2] **निष्क्रान्तः** प्रव्रज्यां गृहीतवान् **तामेव** श्रद्धां अश्रान्तो यावज्जीवं **अनुपालयेत्,** रक्षेदित्यर्थः । प्रव्रज्याकाले च प्रायशः प्रवृद्धपरिणाम एव प्रव्रजति, पश्चात् तु संयमश्रेणीं प्रतिपन्नो वर्धमानपरिणामो वा हीयमानपरिणामो वा अवस्थितपरिणामो वेति । तत्र वृद्धिकालो हानिकालो वा समयाद्युत्कर्षेण अन्तर्मौहूर्तिकः, नातः परं सङ्क्लेश-विशुद्ध्यद्धे भवतः, उक्तं च—

"**नान्तर्मुहूर्तकालमतिवृत्य शक्यं हि जगति सङ्क्लेष्टुम् ।**
**नापि विशोद्धुं शक्यं प्रत्यक्षो ह्यात्मनः सोऽर्थः ॥**

**उपयोगद्वयपरिवृत्तिः सा निर्हेतुका स्वभावत्वात् ।**
**आत्मप्रत्यक्षो हि स भावो व्यर्थाऽत्र हेतूक्तिः ॥**" [          ]

अवस्थितकालश्च द्वयोः≠वृद्धि-हानिलक्षणयोः यवमध्य-वज्रमध्ययोरष्टौ समयाः, ततः ऊर्ध्वमवश्यं पातात् । अयं च वृद्धि-हानि-अवस्थितरूपः परिणामः केवलिनां निश्चयेन गम्यः, न च्छद्मस्थानामिति । यद्यपि च प्रव्रज्याभिगमोत्तरकालं श्रुतसागरमवगाहमानः संवेग-वैराग्य-भावनाभावितान्तरात्मा कश्चित् प्रवर्धमानमेव परिणामं भजते, तथा चोक्तम्—

"**जह जह सुयमवगाहइ अइसयरसपसरसंजुयमपुव्वं ।**
**तह तह पल्हाइ मुणी नवनवसंवेगसद्धाओ ॥**" [**बृ०क०भा०११६७**]

तथापि स्तोक एव तादृक्, बहवश्च परिपतन्ति, अतो अभिधीयते—**तां एव अनुपालयेदि**ति । कथं पुनः कृत्वा श्रद्धामनुपालयेत् ? इत्याह—

**विजहे**त्यादि । **विहाय**=परित्यज्य **विश्रोतसिकां**=शङ्काम् । सा च द्विधा—सर्वशङ्का

---

**टि०** १. **वड्ढई इत्यादि । तदेव०** च । **चिट्ठइत्यादि । तदेव०** ख ॥ २. **०संयमानुष्ठानकरणरूपया** ग । **०संयमानुष्ठानकण्डकरूपया** घ । **०संयमस्थानरूपया** ख ॥

**वि०टि०** ≠ "**वृद्धि-हानिलक्षणयोः** इति ज[हा-?]४ ५ ६ ७ ८ ७ ६ ५ ४ ३ २ वृद्धिः ; हानिकालोऽप्ययमेव नवरं व्यत्ययेन" जै०वि०प० ॥

देशशङ्का च । तत्र सर्वशङ्का किमस्ति आर्हतो मार्गो[1] न वा ? इति । देशशङ्का तु किं विद्यन्ते अप्कायादयो जीवविशेषाः[2] प्रवचने अभिहितत्वात्, प्रस्पष्टचेतनात्मलिङ्गाभावाद् न विद्यन्ते इति वा ? इति एवमादिकां[3] आरेकां विहाय सम्पूर्णानगारगुणान् पालयेत् ।

यदि वा विश्रोतांसि द्रव्य-भावभेदाद् द्विधा। तत्र द्रव्यविश्रोतांसि नद्यादिश्रोतसां प्रतीपगमनानि । भावविश्रोतांसि तु मोक्षं प्रति सम्यग्दर्शनादिश्रोतसा प्रस्थितानां विरूपाणि प्रतिकूलानि गमनानि भावविश्रोतांसि, तानि विहाय सम्पूर्णानगारगुणभाग् भवति, श्रद्धां च अनुपालयेदिति । पाठान्तरं वा '**विजहित्ता पुव्वसंजोगं**' **पूर्वसंयोगः** माता-पित्रादिभिः, अस्य चोपलक्षणार्थत्वात् पश्चात्संयोगोऽपि श्वसुरादिकृतो ग्राह्यः, तं **विहाय**[4]=परित्यज्य श्रद्धामनुपालयेदिति मीलनीयम् ॥२०॥

तत्र यस्य अयमुपदेशो दीयते यथा 'विहाय विश्रोतांसि तदनु श्रद्धानुपालनं कार्यम्' स एव अभिधीयते—न केवलं भवान् एव अपूर्व इदमनुष्ठानं एवंविधं करिष्यति, किन्तु अन्यैरपि महासत्त्वैः कृतपूर्वमिति दर्शयितुमाह—

**[ सू० ] पणया वीरा महावीहिं ॥२१॥**

**प्रणताः**=प्रह्वाः, **वीराः** परीषह-उपसर्ग-कषायसेनाविजयात्, वीथिः=पन्थाः, महांश्चासौ वीथिश्च=**महावीथिः** सम्यग्दर्शनादिरूपो मोक्षमार्गो जिनेन्द्रचन्द्रादिभिः सत्पुरुषैः दक्षैः[5] प्रहतः, तं प्रति प्रह्वाः वीर्यवन्तः संयमानुष्ठानं कुर्वन्ति । ततश्च उत्तमपुरुषप्रहतोऽयं मार्ग इति प्रदर्श्य तज्जनितमार्गविश्रम्भो विनेयः संयमानुष्ठाने सुखेनैव प्रवर्तयिष्यते ॥२१॥

उपदेशान्तरमाह—**लोगं चे**त्यादि । अथवा यद्यपि भवतो मतिर्न[6] क्रमते अप्कायजीवविषये असंस्कृतत्वात्, तथापि भगवदाज्ञा इयमिति श्रद्धातव्यमित्याह—

**[ सू०२२ ] लोगं च आणाए अभिसमेच्चा अकुतोभयं ।**

**लोगं च आणाए अभिसमेच्च अकुओभयं** । अत्राधिकृतत्वाद् अप्कायलोको **लोक**शब्देन अभिधीयते । अप्काय**लोकं च**शब्दाद् अन्यांश्च पदार्थान् **आज्ञया**= मौनीन्द्रवचनेन[7] **आभिमुख्येन सम्यग् इत्वा**=ज्ञात्वा यथा अप्कायादयो जीवा इत्यवगम्य,[8] न

---

टि० १. **मार्ग उत न ? इति** । ख च ॥ २. **जीवा विशेष्यप्रवचने** च ॥ ३. **०कां आशङ्कां** ख ॥ ४. **०य त्यक्त्वा श्रद्धा०** ख ग च ॥ ५. **दक्षैः** इति कप्रतिं विमुच्यान्यत्र न वर्तते ॥ ६. **मतिर्नाक्रमते** क ॥ ७. **०न्द्रप्रवचनेन** घ ङ च ॥ ८. **इत्येवमभिगम्य** ख । **इत्येवमवगम्य** च ॥

विद्यते कुतश्चिद्धेतोः केनापि प्रकारेण जन्तूनां भयं यस्मात् सः **अकुतोभयः**= संयमः तम्, अनुपालयेदिति सम्बन्धः । यद्वा **अकुतोभयः**= अप्कायलोको, यतः असौ न कुतश्चिद् भयमिच्छति, मरणभीरुत्वात्[1] । तम् **आज्ञया अभिसमेत्य अनुपालयेद्** रक्षेदित्यर्थः । अप्कायलोकमाज्ञया अभिसमेत्य यत् कर्तव्यं तदाह—

**से बेमि—णेव सयं लोगं अब्भाइक्खेज्जा, णेव अत्ताणं अब्भाइक्खेज्जा । जे लोगं अब्भाइक्खति से अत्ताणं अब्भाइक्खति, जे अत्ताणं अब्भाइक्खति से लोगं अब्भाइक्खति ॥२२॥**

**से बेमी**त्यादि । **सो**ऽहं **ब्रवीमि**, **से**शब्दस्य युष्मदर्थत्वात् त्वां वा **ब्रवीमि** । **न स्वयम्** आत्मना **लोकः**=अप्कायलोको **अभ्याख्यातव्यः** अभ्याख्यानं नाम असदभियोगः, यथा—अचौरं चौरमित्याह । इह तु जीवा न भवन्ति आपः, केवलमुपकरणमात्रं घृत-तैलादिवत्, एषः असदभियोगः, हस्त्यादीनामपि जीवानामुपकरणत्वात् ।

स्यादारेका— ननु एतदेव अभ्याख्यानं यद् अजीवानां जीवत्वापादनम् ?; नैतदस्ति, प्रसाधितमपां प्राक् सचेतनत्वम्, यथा ह्यस्य शरीरस्य अहंप्रत्ययादिभिः हेतुभिरधिष्ठातात्मा व्यतिरिक्तः प्राक् प्रसाधितः; एवमप्कायोऽपि अव्यक्तचेतनया सचेतन इति प्राक् प्रसाधितः, न च प्रसाधितस्य अभ्याख्यानं न्याय्यम् । अथापि स्यात्—'आत्मनोऽपि शरीराधिष्ठातुः अभ्याख्यानं कर्तव्यम्', न च तत् क्रियमाणं घटामियर्तीति दर्शयति—

**'नेव अत्ताणं अब्भाइक्खेज्ज'। नैव आत्मानं** शरीराधिष्ठातारं अहं प्रत्ययसिद्धं ज्ञानाभिन्नगुणप्रत्यक्षं प्रत्याचक्षीत=अपह्नुवीत । ननु चैतदेव कथमवसीयते शरीराधिष्ठाता आत्मा अस्तीति ? उच्यते—विस्मरणशीलो देवानांप्रियः ! उक्तमपि भाणयति, तथा हि—आहृतं इदं शरीरं केनचिद् अभिसन्धिमता, कफ-रुधिरा-ऽङ्गोपाङ्गादिपरिणतेः, अन्नादिवत् । तथा उत्सृष्टमपि केनचिदभिसन्धिमता एव, आहृतत्वात्, अन्नमलवदिति[2] । तथा न ज्ञानोपलब्धिपूर्वकः परिस्पन्दो भ्रान्तिरूपः, परिस्पन्दत्वात्, त्वदीयवचनपरिस्पन्दवत् । तथा विद्यमानाधिष्ठातृव्यापारभाञ्जि इन्द्रियाणि, करणत्वात्, दात्रादिवत् । एवं कुतर्कमार्गा-नुसारिहेतुमालोच्छेदः स्याद्वादपरशुना कार्यः । अत एवंविधोपपत्तिसमधिगतं आत्मानं शुभा-ऽशुभफलभाजं न प्रत्याचक्षीत । एवं च सति **यो** हि अज्ञः कुतर्कतिमिरोपहतज्ञानचक्षुः

---

टि० १. **भीतत्वात्** ख ॥ २.. **दन्तमलवदिति** च ॥

अप्काय**लोकम् अभ्याख्याति**=प्रत्याचष्टे **स** सर्वप्रमाणसिद्धं **आत्मानं अभ्याख्याति, यश्च आत्मानम् अभ्याख्याति**–नास्म्यहम्, **स** सामर्थ्याद् अप्काय**लोकमभ्याख्याति**, यतो हि आत्मनि पाण्याद्यवयवोपेतशरीराधिष्ठायिनि प्रस्पष्टलिङ्गे अभ्याख्याते सति अव्यक्तचेतना-लिङ्गो अप्कायलोकः तेन सुतरामभ्याख्यातः । एवमनेकदोषोपपत्तिं विदित्वा न अयं अप्कायलोको अभ्याख्यातव्य इति आलोच्य साधवो न अप्कायविषयं आरम्भं कुर्वन्तीति ॥२३॥ **शाक्या**दयस्तु अन्यथा उपस्थिता इति दर्शयितुमाह–

**[ सू० ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवयमाणा, जमिणं विरूवरूवेहिं सत्थेहिं उदयकम्मसमारंभेणं उदयसत्थं समारंभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥२३॥**

**लज्जमाणे**त्यादि । **लज्जमानाः** स्वकीयं प्रव्रज्याभासं कुर्वाणाः, यदि वा सावद्यानुष्ठानेन **लज्जमानाः**=लज्जां कुर्वाणाः, **पृथग्**[1]=विभिन्नाः **शाक्य-कणभुक्**[2]-**कपिला**दिशिष्याः, **पश्य** इति शिष्यचोदना । अविवक्षितकर्मका अपि अकर्मका भवन्ति, यथा–पश्य मृगो धावति, द्वितीयार्थे वा प्रथमा सुब्व्यत्ययेन द्रष्टव्या, ततश्च अयमर्थः– **शाक्या**दीन् गृहीतप्रव्रज्यानपि सावद्यानुष्ठानरतान् **पृथग्** विभिन्नान् **पश्य** ।

किं तैः असदाचरितं येनैवं प्रदर्श्यन्ते ? इति दर्शयति–

**अनगारा वयम्** इति **एके शाक्यादयः प्रवदन्तः यदिदं** यदेतत् काक्वा[≠] दर्शयति–**विरूपरूपैः** उत्सेचना-ऽग्निविध्यापनादि**शस्त्रैः** स्वकायपरकायभेदभिन्नैः उदककर्म समारभन्ते । **उदककर्मसमारम्भेण** च उदके शस्त्रं **उदकमेव** वा **शस्त्रं** समारभन्ते । तच्च **समारभमाणो अनेकरूपान्** वनस्पति-द्वीन्द्रियादीन् **विविधं हिनस्ति** ॥२३॥

**[ सू० ]तत्थ खलु भगवता परिण्णा पवेदिता–इमस्स चेव जीवितस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव उदयसत्थं समारभति, अण्णेहिं वा उदयसत्थं समारभावेति, अण्णे**

---

टि० १. पृथग् इति भिन्नाः क ॥ २. शाक्य-उलूक-कणभुक्० ग च । शाक्य-औलौ( लू )क्य-कणभुक्० ङ ॥

वि०टि० ≠ काकु=वक्रोक्तिः ॥

**वा उदयसत्थं समारभंते समणुजाणति । तं से अहिताए, तं से अबोधीए ॥२४॥**

**[ सू० ]　से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति-एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु निरए ।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं उदयकम्म-समारंभेणं उदयसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥२५॥**

[१]तत्र **खलु भगवता परिज्ञा प्रवेदिता,** यथा—**अस्यैव जीवितव्यस्य परिवन्दन-मानन-पूजनार्थं जाति-मरण-मोचनार्थं दुःखप्रतिघातहेतुं** यत् करोति तद् दर्शयति—**स स्वयमेव उदकशस्त्रं समारभते, अन्यैश्च उदकशस्त्रं समारम्भयति, अन्यांश्च उदकशस्त्रं समारभमाणान् समनुजानीते** । तच्च उदकसमारम्भणं **तस्य अहिताय** भवति, तथा तदेव **अबोधिलाभाय** भवति ॥२४॥

**स** एतत् **सम्बुध्यमान आदानीयं** सम्यग्दर्शनादि **सम्यगुत्थाय**=अभ्युपगम्य **श्रुत्वा भगवतो अनगाराणां** वा अन्तिके **इह एकेषां** साधूनां यद् **ज्ञातं भवति** तद् दर्शयति—**एषः** अप्कायसमारम्भो **ग्रन्थः, एष खलु मोहः, एष खलु मारः, एष खलु नरकः ।**

**इत्येवमर्थं गृद्धो लोको यदिदं विरूपरूपैः शस्त्रैः उदककर्मसमारम्भेण उदक-शस्त्रं समारभमाणो अन्यान् अनेकरूपान् प्राणिनो विविधं हिनस्तीति** [२]एतत् प्राग्वद् व्याख्येयम् ॥२५॥ पुनरप्याह—

**[ सू० ]　से बेमि— संति पाणा उदयणिस्सिया जीवा अणेगा ।**

**से बेमीत्यादि** । **से**शब्द आत्मनिर्देशे, **सः** अहं एवं उपलब्धानेकाप्कायतत्त्ववृत्तान्तो **ब्रवीमि— संति पाणा**[३]=विद्यन्ते प्राणिनः [४]**उदकनिश्रिताः** पूतरक-मत्स्यादयो यान् उदकारम्भप्रवृत्तो हन्यादिति । अथवा अपरः सम्बन्धः— प्रागुक्तं उदकशस्त्रं समारभमाणोऽन्यानपि अनेकरूपान् [५]जन्तून् विविधं हिनस्तीति । तत् कथमेतत्

---

टि० १. **यतो** क घ ङ ॥ २. **एतत् प्रगृह्याख्येयम्** ख ॥ ३. **पाणा** इति कप्रतिं परित्यज्य नान्यत्रास्ति ॥ ४. **उदकमिश्रिताः** क ग ॥ ५. **प्राणिनो** ख ॥

शक्यमभ्युपगन्तुम् ? इत्यत आह— **संति पाणा** इत्यादि पूर्ववत् । कियन्तः पुनस्ते ? इति दर्शयति— **जीवा अणेगा** पुनः '**जीवो**'पादानं उदकाश्रितप्रभूतजीवभेदज्ञापनार्थम् । ततश्च इदमुक्तं भवति— एकैकस्मिन् जीवभेदे उदकाश्रिता अनेके असङ्ख्येयाः प्राणिनो भवन्ति । एवं च अब्विषयारम्भभाजः पुरुषाः तन्निश्रितप्रभूतसत्त्वव्यापत्तिकारिणो द्रष्टव्याः । **शाक्या**दयस्तु उदकाश्रितानेव द्वीन्द्रियादीन् जीवान् इच्छन्ति नोदकमिति एतदेव दर्शयति—

## इहं च खलु भो अणगाराणं उदयं जीवा वियाहिया ।

**खलु**शब्दोऽवधारणे, **इहैव ज्ञातपुत्रीये** प्रवचने द्वादशाङ्गगणिपिटके, **अनगाराणां**= साधूनाम्, **उदकं जीवाः** उदकरूपा जीवाः **च**शब्दात् तदाश्रिताश्च पूतरक-छेदनक-लोद्दणक-भ्रमरक-मत्स्यादयो जीवा **व्याख्याताः** । अवधारणफलं च नान्येषामुदकरूपा जीवाः प्रतिपादिताः ।

यद्येवं उदकमेव जीवाः, ततोऽवश्यं तत्परिभोगे सति प्राणातिपातभाजः साधवः इति ? अत्रोच्यते—नैतदेवम्, यतो वयं त्रिविधमप्कायं आचक्ष्महे— सचित्तं मिश्रमचित्तं च । तत्र यो अचित्तो अप्कायः तेन उपयोगविधिः साधूनाम्, नेतराभ्याम् । कथं पुनरसौ भवति अचित्तः ?, किं स्वभावादेव आहोश्वित् शस्त्रसम्बन्धात् ?, उभयथाऽपीति । तत्र यः स्वभावादेव अचित्तीभवति न [1]बाह्यशस्त्रसम्बन्धात् तमचित्तं जानाना अपि केवल-मनःपर्याया-ऽवधि-श्रुतज्ञानिनो न परिभुञ्जते, अनवस्थाप्रसङ्गभीरुतया, [2]यतो नु श्रूयते—

⊕[3]भगवता किल श्री[4]**वर्धमानस्वामि**ना विमलसलिलसमुल्लसत्तरङ्गः शैवलपटलत्रसादि-रहितो महाह्रदो व्यपगताऽशेषजलजन्तुको अचित्तवारिपरिपूर्णः स्वशिष्याणां तृड्बाधितानामपि पानाय नानुजज्ञे, तथा अचित्ततिलशकट-स्थण्डिलपरिभोगानुज्ञा च अनवस्थादोषसंरक्षणाय भगवता न कृतेति, श्रुतज्ञानप्रामाण्यज्ञापनार्थं च । तथा हि—सामान्यश्रुतज्ञानी बाह्येन्धनसम्प-र्कारुषितस्वरूपमेव अचित्तमिति व्यवहरति जलम्, न पुनः निरिन्धनमेव इति । अतो यद् बाह्यशस्त्रसम्पर्कात् परिणामान्तरापन्नं वर्णादिभिः तद् अचित्तं साधुपरिभोगाय [5]कल्पते ।

किं पुनस्तत् शस्त्रम् ? इत्यत आह—

---

**टि०** १. **बाह्यशस्त्रसम्पर्कात्** ख च । **बाह्यशस्त्रसम्बन्धत्वात्** घ ङ ॥ २. **यतोऽनुश्रूयते** ख ॥ ३. **भगवन्तः** घ । **भगवता श्रीवर्ध०** च ॥ ४. **०स्वामिनो** घ ॥ ५. **परिकल्पते** च ॥

**वि०टि०** ⊕ तुलना-**बृ०क०भा०११७-११९** । दृश्यतां परिशिष्टं तृतीयम् ॥

**सत्थं चेत्थ अणुवीयि पास ।**

**सत्थं चेत्थ अणुवीयी पासे**त्यादि । शस्यन्ते=हिंस्यन्ते अनेन प्राणिन इति **शस्त्रम्,** तच्च उत्सेचन-गालन-उपकरणधावनादि स्वकायादि च, वर्णाद्यापत्तयो वा पूर्वावस्था-विलक्षणाः शस्त्रम्, तथा हि—अग्निपुद्गलानुगतत्वाद् ईषत्पिङ्गलं जलं भवति उष्णम्, गन्धतोऽपि धूमगन्धि, रसतो विरसम्, स्पर्शत उष्णम्, तच्च उद्वृत्त[1]त्रिदण्डम् । एवं-विधावस्थं यदि ततः कल्पते, नान्यथा। तथा कचवर-गोकरीष-मूत्र-ऊषादीन्धनसम्बन्धात् स्तोक-मध्य-बहुभेदात्, स्तोकं स्तोके प्रक्षिपतीत्यादिचतुर्भङ्गिकाभावना कार्या । एवमेतत् त्रिविधं शस्त्रम् । **च**शब्दोऽवधारणार्थः, अन्यतमशस्त्रसम्पर्कविध्वस्तमेव ग्राह्यम्, नान्यथा इति । **एत्थ** त्ति एतस्मिन् अप्काये प्रस्तुते, **अनुविचिन्त्य**=विचार्य, इदमस्य शस्त्रं इत्येवं ग्राह्यम्। **पश्य** इत्यनेन शिष्यस्य चोदनेति ।

तदेवं नानाविधं शस्त्रमप्कायस्य अस्तीति प्रतिपादितम् । [2]एतदेव दर्शयति—

**पुढो सत्थं पवेदितं । अदुवा अदिण्णादाणं ॥२६॥**

**पुढो सत्थं पवेदितं** । **पृथक्**=विभिन्नं उत्सेचनादिकं **शस्त्रं प्रवेदितम्**=आख्यातं भगवता। पाठान्तरं वा— **पुढोऽपासं पवेदितं** एवं **पृथक्** विभिन्नलक्षणेन शस्त्रेण परिणा-मितं उदकग्रहणं **अपाशं प्रवेदितम्**=आख्यातं भगवता, अपाशः=अबन्धनम्, शस्त्रपरिणा-मितोदकग्रहणं अबन्धनं आख्यातमिति यावत् ।

एवं तावत् साधूनां सचित्त-मिश्राप्कायपरित्यागेन अचित्तपयसा परिभोगः प्रतिपादितः। ये पुनः **शाक्या**दयो अप्कायोप[3]भोगप्रवृत्ताः ते नियमत एव अप्कायं विहिंसन्ति, तदाश्रितांश्च अन्यानिति । तत्र न केवलं प्राणातिपातापत्तिरेव तेषाम्, किमन्यत् ? इत्यत आह—

**अदुवा अदिन्नादाणं** ति । **अथवा** इति पक्षान्तरोपन्यासद्वारेण अभ्युच्चयोपदर्शनार्थः, अशस्त्रोपहताप्कायोपभोगकारिणां न केवलं प्राणातिपातः, अपि तु **अदत्तादानम**पि तत् तेषाम्, यतो यैः अप्कायजन्तुभिः यानि शरीराणि निर्वर्तितानि तैः अदत्तानि ते तानि उपभुञ्जते । यथा कश्चित् पुमान् सचित्त**शाक्य**भिक्षुकशरीरकात् खण्डमुत्कृत्य गृह्णीयाद्, अदत्तं हि तस्य तत्,

---

**टि०** १. **०त्तदण्डम्** क ख ग ॥ २. **एवमेतदेव** ङ ॥ ३. **०भोगपरिवृत्ता( ता )स्ते** ङ ॥

परपरिगृहीतत्वात् परकीयगवाद्यादानवत्, एवं तानि शरीराणि अब्जीवगृहीतानि गृह्णतो अदत्तादानमवश्यम्भावि स्वाम्यनुज्ञानाभावादिति[१] । ननु यस्य तत् तडाग-कूपादि तेन अनुज्ञातं सकृत् तत्पय इति, ततश्च न अदत्तादानम्, स्वामिनाऽनुज्ञातत्वात् परानुज्ञातपश्वादिघातवत् । ननु एतदपि साध्यावस्थमेव उपन्यस्तम्, यतः पशुरपि शरीरप्रदानविमुख एव भिन्नार्यमर्यादैः उच्चैः आरटन् विशस्यते, ततश्च कथमिव न अदत्तादानं स्यात् ? न च अन्यदीयस्य अन्यः स्वामी दृष्टः परमार्थचिन्तायाम् । ननु एवमशेषलोकप्रसिद्धगोदानादिव्यवहारः त्रुट्यति, त्रुट्यतु नाम एवंविधपापसम्बन्धः, तद् हि देयं यद् दुःखितं स्वयं न भवति, दासी-[≠]बलीवर्दादिवत्, न च अन्येषां दुःखोत्पत्तेः कारणं हल-खड्गादिवत् । एतद्व्यतिरिक्तं दातृ-परिगृहीत्रोः एकान्तत एव उपकारकं देयं प्रतिजानते जिनेन्द्रमतावलम्बिनः[२], उक्तं च–

"**यत् स्वयमदुःखितं स्याद्, न च परदुःखे निमित्तभूतमपि ।**
**केवलमुपग्रहकरं, धर्मकृते तद् भवेद्देयम्**[३] **॥**" [          ] इति ।

तस्माद् अवस्थितमेतत्– तेषां तद् अदत्तादानमपीति ॥२६॥

साम्प्रतमेतद् दोषद्वयं स्वसिद्धान्ताभ्युपगमद्वारेण परः परिजिहीर्षुराह–

**[सू०] कप्पइ णे कप्पइ णे पातुं, अदुवा विभूसाए । पुढो सत्थेहिं विउट्टंति ॥२७॥**

**कप्पइ णे कप्पइ णे पाउं, अदुवा विभूसाए** । अशस्त्रोपहतोदकारम्भिणो हि चोदिताः सन्त एवमाहुः, यथा– "नैतत् स्वमनीषिकातः समारम्भयामो वयम्, किन्तु आगमे निर्जीवत्वेन अनिषिद्धत्वात् **कल्पते**=युज्यते, **नः**=अस्माकं, **पातुम्**=अभ्यवहर्तुमि"ति । वीप्सया च नानाविधप्रयोजनविषय उपभोगो[४] अभ्यनुज्ञातो भवति, तथा हि– **आजीविक-भस्मस्नाय्यादयो** वदन्ति पातुमस्माकं कल्पते, न स्नातुं वारिणा; **शाक्य-परिव्राजकादयस्तु** स्नान-पाना-ऽवगाहनादि सर्वं कल्पते इति भाषन्ते ।

एतदेव स्वनामग्राहं दर्शयति–**अथवा** उदकं **विभूषार्थमनुज्ञातं** नः समये । विभूषा च कर-चरण-पायु-उपस्थ-मुखप्रक्षालनादिका वस्त्र-भण्डकादिप्रक्षालनात्मिका वा। एवं

---

टि० १. ०नुज्ञाभावादिति च ॥ २. **जिनेन्द्र-वचनावलम्बिनः** ख च ॥ ३. **धर्मकृते भवति तद् देयम्** ख ॥ ४. **उपभोगोऽनुज्ञातो** घ ॥

वि०टि० ≠ "**बलीवद्द( र्द )** इति वैधर्म्यदृष्टान्तः" जै०वि०प० ॥

स्नानादिशौचानुष्ठायिनां नास्ति कश्चिद्दोष इति । एवं ते परिफल्गुवचसः **परिव्राजकाद**यो निजराद्धान्तोपन्यासेन मुग्धमतीन् विमोह्य किं कुर्वन्ति ? इत्याह–

**पुढो सत्थेहिं विउट्टंति** । **पृथग्** विभिन्नलक्षणैः नानारूपैः उत्सेचनादि**शस्त्रैः** ते अनगारायमाणाः **विउट्टंति** त्ति अप्कायजीवान् जीवनाद् व्यावर्तयन्ति, व्यपरोपयन्तीत्यर्थः । यदि वा **पृथग्** विभिन्नैः **शस्त्रैः** अप्कायिकान् **विविधं कुट्टन्ति** छिन्दन्तीत्यर्थः, कुट्टेः[1] छेदनार्थत्वात् ॥२७॥

अधुना एषां आगमानुसारिणां आगमाऽसारत्वप्रतिपादनाय आह–

## [ सू० ] एत्थ वि तेसिं णो णिकरणाए ॥२८॥

**एतस्मिन्नपि** प्रस्तुते स्वागमानुसारेण अभ्युपगमे सति '**कप्पइ णे कप्पइ णे पाउं, अदुवा विभूसाए**[2]' त्ति एवंरूपे[3], **तेषां** अयमागमो यद्बलाद् अप्कायपरिभोगे ते प्रवृत्ताः स स्याद्वादयुक्तिभिरभ्याहतः सन् **नो निकरणाए** त्ति नो निश्चयं कर्तुं समर्थो भवति । न केवलं तेषां युक्तयो न निश्चयाय अलम्, अपि तु आगमोऽपीति **अपि**शब्दः ।

कथं पुनः तदागमो निश्चयाय न अलमिति ? अत्र उच्यते– ते एवं प्रष्टव्याः– 'कोऽयमागमो नाम यदादेशात् कल्पते भवतां अप्कायारम्भः ?'। ते आहुः– 'प्रतिविशिष्टानुपूर्वीविन्यस्तवर्णपदवाक्यसङ्घात आप्तप्रणीत आगमो नित्योऽकर्तृको वा' । ततश्च एवमभ्युपगते[4] यो येन प्रतिपन्न आप्तः स निराकर्तव्यः– अनाप्तोऽसौ, अप्कायजीवाऽपरिज्ञानात् तद्वधानुज्ञानाद् वा, भवानिव । जीवत्वं च अपां प्राक् प्रसाधितमेव, ततः तत्प्रणीतागमोऽपि सद्धर्मचोदनायां अप्रमाणम्, अनाप्तप्रणीतत्वाद् रथ्यापुरुषवाक्यवत् । अथ नित्यो अकर्तृकः समयोऽभ्युपगम्यते ततो नित्यत्वं दुष्प्रतिपादम्, यतः शक्यते वक्तुम्– भवदभ्युपगतः समयः सकर्तृकः, वर्ण-पद-वाक्यात्मकत्वाद्, विधि-प्रतिषेधात्मकत्वाद्, उभयसम्मतसकर्तृकग्रन्थसन्दर्भवदिति । अभ्युपगम्य वा ब्रूमः–अप्रमाणं असौ, नित्यत्वाद्, आकाशवत्। यच्च प्रमाणं तद् अनित्यं दृष्टं, प्रत्यक्षादिवदिति । तथा विभूषासूत्रावयवे≠ऽपि पृष्टा न प्रत्युत्तरदाने क्षमाः । यतियोग्यं स्नानं न भवति, कामाङ्गत्वात्,

---

टि० १. **कुट्टेर्धातोः छेदनार्थत्वात्** क-घप्रती ऋते ॥ २. **विभूसणाए त्ति** च । **विहूसाए त्ति** ग ॥ ३. **एवंरूपः तेषा०** ख ॥ ४. **०मभ्युपगमने** घ ङ ॥

**वि०टि०** ≠ "**सूत्रावयवे** इति कप्पय णे इत्यादि" जै०वि०प० ॥

मण्डनवत्। कामाङ्गता च सर्वजनप्रसिद्धा, तथा चोक्तम्—

**"स्नानं मद-दर्पकरं, कामाङ्गं प्रथमं स्मृतम् ।**
**तस्मात् कामं परित्यज्य, नैव स्नान्ति दमे रताः ॥" [ ]**

शौचार्थोऽपि न Φपुष्कलः, वारिणा बाह्यमलापनयनमात्रत्वात्, न हि अन्तर्व्यवस्थितकर्म[१]मलक्षालनसमर्थं वारि दृष्टम् । तस्मात् शरीर-वाङ्-मनसां अकुशलप्रवृत्तिनिरोधो भावशौचमेव कर्मक्षयाय अलम् । तच्च वारिसाध्यं न भवति, कुतः ? अन्वय-व्यतिरेक-समधिगम्यत्वात् सर्वभावानाम्, न हि मत्स्यादयः तत्र [२]स्थिता मत्स्यादित्वकर्मक्षयभाक्त्वेन अभ्युपगम्यन्ते, विना च वारिणा महर्षयो विचित्रतपोभिः कर्म क्षपयन्तीति । अतः स्थितमेतत्— तत्समयो [३]न निश्चयाय प्रभवतीति ॥२८॥

तदेवं निःसपत्नं अपां जीवत्वं प्रतिपाद्य तत्प्रवृत्ति-निवृत्तिविकल्पफलप्रदर्शनद्वारेण उपसञ्जिहीर्षुः सकलमुद्देशार्थमाह—

**[ सू० ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाया भवंति, एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति ॥२९॥**

**[ सू० ] तं परिण्णाय मेहावी णेव सयं उदयसत्थं समारभेज्जा, णेवऽण्णेहिं उदयसत्थं समारभावेज्जा, उदयसत्थं समारभंते वि अण्णे ण समणुजाणेज्जा ॥३०॥**

**[ सू० ] जस्सेते उदयसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णातकम्मे त्ति बेमि ॥३१॥**

**एत्थ सत्थमि**त्यादि यावत् **से हु मुणी परिण्णायकम्मे त्ति बेमि । एतस्मिन्** अप्काये **शस्त्रं** द्रव्य-भावरूपं **समारभमाणस्य इत्येते [४]समारम्भा** बन्धकारणत्वेन **अपरिज्ञाता भवन्ति । अत्रैव** अप्काये **शस्त्रं असमारभमाणस्य इत्येते आरम्भा** ज्ञपरिज्ञया **परिज्ञाता भवन्ति,** प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति । तामेव प्रत्याख्यानपरिज्ञां

---

टि० १. ०मलप्रक्षालन० घ ङ च ॥ २. स्थिताः कर्मक्षयभावेनाभ्युप० ग च ॥ ३. नो ग ॥ ४. समारम्भावध-बन्ध० च ॥

वि०टि० Φ "पुष्कलः इति मुक्कलः" जै०वि०प० ॥

विशेषतो ज्ञपरिज्ञापूर्विकां दर्शयति—

**तद्** उदकारम्भणं बन्धाय इत्येवं **परिज्ञाय मेधावी**=मर्यादाव्यवस्थितो **नैव** स्वयं **उदकशस्त्रं समारभेत, नैवान्यैरुदकशस्त्रं समारम्भयेत्, नैव अन्यान् उदकशस्त्रं समारभमाणान् समनुजानीयात् ।**

**यस्यैते उदकशस्त्रसमारम्भा** द्विधा **परिज्ञाता भवन्ति स एव मुनिः परिज्ञातकर्मा** भवति, **ब्रवीमीति** पूर्ववदिति ॥२९-३१॥

**॥ [१]शस्त्रपरिज्ञायां तृतीयोद्देशकः समाप्तः ॥छ॥**

---

टि० १. शस्त्रपरिज्ञायास्तृतीयोद्देशकः परिसमाप्तः ॥ च ॥

## ॥ चतुर्थः तेजउद्देशकः ॥

उक्तस्तृतीयोद्देशकः । साम्प्रतं चतुर्थ [१]आख्यायते । अस्य च अयं अभिसम्बन्धः– इह अनन्तरोद्देशके मुनित्वप्रतिपत्तये अप्कायः प्रतिपादितः, तद् अधुना तदर्थमेव क्रमायाततेजस्कायप्रतिपादनाय अयमुद्देशकः समारभ्यते । तस्य च उपक्रमादीनि चत्वारि अनुयोगद्वाराणि वाच्यानि तावद् यावद् नामनिष्पन्ने निक्षेपे **तेजउद्देशक** इति नाम । तत्र तेजसो निक्षेपादीनि द्वाराणि वाच्यानि । अत्र च पृथिवीविकल्पतुल्यत्वात् केषाञ्चिदतिदेशो द्वाराणाम्, अपरेषां तद्विलक्षणत्वाद् अपोद्धार इति । एतद् द्वयमुररीकृत्य **निर्युक्तिकृद्** गाथामाह–

[नि०] **तेउस्स [२]वि दाराइं ताइं जाइं हवंति पुढवीए ।**
**णाणत्ती [३]उ विहाणे परिमाणुवभोग-सत्थे य ॥११६॥**

**तेउस्स वी**त्यादि । **तेजसोऽपि**=अग्नेरपि, **द्वाराणि** निक्षेपादीनि, **यानि पृथिव्याः** [४]समधिगमे अभिहितानि **तान्येव** वाच्यानि । अपवादं दर्शयितुमाह– **नानात्वं**=भेदो, **विधान-परिमाण-उपभोग-शस्त्रेषु । तुः** अवधारणे, विधानादिष्वेव नानात्वम्, नान्यत्र इति । **च**शब्दाद् लक्षणद्वारपरिग्रहः ॥११६॥

यथाप्रतिज्ञातनिर्वहणार्थं आदिद्वारव्याचिख्यासया आह–

[नि०] **दुविहा [५]उ तेउजीवा सुहुमा तह बायरा य लोयम्मि ।**
**सुहुमा य सव्वलोए पंचेव य बायरविहाणा ॥११७॥**

**दुविहे**त्यादि । स्पष्टा ॥११७॥ बादरपञ्चभेदप्रतिपादनाय आह–

[नि०] **इंगाल अगणि अच्ची जाला तह मुम्मुरे य बोधव्वे ।**
**बायरतेउविहाणा पंचविहा वण्णिया एए ॥११८॥ द्वारं ॥**

**इंगाले**त्यादि । दग्धेन्धनो विगतधूमज्वालः **अङ्गारः** इन्धनस्थप्लोषक्रियाविष्टरूपः, तथा विद्युद्-उल्का-ऽशनिसङ्घर्षसमुत्थितः सूर्यमणिसंसृतादिरूपश्च **अग्निः, दाह्यप्रतिबद्धो** ज्वालाविशेषः **अर्चिः, ज्वाला** छिन्नमू[६]ला अनङ्गारप्रतिबद्धा, प्रविरलाग्निकणानुविद्धं भस्म

---

टि० १. **आरभ्यते** कप्रतिं विना ॥ २. **व** छ ॥ ३. **ए( य )** ख ॥ ४. **समभिगमे** ख ॥ ५. **य** क-ठवर्जितप्रतिषु ॥ ६. **०ला न अङ्गार०** क ॥

**मुर्मुरः, एते** बादरा अग्निभेदाः **पञ्च** भवन्तीति≠ ॥११८॥

एते च बादराग्नयः स्वस्थानाङ्गीकरणाद् मनुष्यक्षेत्रे अर्द्धतृतीयेषु द्वीप-समुद्रेषु अपि अव्याघातेन पञ्चदशसु कर्मभूमिषु ⊕व्याघाते सति पञ्चसु विदेहेषु, नान्यत्र, उपपाताङ्गीकरणेन लोकासङ्ख्येयभागवर्तिनः । तथा च **आगमः**–

**''उववाएणं दोसुद्धकवाडेसुं तिरियलोयतट्टे य ।''** **[ प्रज्ञा०सू०२।१५५ ]**

अस्य अयमर्थः-अर्द्धतृतीयद्वीपसमुद्रबाहल्ये पूर्वाऽपरदक्षिणोत्तरस्वयम्भूरमण-पर्यन्ताऽऽयते ऊर्ध्वाऽधोलोकप्रमाणे कपाटे, तयोः प्रविष्टा बादराग्निषु उत्पद्यमानकाः तद्व्यपदेशं लभन्ते, तथा **तिरियलोयतट्टे य** त्ति तिर्यग्लोक-स्थालके[1] च व्यवस्थितो बादराग्निषु उत्पद्यमानो बादराग्निव्यपदेशभाग् भवति । **अन्ये** तु व्याचक्षते– तयोः तिष्ठतीति तत्स्थः, तिर्यग्लोकश्चासौ तत्स्थश्च=तिर्यग्लोक-तत्स्थः, तत्र च स्थित उत्पित्सुः बादराग्निव्यपदेश-मासादयति । अस्मिंश्च व्याख्याने कपाटान्तर्गत एव गृह्यते, स च द्वयोः उर्ध्वकपाटयोः इति अनेनैव उपात्त इति तद्व्याख्यानाभिप्रायं न विद्मः । कपाटस्थापना चेयम्–




**बादराग्निकायस्य उपपातक्षेत्रम्**

---

**टि०** १. **०स्थानके च** ॥

**वि०टि०** ≠ ''से किं तं बादरतेउकाइया ? बादरतेउकाइया अणेगविहा पण्णत्ता, तं जहा–इंगाले जाला मुम्मुरे अच्ची अलाए सुद्धागणी उक्का विज्जू असणी णिग्धाए संघरिससमुट्ठिए सूरकंतमणिणिस्सिए, जे यावन्ने तहप्पगारे ॥'' (प्रज्ञा० प० २९ सू० १७) इति प्रज्ञापनायामनेकविधत्वमुपलभ्यते तेजस्कायस्य, तथोत्तराध्ययनेषु जीवाऽजीवविभक्त्याख्ये षट्त्रिंशत्तमेऽध्ययने-बायरा जे उ पज्जत्ता, णेगहा ते वियाहिया ॥ इंगाले मुम्मुरे अगणी, अच्चि जाला तहेव य ॥१०९॥ उक्का विज्जू य बोधव्वा णेगहा एवमायओ ।११० ॥ ⊕ ''**व्याघात** इति सुसमादौ स्निग्धत्वादिना भरतादौ न भवति'' जै०वि०प० ॥

समुद्घातेन सर्वलोकवर्तिनः ते च पृथिव्यादयो मारणान्तिकसमुद्घातेन समवहता[1] बादराग्निषु उत्पद्यमानाः तद्व्यपदेशभाजः सर्वलोकव्यापिनो भवन्ति । यत्र च बादराः पर्याप्तकाः तत्रैव बादरा अपर्याप्तकाः, तन्निश्रया तेषां उत्पद्यमानत्वात् । तदेवं सूक्ष्मा बादराश्च पर्याप्तका-ऽपर्याप्तकभेदेन[2] प्रत्येकं द्विधा भवन्ति । एते च वर्ण-गन्ध-रस-स्पर्शादेशैः सहस्राग्रशो भिद्यमानाः सङ्ख्येययोनिप्रमुख[3]शतसहस्रभेदपरिमाणा भवन्ति । तत्र एषां संवृता योनिरुष्णा च सचित्ता-ऽचित्त-मिश्रभेदात् त्रिधा, सप्त चैषां योनिलक्षा भवन्ति ।

साम्प्रतं **च**शब्दसमुच्चितं लक्षणद्वारमाह–

[नि०]  **जह देहपरीणामो रत्तिं खज्जोयगस्स सा उवमा ।**
**जरियस्स व[4] जा उण्हा[5] एसुवमा तेउजीवाणं ॥११९॥ दारं ॥**

**जहे**त्यादि । **यथा** इति दृष्टान्तोपन्यासार्थः, **देहपरिणामः** प्रतिविशिष्टा शरीरशक्तिः, **रात्रौ** इति विशिष्टकालनिर्देशः, **खद्योतक** इति प्राणिविशेषपरिग्रहः । यथा तस्य असौ देहपरिणामो जीवप्रयोगविनिर्वृत्तशक्तिः आविश्चकास्ति; एवमङ्गारादीनामपि प्रतिविशिष्टा प्रकाशादिशक्तिरनुमीयते जीवप्रयोगविशेषाविर्भाविता इति । यथा **वा ज्वरोष्मा** जीवप्रयोगं नातिवर्तते, जीवाधिष्ठितशरीरकानुपात्येव भवति **एषा** एव **उपमा** आग्नेयजन्तूनाम्, न च मृता ज्वरिणः क्वचिदुपलभ्यन्ते; एवमन्वय-व्यतिरेकाभ्यां अग्नेः सचित्तता ≠मुक्तक[6]ग्रन्थोपपत्तिमुखेन प्रतिपादिता । सम्प्रति प्रयोगमारोप्यते अयमेवार्थः– जीवशरीराणि अङ्गारादयः, छेद्यत्वादिहेतुगणान्वितत्वात्, सास्ना-विषाणादिसङ्घातवत् । तथा आत्मसंयोगाविर्भूतोऽङ्गारादीनां प्रकाशपरिणामः, शरीरस्थत्वात्, खद्योतकदेहपरिणामवत् । तथा आत्मसम्प्रयोगपूर्वको अङ्गारादीनामूष्मा, शरीरस्थत्वात्, ज्वरोष्मवत् । न चादित्यादिभिः

---

टि० १. **समुपहता** ख ॥ २. **०न द्विधा** क घ ङ॥ ३. **०प्रमुखयोनिशत०** ख ॥ ४. **व जह उण्हा** झ । **वा जउम्हा** ञ । **य जह उम्हा** ठ ॥ ५. **तओवमा** क विना । **ततोवमा** ञ ॥ ६. **मुक्तकलग्रन्थो०** च ॥

वि०टि० ≠ ''आचारे–शस्त्रपरिज्ञाया उद्दे० **मुक्तकं** मुत्कलम्'' स०वि०प० । ''**मुक्व( त्क )क** इति मुक्व(त्क)लः, वृत्तिकारेणेति शेषः'' जै०वि०प० । अयमत्राशयः– ये आदेशाः निर्युक्तिकृद्-भाष्यकृदादिभिः दर्शिताः, न च तेषां पाठः क्वापि अंगोपाङ्गेषु उपलभ्यते ते मुक्तकव्याकरणतया उच्यन्ते, यथा-**मरुदेवायाः** अत्यन्तस्थावरत्वेन सिद्धत्वम्, **कुरुट-उत्कुरुटयोः** दृष्टान्तमित्यादि एवं अत्रापि ज्ञेयम् – इति वृत्तिकारस्याशयो भाति । एतदर्थं दृश्यतां **आव०नि० पत्र ४६५, आव०चू० प्रथमभाग पत्र ६०१, बृ०क०भा० पीठिका पृ ४४-४५ टिप्पणि-६** ॥

अनेकान्तः, सर्वेषां आत्मप्रयोगपूर्वकं यत [१]उष्णपरिणामभाक्त्वम्, तस्मात् न अनेकान्तः । तथा सचेतनं तेजः, यथायोग्याहारोपादानेन वृद्धिविशेष[२]तद्विकारवत्त्वात्, पुरुषवत् । एवमादिलक्षणे[३]न आग्नेयजन्तवोऽवसेया इति ॥११९॥

उक्तं लक्षणद्वारम् । तदनन्तरं परिमाणद्वारमाह—

[नि०] **जे बायरपज्जत्ता पलियस्स असंखभागमेत्ता [४]ते ।**
**सेसा तिन्नि वि रासी वीसुं लोया असंखेज्जा ॥१२०॥ दारं ॥**

**जे बायरे**त्यादि । **ये बादरपर्याप्ता**नलजीवाः क्षेत्रपल्योपमासङ्ख्येयभागमात्रवर्तिप्रदेश[५]राशिप्रमाणा भवन्ति ते पुनः बादरपृथिवीकायपर्याप्तकेभ्यो असङ्ख्येयगुणहीनाः । **शेषाः त्रयोऽपि राशयः** पृथ्वीकायवद् भावनीयाः, किन्तु बादरपृथ्वीकायापर्याप्तकेभ्यो बादराग्न्यपर्याप्तका असङ्ख्येयगुणहीनाः, सूक्ष्मपृथ्वीकायापर्याप्तकेभ्यः सूक्ष्माग्नेयापर्याप्तका विशेषहीनाः, सूक्ष्मपृथिवीकायपर्याप्तकेभ्यः सूक्ष्माग्नेयपर्याप्तका विशेषहीना इति ॥१२०॥

साम्प्रतमुपभोगद्वारमाह—

[नि०] **डहणे पयावणे पगासणे [६]य भत्तकरणे य सेए य ।**
**बायरतेउक्काए उवभोगगुणा मणुस्साणं ॥१२१॥**

**दहणे**त्यादि । **दहनं** शरीरावयवस्य वाताद्यपनयनार्थम्, प्रकृष्टं तापनं=**प्रतापनं** शीतापनोदाय, **प्रकाशकरणम्**=उद्द्योतकरणं प्रदीपादिना, **भक्तकरणम्** ओदनादिरन्धनम्, **स्वेदः** ज्वर-विसूचिकादीनाम्, इत्येवमादिषु अनेकप्रयोजनेषु उपस्थितेषु **मनुष्याणां** बादरतेजस्कायविषया उपभोगरूपा गुणाः=**उपभोगगुणा** भवन्तीति ॥१२१॥ तदेवं एवमादिभिः कारणैरुपस्थितैः सततमारम्भप्रवृत्ता गृहिणो यत्याभासा वा सुखैषिणः तेजस्कायजन्तून् हिंसन्तीति दर्शयितुमाह—

[नि०] **एएहिँ कारणेहिं [७]हिंसंते तेउकाइए जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं उदीरेंति ॥१२२॥ दारं ॥**

---

टि० १. **उष्णपरमाणुभाक्त्वम्** ख ॥ २. **०तद्विकारत्वात्** ख-च विना ॥ ३. **०नाग्नेया जन्तवो निश्चेया इति** च । **०नाग्नेयजन्तवो निश्चेया इति** ख ॥ ४. **उ** छ विनाऽन्यत्र ॥ ५. **०राशिपरिमाणा** ख ग च ॥ ६. **य सेए य भत्तकरणे य** ख ठ ॥ ७. **हिंसंती ते०** ख ञ । **हिंसंति उ ते०** ज झ ठ ॥

**एएही**त्यादि । **एतै:** दहनादिभि: **कारणै: तेजस्कायिकान् जीवान् हिंसन्ति** इति सङ्घट्टन-परितापन-अपद्रावणानि कुर्वन्ति । **सातं**=सुखं, तद् आत्मनोऽन्विषन्त: **परस्य** बादराग्निकायस्य **दु:खम् उदीरयन्ति**=उत्पादयन्तीति ॥१२२॥ साम्प्रतं शस्त्रद्वारम् । तच्च द्रव्य-[१]भावभेदाद् द्विधा । द्रव्यशस्त्रमपि समास-विभागभेदाद् द्विधैव । तत्र समासतो द्रव्यशस्त्रप्रतिपादनाय आह–

[नि०] **[२]पुढवी य आउकाओ उल्ला य वणस्सई तसा पाणा ।**
**बायरतेउक्काए [३]एयं तु समासओ सत्थं ॥१२३॥**

**पुढवी**त्यादि । **पृथ्वी**=धूलि:, **अप्कायश्च, सार्द्रश्च वनस्पति:, त्रसा: प्राणिन:,** [४]एतद् **बादरतेजस्काय**जन्तूनां **समासत:**=सामान्येन **शस्त्रमि**ति ॥१२३॥

विभागतो द्रव्यशस्त्रमाह–

[नि०] **किंची सकायसत्थं किंची परकाय तदुभयं किंचि ।**
**एयं तु दव्वसत्थं [५]भावे अस्संजमो सत्थं ॥१२४॥ [६]दारं ॥**

**किंची**त्यादि । **किञ्चित् शस्त्रं स्वकाय** एव, अग्निकाय एव अग्निकायस्य, तद्यथा–तार्णोऽग्नि: पार्णाग्ने: शस्त्रमिति । **किञ्चिच्च परकायशस्त्रं** उदकादि । **उभयशस्त्रं** पुन: तुष-करीषादिव्यतिमिश्रा अग्नि: अपराग्ने: । तुशब्दो भावशस्त्रापेक्षया विशेषणार्थ:, **एतत् तु** पूर्वोक्तं समास-विभागरूपं पृथ्वी-स्वकायादि **द्रव्यशस्त्रमि**ति । भावशस्त्रं दर्शयति– **भावे शस्त्रम् असंयम:** दुष्प्रणिहितमनो-वाक्-कायलक्षण इति ॥१२४॥ उक्तव्यतिरिक्तद्वारातिदेशद्वारेण उपसञ्जिहीर्षु: **निर्युक्तिकृ**दाह–

[नि०] **सेसाइं दाराइं [७]ताइं जाइं हवंति पुढवीए ।**
**एवं तेउद्देसे निज्जुत्ती कित्तिया [८]एसा॥१२५॥**

**सेसाणी**त्यादि । उक्त**शेषाणि द्वाराणि तान्येव यानि** पृथिव्युद्देशके अभिहितानि । **एवं** उक्तप्रकारेण [९]**तेजस्कायोद्देशके निर्युक्ति: कीर्तिता**=व्यावर्णिता भवतीति ॥१२५॥

---

टि० १. ०भावशस्त्रभेदाद् क-खप्रती विना ॥ २. **पुढवी आउक्काए** ख ञ ठ । **पुढवीए आउक्काए** क ॥ ३. **एवं** ठ ॥ ४. **एवं बादर०** च ॥ ५. **भावे य असंजमो** ठ ॥ ६. **गाहा** ञ ॥ ७. **इमाइँ** ञ ॥ ८. **एसा ॥१२५॥ प्रथमे चतुर्थोद्देशकनिर्युक्ति:** ।छ।। झ । **एसा ॥१२५॥ अध्य०१ उद्दे० ४** ॥ ९. **तेजस्कायाभिधानोद्देशके** ख ग च ॥

साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्—

**[सू० ]　से बेमि—णेव सयं लोगं अब्भाइक्खेजा, णेव अत्ताणं अब्भाइक्खेजा। जे लोगं अब्भाइक्खति से अत्ताणं अब्भाइक्खति, जे अत्ताणं अब्भाइक्खति से लोगं अब्भाइक्खति।**

**से बेमी**त्यादि। अस्य च सम्बन्धः प्राग्वद् वाच्य इति। येन मया सामान्यात्म-पदार्थपृथिव्यप्कायजीवप्रविभागव्यावर्णनमकारि **स** एव अहं अव्यवच्छिन्नज्ञानप्रवाहः तेजो-जीवस्वरूपोपलम्भसमुपजनितजिनवचनसम्मदो **ब्रवीमि**। किं पुनस्तद्? इति दर्शयति—

**नेवे**त्यादि। इह हि प्रकरणसम्बन्धाद् **लोक**शब्देन अग्निलोको अभिधित्सितः; अतस्तमग्निलोकं जीवत्वेन **नैव स्वयम्** आत्मना **अभ्याचक्षीत,** नैव अपह्नुवीत इत्यर्थः। एतदभ्याख्याने हि आत्मनोऽपि ज्ञानादिगुणकलापानुमितस्य अभ्याख्यानमवाप्नोति। अथ च प्राक् प्रसाधितत्वाद् अभ्याख्यानं नैव आत्मनो न्याय्यम्; एवं तेजस्कायस्यापि प्रसाधितत्वाद् अभ्याख्यानं क्रियमाणं न युक्तिपथमवतरति।

एवं च अस्य युक्त्यागमबलप्रसिद्धस्य[1] अभ्याख्याने क्रियमाणे सति आत्मनोऽपि अहंप्रत्ययसिद्धस्य अभ्याख्यानं भवतः प्राप्तम्। एवमस्तु इति चेत्, तन्न इति दर्शयति—**नेव अत्ताणं अब्भाइक्खेज्जा। नैव आत्मानं** शरीराधिष्ठातारं ज्ञानगुणं[2] प्रत्यात्मसंवेद्यं प्रत्याचक्षीत, तस्य शरीराधिष्ठातृत्वेन 'आहृतं इदं शरीरं केनचिद् अभिसन्धिमता तथा त्यक्तं इदं शरीरं केनचिदभिसन्धिमतैव' इत्येवमादिभिः हेतुभिः प्रसाधितत्वात्, न च प्रसाधितसाधनं पिष्टपेषणवद् विद्वज्जनमनांसि रञ्जयति।

एवं च सति आत्मवत् प्रसाधितमग्नि**लोकं यः** प्रत्याचक्षीत **सो**ऽतिसाहसिकः **आत्मानम् अभ्याख्याति**=निराकरोति। **यश्च** आत्माऽभ्याख्यानप्रवृत्तः[3] **स** सदैव अग्नि**लोकमभ्याख्याति,** सामान्यपूर्वकत्वाद् विशेषाणाम्। सति ह्यात्मसामान्ये[4] पृथिव्याद्यात्मविभागः सिद्ध्यति, नान्यथा, सामान्यस्य विशेषव्यापकत्वात्, व्यापकविनिवृत्तौ च व्याप्यस्यापि अवश्यम्भाविनी विनिवृत्तिरिति कृत्वा।

---

**टि०** १. **युक्तागम०** घ ङ॥ २. **ज्ञानगुणप्रत्या०** क। **ज्ञानमुख्यगुणप्रत्या०** च॥ ३. **०प्रवृत्तः स एवाग्नि०** ख॥ ४. **ह्यात्मन्येव** क॥

एवमयं अग्निलोकः सामान्यात्मवद् न अभ्याख्यातव्य इति प्रदर्शितम् । अधुना अग्निजीवप्रतिपत्तौ सत्यां तद्विषयसमारम्भकटुकफलपरिहारोपन्यासाय सूत्रमाह—

**जे दीहलोगसत्थस्स खेत्तण्णे से असत्थस्स खेत्तण्णे,**

**जे असत्थस्स खेत्तण्णे से दीहलोगसत्थस्स खेत्तण्णे ॥३२॥**

**जे दीहे**त्यादि । **य** इति मुमुक्षुः, **दीर्घलोकः**=वनस्पतिः, यस्माद् असौ कायस्थित्या परिमाणेन शरीरोच्छ्रयेण च शेषैकेन्द्रियेभ्यो दीर्घो वर्तते । [1]तथा हि—कायस्थित्या तावत्—

''**वणस्सइकाइए णं भंते ! वणस्सइ[2]काइए त्ति कालओ केवचिरं होइ ? गोयमा ! अणंतं कालं, अणंताओ उस्सप्पिणि-अवसप्पिणीओ, खेत्तओ ≠अणंता लोया, असंखेज्जा पोग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइ-भागे** ।'' [ **प्रज्ञा०सू०१८।१२८८** ]

परिमाणतस्तु—

''**पडुप्पन्नवणस्सइकाइयाणं भंते ! केवतिकालस्स** Φ**निल्लेवणा सिया ? गोयमा ! पडुप्पन्नवणस्सइकाइयाणं नत्थि निल्लेवणा** ।'' [ **जीवाभि०३।२।१०२** ]

तथा शरीरोच्छ्रयाच्च दीर्घो वनस्पतिः—

''**वणस्सइकाइयाणं भंते ! के महालिया सरीरोगाहणा पण्णत्ता ? गोयमा ! साइरेगं जोयणसहस्सं सरीरोगाहणा** ।'' [ **प्रज्ञा०सू०२१।१५०६( १ )** ] न तथा अन्येषां एकेन्द्रियाणाम् । अतः स्थितमेतत्—सर्वथा **दीर्घलोको** वनस्पतिरिति । अस्य च **शस्त्रम**ग्निः, यस्मात् स हि प्रवृद्ध[3]ज्वालाकलापाकुलः सकलतरुगणप्रध्वंसनाय प्रभवति, अतोऽसौ तदुत्पादकत्वात् शस्त्रम् ।

ननु च सर्वलोकप्रसिद्ध्या कस्मादग्निरेव न उक्तः ? किं वा प्रयोजनमुररीकृत्य उक्तं दीर्घलोकशस्त्रमिति ? अत्रोच्यते—प्रेक्षापूर्वकारितया, न निरभिप्रायमेतत् कृतमिति, यस्मादयं

---

टि० १. तत्र हि ख ॥ २. **०काइय त्ति** ख । **०कातिते त्ति** ग ॥ ३. **०ज्वालामालाकुलः** च ॥

**वि०टि०** ≠ ''**अणंता लोया** इति कोऽर्थः ? अनन्तलोकेषु ये प्रदेशास्तैस्तुल्यता समयानाम् एवं च एतावान् कालो भवति ॥ एतावत्कालेन कियन्तः पुद्गलपरावर्ता भवन्ति ? इत्याह—**असंखेज्जा** इति ॥ असङ्ख्यातं बहुधा इत्याह—**ते णं** इति'' जै०वि०प० ॥ Φ ''**निल्लेवणा** इति अस्माल्लोकादुद्धारः'' जै०वि०प० ॥

उत्पाद्यमानो ज्वाल्यमानो वा हव्यवाहः समस्तभूतग्रामघाताय प्रवर्तते । वनस्पतिदाहप्रवृत्तस्तु बहुविधसत्त्वसंहतिविनाशकारी विशेषतः स्यात्, यतो वनस्पतौ कृमि-पिपीलिका-भ्रमर-कपोत-श्वापदादयः सम्भवन्ति, तथा पृथिव्यपि तरुकोटरव्यवस्थिता स्यात्, आपोऽपि अवश्यायरूपाः, वायुरपि ईषच्चञ्चलस्वभावकोमलकिशलयानुसारी सम्भाव्यते, तदेवमग्नि-समारम्भप्रवृत्त [1]एतावतो जीवान् नाशयति । अस्य अर्थस्य सूचनाय दीर्घलोकशस्त्रग्रहणं-अकरोत् सूत्रकार इति । तथा चोक्तम्—

**"जायतेजं न इच्छंति, पावगं जलइत्तए ।**
**तिक्खमण्णयरं सत्थं, सव्वओ वि दुरासयं ॥**

**पातीणं पडिणं वा वि, उड्ढं अणुदिसामवि ।**
**अहे दाहिणओ [2]वा वि, दहे उत्तरओ वि य ॥**

**भूयाणमेस माघाओ, हव्ववाहो न संसओ ।**
**तं पईवपयावट्ठा, संजया किंचि नारभे ॥"** [दशवै०६।३३-३५]

अथवा बादरतेजस्कायाः पर्याप्तकाः स्तोकाः, शेषाः पृथिव्यादयो जीवकाया बहवः । (बादराग्नेः) भवस्थितिरपि ≠त्रीणि अहोरात्राणि स्वल्पा, इतरेषां तु पृथिवी-अब्-वायु-वनस्पतीनां यथाक्रमं द्वाविंशति-सप्त-त्रि-दशवर्षसहस्रपरिमाणा दीर्घा अवसेया इति । अतो **दीर्घलोकः** पृथिव्यादिः, तस्य **शस्त्रम्** अग्निकायः, तस्य **क्षेत्रज्ञः**=निपुणः, अग्निकायं वर्णादितो जानातीत्यर्थः । **खेदज्ञो** वा, खेदः तद्व्यापारः सर्वसत्त्वानां दहनात्मकः पाकाद्यनेकशक्तिकलापोपचितः प्रवरमणिरिव जाज्वल्यमानो लब्धाग्निव्यपदेशो यतीनां अनारम्भणीयः, तमेवंविधं खेदम्= अग्निव्यापारं जानातीति **खेदज्ञः** । अतो **य** एव **दीर्घलोकशस्त्रखेदज्ञः स** एव **अशस्त्रस्य**=सप्तदशभेदस्य संयमस्य **खेदज्ञः**, संयमो हि न कञ्चिज्जीवं व्यापादयति अतो अशस्त्रम् । एवमनेन संयमेन सर्वसत्त्वाभयप्रदायिना अनुष्ठीय-मानेन अग्निजीवविषयः समारम्भः शक्यः परिहर्तुं पृथिव्यादिकायसमारम्भश्चेति, एवमसौ संयमे निपुणमतिः भवति । ततश्च निपुणमतित्वाद् विदितपरमार्थोऽग्निसमारम्भाद् व्यावृत्य संयमानुष्ठाने प्रवर्तते । इदानीं गत-प्रत्यागतलक्षणेन अविनाभावित्वप्रदर्शनार्थं विपर्ययेण

---

टि० १. **एतान् जीवान्** ख ॥ २. **यावि** क ॥

**वि०टि०** ≠ "तिन्नेव अहोरत्ता उक्कोसेण वियाहिया ॥ आउठिई तेऊणं अंतोमुहुत्तं जहन्नयं ॥" उ० अ० ३६ गा० ११३ । 'ट्ठिती वि अड्डाइज्जा राइंदिया' आचा०चू०३२ ॥

सूत्रावयवपरामर्शं करोति—

**जे असत्थस्से**त्यादि । **यश्च अशस्त्रे**=संयमे निपुणः **स** खलु **दीर्घलोकशस्त्रस्य**=अग्नेः **क्षेत्रज्ञः खेदज्ञो** वा । संयमपूर्वकं हि अग्निविषयखेदज्ञत्वम्, अग्निविषयखेदज्ञतापूर्वकं[1] च संयमानुष्ठानम्, अन्यथा तदसम्भव एव इत्येतद् गतप्रत्यागतफलमाविर्भावितं भवति ॥३२॥

कैः पुनः इदं एवं उपलब्धम् ? इत्यत आह—**वीरेही**त्यादि । अथवा[2] वक्तृप्रसिद्धौ सत्यां वाक्यप्रसिद्धिः भवति इत्यतो[3]ऽपदिश्यते—

**[ सू० ] वीरेहि एयं अभिभूय दिट्ठं संजतेहिं सता जतेहिं सदा अप्पमत्तेहिं ।**

**वीरेही**त्यादि । घनघातिकर्मसङ्घातविदारणानन्तरप्राप्तातुलकेवलश्रिया विराजन्त इति **वीराः** तीर्थकृतः, तैः **वीरैः** अर्थतो **दृष्टमेतद्** गणधरैश्च सूत्रतो[4]ऽग्निशस्त्रं दृष्टं संयमस्वरूपं चेति । किं पुनः अनुष्ठाय इदं तैरुपलब्धम् ? इत्यत्रोच्यते—**अभिभूय** त्ति । अभिभवो नामादिश्चतुर्धा । द्रव्याभिभवो रिपुसेनादिपराजयः, आदित्यतेजसा वा चन्द्र-ग्रह-नक्षत्रादितेजोऽभिभवः । भावाभिभवस्तु परीषहोपसर्गानीक-ज्ञान-दर्शनावरण-मोहाऽन्तरायकर्मनिर्दलनम्, परीषहोपसर्गादिसेनाविजयाद् विमलं चरणम्, चरणशुद्धेः ज्ञानावरणादिकर्मक्षयः, तत्क्षयाद् निरावरणं अप्रतिहतं अशेषज्ञेयग्राहि केवलज्ञानमुपजायते । इदमुक्तं भवति—परीषहोपसर्ग-ज्ञान-दर्शनावरणीय-मोहा-ऽन्तरायाणि अभिभूय केवलमुत्पाद्य तैरुपलब्धमिति । यथाभूतैः[5] तैः इदमुपलब्धं तद् दर्शयति—

**संजएहिं** ति । सम्यग् यताः=**संयताः** प्राणातिपातादिभ्यः तैः, तथा **सदा**=सर्वकालं, चरणप्रतिपत्तौ मूलोत्तरगुणभेदायां निरतिचारत्वाद्[6] यत्नवन्तः तैः । तथा **सदा** सर्वकालं न विद्यते प्रमादः मद्य-विषय-कषाय-विकथा-निद्राख्यो येषां ते **अप्रमत्ताः** तैः, एवम्भूतैः महावीरैः केवलज्ञानचक्षुषा **इदं** दीर्घलोकशस्त्रं अशस्त्रं च संयमः **दृष्टम्**=उपलब्धमिति । अत्र च **यत्न**[7]ग्रहणाद् ईर्यासमित्यादयो गुणा गृह्यन्ते, **अप्रमाद**ग्रहणात् तु मद्यादिनिवृत्तिरिति । तदेवं एतत् प्रधानपुरुषप्रतिपादितं अग्निशस्त्रमपायदर्शनाद् अप्रमत्तैः

---

**टि०** १. **०खेदज्ञानपूर्वकं** च ॥ २. **अथवा सद्वक्तृ०** घ ङ ॥ ३. **०त्यत उपदिश्यते** ग ॥ ४. **सूत्रतो दृष्टमग्निशस्त्रं संय०** ख च ॥ ५. **०भूतैः तैरेवमुप०** च ॥ ६. **त्वाद् यता यत्न०** ग ॥ ७. **यतग्रहणाद्** ग ॥

साधुभिः परिहार्यमिति । एवं प्रत्यक्षीकृतानेकदोषजालमपि अग्निशस्त्रं उपभोगलोभात् प्रमादवशगा ये न परिहरन्ति तानुद्दिश्य विपाकदर्शनाय आह—

**जे पमत्ते गुणट्ठिते से हु दंडे पवुच्चति ।**

**जे पमत्ते**त्यादि । **यो** हि **प्रमत्तो** भवति मद्य-विषयादिप्रमादैरसंयतः **गुणार्थी** रन्धन-पचन-प्रकाश[1]-तापनाद्यग्निगुणप्रयोजनवान् **स** दुष्प्रणिहितमनो-वाक्-कायोऽग्नि-शस्त्रसमारम्भतया प्राणिनां दण्डहेतुत्वाद् **दण्डः** प्रकर्षेण उच्यते=**प्रोच्यते**, आयुर्घृतादिव्य-पदेशवदिति । यतश्चैवं ततः किं कर्तव्यम् ? इत्यत आह—

**तं परिण्णाय मेहावी इदाणीं णो जमहं पुव्वमकासी पमादेणं ॥३३॥**

**तं परिन्नाय मेहावी । तम्** [2]अग्निकायविषयं समारम्भं दण्डफलं, **परिज्ञाय** ज्ञपरिज्ञा-प्रत्याख्यानपरिज्ञाभ्यां, **मेधावी**=मर्यादाव्यवस्थितो वक्ष्यमाणप्रकारेण व्यवच्छेदं आत्मनि [3]आचिनोतीति। तमेव प्रकारं [4]दर्शयितुमाह—

**इयाणीमि**त्यादि । **यमहम्** अग्निसमारम्भं विषय**प्रमादेन** आकुलीकृतान्तःकरणः सन् **पूर्वमकार्षं तमिदानीं** जिनवचनोपलब्धाग्निसमारम्भदण्डतत्त्वः **नो** करोमीति ॥३३॥

अन्ये तु अन्यथावादिनो अन्यथाकारिण इति दर्शयितुमाह—

**[सू० ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्मसमारंभेणं अगणिसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥३४॥**

**लज्जमाणे**त्यादि यावत् **अण्णे वऽणेगरूवे पाणे विहिंसति** त्ति । अस्य ग्रन्थस्य [5]उक्तार्थस्य अयमर्थो लेशतः प्रदर्श्यते— **लज्जमानाः**=स्वागमोक्तानुष्ठानं कुर्वाणाः सावद्यानुष्ठानेन वा लज्जां कुर्वाणाः, **पृथग्**=विभिन्नाः **शाक्या**दयः । **पश्य** इति संयमानुष्ठाने स्थिरीकरणार्थं शिष्यस्य चोदना । **अनगारा वयम् इत्येके प्रवदमानाः**, किं तैः विरूपमाचरितं येनैवं प्रदर्श्यन्ते ? इति दर्शयति—**यदिदं विरूपरूपैः शस्त्रैः अग्नि-कर्मसमारम्भेण अग्निशस्त्रं समारभमाणः** सन् **अन्यान् अनेकरूपान्** [6]**प्राणिनो** विविधं

---

**टि०** १. ०**प्रकाशा-ऽऽतापः०** घ ङ च ॥ २. **अग्निकायसमारम्भं** ग । **अग्निकायविषयमारम्भं** च ॥ ३. **आचिनोतीत्यादि** ख । **चिनोति** ग ॥ ४. **दर्शयन्नाह** ग ॥ ५. ०**र्थस्य लेशतोऽयमर्थः प्रद०** क-गप्रती विना ॥ ६. **प्राणिनो विहिनस्ति** क विना ॥

हिनस्ति=**विहिनस्ति** ॥३४॥

**[सू०] तत्थ खलु भगवता परिण्णा पवेदिता । इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव अगणिसत्थं समारभति, अण्णेहिं वा अगणिसत्थं समारभावेति, अण्णे वा अगणिसत्थं समारभमाणे समणुजाणति । तं से अहिताए, तं से अबोधीए ॥३५॥**

**तत्र खलु भगवता परिज्ञा प्रवेदिता, यथा—अस्य चैव** परिफल्गुजीवितस्य **परिवन्दन-मानन-पूजनार्थं जाति-मरण-मोचनार्थं**[1] **दुःखप्रतिघातहेतुं** यत् करोति तद् दर्शयति— **स** परिवन्दनाद्यर्थी स्वत **एव अग्निशस्त्रं समारभते**[2], **अन्यैश्चाग्निशस्त्रं समारम्भयति**, तथा **अन्यांश्चाग्निशस्त्रं समारभमाणान् समनुजानीते** । **तच्च** अग्निसमारम्भणं **से**=तस्य सुखलिप्सोरमुत्र अन्यत्र च **अहिताय** भवति, तथा **तदेव** च **तस्य अबोधिलाभाय** भवति ॥३५॥

**[सू०] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति—एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु निरए ।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्म-समारंभेणं अगणिसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥३६॥**

**स** इति यस्य[3] एतदसदाचरणं प्रदर्शितं, स तु शिष्यः **तद्** अग्निसमारम्भणं पापाय इत्येवं **सम्बुध्यमानः आदानीयं**=ग्राह्यं सम्यग्दर्शनादि **समुत्थाय**[4]=अभ्युपगम्य, **श्रुत्वा भगवदन्तिकेऽनगाराणां** वा **इह एकेषां** साधूनां **ज्ञातं भवति** । किं तद् ? दर्शयति—**एषः** अग्निसमारम्भः **ग्रन्थः** कर्महेतुत्वात्, **एष** एव **मोहः**, **एष** एव **मारः**, **एष** एव **नरकः**, तद्धेतुत्वादिति भावः ।

---

टि० १. **जाति-जरा-मर०** घ ङ ॥ २. **०भते । तथाऽन्यैश्चा०** घ ङ च ॥ ३. **यस्येति तदसदा०** क ख ॥ ४. **सम्यगुत्थाय** घ ङ विना ॥

**इत्येवमर्थं** च **गृद्धो लोको** यत् करोति तद् दर्शयति—**यदिदं विरूपरूपैः शस्त्रैः** अग्निकर्म समारभते, तदारम्भेण च **अग्निशस्त्रं** समारभते, तच्चारभमाणो **अन्यान् अनेकरूपान् प्राणिनो विहिनस्तीति** ॥३६॥

कथं पुनरग्निसमारम्भप्रवृत्ता नानाविधान् प्राणिनो विहिंसन्ति ? इति दर्शयितुमाह—

**[सू०]　से बेमि— संति पाणा पुढविणिस्सिता, तणणिस्सिता, पत्तणिस्सिता, कट्ठणिस्सिता, गोमयणिस्सिता, कयवरणिस्सिया । संति संपातिमा पाणा आहच्च संपयंति य ।**

**से बेमीत्यादि । तदहं ब्रवीमि** यथा नानाविधजीवहिंसनं अग्निकायसमारम्भेण भवतीति । यथाप्रतिज्ञातार्थं दर्शयति— **सन्ति**=विद्यन्ते, **प्राणाः**=जन्तवः, **पृथिवीकायनिश्रिताः**, पृथ्वीकायत्वेन परिणता इत्यर्थः, तदाश्रिता वा कृमि-कुन्थु-पिपीलिका-गण्डूपदा-ऽहि-मण्डूक-वृश्चिक-कर्कटकादयः, तथा वृक्ष-गुल्म-लतावितानादयः, तथा **तृणपत्रनिश्रिता** पतङ्गेलिकादयः, तथा **काष्ठनिश्रिता** घुणोद्देहिका-पिपीलिका-ऽण्डादयः, **गोमयनिश्रिताः** कुन्थु-पनकादयः, **कचवरः**[१] पत्र-तृण-धूलिसमुदायः, **तन्निश्रिताः** कृमि-कीट-पतङ्गादयः ।

तथा **सन्ति**=विद्यन्ते, सम्पतितुम्=उत्प्लुत्य उत्प्लुत्य गन्तुं आगन्तुं वा शीलं येषां ते **सम्पातिनः, प्राणिनः**=जीवाः मक्षिका-भ्रमर-पतङ्ग-मशक-पक्षि-वातादयः । एते च सम्पातिनः **आहत्य**=उपेत्य स्वत एव, यदि वा अत्यर्थं कदाचिद् वा अग्निशिखायां **सम्पतन्ति च** । तदेवं पृथिव्यादिनिश्रितानां जीवानां यद् भवति तद् दर्शयितुमाह—

**अगणिं च खलु पुट्ठा एगे संघातमावज्जंति । जे तत्थ संघातमावज्जंति ते तत्थ परियावज्जंति । जे तत्थ परियावज्जंति ते तत्थ उद्दायंति ॥३७॥**

**अगणिं चेत्यादि** । रन्धन-पचन-तापनाद्यग्निगुणार्थिभिः अवश्यमग्निसमारम्भो विधेयः, तत्समारम्भे च पृथिव्यादिनिश्रितानां जीवानां एता वक्ष्यमाणा अवस्था भवन्ति । छान्दसत्वात् तृतीयार्थे द्वितीया । ततश्च अयमर्थः—**अग्निना स्पृष्टाः**=छुप्ता, **एके**[२]

---

टि० १. ०रः तृण-पत्र-धूलि० क-गपुस्तके ऋते ॥ २. **एके केचन सङ्घा०** ग ॥

**सङ्घातम्**=अधिकं गात्रसङ्कोचनं, मयूरपिच्छवद् **आपद्यन्ते, च**शब्दस्य[1] अधिकार्थत्वात् । **खलु**शब्दोऽवधारणे, अग्नेरेवायं प्रतापो, नापरस्य इति । यदि वा सप्तम्यर्थे द्वितीया, स्पृष्टशब्दश्च पतितवचनः । ततश्च अयमर्थो भवति—**अग्नौ** एव **स्पृष्टाः**=पतिताः, **एके** शलभादयः, **सङ्घातं** सम् एकीभावेन[2] अधिकं गात्रसङ्कोचनं **आपद्यन्ते**=प्राप्नुवन्ति । **ये** च **तत्र** अग्नौ पतिताः **सङ्घातमापद्यन्ते ते** प्राणिनः **तत्र** अग्नौ **पर्यापद्यन्ते,** पर्यापत्तिः सम्मूर्च्छनम्, ऊष्माभिभूता मूर्च्छामापद्यन्ते इत्यर्थः ।

अथ किमर्थं सूत्रकृता विभक्तिपरिणामोऽकारि ? इत्युच्यते—**मागधदेशी**समनुवृत्तेः, व्याख्याविकल्पप्रदर्शनार्थं वा, अध्याहारादयोऽपि व्याख्याङ्गानि इत्यनेन शिष्यो ज्ञापितो भवति। अथ के पुनस्तेऽध्याहारादय इति ? उच्यन्ते—अध्याहारो विपरिणामो व्यवहित-कल्पना गुणकल्पना लक्षणा वाक्यभेदश्च इति । इह च द्वितीयाविभक्तेः सप्तमीपरिणामः कृत इति ।

**ये** च **तत्र** अग्नौ **पर्यापद्यन्ते ते** प्राणिनः कृमि-पिपीलिका-भ्रमर-नकुलादयः **तत्र** [3]अग्नौ **अपद्रान्ति,** प्राणान्मुञ्चन्तीत्यर्थः । तदेवं अग्निसमारम्भे सति न केवलं अग्निजन्तूनां विनाशः किन्तु अन्येषामपि पृथ्वी-तृणपत्र-काष्ठ-गोमय-कचवराश्रितानां सम्पातिनां च व्यापत्तिः अवश्यंभाविनीति । अत एव च **भगवत्यां** भगवता उक्तम्—

"**दो पुरिसा सरिसवया अन्नमन्नेहिं सद्धिं अगणिकायं समारंभंति, तत्थ णं एगे पुरिसे अगणिकायं समुज्जालेइ, एगे विज्झवेइ, तत्थ णं के पुरिसे महाकम्मयराए,** [4]▷**के पुरिसे अप्पकम्मयराए ?**◁ **गोयमा ! जे उज्जालेइ से महाकम्मयराए, जे विज्झवेइ से अप्पकम्मयराए ।" [ व्या०प्रज्ञ० ७/१०/३०६ ]** ॥३७॥

[5]तदेवं प्रभूतसत्त्वोपमर्दनकरं[6] अग्न्यारम्भं विज्ञाय मनो-वाक्-कायैः कृत-कारिता-ऽनुमतिभिश्च तत्परिहारः कार्य इति दर्शयितुमाह—

**[ सू० ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाता भवंति ॥३८॥**

---

टि० १. **०स्याधिक्यार्थत्वात्** क-खआदर्शौ विना ॥ २. **०भावेन गात्र०** ख ॥ ३. **अग्नावुपद्रान्ति** च ॥ ४. ▷ ◁ एतच्चिह्नस्थः पाठो घ-ङआदर्शयोरेव ॥ ५. **तत एवं प्र०** ख । **अत एव प्र०** च ॥ ६. **०मर्दनमग्न्या०** च ॥

**एत्थ सत्थे**त्यादि । **अत्र** अग्निकाये **शस्त्रं** स्वकाय-परकायभेदभिन्नं **समारभमाणस्य** व्यापारयत **इत्येते आरम्भाः** पचन-पाचनादयो बन्धहेतुत्वेन **अपरिज्ञाता भवन्ति** । तथा **अत्रैव** अग्निकाये **शस्त्रमसमारभमाणस्य**[१] **इत्येते आरम्भाः परिज्ञाता भवन्ति** ॥३८॥

**[सू०] ⊕जस्स एते अगणिकम्मसमारंभा परिण्णाता भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ॥३९॥**

**यस्यैते अग्निकायसमारम्भा** ज्ञपरिज्ञया [२]**परिज्ञाता** भवन्ति प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति **स एव मुनिः** परमार्थतः **परिज्ञातकर्म्मा इति ब्रवीमि** इति पूर्ववदिति ॥३९॥

**॥ शस्त्रपरिज्ञायां चतुर्थोद्देशकटीका [३]समाप्ता ॥ छ ॥**

---

टि० १. ०**माणस्यैते** ख ॥ २. **ज्ञाता** ख विना ॥ ३. **समाप्तेति** ॥ ख च ॥

**वि०टि०** ⊕ एतस्य सूत्रस्य पूर्वं– "**तं परिण्णाय मेहावी णेव सयं अगणिसत्थं समारभेज्जा, णेवऽण्णेहिं अगणिसत्थं समारभावेज्जा, णेवऽण्णे अगणिसत्थं समारभंते समणुजाणेज्जा**" इति सूत्रपाठो भवितव्यः, सर्वोद्देशकेषु चूर्णिकारैश्चापि आदृतत्वात्; किन्तु वृत्तिकारैः एतस्य सूत्रस्य विवरणं न कृतं, तथा हस्तलिखितादर्शेष्वपि नोपलब्धः, अतः विभावनीयं सुधीभिः ॥

## ॥ पञ्चमो वनस्पत्युद्देशकः ॥

उक्तश्चतुर्थ उद्देशकः । साम्प्रतं पञ्चमः [1] समारभ्यते । अस्य च अयमभिसम्बन्धः-इह अनन्तरोद्देशके तेजस्कायः प्रतिपादितः, तदनन्तरं अविकलसाधुगुणप्रतिपत्तये क्रमायातवायुकायप्रतिपादनावसरे वनस्पतिकायजीवस्वरूपं आविर्भाव्यते । किं पुनः क्रमोल्लङ्घनकारणम् ? इत्युच्यते—एष हि वायुरचाक्षुषत्वाद् दुःश्रद्धानः, अतः समधिगताशेषपृथिव्याद्येकेन्द्रियप्राणिगणस्वरूपः शिष्यः सुखमेव वायुजीवस्वरूपं प्रतिपत्स्यते । स एव क्रमो येन शिष्या जीवादितत्त्वं प्रति प्रोत्सहन्ते यथावत् प्रतिपत्तुमिति । वनस्पतिकायस्तु समस्तलोकप्रत्यक्षपरिस्फुटजीवलिङ्ग[2]कलापः, अतः स एव तावत् प्रतिपाद्यते इति । अनेन सम्बन्धेन आयातस्य अस्य चत्वारि अनुयोगद्वाराणि वाच्यानि यावन्नामनिष्पन्ने निक्षेपे **वनस्पत्युद्देशकः** । तत्र वनस्पतेः स्वभेदकलापप्रतिपादनाय पूर्वप्रसिद्धार्थातिदेशद्वारेण **निर्युक्तिकृद**ाह—

[नि०] **पुढवीए जे दारा वणप्फईए वि होंति ते चेव ।**
**नाणत्ती उ विहाणे परिमाणुवभोग-सत्थे य ॥१२६॥**

**पुढवीए** इत्यादि । **यानि** पृथ्वीकायसमधिगतये **द्वाराणि** उक्तानि **तान्येव वनस्पतौ** द्रष्टव्यानि, **नानात्वं तु** [3]प्ररूपणा-**परिमाण-उपभोग-शस्त्रेषु, च**शब्दाद् लक्षणे च द्रष्टव्यमिति ॥१२६॥

तत्र आदौ प्ररूपणास्वरूप[4]निर्ज्ञापनाय आह—

[नि०] **दुविहा वणस्सइजीवा सुहुमा तह बायरा य[5] लोयम्मि ।**
**सुहुमा य सव्वलोए [6]दो चेव य बायरविहाणा ॥१२७॥**

**दुविहे**त्यादि । **वनस्पतयो द्विविधाः—सूक्ष्मा बादराश्च** । **सूक्ष्माः** सर्वलोकापन्नाः चक्षुर्ग्राह्याश्च न भवन्ति एकाकारा एव । **बादराणां** पुन**र्द्वे विधाने** ॥१२७॥

के [7]पुनस्ते ? इत्यत आह—

[नि०] **पत्तेया साहारण बायरजीवा समासओ दुविहा ।**
**बारसविह णेगविहा समासओ छव्विहा होंति ॥१२८॥**

---

टि० १. प्रारभ्यते ख ॥ २. ०कलापोपेतः । अतः ङ ॥ ३. प्ररूपणा-प्रमाण० ग ॥ ४. ०पनिर्ज्ञानायाह ख ॥ ५. वि ञ । उ ठ ॥ ६. दो य भवे बायर० ञ ॥ ७. पुनस्ते बादरविधाने ? इत्यत ख ङ ॥

**पत्तेया** इत्यादि । **बादराः समासतो द्विविधाः—प्रत्येकाः साधारणाश्च** । [१]तत्र पत्र-पुष्प-मूल-फल-स्कन्धादीन् प्रति प्रत्येको जीवो येषां ते प्रत्येकजीवाः । साधारणास्तु परस्प[२]रानुवेधाद् अनन्तजीवसङ्घातरूपशरीरावस्थानाः । तत्र प्रत्येकशरीरा **द्वादशविधानाः** । साधारणास्तु अनेकभेदाः । सर्वेऽपि एते **समासतः** षोढा प्रत्येतव्याः॥१२८॥

तत्र प्रत्येकतरुद्वाद[३]शभेदप्रत्यायनाय आह—

[नि०]    **रुक्खा [४]गुच्छा गुम्मा लया य वल्ली य पव्वगा चेव ।**
**तण वलय हरिय ओसहि जलरुह कुहणा य बोधव्वा[*] ॥१२९॥**

**रुक्खा** इत्यादि । वृश्च्यन्त इति **वृक्षाः,** ते द्विविधाः— एकास्थिका बहुबीजकाश्च । तत्र एकास्थिकाः [⊕]पिचुमन्दा-ऽऽम्र-कोशम्ब-शाला-ऽङ्कोल्ल-पीलु-सल्लक्यादयः । बहुबीजकास्तु उदुम्बर-कपित्था-[५]ऽस्थिक-तिन्दुक-बिल्वा-ऽऽमलक-पनस-दाडिम-मातुलिङ्गादयः १। [६]**गुच्छास्तु** वृन्ताकी-कर्पासी-जपा-आढकी-तुलसी-क[?कु]स्तुम्भरी-पिप्पली-नील्यादयः २। **गुल्मानि** तु नवमालिका-सेरियक-कोरण्टक-बन्धुजीवक-बाण-[७]कणवीर-सिन्दुवार-विचकि[८]ल-जाति-यूथिकादयः ३। **लतास्तु** पद्म-नागा-ऽशोक-चम्पक-चूत-वासन्ती-अतिमुक्तक-कुन्दलताद्याः ४। **वल्ल्यस्तु** कुष्माण्डी-कालिङ्गी-त्रपुषी-तुम्बिनी-वालुङ्की-एला(वा)लुंकी-पटोल्यादयः ५। **पर्वगाः** पुनः इक्षु-वीरण-शुण्ठ-शर-वेत्र-[९]शतपर्व-वंश-नल-वेणुकादयः ६। **तृणानि** तु श्वेतिका-कुश-दर्भ-पर्वका-ऽर्जुन-सुरभि-कुरुविन्दादीनि ७। **वलयानि** च ताल-तमाल-तक्कली-साल-सरल-केतकी-कदली-कन्दल्यादीनि ८। **हरितानि** तन्दुलीयका-ऽध्यारुह-वस्तुल-बदरक-[१०]मार्जार-पादिका-चिल्ली-पालक्यादीनि ९। **औषध्यस्तु** शालि-व्रीहि-गोधूम-यव-कलम-मसूर-तिल-मुद्ग-माष-निष्पाव-कुलत्था-ऽतसी-कुसुम्भ-कोद्रव-कङ्ग्वादयः १०। **जलरुहा** उदका-ऽवक-पनक-

---

**टि०** १. **त[त्र] पुष्प-पत्र-मूल०** ङ । **तत्र पत्र-पुष्प-फल-मूल-स्क०** ख च ॥ २. **०रानुविद्धानन्त०** ग घ ङ च । **०रानुवेधानन्त०** ख ॥ ३. **०शभेदप्रतिपादनायाह** ख ॥ ४. **गच्छा** क ञ ट विना ॥ ५. **०ऽच्छिक०** ख । **०ऽत्थिक०** घ ङ ॥ ६. **गच्छास्तु** घ ङ ऋते ॥ ७. **०करवीर०** घ ङ विना ॥ ८. **०विचिकिल०** ख ॥ ९. **०शतपत्र-वं०** च ॥ १०. **०मार्जार-पल्लिका०** ख ॥

**वि०टि०** ✱ इत आरभ्य १४३ गाथापर्यन्तं १३०-१४१-१४२ अङ्कात्मकगाथात्रयवर्जं द्वादश गाथाः क्वचिदल्प-बहुपाठभेदयुक्ताः **प्रज्ञापनोपाङ्ग-प्रथमपदे** क्रमशः १२-४५-४६-४४-१०६-प्रक्षिप्त-१०१-१००-९७-८४-८५-१०३ अङ्कभाजिन्यः समुपलभ्यन्ते ॥ ⊕ एतेषां सर्वेषां वृक्षाणां चातुर्वर्णीयछायाचित्राणि दृश्यतां चतुर्थपरिशिष्टे ॥

शैवल-कलम्बुका-पा[?ह]ठा-कसेरुका-उत्पल-पद्म-कुमुद-नलिन-पुण्डरीकादयः ११। **कुहु[?ह]णास्तु** भूमिस्फोटकाभिधानाः आय-[१]काय-[२]कुहण-[३]कुण्डुक्कोदेहलिका-सर्पक-च्छत्रादयः १२। एषां हि प्रत्येकजीवानां वृक्षाणां मूल-स्कन्ध-कन्द-त्वक्-साल-प्रवालादिषु असङ्ख्येयाः प्रत्येकं जीवाः, पत्राणि पुष्पाणि च एकजीवानि मन्तव्यानि ॥१२९॥

साधारणास्तु अनेकविधाः, तद्यथा—लोही-निहू-स्तुभायिका-अश्व[४]कर्णी-सिंहकर्णी-शृङ्गबेर-मालुका-मूलक-कृष्णकन्द-सूरणकन्द-काकोली-क्षीरकाकोलीप्रभृतयः । सर्वेऽपि एते सङ्क्षेपात् षोढा भवन्ति इत्युक्तम्, के पुनस्ते भेदाः ? इत्याह—

[नि०] **[५]अग्गबीय मूलबीया खंधबीया चेव पोरबीया य ।**
**बीयरुहा सम्मुच्छिम समासओ वणप्फतीजीवा ॥१३०॥**

**अग्गबीआ** इत्यादि । तत्र कोरण्टकादयो **अग्रबीजाः**, कदल्यादयो **मूलबीजाः**, निहू-शल्यकी-अरणिकादयः **स्कन्धबीजाः**, इक्षु-वंश-वेत्रादयः **पर्वबीजाः**, **बीजरुहाः** शालि-व्रीह्यादयः, **सम्मूर्च्छनजाः** पद्मिनी-शृङ्गाटक-पा[?ह]ठा-शैवलादयः, एवमेते **समासात्** तरुजीवाः षोढा कथिताः, नान्ये सन्तीति प्रतिपत्तव्यम् ॥१३०॥

किंलक्षणाः पुनः प्रत्येकतरवो भवन्ति ? इत्यत आह—

[नि०] **जह सगल[≠]सरिसवाणं [Φ]सिलेसमिस्साण वत्तिया वट्टी ।**
**पत्तेयसरीराणं तह होंति सरीरसंघाया ॥१३१॥**

**जहे**त्यादि । **यथा** इति दृष्टान्तोपन्यासार्थः, यथा **सकलसर्षपाणाम्** श्लेषयतीति **श्लेषः** [६]सर्जरसादिः, तेन **मिश्रितानां वर्तिता**=वलिता **वर्तिः** तस्यां च वर्तौ प्रत्येकप्रदेशाः क्रमेण सिद्धार्थकाः स्थिताः, नान्योन्यानुवेधेन, चूर्णितास्तु कदाचिदन्योन्यानुवेधभाजोऽपि स्युः इत्यतः **सकल**ग्रहणम् । यथाऽसौ वर्तिः **तथा** प्रत्येकतरुशरीरसङ्घातः, यथा च सर्षपाः तथा तदधिष्ठायिनो जीवाः, यथा श्लेषविमिश्रिताः तथा रागद्वेषप्रचितकर्मपुद्गलोदयमिश्रिता जीवाः । पश्चिमार्द्धेन गाथाया उपन्यस्तदृष्टान्तेन सह साम्यं प्रतिपादितम्, **तथा** इति

---

टि० १. ०**कायकोण्डुक्कोद्वेहलिकाः सर्प**० ख ॥ २. ०**कुहुण**० क-खपुस्तके विना ॥ ३. **कुन्दुक्कोदेह**० ग ङ च । **कण्टुक्वोद्देह**० घ ॥ ४. ०**कर्णी-वृन्ताबेरा**० क । ०**कर्णी-शृङ्गबेरा**० घ ङ ॥ ५. **अग्गबीया मूलबीया खंधबीया** क-ञआदर्शौ विना ॥ ६. **सर्ज्यरसादिस्नेहेन मि**० क ॥

**वि०टि०** ≠ ''अक्षत'' ठप्रतौ टिप्पणी ॥ Φ ''लक्षादि'' ठपुस्तके टिप्पणी ॥

शब्दोपादानादिति ॥१३१॥ अस्मिन्नेवार्थे दृष्टान्तान्तरमाह—

[नि०] **जह वा तिलसक्कुलिया बहुएहिँ तिलेहिँ मेलिदा संती ।**
**पत्तेयसरीराणं [१]तह जाण सरीरसंघाया ॥१३२॥**

**जह वे**त्यादि । **यथा वा तिलशष्कुलिका** तिलप्रधाना पिष्टमयपोलिका **बहुभिः तिलैः** निष्पादिता **सती** भवति **तथा प्रत्येकशरीराणां** तरूणां **शरीरसङ्घाता** भवन्तीति द्रष्टव्यमिति ॥१३२॥

साम्प्रतं प्रत्येकशरीरजीवानां एका-ऽनेकाधिष्ठितत्वप्रतिपिपादयिषया आह—

[नि०] **नाणाविहसंठाणा दीसंती एगजीविया पत्ता ।**
**[२]खंधा वि एगजीवा ताल-सरल-नालिएरीणं ॥१३३॥**

**णाणाविहे**त्यादि । नानाविधं भिन्नं संस्थानं येषां तानि **नानाविधसंस्थानानि पत्राणि,** यानि च एवंभूतानि दृश्यन्ते तानि एकजीवाधिष्ठितानि अवगन्तव्यानि । तथा **स्कन्धा अपि एकजीवा**धिष्ठिताः **ताल-सरल-नालिकेर्या**दीनाम्, न अत्र अनेकजीवाधिष्ठितत्वं सम्भवतीति । अवशिष्टानां तु अनेकजीवाधिष्ठितत्वं सामर्थ्यात् प्रतिपादितं भवति ॥१३३॥

[३]सम्प्रति प्रत्येकतरुजीवराशिपरिमाणाभिधित्सया आह—

[नि०] **पत्तेया पज्जत्ता [४]सेढीएँ असंखभागमेत्ता ते ।**
**लोगाऽसंखाऽपज्जत्तगाण [५]साधारणाऽणंता[६] ॥१३४॥**

**पत्तेया** इत्यादि । प्रत्येकतरुजीवाः **पर्याप्तकाः** [≠]संवर्तितचतुरस्रीकृतलोकश्रेण्य-सङ्ख्येयभागवर्त्याकाशप्रदेशराशि[७]तुल्यप्रमाणाः, एते च पुनः बादरतेजस्कायपर्याप्तकराशेः असङ्ख्येयगुणाः । ये पुनः अपर्याप्तकाः प्रत्येकजन्तवः ते हि असङ्ख्येयानां लोकानां यावन्तः प्रदेशाः तावन्त इति । [८]एतेऽपि अपर्याप्तकबादरतेजस्कायजीवराशेः असङ्ख्येयगुणाः । सूक्ष्मास्तु वनस्पतयः प्रत्येकशरीरिणः पर्याप्ता अपर्याप्तका वा न सन्त्येव । **साधारणास्त्वनन्ता** इति

---

टि० १. **तह हुंति स०** क-छपुस्तके विना ॥ २. **खंधे य एगजीवो** ञ ॥ ३. **साम्प्रतं** ग ॥ ४. **सेढीय** ञ ॥ ५. **साधारणमणंता** ञ ॥ ६. **०ता ॥१३४॥ दारं॥** क छ ॥ ७. **०तुल्यपरिमाणाः** ख ॥ ८. **एते ह्यपर्या०** क ॥

वि०टि० "**संवर्तित** इति सप्तरज्जुप्रमाणा" जै०वि०प० ॥

विशेषानुपादानात् साधारणाः सूक्ष्म-बादर-पर्याप्तका-ऽपर्याप्तकभेदेन चतुर्विधा अपि पृथक् पृथगनन्तानां लोकानां यावन्तः प्रदेशाः तावन्त इति । अयं तु विशेषः—साधारणबादरपर्याप्तकेभ्यो बादरा अपर्याप्तका असङ्ख्येयगुणाः, बादरापर्याप्तकेभ्यः सूक्ष्मा अपर्याप्तका असङ्ख्येयगुणाः, तेभ्योऽपि सूक्ष्माः पर्याप्तका असङ्ख्येयगुणा इति ॥१३४॥

सम्प्रत्येषां तरूणां यो जीवत्वं नेच्छति तं प्रति जीवत्वप्रतिपादनेच्छया **निर्युक्तिकृदाह**—

[नि०] **एएहिँ सरीरेहिं पच्चक्खं ते परूविया जीवा ।**
**सेसा आणागिज्झा [ य ] चक्खुणा जे न दीसंति ॥१३५॥** [दारं ?]

**एएहीत्यादि** । **एतैः** पूर्वप्रतिपादितैः तरु**शरीरैः** प्रत्यक्षप्रमाण[१]विषयैः **प्रत्यक्षं**=साक्षात् **ते** वनस्पति**जीवाः प्ररूपिताः**=प्रसाधिताः, तथा हि—न हि एतानि शरीराणि जीवव्यापारं अन्तरेण एवंविधाकारभाञ्जि भवन्ति, तथा च प्रयोगः—जीवशरीराणि वृक्षाः, [२]अक्षाद्युपलब्धिभावात्, पाण्यादिसङ्घातवत् । ≠तथा कदाचित् सचित्ता अपि वृक्षाः, जीवशरीरत्वात्, पाण्यादिसङ्घातवदेव। तथा मन्दविज्ञान-सुखादिमन्तः तरवः, अव्यक्तचेतनानुगतत्वात्, सुप्तादिपुरुषवत् । तथा चोक्तम्—

**"वृक्षादयो[३]ऽक्षाद्युपलब्धिभावात्, पाण्यादिसङ्घातवदेव देहाः ।**
**तद्वत् सजीवा अपि** Φ**देहतायाः, [४]सुप्तादिवद् ज्ञान-सुखादिमन्तः ॥" [ ]**

**शेषा** इति सूक्ष्माः, ते च चक्षुषा नोपलभ्यन्त इति **आज्ञया [५]ग्राह्याः,** आज्ञा च भगवद्वचनं अवितथं अरक्त-द्विष्टप्रणीतमिति [६]श्रद्धातव्यमिति ॥१३५॥

साम्प्रतं साधारणलक्षणमभिधित्सुराह—

[नि०] **साहारणमाहारो [७]साहारणमाणुपाणुगहणं च ।**
**साहारणजीवाणं साहारणलक्खणं एयं ॥१३६॥**

---

टि० १. ०णविशेषैः **प्र०** च ॥ २. **अक्ष्याद्युप०** क-च ॥ ३. **०ऽक्ष्याद्युप०** च ॥ ४. **सुप्तादिविज्ञान०** ख च ॥ ५. **ग्राह्या इति । आज्ञा** कप्रतिमृते ॥ ६. **श्रद्धातव्यमेव** क-गआदर्शौ विना ॥ ७. **साहारण आणुपाणग०** ख झ ठ । **साहारण आणुपाणु०** ज ॥

वि०टि० ≠ "**तथा कदाचिद्** इति तथा भवन्ति" जै०वि०प० ॥ Φ "**देहताया** इति अयं हेतुरुभयथा सम्बध्यते" जै०वि०प० ॥

**साहारणे**त्यादि । समानं=एकं धारणं=अङ्गीकरणं शरीरा-ऽऽहारादेः येषां ते **साधारणाः**, तेषां साधारणानां अनन्तकायानां जीवानां **साधारणं**=सामान्यं एकं आहारग्रहणम्, तथा **प्राणापानग्रहणं** च [1]**साधारणमेव, एतत् साधारणलक्षणम्** । एतदुक्तं भवति— एकस्मिन्नाहारितवति सर्वेऽपि आहारितवन्तः, तथा एकस्मिन्नुच्छ्वसिते निःश्वसिते वा सर्वेऽपि उच्छ्वसिता निःश्वसिता वेति ॥१३६॥ अमुमेवार्थं स्पष्टयितुमाह—

[नि०] [2]**एगस्स उ जं गहणं बहूण साहारणाण तं चेव ।**
**जं बहुयाणं गहणं समासओ तं पि एगस्स ॥१३७॥**

**एगस्से**त्यादि । एको **यद्** उच्छ्वास-निःश्वासयोग्यपुद्गलोपादानं विधत्ते **बहूनाम**पि साधारणजीवानां **तदेव** भवति । तथा **यच्च** बहवो **ग्रहणम**कार्षुः **एकस्यापि** [3]**त**देव इति ॥१३७॥ अथ ये बीजात् प्ररोहन्ति वनस्पतयः तेषां कथमाविर्भावः ? [4]इत्यत आह—

[नि०] **जोणीभूए बीए जीवो वक्कमइ सो व अन्नो वा ।**
≠**जो वि य मूले जीवो सो चिय पत्ते पढमयाए ॥१३८॥**

**जोणीभूए** इत्यादि । अत्र **भूत**शब्दः अवस्थावचनः, **योन्यवस्थे बीजे**, योनि-परिणाममजहति इत्यर्थः । बीजस्य हि द्विविधा अवस्था—योन्यवस्था अयोन्यवस्था च । यदा योन्यवस्थां न जहाति बीजं उज्झितं च जन्तुना तदा **योनिभूतमु**च्यते । योनिस्तु जन्तोः उत्पत्तिस्थानमविनष्टमिति । तस्मिन् बीजे योनिभूते **जीवः व्युत्क्रामति**=उत्पद्यते, **स** एव पूर्वको बीजजीवो **अन्यो** [5]**वा** आगत्य तत्र उत्पद्यते । एतदुक्तं भवति—यदा जीवेन [6]आयुष्कक्षयाद् बीजपरित्यागः कृतो भवति, तस्य च यदा बीजस्य क्षित्युदकादिसंयोगः तदा कदाचित् स एव प्राक्तनो जीवः तत्र आगत्य परिणमते, कदाचिदन्य इति । **यश्च** मूलतया **जीवः** परिणमते **स** [7]**एव** प्रथमपत्रतयाऽपीति, एकजीवकर्तृके मूल-पत्रे इति यावत् । प्रथमपत्रकं च या असौ बीजस्य समुच्छूनावस्था भू-जल-[8]कालापेक्षा सैव उच्यत इति

---

टि० १. **साधारणमिहैतत् सा०** ख ॥ २. **एगस्स उ जइ गहणं** ख । **एगस्स आणुगहणं** ज ठ विना ॥ ३. **तदेव भवति । अथ** ङ ॥ ४. **इत्यत्राह** ख ॥ ५. **वा तत्रागत्योत्पद्यते** ख ॥ ६. **आयुषः क्ष०** च ॥ ७. **एष** ग ॥ ८. **०कालापेक्ष्या सैषोच्यत** ग ॥

**वि०टि०** ≠ "जो पुण मूले जीवो सो निव्वत्तेइ जा पढमपत्तं ।
कंदाइ जाव बीयं सेसं अन्ने पकुव्वंति ॥ दशवैकालिकनिर्युक्तौ (गा०)" ज-ठप्रत्योष्टिप्पणी ॥

नियमप्रदर्शनमेतत्, शेषं तु किशलयादि सकलं न मूलजीवपरिणामाविर्भावितमेव इति अवगन्तव्यमिति । यत उक्तम्—

"**सव्वो वि किसलओ खलु उग्गममाणो अणंतओ भणिओ ।**"

[**प्रज्ञा०सू०१।९४**] इत्यादि ॥१३८॥

[1]तथा अपरं साधारणलक्षणमभिधित्सुराह—

[नि०] **चक्कागं भज्जमाणस्स गंठी चुण्णघणो भवे ।**
**पुढविसरिसेण भेदेणं अणंतजीवं वियाणाहि ॥१३९॥**

**चक्कागमि**त्यादि । यस्य मूल-कन्द-त्वक्-पत्र-पुष्प-फलादेः **भज्यमानस्य चक्रकं** भवति, चक्राकारः समच्छेदो भङ्गो भवतीति यावत् । यस्य च **ग्रन्थिः**=पर्व भङ्गस्थानं वा **चूर्णेन**= रजसा **घनः**=व्याप्तो **भवति** । यो वा भिद्यमानो वनस्पतिः **पृथिवीसदृशेन भेदेन** केदारोपरिशुष्कतरिकावत् पुटभेदेन भिद्यते तमनन्तकायं **विजानीहि** ॥१३९॥

तथा लक्षणान्तरमाह—

[नि०] **गूढसिरागं पत्तं[2] सच्छीरं जं च होइ निच्छीरं ।**
**[3]जं पिय पणट्ठ[4]संधिं अणंतजीवं वियाणाहि ॥१४०॥**

**गूढसिरागमि**त्यादि । स्पष्टार्था ॥१४०॥ एवं साधारणजीवान् लक्षणतः प्रतिपाद्य सम्प्रति नामग्राहमनन्तान् वनस्पतीन् दर्शयितुमाह—

[नि०] **सेवाल कच्छभाणिय [5]अवए पणए य किन्नए य हढे ।**
**एए [6]अणंतजी[7]वा भणिया [8]अण्णे अणेगविहा ॥१४१॥**

**सेवाल०** इत्यादि । **शैवल-कच्छभाणिका-ऽवक-पनक-किण्व-**[9]हठादयो-ऽनन्तजीवा गदिताः, अनेकप्रकाराश्च **अन्ये**ऽपीत्थमवगन्तव्या इति ॥१४१॥

सम्प्रति प्रत्येकतरूणां एकादिजीवपरिगृहीतशरीरदृश्यत्वप्रतिपि[10]पादयिषया आह—

---

टि० १. **साम्प्रतं साधा०** ख । **साम्प्रतमपरं साधा०** च । **तथा साम्प्रतमपरं साधा०** ग ॥ २. **गूढच्छिरागपत्तं** छ ॥ ३. **जं पुण पण०** ख ठ ॥ ४. **०ट्ठसंधि अणं०** ञ । **संधि य अणं०** ठ ॥ ५. **अवते पणते य किन्नते य हदे** ञ ॥ ६. **अणेगजीवा अ भणि०** ख ॥ ७. **०वा जे आऽवण्णे तहाविहा ॥१४१॥** ञ ॥ ८. **चण्णे** झ ॥ ९. **०हढादयो०** च ॥ १०. **०पादयिषुराह** च ॥

[नि०] **एक्कस्स दोण्ह तिण्ह व संखेज्जाण व[1] तहा असंखाणं ।**
**पत्तेयसरीराणं दीसंति सरीरसंघाया ॥१४२॥**

**एगस्से**त्यादि । एकजीवपरिगृहीतशरीरं ताल-सरल-नालिकेर्यादिस्कन्धः, स च चक्षुर्ग्राह्यः, तथा बिस-मृणाल-कर्णिका-कुणक-कटाहानां एक[2]जीवपरिगृहीतत्वं चक्षुर्दृश्यत्वं च । द्वि-त्रि-सङ्ख्येया-ऽसङ्ख्येयजीवपरिगृहीतत्[3]वमप्येवं दृश्यतया भावनीयमिति ॥१४२॥

किमनन्तानामपि एवम् ? न इत्यत आह—

[नि०] **एगस्स दोण्ह तिण्ह व संखेज्जाण व ण पासिउं सक्का ।**
**दीसंति सरीराइं णिओयजीवाणऽणंताणं ॥१४३॥ दा० ॥**

**एगस्से**त्यादि । न एकादीनां असङ्ख्येयावसानानां अनन्ततरुजीवानां **शरीराणि** उपलभ्यन्ते । कुतः ? [4]असम्भवात्, न हि एकादिजीवपरिगृहीतानि अनन्तानां शरीराणि सन्ति, अनन्तजीवपिण्डत्वादेव । कथं तर्हि उपलभ्यास्ते भवन्ति ? इति दर्शयति—**दृश्यन्ते शरीराणि** बादर**निगो[5]दानां जीवानां** अनन्तकायिकानाम्; सूक्ष्मनिगोदानां तु नोपलभ्यन्ते, अनन्तजीवसङ्घात[6]त्वेऽपि सति अतिसूक्ष्मत्वादिति भावः । निगोदास्तु नियमत एव अनन्तजीवसङ्घाता भवन्तीति, उक्तं च—

**"गोला य असंखेज्जा होंति णिओया असंखया गोले ।**
**[7]एगेगो य निओओ अणंतजीवो मुणेयव्वो ॥"[बृहत्सं०३०१]**

एवं वनस्पतीनां वृक्षादिप्रत्येकादिभेदात् तथा वर्ण-गन्ध-रस-स्पर्शभेदात् सहस्राग्रशो विधानानि सङ्ख्येयानि योनिप्रमुखानि शतसहस्राणि भेदानामवसेयानीति । तथा हि— वनस्पतीनां संवृता योनिः, सा च सचित्ता-ऽचित्त-मिश्रभेदात् त्रिधा, तथा शीतोष्णमिश्रभेदाच्च; तथा प्रत्येकतरूणां दश लक्षा योनिभेदानाम्, साधारणानां च चतुर्दश, कुलकोटीनां द्वयोरपि पञ्चविंशतिकोटिशतसहस्राणीति ॥१४३॥ उक्तं विधानद्वारम् । इदानीं परिमाणमभिधीयते, [8]तच्च प्रथमं सूक्ष्मानन्तजीवानां दर्शयितुमाह—

---

टि० १. **वि** क छ ज ॥ २. **०कजीवत्वं** च ॥ ३. **०त्वमित्येवं** घ ङ ॥ ४. **अभावात्** कपुस्तकेन विना ॥ ५. **०दानामनन्तजीवानाम् । सूक्ष्म०** ख च । **०दानामनन्तकायिकानां जीवानाम् । सूक्ष्म०** ग । **०दानां स( सं )ख्येवा( या )नामनन्तकायिकानाम् । सूक्ष्म०** ङ । घप्रतौ पाठत्रुटिः ॥ ६. **०तत्वे सत्यप्यतिसूक्ष्म०** ख च ॥ ७. **एक्केक्को** ख । **एक्केक्के य णिओए अणंतजीवा मुणेयव्वा** ग च ॥ ८. **तत्र** ग ङ ॥

**वि०टि०** ≠ प्रत्येकतरुजीवपरिमाणं प्राक् १३४ गाथया उक्तम् ॥

[नि०] **पत्थेण व कुडवेण व जह कोइ मिणिज्ज सव्वधन्नाइं ।
एवं मविज्जमाणा हवंति लोया अणंता उ ॥१४४॥**

**पत्थेण**त्यादि । प्रस्थ-कुडवादिना **यथा कश्चित् सर्वधान्यानि प्रमिणुयात्,** मित्वा च अन्यत्र प्रक्षिपेत्; एवं यदि नाम कश्चित् साधारणजीवराशिं लोककुडवेन मित्वा अन्यत्र प्रक्षिपेत्, तत **एवं मीयमाना**[१] **अनन्ता लोका भवन्ती**ति ॥१४४॥

इदानीं बादरनिगोदपरिमाणाभिधित्सया आह–

[नि०] **जे बायरपज्जत्ता पयरस्स असंखभागमेत्ता ते ।
[२]सेसा असंखलोया तिन्नि वि [३]साहारणाऽणन्ता ॥१४५॥ दारं ॥**

**जे बायरे**त्यादि । **ये** पर्याप्तकबादरनिगोदाः **ते** संवर्तितचतुरस्त्रीकृतसकललोक-प्रतरासङ्ख्येयभागवर्तिप्रदेशराशिपरिमाणा भवन्ति, एते पुनः प्रत्येकशरीरबादरवनस्पति-पर्याप्तकजीवेभ्यो असङ्ख्येयगुणाः । **शेषाः त्रयोऽपि** राशयः प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशपरिमाणाः । के पुनस्त्रयः ? इत्युच्यते– अपर्याप्तकबादरनिगोदा अपर्याप्तकसूक्ष्मनिगोदाः पर्याप्तकसूक्ष्मनिगोदाः । एते च क्रमशो बहुतरका द्रष्टव्या इति । साधारणजीवाः तेभ्योऽनन्तगुणाः । एतच्च जीवपरिमाणम्, प्राक्तनं तु राशिचतुष्टयं निगोदपरिमाणमिति ॥१४५॥ परिमाणद्वारानन्तरं उपभोग[४]द्वारमभिधित्सुराह–

[नि०] **आहारे उवगरणे सयणा–≠ऽऽसण जाण जुग्गकरणे य ।
Φआवरण पहरणेसु य Δसत्थविहाणेसु य बहूसु ॥१४६॥**

**आहारे**त्यादि । **आहारः** फल-पत्र-किशलय-मूल-कन्द-त्वगादिनिर्वर्त्यः, **उपकरणं** व्यजन-कटक-वलका-ऽर्गलादि, **शयनं** खट्वा-फलकादि, **आसनम्** [५]आसन्दकादि, **यानं** शिबिकादि, **युग्यं** गन्त्रिकादि, **आवरणं** फलकादि, **प्रहरणं** लकुट-[६]मुसुण्ढ्यादि । **शस्त्रविधानानि च बहूनि** तन्निर्वर्त्यानि शर-दात्र-खड्ग-क्षुरिकादि[७]दण्डोप-

---

टि० १. ०ना **भवन्ति लोका अनन्ता इति** ख च ॥ २. **सेसा तिन्नि वि रासी असंख साहारणमणंता** त्र ॥ ३. **साहारणमणंता** ज ॥ ४. **०द्वारम( द्वारा )भिधित्सयाह** क ॥ ५. **आसिन्दिकादि** ग ॥ ६. **०मुसलादि** ग च ॥ ७. **०गण्डोप०** ख विना । **०षण्डोप०** ग च ॥

**वि०टि०** 卐"एते च क्रमशो बहु-बहुतरकाः । साधा०जीवास्तेभ्योऽप्यनन्तगुणाः । एतज्जीवप्रमाणम्" ठटिप्पणी ॥ ≠ "पाटला" ठटिप्पणी ॥ Φ "खेटका" ठटिप्पणी ॥ Δ "खड्गक्षुरिकादिदण्ड" ठटिप्पणी ।

योगित्वादिति ॥१४६॥ तथा अपरोऽपि परिभोगविधिः, तद्दर्शनाय आह–

[नि०] **आउज्ज कट्ठकम्मे गंधंगे वत्थ म[1]ल्लजोए य ।**
**[2]झावण-वियावणेसु य तेल्लविहाणे अ उज्जोवे ॥१४७॥**

**आउज्जे**त्यादि । **आतोद्यानि** पटह-भेरी-वंश-वीणा-झल्लर्यादीनि, **काष्ठकर्म** प्रतिमा-स्तम्भ-द्वारशाखादीनि, **गन्धाङ्गानि** वालक-प्रियङ्गु-पत्रक-दमनक-त्वक्-चन्दन-उशीर-देवदार्वादीनि, **वस्त्राणि** वल्कल-कर्पासमयादीनि, **माल्ययोगाः** [3]नवमालिका-बकुल-चम्पक-पुन्नागा-ऽशोक-मालती-विचकिलादयः, **ध्यापनं** दाहो भस्मसात्करणमिन्धनैः, **वितापनं**[4] शीताभ्यर्दितस्य शीतापनयनाय काष्ठप्रज्वालनात्, **तैलविधानं** तिला-ऽतसी-[5]सर्षप-≠इङ्गुदी-ज्योतिष्मती-करञ्जादिभिः, **उद्द्योतः** वर्ति-तृण-चूडा-काष्ठादिभिरिति ॥१४७॥ एवं एतानि उपभोगस्थानानि प्रतिपाद्य तदुप[6]सञ्जिहीर्षुराह–

[नि०] **एएहिँ कारणेहिं हिंसंति वणस्सई बहू जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं उदीरेंति ॥१४८॥ दारं ॥**

**एएही**त्यादि । **एतैः** गाथाद्वयोपात्तैः **कारणैः**=प्रयोजनैः **हिंसन्ति**=व्यापादयन्ति प्रत्येकसाधारण**वनस्पतिजीवान् बहून्** वनस्पतिसमारम्भिणः पुरुषाः । किम्भूतास्ते ? इति दर्शयति- **सातं** =सुखं, तदन्वेषिणः **परस्य** च वनस्पत्याद्येकेन्द्रिय-द्वीन्द्रियादेः **दुःखं**= बाधामुत्पादयन्तीति ॥१४८॥

साम्प्रतं शस्त्रमुच्यते–तच्च द्विधा, द्रव्य-भावभेदात् । द्रव्यशस्त्रमपि समास-विभागभेदाद् द्विधैव । तत्र समासद्रव्यशस्त्राभिधित्सया आह–

[नि०] **कप्पणि [7]कुहाडि [8]असियग दत्तिय कुद्दाल वासि परसू अ ।**
**[9]सत्थं वणस्सईए हत्था पाया मुहं अग्गी ॥१४९॥**

**कप्पणी**त्यादि । कल्प्यते=छिद्यते यया सा **कल्पनी** शस्त्रविशेषः, **कुठारी** प्रसिद्धैव,

---

**टि०** १. **मल्लें जोए** झ ॥ २. **झामण-वियामणेसु** ञ । **झावणसियावणेसु** झ ॥ ३. **वनमालिका०** क ॥ ४. **०पनं शीतापन०** क च ॥ ५. **०सर्षपा-ऽङ्गुदी०** ख ॥ ६. **०सञ्जिहीर्षयाह** ख च ॥ ७. **कुहड्डि** ञ ॥ ८. **यसियग** क ञ ॥ ९. **सत्था** ज झ ॥

**वि०टि०** ≠ ''**अङ्गुदी** इति इंगोरी । **ज्योतिष्कानी[?ष्मति]** इति कंगुणी'' जै०वि०प० । ''उद्दे० ५-**ज्योतिष्मती** कांगुणी'' स०वि०प० ॥

**असियगं**=दात्रम्, **दात्रिका** प्रसिद्धैव, **कुद्दालक-वासि-परशवश्च**, एतद् **वनस्पतेः शस्त्रम्;** तथा हस्त-पाद-मुखा-ऽग्नयश्च इत्येतत् सामान्यशस्त्रमिति ॥१४९॥

विभागशस्त्राभिधित्सया आह—

[नि०] **किंची सकायसत्थं किंची परकाय तदुभयं किंचि ।**
**एयं तु दव्वसत्थं भावे अस्संजमो सत्थं ॥१५०॥** दा० ॥

**किंची**त्यादि । **किञ्चित् स्वकायशस्त्रं**[1] लकुटादि, **किञ्चिच्च परकायशस्त्रं** पाषाणा-ऽग्न्यादि, तथा उभयशस्त्रं दात्र-दात्रिका-कुठारादि, **एतद् द्रव्यशस्त्रम्** । **भावशस्त्रं** पुनः **असंयमः** दुष्प्रणिहितमनो-वाक्-कायलक्षण इति ॥१५०॥

[2]सकलनिर्युक्त्यर्थपरिसमाप्तिप्रचिकटयिषया आह—

[नि०] **सेसाणि उ दाराइं ताइं जाइं हवंति पुढवीए ।**
**एवं वणस्सईए निज्जुत्ती कित्तिया एसा[3] ॥१५१॥ छ ॥ दारं ॥**

**सेसा** इत्यादि । उक्तव्यतिरिक्त**शेषाणि तानि** एव **द्वाराणि** यानि **पृथिव्यां** अभिहितानि । ततस्तद्द्वाराभिधानाद् **वनस्पतौ निर्युक्तिः कीर्तिता**=व्यावर्णितेति ॥१५१॥

साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्—

**[सू०] तं णो करिस्सामि समुट्ठाए मत्ता मतिमं अभयं विदित्ता तं जे णो करए एसोवरते, एत्थोवरए, एस अणगारे त्ति पवुच्चति ॥४०॥**

**तन्नो करिस्सामि समुट्ठाए**[4] । अस्य च अनन्तर-परम्परादिसूत्रैः सम्बन्धः प्राग्वद् वाच्यः । उक्तं प्राक् 'सातान्वेषिणो हि वनस्पतिजन्तूनां दुःखमुदीरयन्ति', ततश्च तन्मूलमेव दुःखगहने संसारसागरे भ्राम्यन्ति सत्त्वाः इति । एवं विदितकटुकविपाकः समस्त-वनस्पतिसत्त्वविषयविमर्दननिवृत्तिं आत्यन्तिकीं आत्मनि दर्शयन्नाह—**तत्** वनस्पतीनां दुःखमहं दृष्टप्रत्यपायो **न करिष्ये** । यदि वा **तत्** दुःखोत्पत्तिनिमित्तभूतं वनस्पतावारम्भं छेदन-भेदनादिरूपं **नो करिष्ये** मनो-वाक्-कायैः, तथा परैः न कारयिष्ये, तथा कुर्वतश्च अन्यान् न अनुमंस्ये । किं कृत्वा ? इति दर्शयति—सर्वज्ञोपदिष्टमार्गानुसृत्या सम्यक्

---

टि० १. ०शस्त्रं कुठारादि । **किञ्चिच्च** ख ॥ २. **सर्वनिर्यु०** ख ॥ ३. **एसा ॥१५१॥ समाप्ता पञ्चमोद्देशकनिर्युक्तिः** ।छ॥ झ । **एसा ॥१५१॥ अध्य० १ उद्दे० ५॥** ठ ॥ ४. **समुट्ठाय** ङ ॥

प्रव्रज्योत्थानेन उत्थाय=[१]**समुत्थाय,** प्रव्रज्यां प्रतिपद्य इत्यर्थः । तदेवं वर्जितसकल-सावद्यारम्भकलापः सन् तत् वनस्पतिदुःखं तदारम्भं वा नो करिष्यामीति, अनेन च संयमक्रिया दर्शिता । न च क्रियात एव मोक्षावाप्तिः । किं तर्हि ? ज्ञान-क्रियाभ्याम्, तदुक्तम्—

> **"नाणं किरियारहियं किरियामित्तं च दो[२] वि ≠एगंता ।**
> **न समत्था दाउं जे जम्म-⊕मरणदुक्ख[३] Δमा भाइ ॥" [ सन्मति०३।६२ ]**

यत एवमतो विशिष्टमोक्षकारणभूतज्ञानप्रतिपिपादयिषया आह—

**मत्ता मइमं । मत्वा**=ज्ञात्वा [४]अवबुध्य यथावद् जीवान्, मतिरस्य अस्तीति [५]**मतिमान्,** स एव उपदेशार्हो भवतीति अतः तद्द्वारेणैव शिष्यामन्त्रणं हे मतिम[६]न् !, जीवादिपदार्थांश्च ज्ञात्वा प्रव्रज्यां च प्रतिपद्य मोक्षमवाप्नोतीति, सम्यग्ज्ञानपूर्विका हि क्रिया फलवतीति दर्शितं भवति । पुनरत्रैव आह—

**अभयं विदित्ता** । अविद्यमानं भयमस्मिन् सत्त्वानामिति **अभयः** संयमः, स च सप्तदशविधानः, तं चाभयं सर्वभूतपरिपालनात्मकं संसारसागरात् निर्वाहकं **विदित्वा** वनस्पत्यारम्भात् निवृत्तिः विधेया इति । एतदेव दर्शयितुमाह—

**तं जे नो करए** इत्यादि । **तं** वनस्पत्यारम्भं, **यः** विदिततदारम्भकटुकविपाको **नो कुर्यात्** तस्य [७]प्रतिविशिष्टेष्टफलावाप्तिः, नान्यस्य Φअन्धमूढ्या प्रवर्तमानस्य, अभिलषित-विप्रकृष्टस्थानप्राप्तिप्रवृत्तान्धक्रि[८]याव्याघातवदिति मन्तव्यम् । ज्ञानमपि क्रियाहीनं न मोक्षाय, गृहान्तर्दह्यमाननिनङ्क्षुपङ्गुचक्षुर्ज्ञानवदिति । एवं च ज्ञात्वाऽभ्युपेत्य च तत्परिहारः कर्तव्य इति दर्शितं भवति । एवं यः सम्यग्ज्ञानपूर्विकां निवृत्तिं करोति स एव समस्तारम्भनिवृ[९]त्त इति दर्शयति—

---

**टि० १. समुत्थाय । सम्यक् प्रव्रज्यां** ग ॥ २. **दोन्नि ए०** ख ॥ ३. **०दुक्खदाहाइं** ख । **०दुक्खमोहाइं** क । **०दुक्खमाहाइं** च ॥ ४. **अनुबुध्य** क ॥ ५. **०मान् । मतिमानेवोपदेशार्हो** ख ग च ॥ ६. **०मन् ! प्रव्रज्यां प्रतिपद्य जीवादिपदार्थांश्च ज्ञात्वा मोक्ष०** ख ॥ ७. **०प्रतिविशिष्टफला०** क ॥ ८. **०यासङ्घातवदिति** ख ॥ ९. **०निवृत्तिं करोति इति** ङ ॥

**वि०टि०** ≠ "**एगंता** इति केवली" जै०वि०प० ॥ ⊕ "**मरणदुक्ख मा भाइं** ति अभयमित्यर्थः" स०वि०प० । Δ"**मोहाइं**" इति भ्रंसा(शा)दि जै०वि०प०॥ Φ "**अन्धस्तद्योति ( मूढ्येति)** यथा कथञ्चित्" जै०वि०प० ॥

**एसोवरए** त्ति । **एष** एव सर्वस्मादारम्भाद् वनस्पतिविषयाद**उपरतो** यो यथावत् ज्ञात्वा आरम्भं न करोतीति । स पुनरेवंविधनिवृत्तिभाक् किं **शाक्या**दिष्वपि सम्भवति उत[1] न ?, इहैव प्रवचने इति दर्शयति–

**एत्थोवरए** त्ति । **एतस्मिन्ने**व जैनेन्द्रे प्रवचने परमार्थत **उपरतः**, नान्यत्र । यथाप्रतिज्ञातनिरवद्यानुष्ठायित्वाद् उपरतव्यपदेशभाग् भवति, न शेषाः **शाक्या**दयः, तद्विपरीतत्वाद्। एष एव च सम्पूर्णानगारव्यपदेशमश्नुते इति दर्शयति–

[2]**एस अणगारे त्ति पवुच्चइ** त्ति । **एषः** अतिक्रान्तसूत्रार्थव्यवस्थितः अविद्यमानागारः=**अनगारः** प्रकर्षेण उच्यते=**प्रोच्यते इति** । किंकृतः प्रकर्षः ? अनगारव्यपदेशकारणभूतगुणकलापसम्बन्धकृतः प्रकर्षः । **इति**शब्दः अनगारव्यपदेशकारणपरिसमाप्तिद्योती, एतावदनगारलक्षणम्, नान्यदिति ॥४०॥

ये पुनः प्रोज्झितपारमार्थिकानगारगुणाः शब्दादीन् विषयानङ्गीकृत्य प्रवर्तन्ते ते तु नापेक्षन्ते वनस्पतीन् जीवान्, यतो भूयांसः शब्दादयो गुणा वनस्पतिभ्य एव निष्पद्यन्ते, शब्दादिगुणेष्वेव वर्तमाना [3]राग-द्वेषविषमविषविघूर्णमानलोललोचना नरकादिचतुर्विधगत्यन्तःपातिनो बोद्धव्याः, तदन्तःपातिन एव च शब्दादिविषया[4]भिष्वङ्गिणो भवन्तीति । अस्यार्थस्य प्रसिद्धये गत-प्रत्यागतलक्षणं इतरेतरावधारणफलं सूत्रमाह–

## [ सू० ] जे गुणे से आवट्टे, जे आवट्टे से गुणे ।

**जे गुणे से आवट्टे, जे आवट्टे से गुणे** । **यो गुणः** शब्दादिकः **स आवर्तः**, आवर्तन्ते=परिभ्रमन्ति प्राणिनो यत्र स आवर्तः संसारः । इह च कारणमेव कार्यत्वेन व्यपदिश्यते यथा नड्वलोदकं पादरोगः । एवं य एते शब्दादयो गुणाः स आवर्तः तत्कारणत्वात् । अथवा एकवचनोपादानात् पुरुषो अभिसम्बध्यते, यः शब्दादिगुणे वर्तते स आवर्ते वर्तते, यश्च आवर्ते वर्तते स गुणे वर्तत इति ।

[5]अत्र [6]कश्चित् चोद्यचञ्चुराह–'यो [7]गुणे वर्तते स आवर्ते वर्तते इति साधु । यः पुनरावर्ते वर्तते नासौ नियमत एव गुणेषु वर्तते, यस्मात् साधवो वर्तन्त आवर्ते, न गुणेषु । तद् एतत्

टि० १. उत इहैव प्रवचने ? इति ख ग घ ङ च ॥ २. एसऽणगारे ख । एस अणगार इति पवु० क । एस अणगार त्ति पव्वुच्चई एषः ग ॥ ३. राग-द्वेषविघूर्ण० घ । राग-द्वेषविषविघूर्ण० ङ ॥ ४. ०याभिषङ्गिणो क-गप्रती ऋते ॥ ५. अथ घ ङ ॥ ६. कश्चिन्नोद्यचञ्चु० ख ॥ ७. गुणेषु कप्रतिमृते ॥ ८. गुणे किन्तु घ ॥

कथमिति ? अत्रोच्यते–सत्यम्, आवर्ते यतयो वर्तन्ते, न गुणेषु, किन्तु राग-द्वेषपूर्वकं गुणेषु वर्तनं इहाधिक्रियते, तच्च साधूनां न सम्भवति, तदभावात्। आवर्तोऽपि संसरणरूपो दुःखात्मको न सम्भवति । सामान्यतस्तु संसारान्तःपातित्वं सामान्यशब्दादिगुणोपलब्धिश्च सम्भवत्येव, अतो नोपलब्धिः प्रतिषिध्यते, [१]रागपरिणामो द्वेषपरिणामो वा यस्तत्र स प्रतिषिध्यते । तथा चोक्तम्–

''**कण्णसोक्खेहिं सद्देहिं पेम्मं नाभिनिवेसए ।**'' [ ] इत्यादि ।

[२]तथा– ''**न शक्यं रूपमद्रष्टुं, चक्षुर्गोचरमागतम् ।**
**राग-द्वेषौ तु यौ तत्र, तौ बुधः परिवर्जयेत् ॥**'' [ ]' इति ।

कथं पुनः गुणभूयस्त्वं वनस्पतिभ्यः ? इति प्रदर्श्यते– वेणु-वीणा-पटह-मुकुन्दादीनां आतोद्यविशेषाणां वनस्पतेरुत्पत्तिः । ततश्च मनोहराः शब्दा निष्पद्यन्ते। प्राधान्यमत्र वनस्पतेर्विवक्षितम्, अन्यथा तु तन्त्री-चर्म-पाण्यादिसंयोगात् शब्दनिष्पत्तिरिति । रूपं पुनः काष्ठकर्म-स्त्रीप्रतिमादिषु गृह-तोरण-वेदिका-स्तम्भादिषु च चक्षूरमणीयम् । गन्धा अपि हि *कर्पूर-पाटल-लवली-लवङ्ग-केतकी-सरस-चन्दना-ऽगरु-कक्कोलक-एला-जातिफल-पत्रिका-केसर-मांसी-त्वक्-पत्रादीनां सुरभयो गन्धेन्द्रियाह्लादकारिणः प्रादुर्भवन्ति । रसास्तु बिस-मृणाल-मूल-कन्द-पुष्प-फल-पत्र-[३]कण्टक-मञ्जरी-त्वग-ऽङ्कुर-किशलया-ऽरविन्द-केसरादीनां जिह्वेन्द्रियप्रह्लादिनो निष्पद्यन्ते अतिबहव इति । तथा स्पर्शाः पद्मिनीपत्र-कमलदल-मृणाल-वल्कल-दुकूल-शाटक-उपधान-तूलिक-प्रच्छादनपटादीनां स्पर्शनेन्द्रियसुखाः प्रादुःषन्ति । एवमेतेषु वनस्पतिनिष्पन्नेषु शब्दादिगुणेषु यो वर्तते स आवर्ते वर्तते, यश्च आवर्तवर्ती स राग-द्वेषात्मकत्वाद् गुणेषु वर्तत इति ।

[४]स आवर्तो नामादिभेदात् चतुर्धा । नाम-स्थापने क्षुण्णे । द्रव्यावर्तः स्वामित्व-करणा-ऽधिकरणेषु यथासम्भवं योज्यः । स्वामित्वे नद्यादीनां क्वचित् प्रविभागे जलपरिभ्रमणं द्रव्यस्य आवर्तः, द्रव्याणां वा हंस-[५]कारण्डव-चक्रवाकादीनां व्योम्नि क्रीडतामावर्तनाद् आवर्तः । करणे तु तेनैव जलद्रव्येण भ्रमता यदन्य[६]दावर्त्यते तृण-≠कलिञ्चादि स द्रव्येणावर्तः, तथा त्रपु-सीसक-लोह-रजत-सुवर्णैः [७]आवर्तमानैः यदन्यत्

टि० १. रागद्वेषपरिणामो ख ॥ २. तथा चोक्तम् च ॥ ३. ०कन्दक० ख ग च ॥ ४. स चावर्तो ग च ॥ ५. ०कारण्ड-चक्र० ग । ०कारण्डक-चचक्र० त ॥ ६. ०दावर्तते खप्रतिमृते ॥ ७. ०आवर्त्यमानै० ख च । गपुस्तके पाठभङ्गः ॥

वि०टि० * एतेषां सर्वेषां वृक्षाणां चातुर्वर्णीयछायाचित्राणि दृश्यतां चतुर्थपरिशिष्टे ॥ ≠ ''कलिञ्च इति वंशखण्डम्'' जै०वि०प० ॥

तदन्तःपात्यावर्त्यते स द्रव्यैरावर्त इति । अधिकरणविवक्षायामेकस्मिन् जलद्रव्ये आवर्तः, अन्योन्यभावसङ्क्रान्तिः, औदयिकभावोदयाद् वा नरकादिगतिचतुष्टयेऽसुमानावर्तते । इह च भावाऽऽवर्तेनाधिकारः, न शेषैरिति ।

अथ य एते गुणाः संसारावर्तकारणभूताः शब्दादयो वनस्पतेरभिनिर्वृत्ताः ते किं नियतदिग्देशभाज उत सर्वदिक्षु ? इत्यत आह–

**उड्ढं अवं तिरियं पाईणं पासमाणे रूवाइं पासति, सुणमाणे सद्दाइं सुणेति । उड्ढं अहं तिरियं पाईणं मुच्छमाणे रूवेसु मुच्छति, सद्देसु यावि ।**

**उड्ढं अवमि**[1]त्यादि । प्रज्ञापकदिगङ्गीकरणाद् ऊर्ध्वदिग्व्यवस्थितं रूपगुणं पश्यति प्रासादतल-हर्म्यादिषु । **अवमि**[2]ति अवाङ्[3] अधस्ताद् गिरिशिखरप्रासादाधिरूढो[4]ऽधोव्यवस्थितं रूपगुणं पश्यति, अधःशब्दार्थेऽ[5]वाङ् इत्ययं वर्तते। गृहभित्त्यादिव्यवस्थितं रूपगुणं च **तिर्यक्** पश्यति । तिर्यक्शब्देन चात्र दिशोऽनुदिशश्च परिगृह्यन्ते, ताश्च इमाः–**प्राचीनम्** इति पूर्वा दिग् । एतच्च उपलक्षणम्, अन्या अपि एतादृगाद्याः तिर्यग्दिशो द्रष्टव्या इति । एतासु दिक्षु **पश्यन्** चक्षुर्ज्ञानपरिणतो **रूपाणि** द्रव्याणि चक्षुर्ग्राह्यतया परिणतानि **पश्यति,** उपलभत इत्यर्थः । तथा तासु च **शृण्वन् शृणोति शब्दान्** उपयुक्तः श्रोत्रेण, नान्यथेति ।

अत्र उपलब्धिमात्रं प्रतिपादितम्, न चोपलब्धिमात्रात् संसारप्रपातः, किन्तु यदि मूर्च्छां रूपादिषु करोति ततोऽस्य बन्ध इति दर्शयितुमाह–

**उड्ढमि**त्यादि । पुनः ऊर्ध्वादेः मूर्च्छासम्बन्धार्थमुपादानम्, **मूर्च्छन् रूपेषु मूर्च्छति,** रागपरिणामं[6] यान्⊕ रज्यते[7] रूपादिषु इत्यर्थः, एवं **शब्देष्वपि** मूर्च्छति । **अपि**शब्दः सम्भावनायां समुच्चये वा । रूप-शब्दविषयग्रहणाच्च शेषा अपि गन्ध-रस-स्पर्शा गृहीताः भवन्ति, एकग्रहणे तज्जातीयानां[8] ग्रहणात्, आद्यन्तग्रहणाद् वा तन्मध्यग्रहणमवसेयमिति । एवं विषयलोकमाख्याय विवक्षितमाह–

**एस लोगे वियाहिते । एत्थ अगुत्ते अणाणाए पुणो पुणो गुणासाते वंकसमायारे पमत्ते गारमावसे ॥४१॥**

---

**टि०** १. **अधमित्यादि** ख च । **अहमित्यादि** ग ॥ २. **अधमिति** ग च ॥ ३. **अवा अध०** क च । ४. **०दारूढे** ख च ॥ ५. **अधादित्ययं** क ॥ ६. **०परिणामवान्** च ॥ ७. **युज्यते** ख ॥ ८. **तज्जातीयग्रहणात्** ख ॥

**वि०टि०** ⊕ "यान् इति गच्छन्" जै०वि०प० ॥

**एस लोए वियाहिए, एत्थ अगुत्ते अणाणाए । एष** इति रूप-रस-गन्ध-स्पर्श-शब्दविषयाख्यो **लोको व्याख्यातः**, लोक्यते परिच्छिद्यते इति कृत्वा । **एतस्मिन्** च प्रस्तुते शब्दादिगुणलोके **अगुप्तः** यो मनो-वाक्-कायैः, मनसा द्वेष्टि रज्यते वा, वाचा प्रार्थनं शब्दादीनां करोति, कायेन शब्दादिविषयदेशमभिसर्पति । एवं यो हि अगुप्तो भवति सः **अनाज्ञायां** वर्तते, न भगवत्प्रणीतप्रवचनानुसारीति यावद् इति ।

एवंगुणश्च यत् कुर्यात् तदाह–

**पुणो पुणो** इत्यादि । ततश्च असौ असकृच्छब्दादिगुणलुब्धो न शक्नोति आत्मानं शब्दादिगृद्धेः निवर्तयितुम्, अनिवर्तमानश्च **पुनः पुनः गुणास्वादो** भवति, क्रियासातत्येन पुनः पुनः शब्दादिगुणान् आस्वादयतीत्यर्थः । तथा च यादृशो भवति तद् दर्शयति–

**वक्रः**=असंयमः कुटिलो, नरकादिगत्याभिमुख्यप्रवणत्वात्, समाचरणं=**समाचारः** अनुष्ठानम्, वक्रः समाचारो [1]यस्य स तथा, असंयमानुष्ठायीत्यर्थः । अवश्यमेव शब्दादि-विषयाभिलाषी भूतोपमर्दकारी इत्यतो **वक्रसमाचारः** । प्राक् शब्दादिविषय-लवसमास्वादनाद् गृद्धः पुनरात्मानं [2]आवारयितुं असमर्थत्वाद् ≠**अपथ्याम्रफलभोजिराजवद्** विनाशमाशु संश्रयत इति । एवं चासौ नितरां जितः शब्दादिविषयसमास्वादनात् ⊕**खन्तपुत्तो** व्व इदमाचरति–

[3]**पमत्ते गारमावसे । प्रमत्तः**=विषयविषमूर्छितः **अगारं**=गृहं **आवसति** ॥४१॥

योऽपि द्रव्यलिङ्गसमन्वितः शब्दादिविषयप्रमादवान् असावपि विरतिरूपभावलिङ्ग-रहितत्वाद् गृहस्थ एवेति । अन्यतीर्थिकाः पुनः सर्वदा सर्वथा अन्यथावादिनो अन्यथाकारिण इति दर्शयितुमाह–

**[सू० ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं वणस्सतिकम्मसमारंभेणं वणस्सतिसत्थं**

---

टि० १. **यस्यासौ वक्रसमाचारः असंय०** ख च ॥ २. **०माचारयितु०** घ ङ विना ॥ ३. **पमत्ते अगार०** ख घ ङ ॥

**वि०टि०** ≠ दृश्यतां कथानकं द्वितीयपरिशिष्टे ॥ ⊕ अधिकं जिज्ञासुभिः द्रष्टव्यं **अर्हन्नक**कथानकं द्वितीयपरिशिष्टे ॥

**समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥४२॥**

**[ सू० ] तत्थ खलु भगवता परिण्णा पवेदिता—इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव वणास्सतिसत्थं समारभति, अण्णेहिं वा वणास्सतिसत्थं समारभावेति, अण्णे वा वणस्सतिसत्थं समारभमाणे समणुजाणति । तं से अहियाए, तं से अबोहीए ॥४३॥**

**[ सू० ] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णायं भवति— एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु णिरए ।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं वणस्सति-कम्मसमारंभेणं वणास्सतिसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥४४॥**

**लज्जमाणा** इत्यादि यावत् **अण्णे वऽणेगरूवे पाणे विहिंसति** त्ति । प्राग्वद् नेयम्, नवरं वनस्पत्यालापो विधेय इति ॥४२-४४॥

साम्प्रतं वनस्पतिजीवास्तित्वे लिङ्गमाह—

**[ सू० ] से बेमि— इमं पि जातिधम्मयं, एयं पि जातिधम्मयं; इमं पि वुड्ढिधम्मयं, एयं पि वुड्ढिधम्मयं; इमं पि चित्तमंतयं, एयं पि चित्तमंतयं; इमं पि छिण्णं मिलाति, एयं पि छिण्णं मिलाति; इमं पि आहारगं, एयं पि आहारगं; इमं पि अणितियं, एयं पि अणितियं; इमं पि असासयं, एयं पि असासयं; इमं पि चयोवचइयं, एयं पि चयोवचइयं; इमं पि विप्परिणामधम्मयं, एयं पि विप्परिणामधम्मयं ॥४५॥**

**से बेमीत्यादि** । **सो**ऽहमुपलब्धतत्त्वो **ब्रवीमि** । अथवा वनस्पतिचैतन्यं प्रत्यक्ष-प्रमाणसमधिगम्यमानस्वरूपं[1] यत्[2] **तदहं ब्रवीमि** । यथाप्रतिज्ञातमर्थं दर्शयति—

टि० १. ०स्वरूपं यावत् तावदहं ख ॥ २. यच्च तदहं ग ॥

**इमं पि जाइधम्मयं** ति । इह उपदेशदानाय सूत्रारम्भः, तद्योग्यश्च पुरुषो भवति, अतः तस्य सामर्थ्येन सन्निहितत्वात् तच्छरीरं प्रत्यक्षासन्नवाचिना इदमा परामृशति । **इदमपि** [1]पुरुषशरीरं, जननं= **जातिः** उत्पत्तिः, **तद्धर्मकम्, [2]एतदपि** वनस्पतिशरीरं **तद्धर्मकं** तत्स्वभावमेव इति । पूर्वकः **अपिशब्दः** [3]सर्वत्र यथा[4]शब्दार्थे, द्वितीयस्तु [5]समुच्चये व्याख्येयः । ततश्च अयमर्थः— यथा [6]पुरुषशरीरं बाल-कुमार-युव-वृद्धतापरिणामविशेषवत् चेतनावत् सदाधिष्ठितं प्रस्पष्टचेतनाकं उपलभ्यते [7]तथा एतदपि वनस्पतिशरीरम्, यतो जातः केतकतरुः बालको युवा वृद्धश्च संवृत्त इति, अतः तुल्यत्वाद् एतदपि जातिधर्मकम् । न च कश्चिद् विशेषः अस्ति येन सति अपि जातिधर्मत्वे मनुष्यादिशरीरमेव सचेतनं न [8]वनस्पतिशरीरमिति ।

ननु च जातिधर्मत्वं केश-नख-दन्तादिष्वपि अस्ति, अव्यभिचारि च लक्षणं भवति, अस्ति च व्यभिचारः, तस्माद् अयुक्तं कल्पयितुं जातिधर्मत्वं जीवलिङ्गमिति । उच्यते— सत्यम्, अस्ति जननमात्रम्, किन्तु मनुष्यशरीरप्रसिद्धबाल-कुमार-युव-वृद्धावस्थानां असम्भवः केशादिषु अस्ति स्फुटः, तस्माद् असमञ्जसमेतत् । अपि च केश-नखं चेतनावत्पदार्थाधिष्ठितशरीरस्थं जातमिति उच्यते, वर्धते इति वा, न पुनस्त्वयैवं ≠तरवोऽपि चेतनावत्पदार्थाधारस्था इष्यन्ते, त्वन्मते भुवोऽचेतनत्वात्, तस्माद् अयुक्तमिति । अथवा जातिधर्मत्वादीनि समुदितानि सूत्रोक्तानि एक एव हेतुः, न पृथग्घेतुता, न च समुदायहेतुः केशादिषु अस्ति, तस्माद् अदोष इति ।

तथा यथा **इदं** मनुष्यशरीरमनवरतं बाल-कुमाराद्यवस्थाविशेषैः वर्धते तथा **एतदपि** वनस्पतिशरीरं अङ्कुर-किशलय-शाखा-प्रशाखादिभिः विशेषैः वर्धत इति ।

तथा यथा **इदं** मनुष्यशरीरं चेतनाव[9]द् एवं [10]वनस्पतेरपि । कथम् ? चेतयति येन तत्=चित्तं ज्ञानम्, ततश्च यथा मनुष्य[11]शरीरं ज्ञानेनानुगतं एवं वनस्पतिशरीरमपि यतो धात्री-प्रपुना[?न्ना]टादीनां [12]स्वाप-विबोधतस्तद्भावः, तथाऽधोनिखातद्रविणराशेः स्वप्ररोहेण आवेष्टनम्, प्रावृड्जलधरनिनादशिशिरवायुसंस्पर्शाद् अङ्कुरोद्भेदः, तथा मदमदनसङ्गस्खलद्-

---

टि० १. **मनुष्यशरीरं** ख ग च ॥ २. **एतदिति वन०** ख ॥ ३. **सर्वत्र वा शब्दार्थे** घ ॥ ४. **०शब्दार्थः द्वि०** क ॥ ५. **समुच्छ्रये** च ॥ ६. **मनुष्यशरीरं** ख ग च ॥ ७. **तथेदमपि** कप्रतिं विना ॥ ८. **वनस्पतेरिति** क ॥ ९. **चित्तवद्** कपुस्तकाद्विना ॥ १०. **वनस्पतिशरीरमपि चित्तवत् । कथं** कप्रतेर्विना ॥ ११. **०शरीरं चित्तवत् । एवं च ज्ञानेना०** ङ॥ १२. ० **स्वाप-विबोधसद्भावः** ख ॥

**वि०टि०** ≠ "**तरवोऽपि** इति केशादयस्तावदिष्यन्त एव चेतनावत्पदार्थाधारस्थाः" जै०वि०प० ॥

गतिविघूर्णमानलोललोचनविलासिनीसनूपुरसुकुमारचरणताडनाद् अशोकतरोः पल्लव-[१]कुसुमोद्भेदः, तथा सुरभिसुरागण्डूषसेकाद् बकुलस्य Φस्पृष्टप्ररोदिकादीनां च हस्तादि-संस्पर्शात् सङ्कोचादिका परिस्फुटा [२]क्रियोपलब्धिः । न चैतद् अभिहिततरुसम्बन्धि क्रियाजालं ज्ञानमन्तरेण घटते, तस्मात् सिद्धं चित्तवत्त्वं वनस्पतेरिति ।

तथा यथा **इदं छिन्नं म्लायति** [३]तथा **एतदपि छिन्नं म्लायति** । मनुष्यशरीरं हि हस्तादि छिन्नं म्लायति शुष्यति तथा तरुशरीरमपि पल्लव-फल-कुसुमादि छिन्नं शोषमुपगच्छद् दृष्टम्, न च अचेतनानामयं धर्म इति ।

तथा यथा **इदं** मनुष्यशरीरं स्तनक्षीर-व्यञ्जन-[४]ओदनाद्याहाराभ्यवहाराद् आहारकं तथा **एतदपि** वनस्पतिशरीरं भू-जलाद्याहाराभ्यवहारकम्, न चैतद् आहारकत्वमचेतनानां दृष्टम्, अतस्तद्भावात् सचेतनत्वमिति ।

तथा यथा **इदं** मनुष्यशरीरकं **अनित्यकं** न सर्वदाऽवस्थायि तथा **एतदपि** वनस्पतिशरीरं **अनित्यं** नियतायुष्कत्वात्, तथा हि– अस्य दश वर्षसहस्राणि उत्कृष्टमायुः ।

तथा यथा **इदं** मनुष्यशरीरं **अशाश्वतं** प्रतिक्षणमावीचिमरणेन मरणात् तथा **एतदपि** वनस्पति[५]शरीरमिति ।

तथा यथा **इदं** इष्टा-ऽनिष्टाहारादिप्राप्त्या **चया-ऽपचयिकं** वृद्धि-हान्यात्मकं तथा **एतद् अपि** इति ।

तथा यथा **इदं** मनुष्यशरीरं विविधः परिणामः तत्तद्रोगसम्पर्कात् पाण्डुत्व-उदरवृद्धि-शोफ-कृशत्वा-ऽङ्गुलि-नासिकाप्रवेशादिरूपो बालादिरूपो वा तथा रसायन-स्नेहाद्युपयोगाद् विशिष्टकान्तिबलोपचयादिरूपो **विपरिणामः, तद्धर्मकं**=तत्स्वभावकं तथा **एतदपि** वनस्पतिशरीरं तथाविधरोगोद्भवात् [६]पुष्प-फल-पत्र-त्वगाद्यन्यथाभवनात् [७]तथा-विधदौहृदप्रदानेन पुष्प-फलाद्युपचयाद् **विपरिणामधर्मकम्** । एवमनन्तरोक्तधर्मकलाप-[८]सम्भवाद् असंशयं गृहाण एतत् सचेतनास्तरवः इति ॥४५॥

---

टि० १. ०**कुसुमोद्गमः । तथा** ख च ॥ २. ०**लब्धिर्भवेत् ॥ न** ग ॥ ३. **तथेदमपि** ख ग च ॥ ४. ०**ओदनाद्याहारकं** ग च ॥ ५. ०**शरीरमपि** ग ॥ ६. **पुष्प-पत्र-फल-त्व०** ख च ॥ ७. **तथा विशिष्टदौ०** ख । **तथा विशिष्टाहारदौ०** ग । **तथा विशिष्टदोहदप्रदा०** च ॥ ८. ०**सद्भावात्** ख च ॥

वि०टि० Φ "**स्पृष्टपरोदिका**: इति छिन्नपरोदिका:" जै०वि०प० ॥

एवं वनस्पतेः चैतन्यं प्रदर्श्य तदारम्भे [1]बन्धं तत्परिहाररूपविरत्यासेवनेन च मुनित्वं प्रतिपादयन् उपसञ्जिहीर्षुराह–

**[सू०] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति ॥४६॥**

**[सू०] तं परिण्णाय मेहावी णेव सयं वणस्सतिसत्थं समारभेज्जा, णेवऽण्णेहिं वणस्सतिसत्थं समारभावेज्जा, णेवऽण्णे वणस्सतिसत्थं समारभंते समणुजाणेज्जा ॥४७॥**

**[सू०] जस्सेते वणस्सतिसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ॥४८॥**

**एत्थ सत्थ**मित्यादि । **एतस्मिन्** वनस्पतौ **शस्त्रं** द्रव्य-भावाख्यं **आरभमाणस्य इत्येते आरम्भा अपरिज्ञाताः** अप्रत्याख्याता **भवन्ति** । **एतस्मिंश्च** वनस्पतौ **शस्त्रं असमारभमाणस्य इत्येते आरम्भाः परिज्ञाताः** प्रत्याख्याता **भवन्ती**ति पूर्ववच्चर्चः यावत् **स एव मुनिः परिज्ञातकर्म्मा इति ब्रवीमि** पूर्ववदिति ॥४६-४८॥

॥ [2]इति शस्त्र[3]परिज्ञाध्ययने [4]पञ्चमोद्देशकटीका समाप्तेति ॥छ॥

टि० १. बन्धपरिहार० च ॥ २. इति इति ख-चआदर्शयोर्नास्ति ॥ ३. ०परिज्ञायां प० ख ङ ॥ ४. पञ्चमोद्देशकः ।छ॥ घ ॥

## ॥ षष्ठः त्रसकायोद्देशकः ॥

उक्तः पञ्चमोद्देशकः । साम्प्रतं षष्ठः[1] समारभ्यते । अस्य च अयमभिसम्बन्धः—इह अनन्तरोद्देशके वनस्पतिकायः प्रतिपादितः, तदनन्तरं च त्रसकायस्य आगमे परिपठितत्वात् तत्स्वरूपाधिगमाय अयमुद्देशकः समारभ्यते । तस्य चोपक्रमादीनि चत्वारि अनुयोगद्वाराणि[2] वाच्यानि यावद् नामनिष्पन्ने निक्षेपे **त्रसकायोद्देशकः** । तत्र त्रसकायस्य पूर्वप्रसिद्धद्वार-क्रमातिदेशाय तद्विभिन्नलक्षणद्वाराभिधानाय च **निर्युक्तिकृदाह**—

[ नि० ] **तसकाए दाराइं ताइं जाइं हवंति पुढवीए ।**
**णाणत्ती उ विहाणे परिमाणुवभोग-सत्थे य ॥१५२॥**

**तसकाये** इत्यादि । त्रस्यन्तीति त्रसाः, तेषां कायः=**त्रसकायः**, तस्मिन् [3]**तान्येव द्वाराणि भवन्ति यानि पृथिव्यां** प्रतिपादितानि । **नानात्वं तु विधान-परिमाण-उपभोग-शस्त्रद्वारेषु, च**शब्दाद् लक्षणे च प्रतिपत्तव्यमिति ॥१५२॥

तत्र विधानद्वारमाह—

[ नि० ] **दुविहा खलु तसजीवा लद्धित[4]सा चेव गइतसा चेव ।**
**[5]लद्धीय तेउ-वाऊ तेणऽहिगारो इहं नत्थि ॥१५३॥**

**दुविहेत्यादि । द्विविधाः**=द्विभेदाः, **खलुः** अवधारणे, त्रसत्वं प्रति द्विभेदत्वमेव । त्रसनात्=स्पन्दनात् त्रसाः, जीवनात् प्राणधारणाद् जीवाः, त्रसा एव जीवाः=**त्रसजीवाः लब्धित्रसा गतित्रसाश्च । लब्ध्या तेजो-वायू** त्रसौ, लब्धिः तच्छक्तिमात्रम् । लब्धित्रसाभ्यां **इह अधिकारो नास्ति,** तेजसोऽभिहितत्वाद् वायोश्चाभिधास्यमानत्वात् । अतः सामर्थ्याद् गतित्रसा एव अधिक्रियन्ते ॥१५३॥

के पुनस्ते कियद्भेदा वा ? [6]इत्याह—

---

**टि०** १. **प्रारभ्यते** ख ग ॥ २. **०णि भवन्ति यावद्** ख-चप्रती विना ॥ ३. **तान्येवानुयोगद्वाराणि भ०** ख ॥ ४. **०तसा तह य गइ०** ज ॥ ५. **लद्धीय वाउ-तेऊ** ख ठ ॥ ६. **इत्यत आह** ख च ॥

**वि०टि०** ≠ "लब्ध्य(?ब्ध्या) इति शक्त्या" जै०वि०प० । इदमत्रावधेयम्-श्रीमत्**तत्त्वार्थाधिगमसूत्रे 'तेजो-वायून्द्रियाश्च त्रसा'** [ २/१४ ] इत्यनेन सूत्रेण तेजो-वाय्वोः गतित्रसत्वं प्रदर्शितं; अत्र तु तयोरेव लब्धित्रसत्वं, ततः कथं न विरोध ? इति आशङ्का स्यात्; तत्तुच्छं, यतः नयसापेक्षे इमे वचने भाति । **तत्त्वार्थे** लोकव्यवहारमाश्रित्य गतित्रसत्वमुक्तम्; **आचा०निर्युक्तौ** तु स्वाभाविकीगतिशक्तिमाश्रित्य लब्धित्रसत्वमुक्तं, तत्त्वं तु केवलिगम्यम् ॥

[ नि० ] **नेरइय तिरिय मणुया सुरा य ⊕गइओ[1] चउव्विहा[2] उ[3] तसा ।**
**पज्जत्ता-ऽपज्जत्ता नेरइयाई उ नायव्वा[4] ॥१५४॥**

**नेरइए**त्यादि । **नारकाः** रत्नप्रभादि-महातमःपृथिवीपर्यन्तनरकवासिनः सप्तभेदाः, **तिर्यञ्चो**ऽपि द्वि-त्रि-चतु.-पञ्चेन्द्रियाः, **मनुष्याः** सम्मूर्छनजा गर्भव्युत्क्रान्तयश्च, **सुराः**[5] भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकाः, एते **गतित्रसाश्चतुर्विधाः** । नामकर्मोदयाभिनिर्वृत्तगतिलाभाद् गतित्रसत्वम् । एते च नारकादयः पर्याप्ता-ऽपर्याप्तकभेदेन द्विधा ज्ञातव्याः। तत्र पर्याप्तिः पूर्वोक्ता एव षोढा, तया यथासम्भवं निष्पन्नाः पर्याप्ताः, तद्विपरीतास्तु अपर्याप्तका अन्तर्मुहूर्तकालमिति ॥१५४॥ इदानीं उत्तरभेदान् आह—

[ नि० ] **तिविहा तिविहा जोणी अंडा पोया जराउया चेव ।**
**बेइंदिय तेइंदिय चउरो पंचिंदिया चेव ॥१५५॥ दारं ॥**

**तिविहे**त्यादि । अत्र[6] हि शीतोष्णमिश्रभेदात्, तथा सचित्ता-ऽचित्त-मिश्रभेदात्, तथा संवृत-विवृत-तदुभयभेदात्, तथा स्त्री-पुं-नपुंसकभेदात् च इत्यादीनि बहूनि योनीनां त्रिकाणि सम्भवन्तीति । तेषां सर्वेषां सङ्ग्रहार्थं '**त्रिविधा त्रिविधा**' इति वीप्सानिर्देशः । तत्र नारकाणामाद्यासु तिसृषु भूमिषु[7] शीतैव योनिः, चतुर्थ्यामुपरितननरकेषु शीता, अधस्तननरकेषूष्णा, पञ्चमी-षष्ठी-सप्तमीषूष्णैव, नेतरे । गर्भव्युत्क्रान्तिकतिर्यङ्-मनुष्याणां अशेषदेवानां च शीतोष्णा योनिः, नेतरे । द्वि-त्रि-चतुः[8]-पञ्चेन्द्रिय-सम्मूर्छनज-तिर्यङ्-मनुष्याणां त्रिविधाऽपि योनिः शीता उष्णा शीतोष्णा चेति ।

तथा नारक-देवानां अचित्ता, नेतरे । द्वीन्द्रियादि-सम्मूर्छनजपञ्चेन्द्रियतिर्यङ्-मनुष्याणां त्रिविधाऽपि योनिः सचित्ता[9]-ऽचित्त-मिश्रा । गर्भव्युत्क्रान्तिकतिर्यङ्-मनुष्याणां मिश्रा योनिः, नेतरे ।

तथा[10] नारक-देवानां संवृता योनिः, नेतरे । द्वि-त्रि-चतुरिन्द्रिय-सम्मूर्छनज-पञ्चेन्द्रियतिर्यङ्-मनुष्याणां विवृता योनिः, नेतरे । गर्भव्युत्क्रान्तिकतिर्यङ्-मनुष्याणां संवृतविवृता योनिः, नेतरे ।

---

**टि०** १. **गईउ** क छ । **गईय** ख ज झ । **गतीतो** ञ ॥ २. **०हा चेव** ॥ ख ठ ॥ ३. **य** ञ ॥ ४. **णेयव्वा** ञ ॥ ५. **अमराः** ख च ॥ ६. **तत्र** च ॥ ७. **भूमिषूष्णैव योनिः । चतुर्थ्यामुपरितननरकेषूष्णा । अधस्तननरकेषु शीता । पञ्चमी-षष्ठी-सप्तमीषु शीतैव । नेतरे** ॥ ख । ८. **०चतुरिन्द्रिय-पञ्चे०** ख ग च ॥ ९. **सचित्ताऽचित्ता मिश्रा च । गर्भ०** च ॥ १०. **तथा देव-नारकाणां सं०** ग ॥

**वि०टि०** ⊕ ''गतितस्त्रसाः'' ठटिप्पणी ॥

तथा नारका नपुंसकयोनय एव । तिर्यञ्चः त्रिविधाः— स्त्री-पुं-नपुंसकयोनयोऽपि । मनुष्या अप्येवं त्रैविध्यभाजः । देवाः स्त्री-पुंयोनय एव । तथा अपरं मनुष्ययोनेः[1] त्रैविध्यम्, तद्यथा— कूर्मोन्नता, तस्यां च अर्हत्-चक्रवर्त्यादिसत्पुरुषाणामुत्पत्तिः । तथा शङ्खावर्ता, सा च स्त्रीरत्नस्यैव, तस्यां च प्राणिनां सम्भवोऽस्ति[2], न निष्पत्तिः । तथा वंशीपत्रा, सा च प्राकृतजनस्य इति ।

तथा अपरं त्रैविध्यं **निर्युक्तिकृद्** दर्शयति, तद्यथा— **अण्डजा पोतजा जरायुजाश्च** इति । तत्र अण्डजाः पक्ष्यादयः, पोतजाः वल्गुली-गज-कलभादयः, जरायुजा गो-महिषी-मनुष्यादयः; तथा द्वि-त्रि-चतुः-पञ्चेन्द्रियभेदाच्च भिद्यन्ते। एवमेते[3] त्रसाः त्रिविध-योन्यादिभेदेन प्ररूपिताः । एतद्**योनिसङ्ग्राहिण्यौ**[4] च गाथे—

"****पुढवि-दग-अगणि-मारुय-पत्तेय-निओयजीवजोणीणं ।**
**सत्तग सत्तग सत्तग सत्तग दस चोद्दस य लक्खा ॥**
[5]**विगलिंदिएसु दो दो चउरो चउरो य नारय-सुरेसु ।**
[6]**तिरियाण होंति चउरो चोद्दस मणुयाण लक्खाइं ॥**" [          ]

एवमेते चतुरशीतियोनिलक्षा भवन्ति । तथा कुलपरिमाणम्—

"⊕**कुलकोडिसयसहस्सा बत्तीसऽट्ठऽट्ठ नव य पणुवीसा ।**

---

टि० १. मनुष्याणां योने० च ॥ २. सम्भवः । नास्ति निष्पत्तिः ख ॥ ३. ०ते त्रिधा त्रसा योन्यादि० ग ॥ ४. ०सङ्ग्राहिण्योऽथ गाथाः ग घ ॥ ५. विगलिंदियाण दो ख च ॥ ६. तिरिएसु हुंति ख ॥

वि०टि० * तुलना-बृहत्सं०३५१-५२, प्रव०सारो०९६८-९६९ ॥

⊕ तुलना-बारस सत्त य तिन्नि य सत्त य कुलकोडिसयसहस्साइं ।
नेया पुढवि-दग-अगणि-वाऊणं चेव परिसंखा॥
कुलकोडिसयसहस्सा सत्तट्ठ य नव य अट्ठवीसं य ।
बेइंदियं तेइंदिय चउरिंदिय हरियकायाणं ॥
अद्धतेरस बारस दस दस कुलकोडिसयसहस्साइं ।
जलयर पक्खि चउप्पय उरभुयसप्पाण नव हुंति ॥
छव्वीसा पणवीसा सुरनेरइयाण सयसहस्साइं ।
बारस य सयसहस्सा कुलकोडीण मणुस्साणं ॥
एगा कोडाकोडी सत्ताणउई भवे सयसहस्सा ।
पन्नासं च सहस्सा कुलकोडीणं मुणेयव्वा ॥

[बृहत्सं०३५३-५७, जीवसमा०४०-४४, प्रव०सारो०९६३-९६७]

एगिंदिय-बि-तिइंदिय-चउरिंदिय-हरियकायाणं ॥
अड्ढतेरस बारस दस[1] नव नव चेव कोडिलक्खाइं ।
जलयर-पक्खि-चउप्पय-उर-भुयपरिसप्पजीवाणं ॥
पणुवीसं छव्वीसं च सयसहस्साइँ नारय-सुराणं ।
बारस य सयसहस्सा कुलकोडीणं मणुस्साणं ॥
एगा कोडाकोडी सत्ताणउइं च सयसहस्साइं ।
पंचासं च सहस्सा कुलकोडीणं मुणेयव्वा ॥" [  ]

अङ्कतः १९७५००००००००००० सकलकुलसङ्ग्रहोऽयं बोद्धव्य इति ॥१५५॥

उक्ता प्ररूपणा[2] । तदनन्तरं लक्षणद्वारमाह—

[नि०] **दंसण णाण चरित्ते चरिताऽचरिते य दाण लाभे य ।**
**उवभोग भोग वीरियं इंदियविसए य लद्धी[3] अ ॥१५६॥**

[नि०] **उवओग जोग अज्झवसाणे वीसुं च लद्धिओ[4] उदया ।**
**अट्ठविहोदय लेसा सण्णुस्सासे कसाए य ॥१५७॥**

**दंसणे**त्यादि, **उवओगे**त्यादि । **दर्शनं** सामान्योपलब्धिरूपं चक्षुरचक्षुरवधि-केवलाख्यम्, मत्यादीनि **ज्ञानानि** स्व-परपरिच्छेदिनो जीवस्य परिणामा ज्ञानावरण-विगमव्यक्ताः तत्त्वार्थपरिच्छेदाः, सामायिक-छेदोपस्थाप्य-परिहारविशुद्धि-सूक्ष्मसम्पराय-यथाख्यातानि **चारित्रम्**, **चारित्राऽचारित्रं**=देशविरतिः स्थूलप्राणातिपातादिनिवृत्तिलक्षणं श्रावकाणाम्, तथा दान-लाभ-भोग-उपभोग-वीर्य-श्रोत्र-चक्षुः-घ्राण-रसन-स्पर्शनाख्या दश लब्धयो जीवद्रव्याऽव्यभिचारिण्यो लक्षणं भवन्ति ।

तथा **उपयोगः** साकारः अनाकारश्च अष्ट-चतुर्भेदः, **योगो** मनो-वाक्-कायाख्यः त्रिधा, **अध्यवसायाश्च** अनेकविधाः सूक्ष्माः मनःपरिणामसमुत्थाः[5], **विष्वक्**=पृथग् **लब्धीनां उदयाः**=प्रादुर्भावाः क्षीर-मध्वास्रवादयः, ज्ञानावरणाद्यन्तरायावसानकर्माष्टकस्य स्वशक्ति-परिणाम **उदयः**, **लेश्याः**[6] कृष्णादिभेदाः शुभा अशुभाश्च कषाय-योगपरिणाम[7]-

---

टि० १. **दस दस नव चेव** क-घपुस्तके विना ॥ २. **०णा । साम्प्रतं लक्षण०** ख ॥ ३. **लद्धीए** छ ज झ । **लद्धी य** ठ ॥ ४. **लद्धिओदइया** क ख झ ठ । **लद्धिओवइया** छ । **लद्धिओ उदइया** ज ॥ ५. **चेतःपरिणामविशेषाः । वि०** ख च । **मनःपरिणामविशेषाः । वि०** घ ङ ॥ ६. **लेश्या उत्कृष्टादिभेदाः शुभाशुभाश्च** ख ॥ ७. **०परिणतिविशेषाः । सञ्ज्ञा०** ख घ ङ च ॥

विशेषसमुत्थाः, **सञ्ज्ञास्तु** आहार-भय-परिग्रह-मैथुनाख्याः, अथवा दशभेदाः, अनन्तरोक्ताः चतस्रः, क्रोधाद्याश्च चतस्रः, तथौघसञ्ज्ञा लोकसञ्ज्ञा च, **उच्छ्वास-निःश्वासौ**=प्राणापानौ, **कषायाः** कषः=संसारः, तस्य आयाः क्रोधादयः, अनन्तानुबन्ध्यादिभेदात् षोडशविधाः, एतानि गाथाद्वयोपन्यस्तानि द्वीन्द्रियादीनां लक्षणानि यथासम्भवं अवगन्तव्यानि इति, न च एवंविधलक्षणकलापसमन्वयो घटादिषु अस्ति, तस्मात् तत्र अचैतन्यं अध्यवस्यन्ति विद्वांसः ॥१५७॥ अभिहितलक्षणकलापोपसञ्जिहीर्षया तथा परिमाणप्रतिपादनार्थं च गाथामाह—

[नि०] **लक्खणमेयं[1] चेव उ पयरस्स असंखभागमेत्ता[2] ते ।**
**निक्खमणे य पवेसे एगाईया वि एमेव ॥१५८॥**

**लक्खणमित्यादि** । **तुशब्दः** पर्याप्तिवचनः, द्वीन्द्रियादिजीवानां **लक्षणं**=लिङ्गं एतावद् **एव** दर्शनादि परिपूर्णम्, न[3] अतोऽन्यद् अधिकं अस्तीति ।

परिमाणं पुनः क्षेत्रतः संवर्तितलोकप्रतरासङ्ख्येयभागवर्तिप्रदेशराशिपरिमाणाः त्रसकायपर्याप्तकाः । एते च बादरतेजस्कायपर्याप्तकेभ्योऽसङ्ख्येयगुणाः । त्रसकायपर्याप्तकेभ्यः त्रसकायिका अपर्याप्तका असङ्ख्येयगुणाः । तथा कालतः प्रत्युत्पन्नत्रसकायिकाः सागरोपमलक्षपृथक्त्वसमयराशिपरिमाणा जघन्यपदे, उत्कृष्टपदेऽपि सागरोपमलक्षपृथक्त्वपरिमाणा एवेति, तथा च **आगमः—**

**"पडुप्पन्नतसकाइया[4] केवइकालस्स निल्लेवा सिया ? गोयमा ! जहन्नपए सागरोवमसयसहस्सपुहत्तस्स, उक्कोसपदे वि सागरोवमसयसहस्सपुहत्तस्स ।"**

**[जीवाभि० ३।२।१०२]**

---

टि० १. **लक्खणमेवं** ठ ॥ २. **०गमेत्तातो** क ठ । **०मेत्ता उ** ख ज ॥ ३. **नातोऽधिक०** क ॥ ४. **पडुप्पन्ना तस०** घ ङ ॥

वि०टि० ≠ **"संवर्तितलोकप्रतरासङ्ख्येयभागवर्तिप्रदेशराशिपरिमाणाः त्रस(काय)पर्याप्ताः** एतच्च मानं स्वावगाहनया द्रष्टव्यम्, अन्यथा विरोधप्रसङ्गात् ।" स०वि०प० । अयमत्राशयः- प्रत्युत्पन्नत्रसकायिकापर्याप्ताः सागरोपमलक्षपृथकत्वप्रमाणाः तथा सकलत्रसकायिकपर्याप्तकाः प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिप्रदेशराशिप्रमाणाः सन्ति । किञ्च, त्रसकायस्य स्वकायस्थितिः साधिकद्विसहस्रसागरोपमप्रमिता, ततः त्रसकायस्य स्वकायस्थित्या प्रत्युत्पन्नत्रसकायिकराशौ गुणिते सति सकलत्रसकायपर्याप्तकराशिः लभ्यते । सा च श्रेण्याः असङ्ख्येयभागप्रमाणा एव, यतः साधिकद्विसहस्रसागरोपमेन सागरोपमलक्षपृथकत्वे गुणिते सति सागरोपमशतकोटिपृथकत्वं लभ्यते । तच्च श्रेण्याः असङ्ख्येयभागे वर्त्तते, अतः निर्युक्तौ दर्शिते प्रतरासङ्ख्येयभागप्रमाणेन सह अस्य प्रमाणस्य स्पष्टविरोधः भाति; तस्मात् स०वि०प०टिप्पण्यामुक्तं-निर्युक्तौ दर्शितप्रमाणं स्वशरीरावगाहनया द्रष्टव्यम्, अन्यथा पूर्वापरविरोधः स्यात् ॥

उद्वर्तनोपपातौ गाथाशकलेन अभिदधाति— **निष्क्रमणम्**=उद्वर्तनं, **प्रवेशः**=उपपातः, जघन्येन एको द्वौ त्रयो वा, [1]उत्कृष्टतश्च **एवमेव** इति प्रतरस्य असङ्ख्येयभागवर्तिप्रदेशपरिमाणाः एव इत्यर्थः ॥१५८॥ साम्प्रतं अविरहितप्रवेश-निर्गमाभ्यां परिमाणविशेषमाह—

[ नि० ]　　**[2]निक्खम-पवेसकालो समयादी एत्थ आवलियभागो ।**
**अंतोमुहुत्तऽविरहो उयहिसहस्[3]साहिया दोण्णि ॥१५९॥** दारं ॥

**निक्खमे**त्यादि । जघन्येन अविरहिता सन्तता त्रसेषु उत्पत्तिर्निष्क्रमो वा जीवानां एकं समयं द्वौ त्रीन् वेत्यादि, उत्कृष्टेन अत्र आवलिकाऽसङ्ख्येयभागमात्रं कालं सन्ततमेव निष्क्रमः प्रवेशो वा । एकजीवाङ्गीक[4]रणेन अविरहः चिन्त्यते गाथापश्चिमार्धेन— **अविरहः**=सातत्येन अवस्थानम्, एकजीवो हि त्रसभावेन जघन्यतो **अन्तर्मुहूर्तं** आसित्वा पुनः पृथिव्याद्येकेन्द्रियेषु उत्पद्यते, प्रकर्षेण **अधिकं सागरोपमसहस्रद्वयं** त्रसभावेन अवतिष्ठते सन्ततमिति ॥१५९॥

[5]उक्तं प्रमाणम् । साम्प्रतं उपभोग-शस्त्र-वेदनाद्वारत्रयप्रतिपादनाय आह—

[ नि० ]　　**मंसादीपरिभोगो सत्थं [6]सत्थादियं अणेगविहं** । दारं ।
**सारीर माणसा वेयणा य दुविहा बहुविहा य ॥१६०॥** दारं ॥

**मंसा०** इत्यादि । मांस-चर्म-केश-रोम-नख-पिच्छ-दन्त-स्नाय्व-ऽस्थि-विषाणादिभिः [7]त्रसकायसम्बन्धिभिः उपभोगो भवति ।

**शस्त्रं** पुनः **शस्त्रादिकम्** इति, [8]**शस्त्रं** खड्ग-तोमर-क्षुरिकादि, तद् आदिः यस्य जला-ऽनलादेः तत्=शस्त्रादिकम्, **अनेकविधं** स्वकाय-परकाय-उभय-द्रव्य-भावभेदभिन्नं अनेकप्रकारं त्रसकायस्य इति ।

वेदना चात्र प्रसङ्गेन उच्यते—सा च [9]शरीरोत्था मनःसमुत्था च **द्विविधा** यथासम्भवम् । तत्राद्या शल्य-शलाकादिभेदजनिता । इतरा प्रियविप्रयोगा-ऽप्रियसम्प्रयोगादि-

---

**टि०** १. **उत्कृष्टतस्तु** कप्रतेर्विना ॥ २. **निग्गम०** क छ ॥ ३. **०स्साहिए** कप्रतिमृते ॥ ४. **०करणेन वाऽविरह०** ख ॥ ५. **उक्तं परिमाणद्वारम्** । **सा०** ख च । **उक्तं प्रमाणद्वारम्** । **सा०** ग ॥ ६. "त्रिशूलादि" ठटिप्पणी ॥ ७. **० त्रसजीवसम्बन्धि०** ख च । **०त्रसकायजीवसम्बन्धि०** ग ॥ ८. **शस्त्रं** इति ख-घप्रत्योरेव ॥ ९. **शरीरसमुत्था** कप्रत्या विना ॥

कृता। **बहुविधा च** ज्वरा-ऽतीसार-कास-श्वास-भगन्दर-शिरोरोग-शूल-≠गुदकीलकादि-समुत्था तीव्रा इति ॥१६०॥

पुनरपि उपभोगप्रपञ्चाभिधित्सया आह—

[ नि० ] **मंसस्स केइ अट्ठा केई चम्मस्स केइ रोमाणं ।**
**पिच्छाणं पुच्छाणं दंताणट्ठा वहिज्जंति ॥१६१॥**

[ नि० ] **केई वहंति अट्ठा केइ अणट्ठा पसंगदोसेणं ।**
**कम्मपसंगपसत्ता बंधंति [1]वहंति मारेंति ॥१६२॥** दारं ॥

**मंसस्से**त्यादि, **केई** इत्यादि । मांसार्थं मृग-शूकरादयो [2]वध्यन्ते । चर्मार्थं चित्रकादयः, रोमार्थं मूषिकादयः, पिच्छार्थं मयूर-गृद्ध-कपिञ्जु-रुडुकादयः, पुच्छार्थं चमर्यादयः, दन्तार्थं वारण-वराहादयः । [3]वध्यन्त इति सर्वत्र सम्बध्यते ।

तत्र केचन पूर्वोक्तं प्रयोजनमुद्दि[4]श्य, केचिच्च प्रयोजनमन्तरेणापि क्रीड[5]या, तथाऽपरे **प्रसङ्गदोषाद्** मृगलक्षक्षिप्तेषु-लेलुकादिना तदन्तरालव्यवस्थिता अनेके कपोत-कपिञ्जल-शुक-सारिकादयो हन्यन्ते । तथा **कर्म** कृष्याद्यनेकप्रकारं तस्य **प्रसङ्गः**=अनुष्ठानम्, तत्र **प्रसक्ताः** तन्निष्ठाः सन्तः त्रस[6]कायिकान् अनेकान् **बध्नन्ति** रज्ज्वादिना, **घ्नन्ति** कश-लकुटादिभिः ताडयन्ति, **मारयन्ति** प्राणैः वियोजयन्तीति ॥१६१-६२॥

एवं विधानादिद्वारकलापमुपवर्ण्य सकलनिर्युक्त्यर्थोपसंहाराय आह—

[ नि० ] **सेसाइं दाराइं ताइं जाइं हवंति पुढवीए ।**
**[7]एवं तसकायम्मी निज्जुत्ती कित्तिया [8]एसा ॥१६३॥ ॥छ॥ फा॥**

**सेसाइमि**त्यादि । उक्तव्यतिरिक्तानि **शेषाणि द्वाराणि तानि** ए[9]वं **यानि** पृथिवी-स्वरूपसमधिगमे निरूपितानि । अत **एवं** अशेषद्वाराभिधानात् **त्रसकाये निर्युक्तिः कीर्तिता एषा** [10]सकला भवतीति अवगन्तव्या इति ॥१६३॥

---

**टि०** १. **हणंति** झ ञ ॥ २. **बध्यन्ते** घ ङ च ॥ ३. **बध्यन्त** ग घ ङ ॥ ४. **०श्य घ्नन्ति । केचित् पुनः प्रयो०** ख च । **०श्य हन्यन्ते । केचिच्च** ग घ ङ ॥ ५. **०या घ्नन्ति । तथा०** क-घपुस्तके विना ॥ ६. **०कायिकान् बहून् बध्नन्ति** ख ग च ॥ ७. **तेवं** ख ॥ ८. **एसा ॥१६३॥ छट्ठओ तसकायउद्देसओ ॥छ॥** झ ञ । **एसा ॥१६३॥ अध्य०१ उद्दे० ६** ॥ ठ ॥ ९. **०व वाच्यानि यानि** ख च ॥ १०. **सकलाऽभ्युपगन्तव्येति** ख ॥

वि०टि० ≠ "**गुदकीलिका** हरिस" स०वि०प० ॥

साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्—

**[सू० ] से बेमि—संतिमे तसा पाणा, तं जहा— अंडया पोतया जराउया रसया संसेयया सम्मुच्छिमा उब्भिया उववातिया ।**

**एस संसारे त्ति पवुच्चति मंदस्स अवियाणओ ।**

**से बेमी**त्यादि । अस्य च अनन्तर-परम्परादिसूत्रसम्बन्धः प्राग्वद् वाच्यः । **सो**ऽहं **ब्रवीमि** येन मया भगवद्वदनारविन्दे[1]विनिसृतार्थजातावधारणाद् यथावद् उपलब्धं तत्त्वमिति । **सन्ति**=विद्यन्ते, त्रस्यन्तीति **त्रसाः**, **प्राणिनः** द्वीन्द्रियादयः । ते च कियद्भेदाः किम्प्रकाराश्च ? इति दर्शयति—

**तद्यथा** इति वाक्योपन्यासार्थः । यदि वा **तत्** प्रकारान्तरमर्थतो **यथा** भगवता अभिहितं तथा अहं भणामीति । अण्डाज्जाताः=**अण्डजाः** पक्षि-गृहकोकिलादयः, पोता एव जायन्ते=**पोतजाः** "**अन्येष्वपि दृश्यते**" [**पा०व्या० ३।२।१०१**] इति जै[2]नेर्डप्रत्ययः, ते च हस्ति-वल्गुली-चर्मजलूकादयः, जरायुवेष्टिता जायन्त इति **जरायुजाः** पू[3]र्ववत् डप्रत्ययः, गो-महिष्य[4]जा-ऽविक-मनुष्यादयः, रसाज्जाताः=**रसजाः**, तक्रा-ऽऽरनाल-दधि-तीमनादिषु [≠]पायुकृम्याकृतयोऽतिसूक्ष्मा भवन्ति, संस्वेदाज्जाताः=**संस्वेदजाः**, मत्कुण-यूका-शतपदिकादयः, सम्मूर्छनाज्जाताः=**सम्मूर्छनजाः** शलभ-पिपीलिका-मक्षिका-[Φ]ऽऽशालिकादयः, उद्भेदनम्=उद्भित्, ततो जाताः=**उद्भिजाः**, पृषोदरादित्वाद् **द**लोपः, पतङ्ग-खञ्जरीटक-पारिप्लवादयः, उपपाताज्जाताः=**उपपातजाः** अथवा उपपाते भवाः=**औपपातिकाः** देवा नारकाश्च । एवमष्टविधं जन्म यथासम्भवं संसारिणो नातिवर्तन्ते । एतदेव शास्त्रान्तरे त्रिविधमुपन्यस्तम्—"**सम्मूर्छ[5]न-गर्भ-उपपाताज्जन्म**" [**तत्त्वार्थ० २। २२**] । रसज-संस्वेदज-उद्भिजानां सम्मूर्छनजान्तःपातित्वात्, अण्डज-पोतज-जरायुजानां गर्भजान्तःपातित्वात्, देव-नारकाणां औपपातिकान्तःपातित्वात् इति त्रिविधं जन्म इति, इह चाष्टविधं सोत्तरभेदत्वादिति । एवं एतस्मिन्नष्टविधे जन्मनि स[6]र्वे त्रसा जन्तवः संसारिणो निपतन्ति, न एतद्व्यतिरेकेण अन्ये सन्ति, एते च अष्टविधयोनिभाजोऽपि सर्वलोकप्रतीता

---

**टि०** १. **०न्दनिसृष्टार्थजाता०** ख । **०न्दविनिसृतार्थज्ञानावधारणाद्** च ॥ २. जनेर्डः । **ते च** ख । **जनेर्डः प्रत्ययः** । ग ॥ ३. **पूर्वप्रत्ययः** ख । **पूर्ववत् प्रत्ययः** च ॥ ४. **०जा-च्चिव( चि )त्रक-मनु०** घ ॥ ५. **०न-जन्म-उप०** ख ॥ ६. **सर्वेऽपि त्र०** ख ॥

**वि०टि०** ≠ "**पायुः** इति अवि(?)धिष्ठानिका" जै०वि०प० ॥ Φ "**आसाली** [?**आशालिका**] इति चक्रवर्तिकटकाधस्ताद् द्वादशयोजनप्रमाणा" जै०वि०प० । एते उरःपरिसर्पतिर्यग्जीवविशेषा ज्ञेयाः ॥

बाला-ऽङ्गनादिजनप्रत्यक्षप्रमाणसमधिगम्याः । **'सन्ति च'** अनेन शब्देन त्रैकालिकमस्तित्वं प्रतिपाद्यते त्रसानाम्, न कदाचिद् एतैः विरहितः संसारः सम्भवतीति । [1]एतदेव दर्शयति–

**एस [2]संसारे त्ति पवुच्चइ** त्ति । **एषः** अण्डजादिप्राणिकलापः **संसारः प्रोच्यते,** न अतो अन्यः त्रसानां उत्पत्तिप्रकारो अस्तीति उक्तं भवति । कस्य पुनरत्र अष्टविधभूतग्रामे उत्पत्तिः भवति ? इत्याह–

**मंदस्सावियाणओ** । मन्दो द्विधा– द्रव्य-भावभेदात् । तत्र द्रव्यमन्दोऽतिस्थूलो अतिकृशो वा । भावमन्दोऽपि अनुपचितबुद्धिर्बालः कुशास्त्रवासितबुद्धिर्वा, अयमपि सद्बुद्धेरभावाद् बाल एव । इह भावमन्देन अधिकारः । **मन्दस्य** इति बालस्य अविशिष्टबुद्धेः अत एव **[3]अविजानतः** हिता-ऽहितप्राप्ति-परिहारशून्यमनसः इति एषः अनन्तरोक्तः संसारो भवतीति । यद्येवं ततः किम् ? इत्यत आह–

**णिज्झाइत्ता पडिलेहित्ता पत्तेयं परिणिव्वाणं सव्वेसिं पाणाणं सव्वेसिं भूताणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं अस्सातं अपरिणिव्वाणं महब्भयं दुक्खं ति बेमि ।**

**निज्झाइए**त्यादि । एवं इमं त्रस[4]कायं आगोपाला-ऽङ्गनादिप्रसिद्धं निश्चयेन ध्यात्वा= **निर्ध्याय,** चिन्तयित्वा इत्यर्थः । क्त्वाप्रत्ययस्य उत्तर[5]क्रियापेक्षित्वाद् ब्रवीमीति उत्तरक्रिया सर्वत्र योजनीया इति । पूर्वं च मनसा आलोच्य ततः प्रत्युपेक्षणं भवतीति दर्शयति– **'[6]पडिलेहित्ते[?त्त]'**त्ति प्रत्युपेक्ष्य दृष्ट्वा, यथावदुपलभ्य इत्यर्थः, किं तद् ? इति दर्शयति– **प्रत्येकम्** इति एकमेकं त्रसकायं प्रति, **परिनिर्वाणं**=सुखम्, प्रत्येकसुखभाजः सर्वेऽपि प्राणिनः, न अन्यदीयं अन्य उपभुङ्क्ते सुखमित्यर्थः । एष च सर्वप्राणिधर्म इति दर्शयति– **सर्वेषां प्राणिनां** द्वि-त्रि-चतुरिन्द्रियाणाम्, तथा **सर्वेषां भूतानां** प्रत्येक-साधारण-सूक्ष्म-बादर-पर्याप्तका-ऽपर्याप्तकतरूणामिति, तथा **सर्वेषां जीवानां** गर्भव्युत्क्रान्तिक-सम्मूर्छनज-औपपातिकपञ्चेन्द्रियाणाम्, तथा **सर्वेषां सत्त्वानां** पृथिव्याद्येकेन्द्रियाणामिति । इह च प्राणादिशब्दानां यद्यपि परमार्थतो अभेदः तथापि उक्तन्यायेन भेदो दृष्टव्यः, उक्तं च–

---

**टि०** १. **एतदपि दर्श०** क ग ॥ २. **संसारो** ग ॥ ३. **अजानतः** च ॥ ४. **०कायमाबाल-गोपाला०** घ ॥ ५. **०क्रियापेक्षया ब्रवी०** ग ॥ ६. **पडिलेहित्ति त्ति** ख ग ॥

**"प्राणा द्वि-त्रि-चतुः प्रोक्ताः, भूतास्तु तरवः स्मृता ।**
**जीवाः पञ्चेन्द्रिया**[1]**: प्रोक्ताः, शेषाः सत्त्वाः इतीरिताः ॥"** [　　]

यदि वा शब्दव्युत्पत्तिद्वारेण समभिरूढनयमतेन[2] भेदो दृष्टव्यः, तद्यथा— सततप्राणधारणात् प्राणाः, कालत्रयभवनाद् भूताः, त्रिकालजीवनाद् जीवाः, सदाऽस्तित्वात् सत्त्वा इति । तदेवं विचिन्त्य प्रत्युपेक्ष्य च यथा सर्वेषां जीवानां प्रत्येकं परिनिर्वाणं सुखं तथा **प्रत्येकं असातं अपरिनिर्वाणं महाभयं दुःखमहं ब्रवीमि**। तत्र दुःखयतीति **दुःखम्,** तद्विशेष्यते—किंविशिष्टम् ? **असातम्,** असद्वेद्यकर्मांशविपाकजमित्यर्थः; तथा **अपरिनिर्वाणम्** इति समन्तात् सुखं=परिनिर्वाणम्, न परिनिर्वाणं=अपरिनिर्वाणं, समन्तात् शरीर-मनःपीडाकरमित्यर्थः; तथा **महाभयम्** इति महच्च तद् भयं च=महाभयम्, नातः परं अन्यदस्तीति महाभयम्, तथा हि—सर्वेऽपि शारीरान्मानसाच्च दुःखादुद्विजन्ते प्राणिन इति । **इति**शब्द एवमर्थे, एवमहं ब्रवीमि सम्यगुपलब्ध[3]तत्त्वो यत् प्रागुक्तमिति । एतच्च ब्रवीमीत्याह—

**तसंति पाणा पदिसो दिसासु य ।**
**तत्थ तत्थ पुढो पास आतुरा परितावेंति ।**
**संति पाणा पुढो सिता ॥४९॥**

**तसंती**त्यादि । एवंविधेन च असातादिविशेषणविशिष्टेन दुःखेन अभिभूताः **त्रसन्ति**= उद्विजन्ते, **प्राणा** इति प्राणिनः, कुतः पुनरु[4]द्विजन्ते ? इत्याह— प्रगता दिक् = **प्रदिग्,** [5]विदिग् इत्यर्थः, ततः प्रदिशः सकाशादुद्विजन्ते । तथा प्राच्यादिषु च **दिक्षु** व्यवस्थिताः त्रस्यन्ति । एताश्च प्रज्ञापकविधिविभक्ता दिशोऽ[6]नुदिशश्च गृह्यन्ते, जीवव्यवस्थानश्रवणात् । ततश्च अयमर्थः प्रतिपादितो भवति काक्वा— न काचिद् दिग् अनुदिग् वा यस्यां न सन्ति त्रसाः, त्रस्यन्ति वा न यस्यां स्थिताः कोशिकारकीटवत् । कोशिकारकीटो हि सर्वदिग्भ्यो अनुदिग्भ्यश्च बिभ्यदात्मसंरक्षणार्थं वेष्टनं करोति शरीरस्येति । भावदिगपि न काचित् तादृशी अस्ति यस्यां वर्तमानो जन्तुर्न त्रस्येत्, शारीर-मानसाभ्यां

---

टि० १. **०याः ज्ञेयाः, शेषाः सत्त्वाः प्रकीर्तिताः** च ॥ २. **०मताद् भेदोऽभ्युपगन्तव्यः । तद्यथा** ख च ॥ ३. **०लब्धसत्त्वो** क ॥ ४. **०रुद्विजन्तीति दर्शयति-प्रगता** ख ग च ॥ ५. **विदिश इत्य०** ग ॥ ६. **०नुदिशो वा गृ०** च ॥

दुःखाभ्यां सर्वत्र नरकादिषु जङ्घन्यन्ते प्राणिनः, अतः त्रासपरिगतमनसः सर्वदा अवगन्तव्याः । एवं सर्वत्र दिक्षु अनुदिक्षु च त्रसाः सन्तीति गृह्णीमः ।

दिग्-विदिग्व्यवस्थिताः त्रसाः त्रसन्तीति उक्तम्, कुतः पुनः त्रस्यन्ति ? यस्मात् तदारम्भवद्भिः ते व्यापाद्यन्ते । किं पुनः कारणं ते तान् आरभन्ते ? इत्याह–

**तत्थ तत्थे**त्यादि । **तत्र तत्र** तेषु तेषु कारणेषु उत्पन्नेषु वक्ष्यमाणेषु अर्चा-ऽजिन[1]-शोणितादिषु च **पृथग्** विभिन्नेषु प्रयोजनेषु, **पश्य** इति शिष्यचोदना । किं[2] तद् ? इति दर्शयति–मांसभक्षणादिगृद्धा **आतुराः** = अस्वस्थमनसः, **परिः**=समन्तात् **तापयन्ति** =पीडयन्ति नानाविधवेदनोत्पादनेन प्राण[3]व्यापादनेन वा तदारम्भिणः त्रसानिति ।

येन केनचिद् आरम्भेण प्राणिनां सन्तापनं भवतीति दर्शयन्नाह–

**संती**त्यादि । **सन्ति**=विद्यन्ते प्रायः सर्वत्रैव प्राणाः, **प्राणिनः पृथग्** =विभिन्नाः द्वि-त्रि-चतुः-पञ्चेन्द्रियाः **श्रिताः**-पृथिव्यादिश्रिताः । एतच्च ज्ञात्वा निरवद्यानुष्ठायिना भवितव्यमिति अभिप्रायः ॥४९॥

अन्ये पुनः अन्यथावादिनो अन्यथाकारिणः इति दर्शयन्नाह–

**[सू०] लज्जमाणा पुढो पास । 'अणगारा मो'त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं तसकायसमारंभेणं तसकायसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥५०॥**

**[सू०] तत्थ खलु भगवता परिण्णा पवेदिता–इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघायहेतुं से सयमेव तसकायसत्थं समारभति, अण्णेहिं वा तसकायसत्थं समारभावेति, अण्णे वा तसकायसत्थं समारभमाणे समणुजाणति । तं से अहिताए, तं से अबोधीए ॥५१॥**

**[सू०] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति– एस खलु गंथे, एस खलु मोहे, एस**

टि० १. अस्थ्यजिन० घ ॥ २. किं तत् पश्य ? इति दर्श० कप्रतिमृते ॥ ३. प्राणिव्या० ग ॥
वि०टि० ≠ "अर्चा इति शरीरम्" जै०वि०प० ॥

**खलु मारे, एस खलु निरए।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं तसकाय-कम्मसमारंभेणं तसकायसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति।**

**लज्जमाणे**त्यादि। पूर्ववद् व्याख्येयं यावत् **अण्णे वऽणेगरूवे पाणे विहिंसइ** त्ति। यानि कानिचित् कारणानि उद्दिश्य त्रसवधः क्रियते तानि दर्शयितुमाह—

**से बेमि— अप्पेगे अच्चाए वधेंति, अप्पेगे अजिणाए वधेंति, अप्पेगे मंसाए वहेंति, अप्पेगे सोणिताए वधेंति, अप्पेगे हिययाए वहिंति, एवं पित्ताए वसाए पिच्छाए पुच्छाए वालाए सिंगाए विसाणाए दंताए दाढाए नहाए ण्हारुणीए अट्ठिए अट्ठिमिंजाए अट्ठाए अणट्ठाए।**

**अप्पेगे हिंसिंसु मे त्ति वा, अप्पेगे हिंसंति वा, अप्पेगे हिंसिस्संति वा णे वधेंति ॥५२॥**

**से बेमी**त्यादि। **तदर्थमहं ब्रवीमि** यदर्थं[1] प्राणिनः तदारम्भप्रवृत्तैः[2] व्यापाद्यन्त इति। **'अप्येकेऽर्चायै घ्नन्ति' अपिः** उत्तरापेक्षया समुच्चयार्थः, **एके**=केचन तदर्थित्वेनातुराः, अर्च्यते असौ आहारा-ऽलङ्कारविधानैः इति **अर्चा** देहः, तदर्थं व्यापादयन्ति। तथा हि— लक्षणवत्पुरुषमक्षतमव्यङ्गं[3] व्यापाद्य तच्छरीरेण विद्यामन्त्रसाधनानि कुर्वन्ति, उपयाचितं वा यच्छन्ति **दुर्गा**दीनामग्रतः, अथवा विषं येन भक्षितं स हस्तिनं मारयित्वा तच्छरीरे प्रक्षिप्यते पश्चाद् विषं जीर्यति। तथा **अजिनार्थं** चित्रक-व्याघ्रादीन् व्यापादयन्ति; एवं मांस-शोणित-हृदय-पित्त-वसा-पिच्छ-पुच्छ-वाल-शृङ्ग-विषाण-दन्त-दंष्ट्रा-नख-स्नायु-अस्थि-अस्थिमिञ्जास्वपि वाच्यम्। **मांसार्थं** सूकरादयः, त्रिशूलालेखार्थं[4] **शोणितं** गृह्णन्ति, **हृदयानि** साधका गृहीत्वा[5] मथ्नन्ति, **पित्तार्थं** मयूरादयः, **वसार्थं** व्याघ्र-मकर-वराहादयः, **पिच्छार्थं** मयूर-गृद्धादयः, **पुच्छार्थं** रोज्झादयः, **वालार्थं** चमर्यादयः, **शृङ्गार्थं** रुरु-खड्गादयः, तत् किल शृङ्गं[6] पवित्रमिति याज्ञिका गृह्णन्ति, **विषाणार्थं** हस्त्यादयः, **दन्तार्थं** शृगालादयः

---

टि० १. **यदर्थमहं प्राणि०** क ॥ २. **०प्रवृत्तौ व्यापा०** च ॥ ३. **०षमव्यङ्गं** क घ ङ। **०षमक्षतव्यङ्गं** ख ॥ ४. **०लालेख्यार्थं** ग ॥ ५. **०त्वा समश्नन्ति** ख ॥ ६. **शृङ्गं याज्ञिकाः पवित्रमिति गृ०** च ॥

तिमिरापहारित्वात् तद्दन्तानाम्, **दंष्ट्रार्थं** वराहादयः, **नखार्थं** व्याघ्रादयः, **स्नाय्वर्थं** गो-महिष्यादयः[1], **अस्थ्यर्थं** शङ्खशुक्त्यादयः, **अस्थिमिञ्जार्थं** महिष-वराहादयः । एवमेके यथोपदिष्टप्रयोजनकलापापेक्षया घ्नन्ति। अपरे तु कृकलास-गृहकोकिलकादीन् विना प्रयोजनेन व्यापादयन्ति।

अन्ये पुनः **हिंसिंसु मिं[2] त्ति वेति** "हिंसितवान् एषो अस्मत्स्वजनान् सिंहः सर्पः अरिः वा" अतो घ्नन्ति, "मम वा पीडां कृतवन्त" इत्यतो हन्ति । तथा अन्ये वर्तमानकाल एव "**हिनस्ति** अस्मान् सिंहोऽन्यो वे"ति घ्नन्ति । तथा अन्ये "**अस्मानयं हिंसिष्यती**"ति अनागतमेवं[3] सर्पादिकं व्यापादयन्ति ॥५०-५२॥

एवं अनेकप्रयोजनोपन्यासेन हननं त्रसविषयं प्रदर्श्य उद्देशकार्थं उपसञ्जिहीर्षुराह—

**[सू०] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाया भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति ॥५३॥**

**[सू०] तं परिण्णाय मेधावी णेव सयं तसकायसत्थं समारभेज्जा, णेवऽण्णेहिं तसकायसत्थं समारभावेज्जा, णेवऽण्णे तसकायसत्थं समारभंते समणुजाणेज्जा ॥५४॥**

**[सू०] जस्सेते तसकायसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णातकम्मे त्ति बेमि ॥५५॥**

**॥ सत्थपरिण्णाए छट्ठो उद्देसओ सम्मत्तो ॥**

**एत्थ सत्थमित्यादि** । प्राग्वद्[4] वाच्यम्, यावत् **स एव मुनिः** त्रसकायसमारम्भ-विरतत्वात् परिज्ञातकर्मत्वात्[5] प्रत्याख्यातपापकर्मत्वाद् **इति ब्रवीमि**, भगवतः त्रिलोकबन्धोः परमकेवलालोकसाक्षात्कृतसकलभुवनप्रपञ्चस्य उपदेशादिति ॥५३-५५॥

**॥ षष्ठोद्देशकः[6] समाप्तः[7] ॥छ॥**

---

टि० १. ०**महिषादयः** ग ॥ २. **मे त्ति हिंसित०** ख ग च ॥ ३. ०**व केसर्यादिकं** ग । ०**व सर्पादि व्या०** घ ङ ॥ ४. **प्राग्वद् भावनीयम् या०** ख च ॥ ५. **परिज्ञातदोषत्वात्** ख ॥ ६. इति **शस्त्रपरिज्ञा-षष्ठोद्देशकः ॥छ॥** ङ ॥ ७. **परिसमाप्तः ॥छ॥** ख ॥

## ॥ सप्तमो वायूद्देशकः ॥

उक्तः षष्ठोद्देशकः । साम्प्रतं सप्तमः समारभ्यते । अस्य च अयमभिसम्बन्धः— अभिनवधर्माणां दुःश्रद्धानत्वाद् अल्पपरिभोगत्वाद् उत्क्रमायातस्य उक्तशेषस्य वायोः स्वरूपनिरूपणार्थं इदं उपक्रम्यते । तदनेन सम्बन्धेन आयातस्य अस्य उद्देशकस्य उपक्रमादीनि चत्वारि अनुयोगद्वाराणि वाच्यानि यावद् नामनिष्पन्ने निक्षेपे **वायूद्देशक** इति । तत्र वायोः स्वरूपनिरूपणाय कतिचिद्द्वारातिदेशगर्भां **निर्युक्तिकृद्** गाथामाह—

**[ नि० ]** **वाउस्स[1] वि दाराइं ताइं जाइं हवंति पुढवीए ।**
**णाणत्ती उ विहाणे परिमाणुवभोग-सत्थे य ॥१६४॥**

**वाउस्स वी**त्यादि । वातीति वायुः, तस्य **वायोरपि तानि** एव **द्वाराणि यानि पृथिव्यां** प्रतिपादितानि । **नानात्वं**=भेदः, तच्च **विधान-परिमाण-उपभोग-शस्त्रेषु, च**शब्दाद् लक्षणे च द्रष्टव्यमिति ॥१६४॥ तत्र विधानप्रतिपादनाय आह—

**[ नि० ]** **दुविहा य[2] वाउजीवा सुहुमा तह बायरा य[3] लोयम्मि ।**
**सुहुमा य सव्वलोए पंचेव य बायरविहाणा ॥१६५॥**

**दुविहे**त्यादि । वायुरेव जीवाः=**वायुजीवाः**, ते **च द्विविधाः**—सूक्ष्मबादरनामकर्मोदयात् **सूक्ष्मा बादराश्च** । तत्र **सूक्ष्माः** सकललोकव्यापितयाऽवतिष्ठन्ते, दत्तकपाटसकलवातायनद्वारगेहान्तर्धूमवद् व्याप्त्या स्थिताः । बादरभेदास्तु **पञ्चैव** अनन्तरगाथया वक्ष्यमाणा इति ॥१६५॥ बादरभेदप्रतिपादनाय आह—

**[ नि० ]** **उक्कलिया मंडलिया गुंजा-घणवाय-सुद्धवाया य ।**
**बायरवाउविहाणा पंचविहा वण्णिया एए ॥१६६॥ दारं ॥**

**उक्कलिए**त्यादि । स्थित्वा स्थित्वा उत्कलिकाभिः यो वाति स **उत्कलिका**वातः, **मण्डलिका**वातस्तु वातोली, गुञ्जा=भम्भा, तद्वद् गुञ्जन् यो वाति स **गुञ्जा**वातः । **घनवातः** अत्यन्तघनः पृथिव्याद्याधारतया व्यवस्थितो हिमपटलकल्पः, मन्दस्तिमितः शैतिकादिषु[4]

---

**टि०** १. **वायुस्स** क-खप्रती विना ॥ २. उ क ठ ॥ ३. उ ठ ॥ ४. **शीतकादिषु** क । **शीतकालादिषु** ग ङ च ॥

**वि०टि०** ≠ "**शीतिका** झटिका" स०वि०प० ॥

**शुद्धवातः** । ये तु अन्ये **प्रज्ञापनादौ**[Φ] प्राच्यादिवाता अभिहिताः तेषां एषु एव यथायोगं अन्तर्भावो दृष्टव्य इति । एवं **एते बादरवायुविधाना**[1] भेदाः **पञ्चविधाः** =पञ्चप्रकारा **व्यावर्णिता** इति ॥१६६॥ लक्षणद्वाराभिधित्सया आह–

[ नि० ] **जह देवस्स सरीरं अंतद्धाणं च अंजणादीसु ।**
**[2]एओवम आएसो वाएऽसंते वि रूवम्मि ॥१६७॥ दारं ॥**

**जह देवस्से**त्यादि । **यथा देवस्य शरीरं** चक्षुषा अनुपलभ्यमानमपि विद्यते, चेतनावत् च अध्यवसीयते । देवाः स्वशक्तिप्रभावात् तथाभूतं रूपं कुर्वन्ति यत् चक्षुषा नोपलभ्यते, न चैतद् वक्तुं शक्यते–'नास्ति, अचेतनं च' इति । तद्वद् वायुरपि चक्षुषो विषयो न भवति, अस्ति च चित्तवांश्चेति । [3]यथा **च अन्तर्धानम**ञ्जन-विद्या-मन्त्रैर्भवति मनुष्याणाम्, न च नास्तित्वमचेतनत्वं चेति; [4]**एतदुपमानो** वायावपि भवति **आदेशः** व्यपदेशो**ऽसत्यपि रूप** इति । अत्र च **असच्छ**ब्दो नाऽभाववचनः, किन्तु असद्रूपं वायोरिति । चक्षुर्ग्राह्यं तद्रूपं न भवति, सूक्ष्म[5]परिणामात् परमाणोरिव, रूप-रस-गन्ध-स्पर्शात्मकश्च वायुरिष्यते, न [⊕]यथा अन्येषां वायुः स्पर्शवानेव इति ।

प्रयोगार्थश्च गाथया प्रदर्शितः । प्रयोगश्चायम्–चेतनावान् वायुः, अ-परप्रेरिततिर्यग-ऽनियमितदिग्गतिमत्त्वाद्, गवाश्वादिवत् । तिर्यगेव गमननियमाभावाद् अनियमितविशेषणो-पादानात् च परमाणुना अनैकान्तिकाऽसम्भवः, तस्य नियमितगतिमत्त्वात्, जीव-पुद्गलयोः "**अनुश्रेणि गतिः**" [**तत्त्वार्थ०२।२७**] इति वचनात् । एवमेष वायुः घन-शुद्धवातादि-भेदो अशस्त्रोपहतः चेतनावान् अवगन्तव्य इति ॥१६७॥ परिमाणद्वारमाह–

[ नि० ] **जे बायरपज्जत्ता पयरस्स असंखभाग[6]मेत्ता ते ।**
**सेसा तिन्नि वि रासी [7]वीसुं लोया असंखेज्जा ॥१६८॥ दारं ॥**

---

टि० १. **०विधानानि भेदाः** ख च ॥ २. **एतोवमयाएसो** ञ ॥ ३. **यथा वाऽन्त०** चपुस्तकमृते ॥ ४. **एतदुपमानेन वाया०** ख ॥ ५. **०परिमाणात्** ख ग ङ ॥ ६. **०गमेत्तातो** छ । **०गमेत्ताए** झ ॥ ७. **वीसं** झ ॥

**वि०टि० Φ** "से किं तं बादरवाउकाइया ? बादरवाउकाइया अणेगविहा पण्णत्ता । तं जहा–पाईणवाए पडीणवाए दाहिणवाए उदीणवाए उड्ढवाए अहोवाए तिरियवाए विदिसीवाए वाउब्भामे वाउक्कलिया वायमंडलिया उक्कलियावाए मंडलियावाए गुंजावाए झंझावाए संवट्टवाए घणवाए तणुवाए सुद्धवाए । जे यावण्णे तहप्पगारा ।" [प्रज्ञा० सू० १९] ॥ ⊕ **नैयायिक**मते वायुः स्पर्शवानेव इष्यते ॥

**जे बायरे**त्यादि । **ये बादरपर्याप्तका** वायवः ते संवर्तितलोकप्रतराऽसङ्ख्येयभागवर्तिप्रदेशपरिमाणाः । **शेषाः त्रयोऽपि राशयः विष्वक्** पृथग् असङ्ख्येयलोकाकाशप्रदेशपरिमाणा भवन्ति । विशेषश्च अयमत्र अवगन्तव्यः— बादराप्कायपर्याप्तकेभ्यो बादरवायुपर्याप्तका असङ्ख्येयगुणाः, बादराप्कायापर्याप्तकेभ्यो बादरवायुकायापर्याप्तका असङ्ख्येयगुणाः, सूक्ष्माप्कायापर्याप्तकेभ्यः सूक्ष्मवाय्वपर्याप्तका विशेषाधिकाः, सूक्ष्माप्कायपर्याप्तकेभ्यः सूक्ष्मवायुपर्याप्तका विशेषाधिकाः ॥१६८॥ उपभोगद्वारमाह—

[ नि० ] **वियण [1]धमणाऽहिधारण उस्सिंघण फूसणाऽऽणुपाणू य ।**
**बायरवाउक्काये [2]उवभोगगुणो मणुस्साणं ॥१६९॥ दारं ॥**

**वियणे**त्यादि । **व्यजन-[3]भस्त्राध्माना-ऽभिधारणा-[4]उत्सिङ्घन-फूत्कार-प्राणापानादिभिः** बादरवायु[5]कायेन उपभोग एव गुणः=**उपभोगगुणो मनुष्याणामि**ति ॥१६९॥

शस्त्रद्वाराभिधित्सया आह- तत्र शस्त्रं द्रव्य-भावभेदाद् द्विविधम् । द्रव्यशस्त्राभिधित्सया आह—

[ नि० ] **वियणे य तालवेंटे [6]सूप्प सिए पत्त चेलकन्ने य ।**
**[7]अभिधारणा य बाहिं गंधऽग्गी वाउ सत्थाइं ॥१७०॥**

[ नि० ] **[8]किंची सकायसत्थं किंची परकाय तदुभयं किंची ।**
**एयं तु दव्वसत्थं भावे अस्संजमो सत्थं ॥१७१॥**

**वियणे**त्यादि । **व्यजन-तालवृन्त-सूर्प-सित-पत्र-चेलकर्णा**दयः द्रव्यशस्त्रमिति; तत्र **सितम्** इति चामरम् । प्रस्विन्नो यद् बहिरवतिष्ठते वातागमनमार्गे **साऽभि-**

---

टि० १. **धमणाधिधारण** ख । **धमणाभिधारण** झ ञ ठ ॥ २. **उवभोगगुणा** ख ठ ॥ ३. **०भस्त्राध्माता०** च ॥ ४. **०उत्सिङ्घन-पूत्कार०** घ ङ ॥ ५. **०कायेनोपभोगविधिमनुष्याणामिति** ख ॥ ६. **सुव सिए** ख ज झ ठ विना **सूय सिए** छ ॥ ७. **अभिधारणाहिँ बाहिं** क ॥ ८. **किंची स० ॥१७१॥** ठ ॥ झ-ञ प्रत्योरियं पङ्क्तिर्नास्ति । एतत्प्रत्यन्तरानुसारेणैव टीका ॥ यद्यपि १७१ गाथासंसूचकैतत्पाठानुपलम्भात् टीकाकृद्भिरेतत्पूर्वगाथान्तवर्ति 'वाउसत्थाइं' इति सामासिकं पदं विभज्य स्वकायादिशस्त्रं अध्याहारेण च भावशस्त्रं सूचितं परम् 'उद्देशषट्के विलिख्य लाघवार्थमन्त्योद्देशके न रचयेदेतां गाथाम्' इत्येतस्यायुक्तियुक्तत्वात् । भावशस्त्रानध्याहार्यं च सुष्ठु इति कृत्वा अस्मादुपयुक्तासु झ-ञप्रतिवर्जासु पञ्चस्वपि प्रतिष्वेतद्गाथाखण्डोपलब्धेश्च टीकाकृदव्याख्यातोऽप्येष पाठो मूले स्थापितः ॥ अनेन च १७० गाथान्तवर्तिनः 'वाउसत्थाइं' इत्यस्य वायोः शस्त्राणि वायुशस्त्राणि इत्यर्थोऽधिगम्यः ॥

**धारणा,** तथा **गन्धाः** चन्दनोशीरादीनाम्, **अग्नि[:]** ज्वाला प्रतापश्च, तथा प्रतिपक्षवातश्च शीतोष्णादिकः । प्रतिपक्षवायुग्रहणेन[1] स्वकायादिशस्त्रं सूचितमिति । एवं भावशस्त्रमपि दुष्प्रणिहितमनो-वाक्-कायलक्षणं अवगन्तव्यमिति ॥१७०॥

अधुना सकलनिर्युक्त्यर्थोपसंञ्जिहीर्षया[2] आह–

[ नि० ] **सेसाइं दाराइं ताइं जाइं हवंति पुढवीए ।**
**एवं वाउद्देसे निज्जुत्ती कित्तिया एसा[3] ॥१७२॥**

**॥ प्रथमाध्ययनम् ॥छ॥**

**सेसाइमित्यादि** । **शेषाणि** उक्तव्यतिरिक्तानि **तानि** एव **द्वाराणि** पृथिवीसमधिगमे **यानि** अभिहितानीति । **एवं** सकलद्वारकलापव्यावर्णनाद् **वायुकायोद्देशके निर्युक्तिः कीर्तिता एषा** अवगन्तव्या इति ॥१७२॥

गतो नामनिष्पन्नो निक्षेपः । साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं सूत्रं उच्चारणीयम्, तच्चेदम्–

**[ सू० ] पभू एजस्स दुगुंछणाए आतंकदंसी अहियं ति णच्चा ।**

**जे अज्झत्थं जाणति से बहिया जाणति, जे बहिया जाणति से अज्झत्थं जाणति । एतं तुलमण्णेसिं ।**

**इह संतिगता दविया णावकंखंति जीविउं ॥५६॥**

**'पहू एजस्स[4] दुगुंच्छणाए'** त्ति । अस्य च अयमभिसम्बन्धः– इह अनन्तरोद्देशके पर्यन्तसूत्रे त्रसकायपरिज्ञानं तदारम्भवर्जनं च मुनित्वकारणमभिहितम्, इहापि तदेव द्वयं वायुकायविषयं मुनित्वकारणमेव उच्यते । तथा परम्परसूत्रसम्बन्धः–**इहमेगेसिं[5] नो णायं भवइ** त्ति, किं न ज्ञातं भवति ? **पहू एजस्स दुगुंछणाए** त्ति। तथाऽऽदिसूत्रसम्बन्धश्च **सुयं मे आउसंतेणे**त्यादि, किं तत् श्रुतम् ? यत् प्रागुपदिष्टं तथैतत् च **पहू एजस्स दुगुंछणाए[6]** त्ति।

**दुगुंछण** त्ति जुगुप्सा, प्रभवतीति **प्रभुः** समर्थो योग्यो वा, कस्य वस्तुनः समर्थः

---

टि० १. **प्रतिपक्षिवायु०** क ॥ २. **०सञ्जिहीर्षुराह** ग ॥ ३. **एसा ॥१७२॥ प्रथममध्ययनम्** ख । **एसा ॥१७२॥छ॥ आयारस्स पढमज्झयणणिज्जुत्ती सम्मत्ता ॥छ॥** ज ॥ ४. **एज्जस्स** च ॥ ५. **इहमेगेसिं णायं भवइ त्ति । किं तद् ज्ञातं भवति ?** ख विना ॥ ६. **दुगंछणाए** घ च ॥

इति ? "**एजृ कम्पने**" [**पा०धा०१।२३४**] एजतीति एजः वायुः, कम्पनशीलत्वात् । तस्य **एजस्य जुगुप्सा** निन्दा तदासेवनपरिहारो निवृत्तिरिति यावत्, तस्यां=तद्विषये प्रभुर्भवति, वायुकायसमारम्भनिवृत्तौ[1] शक्तो भवतीति यावत् । पाठान्तरं वा– **'पभू य एगस्स दुगुंछणाए'** उद्रेकावस्थावर्तिना एकेन गुणेन स्पर्शाख्येनोपलक्षित इति **एकः** वायुः तस्यैकविधस्य एकगुणोपलक्षितस्य वायोः **जुगुप्सायां प्रभुः** । **च**शब्दात् श्रद्धाने च प्रभुः भवति[2], श्रद्धाय च जीवतया[3] जुगुप्सते । ततः योऽसौ वायुकायसमारम्भनिवृत्तौ प्रभुः उक्तः तं दर्शयति–

**आयंके**त्यादि । "**तकि कृच्छ्रजीवने**"[**पा०धा०१।११८**] इति आतङ्कनम्=आतङ्कः, कृच्छ्रजीवनं दुःखम् । तच्च द्विविधं–शारीरं मानसं च । तत्राद्यं कण्टक-क्षार-शस्त्र-गण्ड-[4]लूतादिसमुत्थम्, मानसं प्रियविप्रयोगा-ऽप्रियसम्प्रयोगेप्सितालाभ-दारिद्र्य-दौर्मनस्यादिकृतम्; एतदुभयमातङ्कः, एनं आतङ्कं पश्यति तच्छीलश्च इति **आतङ्कदर्शी** 'अवश्यं एतदुभयमपि दुःखमापतति मयि अनिवृत्तवायुकायसमारम्भे'; ततश्च एतद् वायुकायसमारम्भणं आतङ्कहेतुभूतं **अहितमिति ज्ञात्वा**[5] एतस्माद् निवर्तने[6] प्रभुः भवतीति । यदि वा आतङ्को[7] द्वेधा द्रव्य-भावभेदात् । तत्र द्रव्यातङ्के इदमुदाहरणम्–

**जंबुद्दीवे** दीवे **भारहवास**[8]म्मि अत्थि सुपसिद्धं । बहुणयर[9]गुणपसिद्धं **रायगिहं** नाम नयरं ति ॥१॥

तत्थासि गरुयदरियारिमद्दणो [10]भुयणनिग्गयपयावो । अहिगयजीवा-ऽजीवो राया नामेण **जियसत्तू** ॥२॥

अणवरयगरुयसंवेगभाविओ **धम्मघोस**पामूले । सो अण्णया कयाई पमादिणं पासए सेहं ॥३॥

चोइज्जंतमभिक्खं अवराहं तं पुणो वि कुणमाणं । तस्स हियऽट्ठं राया सेसाण य रक्खणट्ठाए ॥४॥

आयरियाणुन्नाए आणावइ सो उ णिययपुरिसेहिं । तिव्वुक्कडदव्वेहिं संधियपुव्वं तहिं खारं ॥५॥

पक्खित्तो जत्थ णरो णवरं गोदोहमेत्तकालेण । निज्जिन्नमंस-सोणिय अट्ठियसेसत्तणमुवेइ ॥६॥

दो ताहे पुव्वमए पुरिसे आणावए तहिं राया । एगं गिहत्थवेसं बीयं [11]पासंडिणेवत्थं ॥७॥

---

टि० १. ०वृत्तो भवतीति क । **०वृत्तौ समर्थो भवतीति** ग घ ङ॥ २. **०ति । अर्थाद् यदि श्रद्धाय जी०** कप्रतिमृते ॥ ३. **जीविताय** ख ॥ ४. **कटुकक्षारशस्त्र०** ग च ॥ ५. **ज्ञात्वैतस्मिन् नि०** घ ङ ॥ ६. **निवर्तते** ख च ॥ ७. **द्वेधा–द्रव्यातङ्को भावातङ्कश्च** । तत्र क-गपुस्तके विना ॥ ८. **भरहे वा०** ग । **भारहे वा०** ङ ॥ ९. **०गुणसमेयं रा०** ख घ ङ च । **०गुणसमिद्धं रा०** ग ॥ १०. **भुवण०** ख ग घ ङ। **भुअण०** च ॥ ११. **पासंडणेवच्छं** ग घ ङ। **पासंडिणेवच्छं** क ख ॥

पुव्वं चिय सिक्खविए [१]ते पुरिसे पुच्छए [२]तहिं राया। [३]को अवराहो एसिं? भणंति— आणं अइक्कमइ ॥८॥
[४]पासंडी य जहुत्ते न वट्टए अत्तणो [५]उ आयारे। पक्खिवह खारमज्झे खित्ता गोदोहमेत्तस्स ॥९॥
दट्ठूणऽद्दिवसेसे ते पुरिसे अलियरोसरत्तच्छो। सेहं [६]अवलोएंतो राया तो भणइ आयरियं ॥१०॥
तुम्ह वि कोइ पमादी? सासेमि य तं पि, नत्थि भणइ गुरू। [७]जइ होही तो साहे, तुम्हि च्चिय [८]तत्थ [९]जाणेह ॥११॥
सेहो गए निवम्मी भणाइ ते साहुणो उ न पुणो त्ति। होहं पमायसीलो तुम्हं सरणागओ धणियं ॥१२॥
जइ पुण होज्ज पमाओ पुणो ममं सङ्कभावरहियस्स। तुम्हं गुणेहिँ सुविहिय! तो सावगरक्खसा मुच्चे ॥१३॥
आयंकभयुव्विग्गो ताहे सो णिच्च [१०]उज्जओ जाओ। कोवियमती य समए रण्णा मरिसाविओ पच्छा ॥१४॥
दव्वायंकादंसी अत्ताणं सव्वहा णियत्तेइ। अहियारंभाउ सया जह सीसो **धम्मघोसस्स** ॥१५॥

भावातङ्कदर्शी तु नरक-तिर्यङ्-मनुष्या-ऽमरभवेषु प्रियविप्रयोगादिशारीर-मानसातङ्कभीत्या न प्रवर्तते वायुसमारम्भे, अपि तु 'अहितं एतद् वायुसमारम्भणमि'ति मत्वा परिहरति। अतो य आतङ्कदर्शी भवति विम[११]लविवेकत्वात् स वायुसमारम्भस्य जुगुप्सायां प्रभुः, हिता-ऽहितप्राप्ति-परिहारानुष्ठानप्रवृत्तेः, तदन्यैवंविधपुरुषवदिति। वायुकायसमारम्भनिवृत्तेः कारणमाह—

**जे अज्झत्थमि**त्यादि। आत्मानमधिकृत्य यद् वर्तते तद् **अध्यात्मम्,** तच्च सुख-दुःखादि, तद् **यो जानाति**=अवबुध्यते, स्वरूपतोऽवगच्छतीत्यर्थः; **स बहि**रपि प्राणिगणं वायुकायादिकं **जानाति**। यथा एषोऽपि हि सुखाभिलाषी दुःखात् च उद्विजते यथा मयि दुःखमापतितं अतिकटुकं असद्वे[१२]द्यकर्मोदयाद् अशुभफलं स्वानुभवसिद्धं एवं यो वेत्ति, स्वात्मनि सुखं च सद्वेद्यकर्मोदयात् शुभफलमेवं च [१३]**यो** वेत्ति **स** खलु **अध्यात्मं जानाति**। एवं च योऽध्यात्मवेदी स बहिर्व्यवस्थितवायुकायादिप्राणिगणस्यापि नानाविधोपक्रमजनितं स्व-परसमुत्थं च शरीर-मनःसमाश्रयं दुःखं सुखं वा वेत्ति, स्वप्रत्यक्षतया परत्राऽपि अनुमिमीते। यस्य पुनः स्वात्मन्येव विज्ञानमेवंविधं न समस्ति

---

टि० १. दो ख ॥ २. **तओ राया** ख च ॥ ३. **को वऽवराहो** ख च ॥ ४. **पासंडी उ ज०** ग। **पासंडिओ जहुत्ते न पवट्टइ अत्तणो** ख च ॥ ५. **य** ग घ ङ ॥ ६. **अवलोयंतो** ग। **अवलोएत्ता** घ ॥ ७. **जो होही** ग ॥ ८. **तस्स** ख ग च ॥ ९. **जाणिहिह** क-गप्रती विना ॥ १०. **०उज्जुओ** ग ॥ ११. **०लविवेकभावात् स वायोः जुगु०** ख च। **०लविवेकभाग् स वायुस०** घ ङ ॥ १२. **०द्यस्वकर्मोदयाद्** घ ङ ॥ १३. **योऽवगच्छति स** ख ग च ॥

कुतः तस्य बहिर्व्यवस्थितवायु[१]कायादिव्यपेक्षा? । यश्च बहिर्जानाति सोऽध्यात्मं यथावदवैति, इतरेतराव्यभिचारादिति । [२]परात्मविज्ञानात् च यद् विधेयं तद् दर्शयितुमाह–

**एयं तुलमण्णेसिमि**त्यादि । **एतां तुलां** यथोक्तलक्षणां **अन्वेषयेद्**=गवेषयेदिति। का पुनरसौ तुला ? यथाऽऽत्मानं सर्वथा सुखाभिलाषितया रक्षसि तथा परमपि रक्ष, यथा परं तथा आत्मानमिति । एतां तुलां तुलितस्व-परसुख-दुःखानुभवोऽन्वेषयेद्, एवं कुर्यादित्यर्थः। उक्तं च–

"**कट्ठेण कंटएण व पाए विद्धस्स वेयणट्टस्स ।**
[३]**जा होइ अणिव्वाणी सव्वत्थ जिएसु** [४]**तं जाण** ॥" [ ]

तथा– "**मरिष्यामीति यद् दुःखं पुरुषस्योपजायते ।**
**शक्यस्तेनानुमानेन परोऽपि परिरक्षितुम्** ॥" [ ]

अतश्च यथाऽभिहिततुलातुलितस्व-परान्तराः स्थावर-जङ्गमजन्तुसङ्घातसंरक्षणाय एव प्रवर्तन्ते । कथमिति ? दर्शयति–

**इहे**त्यादि । **इह**=एतस्मिन् दयैकरसे जिनप्रवचने, शमनं=**शान्तिः** उपशमः, प्रशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्याभिव्यक्तिलक्षणसम्यग्दर्शन-ज्ञान-चरणकलापः शान्तिरुच्यते, निराबाधमोक्षाख्यशान्तिप्राप्तिकारणत्वात् । तामेवंविधां शान्तिं गताः-प्राप्ताः =**शान्तिगताः**, शान्तौ वा स्थिताः=**शान्तिगताः**, **द्रविका** नाम राग-द्वेषविनिर्मुक्ताः, द्रवः=संयमः सप्तदशविधानः, कर्मकाठिन्यद्रवणकारित्वाद् विलयहेतुत्वात्, स येषां विद्यते ते **द्रविकाः नावकाङ्क्षन्ति**=न वाञ्छन्ति, नाभिलषन्तीत्यर्थः । [५]किं नावकाङ्क्षन्ति ? **जीवितुं**=प्राणान् धारयितुम्। केन उपायेन जीवितुं नाभिकाङ्क्षन्ति ? वायुजीवोपमर्दनेन इत्यर्थः, शेषपृथिव्यादिजीवकायसंरक्षणं तु पूर्वोक्तमेव । समुदायार्थः तु अयम्– इहैव **जैने** प्रवचने यः संयमः तद्व्यवस्थिता एव उन्मूलितातितुङ्गराग-द्वेषद्रुमाः परभूतोपमर्दनिष्पन्न-सुखजीविकानिरभिलाषाः साधवः, नान्यत्र, एवंविधक्रियावबोधाभावादिति ॥५६॥

[६]एवं च स्थिते–

---

**टि०** १. **०कायादिष्वपेक्षा** कप्रतेर्विना ॥ २. **परात्मपरिज्ञानाच्च** ख च ॥ ३. **जह** ग ॥ ४. **तह** खप्रत्या विना ॥ ५. **किं ? जीवितुं** क ॥ ६. **एवं व्यवस्थिते** ख । **एवं च स्थिते सति** ग घ ङ। **एवं व्यवस्थिते सति** च ॥

[सू० ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं वाउकम्मसमारंभेणं वाउसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥५७॥

[सू० ] तत्थ खलु भगवता परिण्णा पवेदिता—इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव वाउसत्थं समारभति, अण्णेहिं वा वाउसत्थं समारभावेति, अण्णे वा वाउसत्थं समारभंते समणुजाणति । तं से अहियाए, तं से अबोधीए ॥५८॥

[सू० ] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति—एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु णिरए ।

इच्चत्थं गढिए लोगे, जमिणं विरूवरूवेहिं सत्थेहिं वाउकम्म-समारंभेणं वाउसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ॥५९॥

[सू० ] से बेमि— संति संपाइमा पाणा आहच्च संपतंति य ।

फरिसं च खलु पुट्ठा एगे संघायमावज्जंति । जे तत्थ संघाय-मावज्जंति ते तत्थ परियाविज्जंति । जे तत्थ परियाविज्जंति ते तत्थ उद्दायंति।

एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाता भवंति ॥६०॥

[सू० ] तं परिण्णाय मेहावी णेव सयं वाउसत्थं समारभेज्जा, णेवऽण्णेहिं वाउसत्थं समारभावेज्जा, णेवऽण्णे वाउसत्थं समारभंते समणुजाणेज्जा ।

जस्सेते वाउसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णाय-कम्मे त्ति बेमि ॥६१॥

लज्जमाणा पुढो पासेत्यादि पूर्ववत् नेयं यावत् से हु मुणी परिन्नायकम्मे त्ति

**बेमि** ॥५७-६१॥

सम्प्रति षड्जीवनिकायविषयवधकारिणां अपायदिदर्शयिषया तन्निवृत्तिकारिणां च सम्पूर्णमुनित्वप्रदर्शनाय[1] सूत्राणि प्रक्रम्यन्ते—

**[ सू० ] एत्थं पि जाण उवादीयमाणा,**

**जे आयारे ण रमंति**

**आरंभमाणा विणयं वयंति**

**छंदोवणीया अज्झोववण्णा आरंभसत्ता पकरेंति संगं ।**

**एत्थं पि जाणे**त्यादि । **एतस्मिन्नपि** प्रस्तुते वायुकाये, **अपि**शब्दात् पृथिव्यादिषु च समाश्रितमारम्भं ये कुर्वन्ति ते उपादीयन्ते, कर्मणा बध्यन्त इत्यर्थः । एकस्मिन् जीवनिकाये वधप्रवृत्ताः[2] शेषनिकायवधजनितेन कर्मणा बध्यन्ते[3]। किमिति ? यतो न हि एकजीवनिकायविषय आरम्भः शेषजीवनिकायोपमर्दमन्तरेण कर्तुं शक्यत इत्यतः त्वमेवं **जानीहि,** श्रोतुरनेन परामर्शः । अत्र च द्वितीयार्थे प्रथमा; ततश्च एवमन्वयो लगयितव्यः— पृथिव्याद्यारम्भिणः शेषकायारम्भकर्मणा **उपादीयमानान्** जानीहि । के पुनः पृथिव्याद्यारम्भिणः कर्मणा उपादीयन्ते ? इत्याह—

**'जे आयारे न रमंति' । ये** हि अविदितपरमार्था ज्ञान-दर्शन-चरण-तपो-वीर्याख्ये पञ्चप्रकारे **आचारे न रमन्ते**[4]=न धृतिं कुर्वन्ति; तदधृत्या च पृथिव्याद्यारम्भिणः तान् कर्मभिः उपादीयमानान् जानीहि । के पुनराचारे न रमन्ते ? **शाक्य-दिगम्बर-पार्श्वस्था**दयः । किमिति ? यत आह—

**'आरंभमाणा विणयं वयंति' । आरम्भमाणा** अपि पृथिव्यादीन् जीवान् **विनयं** =संयममेव भाषन्ते, कर्माष्टकविनयनाद् **विनयः**=संयमः । **शाक्या**दयो हि वयमपि विनयव्यवस्थिता इत्येवं भाषन्ते, न च पृथिव्यादिजीवाभ्युपगमं कुर्वन्ति; तदभ्युपगमे वा तदाश्रितारम्भित्वाद् ज्ञानाद्याचारविकलत्वेन नष्टशीला इति । किं पुनः कारणं येन एवं ते दुष्टशीला अपि विनयव्यवस्थितं आत्मानं भाषन्ते ? इत्यत आह—

---

टि० १. **०मुनिभावप्रद०** ख च । **०मुनित्वभावप्रद०** ग ॥ २. **वधप्रवृत्तः** ख च ऋते ॥ ३. **बध्यते** ख च विना ॥ ४. **०मन्ते निवृत्तिं कुर्वन्ति** क ॥

**'छंदोवणीया अज्झोववन्ना'** । **छन्दः**=स्वाभिप्राय इच्छामात्रमनालोचितपूर्वा-ऽपरं विषयाभिलाषो वा, तेन [१]छन्देन **उपनीताः**=प्रापिता आरम्भमार्गं अविनीता अपि विनयं भाषन्ते। **अधिकम्**-अत्यर्थम् **उपपन्नाः**-तच्चित्ताः तदात्मकाः=**अध्युपपन्ना,** विषयपरिभोगायत्तजीविता इत्यर्थः । य एवं विषयाशाकर्षितचेतसः ते किं कुर्युः ? इत्याह–

**'आरंभसत्ता [२]पकरेंति संगं'** । आरम्भणं=**आरम्भः** सावद्यानुष्ठानं, तस्मिन् **सक्ताः** =तत्पराः प्रकर्षेण कुर्वन्ति, [३]सज्यते येन संसारे जीवः स सङ्गः, अष्टविधं कर्म विषयसङ्गो वा, तं **सङ्गं प्रकुर्वन्ति** । सङ्गाच्च पुनरपि [४]संसारः, आजवंजवीभावरूपः, एवंप्रकारं अपायमवाप्नोति षड्जीवनिकायघातकारीति ।

अथ यो निवृत्तः तदारम्भात् स किंविशिष्टो भवति ? इत्यत आह–

**से वसुमं सव्वसमण्णागतपण्णाणेणं अप्पाणेणं अकरणिज्जं पावं कम्मं णो अण्णेसिं ।**

**से वसुममित्यादि** । **स** इति पृथिव्युद्देशकाद्यभिहितनिवृत्तिगुणभाक् षड्जीवनिकायहनननिवृत्तः, **वसुमान्** वसूनि द्रव्य-भावभेदाद् द्विधा, द्रव्यवसूनि मरकतेन्द्र-[५]नील-वज्रादीनि, भाववसूनि सम्यक्त्वादीनि, तानि यस्य यस्मिन् वा सन्ति स **वसुमान्**, द्रव्यवानित्यर्थः; इह च भाववसुभिः वसुमत्त्वमङ्गीक्रियते। प्रज्ञायन्ते यैः तानि प्रज्ञानानि यथावस्थितविषयग्राहीणि ज्ञानानि, सर्वाणि समन्वागतानि प्रज्ञानानि यस्य आत्मनः स =सर्वसमन्वागतप्रज्ञानः सर्वावबोधविशेषानुगतः, सर्वेन्द्रियज्ञानैः पटुभिः यथावस्थितविषयग्राहिभिः अविपरीतैः अनुगत इति यावत्, तेन **सर्वसमन्वागतप्रज्ञानेन आत्मना** । अथवा सर्वेषु द्रव्य-पर्यायेषु सम्यगनुगतं प्रज्ञानं यस्य आत्मनः स=सर्वसमन्वागतप्रज्ञान [६]आत्मा, 'भगवद्वचनप्रामाण्याद् एवं एतद् द्रव्य-पर्यायजालं, नान्यथा' इति सामान्य-विशेषपरिच्छेदाद् निश्चिताशेषज्ञेयप्रपञ्चस्वरूपः सर्वसमन्वागतप्रज्ञान आत्मा इति उच्यते । अथवा शुभा-ऽशुभफलसकलकलापपरिज्ञानाद् नरक-[७]तिर्यङ्-नरा-ऽमर-[८]मोक्षसुखस्वरूपपरिज्ञानात्

---

टि० १. छन्दे( न्द )सोपनीताः च ॥ २. **पगरंति** क ङ। **पकरंति** घ ॥ ३. **सज्यन्ते येन संसारे जीवाः स** ङ॥ ४. **संसारः । पुनस्तत्रैवोत्पत्तिः आजवं०** ग । **संसारः । पुनरपि तत्रैवोत्पत्तिः आजवं०** घ ङ ॥ ५. **०नील-वैडूर्य-वज्रा०** ख ॥ ६. **आत्मेत्युच्यते । अथवा शुभाशुभफले भागवद्वचन०** च ॥ ७. **०तिर्यङ्-मनुष्या-ऽमर०** ख च ॥ ८. **०मोक्षस्वरूप०** च ॥

वि०टि० ≠ "अजीव[?आजवं०] इति तत्रैव पुनः पुनर्भवनम्" जै०वि०प० ॥

च अपरितुष्यन् अनैकान्तिकादिगुणयुक्ते संसारसुखे, मोक्षानुष्ठानमाविःकुर्वन् सर्वसमन्वागतप्रज्ञान आत्मा अभिधीयते । तेन एवंविधेन आत्मना, **अकरणीयम्** =अकर्तव्यं इह-परलोकविरुद्धत्वाद् अकार्यमिति मत्वा **नान्वेषयेत्**[1], न तदुपादानाय यत्नं कुर्यादित्यर्थः । किं पुनस्तदकरणीयं नान्वेषणीयम् ? इत्युच्यते–'**पापं कर्म**' अधःपतनकारित्वात् पापम्, क्रियत इति कर्म, तच्च अष्टादशविधं[2] प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रह-क्रोध-मान-माया-लोभ-प्रेम-द्वेष-कलहा-ऽभ्याख्यान-पैशून्य-परपरिवाद[3]-रत्यरति-मायामृषा-मिथ्यादर्शनशल्याख्यमिति । एवमेतत् पापमष्टादशभेदं[4] **नान्वेषयेत्**=न कुर्यात् स्वयम्, न चान्यं कारयेत्, न कुर्वाणमन्यमनुमोदेत । एतदेव आह–

**तं परिण्णाय मेहावी णेव सयं छज्जीवणिकायसत्थं समारभेज्जा, णेवऽण्णेहिं छज्जीवणिकायसत्थं समारभावेज्जा, णेवऽण्णे छज्जीवणिकायसत्थं समारभंते समणुजाणेज्जा ।**

**जस्सेते छज्जीवणिकायसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ॥६२॥**

**॥ सत्थपरिण्णा समत्ता ॥**

**तं परिन्नाय मेहावीत्यादि** । **तत्** पापमष्टादशप्रकारं **परिः**=समन्ताद्[5] **ज्ञात्वा मेधावी** =मर्यादावर्ती[6] **नैव स्वयं षड्जीवनिकायशस्त्रं** स्वकाय-परकायादिभेदं **समारभेत, नैवान्यैः समारम्भयेत्, न च अन्यान् समारभमाणान् समनुजानीयात्** । एवं **यस्यैते** सुपरीक्ष्य-कारिणः **षड्जीवनिकायशस्त्रसमारम्भाः** तद्विषयाः पापकर्मविशेषाः **परिज्ञाता** ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च **स एव मुनिः**, प्रत्याख्यातकर्मत्वात् प्रत्याख्याताशेषपापापगमत्वात्, तदन्यैवंविधपुरुषवदिति, **इतिशब्दः** अध्ययनपरिसमाप्तिप्रदर्शनाय, **ब्रवीमि** इति **सुधर्मस्वामी** आह स्वमनीषिकाव्यावृत्तये, भगवतोऽपनीतघनघातिकर्मचतुष्टयस्य समासादिताशेषपदार्थाविर्भावकदिव्यज्ञानस्य प्रणताशेषगीर्वाणाधिपतेश्चतुस्त्रिंशदतिशयसमन्वितस्य श्री**वर्धमानस्वामिन** उपदेशात् सर्वं एतदाख्यातं यदतिक्रान्तं मया इति ॥६२॥

---

टि० १. नोऽन्वेषयेत् ख ॥ २. ०दशभेदं ख च ॥ ३. ०वाद-मायामृषा-रत्यरति-मिथ्या० घ ङ । ०वाद-रति-अरति-मिथ्या० (?) क ॥ ४. ०मष्टादशविधं नान्वेषयेत् नो कुर्यात् स्वयम्, न कारयेदन्यम्, न कुर्वाणमप्यनुमोदेत ख ॥ ५. सर्वतः ख ॥ ६. मर्यादावान् ख च ॥

उक्तः सूत्रानुगमो निक्षेपश्च ससूत्रस्पर्शनिर्युक्तिः । सम्प्रति नया नैगमादयः । ते च अन्यत्र सुविचारिताः; सङ्क्षेपतस्तु [1]सर्वेऽपि एते [2]द्वेधा—ज्ञाननयाः चरणनयाश्च। तत्र ज्ञाननया ज्ञानमेव प्रधानं मोक्षसाधनमिति अध्यवस्यन्ति, हिता-ऽहितप्राप्ति-परिहारकारित्वाद् ज्ञानस्य, तत्पूर्वकसकलदुःखप्रहाणात् च ज्ञानमेव, न तु क्रिया ।

चरणनयास्तु चरणस्य प्राधान्यमभिदधति, अन्वय-व्यतिरेकसमधिगम्यत्वात् [3]सकलपदार्थानाम् । तथा हि—सत्यपि ज्ञाने सकलवस्तुग्राहिणि समुल्लसिते न चरणमन्तरेण भवधारणीयकर्मोच्छेदः, तदनुच्छेदाच्च मोक्षाऽलाभः, तस्माद् न ज्ञानं प्रधानम् । चरणे पुनः [4]सति मूलोत्तरगुणाख्ये घातिकर्मोच्छेदः, तदुच्छेदात् केवलावबोधप्राप्तिः, ततश्च यथाख्यात-चारित्रवह्निज्वालाकलापप्रतापितसकलकर्मकन्दोच्छेदः, तदुच्छेदाद् अव्याबाधसुखलक्षण-मोक्षावाप्तिरिति, तस्मात् चरणं प्रधानमिति अध्यवस्यामः ।

[5]अत्रोच्यते—उभयमपि एतद् मिथ्यादर्शनम्, यत उक्तम्—

**''हयं नाणं कियाहीणं, हया अण्णाणओ किया ।**
**पासंतो पंगुलो दड्ढो, धावमाणो [6]वि अंधओ ॥''**

**[आव०नि०१०१,विशेषाव० ११५९]**

तदेवं सर्वेऽपि नयाः परस्परनिरपेक्षा [7]मिथ्यारूपतया न सम्यग्भावमनुभवन्ति समुदितास्तु यथावस्थितार्थप्रतिपादनेन सम्यक्त्वं भवन्ति, यत उक्तम्—

**''एवं सव्वे वि नया मिच्छादिट्ठी सपक्खपडिबद्धा ।**
**अन्नोन्न[8]मीसिया पुण हवंति ते चेव सम्मत्तं ॥'' [सन्मति०१।२१]**

तस्माद् उभयं परस्परसापेक्षं मोक्षप्राप्तयेऽलम्, न प्रत्येकं ज्ञानं चरणं चेति। निर्दोषः खल्वेष पक्ष इति व्यवस्थितम् । तथा च उभयप्राधान्यदिदर्शयिषया आह—

**''सव्वेसिं पि नयाणं बहुविधवत्तव्वयं निसामेत्ता ।**
**तं सव्वनयविसुद्धं जं चरण-[9]गुणट्ठिओ साहू ॥''**

**[आव०नि०१०६६,दशवै०नि० १५२, अनु०द्वा०१४१]**

चरणं च गुणश्च=चरण-गुणौ, [10]तयोः स्थितः=**चरण-गुणस्थितः** । गुणशब्दोपादा-

---

टि० १. **सर्वेऽप्येते द्वेधा भवन्ति-ज्ञान०** ख च ॥ २. **द्वेधीभवन्ति-ज्ञान०** ग ॥ ३. **सर्वपदा०** ख च ॥ ४. **सति सर्वमूलोत्तर०** ग च ॥ ५. **तत्रोच्यते** क ङ॥ ६. **य** ख घ ङ। **उ** ग। **अ** च ॥ ७. **मिथ्यात्वरूप०** ख ग च ॥ ८. **०निरिसया** च ॥ ९. **०गुणे ट्ठिओ** क ॥ ८. **तयोर्व्यवस्थितश्चर०** ख ॥

नाद् ज्ञानमेव परिगृह्यते, यतो न कदाचिदात्मनो गुणिनः तेन ज्ञानाख्येन गुणेन वियोगोऽस्ति, ततोऽसौ सहभावी गुणः । अतो **बहुविधवक्तव्यं** नयमार्गमवधार्य अपि सङ्क्षेपाद् ज्ञान-चरणयोरेव स्थातव्यमिति निश्चयो विदुषाम् । न च अभिलषितप्राप्तिः केवलेन चरणेन, ज्ञानहीनत्वात्, [1]अन्धगतिक्रियाप्रतिविशिष्टप्रदेशप्राप्तिवत्; न च ज्ञानमात्रेण अभीष्टप्राप्तिः, क्रियाहीनत्वात्, चक्षुर्ज्ञानसमन्वितपङ्गुपुरुष[2]सामिदग्धनगरमध्यव्यवस्थितयथावस्थितदर्शिज्ञानवत् । तस्मादुभयं प्रधानम्, नगरदाहनिर्गमे पङ्ग्वन्धसंयोगक्रियाज्ञानवत् ।

एवं इदं आचाराङ्गसन्दोहभूतं प्रथमाध्ययनं षड्जीवनिकायस्वरूप[3]रक्षणाऽपायगर्भं आदि-मध्या-ऽवसानेषु दयैकरसमेकान्तहितापत्तिकारि मुमुक्षुणा यदाऽधीतं भवति सूत्रतः, [4]शिक्षकेण अर्थतः च अवधृतं भवति श्रद्धान-संवेगाभ्यां च यथा[5]दात्मीकृतं भवति; ततोऽस्य महाव्रतारोपणमुपस्थापनं [6]परीक्ष्य **निशीथा**द्यभिहितक्रमेण सचित्तपृथिवीमध्यगमनादिना श्रद्दधानस्य सर्वं यथाविधि कार्यम् ।

कः पुनरुपस्थापने विधिः ? इति, अत्रोच्यते—शोभनेषु तिथि-करण-नक्षत्र-मुहूर्त्तेषु द्रव्य-क्षेत्र-भावेषु च भगवतां प्रतिकृतीरभिवन्द्य प्रवर्धमानाभिः स्तुतिभिः, अथ पादपतितोत्थितः सूरिः सह [7]शिष्येण महा[8]व्रतारोपणप्रत्ययं कायोत्सर्गं उत्सार्य एकैकं महाव्रतमादितः आरभ्य [9]त्रिरुच्चारयेद् यावद् निशिभक्तविरतिरविकला [10]त्रिरुच्चरिता । पश्चाद् इदं त्रिरुच्चरितव्यम्—[11]इच्चेयाइं पंच महव्वयाइं राईभोयणविरमणछट्ठाइं [12]अत्तहियट्ठाए उवसंपज्जित्ता णं विहरामि । पश्चाद् वन्दनकं दत्त्वा उत्थितो अभिधत्ते अवनताङ्गयष्टिः 'संदिशत किं भणामि ?' इति। सूरिः प्रत्याह—'वन्दित्वा अभिधत्स्व'इति । [13]एवमुक्तोऽभिवन्द्य उत्थितो भणति—'युष्माभिः मम महाव्रतानि आरोपितानि, इच्छामि अनुशिष्टिमि'ति । आचार्योऽपि प्रणिगदति—'निस्तारकपारगो भव, आचार्यगुणैः वर्धस्व' ।

---

टि० १. **अन्धगमिक्रिया०** घ ङ च । **अन्धगामिक्रिया** ग ॥ २. **०पुरुषअर्धदग्ध०** ख घ ङ च ॥ ३. **०रक्षणोपाय०** क-खप्रती विना ॥ ४. **शिष्यकेणा०** च ॥ ५. **०दात्मीभूतं** क ॥ ६. **परीक्ष्य निरीक्ष्य निशी०** ग ॥ ७. **शिक्षकेण** ख च । ८. **०व्रताधिरोपण०** ख ॥ ९. **त्रिरुच्चार्य या०** ख । **त्रिरुच्चारयन् यावद् निशिभुक्तिविरति०** ग ॥ १०. **त्रिरुच्चारिता** ग ॥ ११. **इच्चेयाइं** घ ङ च ॥ १२. **अत्तहियट्ठयाए** क-चपुस्तके विना ॥ १३. **एव ( मुक्तो ) व( वं )दित्वाऽभिवन्द्यो०** ङ ॥

**वि०टि०** ≠ **०सामिऽर्धदग्ध०** क । अत्र टिप्पणीभूतः **ऽर्ध** इति पाठः कप्रतिलेखकेन भ्रान्त्या मूले लिखितः प्रतिभाति । ''**सामि** इति अर्धम्'' जै०वि०प० । ''**सामिदग्धनगरम्** अर्धनगरं दग्धम्'' स०वि०प० ॥

वचनविरतिसमनन्तरं च सुरभि[1]वासचूर्णमु[2]ष्टिं शिष्यशिरसि किरति । पश्चाद् वन्दनकं दत्त्वा प्रदक्षिणीकरोति आचार्यं नमस्कारमावर्तयन्, पुनरपि वन्दते, तथैव च करोति सकलक्रियानुष्ठानम्, एवं त्रिः प्रदक्षिणीकृत्य [3]विरमति शिष्यः । साधवश्च अस्य मूर्ध्नि युगपद् वासमुष्टीर्विमुञ्चन्ति सुरभिपरिमलाः, [≠]यतिजनसुलभकेसराणि वा । पश्चात् कारितकायोत्सर्गः सूरिरभिदधाति—'गणस्तव कोटिकः, स्थानीयं कुलम्, [4]वैरा शाखा, अमुकाभिधान आचार्य उपाध्यायश्च'। साध्व्याः प्रवर्तिनी तृतीया उद्देष्टव्या । यथाऽऽसन्नं च उपस्थाप्यमाना [5]रत्नाधिका भवन्ति । पश्चाद् आचाम्लं निर्विकृतिकं वा स्वगच्छ-सन्ततिसमायातमा[6]चरन्तीति ।

एवं एतदध्ययनमादि-मध्या-ऽन्तकल्याणकलापयोगि भव्यजनमनः-समाधानाधायि प्रियविप्रयोगादिदुःखावर्त[7]बहुलकषायझषादिकुलाऽऽकुल[8]विषमसंसृतिसरित्तारणसमर्थं अमलदयैकरसं असकृदभ्यसितव्यं मुमुक्षुणा ।

**॥ इति आचार्यश्रीशीलाङ्क[9]विरचिता शस्त्रपरिज्ञाध्ययन[10]टीका [11]समाप्ता ।छ॥**

**ग्रन्थाग्रे[12]ण द्वाविंशतिशतानि एकविंशत्यधिकानि,**

**अङ्कतोऽपि २२२१ ।छ॥**

टि० १. ०वासपूर्णमुष्टिं च ॥ २. ०मुष्टिं च शिष्यस्य शिरसि ग ॥ ३. विरमति शेषाः साधव० च ॥ ४. वैराख्या शाखा कपुस्तकेन विना ॥ ५. रत्नाधिकीभवन्ति च ॥ ६. ०चरतीति ङ च ॥ ७. ०बहल० ख ॥ ८. ०विषयसं० क ॥ ९. ०विरचितशस्त्र० क घ ङ ॥ १०. ०टीका परिसमाप्तेति ।छ॥ ग्रन्थाग्रम् २२२१ ।छ॥ ख ॥ ११. समाप्तेति ।छ॥ श्री॥ ग्रन्था० ङ । समाप्तेति ।छ॥ ग्रन्थाग्रम् २३२१ ॥ च ॥१२. ०ण पञ्चविंश[ तिशतान्येकविंश ]त्यधिकानि । अङ्कतोऽपि २५२१ ।छ॥ ग ॥

वि०टि० ≠ "केशराणि इति पद्मकेशराणि" जै०वि०प० । "केसराणि कुंकुम-केसरव्यतिरिक्तं हट्टे द्रव्यम् ॥ समाप्तं प्रथमाध्ययनम् ॥" स०वि०प० ॥

# द्वितीयं
# लोकविजयाध्ययनम्

जहा पुण्णस्स कत्थति तहा तुच्छस्स कत्थति ।
जहा तुच्छस्स कत्थति तहा पुण्णस्स कत्थति ।
[ सू०१०२ ]

# ॥ द्वितीयमध्ययनं लोकविजयः ॥

## ॥ प्रथम उद्देशकः ॥

[१]जयति समस्तवस्तुपर्यायविचारापास्ततीर्थिकं,
विहितैकैकतीर्थ[२]नयवादसमूहवशात् प्रतिष्ठितम् ।
[३]बहुतिथभङ्गिसिद्धसिद्धान्तविधूनितमलमलीमसं,
तीर्थमनादिनिधनगतमनुपममादिनतं जिनेश्वरैः ॥१॥

नमः श्री**वर्द्धमानाय**, वर्धमानाय [⊕]पर्ययैः ।
उक्ताचारप्रपञ्चाय, निष्प्रपञ्चाय तायिने ॥२॥

**शस्त्रपरिज्ञा**विवरणमतिगहनमितीव[□] किल [≠][४]वृताः पूज्याः ।
श्री**गन्धहस्तिमिश्रा** विवृणोमि [५]ततोऽहमवशिष्टम् ॥३॥

उक्तं प्रथममध्ययनम् । साम्प्रतं द्वितीयमारभ्यते । अस्य च अयमभिसम्बन्धः— इह हि मिथ्यात्वोपशम-क्षय-क्षयोपशमान्यतरावाप्तसम्यग्दर्शन-ज्ञानकार्यस्य आत्यन्तिकैकान्ताऽनाबाधपरमानन्द[Δ]स्वतत्त्वसुखाऽनावरणज्ञान-दर्शनलक्षणलक्षितमोक्षकारणस्य आश्रवनिरोध-निर्जरारूपस्य मूलोत्तरगुणभेदभिन्नस्य चारित्रस्य [✡]अपराशेषव्रतवृतिकल्पनिष्पादित-निष्प्रत्यूहसकलप्राणिगणसङ्घट्टन-परितापना-ऽपद्रावणनिवृत्तिरूपस्य संसिद्धये मरणाभाव-प्रसङ्गाद् अभूत[६]गुणा-ऽऽत्मधर्मज्ञानोपलब्धेः **बार्हस्पत्यमत**निरासेन सामान्यतो जीवास्तित्वं प्रतिपाद्य विशेषतश्च **बौद्धा**दिमतनिरासेन एकेन्द्रियावनि-[✎]वना-ऽनल-पवन-वनस्पतिभेदांश्च जीवान् प्रकटय्य यथाक्रमं समानजातीयाश्मलताद्युद्भेददर्शनाद् अर्शोमांसाङ्कुरवत्, अविकृतभूमिखननोपलब्धेः मण्डूकवत्, विशिष्टाहारोपचया-ऽपचयशरीराभिवृद्धि-क्षयान्वय-व्यतिरेकगतेः अर्भकशरीरवत्, अ-परप्रेरिता-ऽप्रतिहता-ऽनियत-तिरश्चीनगमनाद् गवा-ऽश्वादिवत्, सालक्तकनूपुरालङ्कारकामिनीचरणताडनविकाराधिगतेः कामुकवत् इत्यादिभिः

---

टि० १. वृत्तमिदं ख-चआदर्शयोर्नास्ति ॥ २. ०**नववाद**० क ॥ ३. **बहुविधभङ्गि**० घ ॥ ४. **वृतं पूज्यैः । श्रीगन्धहस्तिमिश्रैर्विवृणोमि** च ॥ ५. **ततोऽहमविशिष्टम्** क-खप्रती ऋते ॥ ६. ०**गुणात्मज्ञानो**० ख ॥

वि०टि० ⊕ "**पर्या( र्य )यैः** इति ज्ञानादिकैः ।।छा। प्रथमम् ।।छा।" जै०वि०प० ॥ ≠ "**वृताः** इति वृतवन्तः" जै०वि०प० ॥ □ "**ततः** इति गन्धहस्तिविवरणविशेषात्" जै०वि०प० ॥ Δ "**स्वतत्त्व** इति आत्मपरिज्ञाने" जै०वि०प० ॥ ✡ "**अपर** इति मृषावादादि" जै०वि०प० ॥ ✎ **वन** इति उदकमित्यर्थः ॥

प्रयोगैः, तथोच्चैः शिर उद्घाट्य सूक्ष्म-बादर-द्वि-त्रि-चतुः-पञ्चेन्द्रियसंज्ञीतर-पर्याप्तका-ऽपर्याप्तकभेदांश्च प्रदर्श्य, शस्त्रं च स्वकाय-परकायभेदभिन्नं तद्वधे बन्धं विरतिं च प्रतिपाद्य, पुनरपि तदेव चारित्रं यथा सम्पूर्णभावं अनुभवति तथा अनेन अध्ययनेन उपदिश्यते । तथा हि–

अधिगत**शस्त्रपरिज्ञा**सूत्रार्थस्य तत्प्रतिपादितैकेन्द्रियपृथिवीकायादि श्रद्दधानस्य सम्यक् तद्रक्षापरिणामवतः सर्वोपाधिविशुद्धस्य तद्योग्यतया[1] आरोपितपञ्चमहाव्रतभारस्य साधोः यथा रागादिकषायलोकस्य शब्दादिविषयलोकस्य वा विजयो भवति तथा अनेन अध्ययनेन प्रतिपाद्यते । तथा च **निर्युक्तिकारेण** अध्ययनार्थाधिकारः **शस्त्रपरिज्ञा**यां प्राग् निरदेशि–"**लोगो जह बज्झइ जह य तं विजहियव्वं**"[ **आचा०नि०३३** ] इति ।

अनेन सम्बन्धेन आयातस्य अस्य अध्ययनस्य चत्वारि अनुयोगद्वाराणि भवन्ति । तत्र सूत्रार्थकथनम्=अनुयोगः, तस्य द्वाराणि=उपायाः, व्याख्याङ्गानीत्यर्थः; तानि चोपक्रमादीनि । तत्रोपक्रमो द्वेधा–शास्त्रानुगतः शास्त्रीयः, लोकानुगतो लौकिक इति । निक्षेपः त्रेधा ओघ-नाम-सूत्रालापकनिष्पन्नभेदात्[2] । अनुगमो[3] द्वेधा– सूत्रानुगमो निर्युक्त्यनुगमश्च । नया नैगमादयः । तत्र शास्त्रीयोपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा–अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च । तत्र अध्ययनार्थाधिकारोऽध्ययनसम्बन्धे **शस्त्रपरिज्ञा**यां प्रागेव निरदेशि; उद्देशार्थाधिकारं तु स्वयमेव **निर्युक्तिकारः** प्रचिकटयिषुराह–

**[ नि० ]** **सयणे[4] अदढत्तं[5] बीयगम्मि माणो य अत्थसारो य ।**
**भोगेसु लोगणिस्साएँ लोगेँ अममिज्जता चेव ॥१७३॥**

**सयणे** त्ति गाहा । तत्र प्रथमोद्देशकार्थाधिकारः **स्वजने**=माता-पित्रादिके अभिष्वङ्गोऽधिगतसूत्रार्थेन न कार्यः इत्यध्याहारः; तथा च सूत्रम्–**माया मे पिया मे**[6] [सू०६३]त्यादि । '**अदढत्तं बीयगम्मि**' त्ति **द्वितीयो**देशके **अदृढत्वं** संयमे न कार्यमिति शेष, विषय-कषायादौ चादृढत्वं कार्यमिति; वक्ष्यति च–**अरइं**[7] **आउट्टे मेहावी** [सू०६९] । तृतीयोद्देशके '**माणो य अत्थसारो य**' त्ति जात्याद्युपेतेन साधुना कर्मवशाद् विचित्रतामवगम्य सर्वमदस्थानानां **मानो** न कार्यः, आह च–**के गोआवादी? के माणावादी** [सू०७५]त्यादि; **अर्थसार**स्य च निस्सारता वर्ण्यते, तथा च– **तिविहेण जा**

---

टि० १. **तद्योगतया०** क च ॥ २. **०निष्पत्तिभे०** ख ॥ ३. **०गमः सूत्रस्पर्शिकनिर्युक्त्य०** ख ॥ ४. **सयणे य अद०** झ ॥ ५. **०णिस्सा लोगे** झ-जप्रती विना ॥ ६. **०मिति सम्बन्धः, विषय०** क घ ङ । **०मिति सम्बन्धः, शेषविषय०** ग च ॥ ७. **अरइमाउट्टे** ख च विना । **अरइमाउट्ट** ग घ ङ ॥

**वि से मत्ता अप्पा वा बहुगा वे**[सू०७९]त्यादि ।

चतुर्थे [१]तु '**भोगेसु**' त्ति **भोगेषु** अभिष्वङ्गो न कार्य इति शेषः, यतो भोगिनामपायान् वक्ष्यति; सूत्रं च—**थीभि लोए पव्वहिए** [सू०८४] । पञ्चमे तु '**लोगणिस्साए**' त्ति त्यक्तस्वजन-धन-मान-भोगेनापि साधुना संयमदेह[२]प्रतिपालनाय स्वार्थारम्भप्रवृत्त**लोकनिश्रया** विहर्तव्यमिति शेषः; तथा च सूत्रम्—**समुट्ठिए अणगारे** इच्चाइ जाव **परिव्वये** [सू०८८] । षष्ठोद्देशके तु '**लोए अममिज्जया चेव**' लोकनिश्रयाऽपि विहरता साधुना तस्मिन् **लोके** पूर्वा-ऽपरसंस्तुते असंस्तुते च न ममत्वं कार्यम्, पङ्कजवत् तदाधारस्वभावाऽनभिष्वङ्गिणा भाव्यमिति; तथा च सूत्रम्—**जे ममाइयमइं जहाइ[३] से जहाइ[४] ममाइयं** [सू०९७], गाथातात्पर्यार्थः ॥१७३॥

नामनिष्पन्ने [५]तु निक्षेपे **लोक-विजय** इति द्विपदं नाम । [६]तत्र लोक-विजययोर्निक्षेपः कार्यः; सूत्रालापकनिष्पन्ने च निक्षेपे यानि निक्षेपार्हाणि सूत्रपदानि तेषां च निक्षेपः कार्यः । सूत्रपदोपन्यस्त**मूल**शब्दस्य च कषायाभिधायकत्वात् कषाया निक्षेप्तव्याः । तदेवं नामनिष्पन्नं भविष्यत्सूत्रालापकनिष्पन्न[७]निक्षेपाक्षिप्तं सामर्थ्यायातं च यद् निक्षेप्तव्यं तद् **निर्युक्तिकारो** गाथया सम्पिण्ड्य आचष्टे—

[नि०] **लोगस्स य विजयस्स य गुणस्स मूलस्स तह य ठाणस्स ।**
**निक्खेवो कायव्वो जम्मूलागं च संसारो ॥१७४॥**

**लोगस्स य** गाहा । कण्ठ्या, [८]केवलं '**जम्मूलागं च [९]संसारो**' इति यन्मूलकः संसारः तस्य च निक्षेपः कार्यः । तच्च मूलं कषायाः, यतो नारक-तिर्यङ्-नरा-ऽमरगतिस्कन्धस्य गर्भनिषेक-कलला-Φऽर्बुद-मांसपेश्यादि-जन्म-जरा-मरणशाखस्य दारिद्र्याद्यनेक[१०]व्यसनोपनिपातपत्रगहनस्य प्रियविप्रयोगा-ऽप्रियसम्प्रयोगा-ऽर्थनाशा-ऽनेकव्याधिशतपुष्पोपचितस्य शारीर-मानसोपचिततीव्रतरदुःखोपनिपातफलस्य संसारतरोः मूलम्=आद्यं कारणं कषायाः, कषः=संसारः, तस्य आयाः इति कृत्वा ॥१७४॥

तदेवं यानि अत्र नामनिष्पन्ने यानि च सूत्रालापकनिष्पन्ने निक्षेप्तव्यपदानि सम्भवन्ति तानि **निर्युक्तिकृत्** सुहृद् भूत्वा विवेकेन आचष्टे—

---

टि० १. च ग घ ङ॥ २. **०परिपालनाय** घ ङ॥ ३. **जहाय** ग ॥ ४. **जहाय** घ ॥ ५. **च** क ग॥ ६. **ततो** ख ॥ ७. **०निक्षेपोपक्षिप्तं** च ॥ ८. **नवरं** च ॥ ९. **संसार** खप्रतेर्विना ॥ १०. **०व्यसनोपात्तपत्र०** घ ङ॥

वि०टि० Φ "**अर्बुद** इति स्त्यानम्" जै०वि०प० ॥

[नि०] **[1]लोगो त्ति य [2]विजउ त्ति य [3]अज्झयणे लक्खणं तु निप्फण्णं ।**
**गुण मूल ट्ठाणं [4]ति य [5]सुत्तालावेण निप्फण्णं ॥१७५॥**

**लोगो त्ति य विजयो त्ति य** गाहा । कण्ठ्या ॥१७५॥

तत्र यथोद्देशः तथा निर्देशः इति न्यायाद् लोक-विजययोः निक्षेपमाह—

[नि०] **लोगस्स [6]य निक्खेवो अट्ठविहो छव्विहो [7]य विजयस्स ।**
**भावे कसायलोगो अहिगारो तस्स विजएणं ॥१७६॥**

**लोगस्स य** गाहा । तत्र लोक्यत इति लोकः, "**लोकृ दर्शने**" [**पा०धा०१/७६**] [8]इति एतस्य धातोः "**अकर्तरि च कारके सञ्ज्ञायाम्**" [**पा० ३/३/१९**] इति घञ् । स च धर्मा-ऽधर्मास्तिकाय[9]व्यवच्छिन्नं अशेषद्रव्याधारं वैशाखस्थानस्थ[10]कटिन्यस्तकरयुग्म-पुरुषोपलक्षितं आकाशखण्डं पञ्चास्तिकायात्मको वेति । तस्य **निक्षेपो**ऽष्टधा नाम-स्थापना-द्रव्य-क्षेत्र-काल-भव-भाव-पर्ययभेदात् । '**छव्विहो य विजयस्स**' त्ति विजयः अभिभवः पराभवः पराजय इति पर्यायाः, तस्य निक्षेपः **षड्विधो** वक्ष्यते । तत्र अष्टप्रकारे लोके येन अत्र अधिकारः तमाह—'**भावे कसायलोगो**' त्ति भावलोकेन अत्र अधिकारः । स च भावः षट्प्रकारः औदयिकादिः । तत्रापि औदयिकभावकषायलोकेन अधिकारः, तन्मूलत्वात् संसारस्य । यद्येवं ततः किम् ? अत आह—'**अहिगारो तस्स विजएणं**' ति, **अधिकारः**=व्यापारः, **तस्य** औदयिकभावकषायलोकस्य **विजयेन**=पराजयेनेति गाथार्थः ॥१७६॥ तत्र लोकोऽष्टधा निक्षेपार्थं [11]प्रागुददेशि । विजयश्च षोढा, तन्निक्षेपार्थमाह—

[नि०] **लोगो भणिओ, दव्वं खेत्तं कालो य भावविजओ य ।**
**भवलोग भावविजओ पगयं जह बज्झई लोगो ॥१७७॥**

**लोगो भणिओ** गाहा । तत्र लोकः **चतुर्विंशतिस्तवे** विस्तरतो अभिहितः । ननु च केयं वाचोयुक्तिः 'लोक**श्चतुर्विंशतिस्तवे** अभिहितः?' इति; किमत्र अनुपपन्नम् ?; उच्यते— इह हि अपूर्वकरण[12]प्रक्रियाधिरूढक्षपकश्रेणिध्यानाग्निदग्धघातिकर्मेन्धनेन उत्पन्ननिरावरणज्ञानेन विपच्यमानतीर्थकरनामाविर्भूतचतुस्त्रिंशदतिशयोपेतेन श्री**वर्धमान**-

---

टि० १. **लोग** ख ञ ठ विना ॥ २. **विजय** ठ ॥ ३. **अज्झयणस्स** क ॥ ४. **चिय** ख ॥ ५. **सुत्तालावे य नि०** ख ञ ठ॥ ६. **वि** जपुस्तकमृते ॥ ७. **उ** ख ॥ ८. **इत्यस्माद्धातोः** ख च । **इत्यस्य धातोः** ग ॥ ९. **०व्यवस्थितमशेष०** ख ॥ १०. **०कटिस्थकर०** क घ ङ॥ ११. **प्रागुपादेशि** ख ॥ १२. ***०प्रक्रमाधिरूढ०*** *ख ग च ॥*

**स्वामि**ना हेयोपादेयार्थाविर्भावनाय सदेव-मनुजायां परिषदि आचारार्थो बभाषे, गणधरैश्च महामतिभिः अचिन्त्यशक्त्युपेतैः **गौतमा**दिभिः प्रवचनार्थं अशेषासुभृदुपकाराय स एव **आचाराङ्ग**तया दृब्धे, **आवश्यका**न्तर्भूतः **चतुर्विंशति**स्तु आरातीयकालभाविना **भद्रबाहुस्वामि**नाऽकारि, ततश्च अयुक्तः पूर्वकालभाविनि **आचाराङ्गे** व्याख्यायमाने पश्चात्कालभाविना **चतुर्विंशतिस्तवेन** अतिदेशः इति कश्चित् सुकुमारमतिः । अत्राह[1]– नैष दोषः, यतो **भद्रबाहुस्वामि**नैव अयमतिदेशो अभ्यधायि, स च पूर्वं **आवश्यकनिर्युक्तिं** विधाय पश्चाद् **आचाराङ्गनिर्युक्तिं** चक्रे, तथा चोक्तम्–

"**आवस्सयस्स दसकालियस्स तह उत्तरज्झमायारे**" [**आव०नि०८४** ]त्ति सूक्तम्[2] ।

विजयस्य तु निक्षेपं नाम-स्थापने क्षुण्णत्वाद् अनादृत्य द्रव्यादिकमाह–

**दव्वं खेत्त**मित्यादिना, द्रव्यविजयो व्यतिरिक्तो द्रव्येण द्रव्याद् द्रव्ये वा विजयः कटु-तिक्त-कषायादिना श्लेष्मादेः नृपतिमल्लादेर्वा । क्षेत्रविजयः षट्खण्ड**भरता**देः, यस्मिन् वा क्षेत्रे विजयः प्ररूप्यते । कालविजय इति कालेन विजयः, यथा–षष्टिभिर्वर्षसहस्रैः **भरते**न[3] जितं **भरतम्**, कालस्य प्राधान्यात्, भृतककर्मणि वा मासो अनेन जित इति, यस्मिन् वा काले विजयो व्याख्यायत इति । भावविजय औदयिकादेः भावस्य भावान्तरेण औपशमिकादिना विजयः ।

तदेवं लोक-विजययोः स्वरूपमुपदर्श्य प्रकृतोपयोगि आह–

**भवे**त्यादि । अत्र हि **भवलोक**ग्रहणेन भावलोक एव अभिहितः, छन्दोभङ्गभीत्या ह्रस्व एव उपादायि । तथा च अवाचि–"**भावे कसायलोगो अहिगारो तस्स विजएणं**" [**आचा०नि०१७६**] ति । तस्य औदयिकभावकषायलोकस्य औपशमिकादिभावलोकेन विजयो यत एतदत्र प्रकृतम् । इदमत्र हृदयम्– अष्टविधलोक-षड्विधविजययोः प्राग्व्यावर्णितस्वरूपयोः भावलोक-भावविजयाभ्यां अत्रोपयोग इति । **यथा** च अष्टप्रकारेण कर्मणा **लोकः**=प्राणिगणो **बध्यते**, बन्धस्योपलक्षणत्वाद् यथा च मुच्यत इति; एतदपि अत्राध्ययने **प्रकृत**मिति गाथार्थः ॥१७७॥ तेनैव भावलोकविजयेन किं फलम् ? इत्याह–

[ नि० ] **विजिओ कसायलोगो सेयं खु तओ नियत्तिउं[4] होइ ।**
**कामणियत्तमई खलु संसारा मुच्चई खिप्पं ॥१७८॥** सूत्रम्—

---

टि० १. तत्राह क । आह ख ॥ २. सूत्रम् च ॥ ३. ०न भरतं जितम् ख ॥ ४. नियत्तिओ ख ज झ ॥

**विजिओ** गाहा । **विजित**:=पराजित:, कोऽसौ ? **कषायलोक:**, औदयिकभाव-कषायलोक इति यावत् । विजितकषायलोक: सन् किमवाप्नोति ? इत्याह—**संसारान्मुच्यते क्षिप्रम्** । अतस्तस्माद् **निर्वर्तितुं श्रेय:, खु:** वाक्यालङ्कारे अवधारणे वा, निवर्तितुं श्रेय: एव । किं कषायलोकादेव निवृत्त: संसारात् मुच्यते आहोश्विद् अन्यस्मादपि पापोपादानहेतो: ? इति दर्शयति— **कामे**त्यादि, गाथार्धं सुगमम् ॥१७८॥

गतो नामनिष्पन्नो निक्षेप: । साम्प्रतं सूत्रालापकनिष्पन्ननिक्षेपावसर:, स च सूत्रे सति भवति । तत्र अस्खलितादिगुणोपेतं सूत्रानुगमे सूत्रमुच्चारणीयम्, तच्चेदम्—

**[ सू० ] जे गुणे से मूलट्ठाणे, जे मूलट्ठाणे से गुणे ।**

**'जे गुणे से मूलट्ठाणे'** इत्यादि सूत्रम् । अस्य च निक्षेपनिर्युक्त्यनुगमेन प्रतिपदं निक्षेप: क्रियते । तत्र गुणस्य पञ्चदशधा निक्षेप:—

**[ नि० ] दव्वे खेत्ते काले फल पज्जव गणण करण अब्भासे ।**
**गुणअगुणे अगुणगुणे भव सीलगुणे य भावगुणे ॥१७९॥**

**दव्वे खेत्ते** गाहा । नामगुण: स्थापनागुण: द्रव्यगुण: क्षेत्रगुण: कालगुण: फलगुण: पर्यवगुणो गणनागुण: करणगुण: अभ्यासगुण: गुणागुण: अगुणगुण: भवगुण: शीलगुण: भावगुणश्चेति गाथासमासार्थ: ॥१७९॥

तदेवं सूत्रानुगमेन सूत्रे समुच्चारिते[1] निक्षेपनिर्युक्त्यनुगमेन तदवयवे निक्षिप्ते सति उपोद्घातनिर्युक्ते: अवसर:, सा च **उद्देसे**त्यादिना द्वारगाथाद्वयेन अनुगन्तव्या । साम्प्रतं सूत्रस्पर्शनिर्युक्ते: अवसर:, तत्रापि सुगमनाम-स्थापनाव्युदासेन द्रव्यादिकमाह—

**[ नि० ] दव्वगुणो दव्वं चिय गुणाण जं तम्मि संभवो होइ ।**
**सच्चित्ते अच्चित्ते मीसम्मि य होइ दव्वम्मि ॥१८०॥**

**दव्वगुणो०** गाहा । तत्र **द्रव्यगुणो** नाम **द्रव्यमेव** । किमिति ? गुणानां यतो गुणिनि तादात्म्येन सम्भवात् । ननु च द्रव्य-गुणयो: लक्षण-विधानभेदाद् भेद:, तथा हि— द्रव्यलक्षणं— गुण-पर्यायवद् द्रव्यम्, विधानमपि धर्मा-ऽधर्मा-ऽऽकाश-जीव-पुद्गलादिकमिति । गुणलक्षणं— द्रव्याश्रयिण: सहवर्तिनो निर्गुणा गुणा इति, विधानमपि ज्ञानेच्छा-द्वेष-रूप-रस-गन्ध-स्पर्शादय: स्वगतभेदभिन्ना इति; नैष दोष:, यतो द्रव्ये

---

टि० १. समुच्चरिते च ॥

सचित्ता-ऽचित्त-मिश्रभेदभिन्ने स गुणः तादात्म्येन स्थितः। तत्र अचित्तद्रव्यं द्विधा—अरूपि रूपि च। अरूपिद्रव्यं[1] त्रिधा— धर्मा-ऽधर्मा-ऽऽकाशभेदभिन्नं, तच्च गति-स्थित्यवगाहदानलक्षणं, गुणोऽपि अस्य अमूर्त्तत्वा-ऽगुरुलघुपर्यायलक्षणः, तत्र अमूर्त्तत्वं त्रयस्यापि स्वरूपम्[2], न भेदेन व्यवस्थितम्; अगुरुलघुपर्यायोऽपि तत्पर्यायत्वादेव मृदो मृत्पिण्ड-स्थास-कोश-कुशूलपर्यायवत्। रूपिद्रव्यमपि स्कन्ध-तद्देश-प्रदेश-परमाणुभेदम्, तस्य च रूपादयो गुणा अभेदेन व्यवस्थिता भेदेनानुपलब्धेः, संयोग-विभागाभावात्[3] स्वात्मवत्।

तथा सचित्तमपि उपयोगलक्षणलक्षितं जीवद्रव्यम्, न च तस्माद् भिन्ना ज्ञानादयो गुणाः, तद्भेदे[4] जीवस्य अचेतनत्वप्रसङ्गात्। तत्सम्बन्धाद् भविष्यतीति चेत्, अनुपासितगुरोरिदं वचः, यतः—

**"Φन हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते।" [मी०श्लो०वा०४७]**

न हि अन्धः प्रदीपशतसम्बन्धेऽपि रूपावलोकनाय अलमिति। अनयैव दिशा मिश्रद्रव्येऽपि एकत्वसंयोजना स्वबुद्ध्या कार्येति गाथार्थः ॥१८०॥

तदेवं द्रव्य-गुणयोः एकान्तेन एकत्वे प्रतिपादिते सति आह शिष्यः— तत् किमिदानीं अभेदोऽस्तु ? नैतदपि अस्ति, यतः सर्वथा अभेदे अभ्युपगम्यमाने सति एकेनैव इन्द्रियेण गुणान्तरस्यापि उपलब्धेः अपरेन्द्रियवैफल्यं स्यात्, तथा हि— चूतफलरूपादौ चक्षुराद्युपलभ्यमाने रूपाद्यात्मभूतावयविद्रव्याऽव्यतिरिक्त रसादेरपि उपलब्धिः स्याद् रूपादिस्वरूपवद्, एवं हि अभेदः स्याद् यदि रूपादौ समुपलभ्यमाने अन्येऽपि समुपलभ्येरन्, अन्यथा विरुद्धधर्माध्यासाद् भिद्येरन् घट-पटवदिति। तदेवं भेदाऽभेदोपपत्तिव्याकुलितमतिः शिष्यः पृच्छति—उभयथाऽपि दोषोपपत्तिदर्शनात्[5] कथं गृह्णीमः ?। आचार्य आह—अत एव भेदाभेदोऽस्तु, तत्र अभेदपक्षे द्रव्यं गुणः; भेदपक्षे तु भावो गुण इति। तथा हि— गुण-गुणिनोः पर्याय-पर्यायिणोः सामान्य-विशेषयोः अवयवा-ऽवयविनोः भेदा-ऽभेदव्यवस्थानेनैव आत्मभावसद्भावात्, आह हि—

**"दव्वं पज्जवविजुयं दव्वविउत्ता य पज्जवा नत्थि।**
**उप्पाय-ट्ठिइ-भंगा[6] हंदि दवियलक्खणं एयं ॥"[सन्मति०१/१२]**

---

टि० १. **तत्रारूपिद्रव्यं** च ॥ २. **स्वं रूपम्** घ-ङ ॥ ३. **०वियोगाभावात्** ख ॥ ४. **ततो भेदे** घ ङ। **तद्भेदेन जी०** च ॥ ५. **दोषापत्तिदर्शनात्** च ॥ ६. **०भंगा इई हंदि(?)** ग ॥

**वि०टि० Φ** "स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम्।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते ॥" इति संपूर्णः श्लोकः।

"नयास्तव स्यात्पदसत्त्वलाञ्छिता, रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो, भवन्तमार्याः प्रणता हितैषिणः ॥ "

**[ बृ०स्व०स्तो०६५ ]** इत्यादि ।

स्वयूथ्यैरत्र बहु विजृम्भितमिति अलं विस्तरेण । एनमेव **निर्युक्तिकारः** समस्तद्रव्यप्रधाने जीवद्रव्ये गुणं अभेदेन व्यवस्थितमाह—

**[ नि० ]   संकुचिय-वियसियत्तं एसो जीवस्स होइ जीवगुणो ।**
**पूरेइ हंदि लोगं बहुप्पएसत्तणगुणेणं ॥१८१॥**

**संकुचिय०** गाहा । जीवो हि सयोगिवीर्यसद्द्रव्यतया प्रदेशसंहार-विसर्गाभ्यां आधारवशात् प्रदीपवत् सङ्कुचति विकसति च । एष जीवस्य आत्मभूतो गुणः, भेदं विनाऽपि षष्ठ्युपलब्धेः, तद्यथा—राहोः शिरः, शिलापुत्रकस्य शरीरमिति । तद्वद एव वा सप्तसमुद्घातवशात् सङ्कुचति विकसति च । सम्यक्-समन्ततः उत्-प्राबल्येन हननम्-इतश्च इतश्च आत्मप्रदेशानां प्रक्षेपणं=समुद्घातः । स च कषाय-वेदना-मारणान्तिक-वैक्रिय-तैजसा-ऽऽहारक-केवलिसमुद्घातभेदात् सप्तधा । तत्र कषायसमुद्घातो अनन्तानुबन्धि-क्रोधाद्युपहतचेतस आत्मप्रदेशानां इतश्च इतश्च प्रक्षेप इति १। एवं तीव्रतरवेदनोपहतस्यापि वेदनासमुद्घातः २। मारणान्तिकसमुद्घातो हि मुमूर्षोरसुमत आदित्सितोत्पत्तिप्रदेशे आ लोकान्ताद् आत्मप्रदेशानां भूयो भूयः प्रक्षेप-संहाराविति ३। वैक्रियसमुद्घातो वैक्रियलब्धिमतो वैक्रियोत्पादनाय बहिरात्मप्रदेशप्रक्षेपः ४। तैजससमुद्घातः तैजस-शरीरनिमित्ततेजोलेश्यालब्धिमतः तेजोलेश्याप्रक्षेपावसरे इति ५। आहारकसमुद्घातः चतुर्दशपूर्वविद आहारकलब्धिमतः क्वचित् सन्देहापगमनाय तीर्थकरान्तिकगमनार्थं आहारकशरीरं उपादातुं बहिरात्मप्रदेशप्रक्षेपः ६। केवलिसमुद्घातं तु समस्तलोकव्यापितया अन्तर्नीतान्यसमुद्घातं **निर्युक्तिकारः** स्वत एव आचष्टे— **पूरयति**=व्याप्नोति, **हन्दि** इति उपप्रदर्शने, किम् ? **लोकं** चतुर्दशरज्ज्वात्मकं आकाशखण्डम्, कुतः ? **बहुप्रदेशगुणत्वात्,** तथा हि— उत्पन्नदिव्यज्ञान आयुषः अल्पत्वं अवधार्य वेदनीयस्य च प्राचुर्यं दण्डादिक्रमेण

---

टि० १. **स्यात्पदलाञ्छना इमे, रसो०**ख । **स्यात्पदलाञ्छिता इमे** ग घ ङ च ॥ २. **०तोत्पत्तिप्रदेशेन आ०** ग ॥ ३. **०निमित्तं तेजो०** क-खपुस्तके विना ॥ ४. **प्राचुर्याद् दण्डादि०** ग च ॥

**वि०टि० Φ** "द्वितीयाध्ययने उ०१-**स्यात्पद**रूपं यत् सत्यं[ ?त्वं ] तेन **लाञ्छिताः**" स०वि०प० ॥
≠ "**सयोगिवीर्य०** इति सयोगीनि=सचेष्टानि वीर्येण कृत्वा(ता)नि सन्ति=विद्यमानानि द्रव्याणि=मनो वाक्-कायपरिणतपुद्गलस्कन्धलक्षणानि यस्य तथा, तद्भावः=तत्ता, तया ।" जै०वि०प० ॥

लोकप्रमाणत्वाद् आत्मप्रदेशानां लोकमापूरयति[1], तदुक्तम्—

"**दंड कवाडे मंथंतरए**[2]" [**आव०नि०९५५, विशेषाव०३०३१**] त्ति, गाथार्थः ॥१८१॥

गतो द्रव्यगुणः। क्षेत्रादिकमाह—

[नि०] **देवकुरु सुसमसुसमा सिद्धी णिब्भय दुगादिया चेव।**
**कल भोयणुज्ज[3][?ज्जु] वंके जीवमजीवे य भावम्मि ॥१८२॥**

**देवकुरु** गाहा। क्षेत्रगुणे देवकुर्वादि, कालगुणे सुषमसुषमादिः, फलगुणे सिद्धिः, पर्यवगुणे Φनिर्भजना, गणनागुणे द्विकादि, करणगुणे कलाकौशल्यम्, अभ्यासगुणे भोजनादि, गुणागुणे ऋजुता, अगुणगुणे वक्रता, भवगुण-शीलगुणयोः भावगुणार्थमुपात्तेन जीवग्रहणेन गतार्थत्वाद् गाथायां पृथगनुपादानम्, भवगुणो जीवस्य नारकादिर्भवः, शीलगुणो जीव एव क्षान्त्याद्युपेतः, भावगुणो जीवा-ऽजीवयोरिति एवं संयोज्य एकैकं व्याख्यायते—

तत्र **देवकुरू**त्तरकुरु-हरिवर्ष-रम्यक-[4]हैमवत-हैरण्यवत-षट्पञ्चाशदन्तरद्वीपका-ऽकर्मभूमीनां अयं गुणः यदुत तत्रत्यमनुजा देवकुमारोपमाः सदा अवस्थितयौवना निरुपक्रमायुषो मनोज्ञशब्दादिविषयोपभोगिनः स्वभावमार्दवा-ऽऽर्जव-प्रकृतिभद्रकगुणा-ऽऽसन्नदेवलोकगतयश्च भवन्ति।

कालगुणोऽपि भरतैरावतयोः तिसृष्वपि एकान्तसुषमादिषु समासु स एव सदा अवस्थितयौवनादिरिति।

फलमेव गुणः=फलगुणः। फलं च क्रियाया भवति, तस्याश्च क्रियायाः सम्यग्दर्शन-ज्ञान-चारित्ररहिताया ऐहिका-ऽऽमुष्मिकार्थं प्रवृत्ताया अनात्यन्तिकः अनैकान्तिको भवन् फलगुणोऽपि अगुण एव भवति। सम्यग्दर्शन-ज्ञान-चारित्रक्रियायास्तु एकान्तिका-ऽऽत्यन्तिका-ऽनाबाधसुखाख्य**सिद्धि**फलगुणो अवाप्यते। एतदुक्तं भवति— सम्यग्दर्शनादिकैव क्रिया सिद्धिफलगुणेन फलवती, अपरा तु सांसारिकसुख[5]फलाभास एव, फलाध्यारोपाद् निष्फला इत्यर्थः।

पर्यायगुणो नाम द्रव्यस्य अवस्थाविशेषः पर्यायः, स एव गुणः=पर्यायगुणः, गुण-पर्याययोः नयवादान्तरेण अभेदाभ्युपगमात्। स च Φनिर्भजनारूपः, निश्चिता भजना=

---

**टि०** १. ०ति **व्याप्नोति तदु०** ग॥ २. **मंथंतरय त्ति** क च। **मंथंतरे य त्ति** ग घ ङ॥ ३. **भोउणज्ज** ख। **भोअणऽज्ज** छ ठ॥ ४. **०ऐरण्यवत०** ख च॥ ५. **०सुखाभास** ख॥

**वि०टि०** Φ "**निर्भजना** निरंशोऽशः सत्कर्म" जै०वि०प०॥

निर्भजना, निश्चितो भाग इत्यर्थः । तथा हि– स्कन्धद्रव्यं देश-प्रदेशेन भिद्यमानं परमाण्वन्तं भेदं ददाति । परमाणुरपि एकगुणकृष्ण-द्विगुणकृष्णादिना अनन्तशोऽपि भिद्यमानो भेददायीति ।

गणनागुणो नाम **द्विकादिकः**[१], तेन च सुमहतोऽपि राशेः गणनागुणेन इयत्ता अवधार्यते इति ।

करणगुणो नाम **कलाकौशलम्** । तथा हि– उदकादौ करणपाटवार्थं गात्रोत्क्षेपादिकां क्रियां कुर्वन्तीति ।

अभ्यासगुणो नाम **भोजना**दिविषयः । तद्यथा– तदहर्जातबालकोऽपि [२]भवान्तराभ्यासात् स्तनादिकं मुख एव प्रक्षिपति उपरतरुदितश्च भवति । यदि वा[३] अभ्यासवशात् सन्तमसेऽपि कवलादेः मुखविवरप्रक्षेपाद् व्याकुलितचेतसोऽपि च तुदद्गात्रकण्डूयनमिति ।

गुणागुणो नाम[४] गुण एव कस्यचिद् अगुणत्वेन विपरिणमते, यथा– आर्जवोपेतस्य **ऋजुत्वा**ख्यो गुणो मायाविनः प्रति अगुणो भवति । उक्तं च–

**"शाठ्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवम्,**
**शूरे निर्घृणताऽऽर्जवे**[५] **विमतिता दैन्यं प्रियाभाषिणि ।**
**तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे,**
**तत् को नाम गुणो भवेत् स विदुषां यो दुर्जनैर्नाङ्कितः ॥" [नीतिशतक ५४]**

अगुणगुणो नाम अगुण एव कस्यचिद् गुणत्वेन विपरिणमते । स च **वक्र**विषयः, यथा–गौर्गलिः असञ्जातकिणस्कन्धो[६] गोगणस्य मध्ये सुखेनैव आस्ते । तथा च–

**"गुणानामेव दौरात्म्याद्**[७] **धुरि धुर्यो नियुज्यते ।**
**असञ्जातकिणस्कन्धः सुखं जीवति गौर्गलिः ॥"[ ]**

भवगुणो नाम भवन्ति=उत्पद्यन्ते तेषु तेषु स्थानेषु इति नारकादिः भवः, तत्र तस्य वा गुणः=भवगुणः । स च **जीव**विषयः, तद्यथा–नारकाः तीव्रतरवेदनासहिष्णवः तिलशः छिन्नसन्धानिनो अवधिमन्तश्च भवगुणादेव भवन्ति, तिर्यञ्चश्च सदऽसद्विवेकविकला अपि सन्तो गगनगमनलब्धिमन्तः, गवादीनां च तृणादिकमपि अशनं शुभानुभावेन[८] आपद्यते,

---

टि० १. **द्विकादिरूपः, तेन** ख ग च ॥ २. **भवाभ्यासात्** ख ॥ ३. **वाऽभ्यासात्** ख ॥ ४. **नाम तत्र गुण** क ग च ॥ ५. **निर्घृणता ऋजौ विम०** ग च ॥ ६. **०तकिणो गोगणस्य** ख ॥ ७. **दौर्जन्याद्** ख ग च ॥ ८. **शुक्लभावे०** घ ॥

मनुजानां च अशेषकर्मक्षयः, देवानां च सर्वशुभानुभावो भवगुणादेव इति ।

शीलगुणो नाम परैः[१] आक्रुश्यमानोऽपि शीलगुणादेव न क्रोधवशगो भवति । अथवा शब्दादिके शोभने अशोभने वा स्वभावादेव विदितवेद्यवत् माध्यस्थ्यं अवलम्बते ।

भावगुणो नाम भावाः=औदयिकादयः, तेषां गुणः=भावगुणः । स च जीवाऽजीवविषयः । तत्र जीवविषय औदयिकादिः षोढा । तत्र औदयिकः प्रशस्तोऽप्रशस्तश्च । तीर्थकरा-ऽऽहारकशरीरादिः प्रशस्तः; अप्रशस्तस्तु शब्दादिविषयोपभोग-हास्य-रत्य-रतीत्यादिः । औपशमिक उपशमश्रेण्यन्तर्गतायुष्कक्षयानुत्तरविमानप्राप्तिलक्षणः तथा सत्कर्मानुदयलक्षणश्च इति । क्षायिकभावगुणः चतुर्धा, तद्यथा—क्षीणसप्तकस्य पुनः मिथ्यात्वाऽगमनम् १, क्षीणमोहनीयस्य अवश्यम्भाविशेषघातिकर्मक्षयः २, क्षीणघातिकर्मणः अनावरणज्ञान-दर्शनाविर्भावः ३, अपगताशेषकर्मणो अपुनर्भवः तथा आत्यन्तिकैकान्तिकानाबाधपरमानन्दलक्षणसुखावाप्तिश्च इति ४। क्षायोपशमिकः क्षायोपशमिकदर्शनाद्यवाप्तिरिति । पारिणामिको भव्यत्वादिरिति । सान्निपातिकस्तु औदयिकादिपञ्चभावसमकालनिष्पादितः, तद्यथा—मनुष्यगत्युदयाद् औदयिकः, सम्पूर्णपञ्चेन्द्रियत्वावाप्तेः क्षायोपशमिकः, दर्शनसप्तकक्षयात् क्षायिकः, चारित्रमोहनीयोपशमाद् औपशमिकः, भव्यत्वात् पारिणामिक इति ।

उक्तो जीव(भाव)गुणः । साम्प्रतं अजीवभावगुणः, स च औदयिक-पारिणामिकयोः एव सम्भवति, नान्येषाम् । तत्र औदयिकः तावद् उदये भवः=औदयिकः, स च अजीवाश्रयोऽनया विवक्षया, यदुत काश्चित् प्रकृतयः पुद्गलविपाकिन्य एव भवन्ति । काः पुनः ताः ? उच्यन्ते—औदारिकादीनि शरीराणि पञ्च, षट् संस्थानानि, त्रीणि अङ्गोपाङ्गानि, षट् संहनननानि, वर्णपञ्चकम्, गन्धद्वयम्, पञ्च रसाः, अष्टौ स्पर्शाः, अगुरुलघुनाम उपघातनाम पराघातनाम उद्योतनाम आतपनाम निर्माणनाम प्रत्येकनाम साधारणनाम स्थिरनाम अस्थिरनाम शुभनाम अशुभनाम, एताः सर्वा अपि पुद्गलविपाकिन्यः सत्यपि जीवसम्बन्धित्वे पुद्गलविपाकित्वाद् आसामिति । पारिणामिको अजीवगुणस्तु द्वेधा— अनादिपारिणामिकः सादिपारिणामिकश्च इति । तत्र अनादिपारिणामिको धर्मा-ऽधर्मा-ऽऽकाशानां गति-स्थित्यवगाहलक्षणः, सादिपारिणामिकः तु अभ्रेन्द्रधनुरादीनां परमाणूनां च वर्णादिगुणान्तरापत्तिरिति गाथातात्पर्यार्थः ॥१८२॥

उक्तो गुणः । मूलनिक्षेपार्थमाह—

---

**टि०** १. **पैराक्रम्यमानोऽपि** क ॥

**[ नि० ]     मूले छक्कं [१]दव्वे ओदइ-उवएस-आइमूलं च ।**
**खेत्ते काले मूलं भावे मूलं भवे तिविहं ॥१८३॥**

**मूले छक्कं** गाहा । मूलस्य षोढा निक्षेपः नाम-स्थापना-द्रव्य-क्षेत्र-काल-भावभेदात् । नाम-स्थापने क्षुण्णे । द्रव्यमूलं ज्ञशरीर-भव्यशरीरव्यतिरिक्तं त्रिधा— औदयिकमूलं उपदेशमूलं आदिमूलं चेति । [२]तत्र औदयिकद्रव्यमूलं वृक्षादीनां मूलत्वेन परिणतानि यानि द्रव्याणि । उपदेशमूलं यत् चिकित्सको रोगप्रतिघातसमर्थं मूलमुपदिशति आतुराय इति, तच्च पिप्पलीमूलादिकम् । आदिमूलं नाम यद् वृक्षादिमूलोत्पत्तावाद्यं कारणम्, [३]तद् यत् स्थावरनामगोत्रप्रकृतिप्रत्ययाद् मूलनिर्वर्तनो[४]त्तरप्रकृतिप्रत्ययाच्च मूलमुत्पद्यते । एतदुक्तं भवति— तेषां औदारिकशरीरत्वेन मूलनिर्वर्तकानां पुद्गलानामुदयिष्यतां कार्मणं शरीरमाद्यं कारणम् । क्षेत्रमूलं यस्मिन् क्षेत्रे मूलमुत्पद्यते व्याख्यायते वा । एवं कालमूलमपि, यावन्तं वा कालं मूलमास्ते । भावमूलं तु त्रिधा इति गाथार्थः ॥१८३॥ [५]तदाह—

**[ नि० ]     [६]उदइय उवदि[७]ट्ठाई [८]आईयं मूलजीव ओदइयं ।**
**आयरिओ उवइट्ठा विणय-[९]कसायादओ आदी ॥१८४॥ दारं ॥**

**ओदइय** गाहा । भावमूलं त्रिविधं— औदयिकभावमूलं उपदेष्टृमूलं आदिमूलं चेति । तत्र औदयिकभावमूलं वनस्पतिकायमूलत्वमनुभवन् नाम-गोत्रकर्मोदयाद् **मूलजीवः** एव । उपदेष्टृभावमूलं तु **आचार्य उपदेष्टा** यैः कर्मभिः प्राणिनो मूलत्वेन उत्पद्यन्ते [१०]तेषामिति, मोक्ष-संसारयोर्वा यदादिभावमूलं तस्य चोपदेष्टा इति । एतदेव दर्शयति—'**विणय-कसायातिओ आई**' तत्र मोक्षस्य आदिमूलं ज्ञान-दर्शन-चारित्र-तप-औपचारिकरूपः पञ्चधा विनयः, तन्मूलत्वाद् मोक्षावाप्तेः । तथा चाह—

**''विणया नाणं नाणाउ दंसणं दंसणाहि चरणं [११]च ।**
**चरणाहिंतो मोक्खो मोक्खे सोक्खं अणाबाहं ॥''[                    ]**

**''विनयफलं शुश्रू[१२]षा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।**
**ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥**

---

टि० १. दव्वे उदए उव० ख ठ । दव्वे उदइय उव० ञ ॥ २. तच्चौदयिक० क ॥ ३. **यद् यत्** ख ॥ ४. ०त्तरोत्तरप्रकृति० कप्रतेर्विना ॥ ५. **तथा हि** ग च ॥ ६. **ओदइओ उवइट्ठा आतियं मूल०** क । **ओदइओ उवएसे आइ तियं मूल०** छ । **ओदइओ उवदिट्ठो आइ तियं मूलजीवि ओदइगं** ञ ॥ ७. **०ट्ठा आइ तियं मूल०** झ ॥ ८. **आईयं जीव मूलओ उदयं** ख ॥ ९. **०कसायादओ** झ ॥ १०. **तेषामपि** ग च ॥ ११. **ति** ख ग च । **तु** घ ङ ॥ १२. **०षा शुश्रूषायाः फलं** ग च ॥

**संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् ।**
**तस्मात् क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥**
**योगनिरोधाद् भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।**
**तस्मात् कल्याणानां सर्वेषां भाजनं विनयः ॥" [प्रशम० ७२-७४]** इत्यादि । संसारस्य तु आदिमूलं विषय-कषाया इति ॥१८४॥

मूलमुक्तम् । इदानीं स्थानस्य पञ्चदशधा निक्षेपमाह–

**[नि०] नामं ठवणा दविए खेत्तऽद्धा उड्ढ उवरई वसही ।**
**संजम पग्गह जोहे अचल गणण संधणा भावे ॥१८५॥**

**नामं ठवणा** गाहा । तत्र **द्रव्यस्थानं** ज्ञशरीर-भव्यशरीरव्यतिरिक्तं द्रव्याणां सचित्ता-ऽचित्त-मिश्राणां स्थानम्=आश्रयः ।

**क्षेत्रस्थानं भरता**दि ऊर्ध्वा-ऽधः-तिर्यग्लोकादि [1]वेति, यत्र वा क्षेत्रे स्थानं व्याख्यायत इति ।

**अद्धा**=कालः, तत्स्थानं द्विधा कायस्थिति-भवस्थितिभेदात् । तत्र कायस्थितिः पृथिव्यप्-तेजो-वायूनामसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, वनस्पतेस्तु ता एव अनन्ताः, विकलेन्द्रि[2]याणां सङ्ख्येया वर्षसहस्राः, पञ्चेन्द्रिय-तिर्यङ् -मनुजानां सप्ता अष्टौ वा भवाः । भवस्थितिस्तु वायूदक-वनस्पति-पृथिवीनां त्रि-सप्त-दश-द्वाविंशतिवर्षसहस्रात्मिका, तेजसः त्रीणि अहोरात्राणि, द्वीन्द्रियाणां शङ्खादीनां द्वादश वर्षाणि, त्रीन्द्रियाणां पिपीलिकादीनां एकोनपञ्चाशदहोरात्राणि, चतुरिन्द्रियाणां भ्रमरादीनां षण्मासाः, पञ्चेन्द्रियतिर्यङ् -मनुष्याणां त्रीणि पल्योपमानि, देवानां नारकाणां च कायस्थितेरभावाद् भवस्थितिः त्रयस्त्रिंशत्सागरोपमाणीति । इयमुत्कृष्टा द्विरूपाऽपि । जघन्या तु सर्वेषां अन्तर्मुहूर्तात्मिका, नवरं देव-नारकयोः दशवर्षसहस्राणीति । अथवा अद्धास्थानं समया-ऽऽवलिका-मुहूर्ता-ऽहोरात्र-पक्ष-मास-ऋतु-अयन-संवत्सर-युग-पल्योपम-सागरोपम-उत्सर्पिणी-अवसर्पिणी-पुद्गलपरावर्ता-ऽतीता-ऽनागत-सर्वाद्धारूपमिति ।

**उद्ध्वस्थानं** तु कायोत्सर्गादिकम्, अस्य उपलक्षणत्वाद् निषण्णादि अपि गृह्यते ।

**उपरतिः**=विरतिः, तत्स्थानं देशे सर्वत्र च श्रावक-साधुविषयम् ।

**वसतिस्थानं** यो यत्र ग्राम-गृहादौ वसति ।

---

**टि०** १. **चेति** कप्रतिमृते ॥ २. **०याणामसङ्ख्येया** ख-ङप्रती विना ॥

**'संयमस्थानं'** संयमः सामायिक-च्छेदोपस्थापनीय-परिहारविशुद्धि-सूक्ष्मसम्पराय-यथाख्यातरूपः[1], तस्य पञ्चविधस्यापि असङ्ख्येयानि संयमस्थानानि। कियदसङ्ख्येयं[2] इति चेत्, अतीन्द्रियत्वादर्थस्य न साक्षात् निर्देष्टुं शक्यते, आगमानुसारोपमया तूच्यते– इह एकसमयेन सूक्ष्माग्निजीवा असङ्ख्येयलोकाकाशप्रदेशप्रमाणाः उत्पद्यन्ते, तेभ्योऽग्निकायत्वेन परिणता असङ्ख्येयगुणाः, ततोऽपि तत्कायस्थितिः असङ्ख्येयगुणा, ततोऽपि अनुभागबन्धाध्यवसायस्थानानि असङ्ख्येयगुणानि, संयमस्थानान्यपि एतावन्त्येव इति सामान्यतः, विशेषतः तूच्यते– सामायिक-च्छेदोपस्थापनीय-परिहार-विशुद्धीनां प्रत्येकं असङ्ख्येयलोकाकाशप्रदेशतुल्यानि संयमस्थानानि, सूक्ष्मसम्परायस्य तु आन्तर्मौहूर्तिकत्वाद् अन्तर्मुहूर्तसमयतुल्यानि असङ्ख्येयानि संयमस्थानानि, यथाख्यातस्य तु एकमेव अजघन्योत्कृष्टं संयमस्थानम् । अथवा संयमश्रेण्यन्तर्गतानि संयमस्थानानि ग्राह्याणि, सा च अनेन क्रमेण भवति, तद्यथा– अनन्तचारित्रपर्यायनिष्पादितमेकं संयमस्थानम्, असङ्ख्येयसंयमस्थाननिर्वर्तितं कण्डकम्, तैश्च असङ्ख्येयैः जनितं षट्स्थानकम्, तदसङ्ख्येयात्मिका श्रेणीति ।

**प्रग्रहस्थानं** तु प्रकर्षेण गृह्यते वचोऽस्य इति प्रग्रहः, ग्राह्यवाक्यो नायक इत्यर्थः । स च लौकिको लोकोत्तरश्च, तस्य स्थानं=प्रग्रहस्थानम् । लौकिकं तावत् पञ्चविधम्, तद्यथा– राजा युवराजो महत्तरोऽमात्यः कुमारश्च इति । लोकोत्तरमपि पञ्चविधम्, तद्यथा– आचार्योपाध्याय-प्रवर्ति[3]-स्थविर-गणावच्छेदकभेदादिति ।

**योधस्थानं** पञ्चधा, तद्यथा[4]–आलीढ-प्रत्यालीढ-वैशाख-मण्डल-समपादभेदात् ।

**अचलस्थानं** तु चतुर्धा सादि-सपर्यवसानादिभेदात्, तद्यथा– सादिसपर्यवसानं परमाण्वादेः द्रव्यस्य एकप्रदेशादौ अवस्थानं जघन्यत एकं समयं उत्कृष्टतश्च असङ्ख्येयकालमिति, साद्यपर्यवसानं सिद्धानां भविष्यदद्धारूपं वा, अनादिसपर्यवसानं अतीताद्धारूपस्य[5], शैलेश्यवस्थान्त्यसमये कार्मण-तैजस-शरीर-भव्यत्वानां[6] चेति[7], अनाद्यपर्यवसानं धर्मा-ऽधर्मा-ऽऽकाशानामिति ।

**गणनास्थानम्** एक-द्व्यादिकं शीर्षप्रहेलिकापर्यन्तम् ।

**सन्धानस्थानं** द्विधा–द्रव्यतो भावतश्च । पुनरपि प्रत्येकं द्विधा, छिन्ना-ऽच्छिन्नभेदात् ।

---

टि० १. रूपः **पञ्चविधः, तस्य पञ्च०** ख ॥ २. **किं तदसङ्ख्यम् ?** ग च । **कियदसङ्ख्यम् ?** ङ विना ॥ ३. **०प्रवृत्ति०** ग च ॥ ४. **तद्यथा–लीढ-प्रत्या०** क ग च ॥ ५. **०रूपं शैले०** ख ॥ ६. **०भव्यसत्त्वानां** ग च ॥ ७. **वेति** ख-गप्रती ऋते ॥

तत्र द्रव्यच्छिन्नसन्धानं कञ्चुकादेः, अच्छिन्नसन्धानं तु पक्ष्मोत्पद्यमानतन्त्वादेरिति । भावसन्धानमपि प्रशस्ता-ऽप्रशस्तभेदाद् द्वेधा । तत्र प्रशस्ताच्छिन्नभावसन्धानं उपशम-क्षपकश्रेण्यावारोहतो जन्तोरपूर्वसंयमस्थानानि अच्छिन्नान्येव भवन्ति, श्रेणिव्यतिरेकेण वा प्रवर्धमानकण्डकस्येति । छिन्नप्रशस्तभावसन्धानं पुनरौपशमिकादिभावाद् औदयिकादि-भावान्तरगतस्य पुनरपि शुद्धपरिणामवतः [1]तत्रैव गमनम् । अप्रशस्ताच्छिन्नभावसन्धानं उपशमश्रेण्याः प्रतिपततो अविशुद्ध्यमानपरिणामस्य अनन्तानुबन्धि-मिथ्यात्वोदयं यावत्, उपशमश्रेणिमन्तरेणापि कषायवशाद् बन्धाध्यवसायस्थानानि उत्तरोत्तराणि [2]अवगाहमानस्य वा इति। अप्रशस्तच्छिन्नभावसन्धानं पुनरौदयिकभावाद् औपशमिकादिभावान्तरसङ्क्रान्तौ सत्यां [3]पुनस्तत्रैव गमनमिति । इह द्वारद्वयं यौगपद्येन व्याख्यातम् । तत्र सन्धानस्थानं द्रव्यविषयम्, इतरत् तु भावविषयमिति । उक्तं स्थानम् ॥१८५॥

अथवा भावस्थानं कषायाणां यत् स्थानं तदिह परिगृह्यते, तेषामेव जेतव्यत्वेन अधिकृतत्वात् । तेषां किं स्थानम् ? [4]यदाश्रित्य ते भवन्ति; शब्दादिविषयान् आश्रित्य च ते भवन्तीति दर्शयति—

**[ नि० ] पंचसु काम[5]गुणेसु य सद्द-प्फरिस-रस-रूव-गंधेसुं ।**
**जस्स कसाया [6]वट्टंति मूलट्ठाणं तु संसारे ॥१८६॥**

**पंचसु** गाहा । तत्र इच्छा-ऽनङ्गरूपः **कामः**, तस्य **गुणा** यान् आश्रित्य असौ चेतसो विकारमादर्शयति, ते च **शब्द-स्पर्श-रस-रूप-गन्धाः**, तेषु **पञ्चस्व**पि व्यस्तेषु समस्तेषु वा विषयभूतेषु **यस्य** जन्तोः विषयसुखपिपासोन्मुखस्य अपरमार्थदर्शिनः संसाराभिष्वङ्गिणो राग-द्वेषतिमिरोपप्लुतदृष्टेः मनोज्ञेतरविषयोपलब्धौ सत्यां **कषायाः वर्तन्ते**=प्रादुर्भवन्ति, तन्मूलश्च संसारपादपः प्रादुर्भवतीति, अतः शब्दादिविषयोद्भूतकषायाः **संसारे**=संसारविषयं **मूलस्थानमे**व इति । एतदुक्तं भवति—रागाद्युपहतचेताः परमार्थमजानानो अतत्स्वभावेऽपि तत्स्वभावारोपणेन अन्धादपि अन्धतमः कामी मोदते । यत आह—

**"दृश्यं वस्तु परं न पश्यति जगत्यन्धः पुरोऽवस्थितं,**
**रागान्धस्तु यदस्ति तत् परिहरन् यन्नास्ति तत् पश्यति ।**
**कुन्देन्दीवर-पूर्णचन्द्र-कलश-श्रीमल्लतापल्लवा-**
**नारोप्याशुचिराशिषु प्रियतमागात्रेषु यन्मोदते ॥"** [ ]

---

**टि०** १. तत्रैवागमनम् घ ङ ॥ २. **अवगाहत इति** क ॥ ३. **पुनस्त्रैव** क ॥ ४. **यदाश्रित्य च ते भवन्तीति । तद् दर्शयति** ग च ॥ ५. **०गुणेसू सद्द०** ख छ ज झ । **०गुणेसुं सद्द०** ञ ॥ ६. **वड्ढंति** ख ॥

द्वेषं वा कर्कशशब्दादौ व्रजतीति । ततश्च मनोज्ञेतरशब्दादिविषयाः कषायाणां मूलस्थानम्, ते च संसारस्य इति गाथातात्पर्यार्थः ॥१८६॥

यदि नाम शब्दादिविषयाः कषायाः, कथं तेभ्यः संसार ? इति, उच्यते—यतः कर्मस्थितेः कषाया मूलम्, साऽपि संसारस्य, संसारिणश्च अवश्यम्भाविनः कषाया इति । एतदेव आह—

[ नि० ]      **जह सव्वपायवाणं भूमीएँ पतिट्ठिताणि मूलाणि ।**
**इय कम्मपायवाणं संसारपइट्ठिया मूला ॥१८७॥**

**जह सव्वपायवाणं** गाहा । **यथा सर्वपादपानां भूमौ प्रतिष्ठितानि मूलानि** एवं **कर्मपादपानां** संसारे कषायरूपाणि **मूलानि प्रतिष्ठितानी**ति गाथार्थः ॥१८७॥

ननु च कथमेतत् श्रद्धेयं 'कर्मणः कषाया मूलम् ?' इति, उच्यते—यतो मिथ्यात्वाऽविरति-प्रमाद-कषाय-योगा बन्धहेतवः, तथा च आगमः—

**"जीवे णं भंते ! कइहिं ठाणेहिं णाणावरणिज्जं कम्मं बंधइ ? गोयमा ! दोहिं ठाणेहिं, तं जहा—रागेण य दोसेण य । रागे दुविहे ( पण्णत्ते, तं जहा )— माया लोभे य, दोसे दुविहे ( पण्णत्ते, तं जहा )— कोहे माणे य । एएहिं चउहिं ठाणेहिं [1]वीरिओवग्गहिएहिं णाणावरणिज्जं कम्मं बंधइ ।"** [ प्रज्ञा०सू०२३/१६९० ]

एवं अष्टानामपि कर्मणां योज्यमिति । ते च कषाया मोहनीयान्तःपातिना अष्टप्रकारस्य च कर्मणः कारणम् मोहनीयं कामगुणानां च दर्शयति—

[ नि० ]      **अट्ठविहकम्मरुक्खा सव्वे ते मोहणिज्जमूलागा ।**
**कामगुण[2]मूलिया वा तम्मूलागं च संसारो ॥१८८॥**

**अट्ठविहकम्मरुक्खा** गाहा । [3]यदवाचि प्राक्—'**इय कम्मपादवाणं**' तत्र कतिप्रकारास्ते कर्मपादपाः [4]किंकारणाश्च ? इति, उच्यते—**अष्टविधकर्मवृक्षाः, ते सर्वे**ऽपि **मोहनीयमूलाः** । न केवलं कषायाः, [5]कामगुणा अपि मोहनीयमूलाः, यस्माद् वेदोदयात् कामाः, वेदश्च मोहनीयान्तःपातीति, अतः **तत्** मोहनीयं **मूलम्** आद्यं कारणं यस्य संसारस्य स तथा, इति गाथार्थः ॥१८८॥

---

टि० १. वीरिओवगूहिएहिं ग घ ङ विना ॥ २. ०मूलगं वा ख । ०मूलियं वा छ ज । ०मूलियागं( वा? ) क झ ञ ठ ॥ ३. यदवादि च ॥ ४. किंकारणास्ते इति ग ॥ ५. कामगुणाश्च मोह० चपुस्तकमृते ॥

तदेवं पारम्पर्येण संसार-कषाय-कामानां कारणत्वाद् मोहनीयं प्रधानभावमनुभवति, तत्क्षये च अवश्यम्भावी कर्मक्षयः । तथा च अभाणि—

> **''जह मत्थयसूईए, हयाए हम्मई तलो ।**
> **तह कम्माणि हम्मंति मोहणिज्जे खयं गए ॥''** [      ]

तच्च द्विधा, दर्शन-चारित्रमोहनीयभेदात् । एतदेव आह—

[नि०] **दुविहो य होइ मोहो दंसणमोहो चरित्तमोहो य ।**
**कामा चरित्तमोहो तेणऽहिगारो इहं सुत्ते ॥१८९॥**

**दुविहो य होइ मोहो** गाहा । मोहनीयं कर्म द्विधा भवति—दर्शनमोहनीयं चारित्रमोहनीयं च, बन्धहेतोर्द्वैविध्यात् । तथा हि— अर्हत्-सिद्ध-चैत्य-तपः-श्रुत-गुरु-साधु-सङ्घप्रत्यनीकतया दर्शनमोहनीयं कर्म बध्नाति, येन च असौ अनन्तसंसारसमुद्रान्तःपात्येव अवतिष्ठते । तथा तीव्रकषाय-बहुराग-द्वेष-मोहाभिभूतः सन् देश-सर्वविरत्युपघाति चारित्रमोहनीयं कर्म बध्नाति । तत्र[1] अनन्तानुबन्धि-मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यक्त्वभेदात्[2] दर्शनमोहनीयं सप्तधा, तथा द्वादशकषाय-नवनोकषायभेदात् चारित्रमोहनीयमेकविंशतिधा । तत्र **कामाः** शब्दादयः पञ्च **चारित्रमोहः, तेन** चात्र **सूत्रेऽधिकारः**, यतः कषायाणां स्थानमत्र प्रकृतम्, तच्च शब्दादिकपञ्चगुणात्मकमिति गाथार्थः ॥१८९॥

तत्र चारित्रमोहनीयोत्तरप्रकृतिस्त्री-पुं-नपुंसकवेद-हास्य-रति[3]-लोभाश्रितकामाश्रयिणः[4] कषायाः संसारमूलस्य च कर्मणः प्रधानं कारणमिति प्रचिकटयिषुराह—

[नि०] **संसारस्स उ मूलं कम्मं तस्स वि य होंति य कसाया ।**

**संसारस्य उ मूलमित्यादि** । **संसारस्य**= नारक-तिर्यङ्-नरा-ऽमरगति-संसृतिरूपस्य कारणं अष्टप्रकारं **कर्म, तस्यापि** कर्मणः **कषायाः** क्रोधादयो निमित्तं **भवन्ति**, पूर्वार्द्धम् ।

तेषां च प्रतिपादितशब्दादिस्थानानां प्रचुरस्थानप्रतिपादनाय पुनरपि स्थानविशेषं गाथाशकलेन आह—

**ते सयण-पेस-अत्थाइएसु अज्झत्थओ य ठिया ॥१९०॥**

---

टि० १. तत्र मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यक्त्वभेदात् त्रिधा दर्शनमोहनीयम्, तथा षोडशकषाय-नवनोकषायभेदात् पञ्चविंशतिः[ ?तिधा ] चारित्रमोहनीयम् । तत्र कामाः च ॥ २. ०भेदात् सप्तधा दर्शनमोहनीयम्, तथा द्वादशकषाय-नवनोकषायभेदाद् एकविंशतिः [ ?तिधा ] चारित्रमोहनीयम् । तत्र कामाः ख ॥ ३. ०रति-अरति-लोभा० ग ॥ ४. ०श्रयिणः षे[ ?षो ]( डश ) कषायाः संसारमूलस्य च कर्मणो नव नोकषाय[ ?याः ] प्रधानं ग ॥

**ते सयणे**त्यादि । **स्वजनः** पूर्वा-ऽपरसंस्तुतो माता-पितृ-श्वशुरादिकः, **प्रेष्यः** भृत्यादिः, **अर्थः** धन-धान्य-कुप्य-वास्तु-रत्नभेदरूपः, ते स्वजनादयः कृतद्वन्द्वा आदिः येषां मित्रादीनां तेषु **स्थिताः** कषाया ⊕विषयरूपतया, **अध्यात्मनि च** Δविषयिरूपतया **प्रसन्नाः** द्वैकेन्द्रियादीनामिति गाथार्थः ॥१९०॥

तदेवं कषायस्थानप्रदर्शनेन सूत्रपदोपात्तं स्थानं परिसमाप्य तेषामेव कषायाणां सूत्रमूलपदोपात्तानां जेतव्यत्वाधिकृतानां निक्षेपमाह—

**[ नि० ]  नामं ठवणा दविए उप्पत्ती पच्चए य आएसे ।**
**रस भावकसाए य[1] को णय? कोहाइया चउरो ॥१९१॥**

**नामं ठवणा** गाहा । यथा भूतार्थनिरपेक्षमभिधानमात्रं **नाम** । सद्भावा-ऽसद्भावरूपा प्रतिकृतिः **स्थापना** कृतभीमभृकुट्युत्कटललाटघटितत्रिशूल-रक्तास्यनयन-सन्दष्टाधर-स्यन्दमानस्वेदΦसलिलचित्र-≠पुस्ताद्यक्ष-वराटकादिगता इति ।

**द्रव्य**कषाया ज्ञशरीर-भव्यशरीराभ्यां व्यतिरिक्ताः (द्वेधा)— कर्मद्रव्यकषायाः नोकर्मद्रव्यकषायाश्च इति । तत्र[2] आदित्सिता-ऽऽत्ता-ऽनुदीर्णोदीर्णाः पुद्गला द्रव्यप्राधान्यात्[3] कर्मद्रव्यकषायाः । नोकर्मद्रव्यकषायास्तु बिभीतकादयः ।

**उत्पत्ति**कषायाः शरीरोपधि-क्षेत्र-✡वास्तु-स्थाण्वादयो यदाश्रित्य तेषामुत्पत्तिः, तथा चोक्तम्—

**"किं एत्तो कट्ठयरं जं[4] मूढो थाणुयम्मि[5] आवडिओ ।**
**थाणुस्स[6] तस्स रूसई न अप्पणो दुप्पओगस्स ॥"** [ ]

**प्रत्यय**कषायाः— कषायाणां ये प्रत्ययाः=यानि बन्धकारणानि ते चेह मनोज्ञेतरभेदाः शब्दादयः, अत एव उत्पत्ति-प्रत्यययोः कार्य-कारणगतो भेदः । **आदेश**कषायाः कृत्रिम-कृतभृकुटीभङ्गादयः । रसतो **रस**कषायः[7] कटु-तिक्त-कषायपञ्चकान्तर्गतः[8] ।

भावकषायाः शरीरोपधि-क्षेत्र-वास्तु-स्वजन-प्रेष्या-ऽर्थादिनिमित्ताविर्भूताः शब्दा-

---

टि० १. **या तेण य** क ठ ॥ २. **तत्र आदित्सितानुदीर्णोदीर्णपुद्गला** ख ॥ ३. **द्रव्यप्राध[ ?थ ]म्यात्** क ॥ ४. **जह** ख ॥ ५. **खाणुयम्मि** ग घ ङ ॥ ६. **खाणुस्स** घ ॥ ७. **रसकषायाः** ग ॥ ८. **०कान्तर्गताः** ग ॥

**वि०टि०** ⊕ कषायनिष्ठविषयितानिरूपितविषयतासम्बन्धेन इत्यर्थः ॥ Δ कषायनिष्ठ-विषयितानिरूपितविषयतासम्बन्धेन इत्यभिप्रायः ॥ Φ "**सलिलचित्र** इति सद्भावस्थापना" जै०वि०प० ॥ ≠ "**पुस्तादि** इति असद्भावस्थापना" जै०वि०प० ॥ ✡ "**वास्तु** इति गृहम्" जै०वि०प० ॥

दिकामगुणकारणकार्यभूतकषायकर्मोदयाद् आत्मपरिणामविशेषाः क्रोध-मान-माया-लोभाः । ते च एकैकशो अनन्तानुबन्धि-अप्रत्याख्यान-प्रत्याख्यानावरण-सञ्ज्वलनभेदेन भिद्यमानाः षोडशविधा भवन्ति । तेषां च स्वरूपा-ऽनुबन्ध-फलानि गाथाभिरभिधीयन्ते, ताश्च इमाः—

**"जल-रेणु-पुढवि-पव्वयराईसरिसो चउव्विहो कोहो ।**
**तिणिसलया-कट्ठ-ऽट्ठिय-[1]सेलयथंभोवमो माणो ॥**

**मायावलेहि-गोमुत्ति-[2]मिंढसिंग-[3]घणवंसमूलसमा ।**
**लोहो [4]हलिद्द-खंजण-कद्दम-किमिरायसामाणो ॥**

**पक्ख-चउमास-वच्छर-जावज्जीवाणु[5]गामिणो कमसो ।**
**देव-नर-तिरिय-नारयगतिसाहणहेयवो भणिया ॥"** [**विशे०आ०भा०२९९०-९२**]

एषां च नामाद्यष्टविधकषायनिक्षेपाणां कतमो नयः [6]कमिच्छति ? इति, एतदभिधीयते—तत्र नैगमस्य सामान्य-विशेषरूपत्वाद् नैकगमत्वात् च तदभिप्रायेण सर्वेऽपि साधवो नामादयः, सङ्ग्रह-व्यवहारौ तु कषायसम्बन्धाभावाद् आदेश-समुत्पत्ती नेच्छतः, ऋजुसूत्रस्तु वर्तमानार्थनिष्ठत्वाद् आदेश-समुत्पत्ति-स्थापना नेच्छति, शब्दस्तु नाम्नोऽपि कथञ्चिद् भावान्तर्भावाद् नाम-भावाविच्छतीति गाथातात्पर्यार्थः ॥१९१॥

तदेवं कषायाः कर्मकारणत्वेन उक्ताः, तदपि संसारस्य, स च कतिविधः ? इति दर्शयति—

[नि०] **दव्वे खेत्ते काले भवसंसारे य भावसंसारे ।**
**पंचविहो संसारो [7]जत्थेते [8]संसरे जीवा ॥१९२॥**

[नि०] **[9]दव्व खेत्ते काले भवसंसारे य भावसंसारे ।**
**कम्मेण य संसारो तेणऽहिगारो इहं सुत्ते ॥१९३॥**

**दव्वे खेत्ते** गाहा । **द्रव्यसंसारो** व्यतिरिक्तो द्रव्यसंसृतिरूपः । **क्षेत्रसंसारो** येषु क्षेत्रेषु द्रव्याणि संसरन्ति । **कालसंसारः** यस्मिन् काल इति । नारक-तिर्यङ्-नरा-

---

टि० १. **०सेलत्थंभो०** कप्रतेर्विना ॥ २. **०मेंढसिंग०** ख च । **०मेंढिसिंग०** ग ॥ ३. **०घणवंसि०** घ ङ ॥ ४. **हलिद्द-कद्दम-खंजण-किमि०** खपुस्तकमृते ॥ ५. **०गामिणो भणिया** ख ॥ ६. **किमिच्छतीति** ग ॥ ७. **जत्थ य ते सं०** ज ॥ ८. **संसरंति जिया** ख ज झ ठ ॥ ९. गाथेयं क-छप्रत्योर्नोपलभ्यते । चूर्णि-वृत्तिकृद्भिरपीयं गाथा अविवृता, अतः प्रक्षिप्ता आभाति ॥

ऽमरगति-चतुर्विधानुपूर्व्युदयाद् [1]भवान्तरसङ्क्रमणं **भवसंसारः** । **भावसंसारस्तु** संसृतिस्वभावः औदयिकादिभावपरिणतिरूपः; तत्र च प्रकृति-स्थिति-अनुभाव-प्रदेशबन्धानां प्रदेश-विपाकानुभवनम् । एवं द्रव्यादिकः **पञ्चविधः संसारः** । अथवा द्रव्यादिकश्चतुर्धा संसारः, तद्यथा—अश्वाद् हस्तिनम्, ग्रामाद् नगरम्, वसन्ताद् ग्रीष्मम्, औदयिकाद् औपशमिकं इति गाथार्थः ॥१९२॥

तस्मिंश्च संसारे कर्मवशगाः प्राणिनः संसरन्तीति अतः कर्मनिदर्शनार्थं आह—

[ नि० ] **णामं ठवणा[2]कम्मं च दव्वकम्मं पओगकम्मं च ।**
**[3]समुयाण रियावहियं आहाकम्मं तवोकम्मं ॥१९४॥**

[ नि० ] **किइकम्म भावकम्मं [4]दसविह कम्मं समासओ होइ ।**
**अट्ठविहेण उ कम्मेण एत्थ होई अहीयारो ॥१९५॥**

**नामं ठवणा** गाहा, **किइकम्म** गाहा । **नामकर्म** कर्मार्थशून्यं अभिधानमात्रम् । **स्थापनाकर्म** पुस्तक-पत्रादौ कर्मवर्गणानां सद्भावा-ऽसद्भावरूपा स्थापना ।

**द्रव्यकर्म** व्यतिरिक्तं द्विधा—द्रव्यकर्म नोद्रव्यकर्म च । तत्र द्रव्यकर्म कर्मवर्गणान्तःपातिनः पुद्गलाः बन्धयोग्या बध्यमाना बद्धाश्च अनुदीर्णा इति । नोद्रव्यकर्म कृषीवलादिकर्म । अथ कर्मवर्गणान्तःपातिनः पुद्गला द्रव्यकर्म इति अवाचि, काः पुनस्ताः वर्गणाः ? इति, सङ्कीर्त्यन्ते— इह वर्गणाः सामान्येन चतुर्विधाः, द्रव्य-क्षेत्र-काल-भावभेदात् । तत्र द्रव्यत एक-द्व्यादि-सङ्ख्येया-ऽसङ्ख्येया-ऽनन्तप्रदेशिकाः, क्षेत्रतोऽवगाढद्रव्यैक-द्व्यादि-सङ्ख्येया-ऽसङ्ख्येयप्रदेशात्मिकाः, कालत एक-द्व्यादि-सङ्ख्येया-ऽसङ्ख्येय-समयस्थितिकाः, भावतो रूप-रस-गन्ध-स्पर्शस्वगतभेदात्मिकाः सामान्यतः । विशेषतस्तु [5]उच्यन्ते—

तत्र परमाणूनां एका वर्गणा, एवं एकैकपरमाणूपचयात् सङ्ख्येयप्रदेशिकानां स्कन्धानां सङ्ख्येयाः, असङ्ख्येयप्रदेशिकानां असङ्ख्येयाः, एताश्च औदारिकादिपरिणामा-ऽग्रहणयोग्याः । अनन्तप्रदेशिकानामपि अनन्ता अग्रहणयोग्याः, ता उल्लङ्घ्य औदारिकग्रहण-योग्यास्तु अनन्तानन्तप्रदेशिकाः खल्वनन्ता एव भवन्ति । तत्र [Φ]अयोग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते औदारिकशरीरग्रहणयोग्या जघन्या वर्गणा भवति, पुनरेकैकप्रदेशवृद्ध्या प्रवर्धमाना

---

टि० १. भवान्तरसंसरणं ख ॥ २. **०कम्मं दव्वं कम्मं** ज झ ॥ ३. **समुयाणिरियावहियं** ञ ॥ ४. **दसविहमेयं समा०** ञ ॥ ५. **उच्यते** ख ङ ॥

वि०टि० Φ "**अयोग्य** इति ग्रहणयोग्यवर्गणाभावात्" जै०वि०प० ॥

औदारिकयोग्योत्कृष्टवर्गणां यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः को विशेषः ?, जघन्यातः उत्कृष्टा विशेषाधिकाः, विशेषस्तु अस्या एव औदारिकजघन्यवर्गणाया अनन्तभागः, तस्य चानन्तपरमाणुमयत्वाद् एकैकोत्तरप्रदेशोपचये सत्यपि औदारिकयोग्य-[1]वर्गणानां जघन्योत्कृष्टमध्यवर्तिनीनां आनन्त्यम् ।

तत औदारिकयोग्योत्कृष्टवर्गणायां रूपप्रक्षेपेण अयोग्यवर्गणा जघन्या [2]भवति, एताः अपि एकैकप्रदेशवृद्ध्या उत्कृष्टान्ता अनन्ता भवन्ति । जघन्योत्कृष्टवर्गणानां को विशेषः ?, जघन्याभ्योऽसङ्ख्येयगुणा उत्कृष्टाः, ताश्च बहुप्रदेशत्वाद् अतिसूक्ष्मपरिणामत्वाच्च औदारिकस्य अनन्ता एव अग्रहणयोग्या भवन्ति, अल्पप्रदेशत्वाद् बादरपरिणामत्वाच्च वैक्रियस्यापीति । अत्र च यथा यथा प्रदेशोपचयः तथा तथा विश्रसापरिणामवशाद् वर्गणानां सूक्ष्मतरत्वमवसेयम् ।

एतदेव उत्कृष्टोपरि रूपप्रक्षेपयोग्यायोग्यादिकं वैक्रियशरीरवर्गणानां जघन्योत्कृष्ट-विशेषलक्षणं चावसेयम्; तथा वैक्रिया-ऽऽहारकान्तरालवर्त्ययोग्यवर्गणानां जघन्यो-त्कृष्टविशेषासङ्ख्येयगुणत्वमिति । पुनरपि अयोग्यवर्गणोपरि रूपप्रक्षेपाद् जघन्या-हारकशरीरयोग्यवर्गणा भवन्ति, ताश्च प्रदेशवृद्ध्या वर्धमाना उत्कृष्टां यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः कियदन्तरं इति, उच्यते—जघन्याभ्य उत्कृष्टा विशेषाधिकाः । को विशेषः ? इति चेत्, जघन्यवर्गणाया एवानन्तभागः, तस्यापि अनन्तपरमाणुत्वाद् आहारकशरीरयोग्यवर्गणानां प्रदेशोत्तरवृद्धानां आनन्त्यमिति भावना ।

तस्यामेव उत्कृष्टवर्गणायां रूपे प्रक्षिप्ते जघन्या आहारकाग्रहणवर्गणाः, ततः प्रदेशवृद्ध्या वर्धमाना उत्कृष्टां यावदनन्ता एव, आहारकस्य सूक्ष्मत्वाद् [3]बहुप्रदेशत्वाच्च अयोग्या भवन्ति, बादरत्वाद् अल्पप्रदेशत्वाच्च तैजसस्येति । जघन्योत्कृष्टयोः कियदन्तरमिति ? उच्यते—जघन्याभ्य उत्कृष्टा अनन्तगुणाः, केन गुणकारेण ? इति चेत्, अभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभाग इति । तदुपरि रूपे प्रक्षिप्ते तैजसशरीरवर्गणा जघन्याः, एता अपि प्रदेशवृद्ध्या वर्धमाना उत्कृष्टां यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः [4]कियदन्तरम् ?, जघन्याभ्य उत्कृष्टा विशेषाधिकाः, विशेषस्तु जघन्यवर्गणानन्तभागः, तस्यापि अनन्तप्रदेशत्वाद् जघन्योत्कृष्टान्तरालवर्गणानां आनन्त्यं भवति ।

---

टि० १. **०वर्गणानामजघन्यो०** ख ॥ २. **भवन्ति** ग च ॥ ३. **बहुतरप्रदेशत्वा०** घ ङ । **०त्वाच्चायोग्या एव भवन्ति** च ॥ ४. **कियदन्तरं भवति ? जघ०** घ ङ ॥

तैजसोत्कृष्टवर्गणोपरि रूपे प्रक्षिप्ते सत्यग्रहणवर्गणा भवन्ति । एवं एकादिवृद्ध्या उत्कृष्टान्ता अनन्ताः,ताश्च अतिसूक्ष्मत्वाद् बहुप्रदेशत्वाच्च तैजसस्य अग्रहणयोग्याः, बादरत्वाद् अल्पप्रदेशत्वाच्च भाषाद्रव्यस्य अपीति । जघन्योत्कृष्टयोरनन्तगुणत्वेन विशेषः, गुणकारश्च अभव्येभ्यो अनन्तगुणः सिद्धानामनन्तभाग इति । तस्यां योग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते जघन्या भाषाद्रव्यवर्गणा भवति । तस्याश्च प्रदेशवृद्ध्या उत्कृष्टवर्गणापर्यन्तानि अनन्तानि स्थानानि भवन्ति । जघन्योत्कृष्टयोः विशेषो जघन्यवर्गणानन्तभागाधिकोत्कृष्टवर्गणा भवति । अत्रापि अनन्तभागस्य अनन्तपरमाण्वात्मकत्वाद् भाषाद्रव्ययोग्यवर्गणानां आनन्त्यं अवसेयम् ।

तदनेन एकादि[1]प्रदेशवृद्धिप्रक्रमेण अयोग्यवर्गणानां जघन्योत्कृष्टादिकं ज्ञातव्यम्, नवरं जघन्योत्कृष्टयोः भेदोऽयम्—अभव्यानन्तगुणः सिद्धानन्तभागात्मकः । तासां च पूर्वहेतुकदम्बकादेव भाषाद्रव्या-ऽऽनापानद्रव्ययोः अयोग्यत्वमवसेयम् । अयोग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते आनापानवर्गणा जघन्या । ततो रूपोत्तरवृद्ध्या उत्कृष्टवर्गणान्ता अनन्ता भवन्ति । जघन्यातः उत्कृष्टा जघन्यानन्तभागाधिका ।

तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदेन अग्रहणवर्गणा, विशेषस्तु अभव्येभ्यो अनन्तगुणः सिद्धानामनन्तभागः । पुनरपि अयोग्योत्कृष्टवर्गणोपरि [2]प्रदेशादिवृद्ध्या जघन्योत्कृष्टभेदा मनोद्रव्यवर्गणा, जघन्यवर्गणानन्तभागो विशेषः ।

पुनरपि [3]प्रदेशोत्तरवृद्ध्या क्रमेण अग्रहणवर्गणा, विशेषश्च अभव्यानन्तगुणादिकः । ताश्च प्रदेशबहुत्वाद् अतिसूक्ष्मत्वाच्च मनोद्रव्यायोग्याः, अल्पप्रदेशत्वाद् बादरत्वाच्च कार्मणस्यापि । तदुपरि रूपे प्रक्षिप्ते जघन्याः कार्मणशरीरवर्गणाः । पुनरपि एकैकप्रदेशवृद्ध्या वर्धमाना उत्कृष्टां यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः कः प्रतिविशेषः ? इति उच्यते— जघन्यवर्गणानन्तभागाधिकोत्कृष्टवर्गणा, स च अनन्तभागो अनन्तानन्तपरमाण्वात्मकः अत [4]एव अनन्तानन्तभेदभिन्नाः कर्मद्रव्यवर्गणा एवं भवन्ति । आभिश्च अत्र प्रयोजनम्[5], द्रव्यकर्मणो व्याचिख्यासितत्वादिति ।

शेषा अपि वर्गणाः क्रमायाता विनेयजनानुग्रहार्थं व्युत्पाद्यन्ते—

पुनरपि उत्कृष्टकर्मवर्गणोपरि रूपादिप्रक्षेपेण जघन्योत्कृष्टभेदभिन्ना ध्रुववर्गणाः, जघन्याच्च उत्कृष्टाः सर्वजीवेभ्योऽनन्तगुणाः । तदुपरि रूपप्रक्षेपादिक्रमेण अनन्ता एव

---

**टि०** १. ०**प्रदेशविधिप्रक्रमणा०** क ॥ २. **प्रदेशवृद्ध्या** ग ॥ ३. **प्रदेशोत्तरक्रमेणा०** खप्रतिमृते ॥ ४. **एवानन्तभेद०** ग च ॥ ५. **०म्, कर्मद्रव्यस्या[ ?स्य ] व्याचि०** ग ॥

जघन्योत्कृष्टभेदा अध्रुववर्गणाः, अध्रुवत्वाद् अध्रुवाः, पाक्षिकसद्भावाद् अध्रुवत्वम्, जघन्यो[१]त्कृष्टभेदोऽनन्तरोक्त एव । तदुत्कृष्टोपरि रूपादिप्रवृद्ध्या जघन्योत्कृष्टभेदा अनन्ता एव Φशून्यवर्गणा भवन्ति, जघन्यो[२]त्कृष्टविशेषः पूर्ववत्, तासां संसारेऽप्यभावात् शून्यवर्गणा इत्यभिधानम् । एतदुक्तं भवति—अध्रुववर्गणोपरि प्रदेशवृद्ध्याऽनन्ता अपि न सम्भवन्तीति प्रथमा शून्यवर्गणा ।

तदुपरि रूपादिवृद्ध्या जघन्योत्कृष्टभेदाः प्रत्येकशरीरवर्गणा भवन्ति, जघन्यातः क्षेत्रपल्योपमासङ्ख्येय[३]भागगुणोत्कृष्टा । तदुपरि रूपोत्तरादिवृद्ध्या जघन्योत्कृष्टभेदा अनन्ता एव शून्यवर्गणा भवन्ति, जघन्य[४]वर्गणातः उत्कृष्टा तु असङ्ख्येये[५]लोकासङ्ख्येय-भागप्रदेशगुणा, तदसङ्ख्येयभागोऽपि असङ्ख्येये[६]लोकात्मक इति द्वितीया शून्यवर्गणा । तदुपरि रूपादिवृद्ध्या बादरनिगोदशरीरवर्गणा, जघन्यातः क्षेत्रपल्योपमासङ्ख्येय-भागप्रदेशगुणोत्कृष्टा । तदुपरि [७]रूपादिवृद्ध्या जघन्योत्कृष्टभेदा तृतीया शून्यवर्गणा, उत्कृष्टा जघन्यातः असङ्ख्येयगुणा । को गुणकारः? इति, उच्यते—अङ्गुलासङ्ख्येयभागप्रदेशराशेः आवलिकाकालासङ्ख्येयभागसमयप्रमाणकृतपौनःपुन्यवर्गमूलस्य असङ्ख्येयभाग-[८]प्रदेशप्रमाण इति ।

तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदा सूक्ष्मनिगोदशरीरवर्गणा, जघन्यातः उत्कृष्टा आवलिकाका[९]लासङ्ख्येयभागसमयगुणा । तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदा चतुर्थी शून्यवर्गणा, जघन्यातः उत्कृष्टा चतुरस्रीकृतलोकस्य असङ्ख्येयाः श्रेण्यः, ताश्च प्रतरा-सङ्ख्येयभागतुल्या इति ।

तदुपरि रूपादिवृद्ध्या जघन्योत्कृष्टभेदा महास्कन्धवर्गणा, जघन्यातः उत्कृष्टा क्षेत्रपल्योपमस्य ⊕असङ्ख्येयगुणा सङ्ख्येयगुणा [१०]वेति । उक्ताः समासतो वर्गणाः, विशेषार्थिना तु Δ**कर्मप्रकृति**रवलोकनीयेति ।

साम्प्रतं **प्रयोगकर्म**, वीर्यान्तरायक्षयोपशमाविर्भूतवीर्येण आत्मना प्रकर्षेण युज्यत इति प्रयोगः । स च मनो-वाक्-कायलक्षणः पञ्चदशधा । कथम् ? इति, उच्यते—तत्र

---

**टि०** १. **०त्कृष्टभेदभिन्ना अध्रु०** ङ ॥ २. **०त्कृष्टभेदः पू०** ख ॥ ३. **०भागप्रदेशगुणो०** ग ङ च ॥ ४. **०वर्गणा तदुत्कृष्टा** क ॥ ५. **०यभाग०** घ च ॥ ६. **०यप्रदेशात्मक इति** ग ॥ ७. **रूपोत्तरादिवृद्ध्या** ग ॥ ८. **०प्रदेशपरिमाण** ख ॥ ९. **०लसङ्ख्येय०** घ ङ ॥ १०. **चेति** क ख ग ॥

**वि०टि०** Φ "**शून्यवर्गणा** इति परिणामपरिणताः कदाचिन्न प्राप्यन्ते" जै०वि०प० ॥ ⊕ **कर्मप्रकृतौ** तु गुणाकारोऽसङ्ख्येयगुण एव दर्शित इत्यवधेयम्; दृश्यतां **बन्धनकरणं** गा०२०॥ Δ दृष्टव्यं **कर्मप्रकृतौ** बन्धनकरणं गा०१८-२०॥

मनोयोगः सत्या-ऽसत्य-मिश्रा-ऽनुभयरूपश्चतुर्धा, एवं वाग्योगोऽपि, काययोगः सप्तधा औदारिक-औदारिकमिश्र-वैक्रिय-वैक्रियमिश्रा-ऽऽहारका-ऽऽहारकमिश्र-कार्मणयोगभेदात् । तत्र मनोयोगो मनःपर्याप्त्या पर्याप्तस्य मनुष्यादेः । वाग्योगो द्वीन्द्रियादीनाम् । औदारिक-योगः तिर्यङ्-मनुजयोः शरीरपर्याप्तेः ऊर्ध्वम् । तदारतस्तु मिश्रः, केवलिनो वा समुद्घातगतस्य द्वितीय-षष्ठ-सप्तमसमयेषु । वैक्रियकाययोगो देव-नारक-बादरवायूनाम्, अन्यस्य वा वैक्रियलब्धिमतः । तन्मिश्रस्तु देव-नारकयोरुत्पत्तिसमये, अन्यस्य वा वैक्रियं निर्वर्तयतः । आहारककाययोगश्चतुर्दशपूर्वविद आहारकशरीरस्थस्य । तन्मिश्रस्तु निर्वर्तना-काले । कार्मणयोगो विग्रहगतौ केवलिसमुद्घाते वा तृतीय-चतुर्थ-पञ्चमसमयेषु इति । तदनेन पञ्चदशविधेनापि योगेन आत्मा अष्टौ प्रदेशान् विहाय उत्तप्तभाजनोदकवद् उद्वर्तमानैः सर्वैरेव आत्मप्रदेशैः आत्मप्रदेशावष्टब्धाकाशदेशस्थं कार्मणशरीरयोग्यं कर्मदलिकं यद् बध्नाति तत् प्रयोगकर्म्म इत्युच्यते । उक्तं च–

**"जाव णं एस जीवे एयइ वेयइ चलइ फंदईत्यादि ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, नो णं अबंधए ।"**

**[ व्या०प्रज्ञ०३/४/१५२ ]**

**समुदानकर्म–** सम्पूर्वात् आङ्पूर्वात् च ददातेः ल्युडन्तात् पृषोदरादिपाठेन आकारस्य उकारादेशेन रूपं भवति । तत्र प्रयोगकर्मणा एकरूपतया गृहीतानां कर्मवर्गणानां सम्यग् = मूल-उत्तरप्रकृति-स्थिति-अनुभव-प्रदेशबन्धभेदेन आङ्=मर्यादया देश-सर्वोपघातिरूपतया तथा स्पृष्ट-निधत्त-निकाचितावस्थया च स्वीकरणं=समुदानम्, तदेव कर्म=**समुदानकर्म** । तत्र मूलप्रकृतिबन्धः ज्ञानावरणीयादिः । उत्तरप्रकृतिबन्धस्तु उच्यते–

उत्तरप्रकृतिबन्धो ज्ञानावरणीयं पञ्चधा मति-श्रुता-ऽवधि-मनःपर्यायकेवलावरणभेदात् । तत्र केवलावारकं सर्वघाति; शेषाणि[1] देशघातीन्यपि[2] । दर्शनावरणीयं नवधा निद्रापञ्चक-दर्शनचतुष्टयभेदात् । तत्र निद्रापञ्चकं प्राप्तदर्शनलब्ध्युपयोगोपघातकारि; दर्शनचतुष्टयं तु दर्शनलब्धिप्राप्तेरेव । अत्रापि केवलदर्शनावरणं सर्वघाति; शेषाणि तु देशतः । वेदनीयं द्विधा साता-ऽसातभेदात् । मोहनीयं द्विधा दर्शन-चारित्रभेदात् । तत्र दर्शनमोहनीयं[3] सप्तधा

---

टि० १. **शेषाणि सर्वाणि तु देश०** ख ॥ २. **देश-सर्वघातीन्यपि** ग च ॥ ३. **दर्शनमोहनीयं त्रिधा-मिथ्यात्वादिभेदात्, बन्धतस्त्वेकविधम् । चारित्रमोहनीयं षोडशकषाय-नवनोकषायभेदात् पञ्चविंशतिविधम् । अत्रापि** ख च, "**पाठान्तरे–दर्शनमोहनीयं सप्तधा-अनन्तानुबन्धिमिथ्यात्वादिभेदात्, बन्धतस्तु पञ्चधा । चारित्रमोहनीयं द्वादशकषाय-नवनोकषायभेदाद् एकविंशतिविधम् ।**" खपुस्तके टिप्पणी ॥

अनन्तानुबन्धि-मिथ्यात्वादिभेदात्, बन्धतस्तु ≠पञ्चधा । चारित्रमोहनीयं द्वादशकषाय-नवनोकषायभेदाद् एकविंशतिविधम् । अत्रापि मिथ्यात्वं सञ्ज्वलनवर्जा द्वादशकषायाश्च सर्वघातिन्यः; शेषास्तु देशघातिन्य इति । आयुष्कं चतुर्धा नारकादिभेदात् । नाम द्विचत्वारिंशद्भेदं गत्यादिभेदात्, त्रिनवतिभेदं च उत्तरोत्तरप्रकृतिभेदात् । गतिश्चतुर्धा, जातिरेकेन्द्रियादिभेदात् पञ्चधा, शरीराणि औदारिकादिभेदात् पञ्चधा, औदारिक-वैक्रिया-ऽऽहारकभेदाद् अङ्गोपाङ्गं त्रिधा, निर्माणनाम सर्वजीवशरीरावयवनिष्पादकं एकधा, बन्धननाम औदारिकादिकर्मवर्गणैकत्वापादकं पञ्चधा,[1] सङ्घातनाम औदारिकादिकर्मवर्गणा-रचनाविशेषसंस्थापकं पञ्चधा, संस्थाननाम समचतुरस्रादि षोढा, संहनननाम वज्रऋषभ-नाराचादि[2] षोढैव, स्पर्शोऽष्टधा, रसः पञ्चधा, गन्धो द्विधा, वर्णः पञ्चधा, आनुपूर्वी नरकादिश्चतुर्धा, विहायोगतिः प्रशस्ता-ऽप्रशस्तभेदाद् द्विधा, अगुरुलघु-उपघात-पराघात-आतप-उद्द्योत-उच्छ्वास-प्रत्येक-साधारण-त्रस-स्थावर-शुभा-ऽशुभ-सुभग-दुर्भग-सुस्वर-दुःस्वर-सूक्ष्म-बादर-पर्याप्तका-ऽपर्याप्तक-स्थिरा-[3]ऽस्थिरा-ऽऽदेया-ऽनादेय-यशःकीर्ति-अयशःकीर्ति-तीर्थकरनामानि प्रत्येकं एकविधानीति । गोत्रं उच्च-नीचभेदाद् द्विधा । अन्तरायं दान-[4]लाभ-भोग-उपभोग-वीर्यभेदात् पञ्चधेति । उक्तः प्रकृतिबन्धः । बन्धकारणानि तु गाथाभिरुच्यन्ते—

**"पडिणीयमंतराइय [5]उवघाए तप्पओस निण्हवणे ।**
**आवरण[6]दुगं भूओ बंधइ अच्चासणाए य ॥**
**भूयाणुकंप-वय-जोगउज्जओ खंति-दाण-गुरुभत्तो ।**
**बंधइ भूओ सायं विवरीए बंधए इयरं ॥**
**अरहंत-सिद्ध-चेइय-तव-सुय-गुरु-संघ-साहुपडणीओ ।**
**बंधइ दंसणमोहं अणंतसंसारिओ जेण ॥**
**तिव्वकसातो बहुमोह[7]परिणओ राग-दोससंजुत्तो ।**
**बंधइ चरित्तमोहं दुविहं पि चरित्तगुणघाइ ॥**
**मिच्छद्दिट्ठी महरंभपरिगहो तिव्वलोभ [8]णिस्सीलो ।**
**निरयाउयं निबंधइ पावमई रोद्दपरिणामो ॥**

---

टि० १. ०दिभेदात् षो० ख ॥ २. ०दिभेदात् षो० ख ॥ ३. ०स्थिरत्वा-ऽऽदे० च ॥ ४. ०लाभ-वीर्य-भोग-उपभोगभेदात् ख ॥ ५. उवघाइय तप्प० ख ॥ ६. ०दुगं बंधइ भूओ अच्चा० ग विना ॥ ७. ०परिगओ क ॥ ८. मस्सीलो क ॥

वि०टि० ≠ "पञ्चधि( धा? ) रि(इ)ति सम्यक्त्व-मिश्रयोर्बन्धाभावात्" जै०वि०प० ॥

उम्मग्गदेसओ मग्गणासओ गूढहियय माइल्लो ।
सढसीलो य ससल्लो तिरियाउं बंधए जीवो ॥
पयईऍ तणुकसाओ दाणरओ सील-संजमविहूणो ।
मज्झिमगुणेहिं[1] जुत्तो मणुयाउं बन्धए जीवो ॥
अणुवय-महव्वएहिं[2] बालतवाऽकाममनिज्जराए[3] य ।
देवाउयं निबंधइ सम्मद्दिट्ठी उँ[4] जो जीवो ॥
मण-वयण-कायवंको मातिल्लो गारवेहिँ पडिबद्धो ।
असुहं बंधइ नामं तप्पडिवक्खेहिँ सुहनामं ॥
अरहंताइसु भत्तो सुत्तरुई पयणुमाण गुणपेही ।
बन्धइ उच्चागोयं विवरीए बंधए इयरं ॥
पाणवहादीसु रत्तो जिणपूया-मोक्खमग्गविग्घयरो[5] ।
अज्जेइ अंतरायं ण लहइ जेणिच्छियं लाभं ॥" [प्राची०शतककर्म०१६-२६]

स्थितिबन्धो मूलोत्तरप्रकृतीनां उत्कृष्ट-जघन्यभेदः । तत्र उत्कृष्टे मूलप्रकृतीनां ज्ञानावरणीय-दर्शनावरणीय-वेदनीया-ऽन्तरायाणां त्रिंशत्सागरोपमकोटीकोट्यः[6] । यस्य च यावन्त्यः कोटीकोट्यः स्थितिः तस्य तावन्त्येव वर्षशतानि अबाधा, तदुपरि प्रदेशतो विपाकतो वा अनुभवः । एतदेव प्रतिकर्मस्थिति योजनीयम् । सप्ततिर्मोहनीयस्य, नाम-गोत्रयोः विंशतिः, त्रयस्त्रिंशत्सागरोपमाणि [Φ] आयुषः पूर्वकोटीत्रिभागोऽबाधा । जघन्यः—ज्ञान-दर्शनावरण-मोहनीया-ऽन्तरायाणां अन्तर्मुहूर्त्तः[7], नाम-गोत्रयोः अष्टौ मुहूर्त्ताः, वेदनीयस्य द्वादश, आयुषः क्षुल्लकभवः, स चानापानसप्तदशभागः ।

साम्प्रतं एतदेव बन्धद्वयं उत्तरप्रकृतीनां उच्यते—

तत्र उत्कृष्टे मति-श्रुता-ऽवधि-मनःपर्याय-केवलावरण-निद्रापञ्चक-चक्षुर्दर्शनादि-चतुष्का-ऽसद्वेद्य-दानाद्यन्तरायपञ्चकभेदानां विंशतः उत्तरप्रकृतीनां त्रिंशत्सागरोपमकोटी-कोट्यः, स्त्रीवेद-सातवेदनीय-मनुजगत्यानुपूर्वीणां चतसृणां पञ्चदश, मिथ्यात्वस्यौधिक-मोहनीयवत्, कषायषोडशकस्य चत्वारिंशत् कोटीकोट्यः, नपुंसकवेदा-ऽरति-शोक-भय-जुगुप्सा-नरक-तिर्यग्गति-एकेन्द्रिय-पञ्चेन्द्रिय-जाति-औदारिक-वैक्रियशरीर-तदङ्गोपाङ्गद्वय-

---

टि० १. ०गुणेसु क ॥ २. ०महव्वएहिँ य बाल० घ ङ च ॥ ३. बालतवोऽकाम० च ॥ ४. य ग ॥ ५. ०विग्घपरो ग ॥ ६. कोटिकोट्यः ङ ॥ ७. अन्तर्मुहूर्त्तम् ख ग च ॥

वि०टि० Φ "आयुषः इति पूर्वकोटीत्रिभागसमन्वितानि" जै०वि०प० ॥

तैजस-कार्मण-हुण्डसंस्थाना-ऽन्त्यसंहनन-वर्ण-गन्ध-रस-स्पर्श-नरकानुपूर्वी-तिर्यगानुपूर्वी-अगुरुलघु-उपघात-पराघात-उच्छ्वासा-ऽऽतप-उद्द्योता-ऽप्रशस्तविहायोगति-त्रस-स्थावर-बादर-पर्याप्तक-प्रत्येका-ऽस्थिरा-ऽशुभ-दुर्भग-दुःस्वरा-ऽनादेया-ऽयशःकीर्ति-नीचैर्गोत्र-निर्माणरूपाणां त्रिचत्वारिंशत उत्तरप्रकृतीनां विंशतिः, पुंवेद-हास्य-रति-देवगत्यानुपूर्वीद्वया-ऽऽद्यसंस्थान-संहनन-प्रशस्तविहायोगति-स्थिर-शुभ-सुभग-सुस्वरा-ऽऽदेय-यशःकीर्ति-उच्चैर्गोत्ररूपाणां पञ्चदशानां उत्तरप्रकृतीनां दश, न्यग्रोधसंस्थान-द्वितीयसंहननयोर्द्वादश, तृतीयसंस्थान-नाराचसंहननयोश्चतुर्दश, कुब्जसंस्थाना-ऽर्धनाराचसंहननयोः षोडश, वामनसंस्थान-कीलिकासंहनन-द्वि-त्रि-चतुरिन्द्रियजाति-सूक्ष्मा-ऽपर्याप्तक-साधारणानां अष्टानां उत्तरप्रकृतीनां अष्टादश, आहारक-तदङ्गोपाङ्ग-तीर्थकरनाम्नां सागरोपमकोटीकोटिः ≠भिन्ना अन्तर्मुहूर्तमबाधा, देव-नारकायुषोःΦ औधिकवत्, तिर्यङ्-मनुष्यायुषः पल्योपमत्रयं पूर्वकोटीत्रिभागोऽबाधा ।

उक्त उत्कृष्टः स्थितिबन्धः । जघन्य उच्यते—

मत्यादिपञ्चक-चक्षुर्दर्शनाद्यावरणचतुष्क-सञ्ज्वलनलोभ-दानाद्यन्तरायपञ्चकभेदानां पञ्चदशानां अन्तर्मुहूर्तं अन्तर्मुहूर्तमेव अबाधा, निद्रापञ्चका-ऽसातावेदनीयानां षण्णां सागरोपमस्य त्रयः सप्तभागाः पल्योपमासङ्ख्येयभागन्यूनाः, सातावेदनीयस्य द्वादश मुहूर्ताः अन्तर्मुहूर्तमबाधा, मिथ्यात्वस्य सागरोपमं पल्योपमासङ्ख्येयभागन्यूनम्, आद्यकषाय-द्वादशकस्य चत्वारः सप्तभागाः सागरोपमस्य पल्योपमासङ्ख्येयभागन्यूनाः, सञ्ज्वलन-क्रोधस्य मासद्वयम्, मानस्य मासः, तदर्धं मायायाः, पुंवेदस्य अष्टौ संवत्सराः, सर्वत्र अन्तर्मुहूर्त्तमबाधा, शेषनोकषाय-मनुष्य-तिर्यग्गति-पञ्चेन्द्रियजाति-औदारिक-तदङ्गोपाङ्ग-तैजस-कार्मण-षट्संस्थान-षट्संहनन-वर्ण-गन्ध-रस-स्पर्श-तिर्यङ्-मनुजानुपूर्वी-अगुरुलघु-उपघात-पराघात-उच्छ्वास-ऽऽतप-उद्द्योत-प्रशस्ता-ऽप्रशस्त-विहायोगति-यशःकीर्तिवर्जत्रसादिविंशतिकर्म-निर्माण-नीचैर्गोत्र[1]-देवगत्यानुपूर्वीद्वय-नरक-गत्यानुपूर्वीद्वय-वैक्रियशरीर-तदङ्गोपाङ्गरूपाणां अष्टषष्ट्युत्तरप्रकृतीनां[2] सागरोपमस्य द्वौ सप्तभागौ पल्योपमासङ्ख्येयभागन्यूनौ अन्तर्मुहूर्त्तमबाधा, वैक्रियषट्कस्य तु सागरोपमसहस्रस्य द्वौ

---

टि० १. **नीचैर्गोत्राणां द्विषष्ट्युत्तरप्रकृतीनां सागरो०** क घ ङ ॥ २. **०प्रकृतीनां देवद्विक-नरकद्विक-वैक्रियद्विका-ऽऽहारकद्विक-यशःकीर्ति-तीर्थकरनामरहितानां शेषनामप्रकृतीनाम्, तथा नीचैर्गोत्रस्य चेत्यासामुत्तरप्रकृतीनां सागरोपमस्य द्वौ** च ॥

**वि०टि०** ≠ "**भिन्ना** इति प्रदेशरीत्या वेदनं भिन्नपूर्वकोटिं यावत् भवत्रये साक्षाद् दलिकवेदनम्" जै०वि०प० ॥ Φ "**आयुषोः** इति त्रयस्त्रिंशत्" जै०वि०प० ॥

सप्तभागौ पल्योपमस्य असङ्ख्येयभागन्यूनौ अन्तर्मुहूर्त्तमबाधा, आहारक-तदङ्गोपाङ्ग-तीर्थकरनाम्नां सागरोपम[१]कोटाकोटी भिन्ना अन्तर्मुहूर्तमबाधा । ननु च उत्कृष्टोऽपि एतावन्मात्र एव अभिहितः ततः को अनयोः भेदः ? इति, उच्यते—उत्कृष्टात् सङ्ख्येयगुणहीनो जघन्य इति । यशःकीर्ति-उच्चैर्गोत्रयोरष्ट मुहूर्त्तानि अन्तर्मुहूर्त्तमबाधा, देव-नारकायुषोः दश वर्षसहस्राणि अन्तर्मुहूर्त्तमबाधा, तिर्यङ्-मनुजायुषोः क्षुल्लकभवः, अन्तर्मुहूर्तमबाधेति, बन्धन-सङ्घातयो[२]रौदारिकादिशरीरसहचरितत्वात् तद्गत एवोत्कृष्ट-जघन्यभेदोऽवगन्तव्य इति ।

उक्तः स्थितिबन्धः । अनुभावबन्धस्तु उच्यते—

तत्र शुभा-ऽशुभानां कर्मप्रकृतीनां प्रयोगकर्मणा उपात्तानां प्रकृति-स्थिति-प्रदेशरूपाणां तीव्र-मन्दानुभावतया अनुभवनं अनुभावः । स च एक-द्वि-त्रि-चतुःस्थानभेदेन [३]अवगन्तव्यः । तत्र अशुभप्रकृतीनां कोशातकीरससमक्वाथ्यमान-अर्ध-त्रिभाग-पादावशेष-तुल्यतया तीव्रानुभावोऽवगन्तव्यः; मन्दानुभावस्तु Ф जातिरसैक-द्वि-त्रि-चतुर्गुणोदक-प्रक्षेपास्वादतुल्यतया इति । शुभानां तु क्षीरेक्षुरसदृष्टान्तः पूर्ववद् योजनीयः । अत्र च कोशातकीक्षुरसादौ [४]उदक ≠ परमाण्वादिप्रक्षेपाद् ✡ व्यत्ययाद् वा भेदानां आनन्त्यं अवसेयमिति । अत्र च आयूंषि भवविपाकीनि, आनुपूर्व्यः क्षेत्रविपाकिन्यः, शरीर-संस्थाना-ऽङ्गोपाङ्ग-सङ्घात-संहनन-वर्ण-गन्ध-रस-स्पर्शा-ऽगुरुलघु-उपघात-पराघात-(उच्छ्वास)-उद्द्योता-ऽऽतप-निर्माण-प्रत्येक-साधारण-स्थिरा-ऽस्थिर-शुभा-ऽशुभरूपाः पुद्गलविपाकिन्यः; शेषास्तु ज्ञानावरणादिका जीवविपाकिन्य इति । उक्तोऽनुभावबन्धः ।

प्रदेशबन्धस्तु एकविधादि[५]बन्धकापेक्षया भवति । तत्र यदा एकविधं बध्नाति तदा प्रयोगकर्मणा एकसमयोपात्ताः पुद्गलाः सातावेदनीयभावेन विपरिणमन्ते । षड्विध-बन्धकस्य तु आयुः-मोहनीयवर्जः षोढा, सप्तविधबन्धकस्य सप्तधा, अष्टविधबन्धकस्य अष्टधा इति । तत्र आद्यसमय[६]प्रयोगोपात्ताः पुद्गलाः समुदानेन द्वितीयादिसमयेषु अल्प-बहुप्रदेशतया अनेन क्रमेण व्यवस्थापयति—तत्र आयुषः स्तोकाः पुद्गलाः, तद्विशेषाधिकाः प्रत्येकं नाम-गोत्रयोः [७]परस्परं तुल्याः, तद्विशेषाधिकाः प्रत्येकं ज्ञान-दर्शनावरणा-ऽन्तरायाणाम्, तेभ्यो विशेषाधिका मोहनीये ।

---

**टि०** १. **०कोटीकोटिः** ख ग च ॥ २. **०रौदारिकशरीर०** क ॥ ३. **अनुगन्तव्यः** च ॥ ४. **उदकबिन्द्वादि** च ॥ ५. **०बन्धापेक्षया** ख ॥ ६.**०प्रयोगात्ताः** ख च ग घ ङ ॥ ७. **परस्परतस्तु तुल्याः** ख च ॥

**वि०टि०** Ф "**जातिरसः** सहजरसः" स०वि०प० ॥ ≠ "**परमाणवः** बिन्दवः" जै०वि०प० ॥ ✡ "**व्यत्ययाद्** इति न जलनिक्षेपः किन्तु आवर्तनम्" जै०वि०प० ॥

ननु च तेभ्यो विशेषाधिका इत्यत्र निर्धारणे पञ्चमी, सा च "**पञ्चमी विभक्ते**" [**पा०२।३।४२**] इत्यनेन सूत्रेण विधीयते, अस्य च अयमर्थः— विभागः=विभक्तं, तत्र पञ्चमी विधीयमाना यत्र अत्यन्तविभागः तत्रैव भवति, यथा **माथुरेभ्यः पाटलिपुत्राः** अभिरूपतराः । इह च कर्मपुद्गलानां सर्वदा एकत्वम्, [1]तथाविधानामेव च बुद्ध्या बहुप्रदेशादिगुणेन पृथक्करणं चिकीर्षितम्, तत्र षष्ठी सप्तमी वा न्याय्या, तद्यथा—गवां गोषु वा कृष्णा सम्पन्नक्षीरतमा इति ।

नैष दोषः, यत्र अवधि-अवधिमतोः सामान्यवाची शब्दः प्रयुज्यते तत्रैव षष्ठी-सप्तम्यौ "**यतश्च निर्धारणम्**" [पा०२/३/४१] इत्यनेन सूत्रेण विधीयेते, यथा गवां कृष्णा सम्पन्नक्षीरतमा, मनुष्येषु **पाटलिपुत्रा** आढ्यतराः, कर्मवर्गणापुद्गलानां वेदनीये बहुतरा इति । यत्र तु विशेषवाची शब्दोऽवधित्वेन उपादीयते तत्र पञ्चम्येव, यथा खण्ड-मुण्ड-शबल-शाबलेय-धवल-धावलेयव्यक्तिभ्यः कृष्णा सम्पन्नक्षीरतमा इति, अतो नात्र विभागः कारणमविभागो वा, यतो **माथुर-पाटलिपुत्रका**दिविभागेन विभक्तानामपि सामान्यमनुष्यादिशब्दोच्चारणे षष्ठी-सप्तम्यौ भवतः, यत्र तु पुनः **माथुरा**दिविशेषोऽवधित्वेन उपादीयते तत्र कार्यवशाद् एकस्थानामपि पञ्चम्येव, तदिह सत्यपि कर्मवर्गणानामेकत्वे तद्विशेषस्य अवधित्वेन उपादानात् पञ्चम्येव न्याय्येति ।

तद्विशेषाधिका वेदनीये ।

उक्तः प्रदेशबन्धः, समुदानकर्म्म अपि इति । साम्प्रतं **ईर्यापथिकम्—**

"**ईर गति-प्रेरणयोः**" [ ]अस्माद् भावे ण्यत्, ईरणम्=ईर्या, तस्याः पन्था=ईर्यापथः, तत्र भवम्=ईर्यापथिकम् । कश्च ईर्यायाः पन्था भवति ? यदाश्रिता सा भवतीति, एतच्च व्युत्पत्तिनिमित्तम्, यतः तिष्ठतोऽपि तद् भवति । प्रवृत्तिनिमित्तं तु स्थित्यभावः, तच्च उपशान्त-क्षीणमोह-[2]सयोगिकेवलिनां भवति; [3]सयोगिकेवलिनोऽपि हि तिष्ठतोऽपि सूक्ष्मगात्रसञ्चारा भवन्ति । उक्तं च—

"**केवली णं भंते ! अस्सिं समयंसि जेसु आगासपदेसेसु हत्थं वा पायं वा [4]ओगाहित्ता णं पडिसाहरेज्जा, पभू णं भंते ! केवली तेसु चेवागासपदेसेसु पडिसाहरित्तए ? नो इणमट्ठे समट्ठे । कहं ? केवलिस्स णं चलाइं सरीरोवगरणातिं भवंति,**

---

टि० १. **तथावस्थानामेव** ख ग च ॥ २. **०सयोगकेवलिनां** घ ङ ऋते ॥ ३. **सयोग-केवलिनोऽपि** ग घ ङ विना ॥ ४. **उग्गाहित्ता** ख ॥

**वि०टि०** '**ईर गतौ कम्पने च**'-पा०धा० १०१८ । **ईर प्रेरणे** - कातन्त्र०धा०१०।२६२ ॥

**चलोवगरणत्ताए केवली नो संचाएति तेसु चेवागासपदेसेसुं हत्थं वा पायं वा पडिसाहरित्तए ।"** [व्या०प्रज्ञ०५/४/१९८]

तदेवं सूक्ष्मेतरगात्रसञ्चाररूपेण[1] योगेन यत् कर्म बध्यते तद् ईर्यापथिकम्, ईर्याप्रभवं ईर्याहेतुकमित्यर्थः । तच्च द्विसमयस्थितिकम्, एकस्मिन् समये बद्धम्, द्वितीये समये वेदितम्, तृतीयसमये तदपेक्षया च अकर्मता इति । कथमिति ?, उच्यते—यतः तत् प्रकृतितः सातावेदनीयमकषायत्वात् स्थित्यभावेन बध्यमानमेव परिशटति, अनुभावतोऽनुत्तरोपपातिकसुखातिशायि, प्रदेशतः स्थूल-रूक्ष-शुक्लादि-बहुप्रदेशमिति । उक्तं च—

> **"अप्पं बायर मउयं बहुं च लुक्खं च सुक्किलं चेव ।**
> **मंदं महव्वयं ति[2] य सायाबहुलं च तं कम्मं ॥"** [ ]

**अल्पं** स्थितितः, स्थितेरेवाभावात्, **बादरं** परिणामतः, अनुभावतो मृद्वनुभावम्, **बहु**[3] प्रदेशैः, **रूक्षं** स्पर्शतः, वर्णेन **शुक्लम्**, **मन्दं** लेपतः स्थूलचूर्णमुष्टिमृष्टकुड्यापतितलेपवत्, **महाव्ययमे**कसमयेनैव सर्वापगमात्, **साताबहुलम्** अनुत्तरोपपातिकसुखातिशायीति ।

उक्तं ईर्यापथिकम् । अधुना **आधाकर्म**—

यद् आधाय=निमित्तत्वेनाश्रित्य पूर्वोक्तमष्टप्रकारमपि कर्म बध्यते तद् **आधाकर्मे**ति; तच्च शब्द-स्पर्श-रस-रूप-गन्धादिकमिति । तथा हि— शब्दादिकामगुणविषयाभिष्वङ्गवान् सुखलिप्सुः मोहोपहतचेताः परमार्थासुखमयेष्वपि सुखाध्यारोपं विदधाति, तदुक्तम्[4]—

> **"दुःखात्मकेषु विषयेषु सुखाभिमानः,**
> **सौख्यात्मकेषु नियमादिषु[5] दुःखबुद्धिः ।**
> **उत्कीर्णवर्णपदपङ्क्तिरिवान्यरूपा,**
> **सारूप्यमेति विपरीतमतिप्रयोगात्[6] ॥"** [ ]

एतदुक्तं भवति— कर्मनिमित्तभूता मनोज्ञेतरशब्दादय एव आधाकर्म इत्युच्यन्त इति ।

**तपःकर्म**— तस्यैव अष्टप्रकारस्य कर्मणो बद्ध-स्पृष्ट-निधत्त-निकाचितावस्थस्यापि निर्जराहेतुभूतं बाह्या-ऽऽभ्यन्तरभेदेन द्वादशप्रकारं तपःकर्म्म इति उच्यते ।

**कृतिकर्म**— तस्यैव कर्मण अपनयनकारकं अर्हत्-सिद्धा-ऽऽचार्योपाध्यायादि-[7] विषयं अवनामादिरूपमिति ।

---

टि० १. **सूक्ष्मतरगात्र०** क घ ॥ २. **चिय** ख ॥ ३. **बहु च बहुप्रदेशैः** ख च ॥ ४. **उक्तं च** घ ङ ॥ ५. **नियमेषु च दुःख०** ख ॥ ६. **विपरीतगति०** कपुस्तकाद्विना ॥ ७. **०पाध्यायविषय०** क ग घ ङ । **०पाध्यायविषये अवनामादि०** च ॥

**भावकर्म** पुनः अबाधां उल्लङ्घ्य स्वोदयेन उदीरणाकरणेन वा[1] उदीर्णाः पुद्गलाः प्रदेश-विपाकाभ्यां Ф भव-क्षेत्र-पुद्गल-जीवेषु अनुभावं ददतो भावकर्मशब्देन उच्यन्त इति । तदेवं नामादिनिक्षेपेण दशधा **कर्म** उक्तम् । **इह** तु समुदानकर्मोपात्तेन **अष्टविध-कर्मणाऽधिकार** इति गाथाशकलेन दर्शयति—

**अट्ठविहेण उ कम्मेण एत्थ होई अहीगारो** त्ति । गाथार्धं कण्ठ्यमिति गाथाद्वय[2]परमार्थः ॥१९४-९५॥

तदेवं सूत्रानुगमेन सूत्रे समुच्चारिते निक्षेपनिर्युक्त्यनुगमेन प्रतिपदं निक्षिप्ते नामादिनिक्षेपे च व्याख्याते सति उत्तरकालं सूत्रं विव्रियते—

**जे गुणे से मूलट्ठाणे ।** अस्य च अनन्तर-परम्परादिसूत्रैः सम्बन्धो वाच्यः । तत्र अनन्तरसूत्रसम्बन्धः—**'से हु मुणी परिण्णायकम्मे'** [सू०६२] त्ति, स मुनिः परिज्ञातकर्मा भवति यस्य एतद् गुण-मूलादिकमधिगतं भवति । परम्परसूत्रसम्बन्धस्तु **'से ज्जं पुण जाणेज्जा स[3]ह सम्मुइयाए परवागरणेणं अण्णेसिं वा सो[4]च्चा'** [सू०२] स्वसम्मत्या परव्याकरणेन तीर्थकरोपदेशाद् अन्येभ्यो वा आचार्यादिभ्यः श्रुत्वा जानीयात्=परिच्छिन्द्यात्, किं तद् ? इति, उच्यते—**जे गुणे से मूलट्ठाणे ।** आदिसूत्रसम्बन्धस्तु **'सुयं मे आउसंतेणं भगवया एवमक्खायं'**[सू०१] किं तत्[5] श्रुतं यद् भगवता आ[6]युष्मता आख्यातम् ? इति, उच्यते—**जे गुणे से मूलट्ठाणे ।**

**य** इति सर्वनाम प्रथमान्तं **मागधदेशी**वचनत्वाद् एकारान्तं सामान्यो-द्देशार्थाभिधायीति । गुण्यते=भिद्यते वि[7]शेष्यते अनेन द्रव्यमिति **गुणः**; स चेह शब्द-रूप-[8]रस-गन्ध-वर्ण-स्पर्शादिकः । **स** इति सर्वनाम प्रथमान्तं उद्दिष्टनिर्देशार्थाभिधायीति । मूलम् इति निमित्तं कारणं प्रत्यय इति पर्यायाः, तिष्ठन्ति अस्मिन्निति स्थानम्, मूलस्य स्थानं =**मूलस्थानम्** । **"व्यवच्छेदफलत्वाद् वाक्यानाम्"** इति न्यायाद् य एव शब्दादिकः कामगुणः स एव संसारस्य नारक-तिर्यङ्-नरा-ऽमरसंसृतिलक्षणस्य यद् मूलं=कारणं कषायाः तेषां स्थानम्=आश्रयो वर्तते, यस्माद् मनोज्ञेतरशब्दाद्युपलब्धौ कषायोदयः, ततोऽपि संसार इति। अथवा मूलम् इति कारणम्, तच्च अष्टप्रकारं कर्म, तस्य स्थानं आश्रयः

---

टि० १. **चोदीर्णाः** क-गप्रती विना ॥ २. **०द्वयसमासार्थः** ख ॥ ३. **सहस्सम्मुइयाए** क । **सहस्सुइयाए** ग । **सहस्समुइयाए** घ ङ ॥ ४. **सुच्चा** घ ङ ॥ ५. **श्रुतं भगवता आयुष्मता यदाख्यातमिति** ख ॥ ६. **०युष्मता व्याख्यातमिति** घ ङ ॥ ७. **विशिष्यते** ख च ॥ ८. **०रस-गन्ध-स्पर्शादयः** ख च । **०रस-स्पर्श-गन्धादयः** ग ॥

वि०टि० Ф **"भव-क्षेत्र०** इति भवविपाकिनीत्यादि" जै०वि०प० ॥

कामगुण इति । अथवा मूलं=मोहनीयं तद्भेदो वा कामः, तस्य स्थानं शब्दादिको[1] गुणः । अथवा मूलं शब्दादिको विषयगणः[2], तस्य स्थानमिष्टा-ऽनिष्टविषयगुणभेदेन व्यवस्थितो गुणरूपः संसार एव, आत्मा वा शब्दाद्युपयोगानन्यत्वाद् गुणः । अथवा मूलं=संसारः, तस्य शब्दादयः स्थानं कषाया वा, गुणोऽपि शब्दादिकः कषायपरिणतो वा आत्मा इति । यदि वा मूलं=संसारस्य शब्दादिकषायपरिणतः सन् आत्मा, तस्य स्थानं शब्दादिकम्, गुणोऽपि असावेव इति । ततश्च सर्वथा य एव गुणः स एव मूलस्थानं वर्त्तते ।

ननु च वर्तनक्रियायाः सूत्रे अनुपादानात् कथं आक्षेपः ? इति, उच्यते– यत्र हि काचिद् विशेषक्रिया नैव उपादायि तत्र सामान्यक्रियां अस्ति भवति विद्यते वर्तत इत्यादिकां उपादाय वाक्यं परिसमाप्यते, एवमन्यत्रापि द्रष्टव्यमिति ।

अथवा मूलम् इति आद्यं प्रधानं वा, स्थानम् इति कारणम्, मूलं च तत् कारणं च इति विगृह्य कर्मधारयः; ततश्च य एव शब्दादिको गुणः स एव मूलस्थानं संसारस्य आद्यं प्रधानं वा कारणमिति, शेषं पूर्ववदिति ।

साम्प्रतं अनयोरेव गुण-मूलस्थानयोः नियम्य-नियामकभावं दर्शयन् तदुपात्तानां विषय-कषायादीनां **बीजा-ऽङ्कुर**न्यायेन परस्परतः कार्य-कारणभावं सूत्रेणैव दर्शयति–

**'जे मूलट्ठाणे से गुणे'** त्ति । **यद**देव संसार**मूला**नां कर्ममूलानां वा कषायाणां **स्थानम्**=आश्रयः शब्दादिको **गुणो**ऽपि असावेव । अथवा कषायमूलानां शब्दादीनां यत् स्थानं=कर्म संसारो वा तत्तत्स्वभावापत्तेः गुणोऽपि असावेवेति । अथवा शब्दादिकषाय-परिणाममूलस्य संसारस्य कर्मणो वा यत् स्थानं मोहनीयं कर्म शब्दादिकषायपरिणतो वा आत्मा तद्‌गुणावाप्तेः गुणोऽपि असावेव । यदि वा संसारकषायमूलस्य आत्मनो यत् स्थानं विषयाभिष्वङ्गः असावपि शब्दादिविषयत्वाद् गुणरूप एवेति ।

अत्र च विषयोपादानेन विषयिणोऽपि आक्षेपात् सूचनार्थत्वात् च सूत्रस्य इति एवमपि द्रष्टव्यम्–यो गुणे गुणेषु वा वर्तते स[3] मूलस्थाने मूलस्थानेषु वा वर्तते; यो मूलस्थानादौ वर्तते स एव गुणादौ वर्तत इति । य एव जन्तुः शब्दादिके प्राग्व्यावर्णितस्वरूपे गुणे वर्तते; स एव संसारमूलकषायादिस्थानादौ वर्तते । एतदेव द्वितीयसूत्रापेक्षया व्यत्ययेन प्राग्वदायोज्यम् ।

अनन्तगम-पर्यायत्वात् सूत्रस्य एवमपि द्रष्टव्यम्– यो गुणः स एव मूलं स एव च[4] स्थानम्, यद् मूलं तदेव गुणः स्थानमपि तदेव, यत् स्थानं तदेव गुणो मूलमपि तदेवेति,

---

टि० १. **शब्दादिको विषयगुणः** च ॥ २. **विषयगुणः** ख च ॥ ३. **स एव मूलस्थाने** ग ॥ ४. **वा** ख-चपुस्तके विना ॥

यो गुणः शब्दादिकोऽसावेव संसारस्य कषायकारणत्वाद् मूलम्, स्थानमपि असावेवेति; एवमन्येष्वपि विकल्पेषु योज्यम् । विषयनिर्देशे च विषयी अपि आक्षिप्तः—यो गुणे वर्तते स मूले स्थाने चेति; एवं सर्वत्र द्रष्टव्यम् ।

इह च सर्वज्ञप्रणीतत्वाद् अनन्तार्थता सूत्रस्य अवगन्तव्या । तथा हि—मूलमत्र कषायादिकं उपन्यस्तम्, कषायाश्च क्रोधादयश्चत्वारः, क्रोधोऽपि अनन्तानुबन्ध्यादिभेदेन चतुर्धा, अनन्तानुबन्धिनः अपि असङ्ख्येयलोकाकाशप्रदेशप्रमाणानि बन्धाध्यवसायस्थानानि अनन्ताश्च तत्पर्यायाः, तेषां च प्रत्येकं स्थान-गुणनिरूपणेन[1] अनन्तार्थता सूत्रस्य सम्पद्यते; सा च छद्मस्थेन सर्वायुषाऽपि अविषयत्वा(द् वाचः क्रमवर्त्तित्वा)च्च अशक्या दर्शयितुम्, दिग्दर्शनं तु कृतमेव । अतोऽनया दिशा कुशाग्रीयशेमुष्या गुण-मूल-स्थानानां परस्परतः कार्य-कारणभावः संयोजना च कार्येति ।

तदेवं य एव गुणः स एव मूलस्थानम्; यदेव मूलस्थानं स एव गुण इत्युक्तम् । ततः किम्? इति, अत आह—

**इति से गुणट्ठी महता परितावेण वसे पमत्ते । तं जहा—माता मे, पिता मे, भाया मे, भगिणी मे, भज्जा मे, पुत्ता मे, धूता मे, सुण्हा मे, सहि-सयण-संगंथ-संथुता मे, विवित्तोवकरण-परियट्टण-भोयण-अच्छायणं मे ।**

**इति से गुणट्ठी महया** इत्यादि । **इति** हेतौ, यस्मात् शब्दादिगुणपरीत आत्मा कषायमूलस्थाने वर्तते, सर्वोऽपि च प्राणी **गुणार्थी**=गुणप्रयोजनी गुणानुरागीति; अतस्तेषां गुणानामप्राप्तौ प्राप्तिनाशे वा काङ्क्षा-शोकाभ्यां **स** प्राणी **महता**=अपरिमितेन, परिः-समन्तात् तापः=**परितापः**, तेन शारीर-मानसस्वभावेन दुःखेनाभिभूतः सन् पौनःपुन्येन तेषु तेषु स्थानेषु **वसेत्**=तिष्ठेद् उत्पद्येत, किम्भूतः सन् ? **प्रमत्तः**, प्रमादश्च राग-द्वेषात्मकः, द्वेषश्च प्रायो न रागमृते । रागोऽपि उत्पत्तेः आरभ्य अनादिभवाभ्यासाद् माता-पित्रादिविषयो भवतीति दर्शयति—

**माया मे** इत्यादि । तत्र मातृविषयो रागः संसारस्वभावाद् उपकारकर्तृत्वाद् वा उपजायते । रागे च सति 'मदीया माता क्षुत्-पिपासादिकां वेदनां मा प्रापदि'ति अतः कृषि-वाणिज्य-सेवादिकां प्राण्युपघातरूपां क्रियामारभते; तदुपघातकारिणि च[2] तस्यां वा अकार्यप्रवृत्तायां द्वेष उपजायते, तद्यथा—**अनन्तवीर्य**प्रसक्तायां **रेणुकायां राम**स्येति । एवं

टि० १. ०निरूपणे अनन्तार्थता ख च । ०निरूपणादनन्तार्थता ग ॥ २. वा ख ॥

**'पिता मे'** पितृनिमित्तं राग-द्वेषौ भवतः, यथा **रामेण** पितरि रागात् तदुपहन्तरि च द्वेषात् सप्तकृत्वः क्षत्रिया [1]विनिपातिताः, **सुभूमे**नापि त्रिःसप्तकृत्वो ब्राह्मणा इति । भगिनीनिमित्तेन च क्लेशमनुभवति प्राणी । तथा भार्यानिमित्तं राग-द्वेषोद्भवः, तद्यथा—**चाणक्ये**न भगिनी-भगिनीपत्याद्यवज्ञातया भार्यया चोदितेन **नन्दा**न्तिकं[2] द्रव्यार्थमुपागतेन[3] कोपाद् **नन्दकुलं** क्षयं निन्ये । तथा **'पुत्रा मे** न जीवन्ती'ति आरम्भे प्रवर्तते । एवं **'दुहिता मे** दुःखिते[4]'ति राग-द्वेषोपहतचेताः परमार्थमजानानः तद्[5] विधत्ते येन ऐहिका-ऽऽमुष्मिकान् अपायान् अवाप्नोति, तद्यथा—**जरासन्धो** जामातरि **कंसे** व्यापादिते स्वबलावलेपाद् अपसृत**वासुदेव**पदानुसारी सबल-वाहनः क्षयमगात् । **'स्नुषा मे** न जीवती'ति आरम्भादौ प्रवर्तते । **'सखि-स्वजन-सङ्ग्रन्थ-संस्तुता मे' सखा**=मित्रम्, **स्वजनः**=पितृव्यादिः, **सङ्ग्रन्थः**=स्वजनस्यापि स्वजनः पितृव्यपुत्र-शालादिः, **संस्तुतः** भूयो भूयो दर्शनेन परिचितः, अथवा पूर्वसंस्तुतो माता-पित्रादिरभिहितः, पश्चात्संस्तुतः शालकादिः, स इह ग्राह्यः, 'स च मे दुःखितः' इति परितप्यते । **विविक्तं** शोभनं प्रचुरं वा, **उपकरणं** हस्त्यश्व-रथा-ऽऽसन-मञ्चकादि, **परिवर्तनं** द्विगुण-त्रिगुणादिभेदभिन्नं तदेव, **भोजनं** मोदकादि, **आच्छादनं** पट्टयुग्मादि, तच्च **मे** भविष्यति नष्टं वा ।

**इच्चत्थं गढिए लोए वसे पमत्ते अहो य राओ य परितप्पमाणे कालाकालसमुट्ठायी संजोगट्ठी अट्ठालोभी आलुंपे सहसक्कारे विणिविट्ठचित्ते एत्थ सत्थे पुणो पुणो ॥६३॥**

[6]**इच्चत्थमि**ति एवमर्थं **गृद्धो लोकः** तेषु एव माता-पित्रादिरागादिनिमित्तस्थानेषु आमरणं **प्रमत्तः** 'ममेदम्, अहमस्य स्वामी पोषको वा' इत्येवं मोहितमनाः **वसेत्**=तिष्ठेदिति । उक्तं च—

**"पुत्रो मे भ्राता मे स्वजनो मे गृह-कलत्रवर्गो मे ।**
**इति कृतमेमेशब्दं पशुमिव मृत्युर्जनं हरति ॥"** [        ]

**"पुत्र-कलत्र-परिग्रहममत्वदोषैर्नरो व्रजति नाशम् ।**
**कृमिक इव कोशकारः परिग्रहाद्दुःखमाप्नोति ॥"** [   ]

---

टि० १. व्यापादिताः ख च ॥ २. **नन्दान्तिके** क ॥ ३. **०मुपगतेन** च ॥ ४. **दुःखिनीति** ख च ॥ ५. **तत् तद् विधत्ते** ख च ॥ ६. **इच्चत्थं गढिए इति एवमर्थं** ख । **एच्चत्थमित्यादि एवमर्थं** घ ङ । **इच्चत्थमिति इत्येवमर्थं** च ॥

अमुमेवार्थं **निर्युक्तिकारो** गाथाद्वयेन आह—

**[ नि० ] संसारं छेत्तुमणो कम्मं उम्मूलए तयट्ठाए ।**
**उम्मूलेज्ज केसाए[1] तम्हा उ चएज्ज सयणादी ॥१९६॥**

**[ नि० ] माया मे त्ति पिया मे भगिणी भाया य पुत्तदारं मे ।**
**अत्थम्मि चेव गिद्धा जम्मण-मरणाणि पावंति ॥१९७॥**

**॥ द्वितीयाध्ययने प्रथमोद्देशकः ॥**

**संसारं छेत्तुमणो** गाहा, **माया मे** त्ति गाहा । **संसारं** नारक-तिर्यङ्-नरा-ऽमरलक्षणं माता-पितृ-भार्यादिस्नेहलक्षणं वा **छेत्तुमनाः**=उन्मुमूलयिषुः अष्टप्रकारं **कर्म उन्मूलयेत्** । तदुन्मूलनार्थं च तत्कारणभूतान् **कषायान् उन्मूलयेत्** । कषायापगमनाय च माता-पित्रादिगतं स्नेहं **जह्यात्** ।

यतो माता-पित्रादिसंयोगाभिलाषिणः **अर्थे** रत्न-कुप्यादिके **गृद्धाः**=अध्युपपन्नाः **जन्म**-जरा-**मरणादिकानि** दुःखानि असुभृतः **प्राप्नुवन्ती**ति गाथाद्वयार्थः ॥१९६-१९७॥

तदेवं कषायेन्द्रियप्रमत्तो माता-पित्राद्यर्थं अर्थोपार्जन-रक्षणतत्परो दुःखमेव [2]केवलमवाप्नोति इत्याह—

**अहो** इत्यादि । **अहश्च** सम्पूर्णं **रात्रिं च**, **च**शब्दात् [3]पक्षं मासं [4]च, निवृत्त-शुभाध्यवसायः परिः-समन्तात् तप्यमानः=**परितप्यमानः** सन् [5]तिष्ठति । तद्यथा—

"**कइया वच्चइ सत्थो ? किं भंडं ? कत्थ ? [6]कित्तियं भूमिं ? ।**
**को कयविक्कयकालो ? निव्विस्सइ किं कहिं केण ? ॥**" [ ] इत्यादि ।

स च परितप्यमानः किम्भूतो भवति ? इति, आह—

**काले**त्यादि । **कालः**=कर्तव्यावसरः, [7]तद्विपरीतः **अकालः**, सम्यग् उत्थातुम्-अभ्युद्यन्तुं शीलमस्य इति **समुत्थायी** इति पदार्थः । वाक्यार्थस्तु— काले=कर्तव्यावसरे [8]अकाले=तद्वि[9]पर्यासे समुत्तिष्ठते अभ्युद्यतमनुष्ठानं करोति तच्छीलश्च इति, कर्तव्यावसरे न करोति अन्यदा च विदधातीति । यथा वा काले करोति एवं अकालेऽपीति; यथा वाऽनवसरे न करोति एवं अवसरेऽपीति, अन्यमनस्कत्वाद् अपगतकाला-ऽकालविवेकः

---

**टि०** १. **कसाया** ख ज झ ञ ॥ २. **केवलमनुभवतीत्याह** ख च । **केवलमाप्नोतीत्याह** ग ङ ॥ ३. **पक्षं च मासं** ख ॥ ४. **वा** क ग ॥ ५. **समुति( त्ति? )ष्ठति** क । **समनुतिष्ठति** ख ॥ ६. **केत्तिया भूमी ?** ख च ॥ ७. **तद्विपर्यासः** ख च ॥ ८. **अकालेन** ग च ॥ ९. **०पर्यासेन** खआदर्शं विना ॥

इति भावना । यथा **प्रद्योतेन मृगावतिः** अपगतभर्तृका सती ग्रहणकालं अतिवाह्य कृतप्राकारादिरक्षा जिघृक्षितेति । यस्तु पुनः सम्यक् कालोत्थायी भवति स यथाकालं परस्परानाबाधया सर्वाः क्रियाः करोतीति । तदुक्तम्—

''**मासैरष्टभिरह्ना च, पूर्वेण [1]वयसाऽऽयुषः ।**
**तत् कर्तव्यं मनुष्येण [2]यस्यान्ते सुखमेधते ॥**'' [          ]

धर्मानुष्ठानस्य च न [3]केश्चिदकालो मृत्योरिव इति । किमर्थं पुनः काला-ऽकालसमुत्थायी भवति ? इति, आह—

**संजोगट्ठी**— संयुज्यते संयोजनं वा संयोगः, अर्थः=प्रयोजनम्, सो अस्य अस्तीति **संयोगार्थी** । तत्र धन-धान्य-हिरण्य-द्विपद-चतुष्पद-राज्य-भार्यादिसंयोगः, तेनार्थी =तत्प्रयोजनी । अथवा शब्दादिविषयः संयोगो माता-पित्रादिभिर्वा, तेनार्थी काला-ऽकालसमुत्थायी भवतीति । किञ्च—

**अट्ठालोभी**— अर्थः=रत्न-कुप्यादिः, तत्र आ—समन्ताल्लोभः=**अर्थालोभः**, स विद्यते यस्य इति, असावपि काला-ऽकालसमुत्थायी भवति **मम्मण**वणिग्वत् । तथा हि—असौ अतिक्रान्तार्थोपार्जनसमर्थयौवनवया जल-स्थलपथप्रेषितनानादेशभाण्डभृतबोहित्थ-गन्त्रिकोष्ट्रमण्डलिकासम्भृतसम्भारोऽपि प्रावृषि सप्तरात्रौ अच्छिन्नमुशलप्रमाणजलधारावर्ष-निरुद्धसकलप्राणिगणसञ्चारमनोरथायां महानदीजलपूरानीतकाष्ठानि जिघृक्षुः उपभोगधर्मावसरे निवृत्तापराशेषशुभपरिणामः केवलं अर्थोपार्जनप्रवृत्त इति । उक्तं च—

''**उक्खणइ खणइ निहणइ रत्तिं न सुयइ दिया वि य ससंको ।**
**लिम्पइ ठवेइ सययं लंछियपडिलंछियं कुणइ ॥**
**भुंजसु, न Φ ताव रिक्को ≠ जेमेउं, न वि य अज्ज मज्जीहं ।**
**न वि य वसीहामि घरे कायव्वमिणं बहुं अज्ज ॥**'' [          ]

पुनरपि लोभिनः अशुभव्यापारान् आह—

**आलुंपे**— आ=समन्ताद् लुम्पति इति **आलुम्पः** । स हि लोभाभिभूतान्तःकरणो अपगतसकलकर्तव्या-ऽकर्तव्यविवेकः अर्थलोभैकदत्तदृष्टिः ऐहिका-ऽऽमुष्मिकविपाक-कारिणीः निर्लाञ्छन-गलकर्तन-चौर्यादिकाः क्रियाः करोति । अन्यच्च—

---

**टि०** १. **वयसाऽऽयुषा** कप्रतिमृते ॥ २. **येनान्ते** घ ङ च ॥ ३. **कश्चित् कालो** घ ङ ॥

**वि०टि० Φ** ''न ताव **रिक्को**=न निराकुलः'' स०वि०प० ॥ ≠ ''**रिक्क** इति समथो(र्थो)[ऽ]-व्याकुलो वा'' जै०वि०प० ॥

**सहसक्कारे**[1]—करणं=कारः, असमीक्षितपूर्वा-ऽपरदोषं सहसा करणं=**सहसाकारः**, स विद्यते यस्य इति, "**अर्शआदिभ्योऽच्**[2]" [पा०५/२/१२७]। अथवा छान्दसत्वात् कर्तर्येव घञ्, करोतीति कारः। तथा हि— लोभतिमिराच्छादितदृष्टिः अर्थैकमनाः शकुन्तवत् शराघातं अनालोच्य पिशिताभिलाषितया सन्धिच्छेदनादितो विनश्यति। लोभाभिभूतो हि अर्थैकदृष्टिः तन्मनाः तदर्थोपयुक्तः अर्थमेव पश्यति नापायान्। आह च—

**विणिविट्ठचित्ते— विविधम्**=अनेकधा **निविष्टं**=स्थितं अवगाढं अर्थोपार्जनोपाये माता-पित्राद्यभिष्वङ्गे वा शब्दादिविषयोपभोगे वा **चित्तम्**=अन्तःकरणं यस्य स तथा। पाठान्तरं वा— '**विणिविट्ठचेट्ठे**' त्ति, विशेषेण निविष्टा काय-वाङ्-मनसां परिस्पन्दात्मिका अर्थोपार्जनोपायादौ चेष्टा यस्य स **विनिविष्टचेष्टः**।

तदेवं माता-पित्रादिसंयोगार्थी[3] अर्थालोभी आलुम्पः सहसाकारो विनिविष्टचित्तो विनिविष्टचेष्टो वा किम्भूतो भवति ? इति, आह—

**एत्थ** इत्यादि। **अत्र**=अस्मिन् माता-पित्रादौ शब्दादिविषयसंयोगे वा विनिविष्टचित्तः सन्[4] पृथ्वीकायादिजन्तूनां यत् **शस्त्रं**=उपघातकारि तत्र **पुनः पुनः** प्रवर्तते[5]; एवं पौनःपुन्येन शस्त्रे प्रवृत्तो भवति यदि पृथिवीकायादिजन्तूनामुपघाते वर्तते। तथा हि— "**शसु हिंसायाम्**" [**पा०धा०** ७२४] इत्यस्मात् शस्यते=हिंस्यत इति करणे ष्ट्रन् विहितः; तच्च स्वकाय-परकायादिभेदभिन्नमिति। पाठान्तरं वा '**एत्थ सत्ते पुणो पुणो**', **अत्र**= माता-पितृ-शब्दादिसंयोगे लोभार्थी सन् **सक्तः**=गृद्धः अध्युपपन्नः पौनःपुन्येन विनिविष्टचेष्टः आलुम्पकः सहसाकारः कालाकालसमुत्थायी वा भवतीति ॥६३॥

एतच्च साम्प्रतेक्षिणामपि युज्येत[6] यदि अजरामरत्वं दीर्घायुष्कं[7] वा स्यात्; तच्च उभयमपि नास्ति इत्याह—

## [सू० ] अप्पं च खलु आउं इहमेगेसिं माणवाणं।

**अप्पं च** इत्यादि। **अल्पं**=स्तोकम्[8], **च**शब्दः अधिकवचनः, **खलुः** अवधारणे, **आयुः** इति भवस्थितिहेतवः कर्मपुद्गलाः, **इह** इति संसारे मनुष्यभवे वा **एकेषां** =केषाञ्चिदेव **मानवानां**=मनुजानामिति पदार्थः। वाक्यार्थस्तु **इह**=अस्मिन् संसारे केषाञ्चिन्मनुजानां क्षुल्लकभवोपलक्षितान्तर्मुहूर्तमात्रम् **अल्पं**=स्तोकं **आयुर्**भवति। **च**शब्दाद्

---

टि० १. **सहसक्कारो** ख ॥ २. **अर्शादिभ्यो** ख ॥ ३. ०**संयोगार्थमर्थालोभी** क ॥ ४. **स पृथिवी०** ख ॥ ५. ०**ते पौनःपुन्येन शस्त्रे प्रवृत्तो भवति, यदि वा पृथिवी०** ख ॥ ६. **युज्यते** क घ ङ ॥ ७. **दीर्घायुष्कत्वं** ख ॥ ८. **स्तोकं च, चशब्दः अल्पवचनः** ख ॥

उत्तरोत्तरसमयादिवृद्ध्या पल्योपमत्रयावसानेऽपि आयुषि खलुशब्दस्य अवधारणार्थत्वात् संयमजीवितं अल्पमेव इति । तथा हि—अन्तर्मुहूर्तादारभ्य देशोनपूर्वकोटिं यावत् संयमायुष्कम्; तच्च अल्पमेव इति । अथवा त्रिपल्योपमस्थितिकमपि आयुरल्पमेव, यतस्तदपि अन्तर्मुहूर्त्तं अपहाय सर्वमपवर्तते । उक्तं च—

**''अद्धा जोउक्कोसे[1] बंधित्ता भोगभूमिएसु लहुं ।**
**सव्वप्पजीवियं वज्जयित्तु उव्वट्टिया दोण्हं ॥'' [ पंचसं० ३२३ ]**

अस्या अयमर्थः—**उत्कृष्टे योगे** बन्धाध्यवसायस्थाने आयुषो यो बन्धकालोऽ**द्धा** उत्कृष्ट एव, तं **बद्ध्वा**, क्व ? **भोगभूमिकेषु** [2]**देवकुर्वा**दिजेषु, तस्य **क्षिप्रमेव सर्वाल्पमायुर्वर्जयित्वा द्वयोः**=तिर्यङ्-मनुष्ययोः **अपवृत्तिका**=अपवर्तनं भवति, एतच्च अपर्याप्तकान्तर्मुहूर्तान्तः द्रष्टव्यम्; तत ऊर्ध्वं अनपवर्तनमेव इति ।

सामान्येन चायुः सोपक्रमायुषां सोपक्रमम्, निरुपक्रमायुषां निरुपक्रमम् । यदा हि असुमान् स्वायुषः त्रिभागे त्रिभागत्रिभागे वा जघन्यत एकेन द्वाभ्यां वा उत्कृष्टतः सप्तभिरष्टभिः वा आकर्षैः अन्तर्मुहूर्त्तप्रमाणेन कालेन आत्मप्रदेश[3]रचनान्तर्वर्तिनः आयुष्ककर्मवर्गणापुद्गलान् प्रयत्नविशेषेण विधत्ते तदा निरुपक्रमायुर्भवति, अन्यदा तु सोपक्रमायुष्क इति । उपक्रमश्च उपक्रमणकारणैः भवति, तानि चामूनि—

**''दंड कस सत्थ रज्जू अग्गी उदग पडणं विसं वाला ।**
**सी-उण्हं अरइ भयं खुहा पिवासा य वाही य ॥**
**मुत्त-पुरीसनिरोहे जिण्णाजिण्णे य भोयणे बहुसो ।**
**घंसण घोलण पीलण आउस्स उवक्कमा एए ॥''**
**[आव०नि०७२५-२६, विशेषाव०२०४२-४३]**

उक्तं च—**''स्वतोऽन्यत इतस्ततोऽभिमुखधावमानापदामहो,**
**निपुणता नृणां क्षणमपीह यज्जीव्यते ।**
**मुखे फलमतिक्षुधा सरसमल्पमायोजितं,**
**कियच्चिरमचर्वितं दशनसङ्कटे स्थास्यति ?॥** [ ]
**उच्छ्वासावधयः प्राणाः, स चोच्छ्वासः समीरणः ।**
**समीरणाच्चलं [4]नान्यत्, क्षणमप्यायुरद्भुतम् ॥''** [ ] इत्यादि ।

येऽपि दीर्घायुष्कस्थितिका उपक्रमणकारणाभावे आयुःस्थितिमनुभवन्ति तेऽपि

---

टि० १. **जोगुक्कोसं** घ ङ ॥ २. **देवकुर्वादिषु** क ॥ ३. **०रचनानाडिकान्तर्वर्तिन** ख विना ॥ ४. **नास्ति, क्षण०** ख ॥

मरणादप्यधिकां जराभिभूतविग्रहा जघन्यतमामवस्थामनुभवन्तीति **तद् यथा** इत्यादिना दर्शयति—

**तं जहा—सोतपण्णाणेहिं परिहायमाणेहिं चक्खुपण्णाणेहिं परिहायमाणेहिं घाणपण्णाणेहिं परिहायमाणेहिं रसपण्णाणेहिं परिहायमाणेहिं फासपण्णाणेहिं परिहायमाणेहिं अभिकंतं च खलु वयं सपेहाए ततो से एगया मूढभावं जणयंति ।**

**सोयपण्णाणेहिं** इत्यादि **ततो से एगया मूढभावं जणयंति** त्ति यावत् । शृणोति भाषापरिणतान् पुद्गलानिति श्रोत्रम्; तच्च कदम्बपुष्पाकारं द्रव्यतः, भावतो भाषाद्रव्यग्रहण-लब्ध्युपयोगस्वभावमिति । तेन श्रोत्रेण परिः=समन्ताद् घट-पटशब्दादिविषयाणि ज्ञानानि=परिज्ञानानि, तैः **श्रोत्रपरिज्ञानैः** जराप्रभावात् **परिहीयमाणैः** सद्भिः ततोऽसौ प्राणी **एकदा** = वृद्धावस्थायां रोगोदयावसरे वा **मूढभावं** = मूढतां कर्तव्या-ऽकर्तव्याज्ञतां इन्द्रियपाटवाभावाद् आत्मनो **जनयति**, हिता-ऽहितप्राप्ति-परिहारविवेकशून्यतामापद्यत इत्यर्थः । **जनयन्ति** इति चैकवचनावसरे "**तिङां तिङो भवन्ति**" [ ] इति बहुवचनमकारि । अथवा तानि वा श्रोत्रविज्ञानानि परिक्षीयमाणानि आत्मनः सदसद्विवेकविकलतां आपादयन्तीति । श्रोत्रादिविज्ञानानां च तृतीया प्रथमार्थे सुब्व्यत्ययेन द्रष्टव्येति; एवं चक्षुरादिविज्ञानेष्वपि योज्यम् । अत्र च करणत्वाद् इन्द्रियाणामेवं सर्वत्र द्रष्टव्यम्—श्रोत्रेण आत्मनो विज्ञानानि, चक्षुषा आत्मनो विज्ञानानीति ।

ननु च तान्येव द्रष्टॄणि कुतो न भवन्ति ? इति, उच्यते—अशक्यमेवं विज्ञातुं, तद्विनाशे तदुपलब्धार्थस्मृत्यभावात् । दृश्यते च हृषीकोपघातेऽपि तदुपलब्धार्थस्मरणम्, तद्यथा— धवलगृहान्तर्वर्तिपुरुषपञ्चवातायनोपलब्धार्थस्य तदन्यतरस्थगनेऽपि तदुपपत्तिरिति । तथा हि—'अहमनेन श्रोत्रेण चक्षुषा वा मन्दमर्थमुपलभे, अनेन च स्फुटतरमि'ति स्पष्टैव करणत्वावगतिः अक्षाणाम् । यद्येवं अन्यान्यपि करणानि सन्ति तानि किं नोपात्तानि ?, कानि पुनस्तानि ?, उच्यते— वाक्-पाणि-पाद-पायु-उपस्थ-मनांसि वचना-ऽऽदान-विहरण-उत्सर्गा-ऽऽनन्द-सङ्कल्पव्यापाराणि, ततश्च एतेषां आत्मोपकारकत्वेन करणत्वम्, करणत्वाद् इन्द्रियत्वमिति, एवं च एकादशेन्द्रियसद्भावे सति पञ्चानामेव उपादानं किमर्थम् ? इति ।

---

**टि०** १. जघन्यतरा० ख च ॥ २. **सोयपरिण्णाणेहिं** क ख ग विना ॥ ३. **श्रोत्रपरिज्ञानानि** ख ॥

**वि०टि०** Φ "**हृषीकाणि**=इन्द्रियाणि" स०वि०प० ॥

आह आचार्यः—नैष दोषः, इह हि आत्मनो विज्ञानोत्पत्तौ यत् प्रकृष्टमुपकारकं तदेव करणत्वाद् इन्द्रियम् । एतानि तु वाक्-पाण्यादीनि नैव आत्मनोऽनन्य[1]साधारणतया करणत्वेन व्याप्रियन्ते । अथ यां काञ्चन क्रियां उपादाय करणत्वमुच्यते; एवं तर्हि भ्रूदरादेरपि उत्क्षेपादिसम्भवात् करणत्वं स्यात् । किञ्च—इन्द्रियाणां स्वविषये नियतत्वाद् नान्येन्द्रियकार्यं अन्यद् इन्द्रियं कर्तुमलम्, तथाहि—चक्षुरेव रूपावलोकनाय अलम्, न तदभावे श्रोत्रादीनि । यस्तु रसाद्युपलम्भे शीतस्पर्शादिः अपि उपलम्भः स सर्वव्यापित्वात् स्पर्शनेन्द्रियस्य इति अनाशङ्कनीयम्, इह [2]पुनः पाणिच्छेदेऽपि तत्कार्यस्य आदानलक्षणस्य दशनादिनाऽपि निर्वर्त्यमानत्वाद् यत्किञ्चिदेतत् । मनसस्तु सर्वेन्द्रियोपकारकत्वाद् अन्तःकरणत्वं इष्यत एव; तस्य च बाह्येन्द्रियविज्ञानोपघातेनैव गतार्थत्वाद् न पृथगुपादानमिति । प्रत्येकोपादानं च क्रमोत्पत्तिविज्ञानोपलक्षणार्थम् । तथा हि—येनैव इन्द्रियेण सह मनः संयुज्यते तदेव आत्मी[3]यविषयग्रहणाय प्रवर्तते, नेतरदिति । ननु च दीर्घशष्कुलीभक्षणादौ पञ्चानामपि विज्ञानानां यौगपद्येन उपलब्धिः अनुभूयते ?, नैतदस्ति, केवलिनोऽपि द्वावुपयोगौ न स्तः, आस्तां तावद् आरातीयभागदर्शिनः पञ्चोपयोगा इति । एतच्च अन्यत्र न्यक्षेण प्रतिपादितमिति नेह प्रतायते। यस्तु यौगपद्येन अनुभवाभासः स द्राग्वृत्तित्वाद् मनसो भवतीति । उक्तं च—

**''आत्मा सहैति मनसा मन इन्द्रियेण,**
**स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः ।**
**योगोऽयमेव मनसः किमगम्यमस्ति ?**
**यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा ॥** ''[　　]

इह च अयमात्मा इन्द्रियलब्धिमान् आदित्सितजन्मोत्पत्तिदेशे समयेन आहारपर्याप्तिं निर्वर्तयति, तदनन्तरमन्तर्मुहूर्तेन शरीरपर्याप्तिम्, ततोऽपि इन्द्रियपर्याप्तिं तावतैव कालेन; तानि च पञ्चेन्द्रियाणि स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणीति । तान्यपि द्रव्य-भावभेदात् प्रत्येकं द्विविधानीति । तत्र द्रव्येन्द्रियं निर्वृत्त्युपकरणभेदाद् द्विधा । निर्वृत्तिः अपि आन्तर-बाह्यभेदाद् द्विधैव ।

---

टि० १. **०साधारणत्वेन व्याप्रि०** क ग ॥ २. **तु पुनः** ख विना ॥ ३. **०यविषयगुणग्रहणाय** घ ॥

Δनिर्वर्त्यत इति निर्वृत्तिः । केन निर्वर्त्त्यते ?, कर्मणा । तत्र उत्सेधाङ्गुलासङ्ख्येयभागप्रमितानां शुद्धानां आत्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेन अवस्थिता या वृत्तिरभ्यन्तरा निर्वृत्तिः । तेष्वेव आत्मप्रदेशेषु इन्द्रियव्यपदेशभाग्[1] यः प्रतिनियतसंस्थानो निर्माणनाम्ना पुद्गलविपाकिना वर्धकिसंस्थानीयेन आरचितः कर्णशष्कुल्यादिविशेषः अङ्गोपाङ्गनाम्ना च[2] निष्पादित इति बाह्यनिर्वृत्तिः ।

तस्या एव निर्वृत्तेः द्विरूपाया येन उपकारः क्रियते तदुपकरणम्; तच्च इन्द्रियकार्यसमर्थम् । सत्यामपि (बाह्य)निर्वृत्तौ, अनुपहतायां (च) मसूराद्याकृतिरूपायां (आन्तर)निर्वृत्तौ Φतस्य उपघाताद् न पश्यति । तदपि निर्वृत्तिवद् द्विधा— बाह्यमाभ्यन्तरं

---

**टि०** १. ०**व्यपदेशभाक्षु यः** क ग च ॥ २. **तु** ख-चपुस्तके विना ॥

**वि०टि०** Δ तुलना—

"निर्वर्त्यत इति निर्वृत्तिः । सा द्वेधा बाह्याभ्यन्तरभेदात् । तत्र विशुद्धात्मप्रदेशवृत्तिरभ्यन्तरा; तस्यामेव कर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो बाह्या । उपक्रियतेऽनेनेत्युपकरणं । तदपि द्विविधं बाह्याभ्यन्तरभेदात् । तत्र बाह्यं पक्षपुटादि, कृष्णसारमण्डलाद्यभ्यन्तरं ।"इति **तत्त्वार्थश्लोकवार्त्तिके विद्यानन्दिः** ।

"**निर्वर्त्यत इति निर्वृत्तिः** कर्मणा या निर्वर्त्यत=निष्पाद्यते सा निर्वृत्तिरित्युपदिश्यति ।

**सा** द्वेधा **बाह्याभ्यन्तरभेदात्** सा निर्वृत्तिर्द्वेधा । कुतः ? बाह्याभ्यन्तरभेदात् । तत्र—

**विशुद्धात्मप्रदेशवृत्तिरभ्यन्तरा** । उत्सेधाङ्गुलस्याऽसङ्ख्येयभागप्रमितानां विशुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानमानावमानावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः ।

**तत्र नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो बाह्या** तेष्वात्मप्रदेशेषु इन्द्रियव्यपदेशभाक् यः प्रतिनियतसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः स बाह्या निर्वृत्तिः ।

**उपक्रियतेऽनेनेत्युपकरणं** येन निर्वृत्तेरुपकारः क्रियते तदुपकरणम् ।

**तद् द्विविधं पूर्ववत्** तदुपकरणं द्विविधं पूर्ववत् बाह्याभ्यन्तरभेदात् । तत्राभ्यन्तरं शुक्लकृष्णमण्डलम्, बाह्यमक्षिपत्रपक्ष्मद्वयादि । एवं शेषेष्वपीन्द्रियेषु ज्ञेयम् ।" इति **तत्त्वार्थराजवार्त्तिके भट्टाकलंकः** ।

"निर्वर्त्यते इति निर्वृत्तिः । केन निर्वर्त्यते ? कर्मणा । सा द्विविधा; बाह्याभ्यन्तरभेदात् । उत्सेधाङ्गुलासङ्ख्येयभागप्रमितानां शुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः । तेष्वात्मप्रदेशेष्विन्द्रियव्यपदेशभाक्षु यः प्रतिनियतसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः सा बाह्या निर्वृत्तिः । येन निर्वृत्तेरुपकारः क्रियते तदुपकरणम् । पूर्ववत् तदपि द्विविधम् । तत्राभ्यन्तरं कृष्णशुक्लमण्डलं, बाह्यमक्षिपत्रपक्ष्मद्वयादि । एवं शेषेष्वपीन्द्रियेषु ज्ञेयम् ।"

इति **तत्त्वार्थसर्वार्थसिद्धौ पूज्यपादः** ॥

Φ "**तस्य** इति उपकरणस्य" जै०वि०प० ॥

चेति । तत्र अभ्यन्तरमक्ष्णस्तावत् कृष्णशुक्लमण्डलम्, बाह्यमपि पत्र-पक्ष्मद्वयादि; एवं शेषेष्वपि आयोजनीयमिति ।

भावेन्द्रियं अपि लब्ध्युपयोगभेदाद् द्विधा । तत्र लब्धिः ज्ञान-दर्शनावरणीय-क्षयोपशमरूपा; यत्सन्निधानाद् आत्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते तन्निमित्तः[1] आत्मनो मनःसाचिव्याद् अर्थग्रहणं प्रति व्यापार उपयोग इति । तदत्र सत्यां लब्धौ निर्वृत्त्युपकरणोपयोगाः, सत्यां च निर्वृत्तौ उपकरणोपयोगौ, सति उपकरणे उपयोग इति ।

एतेषां च श्रोत्रादीनां कदम्ब-मसूर-कलम्बुकापुष्प[Φ]-क्षुरप्र-नानासंस्थानता अवगन्तव्येति । विषयश्च श्रोत्रेन्द्रियस्य द्वादशभ्यो योजनेभ्य आगतं शब्दं गृह्णाति, चक्षुरपि एकविंशतिषु लक्षेषु सातिरेकेषु व्यवस्थितं प्रकाशकम्[2][≠], प्रकाश्यं तु सातिरेक-योजनलक्षव्यवस्थितं रूपं गृह्णाति, शेषाणि तु नवभ्यो योजनेभ्य आगतं स्वविषयं गृह्णन्ति, जघन्यतस्तु अङ्गुलासङ्ख्येयभागविषयत्वं सर्वेषाम् ।

अत्र च '**सोयपन्नाणेहिं[3] परिहायमाणेही**'त्यादि य उत्पत्तिं प्रति व्यत्ययेन इन्द्रियाणां उपन्यासः स एवमर्थं द्रष्टव्यः[4]—इह सञ्ज्ञिनः पञ्चेन्द्रियस्य उपदेशदानेन अधिकृतत्वाद् उपदेशश्च श्रोत्रेन्द्रियविषय इति कृत्वा, तत्पर्याप्तौ च सर्वेन्द्रियपर्याप्तिः[5] सूचिता भवति । श्रोत्रादिविज्ञानानि च वयोऽतिक्रमे परिहीयन्ते । तदेव आह—

'**अभिकंतमि**'त्यादि । अथवा श्रोत्रादिविज्ञानैरपचितैः करणभूतैः सद्भिः **अभिकंतं च खलु वयं स पेहाए** । तत्र प्राणिनां कालकृता शरीरावस्था यौवनादिः **वयः**, तज्जरामभि मृत्युं वा क्रान्तम्=**अभिक्रान्तम्** । इह हि चत्वारि वयांसि कुमार-यौवन-मध्यम-वृद्धत्वानि । उक्तं च—

> **"प्रथमे वयसि नाधीतं, द्वितीये नार्जितं धनम् ।**
> **तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति ? ॥"**[ ]

तत्र आद्यवयोद्वयातिक्रमे जराभिमुखमभिक्रान्तं वयो भवति । अथवा[6] त्रीणि वयांसि कौमार-यौवन-स्थविरत्वभेदात् । उक्तं च—

---

टि० १. **तन्निमित्तमात्मनो** घ ॥ २. **प्रकाशम्** ग घ ॥ ३. **सोयपरिन्नाणेहिं** घ-ङपुस्तके ॥ ४. **प्रतिपत्तव्यः** ग ॥ ५. **सर्वेन्द्रियसम्प्राप्तिः** ख ॥ ६. **अन्यथा वा** च ॥

**वि०टि० Φ** "**कलम्बुकापुष्पं** काहलिका" स०वि०प० ॥ ≠ "**प्रकाशम्** इति आदित्यादि" जै०वि०प० ॥

**"पिता रक्षति कौमारे, भर्ता रक्षति यौवने ।**
**पुत्राश्च स्थाविरे भावे, न स्त्री स्वातन्त्र्यमर्हति ॥"**

**[ मनुस्मृ०९/३, महा०अनुशा०४६/१४ ]**

अन्यथा वा त्रीणि वयांसि, बाल-मध्यत्व-वृद्धत्वभेदात् । उक्तं च–

**"आ षोडशाद् भवेद् बालो, यावत् क्षीरान्नवर्तकः ।**
**मध्यमः सप्ततिं यावत्, परतो वृद्ध उच्यते ॥"** [ ]

एतेषु च वयस्सु सर्वेष्वपि या उपचयवती अवस्था तामभिक्रान्तोऽभिक्रान्तवया[१] इत्युच्यते । **चः** समुच्चये, न केवलं श्रोत्र-चक्षुः-घ्राण-रसन-स्पर्शनविज्ञानैः व्यस्तसमस्तैः देशतः सर्वतो वा परिहीयमाणैः मौढ्यमापद्यते । **वयश्च**[२] अभिक्रान्तं **प्रेक्ष्य**=पर्यालोच्य, **स** इति प्राणी, **खलुः** इति विशेषणे, विशेषेण अत्यर्थं मौढ्यमापद्यत इति । आह च–

**तओ से** इत्यादि । **ततः** इति तस्माद् इन्द्रियविज्ञानापचयाद् वयोऽतिक्रमणाद् वा, **स** इति प्राणी, **एकदा** इति वृद्धावस्थायां, **मूढभावः**=मूढत्वं किङ्कर्तव्यताभावं आत्मनो **जनयति** । अथवा **से**=तस्य असुभृतः श्रोत्रादिविज्ञानानि परिहीयमाणानि **मूढभावं जनयन्ती**ति । स एवं वार्द्धक्ये मूढस्वभावः सन् प्रायेण लोकावगीतो भवति इत्याह–

## जेहिं वा सद्धिं संवसति ते व णं एगया णियगा पुव्विं परिवदंति, सो वा ते णियगे पच्छा परिवदेज्जा ।

**'जेहिं वे'**त्यादि । **वाशब्दः** पक्षान्तरद्योतकः, आस्तां तावदपरो लोकः, **यैः** पुत्र-कलत्रादिभिः **सार्धं**=सह **संवसति त एव** भार्या-पुत्रादयो, **णमि**ति वाक्यालङ्कारे, **एकदा** इति वृद्धावस्थायां **नियगाः**=आत्मीया ये तेन समर्थावस्थायां **पूर्वमेव** पोषिताः ते तं **परिवदन्ति** परिः-समन्ताद् वदन्ति[३]=परिवदन्ति; यथा–'अयं न म्रियते [४]नापि मञ्चकं ददाति' । यदि वा **परिवदन्ति** परिभवन्तीत्युक्तं भवति । अथवा 'किमनेन वृद्धेन ?' इत्येवं परिवदन्ति । न केवलमेषाम्, तस्य आत्माऽपि तस्यां अवस्थायां अवगीतो भवतीति । आह च–

**"वलिसन्ततमस्थिशेषितं, शिथिलस्नायुवृतं[५] कडेवरम् ।**
**स्वयमेव पुमान् जुगुप्सते, किमु कान्ता कमनीयविग्रहा ?॥"** [ ]

---

टि० १. **तामतिक्रान्तवया** क ख । **तामभिक्रान्तोऽतिक्रान्तवया उच्यते** ग । **तामतिक्रान्तो-ऽतिक्रान्तवया** च ॥ २. **०श्चातिक्रान्तं** घआदर्शमृते ॥ ३. **वदन्ति यथा** खप्रत्या विना ॥ ४. **न च** क घ ङ ॥ ५. **०स्नायुधृतं** च ॥

गोपाल-बाला-ऽङ्गनादीनां च दृष्टान्तद्वारेण उपन्यस्तोऽर्थो बुद्धिं अधितिष्ठतीति; अतस्तदाविर्भावनाय कथानकम्–

**कौशाम्ब्यां** नगर्यामर्थवान् बहुपुत्रो **धनो** नाम सार्थवाहः । तेन च एकाकिना नानाविधैरुपायैः स्वापतेयमुपार्जितम् । तच्च अशेषदुःखितबन्धुजन-स्वजन-पुत्र-मित्र-कलत्रादिभोग्यतां निन्ये । ततोऽसौ कालपरिपाकवशाद् वृद्धभावमुपगतः[1] सन् पुत्रेषु सम्यक्पालनोपचितकलाकुशलेषु समस्तकार्यचिन्ताभारं निश्चिक्षेप । तेऽपि च 'वयमनेन ईदृशीं अवस्थां नीताः सर्वजनाग्रेसरा विहिताः' इति कृतोपकाराः सन्तः कुलपुत्रतां अवलम्बमानाः स्वतः क्वचित् कार्यव्यासङ्गात् स्वभार्याभिस्तमकल्यं Φ वृद्धं प्रत्यजजागरन् । [2]ता अपि उद्वर्तन-स्नान-भोजनादिना यथाकालमक्षूणं विहितवत्यः । ततो गच्छत्सु दिवसेषु वर्द्धमानेषु पुत्रभाण्डेषु प्रौढीभवत्सु भर्तृषु जरद्वृद्धे च विवशकरणपरिचारे सर्वाङ्गकम्पिनि गलदशेषश्रोतसि सति शनैः शनैः उचितं उपचारं शिथिलतां निन्युः । असौ अपि मन्दप्रतिजागरणतया [3]चित्ताभिमानेन विश्रसया च सुतरां दुःखसागरावगाढः सन् पुत्रेभ्यः स्नुषाक्षूणानि आचचक्षे । ताश्च स्वभर्तृभिः चेखिद्यमानाः सुतरामुपचारं परिहृतवत्यः; सर्वाश्च पर्यालोच्य एकवाक्यतया स्वभर्तृनभिहितवत्यः 'क्रियमाणेऽपि अयं प्रतिजागरणे वृद्धभावाद् विपरीतबुद्धितया अपह्नुते । यदि भवतामपि अस्माकमुपरि अविश्रम्भस्ततोऽन्येन विश्वसनीयेन निरूपयत' । तेऽपि तथैव चक्रुः । तास्तु तस्मिन्नवसरे [4]सर्वा अपि सर्वाणि कार्याणि यथाऽवसरं विहितवत्यः । असावपि पुत्रैः पृष्टः पूर्वविरू[?रु]क्षितचेताः तथैव ता अपवदति–'नैता मम किञ्चित् सम्यक् कुर्वन्ती'ति । [5]तैश्च प्रत्ययिकवचनाद् अवगततत्त्वैः यथा अयं उपचर्यमाणोऽपि वार्द्धक्याद् रोरुद्यते, अतस्तैरपि अवधीरितः, अन्येषामपि [6]कथावसरे [7]तद्भण्डन[8]स्वभावतां आचचक्षिरे । ततोऽसौ पुत्रैः अवधीरितः स्नुषाभिः परिभूतः परिजनेन अवगीतो वाङ्मात्रेणापि केनचिदपि अननुवर्त्यमानः [9]सुखिते ⊕ दुःखितः कष्टतरां आयुःशेषां अवस्थां अनुभवतीति ।

एवमन्योऽपि जराभिभूतविग्रहः तृणकुब्जीकरणेऽपि असमर्थः सन् स्व-कार्यैकनिष्ठाल्लोकात् परिभवं आप्नोतीति, आह च–

---

**टि०** १. **०मुपागतः** घ ङ ॥ २. **ता अमुमुद्वर्तन०** घ ङ ॥ ३. **चिंताभिमानेन** च ॥ ४. **सर्वा एवं सर्वाणि** ख च ॥ ५. **तैस्तु** ख च ग ॥ ६ **यथावसरे** ख ङ च ॥ ७. **तद्धटन०** क ङ । **तद्धण्टन०** ख ग घ ॥ ८. **०स्वभावमा०** ख ॥ ९. **सुखितेषु** ग ॥

**वि०टि०** Φ "**अकल्य[ म् ]** इति सरोगम्" जै०वि०प० ॥ ⊕"**सुखिते** इति शेषलोके" जै०वि०प० ॥

"गात्रं सङ्कुचितं गतिर्विगलिता दन्ताश्च नाशं गता,
दृष्टिर्भ्रश्यति रूपमेव ह्रसते वक्त्रं च लालायते ।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते,
धिक् कष्टं जरयाऽभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥"[ ] इत्यादि ।

तदेवं जराभिभूतं पुरुषं निजाः परिवदन्ति । असावपि परिभूयमानः तद्विरक्तचेताः[1] तदपवादान् जनाय आचष्टे, आह च–

**सो वा** इत्यादि । **वाशब्दः** पूर्वापेक्षया पक्षान्तरं दर्शयति, ते वा निजाः तं परिवदन्ति, **स वा** जराजर्जरितदेहः **तान् निजान्** अनेकदोषोद्घट्टनतया **परिवदेत्**=निन्देत् । अथवा विद्यमानार्थतया तान् असौ अवगायति, परिभवतीत्यर्थः । येऽपि पूर्वकृतधर्मवशात् तं वृद्धं न परिवदन्ति तेऽपि तद्दुःखापनयनसमर्था न भवन्तीति, आह च–

**णालं ते तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा । से ण हासाए, ण किड्डाए, ण रतीए, ण विभूसाए ॥६४॥**

**नालमित्यादि** । **नालं**= न समर्थाः **ते** पुत्र-कलत्रादयः **तव** इति प्रत्यक्षभावं उपगतं वृद्धं आह । '**त्राणाय शरणाय वे**'ति तत्र आपत्तरणसमर्थं त्राणं उच्यते, यथा महाश्रोतोभिरुह्यमानः सुकर्णधाराधिष्ठितं प्लवमासाद्य आपस्तरतीति। शरणं पुनर्यदवष्टम्भाद् निर्भयैः स्थीयते तदुच्यते, तत् पुनर्दुर्गं पर्वतः पुरुषो वेति । एतदुक्तं भवति–जराभिभूतस्य न कश्चित् **त्राणाय शरणाय वा, त्वमपि तेषां नालं त्राणाय शरणाय वे**ति । उक्तं च–

"**जन्म-जरा-मरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।**
**जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥**" [**प्रशम० १५२**] इत्यादि ।

स तु[2] तस्यामवस्थायां किम्भूतो[3] भवति ? इति, आह–

**'से ण हस्साए'** इत्यादि । **स** जराजीर्णविग्रहो **न हास्याय** भवति, तस्यैव हसनीयत्वाद् न परान् हसितुं योग्यो भवतीत्यर्थः । स च समक्षं परोक्षं वा एवमभिधीयते जनैः–'किं किलास्य हसितेन हास्यास्पदस्य' इति । **न** च **क्रीडायै** न च लङ्घन–वल्गना–ऽऽस्फोटनक्रीडानां योग्योऽसौ भवति । **नापि रत्यै** भवति, रतिरिह विषयगता गृह्यते, सा पुनः ललनावगूहनादिका, तथाभूतोऽपि अवजुगूहिषुः स्त्रीभिः अभिधीयते–'न लज्जते भवान्, न पश्यति आत्मानम्, नावलोकयति शिरः पलितभस्मावगुण्डितम्, मां दुहितृभूतां

---

टि० १. तद्व्यतिरिक्तचेता० घ ङ च ॥ २. च ख ग ॥ ३. किंगुणो ख ॥

अवगूहितुमिच्छति[1]' इत्यादिवचसां आस्पदत्वाद् न रत्यै भवति । **न विभूषायै**, यतो विभूषितोऽपि प्रततचर्मवलीकस्तु[2] नैव शोभते । उक्तं च–

> "**न विभूषणमस्य युज्यते, न च हास्यं कुत एव विभ्रमः ।**
> **अथ तेषु च वर्तते जनो, ध्रुवमायाति परां प्रपञ्चताम्[3] ॥**"[　　　]
> "**जं जं करेइ तं तं न सोहए जोव्वणे अतिक्कंते ।**
> **पुरिसस्स महिलियाए एक्कं धम्मं पमोत्तूणं ॥**"[　　　]॥६४॥

गतं अप्रशस्तमूलस्थानम् । साम्प्रतं प्रशस्तं उच्यते– **इच्चेवमि**त्यादि । अथवा यत एवं ते सुहृदो नालं त्राणाय वा[4] शरणाय वा अतः किं विदध्याद् ? इति आह–

**[सू० ] इच्चेवं समुट्ठिते अहोविहाराए अंतरं च खलु इमं सपेहाए धीरे मुहुत्तमवि णो पमादए ।**

**इच्चेवमि**त्यादि । **इतिः** उपप्रदर्शने[5], 'अप्रशस्तमूलगुणस्थाने वर्त्तमानो जराभिभूतो न हास्याय न क्रीडायै न रत्यै न विभूषायै, प्रत्येकं च शुभा-ऽशुभकर्मफलं प्राणिनां' **इति एवं** मत्वा **समुत्थितः**=सम्यगुत्थितः **शस्त्रपरिज्ञो**क्तं मूलगुणस्थानमधितिष्ठन्, अहो इत्याश्चर्ये, विहरणं=विहारः, आश्चर्यभूतो विहारः=**अहोविहारः** यथोक्तसंयमानुष्ठानम्, तस्मै अहो-विहाराय उत्थितः सन् क्षणमपि **नो[6] प्रमादयेद्** इत्युत्तरेण सण्टङ्कः[7] । किञ्च–

**अंतरं चे**त्यादि । **अन्तरम्** इति अवसरः, तच्च आर्यक्षेत्र-सुकुलोत्पत्ति-बोधिलाभ-सर्वविरत्यादिकम्, **चः** समुच्चये, **खलुः** अवधारणे, **'इममि'**ति अनेन इदमाह–विनेयः तपः-संयमादौ अवसीदन् प्रत्यक्षभावापन्नं आर्यक्षेत्रादिकं अन्तरमवसरं उपदर्श्य अभिधीयते–'तव अयं एवम्भूतोऽवसरोऽनादौ संसारे पुनरतीव सुदुर्लभ एवेति; अतस्तमवसरं **सम्प्रेक्ष्य**=पर्यालोच्य **धीरः**[8] सन् **मुहूर्तम**प्येकं **नो[9] प्रमादयेत्**=न प्रमादवशगो भूयादि'ति । **सम्प्रेक्ष्य** इत्यत्र अनुस्वारलोपः छान्दसत्वादिति, अन्यदपि अलाक्षणिकं एवंजातीयं अस्मादेव हेतोरवगन्तव्यमिति । आन्तर्मौहूर्तिकत्वाच्च छाद्मस्थिकोपयोगस्य **मुहूर्तम्** इत्युक्तम्, अन्यथा समयमप्येकं न प्रमादयेद् इति वाच्यम् । तदुक्तम्–

> "**सम्प्राप्य मानुषत्वं संसारासारतां च विज्ञाय ।**
> **हे जीव ! किं प्रमादान्न चेष्टसे शान्तये सततम् ?॥**"

---

**टि०** १. ०**मिच्छसि ?** खआदर्शं विना ॥ २. ०**वलीकः सन् नैव** ख ग घ ङ। ०**वलीकः स नैव** च ॥ ३. **विडम्बनाम्** ग विना ॥ ४. **वा** इति खप्रतावेव ॥ ५. ०**ने, यतोऽप्रशस्त**० क-चप्रती विना ॥ ६. **न** क-घ ॥ ७. **सम्बन्धः** घ ङ ॥ ८. **वीरः** क च ॥ ९. **न** ख च ऋते ॥

"ननु पुनरिदमतिदुर्लभमगाधसंसारजलधिविभ्रष्टम् ।
मानुष्यं खद्योतक-तडिल्लताविलसितप्रतिमम् ॥" [ ] इत्यादि ।

किमर्थं च नो प्रमादयेत् ? इत्याह–

**वओ अच्चेति जोव्वणं व ॥ ६५॥**

[1]**वयो अच्चेइ** त्ति । **वयः** कुमारादि, तद् **अत्येति** अतीव एति याति=अत्येति । अन्यच्च–**जोव्वणं व** त्ति, 'अत्येति' अनुवर्तते, **यौवनं वा अत्येति**=अतिक्रामति । 'वयो'ग्रहणेनैव यौवनस्य गतत्वात् तदुपादानं प्राधान्यख्यापनार्थम्, धर्मा-ऽर्थ-कामानां तन्निबन्धनत्वात् सर्ववयसां यौवनं [2]साधीयः, तदपि त्वरितं यातीति । उक्तं च–

"**नइवेगसमं चवलं च जीवियं जोव्वणं च कुसुमसमं ।**
**सोक्खं च जं अणिच्चं तिण्णि वि तुरमाणभोज्जाइं ॥**" **[तन्दु०वैचा०प्रकी०८१]**

तद् एवं मत्वा अहोविहाराय उत्थानं श्रेय इति ॥६५॥ ये पुनः संसाराभिष्वङ्गिणोऽसंयम-जीवितमेव बहुमन्यन्ते; ते किम्भूता भवन्ति ? इत्याह–

**[सू०] जीविते इह जे पमत्ता से हंता छेत्ता भेत्ता लुंपित्ता विलुंपित्ता उद्दवेत्ता उत्तासयित्ता अकडं करिस्सामि त्ति मण्णमाणे ।**

**जीविए** इत्यादि । ये तु वयोऽतिक्रमणं नावगच्छन्ति; ते **इह** [3]इति अस्मिन् असंयम**जीविते प्रमत्ताः**=अध्युपपन्ना विषय-कषायेषु प्रमाद्यन्ति । प्रमत्ताश्च अहर्निशं परितप्यमानाः कालाकालसमुत्थायिनः सन्तः सत्त्वोपघातकारिणीः क्रियाः समारभन्त इति । आह च–

**से हंता** इत्यादि । **से** इति अप्रशस्तगुणमूलस्थानवान् विषयाभिलाषी प्रमत्तः सन् स्थावर-जङ्गमानामसुमतां **हन्ता** भवतीति । अत्र च बहुवचनप्रक्रमेऽपि जात्यपेक्षया एकवचननिर्देश इति । तथा **छेत्ता** इति कर्ण-नासिकादीनाम्, [4]**भेत्ता** शिरो-नयनोदरादीनाम्, **लुम्पयिता** ग्रन्थिच्छेदादिभिः, **विलुम्पयिता** ग्रामघातादिभिः, **अपद्रावयिता** प्राणव्यपरोपको विष-शस्त्रादिभिः अपद्रावयिता वा, **उत्त्रासको** लोष्टप्रक्षेपादिभिः । स किमर्थं हननादिकाः

टि० १. वए ख ॥ २. साधीयः साधुः, तदपि च ॥ ३. इत्यस्मिन् संयम० च ॥ ४. भेत्ता शिरो-दशनादीनाम् ख । भेत्ता नयन-शिरो-दशनादीनाम् च ॥

क्रियाः करोति ? इत्याह–

**अकडं** इत्यादि । **अकृतम्** इति यदन्येन नानुष्ठितं तदहं **करिष्यामि इत्येवं मन्यमानो**ऽर्थोपार्जनाय हननादिषु प्रवर्तते । स एवं क्रूरकर्मातिशयकारी समुद्रलङ्घनादिकाः क्रियाः कुर्वन्नपि अलाभोदयाद् अपगतसर्वस्वः किम्भूतो भवति ? इत्याह–

**जेहिं वा सद्धिं संवसति ते व णं एगया णियगा पुव्विं पोसेंति, सो वा ते णियगे पच्छा पोसेज्जा । णालं ते तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा ॥६६॥**

**जेहिं वे**त्यादि । **वा**शब्दः भिन्नक्रमः पक्षान्तरद्योतकः, **यैः** माता-पितृ-स्वजनादिभिः **सार्धं संवसति** असौ; **त एव** वा, **णमि**ति वाक्यालङ्कारे, **एकदा** इति अर्थनाशाद्यापदि शैशवे वा, **निजाः**=आत्मीया बान्धवाः सुहृदो वा, [1]**पुव्विं**=पूर्वमेव, तं सर्वोपायक्षीणं **पोषयन्ति, स वा** प्राप्तेष्टमनोरथलाभः सन् **तान् निजान् पश्चात् पोषयेत्** अर्थदानादिना सन्मानयेदिति । ते च पोषकाः पोष्या वा तव आपद्गतस्य न त्राणाय भवन्ति इत्याह–

**नालं** इत्यादि । **ते** निजाः माता-पित्रादयः, **तव** [2]इति उपदेशदानविषयापन्न उच्यते, **त्राणाय**=आपद्रक्षणार्थं **शरणाय**=निर्भयस्थित्यर्थं **नालं**=न समर्थाः, **त्वमपि तेषां त्राण-शरणे** कर्तुं **नालमि**ति ॥६६॥

तदेवं तावत् स्वजनो न त्राणाय भवति इत्येतत् प्रतिपादितम् । अर्थोऽपि महता [3]क्लेशेन उपार्जितो रक्षितश्च न त्राणाय भवति इत्येतत् प्रतिपिपादयिषुराह–

**[सू०] उवादीतसेसेण वा संणिहिसण्णिचयो कज्जति इहमेगेसिं माणवाणं भोयणाए । ततो से एगया रोगसमुप्पाया समुप्पज्जंति ।**

**उवादीत०** इत्यादि । **उपादिते**ति "[4]**अद भक्षणे**"[पा०धा०२/१०११] इत्येतस्माद् उपपूर्वाद् निष्ठाप्रत्ययः, तत्र "**बहुलं छन्दसि**"[पा०व्या०७/४/७८] इतीडागमः, **उपादितम्**=उपभुक्तम्, तस्य **शेषम्**=उपभुक्तशेषम्, तेन वा, **वा**शब्दाद् अनुपभुक्तशेषेण वा । सन्निधानं=सन्निधिः, तस्य सन्निचयः=**सन्निधिसन्निचयः**, अथवा सम्यग् निधीयते=अवस्थाप्यत उपभोगाय योऽर्थः स सन्निधिः, तस्य सन्निचयः=प्राचुर्यम्,

---

**टि०** १. **पूर्वं** ख ॥ २. **इत्युपदेशविषया०** खप्रतिमृते ॥ ३. **क्लेशेनोपात्तो** कआदर्शमृते ॥ ४. **अदंप्सा भक्षणे** घ ङ ॥

उपभोग्यद्रव्यनिचय इत्यर्थः । स **इह**=अस्मिन् संसारे **एकेषाम्** असंयतानां संयताभासानां वा केषाञ्चिद् **भोजनाय**=उपभोगार्थं **क्रियते**=विधीयते इति । असावपि यदर्थं अनुष्ठितः अन्तरायोदयात् तत्सम्पत्तये न प्रभवति इत्याह–

**तओ से** इत्यादि । **ततः** द्रव्यसन्निधिसन्निचयाद् उत्तरकालं उपभोगावसरे **से**=तस्य बुभुक्षोः **एकदा** इति द्रव्य-क्षेत्र-काल-भावनिमित्ताविर्भावितवेदनीयकर्मोदये **रोगसमुत्पादाः** =ज्वरादिप्रादुर्भावाः **समुत्पद्यन्त** इति आविर्भवन्ति ।

स च तैः कुष्ठ-राजयक्ष्मादिभिरभिभूतः सन् भग्ननासिको गलत्पाणि-पादः अविच्छेदप्रवृत्तश्वासाकुलः किम्भूतो भवति ? इत्याह–

**जेहिं वा सद्धिं संवसति ते व णं एगदा णियगा पुव्विं परिहरंति, सो वा ते णियए पच्छा परिहरेज्जा । णालं ते तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा ॥६७॥**

**जेहिं** इत्यादि । **यैः** माता-पित्रादिभिर्निजैः **सार्द्धं संवसति त एव** वा **निजाः एकदा** रोगोत्पत्तिकाले **पूर्वमेव** तं **परिहरन्ति, स वा तान् निजान् पश्चात्** परिभवोत्था-पितविवेकः **परिहरेत्**=त्यजेत्, तन्निरपेक्षः **सेडुक**वत् स्यादित्यर्थः । ते च स्वजनादयो रोगोत्पत्तिकाले परिहरन्तोऽपरिहरन्तो वा न त्राणाय भवन्तीति दर्शयति[1]–

**नालमि**त्यादि पूर्ववत् ॥६७॥ रोगाद्यभिभूतान्तःकरणेन च अपगतत्राणेन च किमालम्ब्य सम्यक्करणेन रोगवेदनाः सोढव्याः ? इत्याह–

**[ सू० ] एवं जाणित्तु दुक्खं पत्तेयं सातं अणभिक्कंतं च खलु वयं सपेहाए खणं जाणाहि पंडिते !**

**जाणित्तु** इत्यादि । **ज्ञात्वा प्रत्येकं** प्राणिनां **दुःखं** तद्विपरीतं **सातं** वा अदीनमन-स्केन ज्वरादिवेदनोत्पत्तिकाले स्वकृतकर्मफलमवश्यमनुभवनीयमिति मत्वा न वैक्लव्यं कार्यमिति । उक्तं च–

**"सह कलेवर ! खेदमचिन्तयन्[2], स्ववशता हि पुनस्तव दुर्लभा ।**
**बहुतरं च सहिष्यसि जीव[3] हे !, परवशो न च तत्र गुणोऽस्ति ते ॥"** [ ]

यावच्च श्रोत्रादिविज्ञानैः परिहीयमानैः जराजीर्णं न निजाः परिवदन्ति यावच्च

---

टि० १. दर्शयितुमाह ग ॥ २. दुःखमचिन्तयन् ग घ ङ॥ ३. कर्म हे ! कआदर्शमृते ॥

अनुकम्पया न पोषयन्ति रोगाभिभूतं च न परिहरन्ति तावद् आत्मार्थोऽनुष्ठेय इत्येतद् दर्शयति—

**अणभिक्कंतं च** इत्यादि । **च**शब्द आधिक्ये, **खलु**शब्दः पुनरर्थे[1], पूर्वमभिक्रान्तं वयः ...ीक्ष्य मूढभावं व्रजतीति प्रतिपादितम् । **अनभिक्रान्तं च** पुनः **वयः सम्प्रेक्ष्य आयट्ठं समणुवासेज्जा** इत्युत्तरेण सम्बन्धः, **आत्मार्थम्**=आत्महितं **समनुवासयेत्** कुर्यादित्यर्थः । किं अनभिक्रान्तवयसा एव आत्महितं अनुष्ठेयं उत अन्येनापि ? इति, अपरेणापि लब्धावसरेण आत्महितं अनुष्ठेयमिति एतद् दर्शयति—

**खणं जाणाहि पंडिए ! । क्षणः**=अवसरो धर्मानुष्ठानस्य, स च आर्यक्षेत्र-सुकुलोत्पत्त्यादिकः । परिवाद-पोषण-परिहारदोषदुष्टानां ⊕जरा-बालभाव-रोगाणामभावे सति तं **क्षणं जानीहि**=अवगच्छ **पण्डित** !=आत्मज्ञ ! । अथवा अवसीदन् शिष्यः प्रोत्साह्यते—हे अनतिक्रान्तयौवन ! परिवादादिदोषत्रयास्पृष्ट ! **पण्डित** ! द्रव्य-क्षेत्र-काल-भावभेदभिन्नं **क्षणम्**=अवसरं एवंविधं **जानीहि**=अवबुध्यस्व । तथा हि—

द्रव्यक्षणः=द्रव्यात्मकः अवसरो जङ्गमत्व-पञ्चेन्द्रियत्व-विशिष्टजाति-कुल-रूप-बला-ऽऽरोग्या-ऽऽयुष्कादिको मनुष्यभावः संसारोत्तरणसमर्थचारित्रावाप्तियोग्यः त्वया अवाप्तः, स च अनादौ संसारे पर्यटतः असुमतः दुरापो भवति, अन्यत्र तु नैतत् चारित्रमवाप्यते । तथा हि—देव-नारकभवयोः सम्यक्त्व-श्रुतसामायिके एव, तिर्यक्षु च कस्यचिद् देशविरतिरेव इति ।

क्षेत्रक्षणः=क्षेत्रात्मकः अवसर, यस्मिन् क्षेत्रे चारित्रमवाप्यते । तत्र सर्वविरति-सामायिकस्य अधोलौकिकग्रामसमन्वितं तिर्यक्क्षेत्रमेव, तत्रापि अर्धतृतीयद्वीप-समुद्राः, तत्रापि पञ्चदशसु कर्मभूमिषु, तत्रापि भरतक्षेत्रमपेक्ष्य अर्धषड्विंशेषु जनपदेषु इत्यादिकः क्षेत्रक्षणः क्षेत्ररूपः अवसरः अधिगन्तव्यः । अन्यस्मिंश्च क्षेत्रे आद्ये एव सामायिके ।

कालक्षणस्तु कालरूपः क्षणः=अवसरः, स च अवसर्पिण्यां तिसृषु समासु सुषमदुःषमा-दुःषमसुषमा-दुःषमाख्यासु, उत्सर्पिण्यां तु तृतीय-चतुर्थारकयोः सर्वविरति-सामायिकस्य भवति । एतच्च प्रतिपद्यमानकं प्रत्यभ्यधायि, पूर्वप्रतिपन्नास्तु सर्वत्र तिर्यगूर्ध्वाधोलोके सर्वासु च समासु द्रष्टव्याः ।

भावक्षणस्तु द्वेधा—कर्मभावक्षणो नोकर्मभावक्षणश्च । तत्र कर्मभावक्षणः कर्मणां उपशम-क्षयोपशम-क्षयान्यतरावाप्तावसर उच्यते । तत्र उपशमश्रेण्यां चारित्रमोहनीये

---

**टि० १. अवधारणे** ख । **पुनःशब्दार्थे** ग च ॥

**वि०टि०** ⊕"**जरा-बाल०** इति पाश्चात्यैः यथासङ्ख्येन त्रिभिः संयोगः" जै०वि०प० ॥

उपशमिते अन्तर्मौहूर्तिकः औपशमिकचारित्रक्षणो भवति । तस्यैव मोहनीयस्य क्षयेण अन्तर्मौहूर्तिक एव छद्मस्थयथाख्यातचारित्रक्षणो भवति । क्षयोपशमेन क्षायोपशमिकचारित्रावसरः, स च उत्कृष्टतो देशोनां पूर्वकोटिं यावद् अवगन्तव्यः ।

सम्यक्त्वक्षणस्तु अजघन्योत्कृष्टस्थितौ आयुषः वर्तमानस्य, शेषाणां तु कर्मणां पल्योपमासङ्ख्येयभागन्यूनान्तःसागरोपमकोटीकोटिस्थितिकस्य जन्तोर्भवति । स च अनेन क्रमेणेति— ग्रन्थिकसत्त्वेभ्योऽभव्येभ्योऽनन्तगुणया शुद्ध्या विशुद्ध्यमानो मति-श्रुत-विभङ्गान्यतरसाकारोपयुक्तः शुद्धलेश्यात्रिकान्यतरलेश्यः[1] अशुभकर्मप्रकृतीनां चतुःस्थानिकं रसं द्विस्थानिकतां आपादयन् शुभानां च द्विस्थानिकं चतुःस्थानिकतां नयन्, बध्नंश्च ध्रुवप्रकृतीः परिवर्तमानाश्च भवप्रायोग्या बध्नन्निति। ध्रुवकर्मप्रकृतयश्च इमाः—पञ्चधा ज्ञानावरणीयं नवधा दर्शनावरणीयं मिथ्यात्वं कषायषोडशकं भयं जुगुप्सा तैजस-कार्मणशरीरे वर्ण-गन्ध-रस-स्पर्शा-ऽगुरुलघु-उपघात-निर्माणनामानि पञ्चधा अन्तरायम्, एताः सप्तचत्वारिंशद् ध्रुवप्रकृतयः, आसां सर्वदा बध्यमानत्वात् । मनुष्य-तिरश्चोः अन्यतरः प्रथमं सम्यक्त्वं उत्पादयन् एता [2]ऐकविंशतिं परिवर्तमाना बध्नाति, तद्यथा—देवगत्या-नुपूर्वीद्वय-पञ्चेन्द्रियजाति-वैक्रियशरीराऽङ्गोपाङ्गद्वय-समचतुरस्रसंस्थान-पराघात-उच्छ्वास-प्रशस्तविहायोगति-त्रसादिदशक-सातावेदनीय-उच्चैर्गोत्ररूपा इति । देव-नारकास्तु मनुष्यगत्यानुपूर्वीद्वय-औदारिकद्वय-प्रथमसंहननसहितानि [3]शुभानि बध्नन्ति । तमतमानारकास्तु तिर्यग्गत्यानुपूर्वीद्वय-नीचैर्गोत्रसहितानीति । [4]तदध्यवसायोपपन्नः सन् आयुष्कं अबध्नन् यथाप्रवृत्तेन करणेन ग्रन्थिं आसाद्य अपूर्वकरणेन भित्त्वा मिथ्यात्वस्य अन्तरकरणं विधाय अनिवृत्तिकरणेन सम्यक्त्वं अवाप्नोति । तत ऊर्ध्वं क्रमेण क्षीयमाणे कर्मणि प्रवर्धमानेषु कण्डकेषु देशविरत्यादेः अवसर इति ।

नोकर्मभावक्षणस्तु आलस्य-मोहा-ऽवर्णवाद-स्तम्भाद्यभावे सम्यक्त्वाद्यवाप्त्यवसरः इति । आलस्यादिभिस्तु उपहतो लब्ध्वाऽपि संसारलङ्घनक्षमं मनुष्यभवं बोध्यादिकं नाप्नोतीति । उक्तं च—

> **"आलस्स मोहऽवण्णा थंभा कोहा पमाय [5]किवणत्ता ।**
> **भय [6]सोगा अण्णाणा वक्खेव कुतूहला रमणा ॥**
> **एएहिँ कारणेहिं लद्धूण सुदुल्लहं पि माणुस्सं ।**
> **न लहइ सुइं हियकरिं संसारुत्तारणिं जीवो ॥"**

**[आव०नि०८४१-४२, उत्तरा०नि०१६०-६२]**

---

**टि०** १. ०लेश्यासु च शुभ० ख ॥ २. **एकविंशतिः** च ॥ ३. **शुद्धानि** क ॥ ४. **तदध्यवसायः सन्ना०** ख ॥ ५. **किविणत्ता** ख ॥ ६. **सोगो** क ॥

तदेवं चतुर्विधोऽपि क्षण उक्तः, तद्यथा—द्रव्यक्षणः जङ्गमत्वादिविशिष्टं मनुष्यजन्म, क्षेत्रक्षणः आर्यक्षेत्रम्, कालक्षणः धर्मचरणकालः, भावक्षणः क्षयोपशमादिरूप इति; एवम्भूतं अवसर अवाप्य आत्मार्थं समनुवासयेदिति उत्तरेण सम्बन्धः । किञ्च—

**जाव सोतपण्णाणा अपरिहीणा जाव णेत्तपण्णाणा अपरिहीणा जाव घाणपण्णाणा अपरिहीणा जाव जीहपण्णाणा अपरिहीणा जाव फासपण्णाणा अपरिहीणा, इच्चेतेहिं विरूवरूवेहिं पण्णाणेहिं अपरिहीणेहिं आयट्ठं सम्मं समणुवासेज्जासि त्ति बेमि ॥६८॥**

**॥ लोगविजयस्स पढमो उद्देसओ सम्मत्तो ॥**

**जाव** इत्यादि । **यावदस्य** विशरारोः कायापशदस्य **श्रोत्रविज्ञानानि** जरसा रोगेण वा **अपरिहीनानि** भवन्ति; एवं नेत्र-घ्राण-रसन-स्पर्शनविज्ञानानि न विषयग्रहणस्वभावतया मान्द्यं प्रतिपद्यन्ते, **इत्येतैः विरूपरूपैः** इष्टा-ऽनिष्टरूपतया नानारूपैः **प्रज्ञानैः**= प्रकृष्टैः ज्ञानैः [1]**अपरिहीयमाणैः** सद्भिः किं कुर्यात् ? इत्याह—

**आयट्ठं** इत्यादि । आत्मनोऽर्थः=**आत्मार्थः**, स च ज्ञान-दर्शन-चारित्रात्मकः, अन्यस्तु अनर्थ एव । अथवा आत्मने हितं प्रयोजनम्=[2]**आत्मार्थम्**; तच्च चारित्रानुष्ठानमेव । अथवा आयतः [3]अपर्यवसानाद् मोक्ष एव, स चासौ अर्थश्च=आयतार्थः, अतस्तम्, यदि वा आयतः=मोक्षः अर्थः=प्रयोजनं यस्य दर्शनादित्रयस्य तत् तथा । [4]**समनुवासयेः** इति "[5]**वस निवासे**"[पा०धा०१/१००५] इति अस्माद्धेतुमण्णिजन्ताल्लिट्सिप्, **सम्यग्** यथोक्तानुष्ठानेन **अनु**=पश्चाद् अनभिक्रान्तं वयः सम्प्रेक्ष्य क्षणम्=अवसरं प्रतिपद्य श्रोत्रादिविज्ञानानां [6]च अप्रहीणतां अधिगम्य तत **आत्मार्थं समनुवासयेः**=आत्मनि विदध्याः । अथवा "**अर्थवशाद् विभक्ति-पुरुषपरिणामः**" इति कृत्वा तेन [7]वा आत्मार्थेन ज्ञान-दर्शन-चारित्रात्मकेन आत्मानं समनुवासयेत्=भावयेद् रञ्जयेत्, आयतार्थं वा [8]मोक्षार्थं सम्यग् अपुनरागमनेन अनु इति यथोक्तानुष्ठानात् पश्चा[9]दात्मना समनुवासयेत्=अधिष्ठापयेत्, इतिः परिसमाप्तौ, **ब्रवीमि** इति **सुधर्मस्वामी जम्बूस्वामिनं** इदमाह यद् भगवता [10]**वर्धमानस्वामिना** अर्थतोऽभ्यधायि तदेव अहं सूत्रात्मना वच्मीति ॥६८॥

**॥ [11]लोकविजयस्य प्रथम उद्देशकः समाप्तः ॥छ॥**

---

**टि०** १. **अपरिक्षीयमाणैः** ख विना ॥ २. **०आत्मार्थः** ख च ॥ ३. **अपर्यवसानो मोक्ष** क ॥ ४. **समनुवासयेत्** क च ॥ ५. **वसु** ख ॥ ६. **वाऽ०** ग च ॥ ७. **चाऽऽ०** ग ङ च ॥ ८. **मोक्षाख्यं** कपुस्तकमृते ॥ ९. **०दात्मानं** ग ॥ १०. **वीरवर्द्धमान०** ग । **श्रीवर्धमान०** घ ङ ॥ ११. **द्वितीयाध्ययनस्य प्रथमोद्देशक इति** ख च । **लोकविजयस्य** इति पाठः कआदर्श एव ॥

## ॥ द्वितीय उद्देशकः ॥

उक्तः प्रथमोद्देशकः । साम्प्रतं द्वितीयव्याख्या प्रतन्यते । अस्य च अयमभिसम्बन्धः—इह विषय-कषाय-माता-पित्रादिलोकविजयेन मोक्षावाप्तिहेतुभूतं चारित्रं यथा सम्पूर्णभावं अनुभवति एवंरूपः अध्ययनार्थाधिकारः प्राग् निरदेशि । तत्र मातापित्रादिलोकविजयेन रोग-जराद्यनभिभूतचेतसा आत्मार्थः=संयमोऽनुष्ठेय इत्येतत् प्रथमोद्देशके अभिहितम् । इहापि तस्मिन्नेव संयमे वर्तमानस्य कदाचिन्मोहनीयोदयाद् अरतिः स्यात्, अज्ञान-कर्म-लोभोदयाद् वा अध्यात्मदोषेण संयमे न दृढत्वं भवेद् इत्यतः अरत्यादिव्युदासेन यथा संयमे दृढत्वं भवति तथा अनेन प्रतिपाद्यते । अथवा यथा अष्टप्रकारं कर्म्म अपहीयते तथा अस्मिन्नध्ययने प्रतिपाद्यते इति अध्ययनार्थाधिकारे अभ्यधायि; तत् च कथं क्षीयते ? इत्याह—

### [ सू० ] अरतिं आउट्टे से मेधावी खणंसि मुक्के ॥६९॥

**अरइं**[1] **आउट्टे से मेहावी** । अस्य च अनन्तरसूत्रेण सम्बन्धो वाच्यः, स चायम्—**आयट्ठं समणुवासेज्जासि**[2] [सू०६८] आत्मार्थ=संयमं सम्यक् कुर्यात्, तत्र कदाचिद् अरत्युद्भवो भवेत् तदर्थमाह—**अरइं**[3] इत्यादि । परम्परसूत्रसम्बन्धस्तु '**खणं जाणाहि पंडिए !**' [सू०६८] क्षणं चारित्रावसरं अवाप्य अरतिं न कुर्याद् इत्याह—**अरइं** इत्यादि । आदिसूत्रसम्बन्धस्तु '**सुतं मे आउसं ! तेणं भगवया एवमक्खायं**'[सू०१], किं तत् श्रुतम् ? इत्याह—**अरइं आउट्टे से मेहावी** ।

रमणं=रतिः, तदभावः=**अरतिः**, तां पञ्चविधाचारविषयां मोहोदयात् कषायाभिष्वङ्गजनितां माता-पितृ-कलत्राद्युत्थापितां **स** इति अरतिमान् **मेधावी** विदितासारसंसारस्वभावः सन् **आवर्तेत**=अपवर्तेत, निवर्तयेद् इत्युक्तं भवति । संयमे चारतिः न विषयाभिष्वङ्गरतिमृते ✡**कण्डरीक**स्येव इति; अत इदमुक्तं भवति—विषयाभिष्वङ्गे रतिं निवर्तेत । निवर्तनं चैवं उपजायते—यदि दशविधचक्रवालसामाचारीविषया रतिः उत्पद्यते **पौण्डरीक**स्येव इति; ततश्च इदमपि उक्तं भवति—संयमे रतिं कुर्वीत । तद्विहितरतेस्तु न किञ्चिद् बाधायै नापि इह अपरसुखोत्तरबुद्धिरिति, आह च—

> "**क्षितितलशयनं वा प्रान्तभैक्षाशनं वा,**

---

टि० १. अरई ग ॥ २. ०**सि त्ति बेमि आत्मार्थं** ख ॥ ३. **अरई** ग च ॥

**वि०टि०** ✡ दृश्यतां **ज्ञाताधर्मकथाङ्गे** एकोनविंशतितमं **कण्डरीक-पौण्डरीकज्ञातम्** ॥

**सहजपरिभवो वा नीचदुर्भाषितं वा ।**
**महति फलविशेषे नित्यमभ्युद्यतानां,**
**न मनसि न शरीरे दुःखमुत्पादयन्ति ॥" [ ]**

**"तणसंथारनिसण्णो वि मुणिवरो भट्ठराग-मय-मोहो ।**
**जं पावइ मुत्तिसुहं कत्तो तं चक्कवट्टी वि ? ॥" [संस्ता०प्रकी०४८]** इत्यादि ।

अत्र हि चारित्रमोहनीयक्षयोपशमाद् अवाप्तचारित्रस्य पुनरपि तदुदयाद् अवदिधाविषोः अनेन सूत्रेण उपदेशो दीयते । तच्च अवधावनं संयमाद् यैः हेतुभिः भवति तान् **निर्युक्तिकारो** गाथया आचष्टे–

[नि०] **बितिउद्देसे अदढो [1]उ संजमे कोइ होज्ज अरईए ।**
**अन्नाण-कम्म-लोभादिएहिँ अज्झत्थदोसेहिं**⊕ **॥१९८॥**

[2]▷॥ लोगविजयस्स निज्जुत्ती ॥◁

**बीउद्देसे** [3]गाहा । इह हि **प्रथमोद्देशके** बह्व्यो निर्युक्तिगाथा अस्मिंस्तु इयम् एकैव इत्यतो मन्दबुद्धेः स्यादारेका यथा–'इयमपि तत्रत्यैव इति'; अतो विनेयसुखप्रतिपत्त्यर्थं **द्वितीयोद्देशक**ग्रहणमिति । **कश्चित् कण्डरीक**देशीयः **संयमे** सप्तदशभेदभिन्ने **अदृढः**= शिथिलो मोहनीयोदयाद् अरत्युद्भवाद् भवेत् । [4]मोहनीयोदयोऽपि **आध्यात्मिकैः दोषैः** भवेत् । ते च आध्यात्मिका दोषा अज्ञान-लोभादयः, [5]आदिशब्दाद् इच्छा-मदनकामानां परिग्रहः, मोहस्य अज्ञान-लोभ-कामाद्यात्मकत्वात्, तेषां च आध्यात्मिकत्वादिति गाथार्थः ॥१९८॥

ननु चारतिमतो मेधाविनोऽनेन सूत्रेणोपदेशो दीयते यथा– संयमारतिं अपवर्तेत, मेधावी चात्र विदितसंसारस्वभावो विवक्षितः, यश्च एवम्भूतो नासौ अरतिमान्, तद्वांश्चेद् न विदितवेद्य इत्यनयोः सहानवस्थानलक्षणेन विरोधेन [6]विरोधः, छाया-ऽऽतपयोरिव नैकत्र अवस्थानम् । उक्तं च–

**"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः ।**
**तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ? ॥"** [ ] इत्यादि ।

---

**टि०** १. **य** ञ ॥ २. ▷----◁ एतच्चिन्हान्तर्वर्ती पाठः ख-छ-जप्रतिषु नास्ति, एतच्चिन्हमध्यस्थपाठस्थाने च झआदर्शे **द्वितीयोद्देशकं ( कः । ) द्वितीयमध्ययनं समाप्तः ( प्तम् ? )** ॥ इति पाठः प्राप्यते ॥ ३. **गाहा । अत्र च प्र०** ख ङ ॥ ४. **मोहोदयो०** ख च ॥ ५. **आदिग्रहणाद्** ख च ॥ ६. **विरोधात् छाया०** क-खप्रती विना ॥

**वि०टि०** ⊕ "इयं गाथा द्वि० ऽध्य० द्वि० उद्दे० । तृ०-च०-पं०-षष्ठोद्देशकानां निर्युक्तिर्नास्ति ।" ठटिप्पणी ॥

यो हि अज्ञानी मोहोपहतचेताः[1] स विषयाभिष्वङ्गात् संयमे सर्वद्वन्द्वप्रत्यनीके रत्यभावं विदध्यात् । आह च–

**"अज्ञानान्धाश्चटुलवनितापाङ्गविक्षेपितास्ते,**
**कामे सक्तिं दधति विभवाभोगतुङ्गार्जने वा ।**
**विद्वच्चित्तं भवति हि महन्मोक्षमार्गैकतानं,[2]**
**नाल्पस्कन्धे विटपिनि कषत्यंसभित्तिं गजेन्द्रः ॥"** [ ]

नैतन्मृष्यामहे, यतो हि अवाप्तचारित्रस्य अयमुपदेशो दित्सितः; चारित्रावाप्तिश्च न ज्ञानमृते, तत्कार्यत्वाच्चारित्रस्य । न च ज्ञाना-ऽरत्योः विरोधः, अपि तु रत्यरत्योः; ततश्च संयमगता रतिरेव अरत्या बाध्यते, न ज्ञानम्; अतो ज्ञानिनोऽपि चारित्रमोहनीयोदयात् संयमे स्यादेव अरतिः, यतो ज्ञानमपि अज्ञानस्यैव बाधकम्, न संयमारतेः । तथा चोक्तम्–

**"ज्ञानं भूरि यथार्थवस्तुविषयं स्वस्य द्विषो बाधकं,**
**रागारातिशमाय ⊕हेतुमपरं युङ्क्ते न कर्तृ स्वयम् ।**
**दीपो यत् तमसि व्यनक्ति किमतो रूपं स एवेक्षतां,**
**सर्वः स्वं विषयं प्रसाधयति हि प्रासङ्गिकोऽन्यो विधिः ॥"** [ ]

तथा इदमपि भवतो न कर्णविवरमगाद् यथा–

**"बलवानिन्द्रियग्रामः पण्डितोऽप्यत्र मुह्यति ॥"** [ ] इति ।

अतो यत्किञ्चिदेतत् । अथवा न अरत्यापन्न एव एवमुच्यते, अपि तु अयमुपदेशो मेधावी संयमविषये मा विधादरतिमिति । संयमारतिनिवृत्तश्च सन् कं गुणमवाप्नोति ? इत्याह–

**खणंसि मुक्के** । परमनिरुद्धः कालः=**क्षणः**[3] पट्टशाटिकापाटनदृष्टान्तसमयप्रसाधितः, तत्र **मुक्तः** । विभक्तिपरिणामाद् वा **क्षणेन** अष्टप्रकारेण कर्मणा संसारबन्धनैर्वा[4] विषयाभिष्वङ्ग-स्नेहादिभिः **मुक्तो भरत**[5]वदिति ॥६९॥

ये पुनरनुपदेशवर्तिनः **कण्डरीका**द्याः ते चतुर्गतिकसंसारान्तर्वर्तिनो दुःखसागरं अधिवसन्ति इत्याह च–

---

**टि०** १. **मोहनीयोपहत०** क ॥ २. **महामोक्ष०** ख च ॥ ३. **क्षणः जरत्पट्ट०** ग च ॥ ४. **वा विमुक्तः स्नेहाभिष्वङ्गादिभिर्मुक्तः** ख ॥ ५. **भरतादिवदिति** च ॥

**वि०टि०** ⊕ "**हेतुम्** इति वैराग्यादि" जै०वि०प० ॥

**[सू० ] अणाणाए पुट्ठा वि एगे णियट्टंति मंदा मोहेण पाउडा । 'अपरिग्गहा भविस्सामो' समुट्ठाए लद्धे कामेऽभिगाहति ।**

**अणाणाए** इत्यादि । आज्ञाप्यत इत्याज्ञा हिता-ऽहितप्राप्ति-परिहाररूपतया सर्वज्ञोपदेशः, तद्विपर्ययोऽनाज्ञा, तया **अनाज्ञया** सत्या **स्पृष्टाः** परीषहोपसर्गैः; **अपिशब्दः** सम्भावनायाम्, स च भिन्नक्रमः, **निवर्तन्त** इति अस्मादनन्तरं द्रष्टव्यः । **एके** मोहनीयोदयात् **कण्डरीकादयः**, न सर्वे, संयमात् समस्तद्वन्द्वोपशमरूपाद् **निवर्तन्ते अपि** इति; सम्भाव्यत एतद् मोहोदयाद्[1] इति अपिशब्दार्थः । किम्भूताः सन्तो निवर्तन्ते ? इत्याह- **मन्दाः**=जडा अपगतकर्तव्या-ऽकर्तव्यविवेकाः । कुत एवम्भूताः ? यतो **मोहेन प्रावृताः**, **मोहः** अज्ञानं मिथ्यात्वमोहनीयं वा, तेन **प्रावृताः**=अवगुण्ठिताः । उक्तं च-

**"अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि[2] सर्वपापेभ्यः ।**
**अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ॥"** [ ] इत्यादि ।

तदेवं अवाप्तचारित्रोऽपि कर्मोदयात्[3] परीषहोदये कृतलिङ्गपश्चाद्भावतां अवलम्बत इत्युक्तम् । अपरे तु स्वरुचिविरचितवृत्तयो नानाविधैः उपायैः लोकादर्थं[4] जिघृक्षवः किल वयं संसारोद्विग्ना मुमुक्षवः तेषु तेषु आरम्भविषयाभिष्वङ्गेषु प्रवर्तन्त इति दर्शयति-

**अपरिग्गहा** इत्यादि । परिः=समन्ताद् मनो-वाक्-कायकर्मभिः गृह्यत इति परिग्रहः, स येषां नास्ति इति **अपरिग्रहाः** 'एवम्भूता वयं **भविष्यामः**' इति **शाक्या**दिमतानुसारिणः स्वयूथ्या वा **समुत्थाय**=चीवरादिग्रहणं प्रतिपद्य ततो **लब्धान् कामान् अभिगाहन्ते** =सेवन्ते, तिङ्व्यत्ययेन चैकवचनमिति । अत्र च अन्त्यव्रतोपादानात् शेषाण्यपि ग्राह्याणि- 'अहिंसका वयं भविष्यामः', एवं अमृषावादिन इत्यादि[5] आयोज्यम् ।

तदेवं शैलूषा इव अन्यथावादिनः अन्यथाकारिणः कामार्थमेव तांस्तान् प्रव्रज्याविशेषान् बिभ्रति । उक्तं च-

**"स्वेच्छाविरचितशास्त्रैः प्रव्रज्यावेषधारिभिः क्षुद्रैः ।**
**नानाविधैरुपायैरनाथवन्मुष्यते लोकः ॥"** [ ] इत्यादि ।

तदेवं प्रव्रज्यावेषधारिणो लब्धान् कामानवगाहन्ते; तल्लाभार्थं च तदुपायेषु प्रवर्तन्ते इत्याह-

**अणाणाए मुणिणो पडिलेहेंति ।**

---

टि० १. **मोहोदयस्य इत्यपि** ख ॥ २. **मोहादिभ्यो०** ख ॥ ३. **कर्मोदयाङ्गीकृतलिङ्गपश्चाद्भा०** ग ॥ ४. **लोकं जिघृ०** ख । **लोकार्थं** क ॥ ५. **इत्यप्यायोज्यम्** ख ॥

**एत्थ मोहे पुणो पुणो सण्णा णो हव्वाए णो पाराए ॥७०॥**

**अणाणाए** इत्यादि । **अनाज्ञया** स्वैरिण्या बुद्ध्या **मुनय** इति मुनिवेषविडम्बिनः कामोपायान् **प्रत्युपेक्षन्ते** कामोपायारम्भेषु पौनःपुण्येन लगन्तीति । आह च–

**एत्थ** इत्यादि । **अत्र**=अस्मिन् विषयाभिष्वङ्गा–ऽज्ञानमये भाव**मोहे पौनःपुण्येन सन्नाः**=विषण्णा निमग्नाः पङ्कावमग्ना नागा इव आत्मानं आक्रष्टुं नालमिति । आह च–

**नो हव्वाए नो पाराए** । यो हि मध्येमहानदीपूरं निमग्नो भवति असौ नारातीयतीराय नापि पारेमहानदीपूरमिति; एवमत्रापि कुतश्चिन्निमित्तात् त्यक्तगृह-गृहिणी-पुत्र-धन-धान्य-हिरण्य-रत्न-कुप्य-दासी-दासादिविभव[1]: आकिञ्चन्यं प्रतिज्ञाय आरातीय-तीरदेश्याद् गृहवाससौख्यात्[2] निर्गतः सन् **नो हव्वाए** त्ति भवति, पुनरपि वान्त-भोगाभिलाषितया यथोक्तसंयमाभावे[3] तत्क्रियाया विफलत्वात् **नो पाराए** त्ति भवति, उभयतो मुक्तबन्धना मुक्कोली[4]⊕ इव उभयभ्रष्टो न गृहस्थो नापि प्रव्रजित इत्युक्तं भवति । उक्तं च–

**"इन्द्रियाणि न गुप्तानि लालितानि नै वेच्छया[5] ।**
**मानुष्यं दुर्लभं प्राप्य न भुक्तं न विशोषितम् ॥"** [ ] इति ॥७०॥

ये पुनः अप्रशस्तरतिनिवृत्ताः प्रशस्तरतिं अधिशयानाः ते किम्भूता भवन्ति ? इत्याह–

**[सू०] विमुक्का हु ते जणा जे जणा पारगामिणो लोभमलोभेणं दुगुंछमाणो लद्धे कामे णाभिगाहति ।**

**विमुक्का** इत्यादि । विविधं अनेकप्रकारं द्रव्यतो धन-स्वजनानुषङ्गाद् भावतो विषय-कषायादिभ्यः अनुसमयं मुच्यमाना एव 'भाविनि भूतवदुपचाराद्' मुक्ताः=**विमुक्ताः ते जनाः ये जनाः** सर्वस्वजनभूता निर्ममत्वाः **पारगामिनो** भवन्ति, पारः=मोक्षः संसारार्णवतटवृत्तित्वात् तत्कारणानि ज्ञान-दर्शन-चारित्राण्यपि पार इति । भवति हि तादर्थ्यात् ताच्छब्द्यं यथा–तन्दुलान् वर्षति पर्जन्यः । अतस्तं पारं [6]▷ज्ञान-दर्शन-चारित्राख्यं गन्तुं शीलं येषां ते **पारगामिनः**, ते मुक्ता भवन्तीति पूर्वेण सम्बन्धः । कथं पुनः सम्पूर्णपारगामित्वं भवति ? इत्याह–

---

**टि०** १. ०विभवं ग ॥ २. **गृहपाशसौख्या०** क ॥ ३. ०**भावेन क्रियाया** घ ङ ॥ ४. **मुत्कोली** ग । **मुक्ताली** घ ङ ॥ ५. **न चेच्छया** क घ ङ । **च नेच्छया** ग ॥ ६. ▷----◁एतन्मध्यगः पाठः खआदर्शे नास्ति ॥

**वि०टि०** ⊕ "**मुक्कोली** इति मोट्टा [?]" जै०वि०प० । "उद्दे० २-**मुक्कोली** मोट्टा" स०वि०प० ॥

**लोभं** इत्यादि । [इह हि लोभः सर्वसङ्गानां दुस्त्यजो भवति]। तथा हि—क्षपकश्रेण्यन्तर्गतस्य अपगताशेषकषायस्यापि खण्डशः क्षिप्यमाणोऽपि[1] अनुबध्यत इति; अतस्तं **लोभं** तद्विपक्षेण **अलोभेन जुगुप्समानः**=निन्दन् परिहरन्, किं करोति? इत्याह—

**लद्धे कामे** इत्यादि । **लब्धान्**=प्राप्तान् इच्छा-मदनरूपान् **कामान् नाभिगाहते**=न सेवते । यो हि शरीरादावपि निवृत्तलोभः स कामाभिष्वङ्गवान् न भवति **ब्रह्मदत्ता**मन्त्रि-**तचित्र**वद् इति । प्रधाना-ऽन्त्यलोभपरित्यागेन च उपसर्जना-ऽधस्तनपरित्यागो दृष्टव्यः, तद्यथा—क्रोधं क्षान्त्या जुगुप्समानः, मानं मार्दवेन, माया आर्जवेन इत्याद्यपि आयोज्यम् । लोभोपादानं तु सर्वकषायप्राधान्यख्यापनार्थम्[2], तथा हि—तत्प्रवृत्तः साध्या-ऽसाध्य-विवेकविकलः कार्या-ऽकार्यविचाररहितः सन्नर्थैकदत्तदृष्टिः पापोपादानमास्थाय सर्वाः क्रिया अधितिष्ठतीति । तदुक्तम्—

"**धावेइ रोहणं तरइ सायरं भमइ गिरिणिगुंजेसुं ।**
**मारेइ बंधवं पि हु पुरिसो जो होइ धणलुद्धो ॥**
**अडइ बहुं वहइ भरं सहइ छुहं पावमायरइ धट्ठो ।**
**कुल-सील-जाइपच्चट्ठिइं[3] च लोभदुओ चयइ ॥**" [ ] इत्यादि ।

तदेवं कुतश्चिन्निमित्तात् सहापि लोभादिना निष्क्रम्य पुनर्लोभादिपरित्यागः कार्यः । अन्यस्तु लोभं विनाऽपि प्रव्रज्यां प्रतिपद्यत इति दर्शयति—

## विणा वि लोभं निक्खम्म एस अकम्मे जाणति पासति, पडिलेहाए णावकंखति, ≠एस अणगारे त्ति पवुच्चति ॥७१॥

**विणा वि लोभमित्यादि** । कश्चित् **भरतादिः** निःशेषतो लोभापगमात्, **विनापि लोभं निष्क्रम्य**=प्रव्रज्यां प्रतिपद्य, पाठान्तरं वा **विणइत्तु लोभं** सञ्ज्वलनसञ्ज्ञकमपि **लोभं विनीय**=निर्मूलतोऽपनीय, **एष** एवम्भूतः सन् **अकर्मा**=अपगतघातिकर्मचतुष्टया-[4]विर्भूतानावरणज्ञानो विशेषतो **जानाति**, सामान्यतः **पश्यति** । एतदुक्तं भवति—एवम्भूतः लोभो येन तत्क्षये मोहनीयक्षयः, मोहनीयक्षये च अवश्यम्भावी घातिकर्मक्षयः, तस्मिंश्च निरावरणज्ञानसद्भावः, ततोऽपि भवोपग्राहिकर्मापगम इति; अतो लोभापगमे अकर्मा इत्युक्तम् । यतश्च एवम्भूतो लोभो दुरन्तः तद्धानौ चावश्यं कर्मक्षयः ततः किं कर्तव्यम्?

---

टि० १. **क्षिप्यमाणो०** ख च ॥ २. **०ख्यापनार्थमुपाददे, तथाहि** कप्रतिमृते ॥ ३. **०जायपच्चयठिइं** ग ङ । **०जाइपच्चयधिइं** य । **०जायपच्चयथिइं** च ॥ ४. **०चतुष्टयः आविर्भूता०** ख ॥

**वि०टि०** ≠ वृत्तिकार**शीलाचार्यैः** एतद्सूत्रदलं न विवृत्तम् ॥

इत्याह—

पॅडिलेहाए[1] इत्यादि । **प्रत्युपेक्षणया** गुण-दोषपर्यालोचनया उपपन्नः सन्, अथवा लोभविपाकं **प्रत्युपेक्ष्य**=पर्यालोच्य तदभावे गुणं च, लोभं **नावकाङ्क्षति**=नाभिलषतीति ।

यश्च अज्ञानोपहतान्तःकरणः अप्रशस्तगुणमूलस्थानवर्ती विषय-कषायाद्यध्युपपन्नः[2] तस्य पूर्वोक्तं विपरीततया सर्वं सन्तिष्ठते । तथा हि—अलोभं लोभेन जुगुप्समानो लब्धान् कामान् अवगाहते, लोभं अनपनीय निष्क्रम्य पुनरपि लोभैकमनाः सकर्मा न जानाति नापि पश्यति, अपश्यंश्च अप्रत्युपेक्षणया अभिकाङ्क्षति । यच्च **प्रथमोद्देशके** अप्रशस्तगुणमूलस्थानं अवाचि तच्च वाच्यमिति ॥७१॥ आह च—

**[ सू० ] अहो य रातो य परितप्पमाणे कालाकालसमुट्ठायी संजोगट्ठी अट्ठालोभी आलुंपे सहसक्कारे विणिविट्ठचित्ते एत्थ सत्थे पुणो पुणो ॥७२॥**

**अहो य राओ य परितप्पमाणे** इत्यादि । **अहोरात्रं परितप्यमानः कालाकाल-समुत्थायी संयोगार्थी अर्थालोभी आलुम्पः सहसाकारो विनिविष्टचित्तः अत्र शस्त्रे**= पृथिवीकायाद्युपघातकारिणि **पौनःपुण्येन** वर्तते ॥७२॥ किञ्च—

**[ सू० ] से आतबले, से णातबले, से मित्तबले, से पेच्चबले, से देवबले, से रायबले, से चोरबले, से अतिथिबले, से किवणबले, से समणबले, इच्चेतेहिं विरूवरूवेहिं कज्जेहिं दंडसमादाणं सपेहाए भया कज्जति, पावमोक्खो त्ति मण्णमाणे अदुवा आसंसाए ॥७३॥**

**से आयबले** । आत्मनः बलं शक्त्युपचयः=**आत्मबलम्**, 'तन्मे भावी' इति कृत्वा नानाविधैः उपायैः आत्मपुष्टये ताः ताः क्रिया ऐहिका-ऽऽमुष्मिकोपघातकारिणीः[3] विधत्ते, तथा हि—मांसेन पुष्यते मांसं इति कृत्वा पञ्चेन्द्रियघातादावपि प्रवर्तते, अपराश्च आलुम्पनादिकाः क्रिया सूत्रेणैव अभिहिताः । एवं **तद् ज्ञातिबलं**[4]='स्वजनबलं मे भावी'ति; तथा '**तद् मित्रबलं** मे भविष्यति येन अहमापदं सुखेनैव निस्तरिष्यामि'; '**तत् प्रेत्यबलं** मे भविष्यती'ति बस्त्यादिकं उपहन्ति; 'तद्[5] वा **देवबलं** भावी'ति पचन-पाचनादिकाः क्रिया विधत्ते; '**राजबलं** वा मे भविष्यति' राजानं उपचरति[6]; 'चोरभागं वा समत्स्यामि' चौरान्

टि० १. पडिलेहए क ॥ २. ०कषायाध्युपपन्न० ख च । ०कषायाद्युपपन्न० ग ॥ ३. विदधाति ख ॥ ४. जातिबलं घ च ॥ ५. तथा देव० ख ग ॥ ६. ०ति । चौरग्रामे वा वसति चोरभागं ग ॥

उपचरति; '**अतिथिबलं** वा मे भविष्यति' अतिथीन् उपचरति, अतिथिः हि निस्पृहोऽभिधीयते इति । उक्तं च–

**"तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना ।**
**अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥"** [        ]

एतदुक्तं भवति–तद्बलार्थमपि प्राणिषु दण्डो न निक्षेप्तव्य इति । एवं **कृपण-श्रमणार्थ**मपि वाच्यमिति ।

एवं पूर्वोक्तैः **विरूपरूपैः**=नानाप्रकारैः पिण्डदानादिभिः **कार्यैः दण्डसमादानम्** इति दण्ड्यन्ते=व्यापाद्यन्ते प्राणिनो येन स दण्डः, तस्य सम्यग् आदानं ग्रहणं=समादानम्, 'तद् आत्मबलादिकं मम न अभविष्यद् यदि अहं एतद् न अकरिष्यम्' इत्येवं **सम्प्रेक्षया**=पर्यालोचनया, एवं सम्प्रेक्ष्य वा **भयात् क्रियते** । एवं तावद् इहभवं आश्रित्य दण्डसमादानकारणं उपन्यस्तम्; आमुष्मिकार्थमपि परमार्थं अजानानैः दण्डसमादानं क्रियत इति दर्शयति–

**पावमोक्खो त्ति** इत्यादि । पातयति [१]पांसयतीति वा पापम्, तस्माद् मोक्षः **पापमोक्षः, इति** हेतोः, यस्माद् मम भविष्यति [२]इति **मन्यमानः** दण्डसमादानाय प्रवर्तत इति । तथा हि– हुतभुजि षड्जीवोपघातकारिणि शस्त्रे नानाविधोपायप्राण्युप[३]घातात्त-पापविध्वंसनाय पिप्पल-शमी-समित्-तिला-ऽऽज्यादिकं शठव्युद्ग्राहितमतयो जुह्वति; तथा पितृपिण्डदानादौ बस्तादि[४]मांसोपस्कृतभोजनादिकं द्विजातिभ्य उपकल्पयन्ति; तद्भुक्तशेषानुज्ञातं स्वतोऽपि भुञ्जते । तदेवं नानाविधैः उपायैः अज्ञानोपहतबुद्धयः पापमोक्षार्थं दण्डोपादानेन ताः ताः क्रियाः प्राण्युपघातकारिणीः समारभमाणा अनेकभवशतकोटीदुर्मोचं अघमेव उपाददत इति । किञ्च–

**अदुवा** इत्यादि । पापमोक्ष इति मन्यमानो दण्डमादत्त इत्युक्तम् । **अथवा** आशंसनम्=**आशंसा** अप्राप्तप्रापणाभिलाषः, तदर्थं दण्डसमादानं आदत्ते । तथा हि–'मम एतत् परुत्परारि वा प्रेत्य वा उपस्थास्यते' इति आशंसया क्रियासु प्रवर्तते, राजानं वा अर्थाशाविमोहितमना अवलगति । उक्तं च–

**"आराध्य भूपतिमवाप्य ततो धनानि,**
**भोक्ष्यामहे किल वयं सततं सुखानि ।**

---

टि० १. **पासयतीति** क च ङ ॥ २. **इत्येवं मन्य०** ग ङ ख च ॥ ३. **०घातात् पाप०** ग च ॥ ४. **०मांसोपसंस्कृत०** ख-चप्रती विना ॥

**इत्याशया बत विमोहितमानसानां,**
**कालः प्रयाति मरणावधिरेव पुंसाम् ॥''** [ ]

**''एहि गच्छ पतोत्तिष्ठ, वद मौनं समाचर ।**
**इत्याद्याशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥''** [ ] इत्यादि ॥७३॥

तदेवं ज्ञात्वा किं कर्तव्यम् ? इत्याह—

**[सू०] तं परिण्णाय मेहावी णेव सयं एतेहिं कज्जेहिं दंडं समारभेज्जा, णेव अण्णं एतेहिं कज्जेहिं दंडं समारभावेज्जा, णेवऽन्ने एतेहिं कज्जेहिं दंडं समारभंते समणुजाणेज्जा ।**

**तं** इत्यादि । **तद्** इति सर्वनाम प्रक्रान्तपरामर्शि, तत् **शस्त्रपरिज्ञो**क्तं स्वकाय-परकायादिभेदभिन्नं शस्त्रं इह वा यदुक्तमप्रशस्तगुणमूलस्थानं विषय-कषाय-माता-पित्रादिकम्, तथा कालाकालसमुत्थान-क्षणपरिज्ञान[1]-श्रोत्रादिविज्ञानप्रहाणादिकम्, तथा आत्मबलाधानाद्यर्थं च दण्डसमादानं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च परिहरेत् **मेधावी**=मर्यादावर्ती। ज्ञातहेयोपादेयः सन् किं कुर्यात् ? इत्याह—

**नेव सयमि**त्यादि । **नैव स्वयम्** आत्मना **एतैः** आत्मबलाधानादिकैः **कार्यैः**=कर्तव्यैः [2]समुत्थितैः सद्भिः **दण्डं** सत्त्वोपघातं **समारभेत, नाप्यन्यम्** अपर**मेभिः कार्यैः** हिंसाऽनृतादिकं **दण्डं समारम्भयेत्**, तथा **समारभमाणमपि** अपरं योगत्रिकेण **न समनुज्ञापयेत्** ।

एष च उपदेशः तीर्थकृद्भिः अभिहित इति एतत् **सुधर्मस्वामी जम्बूस्वामिनं** आह इति दर्शयति—

**एस मग्गे आरिएहिं पवेदिते जहेत्थ कुसले णोवलिंपेज्जासि त्ति बेमि ॥७४॥**

**॥ लोगविजयस्स बिइओ उद्देसओ सम्मत्तो ॥**

**एस** इत्यादि । **एष** इति ज्ञानादियुक्तो भाव**मार्गो** योगत्रिक-करणत्रिकेण दण्डसमादानपरिहारलक्षणो वा, **आर्यैः** आराद् याताः सर्वहेयधर्मेभ्य इति आर्याः संसारार्णवतटवर्तिनः [3]क्षीणघातिकर्मांशाः संसारोदरविवरवर्तिभावविदः तीर्थकृतः, तैः प्रकर्षेण सदेव-मनुजायां परिषदि सर्वस्वभाषानुगामिन्या वाचा यौगपद्याशेषसंशीतिच्छेत्त्र्या **प्र**कर्षेण **वेदितः**=कथितः प्रतिपादित इति यावत् ।

एवम्भूतं [4]च मार्गं ज्ञात्वा किं कर्तव्यम् ? इत्याह—

---

**टि०** १. ०**क्षणापरिज्ञान**० ग ङ ॥ २. **समुपस्थितैः** ख च ॥ ३. **क्षीणकर्मांशाः** ख ॥ ४. **च धर्मं ज्ञात्वा** ख ॥

**जहेत्थ** इत्यादि । तेषु तेषु आत्मबलोपधानादिकेषु कार्येषु [1]समुत्थितेषु सत्सु दण्डसमुपादानादिकं परिहरन् **कुशलः** निपुणः अवगततत्त्वो **यथैतस्मिन्** दण्डसमुपादाने [2]स्वं आत्मानं **नोपलिम्पये:**=न तत्र संश्लेषं कुर्याः इति । विभक्तिपरिणामाद् वा एतेन दण्डसमुपादानजनितकर्मणा यथा नोपलिप्यसे तथा सर्वैः प्रकारैः कुर्याः त्वम्, **इति**शब्दः परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥७४॥

**॥ लोकविजये द्वितीय उद्देशकः समाप्तः ॥छ॥**

टि० १. समुपस्थितेषु ख ॥ २. त्वमात्मानं ख घ ङ ॥

## ॥ तृतीय उद्देशकः ॥

उक्तो द्वितीयोद्देशकः । साम्प्रतं तृतीय आरभ्यते । अस्य च अयमभिसम्बन्धः—इह अनन्तरोद्देशके 'संयमे दृढत्वं कार्यम्, असंयमे चादृढत्वम्' उक्तम्, तच्च उभयमपि कषायव्युदासेन सम्पद्यते । तत्रापि मानः उत्पत्तेः आरभ्य उच्चैर्गोत्रोत्थापितः स्यात्, अतस्तद्व्युदासार्थं इदमभिधीयते ।

अस्य च अनन्तरसूत्रेण सम्बन्धः—**'जहेत्थ कुसले [1]नोवलिप्पेज्जासि'** [सू०७४] कुशलः= निपुणः सन् अस्मिन् उच्चैर्गो[2]त्राभिमाने यथा आत्मानं नोपलिम्पयेः तथा विदध्याः त्वम्। किं मत्वा ? इति, अतस्तदभिधीयते—

**[सू०] से असइं उच्चागोए, असइं णीयागोए ।**

**णो हीणे, णो अतिरित्ते । णो पीहए ।**

**इति संखाए के गोतावादी ? के माणावादी ? कंसि वा एगे गिज्झे ?**

**तम्हा पंडिते णो हरिसे, णो कुज्झे ॥७५॥**

**से असइं उच्चागोए असइं नीचागोए** त्ति । **स** इति संसारी असुमान् **असकृत्** =अनेकशः **उच्चैर्गोत्रे** मान-सत्कारार्हे उत्पन्न इति शेषः; तथा **असकृत् नीचैर्गोत्रे** सर्वलोकावगीते पौनःपुन्येन उत्पन्न इति । तथा हि—

नीचैर्गोत्रोदयाद् अनन्तमपि कालं तिर्यक्षु आस्ते, तत्र च पर्यटन् द्विनवतिनामोत्तर-प्रकृतिसत्कर्मा सन् तथाविधाध्यवसायोपपन्नः आहारकशरीर-तत्सङ्घात-बन्धना-ऽङ्गोपाङ्ग-देवगत्यानुपूर्वीद्वय-नरकगत्यानुपूर्वीद्वय-वैक्रियचतुष्टयरूपा एता द्वादश कर्मप्रकृतीः निर्लेप्य अशीतिसत्कर्मा तेजो-वायुषु उत्पन्नः सन् मनुजगत्यानुपूर्वीद्वयमपि निर्लेप्य तत उच्चैर्गोत्रं उद्वलयति पल्योपमासङ्ख्येयभागेन; अतस्तेजो-वायुष्वा⊕द्य एव भङ्गकः, तद्यथा—नीचैर्गोत्रस्य बन्धः

---

टि० १. **नोवलिंपेज्जासि** ग ॥ २. **०त्राभिधाने** ख च ॥

**वि०टि०** ⊕ ''**आद्य एव** इति सप्तत्या[?]प्रकारप्रसिद्धगोत्रसम्बन्धे सप्तभङ्ग्य(ङ्गा)न् हृदि व्यवस्थाप्यासिस्व[?]वल्लिखति आ''जै०वि०प० ॥

| | | |
|---|---|---|
| ० | उ | उ |
| ० | उ | २ |
| उ | उ | २ |
| उ | नी | २ |
| नी | उ | २ |
| नी | नी | २ |
| नी | नी | नी |
| उ | उ | स[?उ] |

ङपुस्तके तु एतादृक् कोष्टकमुपलभ्यते—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| नी | नी | नी | उ | उ | ० | ० | बन्धः |
| नी | नी | उ | नी | उ | उ | उ | उदयः |
| नी | २ | २ | २ | २ | २ | उ | सत्ता |

उदयोऽपि तस्यैव ≠सत्कर्मताऽपीति । ततोऽपि उद्वृत्तस्य[१] अपरैकेन्द्रियगतस्य अयमेव भङ्गः । त्रसेषु अपि अपर्याप्तकावस्थायां अयमेव । अनिर्लेपिते तु[२] उच्चैर्गोत्रे द्वितीय-चतुर्थौ भङ्गौ, तद्यथा–नीचैर्गोत्रस्य बन्धः, उदयोऽपि तस्यैव, सत्कर्मता तु उभयरूपस्यैव इति द्वितीयः; तथा उच्चैर्गोत्रस्य बन्धः, नीचस्योदयः, सत्कर्मता तु उभयरूपस्य इति चतुर्थः । शेषास्तु चत्वारो न सन्त्येव तिर्यक्षु उच्चैर्गोत्रस्य उदयाभावादिति भावः ।

तदेवं उच्चैर्गोत्रोद्वलनेन [३]कालङ्कलीΔभावं [४]आपन्नः असङ्ख्येयमपि कालं ⊕सूक्ष्मत्रसेषु आस्ते । ततोऽपि उद्वृत्त उच्चैर्गोत्रोदयाभावे सति द्वितीय-चतुर्थभङ्गस्थः अनन्तमपि कालं तिर्यक्ष्वास्त इति; स च अनन्ता उत्सर्पिण्यवसर्पिणीः, आवलिकाकालासङ्ख्येयभागसमय-सङ्ख्यान् पुद्गलपरावर्तानिति ।

कीदृशः पुनः पुद्गलपरावर्तः ? इति, उच्यते–यदा औदारिक-वैक्रिय-तैजस[५]-भाषा-ऽऽनापान-मनः-कर्मसप्तकेन संसारोदरविवर्वर्तिनः[६] पुद्गला आत्मसात्परिणामिता भवन्ति तदा पुद्गलपरावर्त इत्येके । अन्ये तु द्रव्य-क्षेत्र-काल-भावभेदात् चतुर्धा वर्णयन्ति । प्रत्येकं असावपि बादर-सूक्ष्मभेदाद् द्वैविध्यं अनुभवति। तत्र द्रव्यतो बादरो यदा औदारिक-वैक्रिय-तैजस-कार्मणचतुष्टयेन सर्वपुद्गला गृहीत्वा उज्झिताः तदा भवति; सूक्ष्मः पुनः यदा एकशरीरेण सर्वपुद्गलाः स्पृष्टा भवन्ति तदा द्रष्टव्यः । क्षेत्रतो बादरो यदा क्रमोत्क्रमाभ्यां म्रियमाणेन[७] सर्वे लोकाकाशप्रदेशाः स्पृष्टा भवन्ति तदा विज्ञेयः; सूक्ष्मस्तु[८] यदा एकस्मिन् विवक्षिताकाशखण्डके मृतः पुनः यदा तस्य अनन्तरप्रदेशवृद्ध्या सर्वं लोकाकाशं व्याप्नोति तदा ग्राह्यः । कालतो बादरो यदा उत्सर्पिण्यवसर्पिणीसमयाः क्रमोत्क्रमाभ्यां म्रियमाणेन आलिङ्गिता भवन्ति तदा विज्ञेयः; सूक्ष्मस्तु उत्सर्पिणीप्रथमसमयाद् आरभ्य क्रमेण सर्वसमया म्रियमाणेन यदा छुप्ता[९] भवन्ति तदा अवगन्तव्यः । भावतो बादरो यदा अनुभागबन्धाध्यवसायस्थानानि क्रमोत्क्रमाभ्यां म्रियमाणेन व्याप्तानि भवन्ति तदा अभिधीयते, अनुभागबन्धाध्यवसायप्रमाणं तु संयमस्थानावसरे प्रागेव अभ्यधायीति;

---

**टि०** १. **०स्यान्यत्राप्यादावयमेव** च ॥ २. **तूच्चैर्गोत्रे द्वितीयो भङ्गकः, कस्यचित् प्रथमसमय एवापरस्यान्तर्मुहूर्तार्धो( द्वो )र्ध्वमुच्चैर्गोत्रसम्बन्धसद्भावे चतुर्थभङ्गकः, तद्यथा–नीचैर्गोत्रस्य बन्धः उदयोऽपि तस्यैव सत्कर्मता तूभयरूपस्यैवेति द्वितीयः, तथा** च ॥ ३. **कलङ्कली०** घ ङ ॥ ४. **आपन्नोऽनन्तं कालमेकेन्द्रियेष्वास्ते, अनुद्वलिते वा तिर्यक्ष्वास्तेऽनन्ता उत्सर्पिण्य०** ग घ ङ ॥ ५. **०तैजस-कार्मण-भाषा०** च ॥ ६. **०वर्तिना** ख ॥ ७. **०णेनालिङ्गिता भवन्ति तदा** ग ॥ ८. **०स्तु तदा विज्ञेयो यदै०** ख-च पुस्तके विना ॥ ९. **प्लुता** च ॥

**वि०टि०** ≠ ''**सत्कर्मताऽपीति** सत्ताऽपीति'' जै०वि०प० ॥ Δ ''**कलङ्कलीभाव** इति अरघट्टघटीयन्त्रन्यायेन'' जै०वि०प० ॥ ⊕ **सूक्ष्मत्रसेषु** = तेजो-वायुषु इति भावः ॥

सूक्ष्मस्तु जघन्यानुभागबन्धाध्यवसायस्थानाद् आरभ्य यदा सर्वेष्वपि क्रमेण मृतो भवति तदा अवसेय इति ।

तदेवं कालङ्कलीभावं आपन्नः ⊕अन्यो वा नीचैर्गोत्रोदयाद् अनन्तमपि कालं तिर्यक्षु आस्ते । मनुष्येष्वपि तदुदया[1]देव अवगीतः अवगीतेषु स्थानेषु उत्पद्यते । तथा [2]कालङ्कलीसत्त्वोऽपि द्वीन्द्रियादिषु उत्पन्नः सन् प्रथमसमये एव पर्याप्त्युत्तरकालं वा उच्चैर्गोत्रं बद्ध्वा मनुष्येषु असकृद् उच्चैर्गोत्रं आस्कन्दति । तत्र कदाचित् तृतीयभङ्गकस्थः पञ्चमभङ्गोपपन्नो वा भवति, ताविमौ— नीचैर्गोत्रं बध्नाति, उच्चैर्गोत्रस्योदयः, सत्कर्मता तु उभयस्य तृतीयः । पञ्चमस्तु उच्चैर्गोत्रं बध्नाति, तस्यैव उदयः सत्कर्मता तु उभयस्य । षष्ठ-सप्तमभङ्गौ तु उपरतबन्धस्य भवतः, अविषयत्वाद् न ताभ्यां इह अधिकारः । तौ चेमौ— बन्धोपरमे उच्चैर्गोत्रोदयः, सत्कर्मता तु उभयस्य इति षष्ठः । सप्तमस्तु शैलेश्यवस्थायां द्विचरमसमये नीचैर्गोत्रे क्षपिते उच्चैर्गोत्रोदयः, तस्यैव सत्कर्मता इति ।

तदेवं उच्चा-ऽवचेषु गोत्रेषु असकृद् उत्पद्यमानेन असुमता पञ्चभङ्गकान्तर्वर्तिना न मानो विधेयो नापि दीनतेति । तयोश्च उच्चा-ऽवचयोः गोत्रयोः बन्धाध्यवसाय-स्थानकण्डकानि तुल्यानि इत्याह—

**णो हीणे, णो अतिरित्ते** । यावन्ति उच्चैर्गोत्रे अनुभावबन्धाध्यवसायस्थान-कण्डकानि नीचैर्गोत्रेऽपि तावन्त्येव । तानि च सर्वाण्यपि असुमता अनादिसंसारे भूयो भूयः स्पर्शितानि । [3]तत उच्चैर्गोत्रकण्डकार्थतया असुभृद् **न हीनो** [4]**ना**पि **अतिरिक्तः**; एवं नीचैर्गोत्रकण्डकार्थतया अपीति ।

**नागार्जुनीया**स्तु पठन्ति—**एगमेगे खलु जीवे अतीयद्धाए [5]असइं उच्चागोए असइं नीयागोए, कंडगट्ठयाए नो हीणे [6]नो अइरित्ते ।**

[7]**एकैको जीवः, खलु**शब्दः वाक्यालङ्कारे, **अतीते** काले असकृद् उच्चा-ऽवचेषु गोत्रेषु उत्पन्नः; स च उच्चा-ऽवचानुभागकण्डकापेक्षया **न हीनो** नापि **अतिरिक्त** इति । तथा हि—उच्चैर्गोत्र≠कण्डकेभ्य एकभविकेभ्यो अनेकभविकेभ्यो वा नीचैर्गोत्रकण्डकानि न हीनानि [8]नापि अतिरिक्तानि इति अतः अवगम्य उत्कर्षा-ऽपकर्षौ न विधेयौ । अस्य च

---

टि० १. ०**यादेवावगीयते । तेषु स्थानेषू०** च ॥ २. **कलङ्कली०** च ॥ ३. **तत्र तूच्चै०** ख ॥ ४. **नाप्यधिकः; एवं** ख ॥ ५. **असई** क ॥ ६. **नावि हीणे** ग ॥ ७. **एवमेकैको** ख ॥ ८. **नापि अधिकानी०** ख ॥

वि०टि० ⊕ "**अन्यो वा** इति निगोदः" जै०वि०प० ॥ ≠ "**कण्डकेभ्य** इति कोऽर्थः ? यदा बध्नाति तदा उच्चैर्गोत्रकण्डकानि" जै०वि०प०॥

उपलक्षणार्थत्वात् सर्वेष्वपि मदस्थानेषु एतद् आयोज्यम्, यतश्च उच्चा-ऽवचेषु स्थानेषु कर्मवशाद् उत्पद्यते ।

बल-रूप-लाभादिमदस्थानानां च असमञ्जसतामवगम्य किं कर्तव्यम् ? इत्याह—

**नो पीहए । अपि:** सम्भावने; स च भिन्नक्रमः । जात्यादीनां मदस्थानानां अन्यतमदपि **नो ईहेतापि**=नाभिलषेदपि । अथवा **नो स्पृहयेत्** = [1]नावकाङ्क्षेदिति ।

तत्र यदि उच्चा-ऽवचेषु स्थानेषु असकृद् उत्पन्नः असुमान् ततः किम् ? इत्याह—

**इति** [2]**संखाए** इत्यादि । **इति:** उपप्रदर्शने; इत्येतत् पूर्वोक्तनीत्या उच्चाऽवच-स्थानोत्पादादिकं परि**सङ्ख्याय**=ज्ञात्वा **को गोत्रवादी** भवेत् ?, तद्यथा— 'मम उच्चैर्गोत्रं सर्वलोकमाननीयं नापरस्य'इति एवंवादी को बुद्धिमान् भवेत् ?, तथा हि—मयाऽन्यैश्च जन्तुभिः सर्वाण्यपि स्थानानि अनेकशः प्राप्तपूर्वाणीति । तथा उच्चैर्गोत्रनिमित्त**मानवादी** वा **को** भवेत् ?, न कश्चित् संसार[3]स्वरूपपरिच्छेदीत्यर्थः । किञ्च—

**कंसि वा एगे गिज्झे ।** अनेकशः अनेकस्मिन् स्थाने अनुभूते सति तन्मध्ये **कस्मिन् वा एकस्मिन्** उच्चैर्गोत्रादिके अनवस्थितस्थानके रागादिविरहाद् **एकः** कथं **गृध्येत्** । तात्पर्यम्—आसेवां विदितकर्मपरिणामो विदध्यात्, युज्येत गार्द्ध्यं यदि तत् स्थानं प्राप्तपूर्वं नाभविष्यत्, तच्च अनेकशः प्राप्तपूर्वम्; अतस्तल्लाभा-ऽलाभयोः न उत्कर्षा-ऽपकर्षौ विधेयौ इति । आह च—

**तम्हा** इत्यादि । यतोऽनादौ संसारे पर्यटता असुमता अदृष्टायत्तानि असकृद् उच्चा-ऽवचानि स्थानानि अनुभूतानि; **तस्मात्** कथञ्चिद् उच्चादिकं मदस्थानं अवाप्य **पण्डितः** =हेयोपादेयतत्त्वज्ञः [4]**न हृष्येत**=न हर्षं विदध्यात् । उक्तं च—

> **"सर्वसुखान्यपि बहुशः प्राप्तान्यटता मयाऽत्र संसारे ।**
> **उच्चैःस्थानानि तथा तेन न मे विस्मयस्तेषु ॥"** [ ]
> **"जइ सो वि निज्जरमओ पडिसिद्धो ⊕अट्ठमाणमहणेहिं ।**
> **अवसेसा मयट्ठाणा परिहरियव्वा पयत्तेण ॥"** [ ]

नाप्यवगीतस्थानावाप्तौ वैमनस्यं विदध्यात्, आह च—'**नो** [5]**कुज्झे**', अदृष्टवशात् तथाभूतलोकासम्मतं जाति-कुल-रूप-बल-लाभादिकं अधमं अवाप्य **न** [6]**क्रुध्येत्**=न क्रोधं

---

**टि०** १. **नाभिकाङ्क्षेदिति** ख ॥ २. **संखाय** ङ ॥ ३. **०स्वभावपरि०** ख च ॥ ४. **न हृष्टे न हर्षं** ख । **न हृष्येत=हर्षं** क ॥ ५. **कुप्पे'त्यदृष्ट०** ग ॥ ६. **कुप्येत्** क ग घ ॥

**वि०टि०** ⊕ "**अट्ठमाण** इति अष्टमदाः" जै०वि०प० ॥

कुर्यात् ।'कतरद् नीचस्थानं शब्दादिकं वा दुःखं मया नानुभूतम् ?'इत्यवगम्य न उद्वेगवशगेन भाव्यम् । उक्तं च–

**"अवमानात् परिभ्रंशाद् वध-बन्ध-धनक्षयात् ।**
**प्राप्ता रोगाश्च शोकाश्च जात्यन्तरशतेष्वपि ॥"** [ ]
**"संते य अविम्हइउं**[1] **असोइउं पंडिएण य असंते ।**
**सक्का हु दुमोवमियं हियएण हियं धरंतेण ॥"** [ ]
**"होऊण चक्कवट्टी पुहइवई विमलपंडरच्छत्तो ।**
**सो चेव नाम भुज्जो अणाहसालालओ होइ ॥"** [ ]

एकस्मिन् वा जन्मनि नानाभूतावस्था उच्चा-ऽवचाः कर्मवशतः[2] अनुभवति ॥७५॥

तदेवं उच्च-नीचगोत्रनिर्विकल्पमना अन्यदपि अविकल्पेन किं कुर्यात् ? इत्याह–

## [ सू० ] भूतेहिं जाण पडिलेह सातं ।

**भूएहिं** इत्यादि । भवन्ति भविष्यन्ति अभूवन्निति **भूतानि** असुभृतः,तेषु **प्रत्युपेक्ष्य** =पर्यालोच्य विचार्य कुशाग्रीयया शेमुष्या **जानीहि**=अवगच्छ[3] । किं जानीहि ? **सातं**=सुखम्, तद्विपरीतं असातमपि जानीहि, किं च कारणं साता-ऽसातयोः ? एतज्जानीहि, किं वा अभिलषन्ति अविगानेन प्राणिनः इति । अत्र जीव-जन्तु-प्राण्यादिशब्दान् उपयोगलक्षण-द्रव्यस्य मुख्यान् ⊕वाचकान् विहाय सत्तावाचिनो[4] भूतशब्दस्य उपादानेन इदं आविर्भावयति यथा–अयं उपयोगलक्षणः पदार्थोऽवश्यं सत्तां बिभर्ति । साताभिलाषी असातं च जुगुप्सते, साताभिलाषश्च शुभप्रकृतित्वात्; अतोऽपरासामपि शुभप्रकृतीनां उपलक्षणं एतदवसेयम्; अतः शुभनाम-गोत्रा-ऽऽयुराद्याः कर्मप्रकृतीः अनुधावति अशुभाश्च जुगुप्सते सर्वोऽपि प्राणी ।

एवं च व्यवस्थिते किं विधेयम् ? इत्याह–**समिए** इत्यादि । अथवा भूतेषु शुभा-ऽशुभरूपं कर्म प्रत्युपेक्ष्य यत् तेषां अप्रियं तद् न विदध्यात् इत्ययमुपदेशः ।

**नागार्जुनीयास्तु** पठन्ति–**पुरिसे णं खलु** [5]**दुक्खुव्वेय-सुहेसए । पुरुषः**=जीवः, **णमिति** वाक्यालङ्कारे, **खलुः** अवधारणे, दुःखाद् उद्वेगो यस्य स=दुःखोद्वेगः, सुखस्यैषकः =सुखैषकः, याजकादित्वात् समासः छान्दसत्वाद् वा, दुःखोद्वेगश्चासौ सुखैषकश्च = **दुःखोद्वेग-**

---

टि० १. **अविम्हइयं असोइअं** क । **अविम्हइओ** ख ॥ २. **कर्मवशगोऽनु०** ख च ॥ ३. **अवबुध्यस्व** ख च ॥ ४. **०वादिनो** च ॥ ५. **दुक्खुव्वेए सुहेसए** इति जम्बूविजयपादैः सम्पादिते आचाराङ्गशुद्धिपत्रके ॥

वि०टि० ⊕ **"वाचकान्** इति शब्दान्" जै०वि०प० ॥

**सुखैषकः** ।

सर्वोऽपि प्राणी दुःखोद्वेग-सुखैषक एव भवति अतो जीवप्ररूपणं कार्यम्; तच्च अवनि-वन-पवना-ऽनल-वनस्पति-सूक्ष्म-बादर-विकल-पञ्चेन्द्रिय-सञ्ज्ञीतर-पर्याप्तका-ऽपर्याप्तकरूपं **शस्त्रपरिज्ञा**यां अकारि एव । तेषां च दुःखपरिजिहीर्षूणां सुखलिप्सूनां आत्मौपम्यं आचरता तदुपमर्दकानि हिंसादिस्थानानि परिहरता आत्मा पञ्चमहाव्रतेषु आस्थेयः । तत्परिपालनार्थं चोत्तरगुणा अपि अनुशीलनीयाः । तदर्थमुपदिश्यते–

**समिते एयाणुपस्सी । तंजहा–अंधत्तं बहिरत्तं मूकत्तं काणत्तं कुंटत्तं खुज्जत्तं वडभत्तं सामत्तं सबलत्तं । सह पमादेणं अणेगरूवाओ जोणीओ संधेति, विरूवरूवे फासे पडिसंवेदयति ॥७६॥**

**समिए एयाणुप्पस्सी** । पञ्चभिः समितिभिः **समितः** सन् एतत् शुभा-ऽशुभं कर्म वक्ष्यमाणं वा अन्धत्वादिकं द्रष्टुं शीलं अस्येति **एतदनुदर्शी**, भूतेषु सातं जानीहीति सण्टङ्कः । तत्र समितिः इति "**ईण्[1] गतौ**" **[पा०धा०१०४५]** इत्यस्मात् सम्पूर्वात् क्तिन्नन्ताद् भवति। सा च पञ्चधा, तद्यथा–ईर्याभाषैषणादाननिक्षेपोत्सर्गरूपा । तत्र ईर्यासमितिः [2]प्राणाव्यपरोपणव्रतप्रतिपालनाय, भाषासमितिः असदभिधाननियमसंसिद्धये, एषणासमितिः अस्तेयव्रतपरिपालनाय, शेषद्वयं तु समस्तव्रतप्रष्ठस्य अहिंसाव्रतस्य संसिद्धये व्याप्रियत इति ।

तदेवं पञ्चमहाव्रतोपपेतः तद्वृतिकल्पसमितिभिः समितः सन् भावतः एतद् भूतसातादिकं अनुपश्यति । अथवा यदनुदर्शी असौ भवति (तद्) **तद्यथा** इत्यादिना सूत्रेणैव दर्शयति–

**अन्धत्वमित्यादि** यावत् [3]**विरूवरूवे फासे परिसंवेदेति** । संसारोदरे पर्यटन् [4]प्राणी **अन्धत्वा**दिका अवस्था बहुशः परिसंवेदयते । स चान्धो द्रव्यतो भावतश्च । तत्र एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिया द्रव्य-भावान्धाः; चतुरिन्द्रियादयस्तु मिथ्यादृष्टयो भावान्धाः । उक्तं च–

> **"एकं हि चक्षुरमलं सहजो विवेक-**
> **[5]स्तद्वद्भिरेव सह संवसतिर्द्वितीयम् ।**
> **एतद् द्वयं भुवि न यस्य स तत्त्वतोऽन्ध-**
> **[6]स्तस्यापमार्गचलने खलु कोऽपराधः ? ॥"** [        ]

सम्यग्दृष्टयस्तु उपहतनयना द्रव्यान्धाः; त एवानधा न द्रव्यतो [7]न च भावतः । तदेवं

---

**टि०** १. **इण्** ग ॥ २. **प्राणव्यपरोपणविरतिप्रति०** ख च ॥ ३. **विरूपरूपे** क च ॥ ४. **प्राण्यन्धादिका** ख ॥ ५. **०स्तद्विद्भिरेव** च ॥ ६. **०स्तस्यापि मार्ग०** क ख ग ॥७. **नापि भावतः** ख च ॥

अन्धत्वं द्रव्य-भावविभिन्नं एकान्तेन दुःखजननं अवाप्नोतीति । उक्तं च—

**"जीवन्नेव मृतोऽन्धो यस्मात् सर्वक्रियासु परतन्त्रः ।**
**नित्यास्तमितदिवाकरतमोऽन्धकारार्णवनिमग्नः ॥"[ ]**
**"लोकद्वयव्यसनवह्निविदीपिताङ्ग-**
**मन्धं समीक्ष्य कृपणं परयष्टिनेयम् ।**
**को नोद्विजेत भयकृज्जननादिवोग्रात्,**
**कृष्णाहिनैकनिचितादिव चान्धगर्तात् ॥"[ ]**

एवं **बधिरत्वम**पि अदृष्टवशाद् अनेकशः परिसंवेदयते । तदावृतश्च सदसद्-विवेकविकलत्वाद् ऐहिका-ऽऽमुष्मिकेष्टफलक्रियानुष्ठानशून्यतां बिभर्तीति । उक्तं च—

**"धर्मश्रुतिश्रवणमङ्गलवर्जितो हि,**
**लोकश्रुतिश्रवणसंव्यवहारबाह्यः ।**
**किं जीवतीह बधिरो भुवि यस्य शब्दाः,**
**स्वप्नोपलब्धधननिष्फलतां प्रयान्ति ? ॥"[ ]**
**"स्वकलत्र-बाल-पुत्रकमधुरवचःश्रवणबाह्यकर्णस्य ।**
**बधिरस्य जीवितं किं जीवन्मृतकाकृतिधरस्य ? ॥" [ ]**

एवं **मूकत्वम**पि एकान्तेन दुःखावहं[1] परिसंवेदयते । उक्तं च—

**"दुःखकरमकीर्तिकरं मूकत्वं सर्वलोकपरिभूतम् ।**
**[Φ]प्रत्यादेशं मूढाः कर्मकृतं किं न पश्यन्ति? ॥" [ ]**

तथा **काणत्वम**पि एवंरूपमेव इति । आह च—

**"काणो निमग्नविषमोन्नतदृष्टिरेकः[2],**
**शक्तो विरागजनने जननातुराणाम् ।**
**यो नैव कस्यचिदुपैति मनःप्रियत्व-**
**मालेख्यकर्मलिखितोऽपि किमु स्वरूपः ? ॥"[ ]**

एवं **कुण्टत्वं** पाणिवक्रत्वादिकम्, **कुब्जत्वं** वामनलक्षणम्, **वडभत्वं** विनिर्गतपृ[3]ष्ठीवडभलक्षणम्, **श्यामत्वं** [4]कृष्णलक्षणम्, **शबलत्वं** [5]श्वित्रलक्षणं सहजं

---

**टि०** १. दुःखरूपं संवेदयत् इति, उक्तं च ख ।दुःखरूपं परिवेदयत इति, उक्तं च च ॥ २. ०विषमोत्कटदृष्टि० ग च ॥ ३. पृथि( ष्ठि ? )वडभ० ङ ॥ ४. कुष्ठलक्षणम् क ख ॥ ५. चित्रलक्षणम् ख च । क-ङप्रत्योः पाठभङ्गः ॥

**वि०टि०** Φ "**प्रत्यादेशम्** इति दृष्टान्तः" जै०वि०प० ॥

पश्चाद्भावि वा कर्मवशगो भूरिशो दुःखराशिदेशीयं परिसंवेदयते । किञ्च—

**सह प्रमादेन** विषयक्रीडाभिष्वङ्गरूपेण श्रेयसि अनुद्यमात्मकेन[1] वा **अनेकरूपाः** सङ्कट-विकट-शीतोष्णादिभेदभिन्ना **योनीः सन्दधाति**=सन्धत्ते[2], चतुरशीतियोनिलक्ष-सम्बन्धाविच्छेदं विदधातीति भावः, **सम्यग् धावती**ति वा तासु तासु आयुष्क-बन्धोत्तरकालं गच्छतीत्यर्थः । तासु च नानाप्रकारासु योनिषु **विरूपरूपान्**=नानाप्रकारान् **स्पर्शान्**=दुःखानुभावान् **परिसंवेदयते**=अनुभवतीत्यर्थः ॥७६॥

तदेवं उच्चैर्गोत्रोत्थापितमानोपहतचेता नीचैर्गोत्रविहितदीनभावो वा अन्ध-बधिरभूयं वा गतः सन् नावबुध्यते कर्तव्यम्, न जानाति कर्मविपाकम्, नावगच्छति संसारापशदताम्, नावधारयति हिता-ऽहिते, न गणयति औचित्यम् इति अनवगततत्त्वो मूढः तत्रैव उच्चैर्गोत्रादिके विपर्यासमुपैति । आह च—

**[सू०]　से अबुज्झमाणे हतोवहते जाती-मरणं अणुपरियट्टमाणे ।**
**जीवियं पुढो पियं इहमेगेसिं माणवाणं खेत्त-वत्थु ममायमाणाणं ।**
**आरत्तं विरत्तं मणि-कुंडलं सह हिरण्णेण इत्थियाओ परिगिज्झ तत्थेव रत्ता ।**
**ण एत्थ तवो वा दमो वा णियमो वा दिस्सति ।**
**संपुण्णं बाले जीविउकामे लालप्पमाणे मूढे विप्परियासमुवेति ॥७७॥**

**से अबुज्झमाणे** इत्यादि यावत् **मूढे** [3]**विप्परियासुवेइ** । **स** इति उच्चैर्गोत्राभिमानी अन्ध-बधिरादिभावसंवेदको वा कर्मविपाकं [4]**अबुध्यमानो हतोपहतो** भवति, नानाव्याधि-सद्भावक्षतशरीरत्वाद् हतः, समस्तलोकपरिभूतत्वाद् उपहतः; अथवा उच्चैर्गोत्रगर्वाध्मात-त्यक्तोचितविधेयविद्वज्जनवदनसमुद्भूतशब्दाऽयशःपटहहतत्वाद् हतः, [5]अभिमानोत्पादितानेक-भवकोटिनीचैर्गोत्रोदयाद् उपहतः; **मूढो विपर्यासमुपैति** इत्युत्तरेण सम्बन्धः । तथा **जातिश्च मरणं** च समाहारद्वन्द्वः, तद् **अनुपरिवर्तमानः**=पुनर्जन्म पुनर्मरणं इत्येवं अरघट्टघटीयन्त्र-न्यायेन संसारोदरे [6]विवर्तमानः, आवीचीमरणाद् वा प्रतिक्षणं जन्म-विनाशावनुभवन् दुःख-सागरावगाढो विशरारुण्यपि नित्यताकृतमतिः हितेऽपि अहिताध्यवसायो विपर्यासमुपैतीति । आह च—

**जीवितम्**=आयुष्कानुपरमलक्षणं असंयमजीवितं वा, **पृथक्** इति प्रत्येकं, प्रतिप्राणि

---

**टि०** १. **०न चानेक०** ख ॥ २. **विधत्ते** च ॥ ३. **विप्परियासमेइ** च ॥ ४. **अनवबुध्यमानो** ख च ॥ ५. **अभिमानापादिता०** क घ ङ ॥ ६. **परिवर्तमानः** ख ॥

**प्रियं**=दयितं वल्लभम्, **इह** इति अस्मिन् संसारे **एकेषाम्** अविद्योपहतचेतसां **मानवानाम्** इति उपलक्षणार्थत्वात् प्राणिनाम् । तथा हि—दीर्घजीवनार्थं ताः ताः रसायनादिकाः क्रियाः सत्त्वोपघातकारिणीः कुर्वते । तथा **क्षेत्रं** शालिक्षेत्रादि, **वास्तु** धवलगृहादि, 'ममेदम्' इत्येवं आचरतां तत् क्षेत्रादिकं प्रेयो भवति । किञ्च—

**आरक्तम्**=ईषद्रक्तं वस्त्रादि, [1]**विरक्तं**=विगतरागं विविधरागं वा, **मणिः** इति रत्न-वैडूर्येन्द्रनीलादि, **कुण्डलं** कर्णाभरणम्, **हिरण्येन सह स्त्रीः परिगृह्य तत्रैव** क्षेत्र-वास्त्वारक्त-विरक्तवस्त्र-मणि-कुण्डल-स्त्र्यादौ **रक्ताः**=गृद्धा अध्युपपन्ना **मूढाः विपर्यासमुपयान्ति** वदन्ति च—

'**नात्र तपो वा** अनशनादिलक्षणं **दमो वा** इन्द्रिय-नोइन्द्रियोपशमलक्षणः **नियमो वा** अहिंसाव्रतलक्षणः फलवान् **दृश्यते**' । तथा हि— तपो-नियमोपेतस्यापि कायक्लेश-भोगादिवञ्चनां विहाय नान्यत् फलमुपलभ्यते । जन्मान्तरे भविष्यतीति चेद्, व्युद्ग्राहितस्य उल्लापः, किञ्च दृष्टहानिः अदृष्टपरिकल्पना च पापीयसी ।

तदेवं साम्प्रतेक्षी [2]भोगसङ्गविहितैकपुरुषार्थबुद्धिः **सम्पूर्णं** यथावसरसम्पादित-विषयोपभोगं **बालः**=अज्ञः **जीवितुकामः** आयुष्कानुभवनमभिलषन् **लालप्यमानः** भोगार्थमत्यर्थं लपन् वाग्दण्डं करोति, तद्यथा—'अत्र तपो दमो नियमो वा फलवान् न दृश्यत' इति । एवमर्थं ब्रुवन् **मूढः** [3]अबुध्यमानो हतोपहतो जाति-मरणमनुपरिवर्तमानो जीवित-क्षेत्र-स्त्र्यादिलोभपरिमोहितमनाः **विपर्यासमुपैति** तत्त्वे अतत्त्वाभिनिवेशं अतत्त्वे च तत्त्वाभिनिवेशं हितेऽहितबुद्धिं इत्येवं सर्वत्र विपर्ययं विदधाति । उक्तं च—

**"दाराः परिभवकारा बन्धुजनो बन्धनं विषं विषयाः ।**
**कोऽयं जनस्य मोहः ये रिपवस्तेषु सुहृदाशा ? ॥"** [     ] इत्यादि ॥७७॥

ये पुनः उन्मज्जच्छुभकर्मापादिताध्यवसायपुरस्कृतमोक्षाः ते किम्भूता भवन्ति ? इत्याह—

[ सू० ]  **इणमेव णावकंखंति जे जणा धुवचारिणो ।**
**जाती-मरणं परिण्णाय चर संकमणे दढे ॥१॥**

**इणमेव**त्यादि । **इदमेव** पूर्वोक्तं [4]सम्पूर्णजीवितं क्षेत्रा-ऽङ्गनापरिभो[5]गादिकं वा **नावकाङ्क्षन्ति**=नाभिलषन्ति **ये जना ध्रुवचारिणः** ध्रुवः=मोक्षः, तत्कारणं च ज्ञानादि ध्रुवं,

---

टि० १. **विरक्तं विविधरागं विरागं वा** च ॥ २. **भोगसंविदितैकपुरुषा०** ख ॥ ३. **अविद्यमानो** ख ॥ ४. **सम्पूर्णजीवितत्वं** ख ॥ ५. **०दिकं नाभिलषन्ति** ख ॥

तदाचरितुं शीलं येषां ते तथा, **धूतचारिणो** वा धुनातीति धूतं चारित्रं, तच्चारिण इति। किञ्च—

**जाई०** इत्यादि। **जातिश्च मरणं** च समाहारद्वन्द्वः, तत् **परिज्ञाय**=परिच्छिद्य ज्ञात्वा[1] **चर**=उद्युक्तो भव। क्व ?—**सङ्क्रमणे,** सङ्क्रम्यते अनेन इति सङ्क्रमणं चारित्रं, तत्र **दृढः** =विश्रोतसिकारहितः परीषहोपसर्गैः निष्प्रकम्पो वा। यदि वा **अशङ्कमनाः** सन् संयमं **चर,**[2] न विद्यते शङ्का यस्य मनसः[3] तद् अशङ्कम्, अशङ्कं मनो यस्य असौ अशङ्कमनाः, तपो-दम-नियमनिष्फलत्वाशङ्कारहित आस्तिकमत्युपपेतः तपो-दमादौ प्रवर्तेत;[4] यतस्तद्वान् राजराजादीनां पूजा-प्रशंसार्हो भवति। न च औपशमिकसुखावाप्तफलस्य तपस्विनः समस्तद्वन्द्वदवीयसः असत्यपि परलोके किञ्चित् क्षूयते[5]। उक्तं च—

**"सन्दिग्धेऽपि परलोके त्याज्यमेवाशुभं बुधैः।**
**यदि नास्ति ततः किं स्याद् ? अस्ति चेन्नास्तिको हतः॥"** [　　] इत्यादि ॥१॥

तस्मात् स्वायत्ते संयमसुखे दृढेन भाव्यम्। न चैतद् भावनीयं यथा—'परुत्परारि वृद्धावस्थायां वा धर्मं करिष्यामी'ति, यतः—

**णत्थि कालस्सऽणागमो।**

**नत्थि** इत्यादि। **नास्ति**=न विद्यते **कालस्य**=मृत्योः **अनागमः**=अनागमनं अनवसरः इति यावत्। तथा हि— सोपक्रमायुषः असुमतो न काचित् सा अवस्था यस्यां कर्मपावकान्तर्वर्ती जन्तुः जतुगोलक इव न [6]विलीयेत इति। उक्तं च—

**"शिशुमशिशुं कठोरमकठोरमपण्डितमपि च पण्डितं,**
**धीरमधीरं मानिनममानिनमपगुणमपि च बहुगुणम्।**
**यतिमयतिं प्रकाशमवलीनमचेतनमथ सचेतनं,**
**निशि दिवसेऽपि सान्ध्यसमयेऽपि विनश्यति कोऽपि कथमपि॥"** [　　]

तदेवं सर्वङ्कषत्वं मृत्योः अवधार्य अहिंसादिषु दत्तावधानेन भाव्यम्। किमिति ? यतः—

**सव्वे पाणा पिआउया सुहसाता दुक्खपडिकूला अप्पियवधा पियजीविणो जीवितुकामा। सव्वेसिं जीवितं पियं ॥७८॥**

**सव्वे पाणा पियाउया।** प्राणशब्देन अत्र अभेदोपचारात् तद्वन्त एव गृह्यन्ते। **सर्वे प्राणिनः**=जन्तवः **प्रियायुषः** प्रियमायुः येषां [7]ते तथा। ननु च सिद्धैः व्यभिचारः, न हि

---

टि० १. ज्ञात्वाचारोद्युक्तो भवेत् क च। ज्ञात्वा चरेद्युक्तो भवेत् ग। ज्ञात्वा चरे उद्युक्तो भवेत् घ॥ २. चरे क॥ ३. मनसस्तं विशङ्कं ख॥ ४. प्रवर्तते ख-चप्रती ऋते॥ ५. क्षीयते ख॥ ६. विलीयते क ग च॥ ७. ते प्रियायुषः ख च॥

ते प्रियायुषः, तदभावात्; नैष दोषः, यतो मुख्यजीवादिशब्दव्युदासेन प्राणशब्दस्य उपचरितस्य ग्रहणं संसारिप्राण्युपलक्षणार्थमिति[1] यत्किञ्चिदेतत् । **पाठान्तरं** वा—**सव्वे पाणा पियायया, आयतः**[2]=आत्मा अनाद्यनन्तत्वात्, स प्रियो येषां ते तथा, **सर्वेऽपि प्राणिनः प्रियात्मानः** । प्रियात्मता च सुख-दुःखप्राप्तिपरिहारतया भवतीति । आह च—

'**सुहसाया दुक्खपडिकूला**' सुखं आनन्दरूपं आस्वादयन्तीति **सुखास्वादाः**, सुखभोगिनः सुखैषिण इत्युक्तं भवति । दुःखम्=असातं, तत् प्रतिकूलयन्तीति **दुःखप्रतिकूलाः**, दुःखद्वेषिण इत्युक्तं भवति । तथा **अप्रियवधा** अप्रियं=दुःखकारणं, तद् घ्नन्ति=**अप्रियवधाः** । तथा **पियजीविणो प्रियं**=दयितं **जीवितं** आयुष्कं असंयमजीवितं (वा) येषां ते तथा । (तथा) **जीवितुकामा** यत एव प्रियजीविनः अत एव दीर्घकालं **जीवितुकामाः**=दीर्घकालं आयुष्काभिलाषिणः, दुःखाभिभूता अपि अन्त्यां दशां आपन्नाः जीवितुमेव[3] अभिलषन्ति । उक्तं च—

**"रमइ विहवी विसेसे थिंतिमित्तं थेववित्थरो महई ।**
**मग्गइ सरीरमहणो[4] रोगी जीवे[5] च्चिय कयत्थो ॥"** [ ]

तदेवं सर्वोऽपि प्राणी सुखजीविताभिलाषी; तच्च नारम्भमृते । असावपि प्राण्युपघातकारी, प्राणिनां च जीवितमत्यर्थं दयितं इत्यतो भूयो भूयः तदेव उपदिश्यत इत्याह—

**सव्वेसिं** इत्यादि । **सर्वेषां** अविगानेन **जीवितं**=असंयमजीवितं **प्रियं**=दयितम् ॥७८॥ यद्येवं ततः किम् ? इत्यत आह—

**[ सू० ] तं परिगिज्झ दुपयं चउप्पयं अभिजुंजियाणं संसिंचियाणं तिविधेण जा वि से तत्थ मत्ता भवति अप्पा वा बहुगा वा से तत्थ गढिते चिट्ठति भोयणाए । ततो से एगदा विप्परिसिट्ठं संभूतं महोवकरणं भवति । तं पि से एगदा दायादा विभयंति, अदत्तहारो वा सेऽवहरति, रायाणो वा से विलुंपंति, णस्सति वा से, विणस्सति वा से, अगारदाहेण वा से डज्झति ।**

**तं परिगिज्झ**[6] । **तद्** असंयमजीवितं **परिगृह्य**=आश्रित्य, किं कुर्वन्ति ? इत्याह—

टि० १. संसारे प्रा० ग । संसार प्रा० घ ॥ २. प्रियः आयतः आत्मा अनाद्यनन्तत्त्वात् येषां ख च ॥ ३. जीवितुमेवमभि० क । जीवितमेवाभि० च॥ ४. ०मधणो ख ॥ ५. जीए ट्ठिय च ॥ ६. परिगेज्ज ख च ॥

**दुपयं** इत्यादि । **द्विपदं** दासी-कर्मकरादि, **चतुष्पदं** गवाश्वादि, **अभियुज्य**=योजयित्वा अभियोगं ग्राहयित्वा, व्यापारयित्वा इत्युक्तं भवति । ततः किम्? इत्यत आह– **संसिंचियाणं** इत्यादि । प्रियजीवितार्थं अर्थाभिवृद्धये द्विपद-चतुष्पदादिव्यापारेण **संसिच्य**=अर्थनिचयं संवर्ध्य **त्रिविधेन**=योगत्रिक-करणत्रिकेण **यापि** काचिदल्पा परमार्थचिन्तायां [1]बह्व्यपि फल्गुदेश्या **से**=तस्य अर्थारम्भिणः सा चार्थमात्रा **तत्र** इति द्विपदाद्यारम्भे **मात्रा** इति सोपस्कारत्वात् सूत्राणाम् अर्थमात्रा [2]अर्थाल्पता **भवति**=सत्तां बिभर्ति । किम्भूता सा ? सूत्रेणैव कथयति–**अल्पा वा बह्वी वा,** अल्प-बहुत्वं चापेक्षिकम्, अतः सर्वाऽपि **अल्पा** सर्वाऽपि **बह्वी, स** इति अर्थवान् **तत्र**=तस्मिन्नर्थे **गृद्धः**=[3]अध्युपपन्नः **तिष्ठति**, नालोचयति अर्थस्य उपार्जनक्लेशम्, न गणयति रक्षणपरिश्रमम्, न विवेचयति तरलताम्, नावधारयति फल्गुताम् । उक्तं च–

> "**कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं,**
> **निरुपमरसप्रीत्या खादन् नरास्थि निरामिषम् ।**
> **सुरपतिमपि श्वा पार्श्वस्थं सशङ्कितमीक्षते,**
> **न हि गणयति क्षुद्रो लोकः परिग्रहफल्गुताम्**[4] ॥" [ ] इत्यादि ।

स च किमर्थं अर्थं अर्थयते ? इत्यत आह–**'भोयणाए' भोजनम्**=उपभोगः, तस्मै अर्थं अर्थयते; तदर्थी च क्रियासु प्रवर्तते । [5]क्रियावतश्च किं भवति ? इत्याह–

**तओ से** इत्यादि । **ततः से**=तस्य अवलगनादिकाः क्रियाः कुर्वतः **एकदा** लाभान्तरायकर्मक्षयोपशमे **विविधं**=नानाप्रकारं **परिशिष्टं**=प्रभूतत्वाद् भुक्तोद्वरितं **सम्भूतं** =सम्यक्प्रतिपालनाय भूतं संवृत्तम्, किं तत् ? महच्च तत् परिभोगाङ्गत्वाद् उपकरणं च= **महोपकरणं**, द्रव्यनिचय इत्यर्थः; स कदाचिल्लाभोदये **भवति** । असावपि अन्तरायोदयाद् न तस्य उपभोगाय इत्याह–

**तं पि से** इत्यादि । **तदपि** समुद्रोत्तरण-रोहणखनन-बिलप्रवेश-रसेन्द्रमर्दन-राजावलगन-कृषीवलादिकाभिः क्रियाभिः स्व-परोपतापकारिणीभिः स्वोपभोगाय उपार्जितं सत् **से** तस्य अर्थोपार्जनोपायक्लेशकारिणः **एकदा** भाग्यक्षये **दायादाः**=पितृपिण्डोदकदान-योग्याः **विभजन्ते**=विलुम्पन्ति, **अदत्तहारो वा**=दस्युर्वा **अपहरति, राजानो वा**

---

**टि०** १. **बह्वपि** ख च ॥ २. **अर्थाल्पा भवति । सा च किम्भूता ? अल्पा वा** ख ॥ ३. **अध्युपपन्नः सन् नालोचय०** ख ॥ ४. ०ताम् ॥ **लब्धं तेन शुना स्वतोऽस्थिशकलं नैवात्तु( न्य? )मभ्युद्यते, मह्यं दत्तमहं पुनर्भगवता हन्तुं तमेवोद्यतः । इन्द्रादप्यधिको मुनिः पुनरहं प्रायः शुनो पीतरो, या यस्येह भवेद्गतिर्गतिमतः सा चेष्टया व्यज्यते** ॥ **इत्यादि** ख ग ङ; केवलं खआदर्शे पाठान्तरान्तस्थः **इत्यादि** इति पाठो नोपलभ्यते ॥ ५. **तत्क्रियावतश्च** क ॥

**विलुम्पन्ति**=अवच्छिन्दन्ति, **नश्यति वा** स्वत एवाटवीत: **से**=तस्य, **विनश्यति वा** जीर्णभावापत्ते:, **अगारदाहेन वा**=गृहदाहेन वा **दह्यते** । कियन्ति वा कारणानि अर्थनाशे वक्ष्यन्ते इति उपसंहरति—

**इति से परस्सऽट्ठाए कूराइं कम्माइं बाले पकुव्वमाणे तेण दुक्खेण मूढे विप्परियासमुवेति ।**

**इति** एवं बहुभि: प्रकारै: उपार्जितोऽपि अर्थ: नाशमुपैति, नैव उपार्जयितु: उपतिष्ठते इति उपदिश्यते— **स:**=अर्थस्य उत्पादयिता **परस्मै**[1]=अन्यस्मै **अर्थाय**=प्रयोजनाय अन्यप्रयोजनकृते **क्रूराणि** गलकर्तनादीनि **कर्माणि**=अनुष्ठानानि **बाल:**=अज्ञ: **प्रकुर्वाण:**= विदधान: **तेन** कर्मविपाकापादितेन **दु:खेन**=असातोदयेन **मूढ:**=अपगतविवेक: **विपर्यासमुपैति** अपगतसदसद्विवेकत्वात् कार्यमकार्यं मन्यते व्यत्ययं चेति । उक्तं च—

''**राग-द्वेषाभिभूतत्वात् कार्या-ऽकार्यपराङ्मुख: ।**
**एष मूढ इति ज्ञेयो विपरीतविधायक: ॥**'' [ ]

तदेवं मौढ्यान्धतमसा आच्छादितालोकपथा: सुखार्थिनो दु:खं[2] ऋच्छन्ति जन्तव इति ज्ञात्वा सर्वज्ञवचनप्रदीपं अशेषपदार्थस्वरूपाविर्भावकं आलम्बिरे मुनय: । अदश्च मया न स्वमनीषिकया उच्यते, **सुधर्मस्वामी जम्बूस्वामिन**माह । यदि स्वमनीषिकया नोच्यते, कौतस्त्यं तर्हीदम् ? इत्यत आह—

**मुणिणा हु एतं पवेदितं ।**
**अणोहंतरा एते, णो य ओहं तरित्तए ।**
**अतीरंगमा एते, णो य तीरं गमित्तए ।**
**अपारंगमा एते, णो य पारं गमित्तए ।**

**मुणिणा** इत्यादि । मनुते जगत: त्रिकालावस्थां इति **मुनि:** तीर्थकृत्, तेन **एतद्** असकृद् उच्चैर्गोत्रभवनादिकं **प्र**कर्षेण आदौ वा सर्वस्वभाषानुगामिन्या वाचा **वेदितं**=कथितं वक्ष्यमाणं च प्रवेदितम् । किं तद् ? इत्याह—

**अणोहं०** इत्यादि । ओघो द्विधा, द्रव्य-भावभेदात् । द्रव्यौघो नदीपूरादिक:; भावौघोऽष्टप्रकारं कर्म संसारो वा, तेन हि प्राणी अनन्तमपि कालं उह्यते । तं ओघं ज्ञान-

---

टि० १. **परस्मा अर्थाय** ग घ । **परस्माद(ऽ)न्यस्माद(ऽ)र्थाय** ख ॥ २. **दु:खमर्थयन्ति** क । **दु:खमिच्छन्ति** ग ॥

दर्शन-चारित्रबोहित्थस्थाः तरन्तीति ओघन्तराः, न ओघन्तराः=**अनोघन्तराः**, तरतेश्छान्द-सत्वात् खच्, खित्त्वाद् मुमागमः, **एते** कुतीर्थिकाः पार्श्वस्थादयो वा ज्ञानादियानविकलाः । यद्यपि तेऽपि ओघतरणाय उद्यताः तथापि सम्यगुपायाभावाद् न ओघतरणसमर्था भवन्तीति । आह च– **नो य ओहं तरित्तए । न च**=नैव **ओघं**=भावौघं **तरितुं** समर्थाः, संसारौघ-तरणप्रत्यला न भवन्तीत्यर्थः । तथा–

**अतीरंगमा** इत्यादि । तीरं गच्छन्तीति तीरङ्गमाः, पूर्ववत् खच्प्रत्ययादिकम्, न तीरङ्गमाः=**अतीरङ्गमाः**, **एते** इति प्रत्यक्षभावं आपन्नान् कुतीर्थिकादीन् दर्शयति । **न च** ते तीरगमनाय उद्यता अपि **तीरं गन्तुम**लम्, सर्वज्ञोपदिष्टसन्मार्गाभावादिति भावः । तथा–

**अपारंगमा** इत्यादि । पारः=तटः परकूलम्, तद् गच्छन्तीति पारङ्गमाः, न पारङ्गमाः =**अपारङ्गमाः**, **एते** इति पूर्वोक्ताः[1], पारगतोपदेशाभावाद् अपारगता[2] इति भावनीयम् । **न च** ते पारगतोपदेशं ऋते पारगमनाय उद्यता अपि **पारं गन्तुम**लम् । अथवा गमनं=गमः, पारस्य पारे वा गमः=पारगमः, सूत्रे त्वनुस्वारोऽलाक्षणिकः, न पारगमः=अपारगमः, तस्मै **अपारगमाय** । असमर्थसमासोऽयम्, तेनायमर्थः–पारगमनाय ते न भवन्ति इत्युक्तं भवति । ततश्च अनन्तमपि कालं संसारान्तर्वर्तिन एवासते । यद्यपि पारगमनाय अभ्युद्यमयन्ति तथापि ते सर्वज्ञोपदेशविकलाः स्वरुचिविरचितशास्त्रप्रवृत्तयो नैव संसारपारं गन्तुमलम् ।

अथ तीर-पारयोः को विशेषः ? इति, उच्यते– तीरं=मोहनीयक्षयः; पारं= शेषघातिक्षयः । अथवा तीरं=घातिचतुष्टयापगमः; पारं=भवोपग्राह्यभाव इत्यर्थः ।

स्यात्– कथं ओघतारी कुतीर्थादिको[3] न भवति तीर-पारगामी च ? इत्याह–

**आयाणिज्जं च आदाय तम्मि ठाणे ण चिट्ठति ।**

**वितहं पप्प खेत्तण्णे तम्मि ठाणम्मि चिट्ठति ॥७९( २ )॥**

**आयाणिज्जं** इत्यादि । आदीयन्ते=गृह्यन्ते सर्वभावा अनेन इति **आदानीयं** श्रुतं, तद् **आदाय** तदुक्ते **तस्मिन्** संयम**स्थाने न तिष्ठति** । यदि वा **आदानीयम्**=आदातव्यं भोगाङ्गं द्विपद-चतुष्पद-धन-धान्य-हिरण्यादि, तद् **आदाय**=गृहीत्वा, अथवा मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैः **आदानीयं**=कर्म्म **आदाय,** किम्भूतो भवति ? इत्याह– **तस्मिन्** ज्ञानादिमये मोक्षमार्गे सम्यगुपदेशे वा प्रशस्तगुण**स्थाने न तिष्ठति**=नात्मानं विधत्ते । न केवलं सर्वज्ञोपदेशस्थाने न तिष्ठति विपर्ययानुष्ठायी च भवतीति दर्शयति–

**वितहमि**त्यादि । **वितथम्**=असद्भूतं दुर्गतिहेतुं, तत् तथाभूतं उपदेशं **प्राप्य**

---

**टि०** १. पूर्वगताः ख ॥ २. अपारङ्गता च ॥ ३. कुतीर्थ्यादिको च ॥

**अखेदज्ञः** =अकुशलः, खेदज्ञो वा असंयमस्थाने, **तस्मिंश्च** साम्प्रतेक्ष्याचरिते उपदिष्टे वा **तिष्ठति**, तत्रैव असंयमस्थाने अध्युपपन्नो भवतीति यावत् । अथवा **वितथम्** इति आदानीय-भोगाङ्गव्यतिरिक्तं संयमस्थानं तत् **प्राप्य खेदज्ञः**=निपुणः **तस्मिन् स्थाने** आदानीयस्य हन्तृणि **तिष्ठति,** सर्वज्ञाज्ञायां आत्मानं व्यवस्थापयतीत्यर्थः ॥७९(२)॥

अयं च उपदेशः अनवगततत्त्वस्य विनेयस्य यथोपदेशं प्रवर्तमानस्य दीयते, यस्तु अवगत[1]हेयोपादेयविशेषः स यथावसरं यथाविधेयं स्वत एव विधत्ते इत्याह च—

## [ सू० ] उद्देसो पासगस्स णत्थि ।

**उद्देसो** इत्यादि । उद्दिश्यते इति **उद्देशः** उपदेशः सदसत्कर्तव्याऽकर्तव्यादेशः सः, पश्यतीति पश्यः, स एव **पश्यकः**, तस्य **न विद्यते**, स्वत एव विदितवेद्यत्वात् तस्य । अथवा पश्यतीति **पश्यकः** सर्वज्ञः तदुपदेशवर्ती वा तस्य, उद्दिश्यत इति [2]**उद्देशः** नारकादिव्यपदेशः उच्चा-ऽवचगोत्रादिव्यपदेशो वा **से**=तस्य **न विद्यते**, तस्य [3]प्रागेव मोक्षगमनादिति भावः । कः पुनः यथोपदेशकारी न भवति? इत्याह—

## बाले पुण णिहे कामसमणुण्णे असमितदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टति त्ति बेमि ॥८०॥

**॥ लोगविजयस्स ततीयो उद्देसओ सम्मत्तो ॥**

**बाले** इत्यादि । **बालो** नाम रागादिमोहितः, स **पुनः** कषायैः कर्मभिः परीषहोपसर्गैः वा निहन्यत इति **निहः,** निपूर्वाद् हन्तेः कर्मणि डः; अथवा स्निह्यत इति **स्निहः** स्नेहवान्, रागीत्यर्थः । अत एवाह—**'कामसमणुण्णे' कामाः** इच्छा-मदनरूपाः **सम्यग् मनोज्ञा** यस्य स तथा, अथवा सह मनोज्ञैः वर्तत इति समनोज्ञः, गमकत्वात् सापेक्षस्यापि समासः, कामैः समनोज्ञः=**कामसमनोज्ञः**। यदि वा कामान् सम्यग् अनु=पश्चात् स्नेहानुबन्धाद् जानाति=सेवत इति **कामसमनुज्ञः** । एवम्भूतश्च किम्भूतो भवति? इत्याह—**'असमियदुक्खे' अशमितम्**=अनुपशमितं [4]विषयाभिष्वङ्ग-कषायोत्थं **दुःखं** येन स तथा । यत एव अशमितदुःखोऽत एव **दुःखी** शारीर-मानसाभ्यां दुःखाभ्याम् । तत्र शारीरं कण्टक-शस्त्र-गण्डलूतादिसमुत्थम्; मानसं प्रियविप्रयोगा-ऽप्रियसंयोगेप्सिताऽलाभ-दारिद्र्य-दौर्भाग्य-[5]दौर्मनस्यकृतम्; तद् द्विरूपमपि दुःखं विद्यते यस्यासौ दुःखी । एवम्भूतश्च सन् किमवाप्नोति? इत्याह—**दुक्खाणं** इत्यादि । **दुःखानां** शारीर-मानसानां [6]**आवर्त**

---

टि० १. ०गततत्त्वो हेयो० क ॥ २. उपदेशः ङ ॥ ३. द्रागेव क ग ऋते ॥ ४. विषय-कषायोत्थं क ॥ ५. ०दौर्मनस्यभूतम् च ॥ ६. आवर्तः ख ॥

पौनःपुण्यभवन**मनुपरिवर्तते**, दुःखावर्ताविमग्नो बम्भ्रम्यत इत्यर्थः, **इति** परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥८०॥

**॥ लोकविजयस्य [1]तृतीयोद्देशकटीका समाप्ता ॥छ॥**

१. तृतीयोद्देशकः समाप्तः ॥ छ ॥ ख च ॥

## ॥ चतुर्थ उद्देशकः ॥

उक्तस्तृतीयोद्देशकः । साम्प्रतं चतुर्थव्याख्या प्रस्तूयते—भोगेष्वनभिषक्तेन[1] भाव्यं यतो भोगिनामपाया दर्श्यन्ते ⊕प्रागुक्तम्, ते चामी—**तओ से एगया** इत्यादि । अनन्तरसूत्रसम्बन्धः—**दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ** [सू०८०] त्ति, तानि चामूनि दुःखानि—**तओ से** इत्यादि । परम्परसूत्रसम्बन्धस्तु—**बाले पुण णिहे कामसमणुण्णे**[सू०८०], ते च कामा दुःखात्मका एव; तत्र चाऽऽसक्तस्य धातुक्षय-भगन्दरादयो रोगाः समुत्पद्यन्ते इत्यतोऽपदिश्यते—

**[सू०] ततो से एगया रोगसमुप्पाया समुप्पज्जंति । जेहिं वा सद्धिं संवसति ते व णं एगया णियगा पुव्विं परिवयंति, सो वा ते णियए पच्छा परिवएज्जा । णालं ते तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा ॥८१॥**

**तओ से एगया रोगसमुप्पाया समुप्पज्जंति** । **ततः** इति कामानुषङ्गात्[2] कर्मोपचयः, ततोऽपि पञ्चत्वम्, तस्मादपि नरकभवः, नरकाद् निषेक-कलला-ऽर्बुद-पेशी-व्यूह-गर्भ-प्रसवादिः, जातस्य[3] च रोगाः प्रादुःष्यन्ति । **से**=तस्य कामानुषक्तमनसः, **एकदा** इति असातावेदनीयविपाकोदये, **रोगसमुत्पादा** इति रोगाणां शिरोऽर्ति-शूलादीनां समुत्पादाः =प्रादुर्भावाः, **समुत्पद्यन्ते**=प्रादुर्भवन्ति । तस्यां च रोगावस्थायां किम्भूतो भवत्यसौ ? इत्यत आह—

**जेहिं** इत्यादि । **यैः वा सार्धम**सौ **संवसति त एव एकदा निजाः पूर्वं परिवदन्ति, स वा तान् निजान् पश्चात् परिवदेत्** । **नालं ते तव त्राणाय वा शरणाय वा, त्वमपि तेषां नालं त्राणाय वा शरणाय वा** इति ॥८१॥

**[सू०] जाणित्तु दुक्खं पत्तेयं सायं, भोगामेव अणुसोयंति, इहमेगेसिं माणवाणं तिविहेण जा वि से तत्थ मत्ता भवति अप्पा वा बहुया वा से तत्थ गढिते चिट्ठति भोयणाए । ततो से एगया विप्परिसिट्ठं संभूतं महोवकरणं भवति । तं पि से एगया दायादा विभयंति, अदत्तहारो वा**

---

टि० १. ०ष्वनभियुक्तेन ख ॥ २. कामानुषङ्गापायात् घ ङ ॥ ३. भूतस्य च ॥

वि०टि० ⊕ दृश्यतां नि०१७३ गाथा ॥

**सेऽवहरति, रायाणो वा से विलुंपंति, णस्सति वा से, विणस्सति वा से अगारदाहेण वा से डज्झति ।**

**इति से परस्स अट्ठाए कूराइं कम्माइं बाले पकुव्वमाणे तेण दुक्खेण मूढे विप्परियासमुवेति ॥८२॥**

**ज्ञात्वा** तु **दुःखं प्रत्येकं सातं** च 'स्वकृतकर्मफलभुजः सर्वेऽपि प्राणिनः' इति मत्वा न रोगोत्पत्तौ दौर्मनस्यं भावनीयम्, न भोगाः शोचनीया इति । आह च—

**भोगामेवे**त्यादि । **भोगाः** शब्द-रूप-गन्ध-रस-स्पर्शविषयाभिलाषाः, तान् **एव अनुशोचन्ति**—'कथं अस्यामपि अवस्थायां वयं भोगान् भुञ्ज्महे ?; एवम्भूता च[1] अस्माकं दशा अभूद् येन मनोज्ञा अपि विषया उपनता नोपभोगाय' इति । ईदृक्षश्च अध्यवसायः केषाञ्चिदेव भवति इत्याह—

**इहमेगेसिं** इत्यादि । **इह**[2] संसारे **एकेषां** अनवगतविषयविपाकानां **ब्रह्मदत्ता**दीनां **मानवानां** एवम्भूतोऽध्यवसायो भवति, न सर्वेषाम्, **सनत्कुमारा**दिना व्यभिचारात्[3] । तथा हि—

**ब्रह्मदत्तो** मारणान्तिकरोगवेदनाभिभूतः सन्तापातिशयात् स्पृशन्तीं प्रणयिनीमिव विश्वासभूमीं मूर्च्छां बहुमन्यमानः, तथा हस्तीकृतो विहस्ततया, विषयीकृतो वैषम्येण, गोचरीकृतो ग्लान्या, दष्टो दुःखासिकया, क्रोडीकृतः कालेन, पीडितः पीडाभिः, निरूपितो नियत्या, आदित्सितो दैवेन, अन्तिकेऽन्त्योच्छ्वासस्य, मुखे महाप्रवासस्य, द्वारि दीर्घनिद्रायाः, जिह्वाग्रे जीवितेशस्य वर्तमानः, विरलो वाचि, विह्वलो वपुषि, प्रचुरः प्रलापे, जितो जृम्भिकाभिरिति; एवम्भूतां अवस्थां अनुभवन्नपि महामोहोदयाद् भोगांश्चिकाङ्क्षिषुः पार्श्वोपविष्टां भार्यां अनवरतवेदनावेशविगलदश्रुरक्तनयनां '**कुरुमति ! कुरुमति !**' इत्येवं[4] व्याहरन्नधः सप्तमीं नरकपृथ्वीमगात् । तत्रापि तीव्रतरवेदनाभिभूतोऽपि अवगणय्य वेदनां तामेव **कुरुमतीं** व्याहरतीति ।

एवम्भूतो भोगाभिष्वङ्गो दुस्त्यजो भवति केषाञ्चित्[5]; अन्येषां पुनः महापुरुषाणां उदारसत्त्वानाम् 'आत्मनोऽन्यच्छरीरम्' इत्येवं अवगततत्त्वानां **सनत्कुमारा**दीनामिव यथोक्तरोगवेदनासद्भावे सत्यपि 'मयैव एतत् कृतम्, सोढव्यमपि मयैव' इत्येवं जातनिश्चयानां कर्मक्षपणोद्यतानां न मनसः पीडा उत्पद्यते इति । उक्तं च—

---

**टि०** १. **वाऽस्माकं** ग ॥ २. **इह इति संसारेऽनवगत०** ख । **इहे( है )व संसारे एके०** च ॥ ३. **व्यभिचारः, तथाहि** क ॥ ४. **इत्येवं तां व्याह०** ख ग ॥ ५. **०त्, न पुनरन्येषां महा०** ख-चआदर्शौ विना ॥

"उप्तो यः स्वत एव मोहसलिलो[1] जन्मालवालोऽशुभः,
राग-द्वेष-कषायसन्ततिर्महानिर्विघ्नबीजस्त्वया[2] ।
रोगैरङ्कुरितो विपत्कुसुमितः कर्मद्रुमः साम्प्रतम्,
सोढा नो यदि सम्यगेष फलिता[3] दुःखैरधोगामिभिः ॥" [ ]

"पुनरपि सहनीयो दुःखपाकस्त्वयाऽयम्,[4]
न खलु भवति नाशः कर्मणां सञ्चितानाम् ।
इति[5] सह गणयित्वा यद् यदायाति सम्यक्,
सदसदिति विवेकोऽन्यत्र भूयः कुतस्त्यः ?॥" [ ]

अपि च भोगानां प्रधानं कारणं अर्थः, अतस्तत्स्वरूपमेव निर्दिदिक्षुराह—

**तिविहेण** इत्यादि । **त्रिविधेन याऽपि तस्य तत्र** अर्थमात्रा **भवति** [6]**अल्पा वा बह्वी वा; स** तस्यां अर्थमात्रायां **गृद्धः तिष्ठति** । सा च **भोजनाय** किल भविष्यति । **ततः तस्य एकदा विपरिशिष्टं सम्भूतं महोपकरणं भवति । तदपि तस्यैकदा दायादा विभजन्ते,** [7]**अदत्तहारा वा हरन्ति, राजानो वा** [8]**विलुम्पन्ति, नश्यति वा, विनश्यति वा, अगारदाहेन वा दह्यते । इति स परस्मा अर्थाय क्रूराणि कर्माणि बालः प्रकुर्वाणः तेन दुःखेन मूढो विपर्यासमुपैति;** एतच्च प्रागेव व्याख्यातमिति नेह प्रतायते ॥८२॥

तदेवं दुःखविपाकान् भोगान् प्रतिपाद्य यत् कर्तव्यं तदुपदिशति इत्याह—

[सू०] **आसं च छंदं च विगिंच धीरे ।**
**तुमं चेव तं सल्लमाहट्टु ।**
**जेण सिया तेण णो सिया ।**
**इणमेव णावबुज्झंति जे जणा मोहपाउडा ॥८३॥**

**आसं च** इत्यादि । **आशां** भोगाकाङ्क्षाम्, **चः** समुच्चये, छन्दनं **छन्दः** परानुवृत्त्या भोगाभिप्रायः तं **च**, चशब्दः पूर्वापेक्षया समुच्चयार्थः, तौ आशा-छन्दौ **वेविक्ष्व**=पृथक्कुरु त्यज, **धीर**! धीः=बुद्धिः, तया राजत इति । भोगाशा-छन्दाऽपरित्यागे च दुःखमेव केवलम्, न तत्प्राप्तिरिति । आह च—

**तुमं चेव** इत्यादि । विनेय उपदेशगोचरापन्न आत्मा वा अपदिश्यते, **त्वमेव तत्**

---

टि० १. **०सलिलैर्जन्मालवालेऽशुभो** ख ग । खप्रतौ मूलस्थः पाठः शोधितः ॥ २. **०महान् नि०** ग च ॥ ३. **फलितो** क-खप्रती ऋते ॥ ४. **०पाकस्तवाऽयं** ख ग च ॥ ५. **इह सह** ख ॥ ६. **अल्पा च बह्वी च** ख ॥ ७. **अदत्ताहारो वा तस्य हरति** ख ग घ ङ च । परं **हरन्ति** इति गप्रतौ । **अदत्तहारो** इति च-घप्रतौ विशेषः ॥ ८. **विलुञ्चन्ति** ग ॥

भोगाशादिकं **शल्यं आहृत्य**=स्वीकृत्य परं अशुभं आदत्से, न तु पुनः उपभोगम्; यतो भोगोपभोगा यैरेव अर्थाद्युपायैः भवति तैरेव न भवतीति । आह च–

**जेण सिया तेण नो सिया । येनै**व अर्थोपार्जनादिना भोगोपभोगः **स्यात् तेनै**व विचित्रात् कर्मपरिणतेः **न स्यात्** । अथवा येन केनचिद्धेतुना कर्मबन्धः स्यात् तद् न कुर्यात्, तत्र न वर्तेत इत्यर्थः । यदि वा येनैव राज्योपभोगादिना कर्मबन्धो येनैव निर्ग्रन्थत्वादिना[1] मोक्षः स्यात् भवेत् तेनैव तथाभूतपरिणामवशाद् न स्यादिति ।

एतच्च अनुभवावधारितमपि मोहाभिभूता नावगच्छन्ति इत्याह–

**इणमेव** इत्यादि । **इदमेव** हेतुवैचित्र्यं **न बुध्यन्ते**=न सञ्जानते । के ?– **ये जना** मौनीन्द्रोपदेशविकला **मोहेन** =अज्ञानेन मिथ्यात्वोदयेन वा **प्रावृताः**=छादिताः, तत्त्वविपर्यस्तमतयो[2] मोहनीयोदयाद् भवन्ति ॥८३॥

मोहनीयस्य च तद्भेदकामानां च स्त्रियो गरीयः कारणमिति[3] दर्शयति–

**[ सू० ]   थीभि लोए पव्वहिते ।**

**ते भो ! वदंति एयाइं आयतणाइं ।**

**से दुक्खाए मोहाए माराए णरगाए नरगतिरिक्खाए ।**

**सततं मूढे धम्मं णाभिजाणति ॥८४॥**

**थीभि** इत्यादि । **स्त्रीभिः** = अङ्गनाभिः भ्रूक्षेपादिविभ्रमैः[4] असौ **लोकः** आशाच्छन्दाभिभूतात्मा क्रूरकर्मविधायी नरकविपाकफलं शल्यं आहृत्य तत्फलं अबुध्यमानो मोहाच्छादितान्तरात्मा प्रकर्षेण व्यथितः=**प्रव्यथितः** पराजितो वशीकृत इति यावत् । न केवलं स्वतो विनष्टाः, अपरानपि असदुपदेशदानेन विनाशयन्ति इत्याह–

**ते भो** इत्यादि । **ते** स्त्रीभिः प्रव्यथिताः, **भो** ! इति आमन्त्रणे, एतद् **वदन्ति** यथा–'**एतानि** स्त्र्यादीनि **आयतनानि**=उपभोगास्पदभूतानि वर्तन्ते, एतैश्च विना शरीरस्थितिरेव न भवती'ति । एतच्च प्रव्यथनं उपदेशदानं वा तेषां अपायाय स्याद् इत्याह–

**से** इत्यादि । तेषां **से** इति एतत् स्त्रीप्रव्यथनं आयतनभणनं वा **दुःखाय** भवति शारीर-मानसासातवेदनीयोदयाय जायते । किञ्च– **मोहाए** मोहनीयकर्मबन्धनाय अज्ञानाय वेति[5], तथा **माराए**=मरणाय[6], ततोऽपि **नरगाए** नरकाय=नरकगमनार्थम्, पुनरपि '**नरगतिरिक्खाए**' ततोऽपि नरकादुद्वृत्य[7] तिरश्चि एतत् प्रभवति तिर्यग्योन्यर्थं तत् स्त्रीप्रव्यथनं

---

**टि०** १. **निर्ग्रन्थादिना** ग ॥ २. **०विपर्यासमतयो** ख ॥ ३. **०मिति कृत्वा दर्श०** ख ॥ ४. **भ्रूत्क्षेपादि०** घ ॥ ५. **चेति** क ख ॥ ६. **मारणाय** च ॥ ७. **०दुद्वर्त्त्य** खप्रतिमृते ॥

भोगायतनवदनं वा सर्वत्र सम्बन्धनीयम् ।

स एवं[1] अङ्गनापाङ्गविलोकनाक्षिप्तः तासु तासु योनिषु पर्यटन्नात्महितं न जानाति इत्याह—

**सययमित्यादि** । **सततम्**=अनवरतं दुःखाभिभूतो **मूढो धर्मं** क्षान्त्यादिलक्षणं दुर्गतिप्रसृतिनिषेधकं[2] **न जानाति**=न वेत्ति ॥८४॥

एतच्च तीर्थकृद् आह इति दर्शयति—

**[ सू० ] उदाहु वीरे—अप्पमादो महामोहे, अलं कुसलस्स पमादेणं, संतिमरणं सपेहाए, भेउरधम्मं सपेहाए ।**

**णालं पास । अलं ते एतेहिं ।**

**एतं पास मुणि ! महब्भयं । णातिवातेज्ज कंचणं ॥८५॥**

**उदाहु** इत्यादि । उत्-प्राबल्येन आह=**उदाह** उक्तवान्, कोऽसौ ? **वीरः**[3] अपगतसंसारभयः, तीर्थकृदित्यर्थः । किमुक्तवान् तदेव पूर्वोक्तं वाचा दर्शयति—**अप्रमादः** कर्तव्यः, क्व ? **महामोहे,** अङ्गनाभिष्वङ्ग एव महामोहकारणत्वाद्[4] महामोहः; तत्र प्रमादवता न भाव्यम् । आह च—

**अलं** इत्यादि । **अलं**=पर्याप्तम्, कस्य ? **कुशलस्य**=निपुणस्य सूक्ष्मेक्षिणः, केन अलं ? मद्य-विषय-कषाय-निद्रा-विकथारूपेण पञ्चविधेनापि **प्रमादेन,** यतः प्रमादो दुःखाद्यभिगमनाय उक्त इति । स्यात्—किं आलम्ब्य प्रमादेन अलं ? इति, उच्यते—

**संति** इत्यादि । शमनं=शान्तिः अशेषकर्मापगमः,[5] अतो मोक्ष एव शान्तिरिति, म्रियन्ते प्राणिनः पौनःपुन्येन यत्र चतुर्गतिके संसारे स मरणः संसारः; शान्तिश्च मरणं च =**शान्ति-मरणं** समाहारद्वन्द्वः, तत् **सम्प्रेक्ष्य**=पर्यालोच्य, 'प्रमादवतः संसारानुपरमः; तत्परित्यागाच्च मोक्षः' इति एतद् विचार्य इति हृदयम् । **स** वा कुशलः **प्रेक्ष्य** विषय-कषायप्रमादं न विदध्यात् । अथवा **शान्त्या**=उपशमेन **मरणं** मरणावधिं यावत् तिष्ठतो यत् फलं भवति तत् पर्यालोच्य प्रमादं न कुर्यादिति । किञ्च—

**भेउर०** इत्यादि । प्रमादो हि विषय-कषायाभिष्वङ्गरूपः शरीराधिष्ठानः; तच्च शरीरं **भिदुरधर्मं**, स्वत एव भिद्यत इति भिदुरं, स एव धर्मः स्वभावो यस्य तद् **भिदुरधर्मम्,**

---

टि० १. **एवमङ्गनाङ्गवि०** क । **एवाङ्गनापाङ्गावलोकना०** ख ॥ २. **०प्रसृतनि०** क घ च ॥ ३. **धीरः** ङ ॥ ४. **०मोहनी[ य ]कारणत्वाद्** ङ ॥ ५. **०कर्मापगमतो मोक्ष** ख ॥

एतत् **समीक्ष्य**=पर्यालोच्य प्रमादं न कुर्यादिति सम्बन्धः । ऐते[1] च भोगा भुज्यमाना अपि न तृप्तये भवन्ति इत्याह–

**नालं** इत्यादि । **नालं**=न समर्था अभिलाषोच्छित्तये यथेष्टावाप्तावपि[2] भोगाः, एतत् **पश्य** जानीहि; अतोऽलं **तव** कुशल ! **एभिः** प्रमादमयैः दुःखकारणस्वभावैः विषयैः उपभोगैः इति । न चैते बहुशोऽपि उपभुज्यमाना उपशमं विदधतीति । उक्तं च–

**"यल्लोके व्रीहि-यवं, हिरण्यं पशवः स्त्रियः ।**
**नालमेकस्य तत् सर्वमिति मत्वा शमं कुरु ॥"** [          ]

तथा– **"उपभोगोपायपरो वाञ्छति यः शमयितुं विषयतृष्णाम् ।**
**धावत्याक्रमितुमसौ पुरोऽपराह्ने निजच्छायाम् ॥"** [          ]

तदेवं भोगलिप्सूनां तत्प्राप्तौ अप्राप्तौ च दुःखमेव इति दर्शयति–

**ऐयं[3] पस्स** इत्यादि । **एतत्** प्रत्यक्षमेव भोगाशामहाज्वरगृहीतानां कामदशावस्थात्मकं **महद्भयं** भयहेतुत्वाद् दुःखमेव[4] भयं; तच्च मरणकारणमिति महद्[5] इत्युच्यते । **एतत् मुने** ! **पश्य** सम्यगैहिका-ऽऽमुष्मिकापायापादकत्वेन जानीहि इत्युक्तं भवति । यद्येवं तत् किं कुर्यात् ? इत्याह–

**नातिवातेज्ज** इत्यादि । यतो भोगाभिलषणं महद्भयं अतः तदर्थं **नातिपातयेत्**=न व्यथेत **कञ्चन**=कमपि जीवमिति । अस्य च शेषव्रतोपलक्षणार्थत्वाद् न प्रतारयेत् कञ्चन इत्याद्यपि आयोज्यम् ॥८५॥

भोगनिरीहः प्राणातिपातादिव्रताधिरूढश्च[6] कं गुणं अवाप्नोति ? इत्याह–

**[सू० ] एस वीरे पसंसिते जे ण णिव्विज्जति आदाणाए ।**
**ण मे देति ण कुप्पेज्जा, थोवं लद्धुं ण खिंसए ।**
**पडिसेहितो परिणमेज्जा ।**
**एतं मोणं समणुवासेज्जासि त्ति बेमि ॥८६॥**

**॥ लोगविजयस्स चउत्थो उद्देसओ सम्मत्तो ॥**

**एस** इत्यादि । **एष** इति भोगाशा-च्छन्दविवेचकः अप्रमादी पञ्चमहाव्रतभारा-रोहणोन्नामितस्कन्धो **वीरः**[7] कर्मविदारणात् **प्रशंसितः**=स्तुतो देवराजादिभिः । क एष[8] वीरो

---

टि० १. ते च क ॥ २. ०वाप्ता अपि ख ॥ ३. एवं ग ॥ ४. ०मेव महाभयं तच्च क ग च ॥ ५. महद्भयमित्युच्यते ख ॥ ६. ०व्रतादिरूढश्च क घ । ०व्रतारूढश्च ख ग च ॥ ७. धीरः ख च ॥ ८. एवं क ॥

नाम योऽभिष्टूयते ? इत्यत आह—

**जे** इत्यादि । **यो न निर्विद्यते**=न खिद्यते न जुगुप्सते, कस्मै ? **आदानाय** आदीयते=गृह्यते अवाप्यते[1] आत्मस्वतत्त्वं अशेषावारककर्मक्षयाविर्भूतसमस्तवस्तुग्राहिज्ञाना-ऽबाधसुखरूपं येन तद् आदानं संयमानुष्ठानं, तस्मै न जुगुप्सते । तद् वा कुर्वन् सिकता-कवलचर्वणदेशीयं क्वचिदलाभादौ न खेदमुपयाति इत्याह—

**न मे** इत्यादि । **'मम** अयं गृहस्थः सम्भृतसम्भारोऽपि उपस्थितेऽपि दानावसरे **न ददाती**'ति कृत्वा **न कुप्येत्**=न क्रोधवशगो भूयात् । भावनीयं च— 'ममैव एषा कर्मपरिणतिः इति अलाभोदयोऽयम्, अनेन[2] च अलाभेन कर्मक्षयाय उद्यतस्य मे तत्क्षपणसमर्थं तपो भावीति न किञ्चित् क्षूयते' । अथापि कथञ्चित् स्तोकं प्रान्तं वा लभेत तदपि न निन्देद् इत्याह—

[3]**थोवमि**त्यादि । **स्तोकं**=अपर्याप्तं **लब्धुं** लब्ध्वा वा[4] **न निन्देद्** दातारं दत्तं वा । तथा हि—कतिचित् सिक्थानयने ब्रवीति—'सिद्ध ओदनः, भिक्षामानय, लवणाहारो वा अस्माकं नास्तीति अन्नं ददस्व' इत्येवं अत्युद्वृत्तच्छात्रवद् न विदध्यात् । किञ्च—

[5]**पडिसेहिओ** इत्यादि । **प्रतिषिद्धः**=अदित्सितः तस्मादेव प्रदेशात् **परिणमेत्** =निवर्तेत, क्षणमपि न तिष्ठेत्, न दौर्मनस्यं विदध्यात्, न रुण्टन् अपगच्छेत्, न तां सीमन्तिनीं अपवदेत्— 'धिक् ते गृहवासम्' इति । उक्तं च—

**"दिट्ठा सि ⊕कसेरुमइ ! अणुभूया सि कसेरुमइ ! ।**
**पीयं चिय [6]ते पाणिययं वरि तुह नाम न दंसणयं ॥"** [          ] इत्यादि ।

पठ्यते च—**'पडिलाभिओ परिणमेज्जा' प्रतिलाभितः**=प्राप्तभिक्षा[7]दिलाभः सन् **परिणमेत्,** न उच्चा-ऽवचालापैः तत्रैव संस्तवं विदध्यात्, वैतालिकवद् दातारं न उत्प्रासयेदिति । उपसंहरन्नाह—

**एयं** इत्यादि । **एतत्** प्रव्रज्याऽनिर्वेदरूपं अदानाऽकोपनं स्तोकाऽजुगुप्सनं

---

टि० १. ०ते वा **आत्म०** ग ॥ २. **अनेनैवालाभोदयेन कर्मक्षपणार्थमुद्यतस्यैतत् क्षपणसमर्थं** ख ॥ ३. **थेवं इत्यादि** ख च । **थेवमि०** क ॥ ४.**वा** खप्रतावेव ॥ ५. **पडिसेहित्तु** ख ॥ ६. **तेण पाणियं वरि तुह नामं न** ख ॥ ७. **०क्षालाभः** क घ ॥

**वि०टि०** ⊕ "**कसेरुमयी**ति नदी" जै०वि०प० । अत्र कसेरुमती नाम नदी, तस्याः प्रसिद्धिरतीव नवरं न प्रसिद्ध्यनुरूपं तस्याः पानीयमिति क्षेपः —इति **व्यवहारभाष्ये मलय०वृत्तौ** गा०१३९६-९७ ॥

प्रतिषिद्धनिवर्तनं मुनेरिदं=**मौनं** मुनिभिः मुमुक्षुभिः वा आचरितं त्वमपि अवाप्तानेकभव-कोटिदुरापसंयमः सन् **समनुवासेये**[१]: सम्यग् विधत्स्व अनुपालय इति विनेयोपदेशः आत्मानुशासनं वा, **इतिः** परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥८६॥

**॥ लोकविजयाध्ययनचतुर्थोद्देशकटीका समाप्ता ॥ छ ॥**

टि० १. ०सयेः समनुपालयेति वि० ख॥

## ॥ पञ्चम उद्देशकः ॥

उक्तश्चतुर्थोद्देशकः । साम्प्रतं पञ्चमस्य व्याख्या प्रतन्यते । तस्य च अयमभिसम्बन्धः—इह भोगान् परित्यज्य लोकनिश्रया संयमदेहप्रतिपालनार्थं विहर्तव्यं इत्युक्तम्, तदत्र प्रतिपाद्यते । इह हि संसारोद्वेगवता परित्यक्तभोगाभिलाषेण मुमुक्षुणा उत्क्षिप्तपञ्चमहाव्रतभारेण निरवद्यानुष्ठानविधायिना दीर्घसंयमयात्रार्थं देहप्रतिपालनाय लोकनिश्रया विहर्तव्यम्; निराश्रयस्य हि कुतो देहसाधनानि ? तदभावे धर्मश्च ? इति । उक्तं हि—

**"धर्मं चरतः साधोर्लोके निश्रापदानि पञ्चापि ।**
**राजा गृहपतिरपरः षट्[1] काया गण-शरीरे च ॥"** [ ]

साधनानि च वस्त्र-पात्रा-ऽन्ना-ऽऽसन-शयनादीनिः, तत्रापि प्रायः प्रतिदिनं उपयोगित्वाद् आहारो गरीयानिति । स च लोकाद् अन्वेष्टव्यः; लोकश्च नानाविधैः उपायैः आत्मीयपुत्र-कलत्राद्यर्थं आरम्भप्रवृत्तः; तत्र साधुना संयम[2]देहनिमित्तं वृत्तिः अन्वेषणीया इति दर्शयति—

**[ सू० ] जमिणं विरूवरूवेहिं सत्थेहिं लोगस्स कम्मसमारंभा कज्जंति । तं जहा—अप्पणो से पुत्ताणं धूताणं सुण्हाणं णातीणं धातीणं राईणं दासाणं दासीणं कम्मकराणं कम्मकरीणं आदेसाए पुढो पहेणाए सामासाए पातरासाए संणिहिसंणिचयो कज्जति इहमेगेसिं माणवाणं भोयणाए ॥८७॥**

**जमिणं** इत्यादि । **यैः** अविदितवेद्यैः **इदम्** इति सुख-दुःखप्राप्तिपरिहारत्वं उद्दिश्य **विरूपरूपैः**[3]=नानास्वरूपैः **शस्त्रैः**=प्राण्युपघातकारिभिः द्रव्यभावभेदभिन्नैः **लोकाय**=शरीर-पुत्र-दुहितृ-स्नुषा-ज्ञात्याद्यर्थं **कर्मणां** सुख-दुःखप्राप्ति-परिहारक्रियाणां कायिका-ऽऽधिकरणिका-प्रादोषिका-पारितापनिका-प्राणातिपातरूपाणां कृषि-वाणिज्यादिरूपाणां वा, **समारम्भा** इति मध्यग्रहणाद् बहुवचननिर्देशात् च संरम्भा-ऽऽरम्भयोरपि उपादानम्, तेन अयमर्थः— शरीर-कलत्राद्यर्थं संरम्भ-समारम्भा-ऽऽरम्भाः **क्रियन्ते**=अनुष्ठीयन्ते । तत्र संरम्भः इष्टा-ऽनिष्टप्राप्ति-परिहाराय प्राणातिपातादिसङ्कल्पावेशः; तत्साधनसन्निपातकाय-वाग्व्यापारादिजनितपरितापनादिलक्षणः समारम्भः; दण्डत्रयव्यापारापादितचिकीर्षित-प्राणातिपातादिक्रिया[4]निर्वृत्तिः आरम्भः । **कर्मणो** वा अष्टप्रकारस्य **समारम्भाः** उपार्जनोपायाः

---

टि० १. **षट्कायगणः शरीरे च** ख ॥ २. **०मदेहनिमित्तं प्रवृत्ति०** क । **०देहार्थं वृत्ति०** ख । **०देहार्थं प्रवृत्ति०** च ॥ ३. **नानाप्रकारस्वरूपैः** ख ग ॥ ४. **०निवृत्ति०** ख च ॥

**क्रियन्त** इति । **लोकस्य** इति चतुर्थ्यर्थे षष्ठी, साऽपि तादर्थ्ये । कः पुनरसौ लोको यदर्थं संरम्भ-समारम्भा-ऽऽरम्भाः क्रियन्ते ? इत्याह– **'तं जहा–अप्पणो से'** इत्यादि । यदि वा **लोकस्य** तृतीयार्थे षष्ठी, **यद्** इति [1]हेतौ, यस्माद् **लोकेन** नानाविधैः **शस्त्रैः कर्मसमारम्भाः क्रियन्त** इत्यतः तस्मिन् लोके साधुः वृत्तिं अन्वेषयेत् । यदर्थं च लोकेन कर्मसमारम्भाः क्रियन्ते [2]तत् **तद्यथा** इत्यादिना दर्शयति–

**तं जहा–अप्पणो से** इत्यादि । **तद्यथा** [3]इति उपप्रदर्शनार्थे, न उक्तमात्रमेव, अन्यदपि एवंजातीयकं मित्रादिकं द्रष्टव्यम् । **से**=तस्य आरम्भारिप्सोः य **आत्मा**=शरीरं [4]तस्मै, तदर्थं कर्मसमारम्भाः पाकादयः क्रियन्ते ।

ननु च लोकार्थं आरम्भाः क्रियन्त इति प्रागभिहितम्, न च शरीरं लोको भवति; नैतदस्ति, यतः परमार्थदृशां ज्ञान-दर्शन-चारित्रात्मकं आत्मतत्त्वं विहाय अन्यत् सर्वं शरीराद्यपि पराक्यमेव । तथा हि–बाह्यस्य पौद्गलिकस्य अचेतनस्य कर्मणो विपाकभूतानि पञ्चापि शरीराणि इत्यतः शरीरात्माऽपि लोकशब्दाभिधेय इति ।

तदेवं कश्चिच्छरीरनिमित्तं कर्म्म आरभते; अपरस्तु **पुत्रेभ्यो, दुहितृभ्यः, स्नुषाः**= वध्वः ताभ्यः, **ज्ञातयः** पूर्वा-ऽपर[5]सम्बद्धाः स्वजनाः [6]ताभ्यः, **धात्रीभ्यः**, **राजभ्यः**, **दासेभ्यः**,**दासीभ्यः**, **कर्मकरेभ्यः**, **कर्मकरीभ्यः**, आदिश्यते परिजनो यस्मिन्नागते तदातिथेयाय इति **आदेशः** प्राघूर्णकः तदर्थं, कर्मसमारम्भाः क्रियन्त इति सम्बन्धः । तथा **पुढो पहेणाए** इत्यादि, **पृथक्** पृथक् पुत्रादिभ्यः **प्रहेणकार्थम्**; तथा **सामासाए** त्ति श्यामा=रजनी, तस्यामशनं=**श्यामाशः**, तदर्थम्; तथा **पायरासाए** त्ति प्रातरशनं=**प्रातराशः**, तस्मै, **कर्मसमारम्भाः क्रियन्त** इति सामान्येन उक्तौ अपि विशेषार्थमाह–

[7]**सन्निही**त्यादि । सम्यग् निधीयत इति सन्निधिः विनाशिद्रव्याणां दध्योदनादीनां संस्थापनम्; तथा सम्यग् निश्चयेन चीयत इति **सन्निचयः** अविनाशिद्रव्याणां अभया-⊕सिता-मृद्वीकादीनां सङ्ग्रहः, सन्निधिश्च सन्निचयश्च=**सन्निधि-सन्निचयं** प्राकृतशैल्या पुंलिङ्गता । अथवा सन्निधेः सन्निचयः = **सन्निधिसन्निचयः**; स च परिग्रहसञ्ज्ञोदयाद् आजीविकाभयाद् वा धन-धान्य-हिरण्यादीनां **क्रियत** इति । स च किमर्थम् ? इत्याह–

**इहे**त्यादि । **इह** इति मनुष्यलोके **एकेषां** [8]इहलोककृतपरमार्थबुद्धीनां **मानवानां**

---

**टि०** १. हेतोः ख ॥ २. **तत्** इति घप्रतावेव ॥ ३. **इत्युपप्रदर्शनार्थो** ग घ । **इत्युपदर्शनार्थो** ङ। **इत्युपप्रदर्शनार्थम्** च ॥ ४. **तस्मै अर्थं तदर्थं कर्म०** ग च ॥ ५. **०सम्बन्धाः** क ॥ ६. **तेभ्यः** खपुस्तकमृते ॥ ७. **सन्निही य इत्यादि** ग ॥ ८. **इहलोकभूतपरमार्थ०** च ॥

**वि०टि०** ⊕ "उ०५-**सिता** शर्करा" स०वि०प० ॥

=मनुष्याणां **भोजनाय**=उपभोगार्थमिति ॥८७॥

तदेवं विरूपरूपैः शस्त्रैः आत्मपुत्राद्यर्थं कर्मसमारम्भप्रवृत्ते लोके पृथक् प्रहेणकाय श्यामाशाय प्रातराशाय केषाञ्चिद् मानवानां भोजनार्थं सन्निधिसन्निचयकरणोद्यते सति साधुना किं कर्तव्यम् ? इत्याह–

**[ सू० ] समुट्ठिते अणगारे आरिए आरियपण्णे आरियदंसी अयंसंधीति अदक्खु ।**

**से णाइए, णाइआवए, न समणुजाणए ।**

**सव्वामगंधं परिण्णाय णिरामगंधे परिव्वए ।**

**समुट्ठिए** इत्यादि यावत् **निरामगन्धो परिव्वए** । सम्यक् सततं सङ्गतं वा संयमानुष्ठानेन उत्थितः=**समुत्थितः**, [1]नानाविधशस्त्रकर्मसमारम्भोपरत इत्यर्थः । न विद्यते अगारं=गृहं अस्य इति **अनगारः**, पुत्र-दुहितृ-स्नुषा-ज्ञाति-धात्र्यादिरहित इत्यर्थः । [2]सोऽनगारः, आराद् यातः सर्वहेयधर्मेभ्य इति **आर्यः** चारित्रार्हः, आर्या प्रज्ञा यस्य असौ=**आर्यप्रज्ञः**, [3]श्रुतविशेषितशेमुषीक इत्यर्थः; आर्यं=प्रगुणं न्यायोपपन्नं पश्यति तच्छीलश्च इति **आर्यदर्शी**, पृथक्प्रहेणक-श्यामाशनादिसङ्कल्परहित इत्यर्थः; **अयंसंधी**ति सन्धानं सन्धीयते वा असौ इति सन्धिः, अयं सन्धिः यस्य साधोः असौ =**अयंसन्धिः**, "**छान्दसत्वाद् विभक्तेरलुग्**" इति अयंसन्धिः यथाकालं अनुष्ठानविधायी, यो यस्य वर्तमानः कालः कर्तव्यतया उपस्थितः तत्करणतया तमेव सन्धत्त इति । एतदुक्तं भवति– सर्वाः क्रियाः प्रत्युपेक्षणोपयोग-स्वाध्याय-भिक्षाचर्या-प्रतिक्रमणादिका असपत्ना अन्योन्याऽबाधया आत्मीयकर्तव्यकाले करोति इत्यर्थः । **इतिः** [4]हेतोः, यस्माद् यथाकालानुष्ठानविधायी तस्माद् असावेव परमार्थं पश्यति इत्याह–**अदक्खु** त्ति । तिङ्व्यत्ययेन एकवचनावसरे बहुवचनमकारि; ततश्च अयमर्थः–यो हि आर्य आर्यप्रज्ञ आर्यदर्शी कालज्ञश्च स एव परमार्थं **अद्राक्षीत्**, नापर इति ।

पाठान्तरं वा– **अयं** [5]**संधिमदक्खु** । **अयं** अनन्तरविशेषणविशिष्टः साधुः **सन्धि**=कर्तव्यकालं **अद्राक्षीत्**=दृष्टवान् । एतदुक्तं भवति–यः परस्पराऽबाधया हिता-ऽहितप्राप्ति-परिहाररूपतया विधेयावसरं वेत्ति विधत्ते च स परमार्थं ज्ञातवानिति । अथवा भावसन्धिः

---

टि० १. **नानाविधकर्मशस्त्रमा०** क ॥ २. **असौ ऽ(अ)नगारः** क ॥ ३. **श्रुतविशेषशेमुषीकः** ग ॥ ४. **हेतौ** ग घ च ॥ ५. **संधिं अदक्खु अयम् अनन्तरोक्तविशेषण०** ख च ॥

ज्ञान-दर्शन-चारित्राणां अभिवृद्धिः; स च शरीरमृते न भवति, तदपि नोपष्टम्भकारणं अन्तरेण, तस्य च सावद्यस्य परिहारः कर्तव्य इत्यत आह—

**से णाइए**[1] इत्यादि । **स** भिक्षुः तद् वा अकल्प्यं **नाददीत**=न गृह्णीयात्, नापि अपरं **आदापयेत्**=ग्राहयेत्, **न** अपरं अनेषणीयं आददतं **समनुजानीयात्** । अथवा सइङ्गालं सधूमं वा **न अद्यात्**=न भक्षयेत्, **न** अपरं **आदयेत्**, अदन्तं वा **न समनुजानीयादि**ति । आह—

**सव्वामगन्धमि**त्यादि । आमं च गन्धश्च=आम-गन्धं समाहारद्वन्द्वः, सर्वं च तद् आम-गन्धं च=**सर्वाम-गन्धम्**, सर्वशब्दः प्रकारकात्स्न्र्येऽत्र गृह्यते, न द्रव्यकात्स्न्र्ये । ⊕आमं अपरिशुद्धम्; गन्धग्रहणेन तु पूतिः गृह्यते ।

ननु च पूतिद्रव्यस्यापि अशुद्धत्वाद् आमशब्देनैव उपादानात् किमर्थं भेदेन उपादानमिति ? सत्यम्, अशुद्धसामान्याद् गृह्यते, किन्तु पूतिग्रहणेन इह आधाकर्माद्य-विशुद्धकोटिः उपात्ता, तस्याश्च [2]गुरुतरत्वात् प्राधान्यख्यापनार्थं पुनरुपादानम् । ततश्च अयमर्थः—गन्धग्रहणेन आधाकर्म १, औद्देशिकत्रिकं २, पूतिकर्म ३, [3]मिश्रजातं ४, बादरप्राभृतिका ५, अध्यवपूरकश्च ६, एते षड्डुद्गमदोषा अविशुद्धकोट्यन्तर्गता गृहीताः; शेषास्तु विशुद्धकोट्यन्तर्भूता आमग्रहणेन उपात्ता द्रष्टव्या इति ।

सर्वशब्दस्य च प्रकारकात्स्न्र्याभिधायकत्वाद् येन केनचित् प्रकारेण आमम्= अपरिशुद्धं पूतिः वा भवति तत् सर्वं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया **निराम-गन्धः** निर्गतौ आम-गन्धौ यस्मात् स तथा, **परिव्रजेत्** मोक्षमार्गे ज्ञान-दर्शन-चारित्राख्ये परिः =समन्ताद् गच्छेत्, संयमानुष्ठानं सम्यगनुपालयेदिति यावत् । आमग्रहणेन प्रतिषिद्धेऽपि क्रीतकृते तथापि अल्पसत्त्वानां विशुद्धकोट्यालम्बनतया मा भूत् तत्र प्रवृत्तिः; अतस्तदेव नामग्राहं [4]प्रतिषिषेधिषुराह—

**अदिस्समाणे कय-विक्कएसु ।**

**से ण किणे, ण किणावए, किणंतं ण समणुजाणए ।**

**अदिस्स०** इत्यादि । क्रयश्च विक्रयश्च=**क्रय-विक्रयौ**, तयोः **अदृश्यमानः** । कीदृक्षश्च तयोः अदृश्यमानो भवति ? यस्तयोः निमित्तभूतद्रव्याभावाद् अकिञ्चनः । अथवा **क्रय-विक्रययोः अदिश्यमानः**=अनपदिश्यमानः । कश्च तयोः अनपदिश्यमानो भवति ? यः क्रीतकृतापरिभोगी भवतीति आह—

---

टि० १. णाइते ख । णाईए घ ङ ॥ २. गुरुत्वात् ख । ३. मिश्रजातत्रिकं ४ ग ॥ ४. प्रतिषिषेधयिषुराह च ॥

वि०टि० ⊕ 'आमं अविसोधिकोडी, गंधो विसोधिकोडी' बृ०क०भा०चू०३१७ । 'आमम्- अविशोधिकोटिः गन्धं विशोधिकोटिः' बृ०क०भा०वृ०३१६ ॥

**से ण किणे** इत्यादि । **स** मुमुक्षुः अकिञ्चनो धर्मोपकरणमपि **न क्रीणीयात्** स्वतः, **नापि** अपरेण **क्रापयेत्, क्रीणन्तमपि न समनुजानीयात्** । अथवा निरामगन्धः परिव्रजेद् इत्यत्र आमग्रहणेन हननकोटित्रिकम्, गन्धग्रहणेन पचनकोटित्रिकम्, क्रयण-कोटित्रिकं तु पुनः स्वरूपेणैव उपात्तम्; अतो नवकोटीपरिशुद्धं आहारं विगताङ्गार-धूमं भुञ्जीत । एतद्गु[1]णविशिष्टश्च किम्भूतो भवति ? इत्याह–

**से भिक्खू कालण्णे बालण्णे मातण्णे खेयण्णे खणयण्णे विणयण्णे समयण्णे भावण्णे परिग्गहं अममायमाणे कालेणुट्ठाई अपडिण्णे । दुहतो छित्ता णियाइ ॥८८॥**

**से भिक्खू कालन्ने** । कालः=कर्तव्यावसरः, तं जानातीति **कालज्ञः** विदितवेद्यः; तथा '[2]**बालण्णे**' बलं जानातीति **बलज्ञः**, छान्दसत्वाद् दीर्घत्वम्, आत्मबलं सामर्थ्यं जानातीति यथाशक्त्यनुष्ठानविधायी, अनिगूहितबलवीर्य इत्यर्थः; तथा '**मायन्ने**' यावद्द्रव्योपयोगिता=मात्रा, तां जानातीति तज्ज्ञः; तथा **खेदन्ने** खेदः=अभ्यासः, तेन जानातीति **खेदज्ञः**, अथवा **खेदः**=श्रमः संसारपर्यटनजनितः, तं जानातीति । उक्तं च–

> "**जरा-मरण-दौर्गत्य-व्याधयस्तावदासताम् ।**
> **मन्ये जन्मैव [3]धीरस्य भूयो भूयस्त्रपाकरम् ॥**" [ ] इत्यादि ।

अथवा **क्षेत्रज्ञः**=संसक्त-विरुद्धद्रव्य-परिहार्यकुलादिक्षेत्रस्वरूपपरिच्छेदकः; तथा '**खणयन्ने**' क्षण एव **क्षणकः** अवसरो भिक्षार्थं उपसर्पणादिकः, तं जानातीति; तथा '**विणयन्ने**' **विनयः** ज्ञान-दर्शन-[4]चारित्रौपचारिकरूपः, तं जानातीति; तथा **समयन्ने** [5]स्वसमय-परसमयौ जानातीति । स्वसमयज्ञो गोचरप्रदेशादौ पृष्टः सन् सुखेनै[6]व भिक्षादोषान् आचष्टे, तद्यथा–षोडशोद्गमदोषाः; ते चामी–आधाकर्म १, औद्देशिकं २, पूतिकर्म ३, मिश्रजातं ४, स्थापना ५, प्राभृतिका ६, प्रकाशकरणं ७, क्रीतं ८, उद्यतकं ९, परिवर्तितं १०, अभ्याहृतं ११, उद्भिन्नं १२, [7]मालापहृतं १३, आच्छेद्यं १४, अनिसृष्टं १५, अध्यवपूरकश्चेति १६ । षोडशोत्पादनदोषाः; ते चामी–धात्रीपिण्डः १, दूतीपिण्डः २, निमित्तपिण्डः ३, आजीवपिण्डः ४, [8]वनीपकपिण्डः ५, चिकित्सापिण्डः ६, क्रोधपिण्डः ७,

---

टि० १. ०णविशिष्टस्तु क ग ॥ २. **बलण्णे** ख । **बालज्ञो बलं** च ॥ ३. **वीरस्य** ख च ॥ ४. **०चारित्ररूपस्तं** क ॥ ५. **स्वसमयं जानातीति स्वसमयज्ञो गोचर०** च ॥ ६. **०व जानाति भिक्षा०** ख ॥ ७. **मालाभ्यहृतं** ग ॥ ८. **वनीमकपिण्डः** ख च ॥

मानपिण्डः ८, मायापिण्डः ९, लोभपिण्डः १०, पूर्वसंस्तवपिण्डः ११, पश्चात्संस्तवपिण्डः १२, विद्यापिण्डः १३, मन्त्रपिण्डः १४, चूर्णयोगपिण्डः १५, मूलकर्मपिण्डश्चेति १६ । तथा दशैषणादोषाः; ते चामी—शङ्कित १–म्रक्षित २–निक्षिप्त ३–पिहित ४–संहृत ५–दायक ६–उन्मिश्रा ७–ऽपरिणत ८–लिप्त ९–उज्झित १० दोषाः । एषां च उद्गमदोषा दातृकृता एव भवन्ति; उत्पादनादोषास्तु साधुजनिताः; एषणादोषा[१]श्च उभयोत्पादिता इति । तथा परसमयज्ञो ग्रीष्ममध्याह्नतीव्रतरतरणिकरनिकरावलीढगलत्स्वेदबिन्दुकक्लिन्नवपुष्कः साधुः केनचिद् धिग्जातिदेश्येन अभिहितः— 'किमिति भवतां सर्वजनाचीर्णं स्नानं न सम्मतम् ?' इति; स आह—प्रायः सर्वेषामेव यतीनां कामाङ्गत्वाद् जलस्नानं प्रतिषिद्धम्, तथा च **आर्षम्—**

**"स्नानं मद-दर्पकरं कामाङ्गं प्रथमं स्मृतम् ।**
**तस्मात् कामं परित्यज्य नैव स्नान्ति दमे रताः ॥"** [ ] इत्यादि ।

तदेवं उभयज्ञः तद्विषये [२]प्रश्ने उत्तरदानाऽनाकुलो भवति । तथा **भावन्ने** भावः= चित्ताभिप्रायो दातुः श्रोतुः वा, तं जानातीति **भावज्ञः** । किञ्च—**परिग्गहं अममायमीणे** परिगृह्यत इति **परिग्रहः** संयमातिरिक्तं उपकरणादि, तं **अममीकुर्वन्**=अस्वीकुर्वन् मनसाऽपि अनाददान इति यावत् । स एवंविधो भिक्षुः कालज्ञो बलज्ञो मात्राज्ञः [३]खेदज्ञः क्षणकज्ञो विनयज्ञः समयज्ञो भावज्ञः परिग्रहं अममीकुर्वाणश्च किम्भूतो भवति इत्याह—

[४]**कालेणुट्ठाई** । यद् यस्मिन् काले कर्तव्यं तत् तस्मिन्नेव अनुष्ठातुं शीलमस्य इति **कालानुष्ठायी**, कालानतिपातकर्तव्योद्यतः । ननु च अस्यार्थस्य **से भिक्खू कालन्ने** इत्यनेनैव गतार्थत्वात् [५]किमर्थं पुनरभिधीयते ? इति; नैष दोषः, तत्र हि ज्ञपरिज्ञैव केवलाऽभिहिता, कर्तव्यकालं जानाति; इह पुनः आसेवनापरिज्ञा, कर्तव्यकाले कार्यं विधत्त इति । किञ्च—[६]**अपडिन्ने** नास्य प्रतिज्ञा विद्यते इति **अप्रतिज्ञः**; प्रतिज्ञा च कषायोदयाद् आविरस्ति । तद्यथा—क्रोधोदयात् **स्कन्दकाचार्येण** स्वशिष्ययन्त्रपीलनव्यतिकरं आलोक्य सबल-वाहन-राजधानीसमन्वितपुरोहितोपरि विनाश[७]प्रतिज्ञा अकारि । तथा मानोदयाद् **बाहुबलि**ना प्रतिज्ञा व्यधायि यथा—'कथमहं शिशून् स्वभ्रातॄन् उत्पन्ननिरावरण-ज्ञानांश्छद्मस्थः सन् द्रक्ष्यामि ?' इति । तथा मायोदयाद् [८]**मल्लिस्वामि**जीवेन यथा अपरयतिविप्रलम्भनं भवति तथा प्रत्याख्यान[९]परिज्ञा जगृहे । तथा लोभोदयाच्च

---

**टि०** १. **०षाश्चोभयापादिता** ख च ॥ २. **प्रश्ने उत्तरदानाकुलो** क । **प्रश्ने उत्तरप्रदानकुशलो** ख । **प्रश्नोत्तरदानाऽनाकुलो** ग । **प्रश्ने उत्तरदानकुशलो** च ॥ ३. **क्षेत्रज्ञः** च ॥ ४. **काले अणुट्ठाई** क । **काले अणुट्ठायी** ग । **कालो( लेऽ )णुट्ठाई** घ । **कालाणुट्ठाई** ङ ॥ ५. **किमयं पुन०** ख ॥ ६. **अप्पडिन्ने** क ङ ॥ ७. **०प्रतिज्ञाभ्यधायि** ख ॥ ८. **मल्लिस्वामिनाऽभ्यधायि यथाऽपरजनविप्र०** ख ॥ ९. **०नप्रतिज्ञा** घ ङ ॥

अविदितपरमार्थाः साम्प्रतेक्षिणो यत्याभासा मासक्षपणादिका अपि प्रतिज्ञाः कुर्वन्ति ।

अथवा **अप्रतिज्ञः**=अनिदानो **वसुदेव**वत् संयमानुष्ठानं कुर्वन् निदानं न करोतीति । अथवा गोचरादौ प्रविष्टः सन्नाहारादिकं मम एतद् भविष्यति इत्येवं प्रतिज्ञां न करोतीति अप्रतिज्ञः । यदि वा स्याद्वादप्रधानत्वाद् मौनीन्द्रागमस्य एकपक्षावधारणं च प्रतिज्ञा[1], तद्रहितः अप्रतिज्ञः । तथा हि–मैथुनविषयं विहाय अन्यत्र न क्वचिद् नियमवती प्रतिज्ञा विधेया; यत उक्तम्–

**"न य किंचि अणुण्णायं पडिसिद्धं वा वि जिणवरिंदेहिं ।**
**मोत्तुं मेहुणभावं[2] न तं विणा राग-दोसेहिं ॥"**[धर्मसंग्रहणि १०६४]
**"दोसा जेण [3]निरुब्भंति जेण [4]झिज्जंति पुव्वकम्माइं ।**
**सो सो मोक्खोवाओ रोगावत्थासु समणं व ॥"**
**[ निशी०भा०५२५०-५३७३, बृ०क०भा०३३३१ ]**
**"जे जत्तिया य[5] हेऊ भवस्स ते चेव तत्तिया मोक्खे ।**
**गणणातीता लोया दोण्ह वि पुण्णा भवे तुल्ला ॥"**
**[ओघनि०५४, निशी०भा०६४६४]** इत्यादि ।

**अयंसंधीति** आरभ्य **[6]कालेअणुट्ठाइ** त्ति यावदेतेभ्यः सूत्रेभ्य एकादशभ्यः पिण्डैषणा[⊕] [Φ]निर्यूढा इति ।

एवं तर्हि अप्रतिज्ञ इत्यनेन सूत्रेण इदमापन्नम्–न क्वचित् केनचित् प्रतिज्ञा विधेया, प्रतिपादिताश्च **आगमे** नानाविधा अभिग्रहविशेषाः; ततश्च पूर्वोत्तरव्याहतिरिव लक्ष्यत इत्यत आह–

**दुहओ छेत्ता णियाति । द्विधा** इति रागेण द्वेषेण वा या प्रतिज्ञा तां **छित्त्वा** निश्चयेन नियतं वा याति=**नियाति** ज्ञान-दर्शन-चारित्राख्ये मोक्षमार्गे संयमानुष्ठाने वा भिक्षाद्यर्थं वा । एतदुक्तं भवति– राग-द्वेषौ च्छित्त्वा प्रतिज्ञा गुणवती, व्यत्यये व्यत्यय इति ॥८८॥

स एवम्भूतो भिक्षुः कालज्ञो बलज्ञो यावद् द्विधा [7]छिन्दन् किं कुर्यात् ? इत्याह–

**[ सू० ] वत्थं पडिग्गहं कंबलं पादपुंछणं उग्गहं च कडासणं एतेसु चेव जाणेज्जा ।**

---

टि० १. ०ज्ञा तस्मात् तद्रहितो० ख । ०ज्ञा तस्माद्रहितो० ग ॥ २. न विणा तं राग० च ॥ ३. निरुज्झंति ङ । निरज्जंति च ॥ ४. सिज्झंति क ॥ ५. उ ख विना ॥ ६. काले अणुट्ठाइ त्ति ख च ऋते ॥ ७. च्छित्त्वा [ णियान्? ] किं क ॥

वि०टि० ⊕ आचा०द्वि०श्रु०स्कन्धस्य प्रथमाध्ययनस्यैकादश उद्देशकाः ॥ Φ "निर्यूढा इति द्वितीयस्कन्धे प्रथमाध्ययने उद्देशरूपा(पाः)" जै०वि०प० ॥

**वत्थं पडिग्गहं** इत्यादि यावत् **एएसु चेव जाणिज्जा । एतेषु** पुत्राद्यर्थं आरम्भप्रवृत्तेषु सन्निधिसन्निचयकरणोद्यतेषु **जानीयात्**=शुद्धा-ऽशुद्धतया परिच्छिन्द्यात् । परिच्छेदश्च एवमात्मकः—शुद्धं गृह्णीयादशुद्धं परिहरेदिति यावत् । किं तज्जानीयात् ?—**वस्त्रं** वस्त्रग्रहणेन वस्त्रैषणा सूचिता; तथा **पतद्ग्रहं**=पात्रम्, एतद्ग्रहणेन च पात्रैषणा सूचिता; **कम्बलमि**त्यनेन आविकः पात्रनिर्योगः कल्पश्च गृह्यते; **पादपुञ्छनकमि**त्यनेन च रजोहरणमिति । एभिश्च सूत्रैः ओघोपधिः औपग्रहिकश्च सूचितः । तथैतेभ्य एव वस्त्रैषणा* पात्रैषणा च [१]निर्यूढा । तथा अवगृह्यत इति **अवग्रहः**; स च पञ्चधा—देवेन्द्रावग्रहः राजावग्रहः गृहपत्यवग्रहः शय्यातरावग्रहः साधर्मिकावग्रहश्चेति । अनेन ⊕चावग्रहप्रतिमाः सर्वाः सूचिताः, अत एवासौ निर्यूढा, ✡अवग्रहकल्पिकश्च अस्मिन्नेव सूत्रे [२]कल्पते । तथा **कटासनं कट**ग्रहणेन संस्तारो गृह्यते; **आसन**ग्रहणेन च आसन्दकादि विष्टरमिति । आस्यते= स्थीयते अस्मिन्निति **आसनं**=शय्या, ततश्च आसनग्रहणेन ☐शय्या सूचिता; अत एवासौ निर्यूढेति । एतानि च सर्वाण्यपि वस्त्रादीनि आहारादीनि च **एतेषु** स्वारम्भप्रवृत्तेषु गृहस्थेषु **जानीयात्**, सर्वाम-गन्धं परिज्ञाय निरामगन्धो यथा [३]भवसि तथा परिव्रजेः इति भावार्थः । एतेषु च स्वारम्भप्रवृत्तेषु गृहस्थेषु परिव्रजन् यावल्लाभं गृह्णीयाद् उत कश्चिद् नियमोऽपि अस्ति ?, अस्ति इत्याह—

**लद्धे आहारे अणगारो मातं जाणेज्जा । से जहेयं भगवता पवेदितं ।**

**लद्धे** इत्यादि । **लब्धे**=प्राप्ते सति **आहारे**, आहारग्रहणं चोपलक्षणार्थम्, अन्यस्मिन्नपि वस्त्रौषधादिके, **अनगारः**=भिक्षुः **मात्रां जानीयात्**, यावन्मात्रेण गृहीतेन गृहस्थः पुनरारम्भे न प्रवर्तते यावन्मात्रेण च आत्मनो विवक्षितकार्यनिष्पत्तिः भवति तथाभूतां मात्रां अवगच्छेद् इति भावः । एतच्च स्वमनीषिकया न उच्यत इत्यत आह—

**से जहेयं** इत्यादि । **तद् यथा इदं** उद्देशकादेः आरभ्य अनन्तरसूत्रं यावद् **भगवता** ऐश्वर्यादिगुणसमन्वितेन **अर्द्धमागधया** भाषया सर्वस्वभाषानुगतया सदेव-मनुजायां परिषदि केवलज्ञानचक्षुषा अवलोक्य **प्रवेदितं**=प्रतिपादितं **सुधर्मस्वामी जम्बूस्वामि**ने इदमाचष्टे । किञ्च अन्यत्—

**लाभो त्ति ण मज्जेज्जा । अलाभो त्ति ण सोएज्जा, बहुं पि लद्धुं**

---

**टि०** १. निर्व्यूढा च ॥ २. क्रियते ख ग च ॥ ३. भवति तथा परिव्रजेदिति ख ग ॥

**वि०टि०** * आचा०द्वि०श्रु०स्कन्धस्य पञ्चम-षष्ठाध्ययने ॥ ⊕ "[ अवग्रहप्रति? ]मा इति अवग्रहविशेषाः" जै०वि०प० । आचा०द्वि०श्रु०स्कन्धस्य सप्तमाध्ययनम् ॥ ✡ विस्तरार्थिभिः द्रष्टव्याः बृ०क०भा०१९९-२०६ गाथाः ॥ ☐ आचा०द्वि०श्रु०स्कन्धस्य द्वितीयाध्ययनम् ॥

**ण णिहे । परिग्गहाओ अप्पाणं अवसक्केज्जा । अण्णहा णं पासए परिहरेज्जा ।**

**लाभो त्ति** इत्यादि । '**लाभो** वस्त्रा-ऽऽहारादेः मम संवृत्तः[1], अहो ! अहं लब्धिमान्' **इत्येवं** मदं न विदध्यात् । न च तदभावे शोकाभिभूतो विमनस्को भूयाद् इत्याह—

**अलाभो त्ति** इत्यादि । **अलाभे** सति शोकं **न** कुर्यात् । कथम् ?— 'धिग् माम्, मन्दभाग्योऽहं येन सर्वदानोद्यतादपि दातुः न लभेऽहमि'[2]ति । अपि तु तयोः लाभा-ऽलाभयोः माध्यस्थ्यं भावनीयमिति । उक्तं च—

**"लभ्यते लभ्यते साधुः[3] साधुरेव न लभ्यते ।**
**अलब्धे[4] तपसो वृद्धिर्लब्धे तु प्राणधारणम् ॥"** [ ] इत्यादि ।

तदेवं पिण्ड-पात्र-वस्त्राणां एषणाः प्रतिपादिताः । साम्प्रतं सन्निधिप्रतिषेधं कुर्वन्नाह—

**बहुं पि** इत्यादि । **बह्वपि लब्ध्वा न निहे** त्ति न स्थापयेत्, न सन्निधिं कुर्यात् । स्तोकं तावद् न सन्निधीयत[5] एव, बह्वपि न सन्निदध्याद्[6] इति अपिशब्दार्थः । न केवलं आहारसन्निधिं न कुर्यात्, अपरमपि वस्त्र-पात्रादिकं संयमोपकरणातिरिक्तं न बिभृयाद् इत्याह—

**परी**त्यादि । परिगृह्यत इति **परिग्रहः** धर्मोपकरणातिरिक्तं उपकरणं, तस्माद् **आत्मानं अपष्वष्केत्**[7]=अपसर्पयेत् । अथवा संयमोपकरणमपि मूर्च्छया परिग्रहो भवति, "**मुच्छा परिग्गहो वुत्तो**"[8][**दशवै०६/२१**] इति वचनात्; तत आत्मानं परिग्रहाद् अपसर्पयन्नुपकरणे तुरगवद् मूर्च्छां न कुर्यात् ।

ननु यः कश्चिद् धर्मोपकरणाद्यपि परिग्रहो न स चित्तकालुष्यमृते भवति । तथा हि— आत्मीयोपकारिणि रागः, उपघातकारिणि च द्वेषः; ततः परिग्रहे सति राग-द्वेषौ नेदिष्ठौ[9]⊕, ताभ्यां च कर्मबन्धः, ततः[10] कथं परिग्रहो धर्मोपकरणम् ? । उक्तं च—

---

टि० १. संवृत्त इत्यतोऽहं लब्धि० ख च । संवृत्त इत्यतोऽहोऽहं लब्धिमान् इत्येवं न मदं विद० ग ॥२. लभेयमिति ख ॥ ३. साधु साधु चैव न घ ङ ॥ ४. अलाभे तपसो वृद्धिर्लाभे तु ख ॥ ५. सन्धीयत क ॥ ६. सन्निधिं विदध्यादि० क ॥ ७. अवशक्यात् ख ॥ ८. "मूर्छा च परिग्रहः" इति व० ख । "मूर्छा परिग्रहः" इति व० ग घ ङ च ॥ ९. निर्दिष्टौ क ख ॥ १०. तत् कथं ख च । ततः कथं न परिग्रहो ग ॥

वि०टि० ⊕ "नेदिष्ठौ निकटौ" जै०वि०प० ॥

**"ममाहमिति चैष यावदभिमानदाहज्वरः,**
**कृतान्तमुखमेव तावदिति न प्रशान्त्युन्नयः ।**
**यशः-सुखपिपासितैरयमसावनर्थोत्तरैः,**
**परैरपशदः कुतोऽपि कथमप्यपाकृष्यते ॥"** [    ]

नैष दोषः, न हि धर्मोपकरणे मम इदमिति एवं साधूनां परिग्रहाग्रहयोगोऽस्ति । तथा हि **आगमः**—

**"अवि अप्पणो वि देहम्मि नायरंति ममाइउं ।" [ दशवै० ६।२२ ]**

यदिह परिगृहीतं कर्मबन्धाय उपकल्पते स परिग्रहः; यत् तु पुनः कर्मनिर्जरणार्थं प्रभवति तत् परिग्रह एव न भवतीति । आह च—

**अण्णहा णं** इत्यादि । **णमिति** वाक्यालङ्कारे, **अन्यथा** इति अन्येन प्रकारेण **पश्यकः** सन् परिग्रहं **परिहरेत्** । यथा हि अविदितपरमार्था गृहस्थाः सुखसाधनाय परिग्रहं पश्यन्ति न तथा साधुः । तथा हि अयं अस्य आशयः—आचार्यसत्कं इदं उपकरणं न ममेति, राग-द्वेषमूलत्वात् परिग्रहाग्रहयोगोऽत्र निषेध्यः, न धर्मोपकरणम्, तेन विना संसारार्णवपारागमनादिति । उक्तं च—

**"साध्यं यथा कथञ्चित् स्वल्पं कार्यं, महच्च न तथेति ।**
**प्लवनमृते न हि शक्यं पारं गन्तुं समुद्रस्य ॥"** [    ]

अत्र च आर्हताभासैः **बोटिकैः** सह महान् विवादोऽस्ति इत्यतो विवक्षितमर्थं तीर्थकराभिप्रायेणापि सिसाधयिषुराह—

## एस मग्गे आरिएहिं पवेदिते, जहेत्थ कुसले णोवलिंपिज्जासि त्ति बेमि ॥८९॥

**एस मग्गे** इत्यादि । धर्मोपकरणं न परिग्रहाय इति **एषः** अनन्तरोक्तो **मार्गः** आराद् याताः सर्वहेयधर्मेभ्य इति **आर्याः** तीर्थकृतः, तैः **प्रवेदितः**=कथितः, न तु यथा **बोटिकैः** कुण्डिका तट्टिका⊕ लम्बणिका अश्ववालधिवालादि स्वरुचिविरचितो मार्ग इति, न वा यथा **मौद्गलि-स्वातिपुत्राभ्यां**❐ **शौद्धोदनिं** ध्वजीकृत्य प्रकाशितः इति; अनया दिशा अन्येऽपि परिहार्या इति । इह तु स्वशास्त्रगौरवं उत्पादयितुं आर्यैः प्रवेदित इत्युक्तम् । अस्मिंश्च आर्य-

---

टि० १. ०साधनार्थोत्तरैः ख ॥ २. परिग्रहयोगो० ङ ॥ ३. यप्पणो च ॥

वि०टि० ⊕ "**तड्डि( ड्डि )का** इति तलगटी, **लम्बनिका** इति परियछि । त्रिगव्यम्[?], **अश्ववालधिवालादिः** इति काष्ठसिंगी" जै०वि०प० ॥ ❐ '**सारिपुत्रः**' इति बौद्धमते प्रसिद्धिः ॥

प्रवेदिते मार्गे प्रयत्नवता भाव्यमिति । आह च—

**जहेत्थे**त्यादि । लब्ध्वा कर्मभूमिं मोक्षपादपबीजभूतां च बोधिं सर्वसंवरचारित्रं च प्राप्य तथा विधेयं **यथा कुशलः**=विदितवेद्यः **अत्र**=अस्मिन्नार्यप्रवेदिते मार्गे आत्मानं पापेन कर्मणा **नोपलिम्पयेदि**ति । एवं च उपलिम्पनं भवति यदि यथोक्तानुष्ठान विधायित्वं न भवति; [सतां चायं पन्था यदुत यत् स्वयं[1] प्रतिज्ञातं तद् अन्त्योच्छ्वासं यावद् विधेयमिति]। उक्तं च—

**"लज्जां गुणौघजननीं जननीमिवार्या-**
**मत्यन्तशुद्धहृदयामनुवर्तमानाः ।**
**तेजस्विनः सुखमसूनपि सन्त्यजन्ति,**
**सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥"** [　　]

**इति**शब्दः अधिकारसमाप्त्यर्थः, **ब्रवीमि** इति सोऽहं ब्रवीमि येन मया भगवत्पादारविन्दं उपासता अश्रावीति ॥८९॥ परिग्रहाद् आत्मानं अपसर्पयेद् इत्युक्तम्; तच्च न निदानोच्छेदमन्तरेण, निदानं च शब्दादिपञ्चगुणानुगामिनः कामाः, तेषां च उच्छेदः असुकरः । यतः आह—

## [ सू० ] कामा दुरतिक्कमा । जीवियं दुप्पडिबूहगं ।

**कामा** इत्यादि । **कामा** द्विविधाः—इच्छाकामा मदनकामाश्च । तत्र इच्छाकामा मोहनीयभेदहास्य-रत्युद्भवाः; मदनकामा अपि मोहनीयभेदवेदोदयात् प्रादुष्यन्ति । ततश्च द्विरूपाणामपि कामानां मोहनीयं कारणम्; तत्सद्भावे च न कामोच्छेद इत्यतो **दुःखेन अतिक्रमः**=अतिलङ्घनं विनाशो येषां ते तथा; ततश्च इदमुक्तं भवति—न तत्र प्रमादवता भाव्यम् । न केवलमत्र, जीवितेऽपि न प्रमादवता भाव्यमिति आह—

**जीवियमि**त्यादि । **जीवितम्**=आयुष्कं, तत् क्षीणं सत् **दुष्प्रतिबृंहणीयं**[2] दुः अभावार्थे, नैव वृद्धिं नीयते इति यावत् । अथवा **जीवितं**=संयमजीवितम्, तत् **दुष्प्रतिबृंहणीयं** कामानुषक्तजनान्तर्वर्तिना दुःखेन[3] वृद्धिं नीयते, दुःखेन निष्प्रत्यूहः संयमः प्रतिपाल्यत इति । उक्तं च—

**"आगासे गंगसोय व्व, पडिसोउ व्व दुत्तरो ।**
**बाहाहिं चेव गंभीरो, तरिअव्वो महोयही ॥"**

---

टि० १. **स्वतः** ख ॥ २. **दुःखं प्रतिबृंहणीयं** ग ॥ ३. **दुःखेन निष्प्रत्यूहः** ग च ॥

"वालुगाकवलो चेव, [१]निरासाए हु संजमे ।
जवा लोहमया चेव, चावेयव्वा सुदुक्करं ॥" [ ] इत्यादि ।

[२]येन च अभिप्रायेण कामा दुरतिक्रमा इति प्रागेव अभ्यधायि तं अभिप्रायं आविष्कुर्वन्नाह—

**कामकामी खलु अयं पुरिसे, से सोयति जूरति तिप्पति पिड्डुति परितप्पति ॥९०॥**

**कामकामी**त्यादि । कामान् कामयितुम्=अभिलषितुं शीलं अस्य इति **कामकामी, खलुः** वाक्यालङ्कारे, **अयम्** इति अध्यक्षः **पुरुषः**=जन्तुः । यस्तु एवंविधोऽविरतचेताः कामकामी स नानाविधान् शारीर-मानसान् दुःखविशेषान् अनुभवतीति दर्शयति—

**से सोयई**त्यादि । **स** इति कामकामी ईप्सितस्य अर्थस्य अप्राप्तौ तद्वियोगे [३]वा स्मृत्यनुषङ्गः [४]शोकः, तं अनुभवति । अथवा **शोचते** इति काममहाज्वरगृहीतः सन् प्रलपतीति । उक्तं च—

"गते प्रेमाबन्धे प्रणयबहुमाने च गलिते,
निवृत्ते सद्भावे जन इव जने गच्छति [५]पुरः ।
तमुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि ! गतांस्तांश्च दिवसान्,
न जाने को हेतुर्दलति शतधा यन्न हृदयम् ? ॥" [ ] इत्यादि शोचते ।

तथा '**जूरइ**' त्ति हृदयेन खिद्यते, तद्यथा—

"प्रथमतरमथेदं चिन्तनीयं तवासीद्,
बहुजनदयितेन प्रेम कृत्वा जनेन ।
[६]हतहृदय ! निराश ! क्लीब ! सन्तप्यसे किं ?,
न हि जड ! गततोये सेतुबन्धाः क्रियन्ते ॥" [ ] इत्येवमादि ।

तथा '**तिप्पइ**' त्ति "**तिपृ तेपृ क्षरणार्थौ**"[**पा०धा०१/३६२-३६३**] **तेपते**=क्षरति सञ्चलति मर्यादातो भ्रश्यति निर्मर्यादो भवतीति यावत् । तथा शारीर-मानसैः दुःखैः **पीड्यते**, तथा परिः=समन्ताद् बहिरन्तश्च तप्यते=**परितप्यते** पश्चात्ता[७]पं करोति, यथेष्टपुत्रकलत्रादौ कोपात् क्वचिद् गते 'स मया नानुवर्तितः' इति परितप्यते इति । सर्वाणि च एतानि शोचनादीनि विषयविषावष्टब्धान्तःकरणानां दुःखावस्थासंसूचकानि ।

अथवा **शोचत** इति यौवन-धन-मद-मोहाभिभूतमानसो विरुद्धानि निषेव्य

---

**टि०** १. **निरस्साए उ सं०** ख । **निरासाए सुसं०** ङ॥ २. **येन च कारणेन कामा** क ॥ ३. **च** ङ॥ ४. **शोकः, शोचते इति** ग ॥ ५. **तिरः** ग॥ ६. **हतहृदय !** च ॥ ७. **०पं वा करोति** कपुस्तकमृते॥

पुनर्वयःपरिणामेन मृत्युकालोपस्थानेन वा मोहापगमे सति 'किं मया मन्दभाग्येन पूर्वं अशेषशिष्टाचीर्णः सुगतिगमनैकहेतुः[1] दुर्गतिद्वारपरिघो धर्मो नाचीर्णः ?' इत्येवं शोचत इति । उक्तं च–

"**भवित्री[2] भूतानां परिणतिमनालोच्य नियतां,**
**पुरा यद् यत् किञ्चिद्विहितमशुभं यौवनमदात् ।**
**पुनः प्रत्यासन्ने महति परलोकैकगमने,**
**तदेवैकं पुंसां व्यथयति जराजीर्णवपुषाम् ॥**" [ ]

तथा **जूरती**त्यादीन्यपि स्वबुद्ध्या योजनीयानि । उक्तं च–

"**सगुणमपगुणं वा कुर्वता कार्यजातं,**
**परिणतिरवधार्या यत्नतः पण्डितेन ।**
**अतिरभसकृतानां कर्मणामाविपत्तेर्भवति,**
**हृदयदाही शल्यतुल्यो विपाकः ॥**"[ ] इत्यादि ॥९०॥

कः पुनरेवं न शोचते ? इत्याह–

**[सू० ] आयतचक्खू लोगविपस्सी लोगस्स अहेभागं जाणति, उड्ढं भागं जाणति, तिरियं भागं जाणति, गढिए अणुपरियट्टमाणे ।**

**संधिं विदित्ता इह मच्चिएहिं,**

**एस वीरे पसंसिते जे बद्धे पडिमोयए ॥९१॥**

**आयतचक्खू** । आयतं=दीर्घं ऐहिका-ऽऽमुष्मिकापायदर्शि चक्षुः=ज्ञानं यस्य स= **आयतचक्षुः** । कः पुनरिति[3] एवम्भूतो भवति ? यः कामान् एकान्तेन[4] अनर्थभूयिष्ठान् परित्यज्य शमसुखं अनुभवति । किञ्च–'**लोगविपस्सी**', लोकं विषयानुषङ्गावेशाप्त-दुःखातिशयं तथा त्यक्तकामावाप्तप्रशमसुखं विविधं द्रष्टुं शीलं अस्य इति **लोकविदर्शी** । अथवा लोकस्य ऊर्ध्वा-ऽध-स्तिर्यग्भागगतिकारणायुष्क-सुख-दुःखविशेषान् पश्यतीति । एतद् दर्शयति–

**लोगस्स** इत्यादि । **लोकस्य**=धर्मा-ऽधर्मास्तिकायावच्छिन्नाकाशखण्डस्य **अधोभागं जाना**तीति स्वरूपतः अवगच्छति । इदमुक्तं भवति–येन कर्मणा तत्र उत्पद्यन्ते असुमन्तः यादृक् च तत्र सुख-दुःखविपाको भवति तं जानाति । एवं ऊर्ध्व-तिर्यग्भागयोरपि

---

टि० १. ०गमनहेतुर्दुर्गतिमार्गे( र्ग? )परिघो ख ॥ २. **भवित्रीं भावानां** घ ङ च ॥ ३. **पुनश्चैवम्भूतो** ख । **पुनरेवम्भूतो** ङ ॥ ४. ०**नार्थभूयिष्ठान्** ख ॥

वाच्यम् । यदि वा **लोकविदर्शी** इति कामार्थं अर्थोपार्जनप्रसक्तं गृद्धं अध्युपपन्नं लोकं पश्यतीति । एतदेव दर्शयितुमाह—

**गढिए** इत्यादि । अयं हि लोको **गृद्धः**=अध्युपपन्नः कामानुषङ्गे तदुपाये वा तत्रैव **अनुपरिवर्तमानो**=भूयो भूयः तदेव आचरंस्तज्जनितेन वा कर्मणा संसारचक्रे[1] अनुपरिवर्तमानः=पर्यटन् आयतचक्षुषो गोचरीभवन् कामाभिलाषनिवर्तनाय[2] प्रभवति । यदि वा कामगृद्धान् संसारे अनुपरिवर्तमानान् असुमतः पश्य इत्येवं उपदेशः । अपि च—

**संधिं** इत्यादि । **इह मर्त्येषु**=मनुजेषु यो ज्ञानादिको भाव**सन्धिः**; स च मर्त्येष्वेव सम्पूर्णो भवतीति मर्त्यग्रहणम्; अतस्तं **विदित्वा** यो विषय-कषायादीन् परित्यजति स एव वीर इति दर्शयति—

[3]**ऍस** इत्यादि । **एषः** अनन्तरोक्तः आयतचक्षुः यथावस्थितलोकविभागस्वभावदर्शी भावसन्धेः वेत्ता परित्यक्तविषयतर्षो[4] **वीरः** कर्मविदारणात् **प्रशंसितः**=स्तुतः विदिततत्त्वैरिति । स एवम्भूतः किमपरं करोति ? इति चेद्, इत्याह—

**जे बद्धे** इत्यादि । **यो बद्धान्** द्रव्य-भावबन्धनेन स्वतो विमुक्तो अपरानपि **मोचयतीति** ॥९१॥ एतदेव द्रव्य-भावबन्धनविमोक्षं वाचोयुक्त्या आचष्टे—

**[ सू० ] जहा अंतो तहा बाहिं, जहा बाहिं तहा अंतो ।**

**अंतो अंतो पूति-देहंतराणि पासति पुढो वि सवंताइं ।**

**पंडिते पडिलेहाए ।**

**से मतिमं परिण्णाय मा य हु लालं पच्चासी ।**

**मा तेसु तिरिच्छमप्पाणमावातए ॥९२॥**

**जहा अंतो तहा बाहिं** इत्यादि । **यथा अन्तः** भावबन्धनमष्टप्रकारं कर्मनिगडं मोचयति एवं पुत्र-कलत्रादि **बाह्यमपि** । **यथा** वा **बाह्यं**[5] बन्धुबन्धनं मोचयति एवं मोक्षगमनविघ्नकारणं आन्तरमपीति । यदि वा कथमसौ मोचयति ? इति चेत्, तत्त्वाविर्भावनेन । स्यादेतत्—तदेव किम्भूतम् ? इत्याह—

**जहा अंतो** इत्यादि । **यथा** स्वकायस्य **अन्तः** मध्ये अमेध्य-कलल-पिशिता-

---

टि० १. **संसारचक्रवाले अनु०** ख ॥ २. **०य न प्रभवति ? यदि** ग ॥ ३. **एस एव इत्यादि** क ॥ ४. **०त्यक्तभोगतर्षो** ख ॥ ५. **बाह्यं बन्धनं** क ॥

ऽसृक्-पूत्यादिपूर्णत्वेन असारत्वं इत्येवं **बहिरपि** असारता द्रष्टव्या, अमेध्यपूर्णघटवदिति । उक्तं च–

**"यदि नामास्य कायस्य, यदन्तस्तद्बहिर्भवेत् ।**
**दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेत् ॥"** [ ] इति ।

**यथा** वा **बहिः** असारता **तथा अन्तो**ऽपीति । किञ्च–

**अंतो अंतो** इत्यादि । देहस्य मध्ये मध्ये पूत्यन्तराणि=पूतिविशेषान् देहान्तराणि= देहस्य अवस्थाविशेषान् 'इह मांसं, इह रुधिरं, इह मेदो, [1]मज्जा चे'ति एवमादि **पूति-देहान्तराणि पश्यति,** यथावस्थितानि परिच्छिनत्ति इत्युक्तं भवति । यदि वा देहान्तराणि एवम्भूतानि पश्यति–

**पुढो** इत्यादि । **पृथगपि**=प्रत्येकमपि, **अपि**शब्दात् कुष्ठाद्यवस्थायां यौगपद्येनापि, **श्रवन्ति** नवभिः श्रोतोभिः कर्णा-ऽक्षिमल-श्लेष्म-लाला-प्रश्रवणोच्चारादीन् तथा अपरव्याधिविशेषापादितव्रणमुखपूति-शोणित-रसिकादीनि चेति । यदि एतानि ततः किम् ?

**पंडिते पडिलेहाए** । एतानि एवम्भूतानि गलच्छ्रोतोव्रणरोमकूपानि **पण्डितः**= अवगततत्त्वः **प्रत्युपेक्षेत** यथावस्थितं अस्य स्वरूपं अवगच्छेदिति । उक्तं च–

**"मंस-ऽट्ठि-रुहिर-ण्हारूवणद्ध-कलमलय-मेय-मज्जासु ।**
**पुण्णम्मि चम्मकोसे दुग्गंधे असुइबीभच्छे ॥"** [ ]
**"[2]संचारिमजंतगलंतवच्चमुत्तंतसेयपुण्णम्मि ।**
**देहे होज्जा किं रागकारणं असुइहेउम्मि ॥"** [ ] इत्यादि ।

तदेवं पूति-देहान्तराणि [3]पश्यन् पृथगपि श्रवन्ति इत्येवं प्रत्युपेक्ष्य किं कुर्यात् ? इत्याह–

**से मइमं** इत्यादि । **स** पूर्वोक्तो यतिः **मतिमान्**=श्रुतसंस्कृतबुद्धिः यथावस्थितं देहस्वरूपं कामस्वरूपं च द्विविधयाऽपि परिज्ञया **परिज्ञाय** किं कुर्यात् ? इत्याह–

**मा य हु** इत्यादि । **मा** प्रतिषेधे, **चः** समुच्चये, **हुः** वाक्यालङ्कारे, ललतीति **लाला** अत्रुट्यन्मुखश्लेष्मसन्ततिः, तां प्रत्यशितुं शीलं अस्य इति **प्रत्याशी** । वाक्यार्थस्तु –यथा हि बालो निर्गतामपि लालां सदसद्विवेकाभावात् पुनरपि अश्नाति इत्येवं त्वमपि लालावत् [4]त्यक्त्वा भोगान् मा [5]प्रत्याशीः, वान्तस्य पुनरपि अभिलाषं मा कुरु इत्यर्थः । किञ्च–

---

टि० १. **मज्जा वेत्यादि** ग घ ङ ॥ २. **संसारिम०** ङ ॥ ३. **पश्य पृथगपि** ख ॥ ४. **त्यक्त्वा मा भोगान् प्रत्याशीः** ख ऋते ॥ ५. **प्रत्यश्नीहि** क-खआदर्शा ऋते । खप्रतौ तु **प्रत्यशान** इति लिखितपाठं निष्काश्य **प्रत्याशीः** इति विशोधितम् । **प्रत्यश्नीहि** इत्येतत्पाठस्योपरि "प्रत्यशान" इति चप्रतौ टिप्पणी ॥

[1]**मा तेसु तिरिच्छ०** इत्यादि । संसारश्रोतांसि अज्ञाना-ऽविरति-मिथ्यादर्शनादीनि प्रतिकूलेन वा तिरश्चीनेन वा[2] अतिक्रमणीयानि; निर्वाणश्रोतांसि तु ज्ञानादीनि; तत्र आनुकूल्यं विधेयम्, **मा तेषु आत्मानं तिरश्चीनमापादये:**[3]=ज्ञानादिकार्ये प्रतिकूलतां मा विदध्या:; तत्र अप्रमादवता भाव्यम् ॥९२॥

प्रमादवांश्च इहैव शान्तिं न लभते, यत आह—

## [सू० ] कासंकसे खलु अयं पुरिसे, बहुमायी, कडेण मूढे, पुणो तं करेति लोभं, वेरं वड्ढेति अप्पणो ।

[4]**कासंकसे** इत्यादि । यो हि ज्ञानादिश्रोतसि तिरश्चीनवर्ती भोगाभिलाषवान् स एवम्भूत: **अयं पुरुष:** सर्वदा किङ्कर्तव्यताकुल: 'इदं अहं अकार्षम्; इदं च करिष्ये' इत्येवं भोगाभिलाषक्रियाव्यापृतान्त:करणो न स्वास्थ्यं अनुभवति, **खलुशब्द:** अवधारणे, वर्तमानकालस्य अतिसूक्ष्मत्वाद् असंव्यवहारित्वम्, अतीता-ऽनागतयोश्च 'इदं अहं अकार्षम्; इदं च करिष्ये' इत्येवं आतुरस्य नास्त्येव स्वास्थ्यमिति । उक्तं च—

> "**इदं तावत् करोम्यद्य, श्व: कर्ताऽस्मीति चापरम् ।**
> [5]**चिन्तयन्निह कार्याणि, प्रेत्यार्थं नावबुध्यते ॥**" [ ]

अत्र **दधिघटिकाद्रमक**दृष्टान्तो वाच्य:; स च अयम्—

द्रमक: कश्चित् क्वचिद् महिषीरक्षणावाप्तदुग्ध: तद् दधीकृत्य चिन्तयामास— मम अतो घृत-वेतनादि यावद् भार्या-ऽपत्योत्पत्ति:; ततश्चिन्ता, कलहे पार्ष्णिप्रहारेणैव दधिघटिकाव्यापत्ति: । एवं वा चिन्तामनोरथव्याकुलीकृतान्त:करणेन[6] दध्यानयने शिरोविण्टलिकाचीवरे आदीयमाने इव[7] शिरो विधूय आस्फोटिता दधिघटिका इति । एवं यथा तेन न तद्दधि भक्षितं नापि कस्मैचित् पुण्याय दत्तम्; एवमन्योऽपि [8]**कासंकस:**= किङ्कर्तव्यतामूढो निष्फलारम्भो भवतीति ।

अथवा कस्यते अस्मिन्निति कास: संसार:,तं कषतीति तदभिमुखो यातीति **कासङ्कष:**, यो ज्ञानादिप्रमादवान् वक्ष्यमाणो वेति आह—'**बहुमायी**' कासङ्कषो हि कषायै: भवति, तन्मध्यभूताया मायाया ग्रहणे अन्येषामपि ग्रहणं द्रष्टव्यमिति । तत: क्रोधी मानी

---

**टि०** १. **मा या तिरिच्छ** क । **मा तिरिच्छ** ख ग ॥ २. **वा** इति घ-ङप्रत्योरेव ॥ ३. **०मापादयेत्** ग घ ङ ॥ ४. **कासंकासे** ख ग ॥ ५. **चिन्तयन्निति** ख च ॥ ६. **०करण इति पाठान्तरम्, दध्यानयने शिरो विधूय स्फोटिता** ग ॥ ७. **इव** इति खप्रतौ न ॥ ८. **काषङ्कष:** घ ङ ॥

मायी लोभीति द्रष्टव्यमिति । अपि च–'**कडेण मूढे**' करणं=**कृतं**, तेन **मूढः**= किङ्कर्तव्यताकुलः सुखार्थी दुःखं अश्नुते इति । उक्तं हि–

**"सोउं सोवणकाले मज्जणकाले य मज्जिउं[1] लोलो ।**
**जेमेउं च वराओ जेमणकाले[2] न चाएइ ॥"** [ ]

अत्र **मम्मणवणिग्**दृष्टान्तो वाच्यः । स[3] एव कासङ्कषो बहुमायी कृतेन मूढः तत् तत् करोति येन आत्मनो वैरानुषङ्गो जायत इत्याह–

**पुणो[4] तं करे०** इत्यादि । मायावी परवञ्चनबुद्ध्या **पुनरपि तत्** लोभानुष्ठानं तथा **करोति** येन **आत्मनो वैरं वर्धते** । अथवा **तं** लोभं **करोति**=अर्जयति येन जन्मशतेष्वपि **वैरं वर्धते** इति । उक्तं च–

**"दुःखार्तः सेवते कामान् सेवितास्ते च दुःखदाः ।**
**यदि ते न प्रियं दुःखं प्रसङ्गस्तेषु न क्षमः ॥"** [ ]

किं पुनः कारणं असुमान् तत् करोति येन आत्मनो वैरं वर्धते[5] ? इत्याह–

**जमिणं परिकहिज्जइ इमस्स चेव पडिबूहणताए ।**

**अमरायइ महासड्ढी ।**

**अट्टमेतं तु पेहाए अपरिण्णाए कंदति ॥९३॥**

**जमिणमि**त्यादि । **यद्** इति यस्मात् **अस्यैव** विशरारोः शरीरस्य **परिबृंहणार्थं** प्राणघातादिकाः क्रियाः करोतीति, ते च तेन उपहताः प्राणिनः पुनः शतशो घ्नन्ति । अतो मया इदं **कथ्यते**–कासङ्कषः खल्वयं पुरुषो बहुमायी कृतेन मूढः पुनस्तत् करोति येन आत्मनो वैरं वर्द्धयतीति । यदि वा **यद् इदं** मया उपदेशप्रायं पौनःपुण्येन **कथ्यते** तद् **अस्यैव** संयमस्य **परिबृंहणार्थम्** । इदं च अपरं कथ्यते–

**अमरायइ** इत्यादि । **अमरायते** अनमरः सन् द्रव्य-यौवन-प्रभुत्वरूपावसक्तः अमर इव आचरति=अमरायते । कोऽसौ ?–**महाश्रद्धी** महती चासौ श्रद्धा च= महाश्रद्धा, सा विद्यते भोगेषु तदुपायेषु वा यस्य स तथा; अत्रोदाहरणम्[Φ]–

**राजगृहे** नगरे **मगधसेना** गणिका । तत्र कदाचिद् **धनः** सार्थवाहो महता द्रव्य-[6]

टि० १. **मज्जियं** ग ॥ २. **०काले य न( नो ) चाए** ग ॥ ३. **स चैवं** ख **ऋते** ॥ ४. **पुणो पुणो तं** ख ॥ ५. **वर्धयति** ख । **वर्धयते** ग ॥ ६. **धननिचयेन** च ॥

**वि०टि०** Φ उदाहरणमिदमत्रस्थाने केचिदेव भणन्ति, न तु **चूर्णिकृ**त्पूर्ववर्तिनः सर्वे आचार्याः, तथा च चूर्णिः–"तत्थ उदाहरणं **केई** भणंति" ॥

निचयेन समन्वितः प्रविष्टः । तद्रूप-यौवन-गुणगण-द्रव्यसम्पदाक्षिप्तया **मगधसेन**या असौ अभिसरितः । तेन च आय-व्ययाक्षिप्तमानसेन असौ न अवलोकिताऽपि। अस्याश्च आत्मीयरूप-यौवन-सौभाग्यावलेपाद् महती दुःखासिका अभूत् । ततश्च तां परिम्लानवदनां अवलोक्य **जरासन्धेन** अभ्यधायि—'किं भवत्या दुःखासिकाकारणम् ?, केन वा सार्धं उषिता' इति । सा त्ववादीत्-'अमरेणे'ति । 'कथं असौ अमरः ?' इत्युक्ते तया सद्भावः कथितो निरूपितश्च यावत् तथैव अद्यापि आस्त इति; अतो भोगार्थिनोऽर्थे प्रसक्ता[1] अजरामरवत् क्रियासु प्रवर्तन्त इति ।

यश्च अमरायमाणः कामभोगाभिलाषुकः स किम्भूतो भवति ? इत्याह—

**अट्ट०** इत्यादि । अर्त्तिः= शारीर-मानसी पीडा, तत्र भवः=आर्त्तः, तं **आर्त्तं** अमरायमाणं कामार्थं महाश्रद्धावन्तं **प्रेक्ष्य** = दृष्ट्वा पर्यालोच्य वा कामा-ऽर्थयोः न मनो विधेयमिति । पुनरपि अमरायमाण-भोगश्रद्धावतः स्वरूपमुच्यते—

**अपरिण्णाए** इत्यादि । कामस्वरूपं तद्विपाकं वा **अपरिज्ञाय** तत्र[2] दत्तावधानः काम-स्वरूपापरिज्ञया वा **क्रन्दते** भोगेषु अप्राप्त-नष्टेषु काङ्क्षा-शोकौ अनुभवतीति । उक्तं च—

> **"चिन्ता गते भवति साध्वसमन्तिकस्थे,**
> **मुक्ते तु तप्तिरधिका रमितेऽप्यतृप्तिः ।**
> **द्वेषोऽन्यभाजि वशवर्तिनि दग्धमानः,**
> **प्राप्तिः सुखस्य दयिते न कथञ्चिदस्ति ॥"**[          ] इत्यादि ॥९३॥

तदेवं अनेकधा कामविपाकं[3] उपदर्श्य उपसंहरति—

**[सू० ] से तं जाणह जमहं बेमि । तेइच्छं पंडिए पवयमाणे से हंता छेत्ता भेत्ता लुंपित्ता विलुंपित्ता उद्दवइत्ता 'अकडं करिस्सामि' त्ति मण्णमाणे, जस्स वि य णं करेइ ।**

**अलं बालस्स संगेणं, जे वा से कारेति बाले ।**

**ण एवं अणगारस्स जायति त्ति बेमि ॥९४॥**

**॥ लोगविजयस्स पंचमो उद्देसओ सम्मत्तो ॥**

**से यमि**त्यादि । **से** ति तदर्थे, तदपि हेत्वर्थे, यस्मात् कामा दुःखैकहेतवः

---

टि० १. **प्रसक्त्या** क ॥ २. **तत्तद्दत्तावधानः** ख ॥ ३. **काममुपदर्श्यो०** ख ॥

तस्मात् **तद् जानीत यदहं ब्रवीमि**, मदुपदेशं[1] कामपरित्यागविषयं कर्णीकुरुत इति भावार्थः । ननु च कामनिग्रहोऽत्र चिकीर्षितः; स च अन्योपदेशादपि सिद्ध्यत्येव इत्येतद् आशङ्क्य आह—

**तेइच्छं** इत्यादि । काम**चिकित्सां पण्डितः**=पण्डिताभिमानी **प्रवदन्** अपरव्याधि-चिकित्सामिव उपदिशन्नपरः तीर्थिको जीवोपमर्दे वर्तत[2] इत्याह—

**से हंता** इत्यादि । **स** इति अविदिततत्त्वः कामचिकित्सोपदेशकः प्राणिनां **हन्ता** दण्डादिभिः, **छेत्ता** कर्णादीनां, **भेत्ता** शूलादिभिः, **लुम्पयिता** ग्रन्थिच्छेदनादिना, **विलुम्पयिता** अवस्कन्दादिना[Φ], **अपद्रावयिता** प्राणव्यपरोपणादिना; नान्यथा कामचिकित्सा व्याधिचिकित्सा वा अपरमार्थदृशां सम्पद्यते । किञ्च—

**अकृतं**=यदपरेण न कृतं कामचिकित्सनं व्याधिचिकित्सनं वा तदहं **करिष्ये इति** एवं **मन्यमानो** हननादिकाः क्रियाः करोति; ताभिश्च कर्मबन्धः; अतो य एवम्भूतं उपदिशति यस्यापि उपदिश्यते उभयोरपि एतयोः अपथ्यत्वाद् अकार्यमिति । आह च—

**जस्स वि यं[3] णं** इत्यादि । **यस्यापि** असौ एवम्भूतां चिकित्सां **करोति**, न केवलं स्वस्य इति **अपि**शब्दार्थः; तयोः द्वयोरपि कर्तुः कारयितुश्च हननादिकाः क्रियाः । अतो **अलं** =पर्याप्तं **बालस्य**=अज्ञस्य[4] **सङ्गेन** कर्मबन्धहेतुना कर्तुरिति । **यो**[5] वा एतत् **कारयति बालः**= अज्ञः तस्यापि अलमिति सण्टङ्कः । एतच्च एवम्भूतं उपदेशदानं विधानं वा अवगततत्त्वस्य न भवति इत्याह—**ण एवं** इत्यादि । **एव**म्भूतं प्राण्युपमर्दनं चिकित्सोपदेशदानं करणं वा **अनगारस्य**=साधोः ज्ञातसंसारस्वभावस्य **न जायते**=न कल्पते । ये तु कामचिकित्सां व्याधिचिकित्सां वा जीवोपमर्दन प्रतिपादयन्ति ते बालाः, अविज्ञाततत्त्वत्वात्ः[6]; तेषां वचनं अवधीरणीयमेव इति भावार्थः, **इतिः** परिसमाप्त्यर्थे[7], **ब्रवीमि** इति पूर्ववदिति ॥९४॥

**॥ लोकविजयस्य पञ्चमोद्देशकटीका समाप्तेति ॥ छ ॥**

---

टि० १. **तदुपदेशं** ख-चपुस्तके विना ॥ २. **वर्तेत** ख॥ ३. **य** इति कप्रतौ नास्ति ॥ ४. **अज्ञानस्य** ख च विना ॥ ५. **योऽप्यैतत्** ख च ॥ ६. **अविज्ञाततत्त्वाः; तेषां** क ऋते ॥ ७. **परिसमाप्त्यर्थः** ङ ॥

**वि०टि०** Φ "**अवस्कन्दादिना** धाटीप्रभृतिना" स०वि०प० ॥

## ॥ षष्ठ उद्देशकः ॥

उक्तः पञ्चमोद्देशकः । साम्प्रतं षष्ठ आरभ्यते । अस्य च अयमभिसम्बन्धः– संयमदेहयात्रार्थं लोकं अनुसरता साधुना लोके ममत्वं न कर्तव्यं इति उद्देशार्थाधिकारः अभिहितः; सोऽधुना प्रतिपाद्यते । अस्य च अनन्तरसूत्रसम्बन्धो वाच्यः **न एवं अनगारस्य जायते**[सू०९५] इति अभिहितं, एतदेव अत्रापि प्रतिपिपादयिषुराह–

**[सू० ] से तं संबुज्झमाणे आयाणीयं समुट्ठाए तम्हा पावं कम्मं णेव कुज्जा ण कारवे ॥९५॥**

**से तं**[1] **संबुज्झमाणे** इत्यादि । यस्य अनगारस्य एतत् पूर्वोक्तं न जायते **सः** अनगारः **तत्** प्राण्युपघातकारि चिकित्सोपदेशदानमनुष्ठानं वा **सम्बुध्यमानः**=अवगच्छन् ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च[2] परिहरन् आदातव्यम्=**आदानीयम्**, तच्च परमार्थतो भावाऽऽदानीयं ज्ञान-दर्शन-चारित्ररूपं, तद् **उत्थाय** इति अनेकार्थत्वाद् आदाय गृहीत्वा; अथवा **सः** अनगार एव **तत् आदानीयं** ज्ञानाद्यपवर्गकारणं[3] इत्येवं **सम्यग् अवबुध्यमानः** **सम्यक्** संयमानुष्ठानेन **उत्थाय** सर्वं सावद्यं कर्म न मया कर्तव्यं इत्येवं प्रतिज्ञामन्दरमारुह्य; क्त्वाप्रत्ययस्य पूर्वकालाभिधायित्वात् किं कुर्यात् ? इत्याह–

**तम्हा** इत्यादि । यस्मात् संयमः सर्वसावद्यारम्भनिवृत्तिरूपः **तस्मात्** तं आदाय **पापं** पापहेतुत्वात् **कर्म**=क्रियां **न कुर्यात्** स्वतः, मनसाऽपि न समनुजानीयाद् इति अवधारणफलम् । अपरेणापि न कारयेद् इत्याह–

**न कारवे** इत्यादि । अपरेणापि कर्मकरादिना पापसमारम्भं **न कारयेत्** । एतदुक्तं भवति–प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रह[4]-क्रोध-मान-माया-लोभ-राग-द्वेष-कलहा-ऽभ्याख्यान-पैशून्य-परपरिवादा-ऽरतिरति-मायामृषावाद-मिथ्यादर्शनशल्यरूपं अष्टादशप्रकारं पापं कर्म स्वतो न कुर्यात्, नापि अपरेण कारयेत्, **ऐव**[5]काराच्च अपरं कुर्वन्तं न समनुजानीयात् योगत्रिकेणापि (इति) भावार्थः ॥९५॥ स्यादेतत्–किमेकं प्राणातिपातादिकं पापं कुर्वतः अपरमपि ढौकते आहोस्विन्न ? इत्याह–

**[सू० ] सिया तत्थ एकयरं विप्परामुसति छसु अण्णयरम्मि कप्पति सुहट्ठी लालप्पमाणे सएण दुक्खेण मूढे विप्परियासमुवेति ।**

---

**टि०** १. त्तं ख ग ॥ २. **वा** ग ॥ ३. **ज्ञानाद्यपवर्गैककारणम्** घ ङ ॥ ४. ०**परिग्रह-रात्रिभोजन-क्रोध०** क ग ॥ ५. **एवकाराद्वापरं** क ॥

**सिया तत्थे**त्यादि । **स्यात्**=कदाचित् **तत्र** पापारम्भे **एकतरं** पृथिवीकायादिसमारम्भं[१] **विपरामृशति**=पृथिवीकायादिसमारम्भं करोति, एकतरं वा आश्रवद्वारं परामृशति=आरभते; स **षट्सु अन्यतरस्मिन् कल्पते**, यस्मिन्नेव आलोच्यते तस्मिन्नेव प्रवृत्तो द्रष्टव्यः । इदमुक्तं भवति—पृथिवीकायादिषु षट्सु जीवनिकायेषु आश्रवद्वारेषु वा मध्ये अन्यतरस्मिन्नपि वर्तमानो यस्मिन्नेव पर्यालोच्यते[२] तस्मिन्नेव कल्पते, सर्वस्मिन्नेव वर्तत इति भावार्थः ।

कथं पुनः अन्यतरस्मिन् पृथिवीकायादिसमारम्भे वर्तमानः अपरकायसमारम्भे सर्व-पापसमारम्भे वा वर्तते इत्येवं मन्यते ?, **⊕कुम्भकारशालोदकप्लावन**दृष्टान्तेन[३] एककाय-समारम्भकः अपरकायसमारम्भको[४] भवति । अथवा प्राणातिपाताश्रवद्वारविघटनाद् एकजीवातिपाताद् एककायातिपाताद् वा अपरजीवातिपाती द्रष्टव्यः, प्रतिज्ञालोपात् चानृतः, न च तेन व्यापाद्यमानेन असुमता आत्मा व्यापादकाय दत्तः तीर्थकरेण वा[५] अनुज्ञातः, अतः प्राणिनः प्राणान् गृह्णन्नदत्तग्राही, सावद्योपादानात् च पारिग्रहिकः, परिग्रहाच्च मैथुन-रात्रीभोजने अपि गृहीते, यतो न अपरिगृहीतं उपभुज्यते परिभुज्यते वेति[६]; अतो अन्यतरारम्भे षण्णामपि आरम्भः । अथवा अनावृतचतुराश्रवद्वारस्य कथं चतुर्थ-षष्ठव्रतावस्थानं स्यात् ?, अतः षट्सु अन्यतरस्मिन् प्रवृत्तः सर्वेष्वपि प्रवृत्त इति । अथवा एकतरमपि पापसमारम्भं य आरभते स षट्सु अन्यतरस्मिन् कल्पते=योग्यो भवति, अकर्तव्यप्रवृत्तत्वात् । अथवा एकतरमपि यः पापारम्भं करोति असौ अष्टप्रकारं कर्म्म आदाय षट्सु अन्यतरस्मिन् कल्पते=प्रभवति, पौनःपुण्येन उत्पद्यत इत्यर्थः ।

स्यात्—किमर्थं एवंविधं पापकं कर्म समारभते ? तदुच्यते—

**सुहट्ठी[७] लालप्पमीणे** । सुखेनार्थः=**सुखार्थः**, स विद्यते यस्य असौ इति मत्वर्थीयः । स एवम्भूतः सन् अत्यर्थं लपति पुनः पुनः वा लपति=**लालप्यते** वाचा, कायेन धावन-वल्गनादिकाः क्रियाः करोति, मनसा च तत्साधनोपायांश्चिन्तयति । तथा हि—सुखार्थी सन् कृष्यादिकर्मभिः पृथिवीं समारभते, स्नानाद्यर्थमुदकम्, वितापनार्थमग्निम्, घर्मापनोदार्थं वायुम्, आहारार्थी वनस्पतिं त्रसकायं वा[८] इति, असंयतः संयतो वा रससुखार्थी सचित्तं लवण-वनस्पति-फलादि गृह्णाति; एवमन्यदपि यथासम्भवमायोज्यम् । स चैवं लालप्यमानः किम्भूतो भवति ? इत्याह—

---

टि० १. ०कायादिसमारम्भं करोति । एक० क । कायादि विपरामृशति ख । ०कायादिसंरम्भं विपरामृशति ग विना ॥ २. ०ते सर्वस्मिन्नेव कल्प्यते ङ॥ ३. ०नैव अप्कायसमा० ख ॥ ४. ०समारम्भे भवति ङ ॥ ५. वा नानुज्ञातः ग । चाननुज्ञातः च ॥ ६. चेति च ॥ ७. सुहत्थी ख ॥ ८. चेत्यसंयतः ख ङ च ॥

वि०टि० ⊕ स हि साधुः कुम्भकारशालादौ वसतौ प्रत्युपेक्षणां कुर्वन्नुपयुक्तः तोयघटादि प्रलोठयेत्, स च तोयभृतो घटो मृत्तिका-ऽग्नि-बीज-कुन्थ्वादीनामुपरि प्रलुठितस्ततश्चैतान् व्यापादयेत्, यत्राग्निस्तत्र वायुरप्यवश्यंभावी ओघनि०वृ०२७५ ॥

**सएण** इत्यादि । यत् तद् उप्तं अन्यजन्मनि दुःखतरुकर्मबीजं तद् आत्मीयं दुःखतरुकार्यं आविर्भावयति; तच्च तेनैव कृतमिति आत्मीयमुच्यते । अतस्तेन **स्वकीयेन दुःखेन** स्वकृतकर्मोदयजनितेन **मूढः** परमार्थमजानानः **विपर्यासमुपैति** सुखार्थी प्राण्युपघात[1]कारिणं आरम्भं आरभते, सुखस्य च विपर्यासो दुःखं, तदुपैति । उक्तं च–

**"दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः ।**
**यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥" [प्रशम०४०]**

यदि वा **मूढः** हिता-ऽहितप्राप्ति-परिहाररहितो **विपर्यासमुपैति** हितमपि अहितबुद्ध्या अधितिष्ठति अहितं च हितबुद्ध्येति; एवं कार्याकार्य-पथ्यापथ्य-वाच्या-ऽवाच्यादिष्वपि विपर्यासो योज्यः । इदमुक्तं भवति– मोहः=अज्ञानं मोहनीयभेदो वा तेन उभयप्रकारेणापि मोहेन मूढः अल्पसुखकृते तत् तद् आरभते येन शारीर-मानसदुःख-व्यसनोपनिपातानां अनन्तमपि कालं पात्रतां व्रजतीति ।

पुनरपि मूढस्य अनर्थपरम्परां दर्शयितुमाह–

## सएण विप्पमाएण पुढो वयं पकुव्वति जंसिमे पाणा पव्वहिता ॥९६॥

**सएण** इत्यादि । **स्वकीयेन** आत्मना कृतेन **प्रमादेन** मद्यादिना, **विविधम्** इति मद्य-विषय-कषाय-विकथा-निद्राणां स्वभेदग्रहणम्, तेन **पृथक्**=विभिन्नं **व्रतं करोति** । यदि वा **पृथु**=विस्तीर्णं **वयमिति** वयन्ते=पर्यटन्ति प्राणिनः स्वकीयेन कर्मणा यस्मिन् स **वयः** संसारः, तं **प्रकरोति**, एकैककाये दीर्घ[2]कालावस्थानात् । यदि वा कारणे कार्योपचारात् [3]स्वकीयनानाविधप्रमादकृतेन कर्मणा **वयः**=अवस्थाविशेषः तं एकेन्द्रियादि-कलला-ऽर्बुदादि-तदहर्जात-बालादि-व्याधिगृहीत-दारिद्र्य-दौर्भाग्यव्यसनोपनिपातादिरूपं **प्रकर्षेण करोति**=विधत्त इति । तस्मिंश्च संसारे अवस्थाविशेषे वा प्राणिनः पीड्यन्ते इति दर्शयितुमाह–

**जंसिमे** इत्यादि । **यस्मिन्** स्वकृतप्रमादापादितकर्मविपाकजनिते चतुर्गतिकसंसारे एकेन्द्रियाद्यवस्था[4]विशेषे वा **इमे**=प्रत्यक्षगोचरीभूताः **प्राणाः** इति अभेदोपचारात् प्राणिनः **प्रव्यथिताः**=नानाप्रकारैः व्यसनोपनिपातैः पीडिताः, सुखार्थिभिः आरम्भप्रवृत्तैः मोहाद् विपर्यस्तैः प्रमादवद्भिश्च गृहस्थैः पाषण्डिकैः यत्याभासैश्च इति वा ॥९६॥

यदि नाम अत्र प्रव्यथिताः प्राणिनः ततः किम् ? इत्याह–

---

**टि०** १. **०कारणमारभते** घ ॥ २. **०कालावस्थानम् । यदि** घ ङ च ॥ ३. **स्वकीयेन नानाविध०** ग ॥ ४. **०विशेषा इमे** ग ॥

**[ सू० ] पडिलेहाए णो णिकरणाए । एस परिण्णा पवुच्चति कम्मोवसंती ।**

**पडि०** इत्यादि । एतत् संसारचक्रे स्वकृत[1]कर्मफलेश्वराणां असुमतां गृहस्थादिभिः परस्परतो वा कर्मविपाकतो वा प्रव्यथनं **प्रत्युपेक्ष्य** विदितवेद्यः साधुः निश्चयेन नितरां वा नियतं वा क्रियन्ते [2]नानादुःखावस्था जन्तवो येन तद् **निकरणं** निकारः शारीर-मानसदुःखोत्पादनं, तस्मै **नो** कर्म कुर्यात्, येन प्राणिनां पीडा उत्पद्यते तमारम्भं न विदध्यादिति भावार्थः । एवं च सति किं भवति ? इत्याह—

**एस** इत्यादि । या इयं सावद्ययोग[3]निवृत्तिः **एषा परिज्ञा** एतत् तत्त्वतः परिज्ञानं प्रकर्षेण उच्यते=**प्रोच्यते**, न पुनः शैलूषस्य इव ज्ञानं [4]निवृत्तिफलरहितमिति । एवं द्विविधयाऽपि ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च [5]प्राणिनिकारपरिहारे सति किं भवति ? इत्याह—

**'कम्मोवसंती' कर्मणां**=अशेषद्वन्द्वव्रातात्मकसंसारतरुबीजभूतानां **उपशान्तिः**= उपशमः कर्मक्षयः प्राणिनिकारक्रियानिवृत्तेः भवति इत्युक्तं भवति ।

अस्य च कर्मक्षयप्रत्यूहस्य प्राणिनिकरणस्य मूलं आत्मीयग्रहः, तदपनोदार्थमाह—

**जे ममाइयमतिं जहाति से जहाति ममाइतं ।**

**से हु दिट्ठपहे मुणी जस्स णत्थि ममाइतं ।**

**जे ममाइयमि**त्यादि । ममायितं=मामकं, तत्र मतिः=**ममायितमतिः**, तां **यः** परिग्रहविपाकज्ञः **जहाति**=परित्यजति **स ममायितं** स्वीकृतं परिग्रहं **जहाति**=परित्यजति । इह द्विविधः परिग्रहः— द्रव्यतो भावतश्च । तत्र परिग्रहमतिनिषेधाद् आन्तरो भावपरिग्रहो निषिद्धः; परिग्रहबुद्धिविषयप्रतिषेधात् च बाह्यो द्रव्यपरिग्रह इति । अथवा ⊕काक्वा नीयते— यो हि परिग्रहाध्यवसायकलुषितं ज्ञानं परित्यजति स एव परमार्थतः सबाह्या-ऽभ्यन्तरं परिग्रहं परित्यजति । ततश्च इदमुक्तं भवति—सत्यपि सम्बन्धमात्रे चित्तस्य परिग्रहकालुष्याभावाद् नगरादि[6]सम्बद्धपृथिवीसम्बन्धेऽपि [7]जिनकल्पिकस्य इव निष्परिग्रहतैव । यदि नामैवं ततः किम् ? इत्याह—

**से हु** इत्यादि । यो हि मौक्षेकविघ्नहेतोः संसारभ्रमणकारणात् परिग्रहात् निवृत्ता-

---

**टि०** १. ०**कर्मेश्वराणा०** ख ॥ २. **नानावस्था** ख ॥ ३. ०**निवृत्तिपरिज्ञा** ख ॥ ४. **निमित्तफल** ख । **निर्वृत्तिफल०** ग ॥ ५. **प्राणिनिकारे परिहृते सति** ख ॥ ६. ०**सम्बन्धपृथ्वी०** ग घ ङ च ॥ ७. **जिनकल्पस्येव** क ॥

**वि०टि०** ⊕ काकु =वक्रोक्तिः ॥

ध्यवसाय:, **हु:** अवधारणे, **स** एव **मुनि:**, दृष्टो ज्ञानादिको [1]मोक्षपथो येन स:=**दृष्टपथ:**, यदि वा **दृष्टभय:**=अवगतसप्तप्रकारभय:, शरीरादे: परिग्रहात् साक्षात् पारम्पर्येण वा पर्यालोच्यमानं सप्तप्रकारमपि भयं आपनीपद्यत इत्यत: परिग्रहपरित्यागे ज्ञातभयत्वं अवसीयत इति । एतदेव पूर्वोक्तं स्पष्टयितुमाह–

**जस्से**त्यादि । **यस्य ममायितं**=स्वीकृतं परिग्रहो **न विद्यते** स दृष्टभयो मुनिरिति सम्बन्ध: । किञ्च–

**तं परिण्णाय मेहावी विदित्ता लोगं, वंता लोगसण्णं, से मतिमं परक्कमेज्जासि त्ति बेमि ॥९७॥**

**तं** इत्यादि । **तं** पूर्वव्यावर्णितस्वरूपं परिग्रहं द्विविधयाऽपि परिज्ञया **परिज्ञाय मेधावी**=ज्ञातज्ञेयो **विदित्वा लोकं**=परिग्रहाग्रहयोगविपाकिनं एकेन्द्रियादिप्राणिगणम्, **वान्त्वा**=उद्गीर्य **लोकस्य**=प्राणिगणस्य **सञ्ज्ञा** दशप्रकारा, अतस्ताम्, **स** इति मुनि:, किम्भूत: ? **मतिमान्**=सदसद्विवेकज्ञ: **पराक्रमेथा:**=संयमानुष्ठाने समुद्यच्छे:, संयमानुष्ठानोद्योगं सम्यग् विदध्या इति यावत्। अथवा अष्टप्रकारं कर्म्म अरिषड्वर्गं वा विषय-कषायान् वा पराक्रमस्व इति, **इति** अधिकारपरिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥९७॥

स एवं संयमानुष्ठाने पराक्रममाण: त्यक्त[2]परिग्रहाग्रहयोगो मुनि: किम्भूतो भवति ? इत्याह–

**[ सू० ]   णारतिं सहती वीरे, वीरे णो सहती रतिं ।**
**जम्हा अविमणे वीरे तम्हा वीरे ण रज्जति ॥९८( ३ )॥**

**णारइं** इत्यादि अनुष्टुप् । तस्य हि त्यक्तगृह-गृहिणी-धन-हिरण्यादिपरिग्रहस्य निष्किञ्चनस्य संयमानुष्ठानं कुर्वत: साधो: कदाचिद् मोहनीयोदयाद् **अरति:** आवि:स्यात्; तामुत्पन्नां संयमविषयां **न सहते**=न क्षमते, कोऽसौ ? विशेषेण ईरयति=प्रेरयति अष्टप्रकारं कर्म्म अरिषड्वर्गं [3]वेति **वीर:**=शक्तिमान् । स एव **वीरो** असंयमे विषयेषु परिग्रहे वा या **रति:** उत्पद्यते तां **न सहते**=न मर्षयति । या च अरति: संयमे विषयेषु च रति: ताभ्यां विमनी[4]भूत: न शब्दादि[5]षु रज्यति; अतो रत्यरतिपरित्यागाद् न विमनस्को भवति, नापि रागं उपयातीति दर्शयति–**यस्मात्** त्यक्तरत्यरति: **अविमना** [6]**वीर: तस्मात्** कारणाद् **वीर: न रज्यति** शब्दादिविषयग्रामे न गार्द्ध्यं विदधाति ॥९८(३)॥

---

**टि०** १. **मोक्षपन्था** ङ च ॥ २. **०परिग्रहयोगो** घ ङ च ॥ ३. **चेति** ख च ॥ ४. **०भूत: शब्दादिषु** च विना ॥ ५. **०षु न रज्यते** ग ॥ ६. **धीरस्तत्कारणाद्** ख ॥

यत एवं ततः किम् ? इत्याह—

**[ सू० ] सद्दे फासे अधियासमाणे णिव्विद णंदिं इह जीवियस्स ।**

**सद्दे** इत्यादि । यस्माद् वीरो रत्यरती निराकृत्य शब्दादिषु विषयेषु मनोज्ञेषु न रागं उपयाति नापि दुष्टेषु द्वेषं, तस्मात् **शब्दान् स्पर्शांश्च** मनोज्ञेतरभेदभिन्नान् **'अहियासमीणे'** त्ति सम्यक् सहमानो **निर्विन्द नन्दी**ति उत्तरसूत्रेण सम्बन्धः । एतदुक्तं भवति—मनोज्ञान् शब्दान् श्रुत्वा न रागमुपयाति नापि इतरान् द्वेष्टि । आद्यन्तग्रहणाच्च इतरेषामपि उपादानं द्रष्टव्यम्, तत्रापि [1]अतिसहनं विधेयमिति । उक्तं च—

> "**सद्देसु य भद्दय-पावएसु सोयविसयं उवगएसु ।**
> **तुट्ठेण व रुट्ठेण व समणेण सया न होयव्वं ॥**" [ज्ञाता०१७।४८]

एवम्— "**रूवेसु य भद्दय-[2]पावएसु०**" [ज्ञाता०१७।४९]

तथा— "**गंधेसु य०**" [ज्ञाता०१७।५०]इत्यादि वाच्यम् ।

ततश्च शब्दादीन् विषयान् [3]अतिसहमानः किं कुर्यात् ? इत्याह—

**निर्व्विद** इत्यादि । इह उपदेशगोचरो विनेयः अभिधीयते, सामान्येन वा मुमुक्षोः अयमुपदेशः—**निर्विन्दस्व**=जुगुप्सस्व ऐश्वर्य-विभवात्मिका मनसः तुष्टिः=**नन्दिः**, ताम् **इह** मनुष्यलोके यद् **जीवितं** असंयमजीवितं वा तस्य या नन्दिः [4]तुष्टिः प्रमोदो वा, यथा-'मम एतत् समृद्ध्यादिकं अभूद् भवति भविष्यति वा' इत्येवं विकल्पजनितां **नन्दि** जुगुप्सस्व, यथा—'किमनया पापोपादानहेतुभूतया अस्थिरया ?' इति, उक्तं च—

> "**विभव इति किं मदस्ते ? च्युतविभवः किं विषादमुपयासि ? ।**
> **[5]करनिहतकन्दुकसमाः पातोत्पाता मनुष्याणाम् ॥**" [ ]

एवं रूप-बलादिष्वपि वाच्यं **सनत्कुमार**दृष्टान्तेन । अथवा ⊕पञ्चानामपि अतीचाराणां अतीतं निन्दति, प्रत्युत्पन्नं संवृणोति, अनागतं प्रत्याचष्टे ।

स्यादेतत्—किमालम्ब्य करोति ? इत्याह—

**मुणी मोणं समादाय धुणे कम्मसरीरगं ।**
**पंतं लूहं सेवंति वीरा सम्मत्तदंसिणो ॥**

---

टि० १. अभिसहनं क ॥ २. ०पंतयेसु घ ङ॥ ३. अभिसहमानः क ॥ ४. पुष्टिः ग ॥ ५. करनिहित० गत्रऋते ॥

वि०टि० ⊕ "**पञ्चानाम्** इति महाव्रतानाम्" जै०वि०प० ॥

**मुणी**त्यादि । **मुनिः**=त्रिकालवेदी, यतिरित्यर्थः; मुनेरयं=**मौनः** संयमः, यदि वा मुनेर्भावः=मुनित्वं तदपि असावेव, मौनं वा वाचः संयमनम्, अस्य च उपलक्षणार्थत्वात् काय-मनसोरपि; अतः सर्वथा संयमं **आदाय** किं कुर्यात् ?– **धुनीयात् कर्मशरीरकं** औदारिकादिशरीरं वा, अथवा **धुनीहि**=विवेचय पृथक्कुरु, तदुपरि ममत्वं मा विधत्स्व इति भावार्थः । कथं तच्छरीरकं धूयते ममत्वं वा तदुपरि न कृतं भवति ? इत्याह–

**पंतं** इत्यादि । **प्रान्तं**=स्वाभाविकरसरहितं स्वल्पं वा, **रूक्षम्**=आगन्तुकस्नेहादि-रहितं द्रव्यतः; भावतोऽपि **प्रान्तं**=द्वेषरहितं विगतधूमं, **रूक्षं**=रागरहितं अपगताङ्गारं **सेवन्ते**= भुञ्जते । के ? **वीराः**=साधवः, किम्भूताः ? **समत्वदर्शिनः**=राग-द्वेषरहिताः **सम्यक्त्वदर्शिनो** वा, सम्यक् तत्त्वं=सम्यक्त्वं, तद्दर्शिनः=परमार्थदृशः । तथा हि–इदं शरीरकं कृतघ्नं निरुपकारि; एतत्कृते प्राणिन ऐहिका-ऽऽमुष्मिकक्लेशभाजो भवन्ति ।

⊕'**अनेकादेशे चैकादेशः**' इति कृत्वा प्रान्त-रूक्षसेवी [1]समत्वदर्शी च कं गुणं अवाप्नोति ? इत्याह–

## एस ओघंतरे मुणी तिण्णे मुत्ते विरते वियाहिते त्ति बेमि ॥९९॥

**एस** इत्यादि । **एषः** प्रान्त-रूक्षाहारसेवनेन कर्मादिशरीरं धुनानो भावतो भवौघं तरतीति, कोऽसौ ? **मुनिः**=यतिः । अथवा '**क्रियमाणं कृतम्**' इति कृत्वा **तीर्ण** एव भवौघम्; कश्च भवौघं तरति ? यः **मुक्तः**=सबाह्याभ्यन्तरपरिग्रहरहितः; कश्च परिग्रहाद् मुक्तो भवति ? यो भावतः शब्दादिविषयाभिष्वङ्गाद् **विरतः**; ततश्च यो मुक्तत्वेन विरतत्वेन वा **विख्यातो** मुनिः स एव भवौघं तरति, तीर्ण एवेति वा स्थितम् । **इतिः** अधिकार-परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥९९॥

यश्च मुक्तत्व-विरतत्वाभ्यां न विख्यातः स किम्भूतो भवति ? इत्याह–

## [सू०] दुव्वसुमुणी अणाणाए, तुच्छए गिलाति वत्तए ॥१००॥

[2]**दुव्वसु०** इत्यादि । वसु=द्रव्यम्, एतच्च भव्येऽर्थे व्युत्पादितम्, "**द्रव्यं च भव्ये**" [**पा०** ५/३/१०४] इति अनेन, भव्यश्च मुक्तिगमनयोग्यः, ततश्च मुक्तिगमनयोग्यं यद् द्रव्यं तद् वसु, दुष्टं वसु=दुर्वसु, दुर्वसु चासौ मुनिश्च=**दुर्वसुमुनिः** मोक्षगमनाऽयोग्यः । स च कुतो भवति ?– **अनाज्ञया,** तीर्थकरोपदेशशून्यः, स्वैरीत्यर्थः । किमत्र तीर्थकरोपदेशे दुष्करं येन

---

**टि०** १. **सम्यक्त्वदर्शी च कं गुणं समा( म )वाप्नोति ?** ग ॥ २. **दुव्वसुमुणी ।** वसु ख ॥

**वि०टि०** ⊕ "**अनेक( का )**देशे इति 'धी(वी?)रा' इत्यत्र बहुवचननिर्देशे सति" जै०वि०प० ॥

स्वैरित्वं अभ्युपगम्यते ? तदुच्यते—उद्देशकादेः आरभ्य सर्वं यथासम्भवमायोज्यम् । तथा हि—मिथ्यात्वमोहिते लोके सम्बोद्धुं दुष्करम्, व्रतेषु आत्मानं अध्यारोपयितुम्, रत्यरती निग्रहीतुम्, शब्दादिविषयेषु इष्टा-ऽनिष्टेषु मध्यस्थतां भावयितुम्, प्रान्त-रूक्षाणि भोक्तुम्, एवं यथोद्दिष्टया मौनीन्द्राज्ञया असिधाराकल्पया दुष्करं सञ्चरितुम्, तथा अनुकूल-प्रतिकूलांश्च नानाप्रकारान् उपसर्गान् सोढुम् । [असहने च ⊕कर्मोदयः ≠अनाद्यतीतकालसुखभावना च कारणम् । जीवो हि स्वभावतो दुःखभीरुः अनिरोधसुखप्रियः; अतो निरोधकल्पायां आज्ञायां दुःखं वसति । अवसंश्च किम्भूतो भवति ? इत्याह—

**तुच्छए** इत्यादि । **तुच्छः**=रिक्तः, स च द्रव्यतो निर्धनो घटादिः वा जलादिरहितः; भावतो ज्ञानादिर[1]हितः । ज्ञानरहितो हि क्वचित् संशीतिविषये केनचित् पृष्टः अपरिज्ञानाद् **ग्लायति वक्तुम्** । ज्ञानसमन्वितो वा चारित्ररिक्तः पूजासत्कारभयात् शुद्धमार्गप्ररूपणावसरे ग्लायति यथावस्थितं प्रज्ञापयितुम्, तथा हि—प्रवृत्तसन्निधिः सन्निधेः निर्दोषतां आचष्टे; एवमन्यत्रापीति । यस्तु कषायमहाविषागदकल्पभगवदाज्ञोपजीवकः स सुवसुमुनिः भवति; अरिक्तो न च ग्लायति वक्तुम्, यथावस्थितवस्तुपरिज्ञानाद् अनुष्ठानात् च ॥१००॥ आह च—

**[ सू० ] एस वीरे पसंसिए अच्चेति लोगसंजोगं । एस णाए पवुच्चति ।**

**एस** इत्यादि । **एषः** इति सुवसुमुनिः ज्ञानाद्यरिक्तो यथावस्थितमार्गप्ररूपको **वीरः** कर्मविदारणात् **प्रशंसितः**=तद्विद्भिः श्लाघित इति । किञ्च—

**अच्चे०** इत्यादि । स एवं भगव[2]दाज्ञानुवर्तको वीरः **अत्येति**=अतिक्रामति, कम् ? **लोकसंयोगं** लोकेन=असंयतलोकेन संयोगः=सम्बन्धः ममत्वकृतः, तमत्येति । अथवा लोको बाह्योऽभ्यन्तरश्च । [3]तत्र बाह्यो धन-धान्य-हिरण्य-माता-पित्रादिः; आन्तरस्तु राग-द्वेषादिः तत्कार्यं वा अष्टप्रकारं कर्म । तेन [4]सार्धं संयोगं अत्येति, अतिलङ्घयति इत्युक्तं भवति । यदि नाम एवं ततः किम् ? इत्याह—

**एस** इत्यादि । योऽयं लोकसंयोगातिक्रमः **एष न्यायः**=एष सन्मार्गो मुमुक्षूणां अयं आचारः **प्रोच्यते**=अभिधीयते । अथवा परं आत्मानं च मोक्षं नयतीति छान्दसत्वात् कर्तरि घञ् **नायः**; यो हि त्यक्तलोकसंयोग **एष** एव परा-ऽऽत्मनोः मोक्षस्य **नायः**

---

टि० १. ०रहितः **स्वैरी, ज्ञान०** ख ॥ २. **०दाज्ञानतिवर्तको** ग ॥ ३. **ततः** ख ॥ ४. **सार्धं यो योगस्तं योगम् अत्येति** ग ॥

**वि०टि०** ⊕"**कर्मा( र्मो )दयः** इति कारणम्" जै०वि०प० ॥ ≠ "**अनाद्यतीत०** इति सदा सुखलिप्सुरेव" जै०वि०प० ॥

**प्रोच्यते**=मोक्षप्रापकः अभिधीयते, सदुपदेशात् ।

स्यादेतत्—किम्भूतः असौ उपदेशः ? इत्यत आह—

**जं दुक्खं पवेदितं इह माणवाणं तस्स दुक्खस्स कुसला परिण्णमुदाहरंति, इति कम्मं परिण्णाय सव्वसो ।**

**जं दुक्खं** इत्यादि । **यद् दुःखं** दुःखकारणं वा कर्म लोकसंयोगात्मकं वा **प्रवेदितं**=तीर्थकृद्भिः आवेदितं **इह**=अस्मिन् संसारे **मानवानां**=जन्तूनाम्; ततः किम् ? **तस्य दुःखस्य** असातलक्षणस्य कर्मणो वा **कुशलाः**=निपुणा धर्मकथालब्धिसम्पन्नाः स्वसमय-परसमयविदः उद्युक्तविहारिणो यथावादिनः तथाकारिणो जितनिद्रा जितेन्द्रिया देश-कालादिक्रमज्ञाः ते एवम्भूताः **परिज्ञाम्** उपादानकारणपरिज्ञानं निरोधकारणपरिच्छेदं च **उदाहरन्ति** ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया च परिहरन्ति परिहारयन्ति च । किञ्च—

**इति कम्मं** इत्यादि । **इतिः** पूर्वप्रक्रान्तपरामर्शकः, यत् तद् दुःखं प्रवेदितं मनुजानां यस्य च दुःखस्य परिज्ञां कुशला उदाहरन्ति तद् दुःखं कर्मकृतं तत् **कम्म** अष्टप्रकारं **परिज्ञाय** तदाश्रवद्वाराणि च, तद्यथा—ज्ञानप्रत्यनीकतया ज्ञानावरणीयमित्यादि; प्रत्याख्यानपरिज्ञया प्रत्याख्याय तदाश्रवद्वारेषु **सर्वशः**=सर्वैः प्रकारैः योगत्रिक-करणत्रिक-रूपैः न वर्त्तते[1] । अथवा **सर्वशः परिज्ञाय** कथयति; सर्वशः परिज्ञानं च केवलिनो गणधरस्य चतुर्दशपूर्वविदो वा । यदि वा सर्वशः कथयति आक्षेपण्याद्या चतुर्विधया धर्मकथया इति । सा च कीदृक् कथा ? इत्याह—

**जे अणण्णदंसी से अणण्णारामे, जे अणण्णारामे से अणण्णदंसी ॥१०१॥**

**जे** इत्यादि । अन्यद् द्रष्टुं शीलं अस्य इति अन्यदर्शी, यस्तथा न असौ **अनन्यदर्शी** यथावस्थितपदार्थद्रष्टा, कश्च एवम्भूतः ? यः सम्यग्दृष्टिः मौनीन्द्रप्रवचनाविर्भूततत्त्वार्थः । यश्च अनन्यदृष्टिः **सः अनन्यारामः** मोक्षमार्गाद् अन्यत्र न रमते । हेतु-हेतुमद्भावेन सूत्रं लगयितुमाह—**जे** इत्यादि । **यश्च** भगवदुपदेशाद् अन्यत्र न रमते **सोऽनन्यदर्शी**; यश्च एवम्भूतः सोऽन्यत्र न रमत इति । उक्तं च—

**"शिवमस्तु कुशास्त्राणां वैशेषिक-षष्टितन्त्र⊕-बौद्धानाम् ।**
**येषां दुर्विहितत्वाद् भगवत्यनुरज्यते चेतः ॥"** [　　　] इत्यादि ॥१०१॥

---

**टि०** १. **वर्तेत** ख घ च ॥

**वि०टि०** ⊕ "**षष्टितन्त्र** इति साङ्ख्यकम्" जै०वि०प० ॥

तदेवं सम्यक्त्वस्वरूपं आख्यातम् । कथयंश्च अरक्त-द्विष्टः कथयतीति दर्शयति—

[ सू० ] **जहा पुण्णस्स कत्थति तहा तुच्छस्स कत्थति ।**
**जहा तुच्छस्स कत्थति तहा पुण्णस्स कत्थति ।**
**अवि य हणे अणातियमाणे । एत्थं पि जाण सेयं ति णत्थि ।**
**केऽयं पुरिसे कं च णए ॥१०२॥**

**जहा पुन्नस्स** इत्यादि । तीर्थकर-गणधरा-ऽऽचार्यादिना (**यथा**=) येन प्रकारेण **पुण्यवतः** सुरेश्वर-चक्रवर्ति-माण्डलिकादेः **कथ्यते**=उपदेशो दीयते **तथा** तेनैव प्रकारेण **तुच्छस्य**=द्रमकस्य काष्ठहारकादेः कथ्यते । अथवा पूर्णः जाति-कुल-रूपाद्युपेतः; तद्विपरीतः तुच्छः । विज्ञानवान् वा पूर्णः ततः अन्यः तुच्छ इति । उक्तं च—

"**ज्ञानैश्वर्य-धनोपेतो जात्यन्वय-बलान्वितः ।**
**तेजस्वी मतिमान् ख्यातः पूर्णस्तुच्छो विपर्ययात् ॥**" [ ]

एतदुक्तं भवति—यथा द्रमकादेः तदनुग्रहबुद्ध्या प्रत्युपकारनिरपेक्षः कथयति एवं चक्रवर्त्यादेरपि, यथा वा चक्रवर्त्यादेः कथयति आदरेण संसारोत्तरणहेतुम्; एवमितरस्यापि । अत्र च निरीहता विवक्षिता ।

न पुनरयं नियमः—एकरूपतयैव कथनीयम् । तथा हि—यो यथा बुध्यते तस्य तथा कथ्यते; बुद्धिमतो निपुणम्, स्थूलबुद्धेस्तु अन्यथेति । राज्ञश्च कथयता तदभिप्रायं अनुवर्तमानेन कथनीयम्— 'किमसौ अभिगृहीतमिथ्यादृष्टिः अनभिगृहीतो वा संशीत्यापन्नो वा ?; अभिगृहीतोऽपि कुतीर्थिकव्युद्ग्राहितः स्वत एव वा ?' तस्य च एवम्भूतस्य यद्येवं कथयेद् यथा—

"[1]**देशसूनासमं चक्रं दशचक्रसमो ध्वजः ।**
**दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥**" [**मनुस्मृति०८५**]

तद्भक्तिविषय**रुद्रादि**देवता⊕**दारुवनचरित**कथने च मोहोदयात् तथाविध[2]कर्मोदये कदाचिद् असौ द्वेषं उपगच्छेत्; द्विष्टश्च एतद् विदध्याद् इत्याह च—

**अवि य** इत्यादि । **अपिः** सम्भावने,आस्तां तावद् वाचा तर्जनं **अनाद्रियमाणो**

---

टि० १. **दशशूनासमश्चक्री दशचक्रिसमो ध्वजः** घ ङ ॥ २. **०कर्मोदयात्** क ॥

**वि०टि०** ⊕ "**दारुवन** इति नाट्यारम्भः" जै०वि०प० । **दारुवनचरितं** तु द्रष्टव्यं द्वितीयपरिशिष्टे ॥

**हन्यादपि; च**शब्दाद् अन्यदपि एवंजातीयं क्रोधाभिभूतो दण्ड-कशादिना ताडयेदिति । उक्तं च—

"**तत्थेव य निट्ठवणं बंधण निच्छुभण कडगमद्दो वा ।**
**निव्विसयं [1]वे नरिंदो करेज्ज संघं पि सो [2]कुद्धो ॥**" [ ]

तथा— **तच्चनिकोपासको [3]नन्दाऽबला**कुक्षिं उद्दिश्य **बुद्धो** जातः इति **बुद्धो**त्पत्तिकथानकात्, **भागवतो** वा **भल्लिगृहो**पाख्यानात्, **रौद्रो** वा **पेढालपुत्र-सत्यक्युमा**दिव्यतिकराकर्णनात् प्रद्वेषं उपगच्छेत्; द्रमक-काण-कुण्टादिः वा कश्चित् तमेव उद्दिश्य उद्दिश्य अधर्मफलोपदर्शनेनेति । एवं अविधिकथनेन इहैव तावद् बाधा; आमुष्मिकोऽपि न कश्चिद् गुणोऽस्ति इत्याह च—

**एत्थं पि** इत्यादि । मुमुक्षोः परहितार्थं धर्मकथां कथयतः तावत् पुण्यं अस्ति, परिषदं तु अविदित्वा अनन्तरोपवर्णितस्वरूपकथने **अत्रापि**=धर्मकथायामपि **श्रेयः**= पुण्यं इत्येतद् **नास्ति** इत्येवं **जानीहि** । यदि वा असौ राजादिः अनाद्रियमाणः तं साधुं धर्मकथिकमपि हन्यात् । [4]किम् ? इत्याह—**एत्थं पि** इत्यादि । यद् यद् असौ पशुवध-तर्पणादिकं धर्मकारणं उपन्यस्यति तत् तद् असौ धर्मकथिकः '**अत्रापि श्रेयो न विद्यते; अत्रापि श्रेयो न विद्यते**' इत्येवं प्रतिहन्ति । यदि वा यद् यद् अविधिकथनं तत्र तत्र इदं उपतिष्ठति—**अत्रापि श्रेयो नास्ती**ति । तथा हि—अक्षरकोविदपर्षदि पक्ष-हेतु-दृष्टान्तान् अनादृत्य **प्राकृतभाषया** कथनं अविधिः; इतरस्यां चान्यथा इति । एवं च प्रवचनस्य हीलनैव केवलम्, कर्मबन्धश्च, न पुनः श्रेयः; विधिं अजानानस्य मौनमेव श्रेय इति । उक्तं च—

"**सावज्ज-ऽणवज्जाणं वयणाणं जो न याणइ विसेसं ।**
**वोत्तुं पि तस्स न खमं किमंग पुण देसणं काउं ? ॥**" [**महानिशी०३।१२३**]

स्यादेतत्— कथं तर्हि धर्मकथा कार्या ? इति, उच्यते—

**केऽयं** इत्यादि । यो हि वश्येन्द्रियः विषयविषपराङ्मुखः संसारोद्विग्नमना वैराग्याकृष्यमाणहृदयो धर्मं पृच्छति तेन आचार्यादिना धर्मकथिकेन असौ पर्यालोचनीयः— '**कोऽयं पुरुषः** मिथ्यादृष्टिः उत भद्रकः ?, केन वा आशयेन अयं पृच्छति ?, **कं [5]च** [6]देवताविशेषं **नतः** ?, किमनेन दर्शनमाश्रितम् ?' इत्येवं आलोच्य यथायोग्यं उत्तरकालं

---

**टि०** १. **च** ग ॥ २. **कुद्दो** ग ॥ ३. **नन्दबलाद् बुद्धोत्पत्तिकथानकात्**, कआदर्शं विना ॥ ४. **कथम्** ? घ ङ ॥ ५. **वा** ग ॥ ६. **०विशेषं न नतः** ? घ ॥

**वि०टि०** ≠ "**निट्ठवणमिति** मारणम्" जै०वि०प० ॥ ☐ "**नन्दाबलाद्** इति नन्दाकुक्षिमुद्दिश्य सञ्जाता" जै०वि०प० ॥ Δ "**इ( भ )ल्लिगृह** इति राजकुमारेण भल्ल्या विद्धो नरकं गतः" जै०वि०प० ।

कथनीयम्। एतदुक्तं भवति—धर्मकथाविधिज्ञो हि आत्मना परिपूर्णः श्रोतारं आलोचयति द्रव्यतः, क्षेत्रतः किमिदं क्षेत्रं **तच्चन्निकैः भागवतै**रन्यैः वा तज्जातीयैः पार्श्वस्थादिभिः वा उत्सर्गरुचिभिः वा भावितम्, कालतो दुःषमादिकं कालं दुर्लभद्रव्यकालं वा, भावतः अरक्तद्विष्ट-मध्यस्थभावापन्नम्; एवं पर्यालोच्य यथा यथा असौ बुध्यते तथा तथा धर्मकथा कार्या। एवं असौ धर्मकथायोग्यः[1]; अपरस्य तु अधिकार एव नास्तीति। उक्तं च—

"जो [2]हेउवायपक्खम्मि हेउओ आगमे य आगमिओ।
**सो ससमयपण्णवओ सिद्धंतविराहओ अण्णो॥" [सन्मति०३/४५]** ॥१०२॥

य एव धर्मकथाविधिज्ञः स एव प्रशस्त इत्याह—

**[सू०] एस वीरे पसंसिए जे बद्धे पडिमोयए, उड्ढं अहं तिरियं दिसासु, से सव्वतो सव्वपरिण्णाचारी ण लिप्पति छणपदेण वीरे॥१०३॥**

**एस** इत्यादि। यो हि पुण्या-ऽपुण्यवतोः धर्मकथासमदृष्टिः विधिज्ञः श्रोतृविवेचकः **एषः** अनन्तरोक्तः **वीरः**=कर्मविदारकः **प्रशंसितः**=श्लाघितः। किम्भूतश्च यो भवति? इत्याह—

**जे बद्धे** इत्यादि। **यो** हि अष्टप्रकारेण कर्मणा स्नेहनिगडादिना वा **बद्धानां** जन्तूनां **प्रतिमोचको** धर्मकथोपदेशदानादिना; स च तीर्थकृद् गणधरः आचार्यादिः वा यथोक्तधर्मकथाविधिज्ञ इति। क्व पुनः व्यवस्थितान् जन्तून् मोचयति? इत्याह—**उड्ढं** इत्यादि। **ऊर्ध्वं** ज्योतिष्कादीन्, **अधः** भवनपत्यादीन्, **तिर्यग्दिक्षु** मनुष्यादीनिति। किञ्च—

**से सव्वओ** इत्यादि। **स** इति वीरो बद्धप्रतिमोचकः **सर्वतः**=सर्वकालं सर्वपरिज्ञया=द्विविधयाऽपि चरितुं शीलं अस्य इति **सर्वपरिज्ञाचारी** विशिष्टज्ञानान्वितः सर्वसंवरचारित्रोपेतो वा। स एवम्भूतः कं गुणं अवाप्नोति? इत्याह—

**न लिप्पई**त्यादि। **न लिप्यते**=नावगुण्ठ्यते, केन? **क्षणपदेन**=हिंसास्पदेन प्राण्युपमर्दजनितेन, "[3]**क्षणु हिंसायाम्**"[पा०धा०१४६६] इति अस्य एतद्रूपम्, कोऽसौ? **वीर** इति॥१०३॥ किं एतावदेव वीरलक्षणं उत अन्यदपि अस्ति? इत्याह—

**[सू०] से मेधावी जे अणुग्घातणस्स खेत्तण्णे जे य बंधपमोक्खमण्णेसी।**
**कुसले पुण णो बद्धे णो मुक्के।**
**से जं च आरभे, जं च णारभे, अणारद्धं च ण आरभे।**

---

टि० १. **धर्मकथायोगः** ग॥ २. **हेउपक्खवायम्मि हेउओ आगम्मि आगमिओ** ख विना॥ ३. **क्षण** क-गप्रती ऋते॥

**छणं छणं परिण्णाय लोगसण्णं च सव्वसो ॥१०४॥**

**से मेहावी** इत्यादि । **से[1] मेधावी**=बुद्धिमान् **यः अणोद्घातनस्य खेदज्ञः** अणति अनेन जन्तुगणः चतुर्गतिकं संसारमिति अणं कर्म, तस्य उत्=प्राबल्येन घातनम्=अपनयनं, तस्य तत्र वा खेदज्ञः=निपुणः । इह हि कर्मक्षपणोद्यतानां मुमुक्षूणां यः कर्मक्षपणविधिज्ञः **स मेधावी** कुशलो **वीर** इत्युक्तं भवति ।

किञ्च अन्यत्—**जे य** इत्यादि । **यश्च** प्रकृति-स्थिति-अनुभाव-प्रदेशरूपस्य चतुर्विधस्यापि **बन्धस्य** यः **प्रमोक्षः** तदुपायो वा, तं अन्वेष्टुं=मृगयितुं शीलं अस्य इति **अन्वेषी**, यश्च एवम्भूतः स वीरो मेधावी खेदज्ञ इति पूर्वेण सम्बन्धः । **अणोद्घातनस्य खेदज्ञ** इति अनेन मूलोत्तरप्रकृतिभेदभिन्नस्य योगनिमित्तायातस्य कषायस्थितिकस्य कर्मणो बध्यमानावस्थां बद्ध-स्पृष्ट-निधत्त-निकाचितरूपां तदपनयनोपायं च वेत्ति इत्येतद् अभिहितम्; अनेन च अपनयनानुष्ठानमिति न पुनरुक्तदोषानुषङ्गः प्रसजति ।

स्यादेतत्—योऽयं अणोद्घातनस्य खेदज्ञो बन्ध-मोक्षान्वेषको वा अभिहितः स किं छद्मस्थ आहोस्वित् केवली ?, केवलिनो यथोक्तविशेषणासम्भवात् छद्मस्थस्य ग्रहणम् । केवलिनः तर्हि का वार्ता ? इति, उच्यते—

**कुसले** इत्यादि । **कुशलो**ऽत्र क्षीणघातिकर्मांशो विवक्षितः; स च तीर्थकृत् सामान्यकेवली वा । छद्मस्थो हि कर्मणा बद्धो मोक्षार्थी तदुपायान्वेषकः; केवली तु[2] **पुनः** घातिकर्मक्षयाद् **नो बद्धः**, भवोपग्राहिकर्मसद्भावाद् **नो मुक्तः** । यदि वा छद्मस्थ एव अभिधीयते **कुशलः** अवाप्तज्ञान-दर्शन-चारित्रः मिथ्यात्व-द्वादशकषायोपशम-क्षयोपशम-सद्भावात् तदुदयवान् इव **न बद्धः**, अद्यापि तत्सत्कर्मतासद्भावाद् **नो मुक्तः** इति ।

एवम्भूतश्च स कुशलः केवली छद्मस्थो वा यद् आचीर्णवान् यद् आचरति वा तद् अपरेणापि मुमुक्षुणा विधेयमिति दर्शयति—

**से जं च** इत्यादि । **स** कुशलो **यद् आरभते** आरब्धवान् वा अशेषकर्मक्षपणोपायं[3] संयमानुष्ठानम्, **यच्च नारभते** मिथ्यात्वा-ऽविरत्यादिकं संसारकारणं, तद् आरब्धव्यं आरम्भणीयं अनारब्धं अनारम्भणीयं चेति । संसारकारणस्य च मिथ्यात्वा-ऽविरत्यादेः प्राणातिपाताद्यष्टादशरूपस्य च एकान्तेन निराकार्यत्वात्, तन्निषेधे च विधेयस्य संयमानुष्ठानस्य सामर्थ्यायातत्वात् तन्निषेधमाह—

**अणारद्धं चे**त्यादि । **अनारब्धम्**=अनाचीर्णं केवलिभिः विशिष्टमुनिभिः वा तद् मुमुक्षुः **नारभेत**[4]=न कुर्याद् इत्युपदेशः; यच्च मोक्षाङ्गं आचीर्णं तत् कुर्याद् इत्युक्तं भवति ।

---

टि०-१. **से मेहावी बुद्धिमान्** च ॥ २. तु इति खप्रतौ नास्ति ॥ ३. **०क्षयोपायं** ख ॥ ४. **नारभते** ग घ ङ ॥

यत् तद् भगवदनाचीर्णं परिहार्यं तद् नामग्राहमाह–

**छणं छणं** इत्यादि । "**क्षणु हिंसायाम्**" [**पा०धा०१४६६**] क्षणनं=**क्षणः** हिंसनम्, कारणे कार्योपचाराद् येन येन प्रकारेण हिंसा उत्पद्यते तत् तद् ज्ञपरिज्ञया[1] **परिज्ञाय** प्रत्याख्यानपरिज्ञया परिहरेत् । यदि वा **क्षणः**=अवसरः कर्तव्यकालः, तं तं ज्ञपरिज्ञया ज्ञात्वा आसेवनापरिज्ञया च आचरेदिति । किञ्च–**लोयसण्णं** इत्यादि । **लोक**स्य=गृहस्थलोकस्य सञ्ज्ञानं=**सञ्ज्ञा** विषयाभिष्वङ्गजनितसुखेच्छा परिग्रहसञ्ज्ञा वा, तां **च** ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च परिहरेत् । कथम् ? **सर्वशः**=सर्वैः प्रकारैः योगत्रिक-करणत्रिकेण इत्यर्थः ॥१०४॥

तस्य एवंविधस्य यथोक्तगुणावस्थितस्य धर्मकथाविधिज्ञस्य बद्धप्रतिमोचकस्य कर्मोद्घातनखेदज्ञस्य[2] बन्ध-मोक्षान्वेषिणः सत्पथव्यवस्थितस्य कुमार्गं[3] निराचिकीर्षोः हिंसाद्यष्टादशपापस्थानविरतस्य अवगतलोकसञ्ज्ञस्य यद् भवति तद् दर्शयति–

**[सू०] उद्देसो पासगस्स णत्थि । बाले पुण णिहे कामसमणुण्णे असमितदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टति त्ति बेमि ॥१०५॥**

**॥ बीयमज्झयणं लोगविजयो सम्मत्तं ॥**

**उद्देसो** इत्यादि । उद्दिश्यते नारकादिव्यपदेशेन इति **उद्देशः**, स **पश्यकस्य**= परमार्थदृशो **न विद्यते** इत्यादीनि च सूत्राणि उद्देशकपरिसमाप्ति यावत् **तृतीयोद्देशके** व्याख्यातानि; तत एव अर्थोऽवगन्तव्यः आक्षेप-परिहारौ चेति । तानि च अमूनि–**बालः पुनः निहः कामसमनुज्ञः अशमितदुःखः दुःखी दुःखानामेव आवर्तमनुपरिवर्तते**, **इतिः** परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥१०५॥

उक्तः षष्ठोद्देशकः । तत्परिसमाप्तौ च उक्तः सूत्रानुगमः सूत्रालापकनिष्पन्ननिक्षेपश्च ससूत्रस्पर्शनिर्युक्तिकः । साम्प्रतं नैगमादयो नयाः । ते च अन्यत्र न्यक्षेण प्रतिपादिता इति इह तु न प्रतन्यन्तेः सङ्क्षेपतस्तु ज्ञान-क्रियानयद्वयान्तर्गतत्वात् तेषां तावेव प्रतिपाद्येते । तयोरपि आत्मीयपक्षसावधारणतया मोक्षाङ्गत्वाभावात् प्रत्येकं मिथ्यादृष्टित्वम्, अतः पङ्ग्वन्धवत् परस्परसापेक्षतया इष्टकार्यावाप्तिः अवगन्तव्या इति उपरम्यते[4] ।

**॥ इति[5] लोकविजयाध्ययनटीका समाप्ता ॥ छ ॥**

**॥ ग्रन्थाग्रम्-२५०० ॥**

---

टि० १. ज्ञपरिज्ञया ज्ञात्वा प्रत्या० ख ग च ॥ २. कर्मोद्घाटन० ख च ॥ ३. कुमार्गं तित्यक्षोर्हिंसा० ख ॥ ४. ०ते ॥ छ ॥ समाप्ता लोकविजयाध्ययनटीकेति ॥ छ ॥ ख । ०ते ॥ छ ॥ समाप्ता लोगविजयाध्ययनस्य टीकेति ॥ छ ॥ ग्रन्थाग्रम्–२५०० । च ॥ ५. इति परिसमाप्ता लोकविजयटीका ॥ छ ॥ ङ ॥

# तृतीयं
# शीतोष्णीयमध्ययनम्

पुरिसा ! तुममेव तुमं मित्तं, किं बहिया मित्तमिच्छसि ? ।
[ सू०१२४ ]

## ॥ तृतीयमध्ययनं शीतोष्णीयम् ॥

### ॥ प्रथम उद्देशकः ॥

उक्तं द्वितीयमध्ययनम् । साम्प्रतं तृतीयमारभ्यते । [1]अस्य च अयमभिसम्बन्धः—तत्र **शस्त्रपरिज्ञा**यां अस्य अर्थाधिकारोऽभाणि यथा—शीतोष्णयोः अनुकूल–प्रतिकूलपरीषहयोः अतिसहनं कर्तव्यम्, तदधुना प्रतिपाद्यते । अध्ययनसम्बन्धस्तु **शस्त्रपरिज्ञो**क्तमहाव्रत–सम्पन्नस्य **लोकविजया**ध्ययनप्रसिद्धसंयमव्यवस्थितस्य विजितकषायादिलोकस्य मुमुक्षोः कदाचि[2]द् अनुलोम–प्रतिलोमाः परीषहाः प्रादुःषन्ति, तेऽविकृतान्तःकरणेन सम्यक् सोढव्या इति अनेन सम्बन्धेन आयातमिदमध्ययनम् । अस्य च उपक्रमादीनि चत्वार्यनुयोगद्वाराणि भवन्ति । तत्र उपक्रमे अर्थाधिकारो द्वेधा । तत्रापि अध्ययनार्थाधिकारोऽभिहितः卐 । उद्देशार्थाधिकारप्रतिपादनार्थं तु **निर्युक्तिकार** आह—

**[ नि० ] पढमे सुत्ता [3]अस्संजय त्ति बिइए दुहं अणुहवंति ।**
**ततिए ण हु दुक्खेणं अकरणयाए [4]व समणो त्ति ॥१९९॥**

**[ नि० ] उद्देसम्मि चउत्थे अहिगारो उ वमणं कसायाणं ।**
**पाव[5]विरई [6]उ विउणो उ संजमो एत्थ मुक्खु त्ति ॥२००॥**

**पढमे** इत्यादि, **उद्देसम्मि** इत्यादि । प्रथमोद्देशके अयमर्थाधिकारो यथा भावनिद्रया **सुप्ताः**=सम्यग्विवेकरहिताः, के ? **असंयताः** गृहस्थाः, तेषां च भावसुप्तानां दोषा अभिधीयन्ते, जाग्रतां च गुणाः, तद्यथा—**जरामच्चुवसोवणीए नरे** [सू०१०८] इत्यादि । **द्वितीये**[7] तु त एवासंय[8]ता यथा भावनिद्रापन्ना **दुःखमनुभवन्ति** तथोच्यते, तद्यथा—**कामेसु गिद्धा निचयं करेंति** [सू०११३] । **तृतीये** तु **न हु**=नैव दुःखसहनादेव केवलात् **श्रमणः अकरणतयैव**=अक्रिययैव, संयमानुष्ठानमन्तरेण इत्यर्थः । वक्ष्यति च—⊕**[9]सहिए दुक्खमायाए तेणेव य पुट्ठो नो झंझाए** [सू०१२७] ।

---

टि० १. **तस्य** क ॥ २. **०चित् प्रतिलोमा-ऽनुलोमाः** ख च ॥ ३. **अस्संजयंति बिइए** ज । **अस्संजतो( त )त्ति बीए** ञ ॥ ४. **अ** छ ॥ ५. **०वविरईओ** ख ॥ ६. **य** ञ ॥ ७. **०ये तदेवासंयता** क । **०ये तु तदेवासंयता** घ ॥ ८. **०ता ये भाव०** ख ॥ ९. **०मादाय णो वुद्धो[ ?ट्ठो ] णो सं(झं)ज्झाए** ख । **०मादाय तेणेव य पुट्ठो** च ॥

वि०टि० 卐 दृश्यतां **आचा०नि०३३** ॥ ⊕ **सहिते दुक्खमत्ताए पुट्ठो नो झंझाए** इत्येवं सूत्रम्; वृत्तिकृद्भिस्तु **चूर्णिकारसम्मतपाठो गृहीत** इत्यवधेयम् ॥

**चतुर्थोद्देशके** तु अयमर्थाधिकारो यथा—**कषायाणां वमनं**[1] कार्यं **पापस्य** च कर्मणो **विरतिः, विदुषः**=विदितवेद्यस्य **संयमोऽत्रैव** प्रतिपाद्यते, क्षपकश्रेणिप्रक्रमाप्तकेवल-भवोपग्राहिक्षयात् **मोक्षश्चे**ति गाथाद्वयार्थः ॥१९९-२००॥

नामनिष्पन्ने तु निक्षेपे शीतोष्णीयम्[2]; अतः शीतोष्णयोः निक्षेपं निर्दिदिक्षुराह—

**[ नि० ] नामं ठवणा सीयं दव्वे भावे य होइ नायव्वं ।**
**एमेव य उण्हस्स वि[3] चउव्विहो होइ निक्खेवो ॥२०१॥**

**नामं ठवणा** इत्यादि । सुगमा ॥२०१॥

तत्र नाम-स्थापने अनादृत्य द्रव्यशीतोष्णे दर्शयितुमाह—

**[ नि० ] दव्वे सीयलदव्वं दव्वुण्हं चेव[4] होइ उण्हं तु ।**
**भावे उ[5] पुग्गलगुणो जीवस्स गुणो अणेगविहो ॥२०२॥**

**दव्वे** इत्यादि । ज्ञशरीर-भव्यशरीरव्यतिरिक्तं द्रव्यशीतं शीतगुणोपेतं, गुण-गुणिनोरभेदात्; शीतकारणं वा यद् द्रव्यं, द्रव्यप्राधान्यात्; **शीतलद्रव्यमे**व द्रव्यशीतं हिम-[6]तुषार-करक-हारादि । एवं **द्रव्योष्णम**पीति ।

भावतस्तु द्वेधा पुद्गलाश्रितं जीवाश्रितं च गाथाशकलेनाचष्टे—तत्र पुद्गलाश्रितं भावशीतं पुद्गलस्य शीतो गुणः, गुणस्य प्राधान्यविवक्षयेति । एवं भावोष्णमपि । **जीवस्य** तु शीतोष्णरूपो**ऽनेकविधो गुणः**, तद्यथा—औदयिकादयः षड् भावाः । तत्रौदयिकः कर्मोदयाविर्भूतनारकादिभव-कषायोत्पत्तिलक्षण उष्णः । औपशमिकः कर्मोपशमा-ऽवाप्तसम्यक्त्व-विरतिस्वरूपः शीतः । क्षायिकोऽपि शीत एव, क्षायिकसम्यक्त्व-चारित्रादिरूपत्वात्; अथवा अशेषकर्मदाहान्यथानुपपत्तेः उष्णः । शेषा अपि विवक्षातो द्विरूपा अपीति ॥२०२॥ अस्य च जीवभावगुणस्य शीतोष्णविवेकं स्वत एव **निर्युक्तिकारः** प्रचिकटयिषुराह—

**[ नि० ] सीयं परीसह पमायुवसम[7] विरती सुहं च, उण्हं तु[8] ।**
**परीसहतवुज्जमकसायसोगवेयारई दुक्खं ॥२०३॥** दारगाहा ॥

---

टि० १. दमनं ख ॥ २. **शीतोष्णीयमध्ययनम्; अतः** घ ङ ॥ ३. **वि निक्खेवे( वो ) चउव्विहो होति** ञ ॥ ४. **चेव उण्हदव्वं तु** ख ज ठ । **चेव उण्हदव्वं च** ञ ॥ ५. **य** ठ ॥ ६. **हिम-करक-तुषार-हारादि** ख । **हिम-तुषार-क-हारादि** ग ॥ ७. **पमाय पसम** ख छ ज । **पमाउवसम** झ । **पमायुपसम** ठ ॥ ८. **च** क-छप्रती ऋते ॥

**सीयमि**त्यादि । शीतम् इति भावशीतम्; तच्च इह जीवपरिणामस्वरूपं गृह्यते । स चायं परिणामः—मार्गाऽच्यवन-निर्जरार्थं ⊕परिषोढव्याः **परीषहाः; प्रमादः**=कार्यशैथिल्यं शीतलविहारता; **उपशमः** मोहनीयोपशमः, स च सम्यक्त्व-देशविरति-सर्वविरतिलक्षणः, उपशमश्रेण्याश्रितो वा, Φतत्क्षयो वेति; **विरतिः** इति प्राणातिपातादिविरत्युपलक्षितः सप्तदशविधः संयमः; **सुखं च** सातावेदनीयविपाकाविर्भूतम्; एतत् सर्वं परीषहादि शीतम् । उष्णं च गाथाशकलेनाह—

**परीषहाः** पूर्वव्यावर्णितस्वरूपाः, **तपस्युद्यमः**=यथाशक्ति द्वादशप्रकारतपोऽनुष्ठानम्, **कषायाः** क्रोधादयः, **शोकः**=इष्टाप्राप्ति-विनाशोद्भव आधिः; **वेदः**=स्त्री-पुं-नपुंसक-वेदोदयः, **अरतिः**=मोहनीयविपाकात् चित्तदौस्थ्यम्, **दुःखं** च असातावेदनीयोदयादिति; एतानि परीषहादीनि पीडाकारित्वाद् उष्णमिति गाथासमासार्थः ॥२०३॥

व्यासार्थं तु **निर्युक्तिकारः** स्वत एव आचष्टे, तत्र परीषहाः शीतोष्णयोः द्वयोरपि अभिहिताः, ततो मन्दबुद्धेः Δअनध्यवसायः संशयो विपर्ययो वा स्यात्; अतः तदपनोदार्थमाह—

**[ नि० ] इत्थी सक्कारपरीसहो य दो भावसीयला एए ।**
**सेसा वीसं [१]उण्हा परीसहा होंति नायव्वा ॥२०४॥**

**इत्थी** इत्यादि गाथा । **स्त्री**परीषहः **सत्कारपरीषहश्च द्वौ** अपि **एतौ** शीतौ, भाव-मनोऽनुकूलत्वात् । **शेषास्तु** पुन**र्विंशतिरुष्णा ज्ञातव्या भवन्ति**, मनसः प्रतिकूलत्वादिति गाथार्थः ॥२०४॥ यदि वा परीषहाणां शीतोष्णत्वमन्यथा आचष्टे—

**[ नि० ] जे तिव्वपरीणामा परीसहा ते भवन्ति उण्हा तु ।**
**जे मंदपरीणामा परीसहा ते भवे सीया ॥२०५॥** दारं ॥

**जे** इत्यादि गाथा । **तीव्रः**=दुःसहः **परिणामः**=परिणतिः येषां ते तथा, **य** एवम्भूताः **परीषहास्ते उष्णाः; ये** तु **मन्दपरिणामास्ते शीता** इति । इदमुक्तं भवति— ये [२]शारीरदुःखोत्पादकत्वेन उदीर्णाः सम्यक्सहनाभावाच्च आधिविधायिनः ते तीव्रपरिणामत्वाद्

---

टि० १. तुम्हा क ॥ २. शरीर० घ ॥

**वि०टि०** ⊕ "**परिषोढव्या** इति सम्यक्सह्यमानाः सीताः" जै०वि०प० ॥ Φ "**तत्क्षये( यो )** मोहनीयक्षयः" जै०वि०प० ॥ Δ "**अनध्यवसायम्( यः )** इति न विचारक्षमं द्वयमपि । **संशय** इति शीतं चेद् उष्णं कथम् ? । **विपर्य[ य ]** इति एकमेव शीतमुष्णं वा न द्वे" जै०वि०प० ॥

उष्णाः; ये पुनरुदीर्णाः शारीरमेव केवलं दुःखमुत्पादयन्ति महासत्त्वस्य, न मानसं, ते भावतो मन्दपरिणामाः । यदि वा **ये तीव्रपरिणामाः** प्रबलाविर्भूतस्वरूपाः ते **उष्णाः**; **ये** तु **मन्दपरिणामाः** ईषल्लक्ष्यमाणस्वरूपाः **ते शीता** इति ॥२०५॥

यत् परीषहानन्तरं प्रमादपदमुपन्यस्तं शीतत्वेन; यच्च तपस्युद्यम इत्युष्णत्वेन तदुभयं गाथया आचष्टे–

**[ नि० ] धम्मम्मि जो**[१] **पमायइ अत्थे वा सीयलो त्ति**[२] **तं बेंति ।**
**उज्जुत्तं पुण अन्नं तत्तो उण्हं ति णं बेंति ॥२०६॥** दारं ॥

[३]**धम्मम्मि जो** इत्यादि । **धर्मे** = श्रमणधर्मे **यः प्रमाद्यति**=नोद्यमं विधत्ते **अर्थे**[४] वा, अर्थ्यत इति अर्थः धन-धान्य-हिरण्यादिः, तत्र ⊕तदुपाये वा, **शीतल**[५] **इत्येवं तं ब्रुवते**=आचक्षते । **उद्युक्तं पुनरन्यं ततः** संयमोद्यमात् कारणाद् **उष्णमित्येवं ब्रुवते** । **णमि**ति वाक्यालङ्कारे इति गाथार्थः ॥२०६॥ उपशमपदव्याचिख्यासया आह–

**[ नि० ] सीतीभूतो परिणिव्वुतो य सन्तो तहेव पण्हाणो ।**
**होउवसन्तकसातो तेणुवसन्तो भवे**[६] **सीतो ॥२०७॥** दारं ॥

**सीतीभूतो** इत्यादि गाथा । उपशमो हि क्रोधाद्युदयाऽभावे भवति, ततश्च [७]कषायाग्न्युपशमात् **शीतीभूतो** भवति; क्रोधादिज्वालानिर्वाणात् **परिनिर्वृतो** भवति; **चः** समुच्चये, राग-द्वेषपावकोपशमादुप**शान्तः; तथा** क्रोधादिपरितापोपशमात् **प्रह्लादितः**= आपन्नसुखः; यतो हि **उपशान्तकषाय** एव एवम्भूतो **भवति तेनो**पशान्तकषायः **शीतो भवती**ति । एकार्थिकानि चैतानीति गाथार्थः ॥२०७॥

अधुना विरतिपदव्याख्यामाह–

**[ नि० ] अभयकरो जीवाणं सीयघरो संजमो हवइ सीतो ।**
**अस्संजमो य उण्हो एसो अन्नो व**[८] **पज्जातो ॥२०८॥** दारं ॥

**अभय०** इत्यादि गाथा । **अभयकरण**शीलः, केषां ? **जीवानाम्**, शीतं = सुखं,

---

टि० १. जे झ ॥ २. हि क ॥ ३. **धम्मंसि** ख ॥ ४. **अथवा अर्थ्यत** क ग ॥ ५. **शीतलं तं** ख ॥ ६. **हवति सीतो** त्र । **भवे जीवो** ख ॥ ७. **कषायाद्युपशमात्** ग ॥ ८. **वि** त्र-ठआदर्शौ विना ॥

वि०टि० ⊕ "**तदुपाय** इति यः प्रमाद्यति" जै०वि०प० ॥

तद्गृहः[१]=तदावासः, को असौ ? **संयमः** सप्तदशभेदः; अतो असौ **शीतो भवति**, समस्त-दुःखहेतुद्वन्द्वोपरमात् । एतद्विपर्ययस्तु **असंयम उष्णः** । **एषः** शीतोष्णलक्षणः संयमाऽसंयमयोः **पर्यायः**, **अन्यो वा** सुख-दुःखरूपो विवक्षावशाद् भवतीति गाथार्थः ॥२०८॥

साम्प्रतं सुखपदविवरणाय आह—

**[ नि० ] णिव्वाणसुहं सायं[२] सीतीभूतं[३] पयं अणाबाहं ।**
**इहमवि जं किंचि सुहं तं सीयं दुक्खमवि उण्हं ॥२०९॥**

**निव्वाणसुहमि**त्यादि गाथा । सुखं शीतमिति उक्तम्; तच्च समस्तद्वन्द्वोपरमाद् आत्यन्तिकैकान्तिकानाबाधलक्षणं निरुपाधिकं परमार्थचिन्तायां मुक्तिसुखमेव[४] सुखम्, नापरम्; एतच्च समस्तकर्मोपतापाऽभावाच्छीतमिति दर्शयति—**निर्वाणसुखम्** इति, निर्वाणम्=अशेषकर्मक्षयः तदवाप्तौ वा विशिष्टाकाशप्रदेशः, तेन तत्र वा सुखं=**निर्वाणसुखम्** । अस्य च एकार्थिकानि—**सातं शीतीभूतं पदमनाबाधमि**ति । **इहापि** संसारे **यत्किञ्चित्** सातावेदनीयविपाकोद्भूतं सातं=**सुखं तद**पि **शीतं,** मनआह्लादात्; एतद्विपर्ययस्तु **दुःखम्;** तच्च **उष्णमि**ति गाथार्थः ॥२०९॥

कषायादिपदव्याचिख्यासया आह—

**[ नि० ] डज्झइ तिव्वकसातो सोगऽभिभूओ उदिण्णवेदो य ।**
**उण्हयरो होइ तवो कसायमाई वि जं डहइ ॥२१०॥**

**डज्झइ** इत्यादि गाथा । **दह्यते**=परिपच्यते, कोऽसौ ? **तीव्रा**=उत्कटा उदीर्णा विपाकानुभवेन **कषाया** यस्य स तथा; न केवलं कषायाग्निना दह्यते **शोकाभिभूतश्च** इष्टवियोगादिजनितः **शोकः**, तेन **अभिभूतः**=तिरोहितशुभव्यापारोऽसावपि दह्यते; तथा **उदीर्णः**=विपाकापन्नो **वेदो** यस्य स तथा । उदीर्णवेदो हि पुमान् स्त्रियं कामयते, साऽपीतरम्, नपुंसकस्तूभयमिति; ⊕तत्प्राप्त्यभावे काङ्क्षोद्भूतारतिदाहेन दह्यते । **चश**ब्दाद् इच्छाकामाप्राप्तिजनितारतिपावकेन[५] च दह्यते ।

तदेवं कषायाः शोको वेदोदयश्च दाहकत्वाद् उष्णः[?ष्णाः], सर्वं वा मोहनीयमष्ट-प्रकारं वा कर्म्म उष्णम् । ततोऽपि तद्दाहकत्वाद् उष्णतरं तप इति गाथाशकलेन दर्शयति—

---

टि० १. तद्गृहं घ च ॥ २. **सीयं** झ ज ॥ ३. ०**भूतं सुहं अणाबाधं** ख ॥ ४. ०**सुखम् अशेष०** ख ॥ ५. ०**रतिदाहकेन** ख ॥.

**वि०टि०** ⊕ "**तत्प्राप्तिः** इति यथासम्भवं घटना" जै०वि०प० ॥

**उष्णतरं तपो भवति** । किमिति ? यतः **कषायादिकमपि दहति, आदि**शब्दात् शोकादिपरिग्रह इति गाथार्थः ॥२१०॥ येन अभिप्रायेण द्रव्य-भावभेदभिन्ने परीषह-प्रमादोद्यमादिरूपे शीतोष्णे जगाद आचार्यः तमभिप्रायं आविःकरोति—

**[ नि० ] सीउण्हफास-सुह-दुह-परीसह-कसाय-वेय-सोयसहो ।**
**होज्ज समणो सया उज्जतो[1] य तवसंजमोवसमे ॥२११॥** दारं ॥

**सीउण्ह०** इत्यादि गाथा । शीतं च उष्णं च=**शीतोष्णे**, तयोः **स्पर्शः**, तम् सहते इति सम्बन्धः, शीतस्पर्शोष्णस्पर्शजनितवेदनामनुभवन् नार्तध्यानोपगतो भवतीति यावत् । शरीर-मनसोरनुकूलं **सुखमि**ति, तद्विपरीतं **दुःखम्**, तथा **परीषह-कषाय-वेद[2]-शोकान्** शीतोष्णभूतान् **सहत** इति । तदेवं शीतोष्णादिसहः सन् **भवेत् श्रमणः**=यतिः **सदोद्युक्तश्च,** क्व ? **तपःसंयमोपशमे** इति गाथार्थः ॥२११॥

साम्प्रतं उपसंहारव्याजेन साधुना[3] शीतोष्णातिसहनं कर्तव्यमिति दर्शयति—

**[ नि० ] सीयाणि य उण्हाणि य भिक्खूणं होंति विसहियव्वाइं ।**
**कामा ण सेवियव्वा सीउसणिज्जस्स निज्जुत्ती ॥२१२॥**

**णामणिप्फण्णो गओ ।छ॥**

**सीयाणि य** इत्यादि गाथा । **शीतानि** परीषह-प्रमादोपशम-विरति-सुखरूपाणि यानि अभिहितानि, **उष्णानि च** परीषह-तपउद्यम-कषाय-शोक-वेदा-ऽरत्यात्मकानि प्रागभिहितानि; तानि **भिक्षूणां**=मुमुक्षूणां **विषोढव्यानि**, न सुख-दुःखयोः उत्सेक-विषादौ विधेयौ । तानि चैवं सम्यग्दृष्टिना सह्यन्ते यदि कामपरित्यागो भवतीति गाथाशकलेनाह— **कामा** इत्यादि, गाथार्धं सुगमम् ॥२१२॥

गतो नामनिष्पन्नो निक्षेपः । साम्प्रतं सूत्रानुगमे अस्खलितादिगुणोपेतं अशेषदोषव्रातविकलं सूत्रमुच्चारयितव्यम्; तच्चेदम्—

**[ सू० ] सुत्ता अमुणी, मुणिणो सया जागरंति ।**

**सुत्ता** इत्यादि सूत्रम् । अस्य च अनन्तरसूत्रेण सम्बन्धो वाच्यः, स चायम्— इह **दुःखी दुःखानामेव आवर्तमनुपरिवर्तते[4]** [सू०१०५] इत्युक्तम्, तद् इहापि भावसुप्ता

टि० १. उज्जुओ क ॥ २. ०वेदान् शीतो० ख ॥ ३. साधूनां ख ॥ ४. ०मनुवर्तत क ॥

अज्ञानिनो दुःखिनो दुःखानामेव आवर्तमनुपरिवर्तन्ते इति । उक्तं च–

"नातः **परमहं मन्ये, जगतो दुःखकारणम् ।**
**यथाऽज्ञानमहारोगो दुरन्तः सर्वदेहिनाम् ॥**" [ ] इत्यादि ।

इह सुप्ता द्विधा–द्रव्यतो भावतश्च । तत्र निद्राप्रमादवन्तो[1] द्रव्यसुप्ताः; भावसुप्तास्तु मिथ्यात्वा-ऽज्ञानमयमहानिद्राव्यामोहिताः; ततो ये **अमुनयः**=मिथ्यादृष्टयः सततं भावसुप्ताः, सद्विज्ञाना[2]नुष्ठानरहितत्वात्, निद्रया तु भजनीयाः । **मुनयस्तु** सद्बोधोपेता मोक्षमार्गाद् अचलन्तः ते सततं अनवरतं **जाग्रति**=हिता-ऽहित–प्राप्ति-परिहारं कुर्वते; अतो द्रव्यनिद्रोपगता अपि क्वचिद् द्वितीयपौरुष्यादौ सततं जागरूका एवेति ।

एनमेव भावस्वापं जागरणं च[3] विषयीकृत्य **निर्युक्तिकारो** गाथां जगाद–

**[ नि० ] सुत्ता अमुणी उ सया मुणी उ सुत्ता वि[4] जागरा होंति ।**
**धम्मं पडुच्च एवं निद्दासुत्तेण भेइयव्वं[5] ॥२१३॥**

**सुत्ता** इत्यादि । सुप्ता द्विधा–द्रव्यतो भावतश्च । तत्र निद्रया द्रव्यसुप्तान् गाथान्ते वक्ष्यति; भाव**सुप्तास्तु अमुनयः**=गृहस्था मिथ्यात्व-ऽज्ञानावृता हिंसाद्याश्रवद्वारेषु सदा प्रवृत्ताः; मुनयस्तु अपगतमिथ्यात्वनिद्रा-ऽवाप्तसम्यक्त्वादिबोधा[6] भावतो जागरूका एव । यद्यपि क्वचिद् आचार्यानुज्ञाता द्वितीयपौरुष्यादौ दीर्घसंयमाधारशरीरस्थित्यर्थं[7] निद्रावशोपगता भवन्ति तथापि **सदा जागरा** एव । **एवं च धर्मं प्रतीत्य** उक्ताः सुप्ता जाग्रदवस्थाश्च । द्रव्य**निद्रासुप्तेन** तु भाज्यमेतत्–धर्मः[⊕] स्याद् वा न वा । यद्यसौ भावतो जागर्ति ततो निद्रासुप्तस्यापि धर्मः स्यादेव, यदि वा भावतो जाग्रतो निद्राप्रमादावष्टब्धान्तःकरणस्य न स्यादपि, यस्तु द्रव्य-भावसुप्तस्तस्य न स्यादेव इति भजनार्थः ।

अथ किमिति द्रव्यसुप्तस्य धर्मो न भवतीति ?;

उच्यते– द्रव्यसुप्तो हि निद्रया भवति, सा च दुरन्ता । किमिति ?– यतः स्त्यानर्द्धित्रिकोदये सम्यक्त्वावाप्तिः भवसिद्धिकस्यापि न भवति, तद्बन्धश्च मिथ्यादृष्टि-सास्वादनयोः अनन्तानुबन्धिबन्धसहचरितः, क्षयस्तु अनिवृत्तिबादरगुणस्थानकाल-

---

टि० १. **०प्रमादापन्ना द्रव्य०** ख ग च ॥ २. **तद्विज्ञाना०** ख ॥ ३. **वा** ग ॥ ४. **उ** ख ॥ ५. **भवितव्वं** ख । **भवियव्वं** छ ज । **भणियव्वं** त्र । **भतियव्वं** ठ ॥ ६. **०त्वादिनिद्रा अवाप्त०** ख च । **०त्वादिनिद्रयाऽवाप्त०** घ । **०त्वादिनिद्रावाप्त०** ङ ॥ ७. **०माचार०** घ ङ ॥

वि०टि० ⊕ "**तद्ध[?ध]र्म** इति धर्माख्यं वस्तु" जै०वि०प० ॥

सङ्ख्येयभागेषु कियत्स्वपि गतेषु सत्सु भवति । निद्राप्रचलयोरपि उदये ⊕प्राग्वदेव, बन्धोपरमस्तु अपूर्वकरणकालसङ्ख्येयभागान्ते भवति, क्षयः पुनः क्षीणकषायद्विचरम-समये, उदयस्तु Φउपशमकोपशान्तमोहयोरपि भवति अतो दुरन्तो निद्राप्रमादः ॥२१३॥

यथा च द्रव्यसुप्तो दुःखमवाप्नोति एवं भावसुप्तोऽपि (इति) दर्शयितुमाह—

**[नि०] जह सुत्त मत्त मुच्छिय असहीणो पावए बहुं दुक्खं ।**
**तिव्वं अप्पडियारं [1]विवट्टमाणो तहा लोगो ॥२१४॥**

**जह सुत्त** इत्यादि गाथा । **सुप्तः** निद्रया, **मत्तः** [2]मदिरादिना, **मूर्छितः** गाढमर्म-प्रहारादिना, **अस्वाधीनः**=परायत्तो वातादिदोषोद्भवग्रहादिना **यथा बहु दुःखं अप्रतिकारं** अवाप्नोति **तथा** भावस्वापे मिथ्यात्वा-ऽविरति-प्रमाद-कषायादिके[3] **विवर्तमानः** = अवतिष्ठमानः **लोकः**=प्राणिगणो नरकभवादिकं दुःखमवाप्नोतीति गाथार्थः ॥२१४॥

पुनरपि व्यतिरेकदृष्टान्तद्वारेण उपदेशदानाय आह—

**[नि०] एसेव [4]य उवएसो पलित्त [5]पवलाय पंथमादीसु ।**
**अणुहवइ जह सचेओ सुहाइं समणो वि य तहेव ॥२१५॥ [6]सू०॥**

**॥ सीउसणिज्जं ॥**

**एसेव य** इत्यादि गाथा । **एष एव** पूर्वोक्त **उपदेशो** यो [7]विवेका-ऽविवेकजनितः; तथा हि—सचेतनो विवेकी **प्रदीप्ते** सति **प्रपलायमानः** सुखमनुभवति । पथि विषये च सापाय-निरपायविवेकज्ञः, **आदि**ग्रहणाद् अन्यस्मिन् वा दस्युभयादौ समुपस्थिते सति यथा विवेकी सुखेनैव तमपायं परिहरन् सुखभाग् भवति; एवं श्रमणोऽपि भावतः सदा विवेकित्वाद् जाग्रदवस्थामनुभवन् समस्तकल्याणास्पदीभवति ॥२१५॥

अत्र च सुप्ताऽसुप्ताधिकारगाथाः—

**"जागरह नरा णिच्चं जागरमाणस्स वड्ढए बुद्धी ।**
**जो सुयइ न सो धण्णो जो जग्गइ सो सया धण्णो ॥ [निशी०भा०५३०३]**

---

टि० १. पि वट्टमाणो ख ज । वियट्टमाणो झ ञ ॥ २. मदिरया, मू० ख ॥ ३. ०केऽपि वर्तमानः ख ग ॥ ४. उ ञ ॥ ५. पवलाइ ख ज ठ । पवए य छ । पयलाइ झ ॥ ६. सूत्रम्—॥ छ ॥ ख छ ज । सूत्रः (त्रम्)-॥ तृतीयाध्ययने प्रथमोद्देशकः ॥ तृतीयाध्ययनम् ॥ झ । सूत्रम्—॥ सीओसणिज्जस्स णिज्जुत्ती ॥ छ ॥ ञ । सूत्रम्— ॥ तृ० अध्ययनम् ॥ ठ ॥ ७. विवेकजनितः ग ॥

**वि०टि०** ⊕ **प्राग्वदेव** इति सम्यक्त्वं न प्राप्नोति" जै०वि०प० ॥ Φ "**उपशमक** इति श्रेणिसमारम्भकः" जै०वि०प० ॥

**सुयइ सुयंतस्स सुयं संकियखलियं भवे पमत्तस्स ।**
**जागरमाणस्स सुयं थिरपरिचियमप्पमत्तस्स ॥ [ निशी०भा०५३०४ ]**
**नालस्सेण समं सोक्खं, न विज्जा सह निद्दया ।**
**न वेरग्गं पमादेण, नारंभेण दयालुया ॥ [ निशी०भा०५३०७ ]**
**जागरिया धम्मीणं आहम्मीणं तु सुत्तया सेया ।**
**वच्छाहिवभगिणीए अकहिंसु जिणो जयंतीए ॥ [ निशी०भा०५३०६ ]**
**सुयइ य अयगरभूओ सुयं पि से नासई अमयभूयं ।**
**होहीइ गोणभूओ नट्ठम्मि सुए अमयभूए ॥''**
**[ बृ०क०भा०३३८२-८७, निशी०भा०५३०३ ]**

तदेवं दर्शनावरणीयकर्मविपाकोदयेन क्वचित् स्वपन्नपि यः संविग्नो यतनावांश्च स दर्शनमोहनीयमहानिद्रापगमाद् जाग्रदवस्थ एवेति । ये तु सुप्ता तेऽज्ञानोदयाद् भवन्ति; अज्ञानं च महादुःखम्; दुःखं च जन्तूनां अहिताय इति दर्शयति—

**लोगंसि जाण अहियाय दुक्खं ।**

**समयं लोगस्स जाणित्ता एत्थ सत्थोवरते ॥१०६॥**

[1]**लोयंसि जाण** इत्यादि । **लोके** षड्जीवनिकाये **जानीहि**=[2]परिच्छिन्द्या [3]दुःख-हेतुत्वाद् **दुःखम्**=अज्ञानं मोहनीयं वा, तद् **अहिताय**=नरकादिभवव्यसनोपनिपाताय, इह वा बन्ध-[4]वध-शरीर-मनःपीडायै जायत इत्येतद् जानीहि । परिज्ञानाच्च एतत् फलं यदुत द्रव्य-भावस्वापाद् अज्ञानरूपाद् दुःखहेतोरपसर्पणमिति । किञ्च अन्यत्—

**समयमित्यादि** । **समयः** = आचारोऽनुष्ठानं, तं **लोकस्य** = असुमद्व्रातस्य **ज्ञात्वा** [5]**अत्र शस्त्रोपरतो** भवेद् इति उत्तरसूत्रेण सम्बन्धः । 'लोको हि भोगाभिलाषितया प्राण्युपमर्दादि-कषायहेतुकं कर्म्म उपादाय नरकादियातनास्थानेषु उत्पद्यते; ततः कथञ्चिद् [6]उद्वृत्त्य अवाप्य च अशेषक्लेशव्रातघ्नं धर्मकारणमार्यक्षेत्रादौ मनुष्यजन्म पुनरपि महामोहमोहितमतिः तत् तद् आरभते येन येनाऽधोऽधो व्रजति, संसारान्नोन्मज्जतीति अयं लोकाचारः, तं ज्ञात्वा । अथवा समभावः=**समता**, तां **ज्ञात्वा**, **लोकस्य** इति सप्तम्यर्थे षष्ठी, ततश्च अयमर्थः—लोके=जन्तुसमूहे समतां=समशत्रु-मित्रतां समात्म-परतां वा ज्ञात्वा ।

---

टि० १.लोगम्मि क ॥ २. **परिच्छिन्द्धि** ख ॥ ३. ख-घ-ङ पुस्तकेषु **दुःखहेतुत्वाद्** इति पाठो नोपलभ्यते ॥ ४. **०वध-शारीरपीडायै** ख । **०वध-शारीर-मानसपीडायै** च ॥ ५. **तत्र** ख ॥ ६. **उद्वर्त्त्यावाप्य** क घ ङ॥

यदि वा 'सर्वेऽपि एकेन्द्रियादयो जन्तवः सदा स्वोत्पत्तिस्थानरिरंसवो मरणभीरवः सुखेप्सवो दुःखद्विषः' इत्येवम्भूता[1] **समता**, तां **ज्ञात्वा** किं कुर्यात् ? इत्याह—

**एत्थ सत्थोवरए** । **अत्र**=अस्मिन् षट्कायलोके **शस्त्रात्** द्रव्य-भावभेदाद् **उपरतो** धर्मजागरणेन जागृहि । यदि वा यद् यत् संयमशस्त्रं प्राणातिपाताद्याश्रवद्वारं शब्दादिपञ्च-प्रकारकामगुणाभिष्वङ्गो वा तस्माद् य उपरतः स मुनिरिति ॥१०६॥ आह च—

**[सू०] जस्सिमे सद्दा य रूवा य गंधा य रसा य फासा य अभिसमण्णागता भवंति से आतवं नाणवं वेयवं धम्मवं बंभवं पण्णाणेहिं परिजाणति लोगं, मुणीति वच्चे धम्मविदु त्ति अंजू आवट्टसोए संगमभिजाणति ।**

**जेस्सिमे**[2] इत्यादि । **यस्य** मुनेः **इमे** प्रत्यात्मवेद्याः समस्तप्राणिगणेन्द्रिय-प्रवृत्तिविषयभूताः **शब्द-रूप-गन्ध-रस-स्पर्शा**[3] मनोज्ञेतरभेदभिन्नाः, **अभिसमन्वागताः** इति **अभिः**=आभिमुख्येन **सम्यक्**=इष्टा-ऽनिष्टावधारणतया **अनु** इति शब्दादिस्वरूपा-वगमात् पश्चात् **आगताः**=ज्ञाताः परिच्छिन्ना यस्य मुनेः **भवन्ति स लोकं जानातीति** सम्बन्धः । इदमुक्तं भवति— इष्टेषु न रागं उपयाति, नापि इतरेषु द्वेषम्; एतदेव अभिसमन्वागमनं तेषाम्, नान्यदिति । यदि वा इहैव शब्दादयो दुःखाय भवन्ति, आस्तां तावत् ⊕परलोक इति । उक्तं च—

> **"रक्तः शब्दे हरिणः, स्पर्शे नागो, रसे च वारिचरः ।**
> **कृपणपतङ्गो रूपे, भुजगो गन्धे ननु विनष्टः ॥**
> **पञ्चसु रक्ताः पञ्च विनष्टा यत्रागृहीतपरमार्थाः ।**
> **एकः पञ्चसु रक्तः प्रयाति भस्मान्ततामबुधः ॥"** [ ]

अथवा शब्दे Φ**पुष्पशालाद् भद्रा** ननाश, रूपे **अर्जुनकतस्करः**, गन्धे **गन्धप्रिय-कुमारः**, रसे **सौदासः**[4], स्पर्शे **सत्यकिः सुकुमारिका**पति वा **ललिताङ्गकः**; परत्र च नरकादियातनास्थानभयमिति । एवं शब्दादीन् उभयदुःखस्वभावान् अवगम्य यः परित्यजेद्

---

**टि०** १. **इत्येवम्भूतां समतां तां ज्ञात्वा** घ ङ ऋते ॥ २. **यस्सिमे** क ॥ ३. **०रूप-रस-गन्ध-स्पर्शा** ग ॥ ४. **सोदासः** क च ॥

**वि०टि०** ⊕ "**परलोक** इति समन्वागता भवन्तीति योगः" जै०वि०प० ॥ Φ "**पुष्पशालाद्** इति गायनात्" जै०वि०प० ॥

असौ कं [1]गुणमवाप्नुयात् ? इत्याह—

**से आयवं** इत्यादि । यो हि महामोहनिद्राऽऽवृते लोके दुःखमहिताय जानानो [2]लोकसमयदर्शी शस्त्रोपरतः सन् शब्दादीन् कामगुणान् दुःखैकहेतून् अभिसमन्वागच्छति ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया च प्रत्याचष्टे; **स** मुमुक्षुः **आत्मवान्** आत्मा ज्ञानादिकः अस्य अस्तीति आत्मवान् । शब्दादिपरित्यागेन हि आत्माऽनेन रक्षितो भवति, अन्यथा नारकैकेन्द्रियादिपाते सति आत्मकार्याऽकरणात् कुतोऽस्य आत्मेति । पाठान्तरं वा—**से आयवी नाणवी,** आत्मानं श्वभ्रादिपतनरक्षणद्वारेण वेत्तीति **आत्मवित्**; तथा ज्ञानं=यथावस्थितपदार्थपरिच्छेदकं वेत्तीति **ज्ञानवित्;** तथा वेद्यते जीवादिस्वरूपं अनेन इति वेदः **आचाराद्यागमः**, तं वेत्तीति **वेदवित्**; तथा दुर्गतिप्रसृतजन्तुधरणस्वभावं स्वर्गाऽपवर्गमार्गं धर्मं वेत्तीति **धर्मवित्;** एवं ब्रह्म=अशेषमलकलङ्कविकलयोगिशर्म वेत्तीति ⊕**ब्रह्मवित्,** यदि वा अष्टादशधा ब्रह्मेति; एवम्भूतश्चासौ प्रकर्षेण ज्ञायते ज्ञेयं यैस्तानि **प्रज्ञानानि** मत्यादीनि, तैः **लोकं**=यथावस्थितं जन्तुलोकं तदाधारं वा क्षेत्रं **जानाति**, परिच्छिनत्ति इत्युक्तं भवति । य एव शब्दादिविषयसङ्गस्य परिहर्ता स एव यथावस्थितलोकस्वरूपपरिच्छेदीति ।

यश्च अनन्तरगुणोपेतः स किं वाच्यः ? इत्यत आह—

**मुणी** इत्यादि । यो हि आत्मवान् ज्ञानवान् [3]वेदवान् धर्मवान् ब्रह्मवान् प्रज्ञानैः व्यस्तैः समस्तैः वा लोकं जानाति स **मुनिः वाच्यः**; मनुते मन्यते वा जगतस्त्रिकालावस्थां मुनिरिति कृत्वा । किञ्च—

**धम्म०** इत्यादि । धर्मं=चेतना-ऽचेतनद्रव्यस्वभावं श्रुत-चारित्ररूपं वा वेत्तीति **धर्मवित्; ऋजुः** इति ऋजोः ज्ञान-दर्शन-चारित्राख्यस्य मोक्षमार्गस्य अनुष्ठानाद् अकुटिलो यथावस्थितपदार्थस्वरूपपरिच्छेदाद् वा ऋजुः, सर्वोपाधिशुद्धोऽवक्र इति यावत् । तदेवं धर्मविद् ऋजुः मुनिः किम्भूतो भवति ? इत्याह—

**आवट्ट०** इत्यादि । भावावर्तः जन्म-जरा-मरण-रोग-शोक-व्यसनोपनिपातात्मकः संसार इति । उक्तं हि—

**"राग-द्वेषवशाविद्धं, मिथ्यादर्शनदुस्तरम् ।**
**जन्मावर्ते जगत् क्षिप्तं प्रमादाद्[4] भ्राम्यते भृशम् ॥"** [ ]

---

टि० १. गुणमाप्नुयात् ख ॥ २. लोके समयोपदशी( र्शी ) ग ॥ ३. वेद-धर्मवान् क ॥ ४. ०द् भ्रम्यते ग ॥

वि०टि० ⊕ "**ब्रह्मविद्** मलरहितः" जै०वि०प० ॥

भावश्रोतोऽपि शब्दादिकामगुणविषयाभिलाषः, आवर्तश्च श्रोतश्च=**आवर्त-श्रोतसी**, तयोः राग-द्वेषाभ्यां सम्बन्धः=**सङ्गः**, तम् **अभिजानाति**=आभिमुख्येन परिच्छिनत्ति, यथा— अयं सङ्ग आवर्त-श्रोतसोः कारणम् । जानानश्च परमार्थतः कोऽभिधीयते ?— योऽनर्थं ज्ञात्वा परिहरति । ततश्च अयमर्थः— संसारश्रोतःसङ्गं राग-द्वेषात्मकं ज्ञात्वा यः परिहरति स एव आवर्त-श्रोतसोः सङ्गस्य अभिज्ञाता ।

सुप्त-जाग्रतां दोष-गुण[1]परिच्छेदी कं गुणमवाप्नुयात् ? इत्याह—

## सीतोसिणच्चागी से णिग्गंथे अरति-रतिसहे फारुसियं णो वेदेति जागर-वेरोवरते वीरे ! एवं दुक्खा पमोक्खसि ॥१०७॥

**सीओसिण०** इत्यादि । सबाह्या-ऽभ्यन्तरग्रन्थरहितः सन् **शीतोष्णत्यागी** सुख-दुःखाऽनभिलाषुकः शीतोष्णरूपौ वा परीषहावतिसहमानः संयमा-[2]ऽसंयमा–ऽरति-रतिसहः सन् **परुषतां**=कर्कशतां पीडाकारितां परीषहाणामुपसर्गाणां वा कर्मक्षपणायोद्यतः साहाय्यं मन्यमानो **नो वेत्ति,** [3]न तां पीडाकारित्वेन गृह्णाति इत्युक्तं भवति । यदि वा संयमस्य तपसो वा **परुषतां** शरीरपीडोत्पादनात् [4]कर्ममलापनयनाद् वा संसारोद्विग्नमना मुमुक्षुर्निराबाध-[5]सुखोन्मुखः **न वेत्ति**, न संयम-तपसी पीडाकारित्वेन गृह्णातीति यावत् । किञ्च—

**जागर०** इत्यादि । असंयमनिद्रापगमाद् जागर्तीति **जागरः**, अभिमानसमुत्थः अमर्षविशः परापकाराध्यवसायो=वैरम्, तस्माद् उपरतः=**वैरोपरतः**, जागरश्चासौ वैरोपरतश्चेति विगृह्य कर्मधारयः; क एवम्भूतः ? [6]**वीरः** कर्मापनयनशक्त्युपेतः; एवम्भूतश्च त्वं [7]वीर ! आत्मानं परं वा **दुःखाद्** दुःखकारणाद् वा कर्मणः **[8]प्रमोक्ष्यसी**ति ॥१०७॥ यश्च यथोक्ताद् विपरीत आवर्त-श्रोतसोः सङ्गमुपगतः अजागरः स किमाप्नुयात् ? इत्याह—

## [सू० ] जरा-मच्चुवसोवणीते णरे सततं मूढे धम्मं णाभिजाणति ।

**जरा** इत्यादि । जरा च मृत्युश्च=**जरा-मृत्यू**, ताभ्यां आत्म**वशमुपनीतः नरः** =प्राणी **सततम्**=अनवरतं **मूढः**=महामोहमोहितमतिः **धर्मं**=स्वर्गा-ऽपवर्गमार्गं **नाभिजानीते** =नावगच्छति । तत् संसारे स्थानमेव नास्ति यत्र जरा-मृत्यू न स्तः । देवानां जराऽभाव इति चेत्, तन्न, तत्रापि उपान्तकाले लेश्या-बल-सुख-प्रभुत्व-वर्णहान्युपपत्तेः अस्त्येव तेषामपि

---

टि० १. ०**परिच्छेदे** घ ङ ॥ २. ०**ऽसंयमरत्यरतिसहः** ख-चप्रतिभ्यामृते ॥ ३. **न तान् पीडा०** ख-चपुस्तके विना ॥ ४. **कर्मलेपापनयनाद्वा** ख विना ॥ ५. ०**सुखोत्सुको न संयम०** ख । ०**सुखो न वेत्ति** ग ॥ ६. **धीरः** च ॥ ७. **धीर !** च ॥ ८. **प्रमोक्ष[ य ]सीति** क ॥

जरासद्भावः । उक्तं च—

"**देवा णं भंते ! सव्वे समवण्णा ? नो इणट्ठे समट्ठे । से केणट्ठेणं भंते ! एवं वुच्चइ ? गोयमा ! देवा दुविहा—पुव्वोववण्णगा[1] पच्छोववण्णगा य । तत्थ णं जे ते पुव्वोववण्णगा ते णं अविसुद्धवण्णयरा, जे णं पच्छोववण्णगा[2] ते णं विसुद्धवण्णयरा ।" [ प्रज्ञा०सू०१७।१।११४४ ]**

एवं लेश्याद्यपीति । च्यवनकाले तु सर्वस्यैव एतद् भवतीति, तद्यथा—

"**माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्री-ह्रीनाशो वाससां चोपरागः ।**
**दैन्यं तन्द्रा काम-रागा-ऽङ्गभङ्गो, दृष्टिभ्रान्तिर्वेपथुश्चारतिश्च[3] ॥"** [ ]

यतश्चैवं अतः सर्वं जरा-मृत्युवशोपनीतं अभिसमीक्ष्य किं कुर्यात् ? इत्याह—

**पासिय आतुरे पाणे अप्पमत्तो परिव्वए ।**

**पासिय** इत्यादि । स हि भावजागरः तैः तैः भावस्वापजनितैः शारीर-मानसैः दुःखैः **आतुरान्**=किङ्कर्तव्यतामूढान् दुःखसागरावगाढान् **प्राणान्** अभेदोपचारात् प्राणिनः **दृष्ट्वा**= ज्ञात्वा **अप्रमत्तः परिव्रजेत्**=उद्युक्तः सन् संयमानुष्ठानं विदध्यात् । अपि च—

**मंता एयं मतिमं पास,**

**आरंभजं दुक्खमिणं ति णच्चा,**

**मंता** इत्यादि । हे **मतिमन्** !=सश्रुतिक ! भावसुप्ता-ऽऽतुरान् **पश्य, मत्वा** च एतद् जाग्रत्-सुप्त—गुण-दोषाऽऽपादनं, मा स्वापमतिं कुरु । किञ्च—

**आरंभजमित्यादि** । आरम्भः=सावद्यक्रियानुष्ठानं[4], तस्माज्जातम्=**आरम्भजम्**; किं तत् ? **दुःखं** तत्कारणं वा कर्म; **इदमिति** प्रत्यक्षगोचरापन्नं अशेषारम्भप्रवृत्तप्राणिगणानुभूयमानं इति एतत् **ज्ञात्वा**=परिच्छिद्य निरारम्भो भूत्वा आत्महिते जागृहि ।

यस्तु विषय-कषायाऽऽच्छादितचेता भावशायी स किमाप्नुयात् ? इत्याह—

**मायी पमायी पुणरेति गब्भं ।**

**उवेहमाणो सद्द-रूवेसु अंजू माराभिसंकी मरणा पमुच्चति ॥१०८॥**

---

टि० १. **०गा य पच्छो०** घ । **०गा या पच्चोववण्णगा** ङ॥ २. **पच्चोववण्णगा** ङ॥ ३. **दृष्टिभ्रंशो वेपथु०** ख । **दृष्टिभ्रामो वेपथु०** ग च ॥ ४. **सावद्यानुष्ठानं** ख ॥

**माई** इत्यादि । मध्यग्रहणाच्च आद्यन्तयोः ग्रहणम्, तेन क्रोधादिकषायवान् मद्यादिप्रमादवान् नरकदुःखमनुभूय [1] **पुनः** तिर्यक्षु **गर्भमुपैति** । यस्तु अकषायी प्रमादरहितः स किम्भूतो भवति ? इत्याह—

**उवेह०** इत्यादि । बहुवचननिर्देशाद् आद्यर्थो गम्यते, **शब्द-रूपादिषु** यौ राग-द्वेषौ तौ **उपेक्षमाणः**=अकुर्वन् **ऋजुः** भवति [2] =यतिर्भवति । यतिरेव परमार्थत ऋजुः; अपरस्तु अन्यथाभूतस्त्र्यादिपदार्था [3] ऽन्यथाग्रहाद् वक्रः । किञ्च—स ऋजुः शब्दादीनुपेक्षमाणो मरणं=**मारः**, **तदभिशङ्की** मरणाद् उद्विजंस्तत् [4] तत् करोति येन **मरणात् प्रमुच्यते** ॥१०८॥

किं तत् करोति ? इत्याह—

**[ सू० ] अप्पमत्तो कामेहिं, उवरतो पावकम्मेहिं, वीरे आतगुत्ते खेयण्णे ।**

**अप्पमत्त०** इत्यादि । **कामैः** यः प्रमादः [5] तस्माद**प्रमत्तो** भवेत् । कश्चाप्रमत्तः स्यात् ? यः कामारम्भकेभ्यः पापेभ्य उपरतो भवति इति दर्शयति— **उवरओ** इत्यादि । **उपरतः** मनो-वाक्-कायैः, कुतः ? **पापोपादानकर्मभ्यः** । कोऽसौ ? [6] **वीरः**, किम्भूतः ? **गुप्तात्मा**, कश्च गुप्तो भवति ? यः **खेदज्ञः** । यश्च खेदज्ञः स कं गुणमवाप्नुयात् ? इत्याह—

**जे पज्जवजातसत्थस्स खेतण्णे से असत्थस्स खेतण्णे ।**

**जे असत्थस्स खेतण्णे से पज्जवजातसत्थस्स खेतण्णे ॥१०९॥**

**जे पज्जव०** इत्यादि । शब्दादीनां विषयाणां पर्यवाः=विशेषाः, तेषु तन्निमित्तं जातं शस्त्रं=**पर्यवजातशस्त्रं**, शब्दादिविशेषोपादानाय यत् प्राण्युपघातकारि अनुष्ठानं तत् पर्यवजातशस्त्रं [7] तस्य, **यः पर्यवजातशस्त्रस्य खेदज्ञः** = निपुणः **सः अशस्त्रस्य** = निरवद्यानुष्ठानरूपस्य [8] संयमस्य **खेदज्ञः**; **यश्च अशस्त्रस्य** [9] = संयमस्य **खेदज्ञः स पर्यवजातशस्त्रस्य खेदज्ञः** । इदमुक्तं भवति—यः शब्दादिपर्यायान् इष्टा-ऽनिष्टात्मकान् तत्प्राप्तिपरिहारानुष्ठानं च शस्त्रभूतं वेत्ति सोऽनुपघातकत्वात् संयममपि अशस्त्रभूतं आत्म-परोपकारिणं वेत्ति; शस्त्रा-ऽशस्त्रे [10] च जानानस्तत्प्राप्ति-परिहारौ[?स्तत्परिहार-प्राप्ती] विधत्ते, एतत्फलत्वाद् ज्ञानस्येति ।

---

टि० १. **नारकं दुःख०** ख । **नरकं दुःख०** च ॥ २. **०ति यतिरेव** क ग च ॥ ३. **०पदार्थग्रहणाद्** ख । **०पदार्थान्यथाग्रहणाद्** ग घ ङ च ॥ ४. **०स्तत् करोति** ख विना ॥ ५. **तत्राप्रमत्तो** कआदर्शादृते ॥ ६. **धीरः** च ॥ ७. **०शस्त्रम् । तस्य यः खेदज्ञः** क ग च । **०शस्त्रम् । यः पर्यव०** ख ॥ ८. **०स्य खेदज्ञः** ख घ ॥ ९. **०स्य खेदज्ञः** ख ॥ १०. **०ऽशस्त्रे विजानान०** ख ॥

यदि वा शब्दादिपर्यायेभ्यः तज्जनितराग-द्वेषपर्यायेभ्यो वा जातं यद् ज्ञानावरणीयादि कर्म, तस्य यत् शस्त्रं दाहकत्वात् तपः, तस्य[1] **यः खेदज्ञः** स्तज्ज्ञानानुष्ठानतः, **सः अशस्त्रस्य**= संयमस्यापि **खेदज्ञः**, पूर्वोक्तादेव हेतोः; हेतु-हेतुमद्भावाच्च **योऽशस्त्रस्य**[2] **खेदज्ञः स पर्यवजातशस्त्रस्या**पि **खेदज्ञ** इति ॥१०९॥

तस्य च संयम-तपःखेदज्ञस्य आश्रवनिरोधाद् अनादिभवोपात्तकर्मक्षयः; कर्मक्षयाच्च यद् भवति तदुपदिशति[3]–

**[ सू० ] अकम्मस्स ववहारो ण विज्जति ।**

**कम्मुणा उवाधि जायति ॥११०॥**

**अकम्मस्स** इत्यादि । न विद्यते[4] कर्म अष्टप्रकारं अस्य इति **अकर्मा**, तस्य **व्यवहारो न विद्यते** नासौ नारक-तिर्यङ्-नरा-ऽमर-पर्याप्तका-ऽपर्याप्तक-बाल-कुमारादिसंसारि[5]व्यपदेशभाग् भवति । यश्च सकर्मा स नारकादिव्यपदेशेन व्यपदिश्यत इत्याह–

**कम्मुणा** इत्यादि । उपाधीयते=व्यपदिश्यते येनेति उपाधिः विशेषणं, स **उपाधिः कर्मणा** ज्ञानावरणीयादिना **जायते**; तद्यथा– मति-श्रुता-ऽवधि-मनःपर्यायवान् मन्द-मतिस्तीक्ष्णो वेत्यादि; चक्षुर्दर्शनी अचक्षुर्दर्शनी निद्रालुरित्यादि; सुखी दुःखी वेति; मिथ्यादृष्टिः सम्यग्दृष्टिः सम्यग्मिथ्यादृष्टिः स्त्री पुमान् नपुंसकः कषायीत्यादि; सोपक्रमा-युष्को निरुपक्रमायुष्कोऽल्पायुरित्यादि; नारकस्तिर्यग्योनिरेकेन्द्रियो[6] द्वीन्द्रियः पर्याप्तको-ऽपर्याप्तकः सुभगो दुर्भग इत्यादि; उच्चैर्गोत्रो नीचैर्गोत्रो वेति; कृपणस्त्यागी निरुपभोगो निर्वीर्य इत्येवं कर्मणा संसारी व्यपदिश्यते ॥११०॥

यदि नामैवं ततः किं कर्तव्यम् ? इत्याह–

**[ सू० ] कम्मं च पडिलेहाए कम्ममूलं च जं छणं,**

**कम्मं च** इत्यादि । **कर्म** ज्ञानावरणीयादि, तत् **प्रत्युपेक्ष्य**[7] बन्धं वा प्रकृति-स्थिति-अनुभाव-प्रदेशात्मकं पर्यालोच्य, तत्सत्ताविपाकापन्नाश्च[8] प्राणिनो यथा भावनिद्रया शेरते तथा अवगम्य अकर्मतोपाये भावजागरणे यतितव्यमिति ।

---

टि० १. **तस्य शस्त्रस्य खेदज्ञ०** ख ॥ २. **योऽशस्त्रस्यापि खेदज्ञः** घ ॥ ३. **तदप्यतिदिशति** ख च ऋते ॥ ४. **०तेऽस्याष्टप्रकारं कर्मेत्यकर्मा** ख च ॥ ५. **०संसारव्यप०** ख ग ॥ ६. **०स्तिर्यग्योन एकेन्द्रियो** ख च । **०स्तिर्यग्योनिक एकेन्द्रियो** घ ङ ॥ ७. **०क्ष्य कर्मबन्धं वा** ख ॥ ८. **०विपाकापन्नांश्च** ग-चप्रती विना ॥

तदभावश्च अनेन प्रक्रमेण भवति, तद्यथा— अष्टविधसत्कर्मा अपूर्वादिकरणक्षपकश्रेणिप्रक्रमेण मोहनीयक्षयं विधाय अन्तर्मुहूर्तमजघन्योत्कृष्टं कालं सप्तविधसत्कर्मा । ततः शेषघातित्रये क्षीणे चतुर्विधभवोपग्राहिसत्कर्मा जघन्यतोऽन्तर्मुहूर्तं उत्कृष्टतो देशोनां पूर्वकोटिं यावत् । पुनरूर्ध्वं पञ्चह्रस्वाक्षरोद्गिरणकालीयां शैलेश्यवस्थामनुभूय अकर्मा भवति । साम्प्रतं उत्तरप्रकृतीनां सदसत्कर्मताविधानं उच्यते—

तत्र ज्ञानावरणीया-ऽन्तराययोः प्रत्येकं उपात्तपञ्चभेदयोः चतुर्दशस्वपि जीवस्थानकेषु गुणस्थानकेषु [1]च मिथ्यादृष्टेरारभ्य केवलिगुणस्थानाद् आरतोऽपरविकल्पाभावात् पञ्चविधसत्कर्मता ।

दर्शनावरणस्य त्रीणि सत्कर्मतास्थानानि, तद्यथा—नवविधं निद्रापञ्चकदर्शनचतुष्टयसमन्वयात्, एतत् सर्वजीवस्थानानुयायि, गुणस्थानेष्वपि अनिवृत्तिबादरकालसङ्ख्येयभागान् यावत् १, ततः कतिचित् सङ्ख्येयभागावसाने स्त्यानर्द्धित्रयक्षयात् षट्सत्कर्मतास्थानम् २, ततः क्षीणकषायद्विचरमसमये निद्रा-प्रचलाद्वयक्षयात् चतुःसत्कर्मतास्थानम्, तस्यापि क्षयः क्षीणकषायकालान्त इति ३।

वेदनीयस्य द्वे सत्कर्मतास्थाने, तद्यथा— द्वे अपि साता-ऽसाते इति एकम्, अन्यतरोदयारूढशैलेश्यवस्थेतरद्विचरमक्षणक्षये सति सातमसातं वा कर्मेति द्वितीयम् ।

मोहनीयस्य पञ्चदश सत्कर्मतास्थानानि, तद्यथा— षोडशकषाय-नवनोकषायदर्शनत्रये सति सम्यग्दृष्टेरष्टाविंशतिः १, सम्यक्त्वोद्वलने सम्यग्मिथ्यादृष्टेः सप्तविंशतिः २, दर्शन-द्वयोद्वलने [2]सम्यग्(?) मिथ्यादृष्टेः अनादिमिथ्यादृष्टेर्वा षड्विंशतिः ३, सम्यग्दृष्टेरष्टाविंशतिसत्कर्मणोऽनन्तानुबन्ध्युद्वलने क्षपणे वा चतुर्विंशतिः ४, मिथ्यात्वक्षये त्रयोविंशतिः ५, सम्यग्मिथ्यात्वक्षये द्वाविंशतिः ६, क्षायिकसम्यग्दृष्टेरेकविंशतिः ७, अप्रत्याख्यान-प्रत्याख्यानावरणक्षये त्रयोदश ८, अन्यतरवेदक्षये द्वादश ९, द्वितीयवेदक्षये सत्येकादश १०, हास्यादिषट्कक्षये पञ्च ११, [3]स्ववेदाभावे चत्वारि १२, सञ्ज्वलनक्रोधक्षये त्रयः १३, सञ्ज्वलनमानक्षये द्वौ १४, सञ्ज्वलनमायाक्षये सति एको लोभः १५, तत्क्षये च मोहनीयाऽसत्ता इति ।

आयुषो द्वे सत्कर्मतास्थाने[4] सामान्येन, तद्यथा— परभवायुष्कबन्धोत्तरकालं आयुष्क[5]द्वयमेकम्; द्वितीयं तु तद्बन्धाभाव इति ।

नाम्नो द्वादश सत्कर्मतास्थानानि, तद्यथा—त्रिनवतिः ९३, द्विनवतिः ९२,

---

टि० १. तु ग ॥ २. ०नेऽनादिमिथ्या० क ग घ च ॥ ३. पुंवेदाभावे ख च । वेदाभावे ग ॥ ४. ०ने । तद्यथा घ ङ॥ ५. ०द्वये एकम् ङ॥

एकोननवतिः ८९, अष्टाशीतिः ८८, षडशीतिः ८६, अशीतिः ८०, एकोनाशीतिः ७९, अष्टसप्ततिः ७८, षट्सप्ततिः ७६, पञ्चसप्ततिः ७५, नव ९, अष्टौ चेति ८। तत्र त्रिनवतिः—गतयश्चतस्रः ४, पञ्च जातयः ५, पञ्चशरीराणि ५, पञ्च सङ्घाताः ५, बन्धनानि पञ्च ५, संस्थानानि षट् ६, अङ्गोपाङ्गत्रयम् ३, संहननानि षट् ६, वर्णपञ्चकं ५, गन्धद्वयं २, रसाः पञ्च ५, अष्टौ स्पर्शाः ८, आनुपूर्वीचतुष्टयं ४, अगुरुलघु-उपघात-पराघात-उच्छ्वासाऽऽतप-उद्द्योताः षट् ६, प्रशस्तेतरविहायोगतिद्वयं २, प्रत्येकशरीर-त्रस-शुभ-सुभग-सुस्वर-सूक्ष्म-पर्याप्तक-स्थिरा-ऽऽदेय-यशांसि सेतराणीति विंशतिः २०,[१] निर्माणम्, तीर्थकरत्वमिति एवं सर्वसमुदाये त्रिनवतिर्भवति ९३, तीर्थकरनामाऽभावे द्विनवतिः ९२, त्रिनवतेः आहारकशरीर-सङ्घात-बन्धना-ऽङ्गोपाङ्गचतुष्टयाभावे सति एकोननवतिः ८९, ततोऽपि तीर्थकरनामाऽभावेऽष्टाशीतिः ८८, देवगति-तदानुपूर्वीद्वयोद्वलने षडशीतिः ८६, यदि वा अशीतिसत्कर्मणो नरकगतिप्रायोग्यं बध्नतः तद्गत्यानुपूर्वीद्वय-वैक्रियचतुष्क-बन्धकस्य षडशीतिः, देवगतिप्रायोग्यबन्धकस्य वेति। ततो नरकगत्यानुपूर्वीद्वय-वैक्रियचतुष्टयोद्वलने अशीतिः ८० । पुनः मनुष्यगत्यानुपूर्वीद्वयोद्वलने अष्टसप्ततिः ७८ । एतानि अक्षपकाणां [२]सत्कर्मतास्थानानि; क्षपकश्रेण्यन्तर्गतानां तु प्रोच्यन्ते, तद्यथा—

त्रिनवतेः नरक-तिर्यग्गति-तदानुपूर्वीद्वय-एक-द्वि-त्रि-चतुरिन्द्रियजाति-आतप-उद्द्योत-स्थावर-सूक्ष्म-साधारणरूपैः नरक-तिर्यग्गतिप्रायोग्यैः त्रयोदशभिः कर्मभिः क्षपितः अशीतिः भवति । द्विनवतेः तु एभिः त्रयोदशभिः क्षपितैः एकोनाशीतिः । या असौ आहारकचतुष्टयापगमेन एकोननवतिः सञ्जाता ततः त्रयोदशनाम्नि क्षपिते षट्सप्ततिः[३] भवति । तीर्थकरनामाभावापादिता अष्टाशीतिः । त्रयोदशनामाभावे पञ्चसप्ततिः । साऽपि तीर्थकरकेवलिशैलेश्यापन्नद्विचरमसमये तीर्थकरनाम्नः प्रक्षेपाद् वेद्यमाननवकर्मप्रकृति-व्युदासेन [४]क्षयमुपगच्छति इत्यतः अन्त्यसमये नवसत्कर्मतास्थानम् । ताश्च वेद्यमाना नवेमाः, तद्यथा—मनुजगति-पञ्चेन्द्रियजाति-त्रस-बादर-पर्याप्तक-सुभगा-ऽऽदेय-यशःकीर्ति-तीर्थकररूपाः, एता एव [५]शैलेश्यन्तसमये सत्तां बिभ्रति; शेषास्तु एकसप्ततिः सप्तषष्टिर्वा द्विचरमसमये क्षयमुपयान्ति; एता एव नव अतीर्थकरकेवलिनस्तीर्थकरनामरहिता अष्टौ भवन्ति, अतः अन्त्यसमये अष्टसत्कर्मतास्थानमिति ।

सामान्येन गोत्रस्य द्वे सत्कर्मतास्थाने, तद्यथा— उच्च-नीच[१]गोत्रसद्भावे सत्येकं

---

टि० १. **द्विनवतिर्भवति ९२** ग ॥ २. **सत्कर्मस्थानानि** ख ॥ ३. **तिः । तत्राशीतेः षट्सप्ततेर्वा तीर्थकर०** क-खपुस्तके ऋते ॥ ४. **क्षयमुपगते शेषनाम्नि अन्त्यसमये** क-खप्रतिभ्यामृते ॥ ५. **०न्ति; एवं नव** क ॥

सत्कर्मतास्थानम्, तेजो-वायूच्चैर्गोत्रोद्वलने कालङ्कलीभावावस्थायां नीचैर्गोत्रसत्कर्मतेति द्वितीयम्, यदि वा अयोगिद्विचरमसमये नीचैर्गोत्रक्षये सति उच्चैर्गोत्रसत्कर्मता, एवं द्विरूप-गोत्रावस्थाने सत्येकं सत्कर्मतास्थानम्, अन्यतरगोत्रसद्भावे[1] सति द्वितीयमिति ।

एवं कर्म प्रत्युपेक्ष्य[2] तत्सत्तापगमे यतिना यतितव्यमिति । किञ्च—

**कम्म०** इत्यादि । कर्मणो मूलं=कारणं मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगाः, **चः** समुच्चये, **कर्ममूलं च** प्रत्युपेक्ष्य **यत् क्षणम्** इति "क्षणु हिंसायाम्" [**पा०धा०१४६६**] क्षणनं=हिंसनं, यत् किमपि प्राण्युपघातकारि तत् कर्ममूलतया प्रत्युपेक्ष्य परित्यजेत् ।

पाठान्तरं वा— **'कम्ममाहूय जं छणं'** य उपादानक्षणः अस्य कर्मणः [3]तद्, **यत्** [4]**क्षणं कर्म आहूय**=कर्म्म उपादाय तत्क्षणमेव निवृत्तिं कुर्यात् । इदमुक्तं भवति— अज्ञान-प्रमादादिना यस्मिन्नेव क्षणे कर्महेतुकं अनुष्ठानं कुर्यात् तस्मिन्नेव क्षणे लब्धचेतास्तदुपादान-हेतोर्निवृत्तिं विदध्यादिति । पुनरपि उपदेशदानाय आह—

**पडिलेहिय सव्वं समायाय दोहिं अंतेहिं अदिस्समाणे तं परिण्णाय मेधावी विदित्ता लोगं वंता लोगसण्णं से मतिमं परक्कमेज्जासि त्ति बेमि ॥१११॥**

**॥ सीओसणिज्जस्स पढमो उद्देसओ सम्मत्तो ॥**

**पडिलेहिय** इत्यादि । **प्रत्युपेक्ष्य** पूर्वोक्तं कर्म तद्विपक्षमुपदेशं च, **सर्वं समादाय**=गृहीत्वा, ⊕अन्तहेतुत्वाद् **अन्तौ**=राग-द्वेषौ, ताभ्यां सह **अदृश्यमानः** ताभ्यां अनपदिश्यमानो वा, **तत्** कर्म तदुपादानं वा रागादिकं, ज्ञपरिज्ञया **परिज्ञाय** प्रत्याख्यानपरिज्ञया च परिहरेदिति । रागादिमोहितं **लोकं** [5]विषय-कषायलोकं वा ज्ञात्वा, **वान्त्वा** च **लोकसञ्ज्ञां** विषयपिपासासञ्ज्ञितां [6]धनाद्याग्रहग्रहरूपां वा, **स मेधावी**=मर्यादाव्यवस्थितः सन् **पराक्रमेत**=संयमानुष्ठाने उद्युक्तो भवेत्, विषयपिपासां अरिषड्वर्गं वा अष्टप्रकारं वा कर्म्म अवष्टभ्यात्, **इतिः** परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥१११॥

**॥ इति शीतोष्णीया[7]ध्ययनप्रथमोद्देशकटीका समाप्ता ॥ छ ॥**

---

टि० १. ०**गोत्रद्वयसद्भावे** ख च ॥ २. ०**क्ष्य सत्तापगमे** क । ०**क्ष्य तत्सत्तापगमाय यतिना** ग ॥ ३. **तत् क्षणं** च ॥ ४. **क्षणमाहूय कर्मो०** ख ॥ ५. **विषय-कषायादिकं वा ज्ञात्वा** ख । **विषयलोकं** क ॥ ६. **धनायाग्रहग्रहरूपां** क ग घ । **धनायाग्रहरूपां** ङ च ॥ ७. ०**ध्ययनस्य प्रथमोद्देशकटीका परिसमाप्तेति ॥ छ ॥** ख ॥

वि०टि० ⊕ "**अन्तहेतुत्वाद्** इ[ति] सुगतिविनाशकत्वात्" जै०वि०प० ॥

## ॥ द्वितीय उद्देशकः ॥

उक्तः प्रथमोद्देशकः । साम्प्रतं द्वितीय आरभ्यते । अस्य च अयमभिसम्बन्धः– पूर्वोद्देशके भावसुप्ताः प्रदर्शिताः; इह तु तेषां स्वापविपाकफलमसातमुच्यते इति । अनेन सम्बन्धेन आयातस्य अस्य सूत्रानुगमे सूत्रमुच्चारयितव्यम्, तच्चेदम्–

**[ सू० ]** **जातिं च वुड्ढिं च इहऽज्ज पास,**
**भूतेहिं जाण पडिलेह सातं ।**
**तम्हाऽतिविज्जं परमं ति णच्चा**
**सम्मत्तदंसी ण करेति पावं ॥११२(४)॥**

**जाइं च** इत्यादि[1] वृत्तम् । **जातिः** = प्रसूतिः, ⊕बाल-कुमार-यौवन-वृद्धावस्थावसाना **वृद्धिः, इह** मनुष्यलोके संसारे वा, **अद्यैव** कालक्षेपमन्तरेण, **जातिं च वृद्धिं च पश्य** =अवलोकय । इदमुक्तं भवति– जायमानस्य यद् दुःखं वृद्धावस्थायां च यत् शारीर-मानसमुत्पद्यते तद् विवेकचक्षुषा पश्य । उक्तं च–

**''जायमाणस्स जं दुक्खं, मरमाणस्स जंतुणो ।**
**तेण दुक्खेण संतत्तो, न सरइ जाइमप्पणो ॥''[ महानिशी०५।११७ ]**
**''विरसरसियं रसंतो तो सो जोणीमुहाउ निप्फिडइ ।**
**माऊए अप्पणो वि य वेयणमतुलं जणेमाणो ॥''[ तन्दु०वैचा०प्रकी०३९-४० ]**
तथा– **''हीण-भिण्णसरो दीणो, विवरीओ विचित्तओ ।**
**दुब्बलो दुक्खिओ वसइ, संपत्तो[2] दसमिं दसं ॥'' [ तन्दु०वैचा०प्रकी०५५ ]**
इत्यादि ।

अथवा **आर्य** इति आमन्त्रणम्, भगवान् **गौतमं** आमन्त्रयति– **इह आर्य ! जातिं वृद्धिं च** तत्कारणं कर्म कार्यं च दुःखं **पश्य**, दृष्ट्वा अवबुध्यस्व, यथा च जात्यादिकं न स्यात् तथा विधत्स्व । किञ्च अपरम्–

**भूएहिमि**त्यादि । भूतानि=चतुर्दशभूतग्रामाः, तैः समं आत्मनः **सातं**=सुखं **प्रत्युपेक्ष्य** पर्यालोच्य **जानीहि**[3]–'यथा त्वं सुखप्रिय एवमन्येऽपीति; यथा वा[4] त्वं दुःखद्विड्

---

**टि०** १. ०दि **सूत्रम् । जातिः** च ॥ २. **०त्तो चरिमं दसं** ख विना ॥ ३. **जानीहि । तथा हि–यथा** च ॥ ४. **वा** इति खप्रतौ नास्ति । **च** ग घ ङ च ॥

**वि०टि०** ⊕ ''बाल-कुमारादि अवस्था १०'' स०वि०प० ॥

एवमन्येऽपि जन्तवः' । एवं मत्वा अन्येषां असातोत्पादनं न विदध्याः, एवं च जन्मादिदुःखं न प्राप्स्यसीति । उक्तं च—

**''यथेष्टविषयाः सातमनिष्टा इतरत् तव ।**
**अन्यत्रापि विदित्वैवं, न कुर्यादप्रियं जने ॥''** [ ]

यद्येवं ततः किम् ? इत्याह—

**तम्हा** इत्यादि । **तस्मात्** जाति-वृद्धि-सुख-दुःखदर्शनात्, अतीव विद्या= तत्त्वपरिच्छेत्री यस्य असौ=**अतिविद्यः**, सः **परमं** मोक्षं ज्ञानादिकं वा तन्मार्गं **ज्ञात्वा सम्यक्त्वदर्शी** सन् **पापं न करोति**, सावद्यमनुष्ठानं न विदधाति इत्युक्तं भवति ॥ ११२(४)॥

पापस्य च मूलं स्नेहपाशाः; तदपनोदार्थमाह—

[ सू० ] **उम्मुंच पासं इह मच्चिएहिं,**
**आरंभजीवी उभयाणुपस्सी ।**
**कामेसु गिद्धा णिचयं करेंति,**
**संसिच्चमाणा पुणरेंति गब्भं ॥११३(५)॥**

**उम्मुंच**[1] इत्यादि वृत्तम् । **इह** मनुष्यलोके चतुर्विधकेषाय[2]-विषयविमोक्षक्षमाधारे **मर्त्यैः** सार्धं द्रव्य-भावभेदभिन्नं **पाशं उत्**=प्राबल्येन **मुञ्च**=अपाकुरु । स हि कामभोगलालसः तदादानहेतोः हिंसादीनि पापानि आरभते, अतोऽपदिश्यते—

**आरंभ०** इत्यादि । आरम्भेण[3] जीवितुं शीलमस्य इति **आरम्भजीवी** महारम्भ-परिग्रहप्रकल्पितजीवनोपायः[4], **उभयं** शारीर-मानसं ऐहिका-ऽऽमुष्मिकं वा **द्रष्टुं** शीलमस्य इति स तथा । किञ्च—

**कामेसु** इत्यादि । **कामाः** इच्छा-मदनरूपाः, तेषु **गृद्धाः**=अध्युपपन्ना **निचयं** =कर्मोपचयं **कुर्वन्ति** । यदि नामैवं ततः किम् ? इत्याह— **संसिच्च०** इत्यादि । तेन कामोपादानजनितेन कर्मणा **संसिच्यमानाः**=आपूर्यमाणा गर्भाद् गर्भान्तरमुपयान्ति, संसारचक्रवाले अरघट्टघटीयन्त्रन्यायेन पर्यटन्ते आसत इत्युक्तं भवति ॥११३(५)॥

तदेवं अनिभृतात्मा किम्भूतो भवति ? इत्याह—

[ सू० ] **अवि से हासमासज्ज, हंता णंदीति मण्णति ।**
**अलं बालस्स संगेणं, वेरं वड्ढेति अप्पणो ॥११४(६)॥**

---

टि० १. **उम्मुच्च** ख च ॥ २. **०कषायविमोक्ष०** च ॥ ३. **आरम्भे जीवितुं** क ॥ ४. **०पायः स उभयं शा०** च । **०पायं, भयं शा०** आचा०शु० ॥

**अवि से** इत्यादि श्लोकः । ह्री-भयादिनिमित्तः चेतोविप्लवो **हासः**, तम् **आसाद्य**=अङ्गीकृत्य स कामगृध्नुः **हत्वा**ऽपि प्राणिनः **नन्दीति** क्रीडेति **मन्यते** । वदति च महामोहा-[१]वृतशुभाध्यवसायो यथा– 'एते पशवो मृगयार्थं सृष्टाः; मृगया च सुखिनां क्रीडायै भवति' इति; एवं मृषावादा-ऽदत्तादानादिष्वपि आयोज्यम् । यदि नामैवं ततः किम् ? इत्याह–

**अलमित्यादि** । **अलं**=पर्याप्तं, **बालस्य**=अज्ञस्य, यः प्राणातिपातादिरूपः **सङ्गो** विषय-कषायादिमयो वा, तेन अलम्, [बालस्य हास्यादिसङ्गेन अलम्]। किम् ? इति चेद्, उच्यते–

**वेरमित्यादि** । पुरुषादिवधसमुत्थं **वैरम्**, तद् बालसङ्गानुषङ्गी सन् **आत्मनो वर्धयति**, तद्यथा–**गुणसेनेन** हास्यानुषङ्गाद् **अग्निशर्माणं** नानाविधैः उपायैः उपहसता नवभवानुषङ्गिकं वैरं वर्धितम्; एवमन्यत्रापि विषयसङ्गादौ आयोज्यम् ॥११४(६)॥

यतश्चैवं अतः किम् ? इत्याह–

[ सू० ] **तम्हाऽतिविज्जं परमं ति णच्चा,**
**आयंकदंसी ण करेति पावं ।**
**अग्गं च मूलं च विगिंच धीरे,**
**पलिछिंदियाणं णिक्कम्मदंसी ॥११५(७)॥**

**तम्हा** इत्यादि वृत्तम् । यस्माद् बालसङ्गिनो वैरं वर्धते **तस्माद् अतिविद्वान् परमं** मोक्षपदं सर्वसंवररूपं चारित्रं वा सम्यग्ज्ञानं सम्यग्दर्शनं वा, 'एतत् परमं' **इति ज्ञात्वा** किं करोति ? इत्याह–

**आयंक०** इत्यादि । आतङ्कः = नरकादिदुःखम्, तद् द्रष्टुं शीलमस्य इति **आतङ्कदर्शी**, स **पापं** पापानुबन्धि कर्म **न करोति**, उपलक्षणार्थत्वाद् न कारयति नानुमन्यते च। पुनरपि उपदेशदानाय आह–

**अग्गं च** इत्यादि । **अग्रं** भवोपग्राहिकर्मचतुष्टयम्; **मूलं** घातिकर्मचतुष्टयम्। यदि वा मोहनीयं मूलम्; शेषाणि त्वग्रम् । यदि वा मिथ्यात्वं मूलम्; शेषं त्वग्रम् । तदेवं सर्वमग्रं मूलं च **विगिंच** इति त्यज अपनय पृथक्कुरु । तदनेन इदमुक्तं भवति– न कर्मणः पौद्गलिकस्य आत्यन्तिकः क्षयः, अपि त्वात्मनः पृथक्करणम् । कथं मोहनीयस्य मिथ्यात्वस्य [२]वा मूलत्वं इति चेत्, तद्वशात् शेषप्रकृतिबन्धः, यत उक्तम्–

---

टि० १. ०वृता( त )शुभा० क च । ०वृतोऽशुभा० ख घ ङ ॥ २. च च ॥

**"न मोहमतिवृत्य बन्ध उदितस्त्वया कर्मणां,**
**न चैकविधबन्धनं प्रकृतिबन्धविभवो महान् ।**
**अनादिभवहेतुरेष न च बध्यते नासकृत्,**
**त्वयाऽतिकुटिला गतिः कुशल ! कर्मणां दर्शिता ॥"** [ सिध्ध०द्वात्रिं०द्वात्रिं०३/२९ ]

तथा च **आगमः**—

**"कहन्नं भंते ! जीवा अट्ठ कम्मपगडीओ बंधंति ? गोयमा ! [1]णाणावरणिज्जस्स उदएणं दरिसणावरणिज्जं कम्मं नियच्छति, दरिसणावरणिज्जस्स कम्मस्स उदएणं दंसण[2]मोहणीयं कम्मं नियच्छति, दंसणमोहणिज्जस्स कम्मस्स उदएणं मिच्छत्तं नियच्छइ, मिच्छत्तेणं [3]उदिण्णेणं एवं खलु जीवे अट्ठ कम्मपगडीओ बंधति ।"**
[ प्रज्ञा०सू०२३/१६६७ ]

क्षयोऽपि मोहनीयक्षयाविनाभावी, उक्तं च—

**"णायगम्मि हते संते, जहा सेणा विणस्सति ।**
**एवं कम्मा विणस्संति, मोहणिज्जे खयं गए ॥"** [        ] इत्यादि ।

अथवा मूलं असंयमः कर्म वा, अग्रं संयम-तपसी मोक्षो वा । ते मूला-ऽग्रे **धीरः** अक्षोभ्यो धीविराजितो वा विवेकेन[4] सुख-दुःखकारणतया अवधारय । किञ्च—

[5]**पलिछिंदियाणं** इत्यादि । तपः-संयमाभ्यां [6]रागादीनि बन्धनानि तत्कार्याणि वा कर्माणि छित्त्वा **निष्कर्मदर्शी** भवति, निष्कर्माणं आत्मानं पश्यति, तच्छीलश्च निष्कर्मत्वाद् वा अपगतावरणः सर्वदर्शी सर्वज्ञानी च भवति ॥११५(७)॥

यश्च निष्कर्मदर्शी भवति सोऽपरं किमाप्नुयात् ? इत्याह—

## [ सू० ] एस मरणा पमुच्चति, से हु दिट्ठभये मुणी ।

**एस** इत्यादि । **एष** इति अनन्तरोक्तो [7]मूला-ऽग्रविवेचको निष्कर्मदर्शी **मरणात्** आयुःक्षयलक्षणाद् **मुच्यते,** आयुषो बन्धनाऽभावात् । यदि वा आजवञ्जवीभावाद् आवीचीमरणाद् वा, सर्व एव संसारो मरणम्, तस्मात् **प्रमुच्यते** । यश्चैवं स किम्भूतो भवति ? इत्याह—

---

टि० १. णाणावरणिज्जस्सोदएणं दंसणावरणस्स (०वरणं) कम्मं नियच्छइ । दंसणावरणिज्जस्सोदएणं दंसणमोहणिज्जं कम्मं ख ॥ २. ०मोहणिज्जकम्मं च ॥ ३. उदिण्णे खलु ख ॥ ४. ०न दुःख-सुखकरण० ख विना ॥ ५. पलिच्छिंदिया क ख ॥ ६. रागादिनिबन्धनानि झअव० ॥ ७. मूला-ऽग्रेचको कआदर्शमृते ॥

**से हु** इत्यादि । **सः** अनन्तरोक्तो **मुनिः दृष्टं** [१]संसाराद् **भयं** सप्तप्रकारं वा येन स तथा, **हुः** अवधारणे, दृष्टभय एव । किञ्च–

**लोगंसि परमदंसी विवित्तजीवी उवसंते समिते सहिते सदा जते कालकंखी परिव्वए ।**

**लोयंसि** इत्यादि । **लोके** द्रव्याधारे चतुर्दशभूतग्रामात्मके वा, परमः मोक्षः तत्कारणं वा संयमः, तं द्रष्टुं शीलमस्य इति **परमदर्शी**; तथा विविक्तं स्त्री-पशु-पण्डक-समन्वितशय्यादिरहितं द्रव्यतः, भावतस्तु राग-द्वेषरहितं असङ्क्लिष्टं जीवितुं शीलमस्य इति **विविक्तजीवी** । यश्चैवम्भूतः स इन्द्रिय-नोइन्द्रियोपशमाद् **उपशान्तः**; यश्च उपशान्तः स पञ्चभिः समितिभिः सम्यग् वा इतः=गतो मोक्षमार्गे **समितः**; यश्चैवं स ज्ञानादिभिः **सहितः** =समन्वितः; यश्च ज्ञानादिसहितः [२]से **सदा यतः**=अप्रमादी; किमवधिश्च अयमनन्तरोक्तो गुणोपन्यासः ? इत्याह–

**काल०** इत्यादि । [३]कालः=मृत्युकालः, तं आकाङ्क्षितुं शीलमस्य इति **कालाकाङ्क्षी**; स एवम्भूतः परिः=समन्ताद् व्रजेत्=**परिव्रजेत्**, यावत् पर्यायागतं पण्डित[४]मरणं तदाकाङ्क्षमाणो विविक्तजीवित्वादिगुणोपेतः संयमानुष्ठानमार्गे परिष्वष्केदिति ।

स्यादेतत्– किमर्थमेवं क्रियते ? इत्याह–

**बहुं च खलु पावं कम्मं पगडं ॥११६॥**

**बहुं च** इत्यादि । मूलोत्तरप्रकृतिभेदभिन्नं प्रकृति-स्थिति-अनुभाव-प्रदेशबन्धात्मकं बन्ध-उदय-सत्कर्मताव्यवस्थामयं तथा बद्ध-स्पृष्ट-निधत्त-निकाचितावस्थागतं कर्म; तच्च न ह्रसीयसा कालेन क्षयमुपयाति इत्यतः **कालाकाङ्क्षी** इत्युक्तम् । तत्र बन्धस्थानापेक्षया तावत् मूलोत्तरप्रकृतीनां बहुत्वं प्रदर्श्यते, तद्यथा–

सर्वमूलप्रकृतीः [५]बध्नतोऽन्तर्मुहूर्तं यावदष्टविधम्; आयुष्कवर्जं सप्तविधम्, तज्जघन्येन अन्तर्मुहूर्तं उत्कृष्टतः [⊕]तद्रहितानि त्रयस्त्रिंशत्सागरोपमाणि पूर्वकोटि-त्रिभागाभ्यधिकानि; सूक्ष्म[६]साम्परायिकस्य मोहनीयबन्धोपरमे आयुष्कबन्धाभावात् षड्विधम्, एतच्च जघन्यतः सामयिकम्, उत्कृष्ट[७]तस्तु आन्तर्मौहूर्तिकमिति; तथा उपशान्त-क्षीणमोह-

---

**टि०** १. **०द्भयं येन स** क ॥ २. **स हि सदा** ङ ॥ ३. **०कालं मृत्युमाकाङ्क्षितुं** ख ॥ ४. **०मरणं तावदाकाङ्क्षमाणो** ख च ॥ ५. **बध्नतो मुहूर्तं** ख ॥ ६. **०सम्परायस्य** कप्रतिमृते ॥ ७. **०तस्त्वन्तर्मुहूर्त्तमिति** ख विना ॥

**वि०टि०** ⊕ "**तद्रहितानि** देव-मनुज(जा)युर्बन्धान्तर्मुहूर्ताभ्यां रहितानि" जै०वि०प० ॥

सयोगिकेवलिनां सप्तविधबन्धोपरमे सातमेकं [1]बध्नतामेकविधं बन्धस्थानम्, तच्च जघन्येन सामयिकम्, उत्कृष्टतो देशोनपूर्वकोटिकालीयम् । इदानीं उत्तरप्रकृतिबन्धस्थानानि अभिधीयन्ते—

तत्र ज्ञानावरणा-ऽन्तराययोः पञ्चभेदयोरपि एकमेव ध्रुवबन्धित्वाद् बन्धस्थानम् ।

दर्शनावरणीयस्य त्रीणि बन्धस्थानानि— निद्रापञ्चक-दर्शनचतुष्टयसमन्वयाद् ध्रुवबन्धित्वाद् नवविधम्; ततः स्त्यानर्धित्रिकस्य [Φ]अनन्तानुबन्धिभिः सह [2]बन्धोपरमे षड्विधम्; अपूर्वकरणसङ्ख्येयभागे निद्रा-प्रचलयोः बन्धोपरमे चतुर्विधं बन्धस्थानम् ।

वेदनीयस्य एकमेव बन्धस्थानं सातमसातं वा बध्नतः, उभयोरपि यौगपद्येन विरोधितया बन्धाभावात् ।

मोहनीयस्य बन्धस्थानानि दश, तद्यथा—द्वाविंशतिः, मिथ्यात्वं षोडश कषाया अन्यतरो वेदो हास्यरतियुग्मा-ऽरतिशोकयुग्मयोः अन्यतरद् भयं जुगुप्सा च इति; मिथ्यात्वबन्धोपरमे सास्वादनस्य सैव एकविंशतिः; सैव सम्यग्मिथ्यादृष्टेः अविरत-सम्यग्दृष्टेः वा अनन्तानुबन्ध्यभावे सप्तदशविधं बन्धस्थानम्; तदेव देशविरतस्य अप्रत्याख्यानबन्धाभावे त्रयोदशविधम्; तदेव प्रमत्ता-ऽप्रमत्ता-ऽपूर्वकरणानां यतीनां प्रत्याख्यानावरणबन्धाभावाद् नवविधम्; एतदेव हास्यादियुग्मस्य भय-जुगुप्सयोश्च अपूर्वकरणचरमसमये बन्धोपरमात् पञ्चविधम्; ततोऽनिवृत्ति[3]करणसङ्ख्येयभागावसाने पुंवेदबन्धोपरमात् चतुर्विधम्; ततोऽपि [4]तस्मिन्नेव सङ्ख्येयभागे क्षयमुपगच्छति सति क्रोध-मान-मायासञ्ज्वलनानां क्रमेण बन्धोपरमात् त्रिविधं द्विविधं एकविधं चेति; तस्यापि अनिवृत्तिकरणचरमसमये बन्धोपरमात् मोहनीयस्य अबन्धकः ।

आयुषः सामान्येन एकविधं बन्धस्थानं चतुर्णां अन्यतरत्, द्व्यादेः यौगपद्येन बन्धाभावो, विरोधादिति ।

नाम्नः अष्टौ बन्धस्थानानि, तद्यथा— त्रयोविंशतिः, तिर्यग्गतिप्रायोग्यं बध्नतः तिर्यग्गतिः एकेन्द्रियजातिः औदारिक-तैजस-कार्मणानि हुण्डसंस्थानं वर्ण-गन्ध-रस-स्पर्शाः तिर्यग्गतिप्रायोग्या आनुपूर्वी अगुरुलघु उपघातं स्थावरं बादर-सूक्ष्मयोरन्यतरद् अपर्याप्तकः प्रत्येक-साधारणयोरन्यतरद् अस्थिरं अशुभं दुर्भगं अनादेयं अयशःकीर्तिः निर्माणमिति, इयं

---

टि० १. **बध्नतामेकं बन्ध०** क ॥ २. **बन्धोपरमात् षड्विधम्** ग ॥ ३. **करणबन्धभागा०** ख ॥ ४. **तस्मिन्नेवासङ्ख्येयभागे** ख ॥

**वि०टि० Φ** ''अनन्तानुबन्धि[ भि ]रिति एतैर्बध्यमानैरेव एतद्बध्यते इति सूचयति'' जै०वि०प० ॥

एकेन्द्रियाऽपर्याप्तकप्रायोग्यं बध्नतो मिथ्यादृष्टेः भवति । इयमेव पराघात-उच्छ्वाससहिता पञ्चविंशतिः, नवरं अपर्याप्तकस्थाने पर्याप्तक[1] एव वाच्यः । इयमेव च आतप-उद्द्योतान्यतरसमन्विता षड्विंशतिः, नवरं बादर-प्रत्येके एव वाच्ये[⊕] । तथा[2] देवगतिप्रायोग्यं बध्नतोऽष्टाविंशतिः; तथा[3] हि—देवगतिः पञ्चेन्द्रियजातिः वैक्रिय-तैजस-कार्मणानि शरीराणि समचतुरस्रं अङ्गोपाङ्गं वर्णादिचतुष्कं आनुपूर्वी अगुरुलघु उपघातं पराघातं उच्छ्वासः प्रशस्तविहायोगतिः त्रसं बादरं पर्याप्तकं प्रत्येकं [4]स्थिरा-ऽस्थिरयोः अन्यतरत् शुभा-ऽशुभयोरन्यतरत् सुभगं सुस्वरं आदेयं यशःकीर्ति-अयशःकीर्त्योरन्यतरत् निर्माणमिति। एषैव तीर्थकरनामसहिता एकोनत्रिंशत् । साम्प्रतं त्रिंशत्— देवगतिः पञ्चेन्द्रियजातिः वैक्रिया-ऽऽहारकशरीराङ्गोपाङ्गचतुष्टयं तैजस-कार्मणे संस्थानमाद्यं वर्णादिचतुष्कं आनुपूर्वी अगुरुलघु उपघातं पराघातं उच्छ्वासः प्रशस्तविहायोगतिः त्रसं बादरं पर्याप्तकं प्रत्येकं स्थिरं शुभं सुभगं सुस्वरं आदेयं यशःकीर्तिः निर्माणमिति च बध्नत एकं बन्धस्थानम् । एषैव त्रिंशत् तीर्थकरनामसहिता एकत्रिंशत् । एतेषां च बन्धस्थानानां एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-नरकगत्यादिभेदेन बहुविधता **कर्मग्रन्थाद्** अवसेया । अपूर्वकरणादिगुणस्थानकत्रये देवगतिप्रायोग्यबन्धोपरमाद् यशःकीर्तिमेव बध्नत एकविधं बन्धस्थानमिति । तत ऊर्ध्वं नाम्नो बन्धाभाव इति ।

गोत्रस्य सामान्येन एकं बन्धस्थानम्— उच्च-नीचयोरन्यतरत्, यौगपद्येन उभयोः बन्धाभावो, विरोधादिति ।

तदेवं बन्धद्वारेण लेशतो बहुत्वं आवेदितं कर्मणाम्, तच्च **बहु कर्म प्रकृतं**=बद्धं **प्रकटं** वा, तत्कार्यदर्शनात्; **खलु**शब्दः वाक्यालङ्कारे अवधारणे वा, बह्वेव तत् कर्म ॥११६॥

यदि नामैवं ततस्तदपनयनार्थं किं कर्तव्यम् ? इत्याह—

**[ सू० ] सच्चंसि धितिं कुव्वह ।**

**एत्थोवरए मेहावी सव्वं पावं कम्मं झोसेति ॥११७॥**

**सच्चे** इत्यादि । सद्भ्यो हितः=**सत्यः** संयमः, तत्र **धृतिं कुरुध्वम्** । **सत्यो** वा मौनीन्द्रागमो, यथावस्थितवस्तुस्वरूपाविर्भावनात्; तत्र भगवदाज्ञायां **धृतिं** कुमार्गपरित्यागेन

---

टि० १. **पर्याप्तकमेव वाच्यम् । इय०** ख घ । **पर्याप्तकमेव वाच्यम् । तथा इय०** ङ ॥ २. **ततो** च ॥ ३. **तद्यथा-देव०** ख ॥ ४. **स्थिरं शुभं सुभगं सुस्वरं** च ॥

**वि०टि०** ⊕ "**वाच्ये** [इ]ति कर्मणीति शेषः" जै०वि०प० ॥

[१] **कुरुध्वमि**ति । किञ्च–

**एत्थोवरए** इत्यादि । **अत्र**=अस्मिन् संयमे भगवद्वचसि वा, **उप** = सामीप्येन **रतः**= व्यवस्थितः, **मेधावी**=तत्त्वदर्शी, **सर्वम्**=अशेषं, **पापं कर्म** संसारार्णवपरिभ्रमणे[२]हेतुं [३]**झोषयति**=शोषयति, क्षयं नयतीति यावत् ॥११७॥

उक्तोऽप्रमादः । तत्प्रत्यनीकस्तु प्रमादः । तेन च कषायादिप्रमादेन प्रमत्तः किंगुणो भवति ? इत्याह–

## [सू०] अणेगचित्ते खलु अयं पुरिसे, से केयणं अरिहइ पूरइत्तए ।

**अणेगचित्ते** इत्यादि । अनेकानि चित्तानि कृषि-वाणिज्या-ऽवलगनादीनि यस्य असौ = **अनेकचित्तः**, **खलुः** अवधारणे, संसारसुखाभिलाषी अनेकचित्त एव भवति । **अयं पुरुषः** इति प्रत्यक्षगोचरीभूतः [४]संसारी अपदिश्यते । अत्र च प्रागुपन्यस्त**दधिघटिकया** [५]**कपिलदरिद्रेण** च दृष्टान्तो वाच्य इति । यश्च अनेकचित्तो भवति स किं कुर्यात् ? इत्याह–

**से केयणमि**त्यादि । द्रव्यकेतनं– ⊕चालनी परिपूर्णकः समुद्रो वेति; भावकेतनं लोभेच्छा । तदसौ अनेकचित्तः केनापि अभृतपूर्वं **पूरयितुमर्हति**, अर्थितया शक्या-ऽशक्य-विचाराक्षमः अशक्यानुष्ठानेऽपि प्रवर्तत इत्युक्तं भवति । स च लोभेच्छापूरणव्याकुलितमतिः किं कुर्यात् ? इत्याह–

## से अण्णवहाए अण्णपरियावाए अण्णपरिग्गहाए जणवयवहाए जणवयपरिवायाए जणवयपरिग्गहाए ॥११८॥

**से अन्नवहाए** इत्यादि । **स** लोभपूरणप्रवृत्तो**ऽन्येषां** प्राणिनां **वधाय** भवति; [६]तथा **अन्येषां** शारीर-मानस**परितापनाय**; तथा **अन्येषां** द्विपदचतुष्पदादीनां **परिग्रहाय;** जनपदे भवाः=**जानपदाः**, Φ**कालप्रष्ठा**दयो राजादयो [७]वा **मगधा**दिजनपदा वा, तद्वधाय; तथा **जनपदानां** = लोकानां **परिवादाय** = 'दस्युरयं, पिशुनो वा' इत्येवं मर्मोद्घट्टनाय; तथा **जनपदानां मगधादीनां परिग्रहाय** [८]प्रभवतीति [९]सर्वत्र अध्याहारः ॥११८॥

---

टि० १. **कुरु त्वमिति** च॥ २. ०णहेतुः क घ ङ। ०णहेतु च ॥ ३. **झोषयति** इति खप्रतौ नास्ति ॥ ४. **संसार्युपदिश्यते** घ ङ॥ ५. **कपिलेन च** ख ॥ ६. **तथा तेषां** क ॥ ७. **वा तद्वधाय** ग-ङपुस्तके विना ॥ ८. **भवतीति** ङ॥ ९. **सर्वदाध्याहारः** ख ॥

वि०टि० ⊕ "**चालिनीपरिपूर्णक** इति सुघरीगृहम्" जै०वि०प० ॥ Φ "**कालप्रष्ठादय** इति म्लेच्छादयः" जै०वि०प० । "तृतीयाध्ययने उद्दे० २-**कालप्रष्ठादयः** म्लेच्छादयः" स०वि०प० ॥

[१]किं य एते लोभप्रवृत्ता वधादिकाः क्रियाः कुर्वन्ति ते तथाभूता एवासते [२]उत अन्यथा ?, अन्यथाऽपीति दर्शयति–

**[सू० ] आसेवित्ता एयमट्ठं इच्चेवेगे समुट्ठिता ।**

**तम्हा तं बिइयं नासेवते णिस्सारं पासिय णाणी ।**

**आसेवित्ता** इत्यादि । [३]**एनम्** अनन्तरोक्तं **अर्थं** अन्यवध-परिग्रह-परितापनादिकं **आसेव्य इत्येव** इति लोभेच्छाप्रतिपूरणाय एव **एके भरतराजादयः समुत्थिताः** सम्यग् योगत्रिकेण उत्थिताः संयमानुष्ठानेन उद्यताः तेनैव भवेन सिद्धिमासादयन्ति । संयमसमुत्थानेन[४] च समुत्थाय कामभोगान् हिंसादीनि च आश्रवद्वाराणि हित्वा किं विधेयम् ? इत्याह–

**तम्हा** इत्यादि । यस्माद् वान्तभोगतया कृतप्रतिज्ञः **तस्माद्** भोगलिप्सुतया [५]**तद् द्वितीयं** मृषावादमसंयमं वा [६]**नासेवेत** । विषयार्थमसंयमः सेव्यते; ते च विषया निःसारा इति दर्शयति–

**निस्सारं** इत्यादि । सारो हि विषयगणस्य तत्प्राप्तौ तृप्तिः, तदभावाद् **निःसारः**; तं **दृष्ट्वा ज्ञानी** तत्त्ववेदी न विषयाभिलाषं विदध्यात् । न केवलं मनुष्याणाम्, देवानामपि विषयसुखास्पदं अनित्यं जीवितं इति च दर्शयति–

**उववायं चयणं णच्चा अणण्णं चर माहणे ।**

**से ण छणे, न छणावए, छणंतं णाणुजाणति ।**

**उववायं** [७]**चयणं नच्चा** । **उपपातं**=जन्म, **च्यवनं**=पातः; तच्च **ज्ञात्वा** न विषयसङ्गोन्मुखो भवेदिति । यतो निःसारो विषयग्रामः समस्तसंसारो वा सर्वाणि च स्थानानि अशाश्वतानि ततः किं कर्तव्यम् ? इत्याह–

**अणण्णमि**त्यादि । मोक्षमार्गाद् अन्यः असंयमः, न अन्यः=**अनन्यः** ज्ञानादिः, तं **चर, माहण** इति मुनिः । किञ्च–

**से न छणे** इत्यादि । **स** मुनिः अनन्यसेवी प्राणिनो **न क्षणुयात्**=न हन्यात्, न अपरं घातयेत्[८], घ्नन्तमन्यं न समनुजानीत । चतुर्थव्रतसिद्धये तु इदमुपदिश्यते–

---

टि० १. **किं ये ते लोभ०** क ॥ २. **उतान्यथाऽपि ? इति दर्श०** ख ग च ॥ ३. **एवम्** क च ॥ ४. **०न चोत्थाय** ख च । ५. **तत्र** ग । **तं** घ ङ ॥ ६. **नासेवते** क ॥ ७. **चवणं** ग घ ङ ॥ ८. **०त्** । **घातयन्तं न सम०** ख-चप्रती ऋते ॥

**णिव्विंद णंदिं अरते पयासु अणोमदंसी णिसण्णे पावेहिं कम्मेहिं ॥११९॥**

**निव्विद** इत्यादि । **निर्विन्दस्व**=जुगुप्सस्व, विषयजनितां **नन्दीं**=प्रमोदम्; किम्भूतः सन् ? **प्रजासु** = स्त्रीषु **अरक्तः** = रागरहितः; भावयेच्च यथा—'एते विषयाः किम्पाकफलोपमाः ⊕त्रपुषीफलनिबन्धनकटवः', अतस्तदर्थं परिग्रहाग्रहयोगपराङ्मुखो भवेदिति । उत्तमधर्मपालनार्थमाह—

**अणोम०** इत्यादि । अवमं=हीनं मिथ्यादर्शना-ऽविरत्यादि, तद्विपर्यस्तं अनवमम्, तद् द्रष्टुं शीलमस्य इति **अनवमदर्शी** [1]सम्यग्दर्शन-ज्ञान-चारित्रवान्; एवम्भूतः सन् प्रजानुगां **नन्दीं निर्विन्दस्व** इति सण्टङ्कः । यश्च अनवमसन्दर्शी स किम्भूतो भवति ? इत्याह—

**निसन्न०** इत्यादि । **पापोपादानेभ्यः कर्मभ्यः निषण्णः**=निर्विण्णः, पापकर्मभ्यः पापकर्मसु वा कर्तव्येषु निवृत्त इति यावत् ॥१२९॥ किञ्च—

**[ सू० ]    कोधादिमाणं हणिया य वीरे,**
**लोभस्स पासे णिरयं महंतं ।**
**तम्हा हि वीरे विरते वधातो,**
**छिंदिज्ज सोतं लहुभूयगामी ॥१२०(८)॥**

**कोहादी**त्यादि वृत्तम् । क्रोध आदिः येषां ते क्रोधादयः, [2]मीयते=परिच्छिद्यते अनेन इति मानं स्वलक्षणं अनन्तानुबन्ध्यादिविशेषः, क्रोधादीनां मानं=**क्रोधादिमानम्**, [3]क्रोधादिः वा यो मानः=[4]गर्वः, तं **हन्यात्** । कोऽसौ ? [5]**वीरः** । [6]द्वेषापनोदमुक्त्वा रागापनोदार्थमाह—

**लोहस्स** इत्यादि । **लोभस्य** अनन्तानुबन्ध्यादेः चतुर्विधस्यापि स्थितिं विपाकं च **पश्य** । स्थितिः महती सूक्ष्मसम्परायानुयायित्वात्, विपाकोऽपि अप्रतिष्ठानादिनरकापत्तेः महान्; यत **आगमः**-"**मच्छा मणुया य सत्तमिं पुढविं**" [ **प्रज्ञा०सू०६।६४७** ] ते च महालोभाभिभूताः सप्तमपृथिवीभाजो भवन्तीति भावार्थः । यद्येवं ततः किं कर्तव्यम् ? इत्याह—

---

**टि०** १. **सम्यग्ज्ञान-दर्शन-चारित्रवान्** च ॥ २. **मीयतेऽनेनेति** क ङ । **मीयतेऽनेन मानं** घ ॥ ३. **क्रोधादेर्वा** क ॥ ४. **गर्वः क्रोधकारणः** । तं ख ग च ॥ ५. **धीरः** घ ङ च ॥ ६. **द्वेषापनोदार्थमुक्त्वा** क ग ॥

**वि०टि०** ⊕ "**त्रपुषीफलनिबन्धनं** कटुकर्कटीबिण्टम्" स०वि०प० । "**निबन्धन** इति वृन्तम्" जै०वि०प० ॥

**तम्हा** इत्यादि । यस्माद् लोभाभिभूताः प्राणिवधादिप्रवृत्तितया महानरकभाजो भवन्ति **तस्माद् वीरो** लोभहेतोः **वधाद् विरतः** स्यादिति । किञ्च–

**छिंदिज्ज** इत्यादि । **शोकं** भाव**श्रोतो** वा **छिन्द्यात्**=अपनयेत्, किम्भूतः ? लघुभूतः–मोक्षः संयमो वा, तं गन्तुं शीलमस्य इति **लघुभूतगामी**, लघुभूतं वा कामयितुं शीलमस्य इति **लघुभूतकामी** ॥ १२०(८)॥ पुनरपि उपदेशदानाय आह–

[सू० ] **गंथं परिण्णाय इहऽज्ज वीरे,**
**सोयं परिण्णाय चरेज्ज दंते ।**
**उम्मुग्ग लद्धुं इह माणवेहिं,**
**णो पाणिणं पाणे समारभेज्जासि ॥१२१(९)॥ त्ति बेमि ।**

**॥ सीओसणिज्जस्स बीओ उद्देसओ सम्मत्तो ॥**

**गंथमि**त्यादि वृत्तम् । **ग्रन्थं**[1] बाह्या–ऽभ्यन्तरभेदभिन्नं ज्ञपरिज्ञया **परिज्ञाय इह अद्य** एव कालानतिपातेन [2]**वीरः** सन् प्रत्याख्यानपरिज्ञया परित्यजेत् । किञ्च–

**सोयमि**त्यादि । विषयाभिष्वङ्गः संसार**श्रोतः**, तद् ज्ञात्वा **दान्त** इन्द्रिय-[3]नोइन्द्रिय-दमेन संयमं **चरे**दिति । किमभिसन्धाय संयमं चरेत् ? इत्याह–

[4]**उम्मुग्ग लद्धुमि**त्यादि । **इह** मिथ्यात्वादिशैवलाच्छादिते संसारह्रदे जीवकच्छपः श्रुति–श्रद्धा–संयमवीर्यरूपं **उन्मज्जनं** आसाद्य=**लब्ध्वा**, अन्यत्र सम्पूर्णमोक्षमार्गा–ऽसम्भवाद् **मानुषेषु** इत्युक्तम् । क्त्वाप्रत्ययस्य[5] उत्तरक्रिया[6]सव्यपेक्षित्वाद् उत्तरक्रियामाह–

**नो पाणिणमि**त्यादि । प्राणा विद्यन्ते येषां ते **प्राणिनः**, तेषां **प्राणान्** पञ्चेन्द्रिय-त्रिविधबल-उच्छ्वासनिःश्वासा-ऽऽयुष्कलक्षणान् **नो समारभेथाः**=न [7]व्यपरोपयेः, तदुपघात-[8]कारि अनुष्ठानं मा कृथा इत्युक्तं भवति, **इतिः** परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥१२१(९)॥

**॥ शीतोष्णीया[9]ध्ययनद्वितीयोद्देशकटीका [10]समाप्ता ॥ छ ॥**

---

टि० १. "**ग्रन्थ १४ [ आभ्यन्तर ]**" ज्ञअव० ॥ २. धीरः घ ङ च ॥ ३. ०**नोइन्द्रियसंयमेन** ख ॥ ४. **उम्मग** क ख । **उम्मुग्ग** च ॥ ५. ०**स्योत्तरकालसव्यपेक्षत्वाद्** ख ॥ ६. ०**सव्यपेक्षत्वाद्** ग ॥ ७. **व्यपरोपयेत्** ग ॥ ८. ०**कार्यमनुष्ठानं** ङ ॥ ९. ०**याध्ययने** ग ॥ १०. **समाप्तेति** घ । **समाप्ता** इति ङप्रतौ नास्ति । **परिसमाप्तेति** च ॥

## ॥ तृतीय उद्देशकः ॥

उक्तो द्वितीयोद्देशकः । साम्प्रतं तृतीय आरभ्यते । अस्य च अयमभिसम्बन्धः—इह अनन्तरोद्देशके दुःखं तत्सहनं च प्रतिपादितम्, न च तत्सहनेनैव संयमानुष्ठानरहितेन पापकर्माऽकरणतया वा श्रमणो भवतीति एतत् प्रागुद्देशार्थाधिकारनिर्दिष्टमुच्यते; अतो[1]ऽनेन सम्बन्धेन आयातस्य अस्य उद्देशकस्य सूत्रानुगमे सूत्रमुच्चारयितव्यम्; तच्चेदम्—

**[ सू० ] संधिं लोगस्स जाणित्ता आततो बहिया पास ।**

**तम्हा ण हंता ण विघातए ।**

**संधिं लोयस्स जाणित्ता** । तत्र **सन्धिः** द्रव्यतो भावतश्च । तत्र द्रव्यतः कुड्यादिविवरम्, भावतः कर्मविवरम् । तत्र दर्शनमोहनीयं यदुदीर्णं तत् क्षीणम्, शेषं उपशान्तमिति अयं सम्यक्त्वावाप्तिलक्षणो भावसन्धिः, यदि वा ज्ञानावरणीयं विशिष्टक्षायोपशमिकभावं उपगतमिति अयं सम्यग्ज्ञानावाप्तिलक्षणः सन्धिः, अथवा चारित्रमोहनीयक्षयोपशमात्मकः सन्धिः; तं **ज्ञात्वा** न प्रमादः श्रेयानिति । यथा हि **लोकस्य** चारकाद्यवरुद्धस्य कुड्य-निगडादीनां **सन्धिं**=छिद्रं **ज्ञात्वा**=उपलभ्य न प्रमादः श्रेयान्; एवं मुमुक्षोरपि कर्मविवरं [2]आसाद्य क्षणमपि पुत्र-कलत्र-संसारसुखव्यामोहो न श्रेयसे भवतीति ।

यदि वा सन्धानं=**सन्धिः**, स च भावसन्धिः ज्ञान-दर्शन-चारित्राध्यवसायस्य कर्मोदयात् त्रुट्यतः पुनः सन्धानं=मीलनम्, एतत् क्षायोपशमिकादिभाव**लोकस्य** विभक्तिपरिणामाद् वा **लोके** ज्ञान-दर्शन-चारित्रार्हे भाव**सन्धिं ज्ञात्वा** तदक्षूणप्रतिपालनाय ⊕विधेयमिति[3] । यदि वा **सन्धिः**=अवसरो धर्मानुष्ठानस्य, तं **ज्ञात्वा लोकस्य**=भूतग्रामस्य दुःखोत्पादनानुष्ठानं न कुर्यात् । [4]सर्वत्र आत्मौपम्यं समाचरेद् इत्याह—

**आयओ** इत्यादि । यथा हि आत्मनः सुखमिष्टं इतरत् तु अन्यथा तथा **बहिः** अपि=आत्मनो व्यतिरिक्तानामपि जन्तूनां सुखप्रियत्वं असुखाऽप्रियत्वं च **पश्य**=अवधारय । तदेवं आत्मसमतां सर्वप्राणिनां अवधार्य किं कर्तव्यम् ? इत्याह—

**तम्हा** इत्यादि । यस्मात् सर्वेऽपि जन्तवो दुःखद्विषः सुखलिप्सवः **तस्मात्** तेषां **न हन्ता**=न [5]व्यापादकः स्यात्, **नापि** अपरैः तान् जन्तून् विविधैः नानाप्रकारैः उपायैः घातयेत्

---

टि० १. **अथोऽनेन** ङ ॥ २. **आसाद्य लव-क्षणमपि** घ ङ ॥ ३. **विधिरयमिति** घ ङ ॥ ४. **सर्वत्रात्मौपयिकमाचरेदित्याह** ख ॥ ५. **व्याधातकः** ख ॥

वि०टि० ⊕ "**विधेयम्** इति मीलितमित्यनेन सम्बन्धः" जै०वि०प० ॥

=**विघातयेदि**ति । यद्यपि कांश्चित् स्थूलान् सत्त्वान् स्वयं पाषण्डिनो न घ्नन्ति तथापि उद्देशिक-सन्निध्यादिपरिभोगानुमतेः अपरैः घातयन्ति ।

न च एकान्तेन पापकर्माऽकरणमात्रतया श्रमणो भवतीति दर्शयति—

**जमिणं अण्णमण्णवितिगिंछाए पडिलेहाए ण करेति पावं कम्मं किं तत्थ मुणी कारणं सिया ? ॥१२२॥**

**जमिणमि**त्यादि । **यदिदं**=यदेतत् पापकर्माऽकरणताकारणं[1], किं तत् ? दर्शयति— **अन्योन्यस्य** परस्परं या **विचिकित्सा**=आशङ्का परस्परतो भयं लज्जा वा, तया तां वा **प्रत्युप्रेक्ष्य** परस्पराशङ्कया अपेक्षया वा, **पापं**=पापोपादानं, **कर्म**=अनुष्ठानं, **न करोति**=न विधत्ते । **किं** प्रश्ने क्षेपे वा, **तत्र**=तस्मिन् पापकर्माऽकरणे, **किं मुनिः कारणं स्यात् ?** =किं मुनिरिति कृत्वा पापकर्म न करोति ? काक्वा पृच्छति । यदि वा यदि नाम असौ यथोक्तनिमित्तात् पापानुष्ठानविधायी न सञ्जज्ञे किं एतावता एव मुनिरसौ ?, नैव मुनिरित्यर्थः । अद्रोहाध्यवसायो हि मुनिभावकारणम्; स च तत्र न विद्यते, अपरोपाध्यावेशात् ।

विनेयो वा पृच्छति— यदिदं परस्पराशङ्कया आधाकर्मादिपरिहरणं[2] तत् मुनिभावाङ्गतां याति आहोस्विद् न इति ? । आचार्य आह— सौम्य ! निरस्तापरव्यापारः शृणु—

**जमिणमि**त्यादि । अपरोपाधिनिरस्तहेयव्यापारत्वमेव मुनिभावकारणमिति भावार्थः, यतः शुभान्तःकरणपरिणामव्यापारापादितक्रियस्य मुनिभावः[3], नान्यथेति; अयं तावत् निश्चयनयाभिप्रायः । व्यवहाराभिप्रायेण तु उच्यते— यो हि सम्यग्दृष्टिः उत्क्षिप्त-पञ्चमहाव्रतभारः तद्वहने प्रमाद्यन्नपि अपरसमानसाधुलज्जया गुर्वाद्याराध्यभयेन गारवेण वा केनचिद् आधाकर्मादि परिहरन् प्रत्युपेक्षणादिकाः क्रियाः करोति, यदि च तीर्थोद्भासनाय मासक्षपणाऽऽतापनादिका जनविज्ञाताः क्रियाः करोति तत्र तस्य मुनिभाव एव कारणम्, तद्व्यापारापादितपारम्पर्यशुभाध्यवसायोपपत्तेः ॥१२२॥

तदेवं शुभान्तःकरणव्यापारविकलस्य मुनित्वे सदऽसद्भावः प्रदर्शितः । कथं तर्हि नैश्चयिको मुनिभावः ? इत्यत आह—

**[ सू० ] समयं तत्थुवेहाए अप्पाणं विप्पसादए ।**

**समयमि**त्यादि । समभावः[4]=**समता**, तां **तत्र उत्प्रेक्ष्य**=पर्यालोच्य, समताव्यवस्थितो

---

टि० १. ०करणतया कारणं ख ॥ २. अधर्मादिपरिहरणं ख ॥ ३. मुनेर्भाव घ ॥ ४. समभावं समतां वा तत्रोत्प्रेक्ष्य समताव्यवस्थितो ख ॥

यद् यत् करोति येन केनचित् प्रकारेण अनेषणीयपरिहरणं लज्जादिना जनविदितं च उपवासादि तत् सर्वं मुनिभावकारणमिति । यदि वा **समयम्**=आगमं, **तत्र उत्प्रेक्ष्य**, यद् आगमोक्तविधिना[1] अनुष्ठानं तत् सर्वं मुनिभावकारणमिति भावार्थः । तेन च आगमोत्प्रेक्षणेन समतोत्प्रेक्षया वा **आत्मानं विप्रसादयेद्**=विविधं प्रसादयेद् । आगमपर्यालोचनेन समतादृष्ट्या वा आत्मानं विविधैः उपायैः इन्द्रियप्रणिधाना-ऽप्रमादादिभिः प्रसन्नं विदध्यात् । आत्मप्रसन्नता च संयमस्थस्य भवति, तत्र अप्रमादवता भाव्यमिति । आह च–

**अणण्णपरमं णाणी णो पमादे कयाइ वि ।**
**आतगुत्ते सया वीरे जातामाताए जावए ॥१०॥**

**अणन्नपरममि**त्यादि अनुष्टुप् । न विद्यते अन्यः परमः–प्रधानः अस्माद् इति **अनन्यपरमः** संयमः, तं **ज्ञानी**=परमार्थवित् **नो प्रमादयेत्** = तस्य प्रमादं न कुर्यात् कदाचिदपि । यथा च[2] अप्रमादता भवति तथा दर्शयितुमाह–

**आयगुत्ते** इत्यादि । इन्द्रिय-नोइन्द्रियात्मना गुप्तः=**आत्मगुप्तः**, **सदा**= सर्वकालं, यात्रा=संयमयात्रा, तस्यां[3] मात्रा=**यात्रामात्रा**, मात्रा च "**अच्चाहारो न सहे**" [ **आव०नि० १२६६** ] इत्यादि, तया आत्मानं **यापयेत्** । यथा विषयानुदीरणेन दीर्घकालं संयमाधारदेहप्रतिपालनं भवति तथा कुर्यात् । उक्तं च–

"[4]**आहारार्थं कर्म कुर्यादनिन्द्यम्**[5], **कुर्यादाहारं प्राणसन्धारणार्थम् ।**
**प्राणाः सन्धार्यास्तत्त्वजिज्ञासनाय, तत्त्वं**[6] **ज्ञेयं येन भूयो न भूयात् ॥**" [ ] ॥१०॥

[7]सैव आत्मगुप्तता कथं स्यात् इति चेद्, आह–

**विरागं रूवेहिं गच्छेज्जा महता खुड्डएहिं वा ।**

**विरागमि**त्यादि । विरजनं=विरागः, तं **विरागं रूपेषु** मनोज्ञेषु चक्षुर्गोचरीभूतेषु **गच्छेत्**=यायात् । रूपमतीव आक्षेपकारि अतो रूपग्रहणम्, अन्यथा शेषविषयेष्वपि विरागं गच्छेद् इत्युक्तं स्यात् । **महता**=दिव्यभावेन यद् व्यवस्थितं रूपं **क्षुल्लकेषु वा** मनुष्यरूपेषु[8]

---

टि० १. **०विधानानुष्ठानं** ख-चप्रती विना ॥ २. **चाप्रमादवत्ता** घ च ॥ ३. **तस्या** च ॥ ४. **आहारस्यार्थं** ग । **आहाराद्यर्थं** च ॥ ५. **०निन्द्यं, स्यादाहारः प्राण०** च ॥ ६. **तत्त्वं जिज्ञास्यं येन निष्ठां समेयात्** चपुस्तकं विना । **तत्त्वं जिज्ञास्यं येन दुःखाद्विमुच्चे( च्येत् )** चूर्णौ ॥ ७. **असौ चात्मगुप्तता** ग ॥ ८. **मनुष्येषु सर्वत्र** ख ॥

सर्वत्र विरागं कुर्यादिति । अथवा दिव्यादि प्रत्येकं ⊕महत् क्षुल्लकं चेति, क्रिया Φपूर्ववत् ।

**नागार्जुनीयास्तु** पठन्ति—

**विसयम्मि [1]पंचगम्मि वि, दुविहम्मि तियं तियं ।**
**भावओ सुट्ठु जाणित्ता, से न लिप्पइ दोसु वि ॥**

शब्दादिविषय**पञ्चकेऽपि** इष्टा-ऽनिष्टरूपतया **द्विविधे** हीन-मध्यमोत्कृष्टभेदं इति एतत् **भावतः**=परमार्थतः **सुष्ठु ज्ञात्वा स** मुनिः पापेन कर्मणा **द्वाभ्यामपि** राग-द्वेषाभ्यां **न लिप्यते**, तदकरणादिति भावः । स्यात्—किमालम्ब्य एतत् कर्तव्यम्? इत्याह—

**आगतिं गतिं परिण्णाय दोहिं वि अंतेहिं अदिस्समाणेहिं से ण छिज्जति, ण भिज्जति, ण डज्झति, ण हम्मति कंचणं सव्वलोए ॥१२३॥**

**आगइमि**त्यादि । आगमनम्=आगतिः; सा च तिर्यङ्-मनुष्ययोश्चतुर्द्धा, चतुर्विध-नरकादिगत्यागमनसद्भावात्; देव-नारकयोर्द्वेधा तिर्यङ्-मनुष्यगतिभ्यामेव आगमनसद्भावात्; एवं गतिरपि, मनुष्येषु तु पञ्चधा, तत्र मोक्षगतिसद्भावात् । अतः तां **आगतिं गतिं** [2]च **परिज्ञाय** संसारचक्रवाले अरघट्टघटीयन्त्रन्यायं अवेत्य मनुष्यत्वे च मोक्षगतिसद्भावं आकलय्य अन्तहेतुत्वाद् अन्तौ राग-द्वेषौ, ताभ्यां **द्वाभ्यां अन्ताभ्यां अदृश्यमानाभ्यां** अनपदिश्यमानाभ्यां [3]वा, क्त्वाप्रत्ययस्य उत्तरक्रियामाह—

**से** इत्यादि । **सः** आगति-गतिपरिज्ञाता राग-द्वेषाभ्यां अनपदिश्यमानो **न छिद्यते** अस्यादिना, **न भिद्यते** कुन्तादिना, **न दह्यते** पावकादिना, 卐**न हन्यते** नरकगत्यानु-पूर्व्यादिना [4]भूयशः, अथवा राग-द्वेषाऽभावात् [5]सिद्ध्यत्येव । तदवस्थस्य च एतानि छेदनादीनि विशेषणानि, [6]**कंचणमि**ति विभक्तिपरिणामात् केनचित्, सर्वस्मिन्नपि **लोके** न छिद्यते नापि भिद्यते राग-द्वेषोपशमादिति ॥१२३॥

तदेवं आगति-गतिपरिज्ञानाद् राग-द्वेषपरित्यागः; तदभावाच्च छेदनादिसंसारदुःखा-ऽभावः । [8]अपरे च साम्प्रतेक्षिणः 'कुतो वयमागताः ?, क्व यास्यामः ?, किं वा तत्र नः [7]सम्पत्स्यते ?' नैवं भावयन्ति; अतः संसारभ्रमणपात्रतामनुभवन्तीति दर्शयितुमाह—

---

टि० १. **पंचगम्मी** ख विना । **पंचगम्मि** च ॥ २. **वा** च ॥ ३. **च** घ ङ च ॥ ४. **बहुशः** ख घ ङ ॥ ५. **सिद्ध्यते च** । **तद०** ग ङ ॥ ६. **कञ्चनमिति** क ॥ ७. **सम्पद्यते** ङ ॥ ८. **०ते ? इत्याद्यनालोचकाः संसार०** ख ॥

**वि०टि०** ⊕ "**महतु( त्) क्षुल्लक[ म् ]** इति उत्कृष्टं रूपं मह[त्] । काल-कुब्जादि क्षुल्लकम् । शेषं मध्यमम्" जै०वि०प० ॥ Φ "**पूर्ववत्** इति विरागं कुर्यात्" जै०वि०प० ॥ 卐 "**न हन्यते** इति न नीयते" जै०वि०प० ॥

[सू०] अवरेण पुव्वं ण सरंति एगे,
किमस्स तीतं किं वाऽऽगमिस्सं ।
भासंति एगे इह माणवा तु,
जमस्स तीतं तं आगमिस्सं ॥११॥

**अवरेण** इत्यादि रूपकम् । **अपरेण**=पश्चात्कालभाविना सह, **पूर्वम्**=अतिक्रान्तं, **न** ⊕**स्मरन्ति एके** अन्ये मोहाज्ञानावृतबुद्धयो यथा– '**किमस्य** जन्तोः नरकादिभवोद्भूतं बाल-कुमारादिवयोपचितं वा दुःखादि **अतीतं किं** [1]**वा आगमिष्यति** आगामिनि काले किमस्य सुखाभिलाषिणो दुःखद्विषो भावी'ति । यदि पुनः अतीता-ऽऽगामिपर्यालोचनं स्यात् न तर्हि [2]संसाररतिः स्यादिति । उक्तं च–

"**केण ममेत्थुप्पत्ती ? कहं इओ तह पुणो वि गंतव्वं ?** ।
**जो एत्तियं पि चिंतेइ एत्थ सो को न निव्विण्णो ?** ॥" [ ]

**एके** पुनः महामिथ्याज्ञानिनो **भाषन्ते इह**=अस्मिन् संसारे मनुष्यलोके वा, **मानवाः** =मनुष्या, यथा–'**यदस्य** जन्तोः **अतीतं** स्त्री-पुं-नपुंसक-सुभग-दुर्भग-श्व-गोमायु-ब्राह्मण-क्षत्रिय-विट्-शूद्रादि [3]तदावेशात् पुनरपि अन्यजन्मानुभूतं [4]**तदेव** आगामी'ति ।

यदि वा न विद्यते परः–प्रधानः अस्माद् इति **अपरः** संयमः, तेन वासितचित्ताः सन्तः **पूर्वं** पूर्वानुभूतं विषय[5]सुखोपभोग्यादि **न स्मरन्ति**=न तदनुस्मृतिं कुर्वते **एके** राग-द्वेषविप्रमुक्ताः; तथा अनागतदिव्याङ्गनाभोगमपि नाकाङ्क्षन्ति । [6]**किं च अस्य** जन्तोः **अतीतं** सुख-दुःखादि [7]**किं वा आगामि** ? इत्येतदपि न स्मरन्ति । यदि वा कियान् कालोऽतिक्रान्तः ? [8]कियानेष्यति ?; लोकोत्तराः तु **भाषन्ते एके** राग-द्वेषरहिताः केवलिनः चतुर्दशपूर्वविदो वा– **यदस्य** जन्तोः अनादिनिधनत्वात् काल-शरीर-सुखादि **अतीतं** आगाम्यपि **तदेव** इति । **अपरे** तु पठन्ति–

---

**टि०** १. **चागमिष्यति** ख ॥ २. **संसारे रतिः** कप्रतिमृते ॥ ३. ०दि **तदादेशात्** घ । ०**दिभेदावेशात्** च ॥ ४. **तदेवागमिष्यति** ग ॥ ५. ०**सुखोपभोगादि** क-खप्रती विना ॥ ६. **किं वास्य** ख ग ॥ ७. **किं चागामि ?** ख । **किं वागमिष्यत्येतदपि** ग ॥ ८. **कियानेष्यते ? इति लोको०** ख । **कियानेष्यः ? इति लोको०** ग ॥

**वि०टि०** ⊕ "**स्मरन्ति** इति यथाक्रमं योगः" जै०वि०प० ॥

*'अवरेण पुव्वं किह से अतीतं,*
**किह आगमिस्सं ? न सरंति एगे ।**
**भासंति एगे इह माणवा उ,**
**जह से अतीतं तह आगमिस्सं ॥'**

**अपरेण** जन्मादिना सार्धं, **पूर्वम्**=अतिक्रान्तं जन्मादि **न स्मरन्ति 'कथं वा** केन वा प्रकारेण **अतीतं** सुख-दुःखादि ?, **कथं चैष्यम्** ?' इत्येतदपि न स्मरन्ति । **एके भाषन्ते**—किमत्र ज्ञेयम् ? **यथैवास्य** राग-द्वेष-मोहसमुत्थैः कर्मभिः बध्यमानस्य जन्तोः तद्विपाकान् च अनुभवतः संसारस्य यदतिक्रान्तं आगाम्यपि तत् तत्प्रकारमेव इति । यदि वा प्रमाद-विषय-कषायादिना कर्माणि उपचित्य इष्टा-ऽनिष्टविषयाननुभवतः सर्वज्ञवाक्सुधा-स्वादाऽसंविदो यथा संसारोऽतिक्रान्तः तथा आगाम्यपि यास्यति ॥११॥

ये तु पुनः संसारार्णवतीरभाजः ते पूर्वोत्तरवेदिन इत्येतद् दर्शयितुमाह—

**णातीतमट्ठं ण य आगमिस्सं अट्ठं णियच्छंति तथागता उ ।**

**णातीयमित्यादि** । तथैव अपुनरावृत्त्या गतं—गमनं येषां ते = **तथागताः** सिद्धाः; यदि वा यथैव ज्ञेयं तथैव गतं—ज्ञानं येषां ते=**तथागताः** सर्वज्ञाः; ते तु **नातीतमर्थं**⊕ अनागतरूपतयैव **नियच्छन्ति**=अवधारयन्ति **नापि अनागतं** अतिक्रान्तरूपतयैव, विचित्रत्वात् परिणतेः, पुनः **अर्थ**ग्रहणं 卐पर्यायरूपार्थार्थम्, द्रव्यार्थतया तु एकत्वमेव इति । यदि वा **नातीतमर्थं** विषयभोगादिकं **नापि अनागतं** दिव्याङ्गनासङ्गादिकं स्मरन्ति अभिलषन्ति[1]; के ? **तथागताः** राग-द्वेषाभावात् पुनरावृत्तिरहिताः; **तुशब्दो** विशेषमाह यथा—[2]मोहोदयाद् एके पूर्वमागामि वा अभिलषन्ति; सर्वज्ञास्तु नैवमिति ।

तन्मार्गानुयायी अपि एवम्भूत[3] एव इति दर्शयितुमाह—

**विधूतकप्पे एताणुपस्सी णिज्झोसइत्ता ।**

**विहूयकप्पे** इत्यादि । विविधम्=अनेकधा धूतम्=अपनीतमष्टप्रकारं कर्म येन सः =विधूतः, कोऽसौ ? कल्पः=आचारः, विधूतः कल्पो[4] यस्य साधोः सः= **विधूतकल्पः**; स **एतदनुदर्शी** भवति, अतीता-ऽनागतसुखाभिलाषी न भवतीति यावत् । एतदनुदर्शी च

---

टि० १. **०न्ति वा । के ?** क-खपुस्तके विना ॥ २. **मोहभयादेके** ख ॥ ३. **०म्भूत इति दर्शयति-विहूय०** ख ॥ ४. **कल्पो येन स** ख ॥

वि०टि० ⊕ "**अर्थम्** इति सुखादिकम्" जै०वि०प० ॥ 卐 "**पर्यायरूपा०** इति पर्यायमाश्रित्य तदेव वस्तु तदेव न । किन्तु भिन्ना-ऽभिन्नरूपा" जै०वि०प० ॥

किंगुणो भवति ? इत्याह—

**निज्झोस०** इत्यादि । पूर्वोपचितकर्मणां **निर्झोषयिता** क्षपकः क्षपयिष्यति वा, तृजन्तमेतद् लुडन्तं वा । कर्मक्षपणाय उद्यतस्य च धर्मध्यायिनः शुक्लध्यायिनो वा महायोगीश्वरस्य निरस्तसंसारसुख-दुःखविकल्पाभासस्य[1] यत् स्यात् तद् दर्शयति—

## का अरती के आणंदे ? एत्थं पि अग्गहे चरे ।

**का अरई के आणंदे[2] ?** । इष्टाप्राप्ति-विनाशोत्थो मानसो विकारोऽरतिः, अभिलषितार्थावाप्तौ आनन्दः । योगिचित्तस्य तु[3] धर्म-शुक्लध्यानावेशावष्टब्धध्येयान्तराव-काशस्य अरत्यानन्दयोः उपादानकारणाऽभावाद् अनुत्थानमेव इत्यतोऽपदिश्यते—**का** इयं **अरति**र्नाम ? **को वा आनन्द** इति ?, नास्त्येव इतरजनक्षुण्णोऽयं विकल्प इति ।

एवं तर्हि अरतिः असंयमे संयमे चानन्द इत्येतद्[Φ] अन्यत्र अनुमतं अनेनाभिप्रायेण न विधेयं इत्येतद् अनिच्छतोऽपि आपन्नमिति चेत्; न, अभिप्रायाऽपरिज्ञानात्, यतोऽत्र अरति-रतिविकल्पाध्यवसायो निषिषित्सितः, न प्रसङ्गायाते अपि अरति-रती, तदाह—

**एत्थं पी**त्यादि । **अत्रापि**[4] अरतौ आनन्दे वा उपसर्जनप्राये, न विद्यते ग्रहः=गाद्धर्यं तात्पर्यं यस्य[5] सः=**अग्रहः**; स एवम्भूतः **चरेत्**=अवतिष्ठेत । इदमुक्तं भवति—शुक्लध्यानाद् आरतः अरत्यानन्दौ कुतश्चिन्निमित्ताद् आयातौ तदाग्रहग्रहरहितः तावपि अनुचरेदिति । पुनरपि उपदेशदानाय आह—

## सव्वं हासं परिच्चज्ज अल्लीणगुत्तो परिव्वए ॥१२४॥

**सव्वमित्यादि** । **सर्वं हास्यं** तदास्पदं वा **परित्यज्य**[6], आङ् मर्यादया इन्द्रिय-निरोधादिकया लीनः=आलीनः, गुप्तः मनो-वाक्-कायकर्मभिः, कूर्मवद् वा संवृतगात्रः, आलीनश्चासौ गुप्तश्च=**आलीनगुप्तः**, स एवम्भूतः परिः—समन्ताद् व्रजेत्=**परिव्रजेत्** संयमानुष्ठानविधायी भवेदिति ॥१२४॥

तस्य च मुमुक्षोः आत्मसामर्थ्यात् संयमानुष्ठानं फलवद् भवति, न परोपाधिना[7] इति दर्शयति— **पुरिसा** इत्यादि । यदि वा त्यक्तगृह-पुत्र-कलत्र-धन-धान्य-हिरण्यादितया अकिञ्चनस्य समतृण-मणि-मुक्ता-लेष्टु-काञ्चनस्य मुमुक्षोः उपसर्गव्याकुलितमतेः कदाचिद् मित्राद्याशंसा भवेत्, तदपनोदार्थमाह—

---

टि० १. **०संसारिसुख०** ग । **०संसारदुःख०** च ॥ २. **याणंदे** ग ॥ ३. **च** ख ॥ ४. **तत्रा०** ख ॥ ५. **यस्येत्यग्रहः** ख ॥ ६. **परित्यजेत( त् ) मर्या०** ख ॥ ७. **परोपरोधेनेति** घ ङ ॥

वि०टि० Φ "( ए )तदन्यत्र इति इहेव ग्रन्थे अन्यत्र प्रक्रमे" जै०वि०प० ॥

**[सू०] पुरिसा ! तुममेव तुमं मित्तं, किं बहिया मित्तमिच्छसि ?**

**पुरिसा** इत्यादि । पूर्णः सुख-दुःखयोः पुरि शयनाद् वा **पुरुषः** जन्तुः, पुरुषनद्वारा[1]-मन्त्रणं तु पुरुषस्यैव उपदेशार्हत्वात् तदनुष्ठानसमर्थत्वाच्च इति । कश्चित् संसारोद्विग्नो विषमस्थितो वा आत्मानं अनुशास्ति, परेण वा साध्वादिना अनुशास्यते, यथा–'हे **पुरुष** ! = हे जीव[2] ! **तव** सदनुष्ठानविधायित्वात् **त्वमेव मित्रम्,** विपर्ययात् च अमित्रः, **किमिति बहिः मित्रं इच्छसि**=मृगयसे ?'; यतो हि उपकारि मित्रम्, स च उपकारः पारमार्थिकात्यन्तिकैकान्तिकगुणोपेतं[3] सन्मार्गपतितं आत्मानं विहाय न अन्येन शक्यो विधातुम् । योऽपि संसारिसुखसाहाय्योपकारितया मित्राभासाभिमानः तन्मोहविजृम्भितम्; यतो महाव्यसनोपनिपातार्णवपतनहेतुत्वाद् अमित्र एव असौ । इदमुक्तं भवति–आत्मैव आत्मनोऽप्रमत्तो मित्रम्, आत्यन्तिकैकान्तिकपरमार्थसुखोत्पादनात्; विपर्ययाच्च विपर्ययः, न बहिः मित्रमन्वेष्टव्यमिति । यस्तु अयं बाह्यो मित्रा-ऽमित्रविकल्पः सोऽदृष्टोदयनिमित्तवशाद् औपचारिक इति । उक्तं हि–

> "**दुप्पत्थिओ अमित्तं[4] अप्पा सुप्पत्थिओ य ते मित्तं ।**
> **सुह-दुक्खकारणा[5] उ अप्पा मित्तं अमित्तं च ॥**" [ ]
>
> तथा–"**अप्येकं मरणं कुर्यात्, सङ्क्रुद्धो बलवानरिः ।**
> **मरणानि त्वनन्तानि, जन्मानि च करोत्ययम् ॥**" [ ]

यो हि निर्वाणनिर्वर्तकं वृत्तं आचरति स आत्मनो मित्रम्; स च एवम्भूतः कुतः अवगन्तव्यः किम्फलश्च ? इत्याह–

**जं जाणेज्जा उच्चालयितं तं जाणेज्जा दूरालयितं,**
**जं जाणेज्जा दूरालइतं तं जाणेज्जा उच्चालयितं ॥१२५॥**

**जं जाणेज्जा** इत्यादि । **यं** पुरुषं **जानीयात्**=परिच्छिन्द्यात् कर्मणां विषयसङ्गानां **च उच्चालयितारम्**=अपनेतारं **तं जानीयात् दूरालयिकम्** इति दूरे सर्वहेयधर्मेभ्य इति आलयो =दूरालयः मोक्षः तन्मार्गो वा, स विद्यते यस्य इति मत्वर्थीयष्ठन् **दूरालयिकः**, तमिति । हेतु-हेतुमद्भावं दर्शयितुं गत-प्रत्यागतसूत्रमाह–

**जं जाणेज्जा** इत्यादि । **यं जानीयाद् दूरालयिकं तं जानीयाद् उच्चा-**

---

टि० १. **०द्वाराद्वामन्त्रणं** ख ॥ २. **जीव ! ते तव** घ ङ ॥ ३. **०गुणोपेतः सुमार्ग०** ख ॥ ४. **अमित्तो** ग ॥ ५. **०कारणो** ३ ग । **०कारणाओ** ख घ च ॥

**लयितारमि**ति । ऐतदुक्तं[1] भवति– यो हि कर्मणां तदाश्रवद्वाराणां च उच्चालयिता=अपनेता स मोक्षमार्गव्यवस्थितो मुक्तो[2] वेति; यो वा सन्मार्गानुष्ठायी स कर्मणां उच्चालयितेति ॥१२५॥ स च आत्मनो मित्रम्, अतोऽपदिश्यते–

**[ सू० ]  पुरिसा ! अत्ताणमेव अभिणिगिज्झ, एवं दुक्खा पमोक्खसि ॥१२६॥**

**पुरिसा** इत्यादि । हे जीव ! **आत्मानमेव अभिनिगृह्य**=धर्मध्यानाद् बहिः विषयाभिष्वङ्गाय निःसरन्तमवरुध्य, ततः **एवम्** अनेन प्रकारेण **दुःखात्** सकाशाद् आत्मानं **प्रमोक्ष्यसि;** एवं आत्मा कर्मणामुच्चालयिता आत्मनो मित्रं भवति ॥१२६॥ अपि च–

**[ सू० ] पुरिसा ! सच्चमेव समभिजाणाहि । सच्चस्स आणाए से उवट्ठिए मेधावी मारं तरति ।**

**पुरिसा** इत्यादि । हे **पुरुष** ! सद्भ्यो हितः=**सत्यः** संयमः, तमेव अपर-व्यापारनिरपेक्षः **समभिजानीहि**=आसेवनापरिज्ञया समनुतिष्ठ यदि वा **सत्यमेव समभिजानीहि** गुरुसाक्षिगृहीतप्रतिज्ञानिर्वाहको भव । यदि वा **सत्यः**=आगमः, तत्परिज्ञानं च मुमुक्षोः तदुक्तप्रतिपालनम् । किमर्थमेतत् ? इति चेद्, आह–

**सच्चस्से**त्यादि । **सत्यस्य**=आगमस्य **आज्ञया उपस्थितः** सन्[3] **मेधावी मारं**=संसारं **तरति** । किञ्च–

**सहिते धम्ममादाय सेयं समणुपस्सति ।**

**सही**त्यादि । **सहितः**=ज्ञानादियुक्तः, सह हितेन वा युक्तः[4]=**सहितः, धर्मं** श्रुत-चारित्राख्यम्, **आदाय**=गृहीत्वा; किं करोति ? इत्याह– **श्रेयः** पुण्यमात्महितं वा, सम्यक् –अविपरीततया अनुपश्यति=**समनुपश्यति**[5] ।

उक्तोऽप्रमत्तः तद्गुणाश्च । तद्विपर्ययमाह–

**दुहतो जीवियस्स परिवंदण-माणण-पूयणाए, जंसि एगे पमादेंति ।**

**दुहओ** इत्यादि । **द्विधा** राग-द्वेषप्रकारद्वयेनात्म-परनिमित्तमैहिका-ऽऽमुष्मिकार्थं वा, यदि[6] वा द्वाभ्यां राग-द्वेषाभ्यां हतो=**द्विहतः**, दुष्टं हतो वा **दुर्हतः;** स किं कुर्यात् ? **जीवितस्य** कदलीगर्भनिःसारस्य तडिल्लतासमुल्लसितचञ्चलस्य **परिवन्दन-मानन-पूजनार्थं**

---

टि० १. इदमुक्तं भवति ख च ॥ २. मोक्षो वेति च ॥ ३. सन् मारं ख । सन् मेधावी घ ॥ ४. युक्तो धर्मं क घ ङ ॥ ५. सम्यक् पश्यति ख च ॥ ६. यद्वा ख ॥

हिंसादिषु प्रवर्तते । **परिवन्दनं**=परिसंस्तवः, तदर्थमाचेष्टते; 'लावकादिमांसोपभोगपुष्टं सर्वाङ्गोपाङ्गसुन्दरं आलोक्य मां जनाः सुखमेव परिवन्दिष्यन्ते—श्रीमान् ! जीव्याः त्वं बहूनि वर्षशतसहस्राणि' इत्येवमादि परिवन्दनम् । तथा **माननार्थं** कर्म्म उपचिनोति, 'दृष्टौरसबलपराक्रमं मामन्ये अभ्युत्थान-विनया-ऽऽसनदाना-ऽञ्जलिप्रग्रहैः मानयिष्यन्ति' इत्यादि माननम् । तथा **पूजनार्थमपि** प्रवर्तमानः कर्माश्रवैः आत्मानं भावयति, 'मम हि कृतविद्यस्य उपचितद्रव्यप्राग्भारस्य परो दान-मान-सत्कार-प्रणाम-सेवाविशेषैः पूजां करिष्यति' इत्यादि पूजनम् । तदेवमर्थं कर्म्म उपचिनोति । किञ्च—

[1]**जंसि एगे** इत्यादि । **यस्मिन्** परिवन्दनादिनिमित्ते **एके** राग-द्वेषोपहताः **प्रमाद्यन्ति**, न ते आत्मने हिताः । एतद्विपरीतं तु आह—

## सहिते दुक्खमत्ताए पुट्ठो णो झंझाए ।

[2]**सहिए** इत्यादि । **सहितः** ज्ञानादिसमन्वितः हितयुक्तो वा **दुःखमात्रया** उपसर्गजनितया व्याध्युद्भवया वा **स्पृष्टः** सन् **नो झंझाए** त्ति नो व्याकुलितमतिः भवेत्, तदपनयनाय न उद्यच्छेत् । इष्टविषयावाप्तौ रागझञ्झा, अनिष्टावाप्तौ च द्वेषझञ्झेति; तामुभयप्रकारामपि व्याकुलतां परित्यजेद् इति भावः । किञ्च—

## पासिमं, दविए लोगालोगपवंचातो मुच्चति त्ति बेमि ॥१२७॥

**॥ सीओसणिज्जस्स तृतीयोद्देशकः ॥**

**पासिममित्यादि** । यदुक्तं उद्देशकादेः आरभ्य अनन्तरसूत्रं यावत् तं **इमं** अर्थं **पश्य** =परिच्छिन्द्धि कर्तव्या[3]कर्तव्यतया विवेकेन अवधारय । कोऽसौ ?—**द्रव्यभूतः** मुक्तिगमनयोग्यः, साधुरित्यर्थः । एवम्भूतश्च कं गुणमवाप्नोति ?—आलोक्यत इति आलोकः, कर्मणि घञ्, लोके चतुर्दशरज्ज्वात्मके आलोकः=**लोकालोकः**, तस्य **प्रपञ्चः** पर्याप्तका-ऽपर्याप्तक-सुभगादिद्वन्द्वविकल्पः, तद्यथा—नारको नारकत्वेन अवलोक्यते, एकेन्द्रियादिः एकेन्द्रिय[?यादि]त्वेन; एवं पर्याप्तका-ऽपर्याप्तकाद्यपि वाच्यम् । तद् एवम्भूतात् प्रपञ्चात् **मुच्यते**, चतुर्दशजीवस्थानान्यतरव्यपदेशार्हो न भवतीति यावत्, **इतिः** परिसमाप्तौ, **ब्रवीमि** इति पूर्ववत् ॥१२७॥

**॥ इति शीतोष्णीया[4]ध्ययने तृतीयोद्देशक[5]टीका समाप्तेति ॥ छ ॥**

---

टि० १. **जंसेगे इत्यादि** ख ग च । **जंसेगेत्यादि** घ ङ ॥ २. **सद्धिए** क । **सहिओ** घ ङ ॥ ३. **०कर्तव्यताविवेकेना०** ॥ ४. **०ध्ययनतृतीयो०** ख ॥ ५. **०टीका परिसमाप्तेति** ख च । **०टीका परिसमाप्ता** ङ ॥

## ॥ चतुर्थ उद्देशकः ॥

उक्तः तृतीयोद्देशकः । साम्प्रतं चतुर्थ आरभ्यते । अस्य च अयमभिसम्बन्धः— इह अनन्तरोद्देशके पापकर्माऽकरणतया दुःखसहनादेव केवलात् श्रमणो न भवतीति अपि तु निष्प्रत्यूहसंयमानुष्ठानाद् इति एतत् प्रतिपादितम्; निष्प्रत्यूहता च कषायवमनाद् भवति; तदधुना प्राग् उद्देशार्थाधिकारनिर्दिष्टं प्रतिपाद्यते । तदनेन सम्बन्धेन आयातस्य अस्य उद्देशकस्य सूत्रानुगमे सूत्रमुच्चारयितव्यम्; तच्चेदम्—

**[ सू० ] से वंता कोहं च माणं च मायं च लोभं च ।**

**से वंता** इत्यादि । **स** ज्ञानादिसहितो दुःखमात्रास्पृष्टः अव्याकुलितमतिः द्रव्यभूतो लोकाऽलोकप्रपञ्चाद् मुक्तदेश्यः[1] स्व-परापकारिणं **क्रोधं वमिता**, **"टुवम् उद्गिरणे" [ पा० धा० १।८४९ ]** इति अस्मात् ताच्छीलिकः तृन्, तद्योगे च षष्ठ्याः प्रतिषेधे क्रोधशब्दाद् द्वितीया । लुडन्तं वा एतत्, यो हि यथोक्तसंयमानुष्ठायी सो अचिरादेव क्रोधं वमिष्यति; एवं उत्तरत्रापि यथासम्भवं आयोज्यम् । तत्र आत्मा-ऽऽत्मीयोपघातकारिणि क्रोधकर्मविपाकोदयात् **क्रोधः**, जाति-कुल-रूप-बलादिसमुत्थो गर्वो **मानः**, परवञ्चनाध्यवसायो **माया**, तृष्णापरिग्रहपरिणामो **लोभः** । क्षपणोपशमक्रममाश्रित्य च क्रोधादिक्रमोपन्यासः । अनन्तानुबन्धि-अप्रत्याख्यान-प्रत्याख्यानावरण-सञ्ज्वलनस्वगतभेदाविर्भावनाय व्यस्तनिर्देशः । **च**शब्दस्तु पर्वत-पृथिवी-रेणु-जलराजिलक्षणलक्षकः क्रोधस्य, शैलस्तम्भाऽस्थि-काष्ठ-तिनिशलतालक्षणलक्षको मानस्य, वंशकुडङ्गी-मेषशृङ्ग-गोमूत्रिका-⊕ऽवरंबकलक्षण[2]लक्षको मायायाः, कृमिराग-कर्दम-खञ्जन-हरिद्रालक्षणसूचको लोभस्य, तथा यावज्जीव-संवत्सर-चतुर्मास-पक्षस्थित्याविर्भावकश्च इति । तदेवं क्रोध-मान-माया-लोभवमनादेव पारमार्थिकः श्रमणभावः, न तत्सम्भवे सति; यत उक्तम्—

> **"सामण्णमणुचरंतस्स कसाया जस्स उक्कडा होंति ।**
> **मन्नामि उच्छुपुप्फं व निप्फलं तस्स सामण्णं ॥" [ दशवै०नि०८।३०१ ]**
> **"जं अज्जियं चरित्तं देसूणाए वि पुव्वकोडीए ।**
> **तं पि कसाइयमेत्तो हारेइ नरो मुहुत्तेणं ॥"**
> **[ बृ०क०भा०२७१५-५७४७, निशी०भा०२७९३ ]**

स्वमनीषिकापरिहारार्थं **गौतमस्वामी** आह—

---

टि० १. मुक्तदेशकः ङ॥ २. ०ऽवलेक्खि( खि ! )कलक्षण० ग । ०ऽवलेखलक्षण० च ॥

**एतं पासगस्स दंसणं उवरतसत्थस्स पलियंतकरस्स, आयाणं सगडब्भि ॥१२८॥**

**एयमि**त्यादि । **एतत्** यत् कषायवमनं अनन्तरं उपादेशि तत् '**पश्यकस्य दर्शनं**' सर्वं निरावरणत्वात् पश्यति=उपलभते इति पश्यः, स एव पश्यकः तीर्थकृत् श्री**वर्धमानस्वामी**, तस्य दर्शनम्=अभिप्रायः; यदि वा दृश्यते यथावस्थितवस्तुतत्त्वं अनेन इति दर्शनं उपदेशः, न स्वमनीषिका । किम्भूतस्य पश्यकस्य दर्शनम् ? इत्याह—

**उवरय०** इत्यादि । उपरतं द्रव्य-भावशस्त्रं यस्य असौ = **उपरतशस्त्रः**; शस्त्राद् वा उपरतः=**शस्त्रोपरतः**; भावशस्त्रं तु असंयमः कषाया वा, तस्माद् उपरतः । इदमुक्तं भवति— तीर्थकृतोऽपि कषायवमनं ऋते न निरावरणसकलपदार्थग्राहिपरमज्ञानावाप्तिः, तदभावे च[1] सिद्धिवधूसमागमसुखाभावः; एवं अन्येन अपि मुमुक्षुणा तदुपदेशवर्तिना तन्मार्गानुयायिना कषायवमनं विधेयमिति । शस्त्रोपरमकार्यं दर्शयन् पुनरपि [2]तीर्थकरविशेषणमाह—

[3]**पलियंतकडस्स** पर्यन्तं कर्मणां संसारस्य वा करोति तच्छीलश्चेति **पर्यन्तकरः**, तस्य एतद् दर्शनमिति [4]सण्टङ्कः । यथा च तीर्थकृत् संयमापकारिकषायशस्त्रोपरमात् कर्म-पर्यन्तकृद् एवं अन्योऽपि तदुक्तानुसारीति दर्शयितुमाह—

**आयाणमि**त्यादि । आदीयते=गृह्यते आत्मप्रदेशैः सह श्लिष्यते अष्टप्रकारं कर्म येन तद् **आदानं**, हिंसाद्याश्रवद्वारं अष्टादशपापस्थानरूपं वा तत्स्थितेः निमित्तत्वात् कषाया वा आदानं, तद्भमिता **स्वकृतभिद्** भवति, स्वकृतं अनेकजन्मोपात्तं कर्म भिनत्तीति **स्वकृतभित्** । यो हि आदानं कर्मणां कषायादि निरुणद्धि सोऽपूर्वकर्मप्रतिषिद्धप्रवेशः स्वकृतकर्मणां भेत्ता भवतीति भावः । तीर्थकरोपदेशेन अपि परकृतकर्मक्षपणोपायाभावात् **स्वकृत**ग्रहणम् । तीर्थकरेणापि [5]परकृतकर्मक्षपणोपायो न व्यज्ञायीति चेत्, तन्न, तज्ज्ञानस्य सकलपदार्थसत्ताव्यापित्वेन अवस्थानात् ॥१२८॥

ननु च हेयोपादेयपदार्थहानोपादानोपदेशज्ञोऽसौ, न सर्वज्ञ इति सङ्गिरामहे, एतावतैव परोपकारकर्तृत्वेन [6]तीर्थकरत्वोपपत्तेः; तदेतन्न सतां मनांसि आनन्दयति, युक्तिविकलत्वात्, यतः सम्यग्ज्ञानमन्तरेण हिता-ऽहित-प्राप्ति-परिहारोपदेशासम्भवः; यथावस्थितैकपदार्थ-परिच्छेदश्च न सर्वज्ञतामन्तरेणेति [7]दर्शयितुमाह—

---

टि० १. वा ग ॥ २. **तीर्थङ्कर०** ख ॥ ३. **पलियंतकरस्स** ख-गप्रती विना ॥ ४. **सम्बन्धः** ख ॥ ५. **परकृतक्षपणोपायो न चाज्ञायीति** ख ॥ ६. **तीर्थकरोपपत्तेः । तदेव न सतां** ख ॥ ७. **दर्शयति-जे एगं** ग ॥

**[ सू० ]   जे एगं जाणति से सव्वं जाणति,**
**जे सव्वं जाणति से एगं जाणति ।**

**जे एगं जाणइ** इत्यादि । **यः** कश्चिद् अविशेषितः **एकं** परमाण्वादि द्रव्यं पश्चात्पुरस्कृतपर्यायं स्व-परपर्यायं वा **जानाति**=परिच्छिनत्ति **स सर्वं** स्व-परपर्यायं **जानाति**=परिच्छिनत्ति, अतीता-ऽनागतपर्यायिद्रव्यपरिज्ञानस्य समस्तवस्तुपरिच्छेदाविनाभावित्वात् । इदमेव हेतु-हेतुमद्भावेन लगयितुमाह–

**जे सव्वमित्यादि । यः सर्वं** संसारोदरविवरवर्ति वस्तु **जानाति स एकं** घटादि वस्तु जानाति, तस्यैव अतीता-ऽनागतपर्यायभेदैः तत्तत्स्वभावापत्त्या अनाद्यनन्तकालतया समस्तवस्तुस्वभावगमनादिति । तदुक्तम्–

**''एगदवियस्स जे [⊕]अत्थपज्जवा वयणपज्जवा वा वि ।**
**तीया-ऽणागयभूया[1] [Φ]तावइयं तं हवइ दव्वं ॥''** [**सम्मति०१/३१**]

तदेवं सर्वज्ञः तीर्थकृत् । सर्वज्ञश्च सम्भविनमेव सर्वसत्त्वोपकारिणं उपदेशं ददाति इति दर्शयति–

**सव्वतो पमत्तस्स भयं, सव्वतो अप्पमत्तस्स णत्थि भयं ।**

**सव्वओ** इत्यादि । **सर्वतः** सर्वप्रकारेण द्रव्यादिना यद् भयकारि[2] कर्म्म उपादीयते [3]ततः **प्रमत्तस्य**=मद्यादिप्रमादवतः **भयं**=भीतिः, तद्यथा– प्रमत्तो हि कर्म्म उपचिनोति द्रव्यतः सर्वैः आत्मप्रदेशैः, क्षेत्रतः षड्दिग्व्यवस्थितम्, कालतोऽनुसमयम्, भावतो हिंसादिभिः । यदि वा[4] **सर्वतः** [5]सर्वत्र भयं इह अमुत्र च; एतद्विपरीतस्य च नास्ति भयमिति, आह च–

**सव्वओ** इत्यादि । **सर्वतः** ऐहिका-ऽऽमुष्मिकापायात् **अप्रमत्तस्य** आत्महितेषु जाग्रतो **नास्ति भयं** संसारापशदात् सकाशात् कर्मणो वा ।

अप्रमत्तता च कषायाऽभावाद् भवति, [6]तदभावाच्च अशेषमोहनीयाभावः, ततोऽपि

---

**टि०** १. **०भूता तावइयं हवति तं दव्वं** ख ॥ २. **भयकारणं** ख ग ॥ ३. **तत्** क ॥ ४. **वा सर्वत्र सर्वतो भय०** ख । **वा सर्वतोऽत्र सर्वतो भयं०** घ ङ । **वा सर्वतो भय०** ग ॥ ५. **सर्वतो भय०** क ॥ ६. **तदभावाच्च शेष०** क ॥

**वि०टि०** ⊕ ''**अत्थपज्जवा** इति यावद्भिर्घट-पटादिभिः पर्यायैः परमाण्वादिकं वस्तु परिणतम्'' जै०वि०प० ॥ Φ ''**तावइयमिति अनन्तम्**''जै०वि०प० ॥

अशेषकर्मक्षयः; तदेवं एकाभावे सति बहूनां अभावसम्भवः, [1]ऐकाभावोऽपि [2]च बह्वभावनान्तरीयक इत्येवं गत-प्रत्यागतसूत्रेण हेतु-हेतु[3]मद्भावं दर्शयितुमाह–

**जे एगणामे से बहुणामे, जे बहुणामे से एगणामे ।**

**जे एगं** इत्यादि । यो हि प्रवर्धमानशुभाऽध्यवसायाधिरूढकण्डकः **एकं** अनन्तानुबन्धिनं क्रोधं **नामयति**=क्षपयति **स बहून**पि मानादीन् **नामयति**=क्षपयति, अप्रत्याख्यानादीन् वा स्वभेदान् नामयति । मोहनीयं वा एकं यो नामयति स शेषा अपि प्रकृतीः नामयति । **यो** वा **बहून्** स्थितिविशेषान् **नामयति सो** अनन्तानुबन्धिनं **एकं नामयति**, मोहनीयं वा । तथा हि– एकोनसप्ततिभिः मोहनीयकोटीकोटिभिः क्षयं उपागताभिः ज्ञानावरणीय-दर्शनावरणीय-वेदनीया-ऽन्तरायाणां एकोनत्रिंशद्भिः नाम-गोत्रयोः एकोनविंशतिभिः शेषकोटीकोट्याऽपि देशोनया मोहनीयक्षपणार्हो भवति, नान्यदा इति; अतोऽपदिश्यते– **यो बहुनामः स** एव परमार्थत **एकनाम** इति । **नामः** इति क्षपकोऽभिधीयते, उपशा[?श]मको वा। उपशमश्रेण्याश्रयेण एक-बहूपशमता बह्वेकोपशमता वा वाच्या इति । तदेवं [4]बहुकर्माभावमन्तरेण [5]मोहनीयक्षयस्य उपशमस्य वा अभावः; तदभावे च जन्तूनां बहुदुःखसम्भव इति दर्शयति–

**दुक्खं लोगस्स जाणित्ता, वंता लोगस्स संजोगं, जंति वीरा महाजाणं । परेण परं जंति, णावकंखंति जीवितं ।**

**दुक्खमि**त्यादि । **दुःखं** असातोदयः तत्कारणं वा कर्म, तत् **लोकस्य**=भूतग्रामस्य ज्ञपरिज्ञया **ज्ञात्वा** प्रत्याख्यानपरिज्ञया च यथा तदभावो भवति तथा विदध्यात् । कथं तदभावः ? का वा [6]तदभावे गुणावाप्तिः ? इति उभयमपि दर्शयितुमाह–

**वंता** इत्यादि । **वान्त्वा**=त्यक्त्वा, **लोकस्य**=आत्मव्यतिरिक्तस्य धन-पुत्र-शरीरादेः **संयोगं** ममत्वपूर्वकं सम्बन्धं शारीरदुःखादिहेतुं तद्धेतुककर्मोपादानकारणं वा, **यान्ति**= गच्छन्ति [7]**वीराः** = कर्मविदारणसहिष्णवः, यान्ति अनेन मोक्षमिति **यानं** चारित्रम्, तच्च अनेकभवकोटिदुर्लभं लब्धमपि प्रमाद्यतः तथाविधकर्मोदयात् स्वप्नावाप्तनिधिसमतां अवाप्नोति अतो महच्छब्देन विशेष्यते, महच्च तद् यानं च **महायानम्,** यदि वा महद् यानं सम्यग्दर्शनादित्रयं यस्य सः = **महायानः** मोक्षः, तं यान्तीति सम्बन्धः ।

---

टि० १. **एकाभावो हि बह्व०** ख । **एकभावोऽपि बहुभाव०** ङ ॥ २. **च** इति कप्रतावेव ॥ ३. **०मद्भावेन दर्श०** ग ॥ ४. **बह्वेककर्माभाव०** ग ॥ ५. **मोहनीयस्य क्षयोपशमस्य** ख । **मोहनीयस्य क्षयस्योप०** ग च ॥ ६. **तदभावात[ ?त् ]** च ॥ ७. **धीराः** घ-ङप्रती विना ॥

स्यात्– किमेकेनैव भवेन अवाप्तमहायानदेश्यचारित्रस्य मोक्षावाप्तिः उत पारम्पर्येण ?, उभयथाऽपि[१] ब्रूमः, तद्यथा– अवाप्ततद्योग्यक्षेत्र-कालस्य लघुकर्मणः तेनैव भवेन मुक्त्यवाप्तिः, अपरस्य तु अन्यथा इति दर्शयति–

**परेण परमि**त्यादि । सम्यक्त्वप्रतिषिद्धनरक-तिर्यग्गतयो [२]ज्ञानावाप्तयथाशक्ति-प्रतिपालितसंयमा आयुषः क्षयात् सौधर्मादिकं देवलोकं अवाप्नुवन्ति; ततोऽपि पुण्यशेषतया कर्मभूमि-आर्यक्षेत्र-सुकुलोत्पत्त्या-ऽऽरोग्य-श्रद्धा-श्रवण-संयमादिकं अवाप्य विशिष्टतरं स्वर्गं अनुत्तरोपपातिकपर्यन्तं अधितिष्ठन्ति; पुनरपि ततश्च्युतस्य अवाप्तमनुष्यादिसंयम-[३]भावस्य अशेषकर्मक्षयाद् मोक्षः; तदेवं **परेण**=संयमेन उद्दिष्टविधिना **परं**=स्वर्गं पारम्पर्येण अपवर्गमपि **यान्ति**। यदि वा **परेण**=सम्यग्दृष्टिगुणस्थानेन **परं**=देशविरत्याद्ययोगिकेवलि-पर्यन्तं गुणस्थानकं अधितिष्ठन्ति। परेण वा अनन्तानुबन्धिक्षयेण उल्लसत्कण्डकस्थानाः परं दर्शनमोहनीय-चारित्रमोहनीयक्षयं घातिभवोपग्राहिकर्मणां वा क्षयमवाप्नुवन्ति । एवंविधाश्च कर्मक्षपणोद्यता **जीवितं** 'कियद् गतं किं वा शेषम् ?' इत्येवं **नावकाङ्क्षन्ति**, दीर्घ[४]जीवित्वं नाभिलषन्तीत्यर्थः, असंयमजीवितं वा नावकाङ्क्षन्तीति । यदि वा **परेण परं यान्ति** इति [५]उत्तरोत्तरं ⊕तेजोलेश्यामवाप्नुवन्तीति । उक्तं च–

**''जे इमे Φअज्जत्ताए समणा निग्गंथा विहरंति एए णं Δकस्स तेयलेस्सं वीतीवयंति ?, गोयमा ! [६]मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेयलेस्सं वीतीवयंति । एवं दुमासपरियाए असुरिंदवज्जियाणं भवणवासीणं देवाणं, तिमासपरियाए असुरकुमाराणं देवाणं, चउमासपरियाए [७]गह-नक्खत्त-तारारूवाणं जोइसियाणं देवाणं, पंचमासपरियाए चंदिम-सूरियाणं [८]जोइसिंदाणं [९]जोइसराईणं तेजोलेस्सं, छम्मासपरियाए सोहम्मीसाणाणं देवाणं, सत्तमासपरियाए सणंकुमार-माहिंदाणं देवाणं, अट्ठमासपरियाए बंभलोग-लंतगाणं देवाणं, नवमासपरियाए महसुक्क-सहस्साराणं देवाणं, दसमासपरियाए आणय-पाणय-आरण-अच्चुयाणं देवाणं, [१०]एगारसमासपरियाए गेवेज्जाणं, बारसमासे समणे निग्गंथे अणुत्तरोववाइयाणं देवाणं तेयलेस्सं वीईवयइ, तेण परं [११]सुक्के सुक्काभिजाई**

---

टि० १. ०पि क्रमः । तथा चावाप्त० क ॥ २. ज्ञानावाप्तियथा० ख ग च विना ॥ ३. ०भावस्य शेष० ग ॥ ४. ०जीवितं ख ॥ ५. ०उत्तरोत्तरं ख ॥ ६. एगमासपरियाए ख ॥ ७. गहगण-णक्खत्त० ख घ च ॥ ८. जोइसियाणं जोइसरातीणं ख च । ग-ङप्रत्योः पाठपतनम् ॥ ९. जोइसराणं क ॥ १०. एक्कारसमासे मेवे० ख । एक्कारसमासपरि० च ॥ ११. मुक्के मुक्काभिजाई ग ॥

वि०टि० ⊕ ''तेजोलेश्याम् इति सुखलेश्य(श्या)म्'' जै०वि०प० ॥ Φ ''अज्झत्ता[ए] इति अज्झत्तया'' जै०वि०प० ॥ Δ कस्स इति देवादेः'' जै०वि०प० ॥ 卐 ''शुक्लाभिज्झस (सुक्काभिजाई सिज्झइ ?) इति शुक्लं सिद्धम्'' जै०वि०प० ॥

**भवित्ता ततो पच्छा सिज्झइ ।" [ व्या०प्रज्ञ०१४।९।५३७ ]**

यश्च अनन्तानुबन्ध्यादिक्षपणोद्यतः स किं[1] एकक्षयादेव अपवर्तते उत न ? इत्याह[2]–

**एगं विगिंचमाणे पुढो विगिंचइ, पुढो विगिंचमाणे एगं विगिंचइ सड्ढी आणाए मेधावी ।**

**एगं विगिंचमाणे** इत्यादि । **एकम्**=अनन्तानुबन्धिनं क्रोधं क्षपकश्रेण्यारूढः **क्षपयन् पृथक्** अन्यदपि दर्शनादिकं **क्षपयति** । बद्धायुष्कोऽपि दर्शनसप्तकं यावत् क्षपयति **पृथक्** अन्यदपि **क्षपयन्** अवश्यं अनन्तानुबन्धिनं **एकं क्षपयति**, पृथक्क्षयान्यथानुपपत्तेः[3] । किंगुणः पुनः क्षपकश्रेणियोग्यो भवति ? इत्याह–

**सड्ढी** इत्यादि । (श्रद्धा–मोक्षमार्गोद्यमेच्छा विद्यते[4] यस्य असौ = **श्रद्धावान्**, **आज्ञया**= तीर्थकरप्रणीतागमानुसारेण यथोक्तानुष्ठानविधायी **मेधावी**=अप्रमत्तयतिः मर्यादा-व्यवस्थितः श्रेण्यर्हः, नापर इति । किञ्च–)

**लोगं च आणाए अभिसमेच्चा अकुतोभयं ।**

**लोगं च** इत्यादि । **चः** समुच्चये, **लोकं**=षड्जीवनिकायात्मकं कषायलोकं वा, **आज्ञया**=मौनीन्द्रागमोपदेशेन, **अभिसमेत्य**=ज्ञात्वा षड्जीवनिकायलोकस्य यथा न कुतश्चिद् निमित्ताद् भयं भवति तथा विधेयम् । कषायलोकप्रत्याख्यानपरिज्ञानाच्च तस्यैव परिहर्तुः न कुतश्चिद् भयमुपजायत इति । **लोकं** वा चराऽचरं **आज्ञया**=आगमाभिप्रायेण **अभिसमेत्य न कुतश्चिद्** ऐहिका–ऽऽमुष्मिकापायसन्दर्शनतो **भयं** भवति । तच्च भयं शस्त्राद् भवति; तस्य च शस्त्रस्य प्रकर्षगतिः अस्ति उत न ? इति, अस्तीति दर्शयति–

**अत्थि सत्थं परेण परं, णत्थि असत्थं परेण परं ॥१२९॥**

**अत्थि** इत्यादि । तत्र द्रव्यशस्त्रं कृपाणादि, तत् **परेणा**पि **परमस्ति**, तीक्ष्णादपि तीक्ष्णतरमस्ति, लोह–कर्तृसंस्कारविशेषात् । यदि वा **शस्त्रं** इति उपघातकारि, तत एकस्मात् पीडाकारिणोऽन्यत् पीडाकारी उत्पद्यते, ततोऽपि अपरम्, ततोऽपि अपरमिति, तद्यथा–कृपाणाभिघाताद् वातोत्कोपः[5], ततः शिरोऽर्तिः, तस्या[6] ज्वरः, ततोऽपि मुखशोष-मूर्च्छादयः इति । भावशस्त्रपारम्पर्यं तु एकसूत्रान्तरितं स्वत एव प्रत्याख्यानपरिज्ञाद्वारेण वक्ष्यति । यथा च शस्त्रस्य प्रकर्षगतिः अस्ति [7]पारम्पर्यं वा विद्यते अशस्त्रस्य तथा नास्तीति

टि० १. **किमेकादिक्षपणादेवाप०** ख ॥ २. **इत्यत्राह** ख ग च ॥ ३. **पृथगन्यक्षया०** ग ॥ ४. **वर्तते** च ॥ ५. **वातोत्कोचः** ख च ॥ ६. **तस्माद् ज्वरः** ख च ॥ ७. **पारम्पर्येण वा** ग ॥

दर्शयितुमाह–

**नत्थि** इत्यादि । **नास्ति**=न विद्यते, किं तद् ? **अशस्त्रं**=संयमः, तत् **परेण परम्** इति प्रकर्षगत्यापन्नमिति । तथा हि– पृथिव्यादीनां सर्वत्र तुल्यता कार्या, न[1] तीव्र-मन्द-भेदोऽस्ति, पृथिव्यादिषु समभावत्वात् सामायिकस्य । अथवा शैलेश्यवस्थासंयमादपि परः[2] संयमो नास्ति, तदूर्ध्वं गुणस्थानाभावादिति भावः ॥१२९॥

यो हि क्रोधं [उपादानतो बन्धनतः स्थितितो विपाकतोऽनन्तानुबन्धिलक्षणतः क्षयमाश्रित्य प्रत्याख्यानपरिज्ञया जानाति] सोऽपरमानादिदर्शी अपि इति एतदेव प्रतिसूत्रं लगयितव्यं इत्याह–

**[सू०] जे कोहदंसी से माणदंसी, जे माणदंसी से मायदंसी, जे मायदंसी से लोभदंसी, जे लोभदंसी से पेज्जदंसी, जे पेज्जदंसी से दोसदंसी, जे दोसदंसी से मोहदंसी, जे मोहदंसी से गब्भदंसी, जे गब्भदंसी से जम्मदंसी, जे जम्मदंसी से मारदंसी, जे मारदंसी से णिरयदंसी, जे णिरयदंसी से तिरियदंसी, जे तिरियदंसी से दुक्खदंसी ।**

**जे कोहदंसी**त्यादि । **यो** हि **क्रोधं** स्वरूपतो वेत्ति, अनर्थपरित्यागरूप[3]त्वाद् ज्ञानस्य परिहरति च; **स मानम**पि पश्यति परिहरति च इति । यदि वा **यः क्रोधं** पश्यति आचरति; **स मानम**पि पश्यति, मानाध्मातो भवतीत्यर्थः । एवं उत्तरत्रापि आयोज्यं यावत् स **दुःखदर्शी**ति, सुगमत्वाद् न विव्रियते । साम्प्रतं क्रोधादेः साक्षाद् निवर्तनमाह–

**से मेहावी अभिणिवट्टेज्जा कोधं च माणं च मायं च लोभं च पेज्जं च दोसं च मोहं च गब्भं च जम्मं च मारं च णरगं च तिरियं च दुक्खं च ।**

**से** इत्यादि । **स मेधावी अभिनिवर्तयेत्**=व्यावर्तयेत्, किं तत् ? **क्रोधं** इत्यादि यावद् **दुःखम्**, सुगमत्वाद् व्याख्यानाऽभावः । स्वमनीषिकापरिहारार्थमाह–

**एयं पासगस्स दंसणं उवरयसत्थस्स पलियंतकरस्स, आयाणं निसिद्धा सगडब्भि ॥१३०॥**

**एयमि**त्यादि । **एतत्** अनन्तरोक्तं उद्देशकादेः वा आरभ्य **पश्यकस्य**=तीर्थकृतः **दर्शनम्**= अभिप्रायः, किम्भूतस्य ? **उपरतशस्त्रस्य पर्यन्तकृतः** । पुनरपि किम्भूतोऽसौ ?–

---

टि० १. न मन्दतीव्र-भेदोऽस्तीति ग ऋते ॥ २. परं क ॥ ३. ०रूपाद् घ ॥

**आयाणमि**त्यादि । **आदानं**=कर्मोपादानं **निषेध्य** पूर्व**स्वकृतकर्मभिद्** असौ इति ॥१३०॥

किं च अस्य भवति ? इत्याह–

## [ सू० ] किमत्थि उवधी पासगस्स, ण विज्जति ?; णत्थि त्ति बेमि ॥१३१॥

**॥ सीतोसणिज्जं ततियमज्झयणं सम्मत्तं ॥**

**किमत्थि** इत्यादि । **पश्यकस्य**=केवलिनः **उपाधिः**=विशेषणम्, उपाधीयत इति[1] वा उपाधिः द्रव्यतो हिरण्यादिः, भावतोऽष्टप्रकारं कर्म । स द्विविधोऽपि उपाधिः **किमस्ति** आहोस्विद् **न विद्यते** ?, **नास्तीति** एतदहं **ब्रवीमि**, [2]**सुधर्मस्वामी जम्बूस्वामिने** कथयति यथा–सोऽहं ब्रवीमि येन मया भगवत्पादारविन्दं उपासता सर्वं एतद् अश्रावि तद् भवते तदुपदिष्टार्थानुसारितया कथयामि, न पुनः स्वमतिविकल्पशिल्परचनया इति ॥१३१॥

गतः सूत्रानुगमः । तद्गतौ च समाप्तश्चतुर्थोद्देशकः ।

तत्समाप्तौ च अतीता-ऽनागतनयविचारातिदेशात्

**समाप्तं शीतोष्णीयाध्ययनमिति ॥ छ ॥**

**ग्रन्थाग्रम् ७९० ॥ छ ॥**

---

टि० १. **इत्युपाधिः** ख ॥ २. **गौतमस्वामी** घ ङ ॥

# चतुर्थं
# सम्यक्त्वाध्ययनम्

जे आसवा ते परिस्सवा,
जे परिस्सवा ते आसवा।
[सू०१३४]

## ।। चतुर्थमध्ययनं सम्यक्त्वम् ।।

### ।। प्रथम उद्देशकः ।।

उक्तं तृतीयमध्ययनम्। साम्प्रतं चतुर्थमारभ्यते। अस्य च अयमभिसम्बन्धः– इह **शस्त्रपरिज्ञायां** अन्वय-व्यतिरेकाभ्यां षड्जीवनिकायान् व्युत्पादयता जीवा-ऽजीवपदार्थद्वयं व्युदपादि[1], तद्वधे बन्धं विरतिं च भणता आश्रव-संवरपदार्थद्वयमूचे, तथा **लोकविजयाध्ययने** लोको यथा बध्यते यथा[2] च मुच्यते इति वदता बन्ध-निर्जरे गदिते, **शीतोष्णीयाध्ययने** तु शीतोष्णरूपाः परीषहाः सोढव्या इति भणता तत्फललक्षणो मोक्षो अभिहितः, ततः च अध्ययनत्रयेण सप्तपदार्थात्मकं तत्त्वमभिहितम्, तत्त्वार्थश्रद्धानं च[3] सम्यक्त्वमुच्यते, तदधुना प्रतिपाद्यते। तदनेन[4] सम्बन्धेन आयातस्य अस्य अध्ययनस्य चत्वार्यनुयोगद्वाराणि व्यावर्ण्य उपक्रमे अर्थाधिकारो द्वेधा। तत्र अध्ययनार्थाधिकारः सम्यक्त्वाख्यः **शस्त्रपरिज्ञायां** प्रागेवाभाणि*। उद्देशकार्थाधिकारप्रतिपादनाय तु **निर्युक्तिकारः** आह–

[नि०] **पढमे सम्मावाओ बितिए धम्मप्पवादियपरिक्खा।**
**ततिए अणवज्जतवो न हु बालतवेण मोक्खो त्ति ।।२१६।।**

[नि०] **उद्देसे[5] उ[6] चउत्थे समासवयणेण णियमणं भणियं।**
**तम्हा य नाण-दंसण-तव-चरणे होति जतियव्वं ।।२१७।।**

**पढमे**[7] इत्यादि गाथा, **उद्देसम्मि** गाहा। प्रथमोद्देशके **सम्यग्वाद** इति अयमर्थाधिकारः, सम्यग्–अविपरीतो वादः=सम्यग्वादः यथावस्थितवस्त्वाविर्भावनम्। **द्वितीये** तु **धर्मप्रवादिकपरीक्षा,** धर्मं प्रवदितुं शीलं येषां ते=धर्मप्रवादिनः, त एव **धर्मप्रवादिकाः**, धर्मप्रावादुका इत्यर्थः, तेषां **परीक्षा**=युक्ताऽयुक्तविचारणमिति। **तृतीये अनवद्यतपो**व्यावर्णनम्, **न च बालतपसा**=अज्ञानतपश्चरणेन[8] **मोक्ष** इति अयमर्थाधिकारः।

**चतुर्थोद्देशके तु समासवचनेन**=सङ्क्षेपवचनेन **नियमनं भणितं**=संयम उक्त इति। तदेवं प्रथमोद्देशके सम्यग्दर्शनमुक्तम्, द्वितीये तु सम्यग्ज्ञानम्, तृतीये[9] बालतपोव्युदासेन

---

टि० १. व्युत्पादितम्, तद्वधे च ।। २. यद्वा मुच्यते क ।। ३. तु ख ।। ४. अनेन ख विना ।। ५. उद्देसम्मि चउत्थे क-छप्रती विना ।। ६. य छ ।। ७. पढमे गाहा ख च ।। ८. अज्ञानितप० ख ऋते ।। ९. तृतीयेऽज्ञानितपो ख च ।।

वि०टि० * दृश्यतां आचा०नि०३३ ।।

सम्यक्तपः, चतुर्थे तु सम्यक्चारित्रमिति। **तस्मात् च**शब्दः हेतौ, यतश्चतुष्टयमपि मोक्षाङ्गं प्रागुक्तं तस्माद् **ज्ञान-दर्शन-तपश्चरणेषु** मुमुक्षुणा **यतितव्यं** तत्प्रतिपालनाय यावज्जीवं यत्नो विधेय इति गाथाद्वयार्थः ॥२१६-२१७॥

अधुना नामनिष्पन्ननिक्षेपायातस्य सम्यक्त्वाभिधानस्य निक्षेपं चिकीर्षुराह–

**[नि०]  नामं ठवणा सम्मं दव्वसम्मं च भावसम्मं च।**
**एसो खलु सम्मस्सा निक्खेवो चउव्विहो होइ ॥२१८॥**

**नामं** गाहा। अक्षरार्थः सुगमः ॥२१८॥ भावार्थः तु सुगमनाम-स्थापनाव्युदासेन द्रव्य-भावगतं **निर्युक्तिकारः** प्रतिपिपादयिषुराह–

**[नि०]  अह दव्वसम्म[१] इच्छाणुलोमियं तेसु तेसु दव्वेसुं ।**
**कय संखय संजुत्ती[२] पउत्त[*] जढ भिन्न छिण्णं च[३] ॥२१९॥**

**अह दव्व०** गाहा। **अथ** इति आनन्तर्ये, ज्ञशरीर-भव्यशरीरव्यतिरिक्तं **द्रव्य-सम्यक्त्वं** इत्याह– **ऐच्छानुलोमिकम्,** इच्छा=चेतःप्रवृत्तिः अभिप्रायः, तस्यानुलोमम्= अनुकूलम्, तत्र भवम्=ऐच्छानुलोमिकम्। तच्च[४] **तेषु तेषु**[५] इच्छाभावानुकूल्यताभाक्षु द्रव्येषु कृताद्युपादिभेदेन सप्तधा भवति, तद्यथा–

**कृतम्** अपूर्वमेव निर्वर्त्तितं रथादि, तस्य च यथाऽवयवलक्षणनिष्पत्तेः द्रव्यसम्यक्, कर्तुः तन्निमित्तचित्तस्वास्थ्योत्पत्तेः; यदर्थं वा कृतं[६] तस्य शोभना-ऽऽशुकरणतया समाधानहेतुत्वाद् वा द्रव्यसम्यक् १। एवं **संस्कृते**ऽपि योज्यम्, तस्यैव रथादेः भग्न-जीर्णा-ऽपोढापरावयवसंस्करणादिति २। तथा ययोः द्रव्ययोः संयोगो गुणान्तराधानाय नोपमर्दाय उपभोक्तुः वा मनःप्रीतये पयःशर्करयोरिव तत् **संयुक्त**द्रव्यसम्यक् ३। तथा यत् **प्रयुक्तं** द्रव्यं लाभहेतुत्वाद् आत्मनः समाधानाय प्रभवति तत् प्रयुक्तद्रव्यसम्यक्, पाठान्तरं वा '**उवउत्त**' त्ति, यत् **उपयुक्तम्**=अभ्यवहृतं द्रव्यं मनःसमाधानाय प्रभवति तद् उपयुक्तद्रव्यसम्यक् ४। तथा **जढं**=परित्यक्तं यद् भारादि तत् त्यक्तद्रव्यसम्यक् ५। तथा दधिभाजनादि **भिन्नं** सत् काकादिसमाधानोत्पत्तेः भिन्नद्रव्यसम्यक् ६। तथा अधिकमांसादिच्छेदात्[७] **च्छिन्न**द्रव्यसम्यक् ७। सर्वमप्येतत् समाधानकारणत्वाद्[८] द्रव्यसम्यक्, विपर्ययादसम्यगिति गाथार्थः ॥२१९॥

टि० १. **दव्वसम्ममिच्छा०** ज ठ ॥ २. **संजुत्तोपउत्त** कप्रतिमृते॥ ३. **वा** ख छ ज ठ ॥ ४. **तत्र तेषु इच्छाविशेषभाक्षु** ख॥ ५. **तेषु इच्छानुकूल्य०** ग॥ ६. **कृतस्तस्य** ख ग॥ ७. **०च्छेदे च्छिन्न०** ख॥ ८. **समाधानकारित्वाद्** ग॥

वि०टि० * **संजुत्तोपउत्त**' शीपा०॥

[१]भावसम्यक्प्रतिपादनायाह–

**नि०] तिविहं तु भाव[२]सम्मं दंसण नाणे तहा चरित्ते य।**
**दंसण-चरणे तिविहे नाणे दुविहं तु नायव्वं॥२२०॥**

**तिविहं** गाहा। **त्रिविधं भावसम्यग्** दर्शन-ज्ञान-चारित्रभेदात्। पुनरपि एकैकं भेदत आचष्टे– तत्र **दर्शन-चरणे** प्रत्येकं **त्रिविधे,** तद्यथा– अनादिमिथ्यादृष्टेः अकृतत्रिपुञ्जस्य यथाप्रवृत्तकरणक्षीणशेष[३]कर्मदेशोनसागरोपमकोटीकोटिस्थितिकस्य अपूर्वकरणभिन्नग्रन्थेः मिथ्यात्वानुदयलक्षणं अन्तरकरणं विधाय अनिवृत्तिकरणेन प्रथमं सम्यक्त्वमुत्पादयतः औपशमिकं दर्शनम्, उक्तं च–

**"ऊसरदेसं दड्ढेल्लयं [४]वि विज्झाइ वणदवो पप्प।**
**इय मिच्छत्ताणुदये उवसमसम्मं लहइ जीवो॥"**

**[विशेषाव०२७३४,बृ०क०भा०१२२]**

उपशमश्रेण्यां वौपशमिकमिति १। तथा सम्यक्त्वपुद्गलोपष्टम्भजनिताध्यवसायः क्षायोपशमिकम् २। दर्शनमोहनीयक्षयात् क्षायिकम् ३।

चारित्रमपि उपशमश्रेण्यां औपशमिकम् १, कषायक्षयोपशमात् क्षायोपशमिकम् २, चारित्रमोहनीयक्षयात् [५]क्षायिकम् ३।

**ज्ञाने तु** भावसम्यग् **द्विधा ज्ञातव्यम्,** तद्यथा– क्षायोपशमिकं क्षायिकं च। तत्र चतुर्विधज्ञानावरणीयक्षयोपशमाद् मत्यादि चतुर्विधं क्षायोपशमिकं ज्ञानम्। समस्तक्षयात् क्षायिकं केवलज्ञानमिति॥२२०॥

तदेवं त्रिविधेऽपि भावसम्यक्त्वे दर्शिते सति परः चोदयति– यद्येवं त्रयाणामपि सम्यग्वादसम्भवे कथं दर्शनस्यैव सम्यक्त्ववादो रूढो यद् इहाध्ययने व्यावर्ण्यते?, उच्यते– तद्भावभावित्वाद् इतरयोः, तथा हि– मिथ्यादृष्टेः ते न स्तः। अत्र च सम्यक्त्व-प्राधान्यख्यापनाय अन्धेतरराजकुमारद्वयेन बाला-ऽङ्गनाद्यवबोधार्थं दृष्टान्तमाचक्षते, तद्यथा–

[६]**उदयसेन**स्य राज्ञो **वीरसेन-सूरसेन**कुमारद्वयम्। तत्र **वीरसेनो**ऽन्धः। स च तत्प्रायोग्याः गान्धर्वादिकाः कला ग्राहितः। इतरस्तु अभ्यस्त**धनुर्वेदो** लोकश्लाघ्यां पदवीमगमत्। एतच्च समाकर्ण्य **वीरसेने**नापि राजा विज्ञप्तो यथा– 'अहमपि **धनुर्वेदा**भ्यासं विदधे'। राज्ञाऽपि तदाग्रहं अवगम्य अनुज्ञातः। ततोऽसौ सम्यगुपाध्यायोपदेशात् प्रज्ञातिशयाद् अभ्यासविशेषाच्च शब्दवेधी सञ्जज्ञे। तेन च आरूढयौवनेन स्वभ्यस्त**धनुर्वेद**विज्ञानक्रियेण अगणित-

टि० १. नास्तीयमुत्थानिका गप्रतौ॥ २. **तिविहं** ख छ झ ठ। **तिविहं दुविहं णाणे उ नायव्वं** ञ॥ ३. ०**कर्मणो देशोन०** ग च॥ ४. **व्व** ग। **च** घ ङ च॥ ५. **क्षायिकमिति ३** ख ङ॥ ६. **उदयवर्मणो राज्ञो** ग॥

[1]चक्षुर्दर्शनसद-ऽसद्भावेन शब्दवेधित्वावष्टम्भात् परबलोपस्थाने सति राजा युद्धाय आदेशं याचितः। तेनापि याच्यमानेन वितेरे। **वीरसेनेन** च [2]शब्दानुवेधितया परानीके जजृम्भे। परैः चावगतकुमारान्धभावैः मूकतामालम्ब्य असौ जगृहे। **सूरसेनेन** च विदितवृतान्तेन राजानमापृच्छ्य निशितशरशतजालावष्टब्धपरानीकेन मोचितः।

तदेवं अभ्यस्तविज्ञान-क्रियोऽपि चक्षुर्विकलत्वाद् नालं अभिप्रेतकार्यसिद्धये इति। एतदेव **निर्युक्तिकारो** गाथया उपसंहर्तुमाह–

[नि०] **कुणमाणो वि य किरियं परिच्चयंतो वि सयण-धण-भोए।**
**[3]दिंतो वि दुहस्स उरं ण जिणइ अंधो पराणीयं॥२२१॥**

**कुणमाणो** गाहा। **कुर्वन्नपि क्रियां परित्यजन्नपि स्वजन-धन-भोगान् दददपि दुःखस्य उरः न जयत्यन्धः परानीकमिति** गाथार्थः॥२२१॥

तदेवं दृष्टान्तमपदर्श्य दार्ष्टान्तिकमाह–

[नि०] **कुणमाणो वि [4]णिवित्तिं परिच्चयंतो वि सयण-धण-भोए।**
**[5]दिन्तो वि दुहस्स उरं मिच्छद्दिट्ठी ण सिज्झइ उ[6]॥२२२॥**

**कुणमाणो** गाहा। **कुर्वन्नपि निवृत्तिं** अन्यदर्शनाभिहिताम्, तद्यथा–'पञ्च यमाः पञ्च नियमाः' इत्यादिकां तथा **परित्यजन्नपि स्वजन-धन-भोगान्** पञ्चाग्नितपआदिना **दददपि दुःखस्य उरः, मिथ्यादृष्टिः न सिध्यति।** तुः अवधारणे, नैव सिध्यति, दर्शनविकलत्वाद् अन्धकुमारवदसमर्थः कार्यसिद्धये॥२२२॥ यत एवं ततः किं कर्तव्यम्? इत्याह–

[नि०] **तम्हा कम्माणीयं जेउमणो दंसणम्मि पयएज्जा।**
**दंसणवतो हि सफलाणि होंति तव-णाण-[7]चरणाणि॥२२३॥**

**तम्हा** गाहा। यस्मात् सिद्धिमार्गमूलास्पदसम्यग्दर्शनमन्तरेण न कर्मक्षयः स्यात् **तस्मात्** कारणात् **कर्मानीकं जेतुमनाः** सम्यग्**दर्शने प्रयतेत**। तस्मिंश्च सति यद् भवति तद् दर्शयति– **दर्शनवतो हि, हिः** हेतौ, यस्मात् [8]सम्यग्दर्शनिनः **सफलानि भवन्ति तपो-ज्ञान-चरणानि,** अतः तत्र यत्नवता भाव्यमिति गाथार्थः॥२२३॥

प्रकारान्तरेणापि [9]सम्यग्दर्शनस्य तत्पूर्वकाणां च गुणस्थानकानां गुणमाविर्भावयितुमाह–

टि० १. **०चक्षुर्दर्शनासद्भावेन** ग॥ २. **शब्दवेधितया** ख॥ ३. **दंतो** ख झ॥ ४. **णियत्तिं** क-ञप्रती विना॥ ५. **देंतो** छ ज। **दंतो** झ ञ॥ ६. हु ख छ ज ठ॥ ७. **चरणाणि** ञ ऋते॥ ८. **सम्यग्दर्शनेन सफलानि** क॥ ९. **सम्यक्त्वस्य** ख॥

**नि०]** **सम्मत्तुप्पत्ती सावते य विरए [1]अणंतकम्मंसे।**
**दंसणमोह[2]क्खमए उवसामंते य उवसंते॥२२४॥**

**नि०]** **खवगे य खीणमोहे जिणे य सेढी भवे असंखेज्जा।**
**तव्विवरीतो कालो संखेज्जगुणाए सेढीए॥२२५॥**

**सम्मत्तुप्पत्ती** गाहा, **खवए य** गाहा। सम्यक्त्वस्य उत्पत्तिः=**सम्यक्त्वोपत्तिः**,तस्यां विवक्षितायां **असङ्ख्येय[3]गुणा श्रेणिः भवेद्** इति उत्तरगाथार्धान्ते क्रियामपेक्ष्य सम्बन्धो लगयितव्यः। कथमसङ्ख्येयगुणा श्रेणिर्भवेदिति ? अत्रोच्यते– इह मिथ्यादृष्टयो देशोनकोटीकोटिकर्म[4]स्थितिका ग्रन्थिकसत्त्वाः ते कर्मनिर्जरामाश्रित्य तुल्याः, धर्मप्रच्छनोत्पन्न[5]संज्ञः तेभ्यो असङ्ख्येयगुणनिर्जरकः, ततो पिपृच्छिषुः [6]सन् साधुसमीपं जिगमिषुः, तस्मादपि क्रियाविष्टः पृच्छन्, [7]अतोऽपि धर्मं प्रतिपित्सुः, अस्मादपि क्रियाविष्टः प्रतिपद्यमानः, तस्मादपि पूर्वप्रतिपन्नो असङ्ख्येयगुणनिर्जरकः इति सम्य[8]क्त्वोत्पत्तिः व्याख्याता।

तदनन्तरं विरताविरतिं प्रतिपित्सु-प्रतिपद्यमान-पूर्वप्रतिपन्नानां उत्तरोत्तरस्य असङ्ख्येय-[9]गुणा निर्जरा योज्या। एवं सर्वविरतावपीति। ततोऽपि पूर्वप्रतिपन्नसर्वविरतेः सकाशात् **अणंतकम्मंसे** त्ति पदैकदेशे पदप्रयोग इति यथा [10]**भीमसेनो भीमः, सत्यभामा भामा** एवं **अनन्त**शब्दोपलक्षिता अनन्तानुबन्धिनः, ते हि मोहनीयस्य अंशाः भागाः, तांश्चिक्षपयिषुः असङ्ख्येयगुणनिर्जरकः, ततोऽपि क्षपकः, तस्मादपि क्षीणानन्तानुबन्धिकषायः, [11]एतदेव दर्शनमोहनीयत्रये अभिमुख-क्रियारूढा-*ऽपवर्गत्रयमायोज्यम्, ततोऽपि क्षीणसप्तकात् क्षीणसप्तक एव उपशमश्रेण्यारूढः असङ्ख्येयगुणनिर्जरकः, ततोऽपि उपशान्तमोहः, तस्मादपि चारित्रमोहनीय**क्षपकः**, ततोऽपि **क्षीणमोहः**, अत्र चाभिमुखादित्रयं यथासम्भवमायोजनीयम्, अस्मादपि **जिनः**=भवस्थकेवली, तस्मादपि शैलेश्यवस्थो असङ्ख्येय[12]गुणनिर्जरकः।

तदेवं कर्मनिर्जरायैअसङ्ख्येय[13]लोकाकाशप्रदेशप्रमाणनिष्पादितसंयमस्थानप्रचयोपात्तश्रेणिः

---

टि० १. **यऽणंतकम्मंसे** क ठ॥ २. **०क्खवमो** ञ॥ ३. **०गुणश्रेणि०** ख॥ ४. **०स्थितिकाश्च ग्रन्थिक०** च ॥ ५. **०सञ्ज्ञास्तेभ्योऽसङ्ख्येयगुणनिर्जरकाः, ततोऽपि पिपृच्छिषुः** क-खपुस्तके विना॥ ६. **स साधु०** ग ॥ ७. **ततोऽपि** ग च॥ ८. **०कत्वोत्पत्तिव्याख्या** ख। **०क्त्वोत्पत्ति(त्ते?)र्व्याख्या** ग॥ ९. **०गुणनिर्जरा** ख ग ङ च॥ १०. **भीमो भीमसेनः, सत्या सत्यभामा एव०** ख॥ ११. **तदेव** ङ॥ १२. **०गुणो निर्जरकः** ङ॥ १३. **०लोकाकाशप्रमाणप्रतिपादितसंयम०** ख॥

वि०टि०- * "अपवर्ग इति समाप्तिः" जै०वि०प०॥

सा उत्तरोत्तरेषां असङ्ख्येयगुणा, उत्तरोत्तरप्रवर्धमानाध्यवसायकण्डकोपपत्तेरिति। कालस्तु तद्विपरीतो अयोगिकेवलिन आरभ्य प्रतिलोमतया असङ्ख्येयगुणया श्रेण्या [1]नेयः। इदमुक्तं भवति– [2]यावता कालेन यावत्कर्म्म अयोगिकेवली क्षपयति तावन्मात्रं कर्म सयोगिकेवली सङ्ख्येयगुणेन कालेन क्षपयति एवं प्रतिलोमतया यावद् धर्मं पिपृच्छिषुः तावन् नेयमिति गाथाद्वयार्थः॥२२४-२२५॥

एवमनन्तरोक्तया नीत्या दर्शनवतः सफलानि तपो-ज्ञान-चरणानि अभिहितानि। *यदि पुनः केनचिदुपाधिना विदधाति ततः सफलत्वाभावः। कश्चासौ उपाधिः? तमाह–

**[नि०] [3]आहार-उवहि-पूया-इड्ढीसु य गारवेसु [4]कइतवियं।**
**एमेव बारसविधे तवम्मि न हु [5]कइतवे समणो॥२२६॥**

**आहार०** गाहा। आहारश्च उपधिश्च पूजा च ऋद्धिश्च आमर्षौषध्यादिका=**आहारोपधि-पूजर्द्धयः**,तासु निमित्तभूतासु ज्ञान-चरणक्रियां करोति। तथा **गारवेषु** त्रिषु प्रतिबद्धो यत् करोति तत् **कृत्रिममिति** उच्यते। यथा च ज्ञान-चरणयोः आहाराद्यर्थमनुष्ठानं [6]कृत्रिमं सन्न फलवद् भवति; एवं सबाह्या-ऽभ्यन्तरे द्वादशप्रकारे **तपस्यपीति**। **न** च कृत्रिमानुष्ठायिनः श्रमणभावः, न च अश्रमणस्य अनुष्ठानं गुणवदिति॥२२६॥

तदेवं [7]निरुपाधेः दर्शनवतः तपो-ज्ञान-चरणानि सफलानीति स्थितम्, अतो दर्शने यतितव्यम्। दर्शनं च तत्त्वार्थश्रद्धानम्। तत्त्वं च उत्पन्नापगतकलङ्काशेषपदार्थसत्ताव्यापिज्ञानैः तीर्थकृद्भिः यदभाषि तदेव सूत्रानुगमायातेन सूत्रेण दर्शयति–

**[सू०] से बेमि– जे य अतीता जे य पडुप्पण्णा जे य आगमिस्सा अरहंता भगवंता ते सव्वे एवमाइक्खंति, एवं भासंति, एवं पण्णवेंति, एवं परूवेंति– सव्वे पाणा सव्वे भूता सव्वे जीवा सव्वे सत्ता ण हंतव्वा, ण अज्जावेतव्वा, ण परिघेत्तव्वा,ण परितावेयव्वा,ण उद्दवेयव्वा।**

टि० १. ज्ञेयः घ ङ च॥ २. यावन्मात्रकालानु(म)योगिकेवली गुणश्रेणीं रचयति ततः सङ्ख्येयगुणकालां सयो(गि)केवली रचयतीति एवं प्रतिलोमतया ख। यावत्कालेन घ ङ च॥ ३. आहार-इड्ढि-पूआ-उवहीसु य ख ठ॥ ४.कतितवियं ख। कयतवियं ज॥ ५. कतितवे ख ज । केयवं ज॥ ६. ०नं तन्न फलवद्भवति ख॥ ७. निरुपाधिदर्शन ० ग च ॥

वि०टि० * "यदि पुनः इति दर्शनवानपि सन्" जै०वि०प०॥

**से बेमीत्यादि** सू[1]त्रम्। **गौतमस्वाम्याह** यथा– **सो**ऽहं **ब्रवीमि** योऽहं [2]तीर्थकरवचनावगततत्त्वः श्रद्धेयवचन इति। यदि वा **शौद्धोदनि**[3]शिष्याभिमतक्षणिकत्वव्युदासेनाह– येन मया पूर्वमभाणि **सो**ऽहमद्यापि **ब्रवीमि,** नापरः। यदि वा **से**शब्दः तच्छब्दार्थे, यत् श्रद्धाने सम्यक्त्वं भवति **तदहं** तत्त्वं **ब्रवीमि। ये अतीताः**=अतिक्रान्ताः, **ये च प्रत्युत्पन्नाः** =वर्तमानकालभाविनः, **ये चागामिनस्त** एवं प्ररूपयन्तीति सम्बन्धः।

तत्र अतिक्रान्ताः तीर्थकृतः कालस्य अनादि[4]त्वाद् अनन्ता अतिक्रान्ताः। अनागता अप्यनन्ताः [5]आगमिष्यत्कालस्य अनन्तत्वात् तेषां सर्वदैव भा[6]वादिति। वर्तमानतीर्थकृतां च प्रज्ञापकापेक्षया अनवस्थितत्वे सत्यपि उत्कृष्ट-जघन्यपदिन एव कथ्यन्ते। [7]तत्र उत्कृष्टतः समयक्षेत्रसम्भविनः सप्तत्युत्तरशतम्, तच्चैवम्– पञ्चस्वपि विदेहेषु प्रत्येकं द्वात्रिंशत्-क्षेत्रात्मकत्वाद् एकैकस्मिन् द्वात्रिंशद् द्वात्रिंशत्, पञ्चस्वपि भरतेषु पञ्च, एवमैरावतेष्वपीति। तत्र द्वात्रिंशत् पञ्चभिः गुणि[8]ता षष्ट्युत्तरशतम्, भरतैरावतदशप्रक्षेपेण सप्तत्यधिकं शतमिति। जघन्यतस्तु विंशतिः सा चैवम्– पञ्चस्वपि [9]विदेहेषु विदेहान्तर्महानद्युभयतटसद्भावात् तीर्थकृतां प्रत्येकं चत्वारः, [10]ते च पञ्चभिर्गुणिता विंशतिः, भरतैरावतयोः त्वेकान्तसुखमादौ अभाव एवेति। अन्ये तु व्याचक्षते– मेरोः पूर्वा–ऽपर[11]विदेहैकैकसद्भावाद् महाविदेहे द्वावेव, [12]ततः पञ्चस्वपि दशैवेति, तथा च ते आहुः–

**"[13]सत्तरसयमुक्कोसं इतरे दस समयखेत्तजिणमाणं।**<br>
**चोत्तीस पढमदीवे *अणंतरऽद्धे य ते [14]दूणा॥"** [ ]

के इमे ?– **अर्हन्तः** अर्हन्ति पूजा-सत्कारादिकमिति, तथा ऐश्वर्याद्युपेता **भगवन्तः** । ते सर्व एव परप्रश्नावसरे **एवमाचक्षते** यदुत्तरत्र वक्ष्यते। वर्तमाननिर्देशस्य उपलक्षणा[15]र्थत्वाद्

---

**टि०** १.**सूत्रम्** । **सो**ऽहं ख ॥ २. **तीर्थङ्कर०** ग ॥ ३.**०शिक्षाभिमत०** च ॥ ४. **०त्वादियत्तामतिक्रान्ताः** ख ग च॥ ५. **आगामिकालस्या०** कप्रतिमृते॥ ६. **०दिति। वर्तमानस्य च प्रज्ञापकापेक्षयाऽनवस्थितत्वे** ख॥ ७. **तत्रोत्सर्गतः** खपुस्तकं विना॥ ८. **०ता जाता षष्ट्यु०** ख॥ ९. **महाविदेहेषु** कप्रतेर्विना॥ १०. **तेऽपि पञ्चभि०** खप्रतिमृते॥ ११. **०विदेहयोरेकैक०** ग॥ १२. **ततः** इति पाठः ग-घप्रत्योरेव॥ १३. **सत्तरिसय०** ख ॥ १४. **दूण त्ति** ख च । **दुगुणा** घ ङ॥ १५. **०णार्थमिदमेवमाचचक्षिरे त एवमाख्यास्यन्ति** ख ॥

**वि०टि०** * "**अणंतरद्धे य त(ते) दूणा** इति जम्बूद्वीपापेक्षया अनन्तरः धातु(त)कीखण्डः, अर्धं च पुष्करवरद्वीपार्धम्, तयोर्द्वयोरपि प्रथमद्वीपापेक्षया द्विगुणा भवन्ति, द्विगुणा भवन्ति, द्वयोरपि मिलिता १३६, प्रथमद्वीपप्रक्षेपे च १७०" जै०वि०प० ॥

इदमपि द्रष्टव्यम्– एवमाचचक्षिरे एवमाख्यास्यन्ति। **एवं** सामान्यतः सदेव-मनुजायां परिषदि **अर्धमागधया** सर्वसत्त्वस्वभाषानुगामिन्या[1] भाषया **भाषन्ते**। **एवं** प्रकर्षेण संशीत्यपनोदाय अन्तेवासिनो जीवा-ऽजीवा-ऽऽश्रव-संवर-बन्ध-निर्जरा-मोक्षपदार्थान्[2] ज्ञापयन्ति=**प्रज्ञापयन्ति**। एवं सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः, मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगा बन्ध-हेतवः, स्व-परभावेन सदसती, तत्त्वं सामान्य-विशेषात्मकं इत्यादिना प्रकारेण **प्ररूपयन्ति**। एकार्थिकानि वैतानीति। किं तद् एवमाचक्षते ? इति दर्शयति यथा–

**सर्वे प्राणाः** सर्व एव पृथिव्यप्-तेजो-वायु-वनस्पतयो द्वि-त्रि-चतुः-पञ्चेन्द्रियाश्च, इन्द्रिय-बलोच्छ्वास-निश्वासा-ऽऽयुष्कलक्षणप्राणधारणात् प्राणाः। तथा **सर्वाणि** भवन्ति भविष्यन्ति अभूवन्निति च **भूतानि** चतुर्दशभूतग्रामान्तःपातीनि। एवं **सर्व** एव जीवन्ति जीविष्यन्ति अजीविषुरिति **जीवाः** नारक-तिर्यङ्-नरा-ऽमरलक्षणाश्चतुर्गतिकाः। तथा **सर्व** एव स्वकृतसाता-ऽसातोदयसुख-दुःखभाजः **सत्त्वाः**। एकार्था वैते शब्दाः, 'तत्त्व-भेद-पर्यायैः प्रतिपादनम्' इति कृत्वेति।

एते च सर्वे अपि प्राणिनः पर्यायशब्दावेदिता **न हन्तव्या** दण्ड-कशादिभिः, **नाज्ञापयितव्याः** प्रसह्य अभियोगदानतः, **न परिग्राह्या** भृत्य-दास-दास्यादिममत्वपरिग्रहतः, **न परितापयितव्याः** शारीर-मानसपीडोत्पादनतः[3], **नापद्रावयितव्याः** प्राणव्यपरोपणतः।

**एस धम्मे सुद्धे णितिए सासए समेच्च लोयं खेतण्णेहिं पवेदिते। तं जहा–उट्ठिएसु वा अणुट्ठिएसु वा, उवट्ठिएसु वा अणुवट्ठिएसु वा,उवरतदंडेसु वा अणुवरतदंडेसु वा, सोवधिएसु वा अणुवहिएसु वा, संजोगरएसु वा असंजोगरएसु वा ॥ १३२ ॥**

**एषः** अनन्तरोक्तः **धर्मः** दुर्गत्यर्गला-सुगतिसोपानदेश्यः। अस्य च प्रधानपुरुषार्थत्वाद् विशेषणं दर्शयति– **शुद्धः**=पापानुबन्धरहितः, न **शाक्य**-धिग्जातीयानां इव एकेन्द्रिय-पञ्चेन्द्रियवधानुमतिकलङ्काङ्कितः। तथा **नित्यः**=अप्रच्युतिरूपः[4], पञ्चस्वपि विदेहेषु सदाभवनात्। तथा **शाश्वतः** शाश्वतगतिहेतुत्वात्, यदि वा नित्यत्वात् शाश्वतः, न* तु नित्यं भूत्वा न भवति भव्यत्ववत्[5], अभूत्वा च नित्यं भवति घटाभाववदिति, अयं तु त्रिकालावस्थायीति।

अमुं च **लोकं**=जन्तुलोकं दुःखसागरावगाढं **समेत्य**=ज्ञात्वा तदुत्तरणाय **खेदज्ञैः**

टि० १. ० स्वभाषया भाषन्ते ख॥ २. ०ऽऽश्रव-संवर-निर्जरा-बन्ध-मोक्ष० ख। ०ऽऽश्रव-बन्ध-संवर-निर्जरा० च ऋते ॥ ३. ०पीडोत्पादनैः, ख॥ ४. अप्रच्युतरूपः क ॥ ५. अभव्यत्ववत् ङ॥

वि०टि० * "न तु इति कूटस्थनित्यतां निराचष्टे, नित्यमपि सोऽपि न नित्यः" जै०वि०प०॥

=जन्तुदुःखपरिच्छेत्तृभिः **प्रवेदितः**=प्रतिपादित इति। एतच्च **गौतमस्वामी** स्वमनीषिका-परिहारेण शिष्यमतिस्थैयार्थं बभाषे। एनमेव सूत्रोक्तमर्थं **निर्युक्तिकारः** सूत्रस्पर्शकेन गाथाद्वयेन दर्शयति–

**[नि०] जे जिणवरा अतीता जे संपति जे अणागते काले।**
**सव्वे वि ते अहिंसं वदिंसु वदिहिंति ये[1] वयेंति[2] ॥२२७॥**

**[नि०] छप्पि य जीवनिकाये[3] णो वि हणे[4] णो वि आहणावेज्जा।**
**णो वि य अणुमन्नेज्जा सम्मत्तस्सेस निज्जुत्ती[5]॥२२८॥**

**॥ चतुर्थप्रथमोद्देशकनिर्युक्तिः ॥**

**जे जिणवरा** गाहा, **छप्पि य जीवनिकाये** गाहा। गाथाद्वयमपि कण्ठ्यम्॥२२७-८॥ तीर्थकरोपदेशश्च परोपकारितया तत्स्वाभाव्यादेव प्रवर्तमानो भास्करोदय इव प्रबोध्यविशेष-निरपेक्षतया प्रवर्तते (इति) **तद् यथा** इत्यादिना दर्शयति–

**तं जहा– उट्ठिएसु वा** इत्यादि। धर्मचरणाय उद्यता **उत्थिताः** ज्ञान-दर्शन-चारित्रोद्योगवन्तः, तद्विपर्ययेण **अनुत्थिताः**, तेषु निमित्तभूतेषु, तानुद्दिश्य[6] भगवता सर्ववेदिना त्रिजगत्पतिना धर्मः प्रवेदितः एवं सर्वत्र लगयितव्यम्। यदि वा उत्थिता-ऽनुत्थितेषु [7]द्रव्यतोऽपि निषण्णा-ऽनिषण्णेषु। तत्र एकादशसु गणधरेषु उत्थितेष्वेव **वीरवर्धमानस्वामिना** धर्मः प्रवेदितः। तथा **उपस्थिताः** धर्मं शुश्रूषवो जिघृक्षवो वा, तद्विपर्ययेण **अनुपस्थिताः**,तेष्विति, निमित्तसप्तमी चेयं यथा– चर्मणि द्वीपिनं हन्तीति। ननु च भावोपस्थितेषु [8]**चिलातिपुत्रा**दिष्विव धर्मकथा युक्तिमती, अनुपस्थितेषु तु कं गुणं पुष्णाति?– अनुपस्थितेषु अपि **इन्द्रनागा**दिषु विचित्रत्वात् कर्मपरिणतेः क्षयोपशमापादनाद् गुणवती एव इति यत्किञ्चिदेतत्। प्राणिन आत्मानं वा दण्डयतीति दण्डः, स च मनो-वाक्-कायलक्षणः, **उपरतो दण्डो** येषां ते तथा, तद्विपर्ययेण **अनुपरतदण्डाः**, तेषु उभयरूपेषु इति। तत्र उपरतदण्डेषु तत्स्थैर्य-गुणान्तराधानार्थं देशना, इतरेषु तु उपरतदण्डत्वार्थमिति। उपधीयते=सङ्गृह्यत इत्युपधिः, द्रव्यतो हिरण्यादिः, भावतो माया, सह उपधिना वर्तन्त इति **सोपधिकाः**, तद्विपर्ययेण **अनुपधिकाः**, तेष्विति। संयोगः=सम्बन्धः पुत्र-कलत्र-[9]

टि० १. वि क। व छ॥ २. वदिंति ख। वयंति छ ज झ ञ। वदंति ठ॥ ३.०निकाया छ ज झ॥ ४. हणइ णो वि याहणां ठ॥ ५. ०त्ती॥ऽ(अ)०४ उ०१॥ ठ॥ ६. तानुपदिश्य ख॥ ७. द्रव्यतोऽप्यनिषण्ण-निषण्णेषु ख॥ ८. चिलातपुत्रादि० ख॥ ९. पुत्र-कलत्रादि० क। पुत्र-मित्र-कलत्रादि० ख॥

मित्रादिजनितः, तत्र रताः=**संयोगरताः**, तद्विपर्ययेण एकत्वभावना[१]भाविता **असंयोगरताः**, तेष्विति॥१३२॥

**[सू०]   तच्चं चेतं तहा चेतं, अस्सिं चेतं पवुच्चति।**

तदेवं उभयरूपेषु अपि यद् भगवता धर्मदेशना अकारि तत् **तथ्यं**=सत्यं **एतदि**ति, **च**शब्दः नियमार्थः, तथ्यमेव एतद् भगवद्वचनम् । [२]यथाप्ररूपितवस्तुसद्भावात् तथ्यता वचसो भवतीति अतो वाच्यमपि तथैवेति दर्शयति– **तथा चैतद्** वस्तु यथा भगवान् जगाद, यथा– **सर्वे प्राणा न हन्तव्या** इत्यादि; एवं सम्यग्दर्शनश्रद्धानं विधेयम्। **एतच्च** [३]**अस्मिन्नेव** मौनीन्द्रप्रवचने सम्यग्मोक्षमार्गविधायिनि [४]समस्तदम्भप्र[५]पञ्चोपरते प्रकर्षेण उच्यते=**प्रोच्यत** इति, न तु यथा अन्यत्र **"न हिंस्यात् सर्वभूतानि"** [     ]इति अभिधाय अन्यत्र वाक्ये यज्ञपशुवधाभ्यनुज्ञानात् पूर्वोत्तरबाधेति। तदेवं सम्यक्त्वस्वरूपमभिधाय तदवाप्तौ यद् विधेयं तद् [६]दर्शयति–

**तं आइत्तु ण णिहे, ण णिक्खिवे, जाणित्तु धम्मं जहा तहा।**

**तं आइत्तु न निहे** इत्यादि । **तत्**=तत्त्वार्थ[७]श्रद्धानलक्षणं सम्यग्दर्शनं **आदाय**=गृहीत्वा तत्कार्याऽकरणतः **न निहे** त्ति न गोपयेत् । तथाविधसंसर्गादि[८]निमित्तोत्थापितमिथ्यात्वोऽपि जीवसामर्थ्यगुणाद् न त्यजेदपि। यथा वा **शैव-शाक्या**दीनां गृहीत्वा व्रतानि पुनरपि [९]व्रतेश्वरयागादिविधिना गुरुसमीपे निक्षिप्य उत्प्रव्रजनं एवं गुर्वादेः सकाशाद् अवाप्य सम्यग्दर्शनं **न निक्षिपेत्**=न त्यजेत्। किं कृत्वा ? **यथा तथा** अवस्थितं **धर्मं ज्ञात्वा**= श्रुतधर्म-चारित्रात्मकमवगम्य, वस्तूनां वा धर्मं=स्वभावमवबुध्य इति। तदवगमे तु किं चापरं कुर्यात् ? इत्याह–

**दिट्ठेहिं णिव्वेयं गच्छेज्जा।**

**णो लोगस्सेसणं चरे।**

**दिट्ठेहिं** इत्यादि। **दृष्टैः** इष्टा-ऽनिष्टरूपैः **निर्वेदं गच्छेत्,** विरागं कुर्यादित्यर्थः। तथा हि– शब्दैः श्रुतैः रसैः आस्वादितैः गन्धैः आघ्रातैः स्पर्शैः स्पृष्टैः सद्भिरेवं भावयेद् यथा–

टि० १. ०भावित्वाद् असंयोग० च ॥ २. यथास्थितवस्तु० क॥ ३. तस्मिन्नेव मौनीन्द्रे प्रवचने ख॥ ४.समस्तदण्डप्रपञ्चोपरते आचा०शु० ॥ ५. ०प्रबन्धोपरते घ ङ च॥ ६. दर्शयितुमाह ख ग घ ङ॥ ७. ०श्रद्धानं सम्य० ख॥ ८. ०निमित्तोपस्थापित० ख॥ ९.व्रतेश्वरयागादि० आचा०शु० ॥

'शुभेतरता परिणामवशाद् भवतीति, अतः कः तेषु रागो द्वेषो वा ?' इति। किञ्च–

**नो लोयस्स** इत्यादि। **लोकस्य**=प्राणिगणस्य **एषणा**=अन्वेषणा, इष्टेषु शब्दादिषु प्रवृत्तिः अनिष्टेषु तु[1] हेयबुद्धिः, तां न **चरेत्**[2]=नाचरेत् न विदध्यात्। यस्य चैषा लोकैषणा नास्ति तस्य अन्याऽपि अप्रशस्ता मतिः नास्तीति दर्शयति–

## जस्स णत्थि इमा णाती अण्णा तस्स कतो सिया ।

**जस्स नत्थि** इत्यादि। **यस्य** मुमुक्षोः **इमा ज्ञातिः**=लोकैषणाबुद्धिः **नास्ति** इति न विद्यते **तस्यान्या** सावद्यारम्भप्रवृत्तिः **कुतः स्यात्** ?, इदमुक्तं भवति– भोगेच्छारूपां लोकैषणां परिजिहीर्षोः नैव सावद्यानुष्ठानप्रवृत्तिः उपजायते, ✎ तदर्थत्वात् तस्या इति। यदि वा [3]**इमा** अनन्तरोक्तत्वात् प्रत्यक्षा सम्यक्त्वज्ञातिः, '**प्राणिनो न हन्तव्याः**' इति वा ज्ञातिः[4] **यस्य** न विद्यते **तस्यान्या** विवेकिनी बुद्धिः कुमार्गसावद्यानुष्ठानपरिहार[5]द्वारेणः **कुतः स्यात्** ? । शिष्यमतिस्थैर्यार्थं आह–

## दिट्ठं सुतं मयं विण्णायं जमेयं परिकहिज्जति ।

**दिट्ठमित्यादि**। **यदेतत्** मया **परिकथ्यते** तत् सर्वज्ञैः केवलज्ञाना[6]लोकेन **दृष्टम्,** तत् शुश्रूषुभिः **श्रुतम्,** लघुकर्मणां भव्यानां **मतम्,** ज्ञानावरणीयक्षयोपशमाद् विशेषेण ज्ञातं=**विज्ञातम्,** अतो भवताऽपि सम्यक्त्वादिके मत्कथिते यत्नवता [7]भवितव्यमिति। ये पुनः यथोक्तकारिणो न स्युः ते [8]किम्भूता भवेयुः? इत्याह–

## समेमाणा पलेमाणा पुणो पुणो जातिं पकप्पेंती।

**समेमाणा** इत्यादि। तस्मिन्नेव मनुष्यादिजन्मनि **शाम्यन्तः** [9]गार्द्ध्येन अत्यर्थमासेवां कुर्वन्तः, तथा **प्रलीयमानाः** मनोज्ञेन्द्रियार्थेषु, पौनःपुण्येन एकेन्द्रिय-द्वीन्द्रियादिकां **जातिं प्रकल्पयन्ति,** संसाराविच्छित्तिं विदधतीत्यर्थः। यदि एवं अविदितवेद्याः साम्प्रतेक्षिणो यथाजन्मकृतरतय इन्द्रियार्थेषु [10]प्रलीयमानाः पौनःपुण्येन[11] कृतजन्मादिसन्धाना जन्तवः ततः किं कर्त्तव्यम्? इत्याह–

---

टि० १. **च** च॥ २. **चरेत् न विदध्यात्** क ख ङ ॥ ३. **इयं** ग॥ ४. **ज्ञातिः** इति पाठः खप्रतेरेव॥ ५. **०परिहारेण** घ। ६.**०ज्ञानावलोकेन** क विना ॥ ७. **भाव्यमिति** ख च॥ ८. **कथं भवेयुः** क। **कथम्भूता भवेयुः** ख च विना ॥ ९. **गार्द्ध्यं तात्पर्यमासेवां** ग-चप्रती विना॥ १०. **प्रलीनाः** ग च विना ॥ ११. ० **न जन्मादिकृतसन्धाना** ख च ऋते ॥

वि०टि० ✎ **भोगेच्छार्थत्वात् सावद्यानुष्ठानप्रवृत्तेः** इति भावः॥

**अहो य रातो य जतमाणे धीरे सया आगतपण्णाणे, पमत्ते बहिया पास, अप्पमत्ते सया परक्कमेज्जासि त्ति बेमि ॥१३३॥**

**॥ सम्मत्तस्स पढमो उद्देसओ सम्मत्तो ॥**

**अहो य** इत्यादि। **अहश्च रात्रिं च यतमान** एव यत्नवानेव मोक्षाध्वनि **धीरः**[1]=परीषहोपसर्गाक्षोभ्यः[2] **सदा**=सर्वकालं **आगतं**=स्वीकृतं **प्रज्ञानं**=सदसद्विवेको यस्य स तथा, **प्रमत्तान्** संयतान् परतीर्थिकान् वा धर्माद् **बहिर्व्यवस्थितान् पश्य**। तांश्च तथाभूतान् दृष्ट्वा किं कुर्यात्? इत्याह–

**अप्पमत्ते** इत्यादि। **अप्रमत्तः** सन् निद्रा-विकथादिप्रमादरहितः अक्षिनिमेषोन्मेषादौ अपि **सदा** उपयुक्तः **पराक्रमेथाः** कर्मरिपून् मोक्षाध्वनि वा, **इतिः** अधिकारपरिसमाप्तौ, **ब्रवीमि** इति पूर्ववत्॥१३३॥

**॥ सम्यक्त्वाध्ययनस्य प्रथमोद्देशकटीका परिसमाप्तेति ॥छ॥**[3]



टि० १. वीरः ग॥ २. परीषहाक्षोभ्यः ख॥ ३. इति सम्यक्त्वाध्ययने प्रथमोद्देशकः परिसमाप्तः ॥ छ ॥ ख-चप्रती ऋते॥

## ॥ द्वितीय उद्देशकः ॥

उक्तः प्रथमोद्देशकः। [1]साम्प्रतं द्वितीयव्याख्या प्रतन्यते। अस्य च अयमभिसम्बन्धः– इह अनन्तरोद्देशके सम्यग्वादः प्रतिपादितः। स च [2]प्रत्यनीकमिथ्यावादव्युदासेन आत्मलाभं लभते। व्युदासश्च न [3]परिज्ञानमन्तरेण, परिज्ञानं च न विचारमृते, अतो मिथ्यावाद-भूततीर्थिकमतविचारणाय इदं उपक्रम्यते। अनेन सम्बन्धेन आयातस्य अस्य उद्देशकस्य इदं आदिसूत्रम्– **जे आसवा** इत्यादि। यदि वा इह सम्यक्त्वमधिकृतम्; तच्च सप्तपदार्थश्रद्धानात्मकम्; तत्र मुमुक्षुणा अवगत**शस्त्रपरिज्ञा**जीवा-ऽजीवपदार्थेन संसार-मोक्षकारणे निर्णेतव्ये। तत्र संसारकारणमाश्रवः, तद्ग्रहणाच्च बन्धग्रहणम्; मोक्षकारण[4] तु निर्जरा, तद्ग्रहणाच्च संवरः तत्कार्यभूतश्च मोक्षः सूचितो भवतीति; अत आश्रव-निर्जरे संसार-मोक्षकारणभूते सम्यक्त्वविचारायाते दर्शयितुमाह–

[सू०] **जे आसवा ते परिस्सवा, जे परिस्सवा ते आसवा।**
**जे अणासवा ते अपरिस्सवा, जे अपरिस्सवा ते अणासवा।**

**जे आसवा** इत्यादि। **ये** इति सामान्यनिर्देशः, आश्रवति अष्टप्रकारं कर्म यैरारम्भैः ते **आश्रवाः**, परिः=समन्तात् श्रवति=गलति यैः अनुष्ठानविशेषः ते **परिश्रवाः**। **य** एव **आश्रवाः**= कर्मबन्धस्थानानि **त** एव **परिश्रवाः**=कर्मनिर्जरास्पदानि। इदमुक्तं भवति– यानि इतरजनाचरितानि स्त्रगङ्गनादीनि सुखकारणतया तानि कर्मबन्धहेतुत्वाद् आश्रवाः, पुनः तान्येव तत्त्वविदां विषयसुखपराङ्मुखानां निःसारतया संसारसरणिदेश्यानीति कृत्वा वैराग्यजनकानि, अतः परिश्रवाः निर्जरास्थानानि। सर्ववस्तूनां अनैकान्तिकतां दर्शयितुं तदेव विपर्ययेणाह–

**जे परिस्सवा** इत्यादि। **य** एव **परिश्रवाः**=निर्जरास्थानानि अर्हत्-साधु-तपश्चरण-दशविधचक्रवालसामाचार्यनुष्ठानादीनि तान्येव [5]कर्मोदयावष्टब्धशुभाध्यवसायस्य दुर्गतिमार्ग-प्रवृत्तसार्थवाहस्य जन्तोः [6]महाशातनावतः सातर्द्धिरसगारवप्रवणस्य **आश्रवा** भवन्ति पापोपादानकारणानि जायन्ते। इदमुक्तं भवति– यावन्ति कर्मनिर्जरार्थं संयमस्थानानि तद्बन्धनाय असंयमस्थानानि अपि तावन्ति एव, उक्तं च–

**"यथाप्रकारा यावन्तः, संसाराऽऽवेशहेतवः।**
**तावन्तस्तद्विपर्यासाद् , निर्वाणसुखहेतवः॥"** [ ]

---

टि० १. अधुना च॥ २. प्रत्यनीकान्यथावाद० क॥ ३. परिज्ञानमृते, परिज्ञानं च न विचारमन्तरेण, अतो ख च॥ ४. ०णं च निर्जरा तत्कारणं च संवर० ग॥ ५. कर्मोदयादवष्टब्ध० ख ग च ॥ ६. महाशातनातः ख ग च॥

तथा हि– राग-द्वेषवासितान्तःकरणस्य विषयसुखोन्मुखस्य दुष्टाशयत्वात् सर्वं संसाराय, पिचुमन्दरसवासिताऽऽस्यस्य दुग्ध-शर्करादिकटुकत्वापत्तिवदिति। सम्यग्दृष्टेस्तु [१]विदितसंसारोदन्वतः न्यक्कृतविषयाभिलाषस्य सर्वमशुचि दुःखकारणमिति च भावयतः सञ्जात[२]संवेगस्य इतरजनसंसारकारणमपि मोक्षाय इति भावार्थः। [३]पुनः एतदेव गत-प्रत्यागतसूत्रं सप्रतिषेधमाह–

**जे अणासवा** इत्यादि। [[४]प्रसज्यप्रतिषेधस्य क्रियाप्रतिषेधपर्यवसानतया परिश्रवा इति अनेन सह सम्बन्धाभावात् पर्युदासोऽयम्।] आश्रवेभ्योऽन्ये **अनाश्रवाः**=व्रतविशेषाः **ते**ऽपि कर्मोदयाद् अशुभाध्यवसायिनः **अपरिश्रवाः** कर्मणः, ***कोङ्कणार्य**प्रभृतीनामिवेति। तथा **अपरिश्रवाः**=पापोपादानकारणानि केनचिद् उपाधिना [५]प्रवचनोपकारादिना क्रियमाणाः [६]**कणवीरलताभ्रामकक्षुल्लकस्येव अनाश्रवाः** [७]कर्मबन्धनानि न भवन्ति।

यदि वा आश्रवन्तीति **आश्रवाः** पचाद्यच्, एवं परिश्रवन्तीति **परिश्रवाः**। अत्र चतुर्भङ्गिका– तत्र [मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैः य एव कर्मणां आश्रवाः= बन्धकाः त एव ○अपरेषां परिश्रवाः निर्जरकाः] एते च प्रथमभङ्गपतिताः सर्वेऽपि संसारिणः चतुर्गतिकाः, सर्वेषां प्रतिक्षणं उभयसद्भावात्। तथा ये आश्रवाः ते अपरिश्रवा इति शून्योऽयं द्वितीयभङ्गकः, बन्धस्य शाटाविनाभावित्वात्। एवं ये अनाश्रवाः ते परिश्रवाः, एते च अयोगिकेवलिनः तृतीयभङ्गपतिताः। चतुर्थभङ्गपतितास्तु सिद्धाः, तेषामनाश्रवत्वाद् अपरिश्रवत्वाच्चेति। अत्र च आद्यन्तभङ्गकौ सूत्रोपात्तौ, तदुपादाने च मध्योपादानस्य अवश्यम्भावित्वाद् मध्यभङ्गकद्वयग्रहणं द्रष्टव्यमिति। यद्येवं ततः किम् ? इत्याह–

## एते य पए संबुज्झमाणे लोगं च आणाए अभिसमेच्चा पुढो पवेदितं आघाति णाणी इह माणवाणं संसारपडिवण्णाणं संबुज्झमाणाणं विण्णाणपत्ताणं।

**एते पए** इत्यादि। **एतानि** अनन्तरोक्तानि, पद्यते=गम्यते येभ्योऽर्थस्तानि **पदानि**, तद्यथा–**ये आश्रवा** इत्यादीनि। परस्य च अर्थावगत्यर्थं शब्दप्रयोगाद् एतत्पदवाच्यान् अर्थान् च **सम्यग्**=अविपर्यासेन **बुध्यमानः**, तथा **लोकं**=जन्तुगणं आश्रवद्वारायातेन कर्मणा बध्यमानं तपश्चरणादिना च मुच्यमानं **आज्ञया**=तीर्थकरप्रणीतागमानुसारेण **अभिसमेत्य**

टि० १. **विज्ञातसंसारोदन्वतस्त्यक्तविषया०** च॥ २. **० संवेगस्य तस्येतर०** ख॥ ३. **पुनरेव गत०** ख॥ ४. **प्रसह्य प्रतिषे०** क ग च॥ ५. **प्रवचनोक्तप्रकरादिना** घ ङ॥ ६. **करवीर०** ख ग॥ ७. **कर्मबन्धाय न भवन्ति** ख-चपुस्तके विना॥

वि०टि० * "**कोङ्कणार्य** इति यथा वृद्धः प्रव्रजितश्चिन्तयति वर्षाकालसमये दुती" जै०वि०प०॥ ○ "**अपरेषाम्** इति पूर्वबद्धकर्मणाम्" जै०वि०प०॥

=आभिमुख्येन सम्यक् परिच्छिद्य, **चशब्द**ः भिन्नक्रमः, **पृथक् प्रवेदितं** चाभिसमेत्य पृथगाश्रवोपादानं निर्जरोपादानं चेति। एतच्च ज्ञात्वा को नाम धर्मचरणं प्रति नोद्यच्छेदिति ?। कथं प्रवेदितम्? इति चेत्, तदुच्यते–

आश्रवस्तावत्– ज्ञानप्रत्यनीकतया ज्ञाननिह्नवेन ज्ञानान्तरायेण ज्ञानप्रद्वेषेण [१]ज्ञानात्याशातनया ज्ञानविसंवादेन ज्ञानावरणीयं कर्म बध्यते। एवं दर्शनप्रत्यनीकतया यावद् दर्शनविसंवादेन दर्शनावरणीयं कर्म बध्यते। तथा प्राणिनामनुकम्पनतया भूतानुकम्पनतया[२] जीवानुकम्पनतया सत्त्वानु[३]कम्पनतया बहूनां प्राणिनां अदुःखोत्पादनतया अशोचनतया अजूरणतया [४]अपीडनतया अपरितापनतया सातावेदनीयं कर्म बध्यते, एतद्विपर्ययात् च असातावेदनीयमिति। तथा अनन्तानुबन्ध्युत्कटतया तीव्रदर्शनमोहनीयतया प्रबलचारित्रमोहनीयसद्भावाद् मोहनीयं कर्म बध्यते। महारम्भतया महापरिग्रहतया पञ्चेन्द्रियवधात् [५]कुणपाहारेण नरकायुष्कं बध्यते, मायावितया अनृतवादेन कूटतुला-कूटमानव्यवहारात् तिर्यगायुर्बध्यते, प्रकृतिविनीततया सानुक्रोशतया [६]अमात्सर्याद् मनुष्यायुष्कम्, सरागसंयमेन देशविरत्या बालतपसा अकामनिर्जरया देवायुष्कमिति। कायर्जुतया भावर्जुतया भाषर्जुतया अविसंवादनयोगेन शुभनाम बध्यते, विपर्ययाच्च विपर्यय इति। जाति-कुल-बल-रूप-तपः-श्रुत-लाभैश्वर्यमदाभावाद् उच्चैर्गोत्रम्, जात्यादिमदात् परपरिवादाच्च नीचैर्गोत्रम्। दान-लाभ-भोगोपभोग-वीर्यान्तरायविधानाद् आन्तरायिकं कर्म बध्यते। एते हि आश्रवाः। साम्प्रतं परिश्रवाः प्रतिपाद्यन्ते–

अनशनादि सबाह्या-ऽभ्यन्तरं तप इत्यादि । एव[७]माश्रवका निर्जरकाः सभेदा जन्तवो वाच्याः, सर्वेऽपि च जीवादयः पदार्था मोक्षावसाना वाच्याः। एतानि च पदानि सम्बुध्यमानैः तीर्थकर-गणधरैः लोकं अभिसमेत्य पृथक् पृथक् प्रवेदितम्। अन्योऽपि तदाज्ञानुसारी चतुर्दशपूर्वविदादिः [८]सत्त्वहिताय परेभ्य आवेदयति इत्येतद् दर्शयितुमाह–

**आघाइ** इत्यादि। ज्ञानं सकलपदार्थाविर्भावकं विद्यते यस्य असौ=**ज्ञानी**, स **आख्याति**= आचष्टे, **इह** इति प्रवचने, केषां ? **मानवानाम्**, सर्वसंवरचारित्रार्हत्वात् तेषाम्, अथवोपलक्षणं चैतद् देवादीनाम्। तत्रापि [९]केवल्यादिव्युदासाय विशेषणमाह–

**संसार**० इत्यादि। संसारं–चतुर्गतिलक्षणं प्रतिपन्नाः=**संसारप्रतिपन्नाः**; तत्रापि ये धर्मं भोत्स्यन्ते ग्रहीष्यन्ते च **मुनिसुव्रतस्वामिघोटक**दृष्टान्तेन तेषामेव आख्याति इत्येतद् दर्शयति– **सम्बुध्यमानानां**=यथोपदिष्टं धर्मं सम्यगवबुध्यमानानाम्; छद्मस्थेन तु अज्ञातबुध्यमानेतर-

टि० १. ज्ञान्याशातनया ख॥ २. ०या सत्त्वानुकम्पनतया जीवानुकम्पनत्वेन बहूनां ख॥ ३. ०कम्पनत्वेन बहूनां ग घ ङ च॥ ४. अपिण्डनतया ख ॥ ५. कुणपाहाराद् ख । कुणिमाहारेण ग घ॥ ६. अमात्सर्यतया मानुष्यायुष्कम् ख॥ ७. ०माश्रवनिर्जरकाः ख घ ङ च॥ ८. सर्वहिताय ख॥ ९. केवलादि० ख॥

विशेषेण यादृग्भूतानां कथयितव्यं तान् सूत्रेणैव दर्शयति– **विज्ञानप्राप्तानां** हिता–ऽहितप्राप्तिपरिहाराध्यवसायो=विज्ञानम्, तत् प्राप्ताः=**विज्ञानप्राप्ताः**, समस्तपर्याप्तिभिः पर्याप्ताः सञ्ज्ञिन इत्यर्थः।

**नागार्जुनीयास्तु** पठन्ति– **[1]आघाइ धम्मं खलु [2]से जीवाणं, तं जहा– संसार-पडिवन्नाणं मणुस्सभवत्थाणं आरंभविणईणं [3]दुक्खुव्वेय-सुहेसगाणं धम्मसवण-गवेसयाणं सुस्सूसमाणाणं पडिपुच्छमाणाणं विन्नाणपत्ताणं** ।

एतच्च प्रायो गतार्थमेव, नवरं **आरम्भविनयिनाम्** इति **आरम्भविनयः**= आरम्भाभावः, स विद्यते येषामिति मत्वर्थीयः, तेषामिति।

यथा च ज्ञानी धर्ममाचष्टे तथा दर्शयति–

**अट्टा वि संता अदुवा पमत्ता।**

**अट्टा वि** इत्यादि। विज्ञानप्राप्ता धर्मं कथ्यमानं कुतश्चिन्निमित्ताद् **आर्ता अपि सन्तः चिलातिपुत्रा**दय इव, **अथवा प्रमत्ताः** विषयाभिष्वङ्गादिना **शालिभद्रा**दय इव, तथाविधकर्मक्षयोपशमापत्तेः यथा प्रतिपद्यन्ते तथा आचष्टे। यदि वा **आर्ताः**=दुःखिनः, **प्रमत्ताः**= सुखिनः, तेऽपि प्रतिपद्यन्ते धर्मं, किं पुनरपरे ?। अथवा **आर्ताः** राग-द्वेषोदयेन, **प्रमत्ताः** विषयैः, ते च तीर्थिका गृहस्था वा संसारकान्तारं विशन्तः कथ[4]भवन्तो विज्ञातज्ञेयानां [5]करुणास्पदानि राग-द्वेष-विषयाभिलाषोन्मूलनाय न प्रभवन्ति। एतच्च अन्यथा मा मंस्था [6]इति दर्शयितुमाह–

**अहासच्चमिणं ति बेमि।**

**णाऽणागमो मच्चुमुहस्स अत्थि।**

**अहासच्चमि**त्यादि । [7]**इदं** यद् मया कथितं कथ्यमानं च तद् **यथासत्यं**, यथातथ्यं इत्यर्थः। **इति** एतदहं **ब्रवीमि** यथा– दुर्लभमवाप्य सम्यक्त्वं चारित्रपरिणामं वा प्रमादो न कार्यः। स्यात्– किमालम्ब्य प्रमादो न कार्यः? तदाह–

[8]**नाऽणागमो** इत्यादि। **न** हि **अनागमो मृत्योः मुखस्य** कस्यचिद् अपि संसारोदर-वर्तिनो **अस्ती**ति । उक्तं च–

**"वदत यदीह कश्चिदनुसन्ततसुखपरिभोगलालितः,**

---

टि० १. अघाइ ख ॥ २. स ख ॥ ३. दुक्खखय० ग च॥ ४. भवन्तां विज्ञात० क ख विना॥ ५. करुणास्पदानां ग च॥ ६. इत्यादि दर्शयितु० घ ङ॥ ७. इदं मया यत् कथितं ख॥ ८. नाणागमे ख च॥

[1]प्रयतनशतपरोऽपि विगतव्यथमायुरवाप्नवान् नरः।
न खलु नरः सुरौघसिद्धासुरकिन्नरनायकोऽपि यः,
सोऽपि कृतान्तदन्तकुलिशाक्रमणक्रशितो न नश्यति॥" [

तथोपायोऽपि मृत्युमुखप्रतिषेधस्य न कश्चिद् अस्तीति। उक्तं च–

"नश्यति नौति याति वितनोति करोति रसायनक्रियाम्,
चरति गुरुव्रतानि विवराण्यपि विशति विशेषकातरः।
तपति तपांसि खादति मितानि करोति च मन्त्रसाधनम्,
तदपि कृतान्तदन्तयन्त्रक्रकचक्रमणैर्विदार्यते॥" [ ]

ये पुनर्विषय-कषायाभिष्वङ्गात् प्रमत्ता धर्मं नावबुध्यन्ते ते किम्भूता भवन्ति? इत्याह–

**इच्छापणीता वंकाणिकेया कालग्गहीता णिचये णिविट्ठा पुढो पुढो जाइं पकप्पेंति ॥१३४॥**

**इच्छा०** इत्यादि। इन्द्रिय-[2]मनोविषयानुकूला प्रवृत्तिः इह इच्छा, तया विषयाभिमुखं अभिकर्मबन्धं संसाराभिमुखं वा प्रकर्षेण नीताः=**इच्छाप्रणीताः**, ये चैवम्भूताः ते **वंकानिकेताः** वङ्कस्य–असंयमस्य आ–मर्यादया संयमावधिभूतया [3]निकेतभूताः–आश्रयाः=वङ्कानिकेताः, वङ्को वा निकेतो येषां ते=[4]वङ्कनिकेताः, पूर्वपदस्य दीर्घत्वम्; ये चैवम्भूताः ते **कालगृहीताः** कालेन– मृत्युना गृहीताः=कालगृहीताः, पौनःपुण्यमरणभाज इत्यर्थः, धर्मचरणाय वा गृहीतः अभिसन्धितः कालो यैः ते=कालगृहीताः, आहिताग्नि-दर्शनाद् आर्षत्वाद्वा निष्ठान्तस्य परनिपातः, तथा हि– पाश्चात्ये वयसि परुत्परारि वा अपत्यपरिणयनोत्तरकालं वा धर्मं करिष्याम इत्येवं गृहीतकालाः। ये चैवम्भूताः ते '**निचये निविष्टाः**' **निचये**=कर्मनिचये तदुपादाने वा सावद्यारम्भनिचये **निविष्टाः** =अध्युपपन्नाः।

ये च इच्छाप्रणीता वङ्कानिकेताः कालगृहीता निचये निविष्टाः ते तद्धर्माणः किमपरं कुर्वन्ति? इति दर्शयितुमाह– **पुढो पुढो** इत्यादि। **पृथक् पृथक्** एकेन्द्रिय-[5]द्वीन्द्रियादिकां **जातिं** अनेकशः **प्रकल्पयन्ति**= प्रकुर्वन्ति।

[6]पाठान्तरं वा– '**एत्थ मोहे पुणो पुणो**'। **अत्र**=अस्मिन् इच्छाप्रणीतादिके

---

टि० १.प्रयत्नशत० ग च॥ २.०मनोऽनुकूला ख॥ ३.निकेताः आश्रया क॥ ४.वङ्कानिकेताः ख घ च॥ ५.०द्वीन्द्रिय-त्रीन्द्रियादिकां ख॥ ६.पठ्यते च-एत्थ ख च॥

हृषीकानुकूले ❐ **मोहे** कर्मरूपे वा मोहे निमग्नाः **पुनः पुनः** तत् कुर्वन्ति येन तदप्रच्युतिः स्यात् ॥१३४॥

तदप्रच्युतौ च किं स्यात् ? इत्याह–

**[सू०] इहमेगेसिं तत्थ तत्थ संथवो भवति।**
**अहोववातिए फासे पडिसंवेदयंति।**

**इहमेगेसिमित्यादि**। **इह**=अस्मिन् चतुर्दशरज्ज्वात्मके लोके **एकेषां** मिथ्यात्वाऽविरति–प्रमाद-कषायवतां **तत्र तत्र** नरक-तिर्यग्गत्यादिषु यातनास्थानकेषु **संस्तवः**=परिचयो भूयो भूयो गमनाद् **भवति**। ततः किम् ? इत्याह–

**अहोववाइए** इत्यादि। त एवमिच्छया प्रणीतत्वाद् इन्द्रियवशगाः तद्वशत्वात्[1] तदनुकूलमाचरन्तो नरकादियातनास्थानजातसंस्तवाः तीर्थिका अपि औद्देशिकादि निर्दोषमाचक्षाणाः **अधऔपपातिकान्** नरकादिभवान् **स्पर्शान्**=दुः[2]खानुभवान् **प्रतिसंवेदयन्ति** =अनुभवन्ति । तथा हि– **लोकायतिका** ब्रुवते–

**"पिब खाद च[3] चारुलोचने !, यदतीतं वरगात्रि ! तन्न ते।**
**न हि भीरु ! गतं निवर्तते, समुदयमात्रमिदं कलेवरम्[4]॥"** [ ]

**वैशेषिका** अपि सावद्ययोगारम्भिणः, तथा हि ते भाषन्ते–

**"अभिषेचनोपवास-ब्रह्मचर्य-गुरुकुलवास-वानप्रस्थ-यज्ञ[5]-दान-मोक्षण[6]-दिग्-नक्षत्र-मन्त्र-काल[7]-नियमाः"** [ ] इत्यादि।

अन्ये अपि सावद्ययोगानुष्ठायिनः अनया एव दिशा वाच्याः। स्यात्–किं सर्वोऽपि इच्छाप्रणीतादिः यावत् तत्र तत्र[8] कृतसंस्तवो अधऔपपातिकान् स्पर्शान् प्रतिसंवेदयति आहोस्वित् कश्चिदेव तद्योग्यकर्मकारी एव अनुभवति?; न सर्व इति दर्शयति–

**चिट्टं कूरेहिं कम्मेहिं चिट्टं परिविचिट्ठति।**
**अचिट्टं कूरेहिं कम्मेहिं णो चिट्टं परिविचिट्ठति।**

**चिट्टमित्यादि**। **चिट्टं**=भृशमत्यर्थं **क्रूरैः** वध-बन्धादिभिः **कर्मभिः**=क्रियाभिः

टि० १. तद्वशित्वात् कप्रतिमृते॥ २. दुष्टान् भावात्(न्) प्रति० क ॥ ३. च साधु शोभने ! यदतीतं ग ॥ ४. कडेवरम् च ॥ ५. ०यज्ञादान० ग घ च॥ ६. ०मोक्षणादिनक्षत्र० क। मोक्षणा-दिग्-नक्षत्र० ग॥ ७. ०कालविधिज्ञाः इत्यादि ख ॥ ८. तत्र तत्कृतसंस्तवो० च॥

वि०टि० ❐ "मोहे इति शब्दादिके" जै० वि० प०॥

**चिट्ठमिति** भृशमत्यर्थमेव[1] विरूपां दशां वैतरणीतरणा-ऽसिपत्रवन[2]पत्रपाताभिघात-शाल्मलीवृक्षा-लिङ्गनादिजनितां अनुभवन् तमतमादि[3]स्थानेषु **परिवितिष्ठति**। यः तु नात्यर्थं हिंसादिभिः कर्मभिः वर्तते सो अत्यन्तवेदनानिचितेष्वपि नरकेषु नोत्पद्यते। स्यात्–क एवं वदन्ति[4]? इत्याह[5]–

**एगे वदंति अदुवा वि णाणी, णाणी वदंति अदुवा वि एगे ॥१३५॥**

**एगे वयंती**त्यादि। **एके**=चतुर्दशपूर्वविदादयः **वदन्ति**=ब्रुवते, **अथवाऽपि ज्ञानी** वदति ज्ञानं–सकलपदार्थाविर्भावकं अस्य अस्तीति ज्ञानी, स चैतद्[6] ब्रवीति। यद् दिव्यज्ञानी केवली भाषते श्रुतकेवलिनोऽपि तदेव भाषन्ते; यच्च [7]श्रुतकेवलिनो भाषन्ते निरावरणज्ञानिनोऽपि तदेव वदन्ति इति एतद् गत-प्रत्यागतसूत्रेण दर्शयति–

**नाणी** इत्यादि। **ज्ञानिनः**=केवलिनो यद् **वदन्ति अथवाऽपि एके** श्रुतकेवलिनो यद् वदन्ति तद् यथार्थभाषित्वाद् एकमेव, एकेषां सर्वार्थप्रत्यक्षत्वाद् अपरेषां तदुपदेशप्रवृत्तेरिति, वक्ष्यमाणेऽपि एकवाक्यता इति॥१३५॥ तदाह–

**[सू०] आवंती केआवंती लोयंसि समणा य माहणा य पुढो विवादं वदंति से दिट्ठं च णे, सुयं च णे, मयं च णे, विण्णायं च णे, उड्ढं अहं तिरियं दिसासु सव्वतो सुपडिलेहितं च ण–'सव्वे पाणा सव्वे जीवा सव्वे भूता सव्वे सत्ता हंतव्वा, अज्जावेतव्वा, परिघेत्तव्वा, परितावेतव्वा, उद्दवेतव्वा। एत्थ वि जाणह णत्थेत्थ दोसो'। अणारियवयणमेयं ॥१३६॥**

**आवंती**त्यादि। **आवंती**ति यावन्तः, **केआवंती**ति केचन, **लोके**=मनुष्यलोके, **श्रमणाः**=पाषण्डिकाः **ब्राह्मणाः**=द्विजातयः **पृथक् पृथग्** विरुद्धो वादो=**विवादः**, तं **वदन्ति**। एतदुक्तं भवति– यावन्तः केचन परलोकं ज्ञीप्सवः ते आत्मीयदर्शनानुरागितया पाराक्यं दर्शनमपवदन्तो[8] विवदन्ते। तथा हि– **भागवता** ब्रुवते–'पञ्चविंशतितत्त्वपरिज्ञानाद् मोक्षः, सर्वव्यापी आत्मा निष्क्रियो निर्गुणश्चैतन्यलक्षणः, निर्विशेषं सामान्यं[9] तत्त्वम्' इति। **वैशेषिकाः** तु भाषन्ते–'द्रव्यादिषट्पदार्थपरिज्ञानाद् मोक्षः, समवायि[10]ज्ञानगुणेन इच्छा-प्रयत्न-द्वेषादिभिश्च गुणैः गुणवानात्मा, परस्परनिरपेक्षं सामान्य-विशेषात्मकं तत्त्वम्' इति। **शाक्याः** तु वदन्ति यथा–'[11]परलोकपथानुयायी आत्मैव न विद्यते, निःसामान्यं वस्तु क्षणिकं च' इति।

टि० १. **०मेवाधिरूपां दशां** ख॥ २. **०वनपत्राभिघात०** ख॥ ३. **तमस्तमादि०** ग घ॥ ४. **वदति** क-चप्रती विना॥ ५. **इत्यत आह** च॥ ६. **चैवं ब्रवीति** ग॥ ७. **श्रुतकेवली भाषते ज्ञानिनोऽपि तदेव** ख॥ ८. **दर्शनमपवदन्ते तथा हि** ख॥ ९. **सामान्यतत्त्वम्** ख॥ १०. **समवायज्ञान०** क॥ ११. **परलोकानुया०** क-खपुस्तके ऋते॥

**मीमांसका**: तु मोक्ष-सर्वज्ञाभावेन व्यवस्थिता इति। तथा केषाञ्चित् पृथिव्यादय एकेन्द्रिया जीवा न भवन्ति। अपरे वनस्पतीनामपि अचेतनतां आहुः, तथा द्वीन्द्रियादीनामपि कृम्यादीनां न जन्तुस्वभावं प्रतिपद्यन्ते, [१]तद्भावे वा न तद्वधे बन्धो अल्पबन्धता [२]वेति, तथा हिंसायामपि भिन्नवाक्यता, तदुक्तम्–

> **"[३]प्राणी [४]प्राणिज्ञानम् घातकचित्तं च [*]तद्गता चेष्टा।**
> **प्राणैश्च विप्रयोगः पञ्चभिरापद्यते हिंसा॥"** [          ]

इत्येवमादिक औद्देशिकपरिभोगाभ्यनुज्ञादिकश्च विरुद्धो वादः स्वत एवाभ्यूह्यः। यदि वा [५]ब्राह्मण-श्रमणा धर्मविरुद्धं वादं यद् वदन्ति तत् सूत्रेणैव दर्शयति–

**से दिट्ठं च णे** इत्यादि यावत् **णत्थेत्थ दोसो त्ति । से** त्ति तच्छब्दार्थे, यदहं वक्ष्ये **तद् दृष्टम्**=उपलब्धं दिव्यज्ञानेन **अस्माभिः** अस्माकं वा सम्बन्धिना तीर्थकृता आगमप्रणायकेन, **च**शब्दः उत्तरापेक्षया समुच्चयार्थः, **श्रुतं चाऽस्माभिः** गुर्वादेः सकाशात् अस्मद्गुरुशिष्यैः वा तदन्ते[६]वासिभिः, **मतम्**=अभिमतं युक्तियुक्तत्वाद् अस्माकं अस्मत्तीर्थकराणां वा, **विज्ञातं च** तत्त्व-भेद-पर्यायैः **अस्माभिः** अस्म[७]त्तीर्थकरेण वा स्वतः, न परोपदेशदानेन, एतच्च **ऊर्ध्वा-ऽधस्तिर्यक्षु** दशस्वपि **दिक्षु सर्वतः** सर्वैरपि प्रत्यक्षा-ऽनुमानोपमाना-ऽऽगमा-ऽर्थापत्त्यादिभिः प्रकारैः **सुष्ठु प्रत्युपेक्षितं च**=पर्यालोचितं च मनःप्रणिधानादिना **अस्माभिः** अस्मत्तीर्थकरेण वा। किं तत् ? इत्याह–

**सर्वे प्राणाः सर्वे जीवाः सर्वे भूताः सर्वे सत्त्वा हन्तव्या आज्ञापयितव्याः परिग्रहीतव्याः परितापयितव्या [८]अपद्रापयितव्याः । अत्रापि** धर्मचिन्तायामपि एवं **जानीथ** यथा– **नास्त्यत्र** यागार्थं देवतोपयाचितकतया वा प्राणिहननादौ **दोषः**=पापानुबन्ध इति। एवं यावन्तः केचन [९]पाषण्डिका औद्देशिकभोजिनो ब्राह्मणा वा धर्मविरुद्धं परलोकविरुद्धं वा वादं भाषन्ते। अयं च [१०]जीवोपमर्दकत्वात् पापानुबन्धी अनार्यप्रणीत इति । आह च–

**अणारिय०** इत्यादि। आराद् याताः सर्वहेयधर्मेभ्य इति आर्याः, तद्विपर्यासाद् **अनार्याः** क्रूरकर्माणः,तेषां प्राण्युपघातकारि **इदं वचनम्** ॥१३६॥

---

टि० १. **सद्भावे वा तद्वधेऽल्पबन्धता चेति** ख। **सद्भावे वा न** च॥ २. चेति क ॥ ३. **प्राणा** ग॥ ४. **प्राणज्ञानं** ख॥ ५. **ब्राह्मणाः** च॥ ६. **०वासिभिर्वा** च॥ ७. **०त्तीर्थकराणां वा** ख॥ ८. **अपद्रावयितव्याः** ख च॥ ९. **पाषण्डिशब्दका** ख॥ १०. **जीवोपमर्दकात्** ख॥

वि०टि० "**तद्गता** घातगता" जै०वि०प०॥ ○ "**चिन्तायामपि** इति न केवलना(मा)रम्भादौ" जै०वि०प०॥

[1]ये तु न तथाभूता ते किम्भूतं प्रज्ञापयन्ति? इत्याह–

**[सू०] तत्थ जे ते आरिया ते एवं वदासी– से दुद्दिट्ठं च भे, दुस्सुयं च भे, दुम्मयं च भे, दुव्विण्णायं च भे, उड्ढं अहं तिरियं दिसासु सव्वतो दुप्पडिलेहितं च भे, जं णं तुब्भे एवं आयक्खह, एवं भासह, एवं पण्णवेह, एवं परूवेह– 'सव्वे पाणा सव्वे भूता सव्वे जीवा सव्वे सत्ता हंतव्वा, अज्जावेतव्वा, परिघेत्तव्वा, परितावेयव्वा, उद्दवेतव्वा। एत्थ वि जाणह णत्थेत्थ दोसो'। अणारियवयणमेयं॥१३७॥**

**तत्थ** इत्यादि। **तत्र** इति वाक्योपन्यासार्थे निर्धारणे वा, **ये ते आर्याः** देश-भाषा-चारित्रार्याः **त एवमवादिषुः** [2]यथा– यत् **तदनन्तरोक्तं दुर्दृष्टमेत**तत्, दुष्टं दृष्टं=दुर्दृष्टम्, **'भे' युष्माभिः** युष्मत्तीर्थकरेण वा, एवं यावद् **दुष्प्रत्युपेक्षितमि**ति। तदेवं दुर्दृष्टादिकं प्रतिपाद्य दुष्प्रज्ञापनानुवादद्वारेण* तदभ्युपगमे दोषाविष्करणमाह–

**जं णमि**त्यादि। **णमि**ति वाक्यालङ्कारे, **यत्** एतद्वक्ष्यमाणं **यूयमेवमाचड्ढ्वम्** इत्यादि यावद् **अत्रापि** यागोपहारादौ **जानीथ** यूयं [3]यथा– **नास्त्येव अत्र** प्राण्युपमर्दानुष्ठाने **दोषः**=पापानुबन्ध इति॥१३७॥

तदेवं [4]परवादे दोषाविर्भावनेन धर्मविरुद्धतां आविर्भाव्य स्वमतवादं आर्या आविर्भावयन्ति–

**[सू०] वयं पुण एवमाचिक्खामो, एवं भासामो, एवं पण्णवेमो, एवं परूवेमो– 'सव्वे पाणा सव्वे भूता सव्वे जीवा सव्वे सत्ता ण हंतव्वा, ण अज्जावेतव्वा, ण परिघेत्तव्वा, ण परियावेयव्वा, ण उद्दवेतव्वा । एत्थ वि जाणह णत्थेत्थ दोसो' । आरियवयणमेयं॥१३८॥**

**वयमि**त्यादि। **पुनः**शब्दः पूर्वस्माद् विशेषमाह। **वयं पुनः** यथा धर्मविरुद्धवादो न

– टि० १. ये तु तथाभूता न ते ख ऋते॥ २. यथा– एतदनन्त० ख। यथा– तद् यदनन्त० च॥ ३.यथा अस्त्येव घ ङ॥ ४.परिवादे क ग॥

वि०टि० * ''प्रज्ञापनानुवाद इति ब्रह्मणादिकृता [?तां] 'सव्वे भूया न हंतव्वा' इत्यादिकां परिवर्तमान इति'' जै०वि०प०॥

भवति तथा **प्रज्ञापयाम** इति। तान्येव पदानि सप्रतिषेधानि तु हन्तव्यादीनि [यावद् न केवलं अन्यत्र अस्मदीये वचने नास्ति दोषः]। **अत्रापि** अधिकारे **जानीथ** यूयं यथा– **अत्र** हननादिप्रतिषेधविधौ **नास्ति दोषः**=पापानुबन्धः, सावधारणत्वाद् वाक्यस्य नास्त्येव दोषः। प्राण्युपघातप्रतिषेधाच्च **आर्यवचनमेतत्**॥१३८॥

एवमुक्ते सति ते पाषण्डिका ऊचुः–'भवदीयं आर्यवचनं अस्मदीयं तु अनार्यं इत्येतन्निरन्तराः सुहृदः प्रत्येष्यन्ति, युक्तिविकलत्वात्'। तदत्राचार्यो यथा परमतस्य अनार्यता स्यात् तथा दिदर्शयिषुः स्ववाग्यन्त्रिता वादिनो न [1]विचलयिष्यन्तीति कृत्वा प्रत्येकमत-[2]प्रच्छनार्थमाह–

**[सू०] पुव्वं णिकाय समयं पत्तेयं पुच्छिस्सामो– 'हं भो पावादुया ! किं भे सायं दुक्खं उताहु असायं?' समिता पडिवण्णे या वि एवं बूया– 'सव्वेसिं पाणाणं सव्वेसिं भूताणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं असायं अपरिणिव्वाणं महब्भयं दुक्खं ति' त्ति बेमि॥१३९॥**

**॥ सम्मत्तस्स बीओ उद्देसओ सम्मत्तो॥**

**पुव्वमित्यादि**। **पूर्वम्**=आदावेव **समयम्**=आगमं यद् यदीयागमे अभिहितं तत् **निकाच्य**=व्यवस्थाप्य पुनः तद्विरूपापादनेन परमतानार्यता [3]प्रतिपाद्येति, अतस्तदेव परमतं प्रश्नयति। यदि वा **पूर्वं** प्राश्निकान् **निकाच्य** ततः पाषण्डिकान् प्रश्नयितुमाह–

**पत्तेयमित्यादि**। एकमेकं प्रति=**प्रत्येकं भोः प्रावादुकाः**! भवतः प्रश्नयिष्यामि– '**किं भे**=युष्माकं **सातं**=मनआह्लादकारि **दुःखं उत असातं**=मनःप्रतिकूलम्?' एवं पृष्टाः सन्तो यदि सातमित्येवं ब्रूयुः ततः प्रत्यक्षागमलोकबाधा स्यात्। अथ असातमित्येवं ब्रूयुः ततः [4]**समियामिति** सम्यक् **प्रतिपन्नाः** तान् प्रावादुकान् स्ववाग्यन्त्रितान् '**अप्येवं ब्रूयात्**' **अपिः** सम्भावने, [5]सम्भाव्यते एतद्भणनं यथा– न केवलं भवतां दुःखमसातं **सर्वेषामपि प्राणिनां दुःखमसातं**=मनसोऽनभिप्रेतं **अपरिनिर्वाणम्**=अनिर्वृत्तिरूपं **महद्भयं** दुःखमिति। एतत् परिगणय्य सर्वेऽपि प्राणिनो न हन्तव्या इत्यादि वाच्यम्। [6]तद्धनने च दोषः, यः तु अदोषमाह तद् अनार्यवचनम्, **इतिः** अधिकारपरिसमाप्तौ, **ब्रवीमि** इति पूर्ववत्॥१३९॥

तदेवं प्रावादुकानां स्ववाग्नियन्त्रणया अनार्यता प्रतिपादिता। अत्रैव **राहगुप्त**मन्त्रिणा

---

टि० १. **चलिष्यन्तीति** च॥ २. ०**प्रच्छनायाह** ख॥ ३. **प्रतिपादिता, अत**० ख॥ ४. **समियां सम्य**० ख। **समिया सम्य**० ग घ ङ च॥ ५. **सम्भाव्यमेतद्भवनं** ख॥ ६. **तद्वधेन च** ग च॥

विदितागमसद्भावेन माध्यस्थ्यमवलम्बमानेन तीर्थिकपरीक्षाद्वारेण यथा निराकरणं चक्रे तथा **निर्युक्तिकारो** गाथाभिराचष्टे–

**[नि०] [1]खुड्डग पायसमासं धम्मकहं पि य अजंपमाणेण।**
**छन्नेण अन्नलिंगी परिच्छिया राहगुत्तेणं॥२२९॥**

**खुड्डग पायसमासमि**त्यादि। अनया गाथया सङ्क्षेपतः [2]सर्वं कथानकमावेदितम्। **क्षुल्लकस्य पादसमासः** गाथापादसङ्क्षेपः तं **अजल्पता धर्मकथां च छन्नेन**=अप्रकटेन **अन्यलिङ्गिनः**=प्रावादुकाः **परीक्षिताः**=निरूपिताः **राहगुप्तेन राहगुप्त**नाम्ना मन्त्रिणा इति गाथासमासार्थः॥२२९॥ भावार्थस्तु कथानकाद् अवसेयः, तच्चेदम्–

**चम्पायां** नगर्यां **सिंहसेनस्य** राज्ञो **राहगुप्तो** [3]नाम महामन्त्री। स च अर्हद्दर्शन-भावितान्तःकरणो विज्ञात[4]सदसद्वादः। तत्र च कदाचिद् राजा आस्थानस्थो धर्मविचारं [5]प्रस्तावयति। तत्र यो यस्य अभिमतः स तं शोभनमुवाच। स च तूष्णीम्भावं भजमानो राज्ञा उक्तः– 'विचारं प्रति किमपि न ब्रूते भवान्?'। [6]स त्वाह–'किमेभिः पक्षपातवचोभिः?, [7]विमृशामः स्वत एव धर्मम्, परीक्षामहे तीर्थिकान्' इत्यभिधाय राजानुमत्या '**सकुंडलं वा वदणं ण व**'त्ति [8]अयं गाथापादो नगरमध्ये आललम्बे, [9]सम्पूर्णा तु गाथा भाण्डागारिता। नगर्यां चोद्घुष्टं यथा–'य [10]एनं गाथापादं पूरयिष्यति तस्य राजा यथेप्सितं दानं दास्यति, तद्भक्तश्च भविष्यती'ति। तं [11]च गाथापादं सर्वेऽपि गृहीत्वा प्रावादुका निर्जग्मुः। पुनश्च सप्तमेऽह्नि राजानं आस्थानस्थं उपस्थिताः। तत्रादावेव **परिव्राड्** ब्रवीति–

**[नि०] भिक्खं पविट्ठेण मएऽज्ज दिट्ठं पमदामुहं कमलविसालणेत्तं।**
**वक्खित्तचित्तेण न [12]सुट्ठु णायं, सकुंडलं वा वयणं न व त्ति॥२३०॥**

**भिक्खापविट्ठेणे**त्यादि। सुगमा, नवरमपरिज्ञाने व्याक्षेपः कारणमुपन्यस्तम्, न पुनः [13]वीतरागता इति पूर्वगाथाविसंवादादसौ तिरस्कृत्य [14]निर्धाटितः॥२३०॥ पुनस्**तापसः** पठति–

**[नि०] फलोदएणं [15]मि [16]गिहं [17]पविट्ठो, तत्थासणत्था पमदा [18]मि दिट्ठा॥**

---

टि० १. खुद्दग ञ॥ २. सर्वं इति खप्रतौ न॥ ३. **नाम मन्त्री** ख॥ ४. **०सदसद्भावः** ख॥ ५. **प्रश्नयति** क। **प्रश्नयति स्म। तत्र** ग॥ ६. **स चाह** ख॥ ७. **विमर्शामः** कप्रतिमृते॥ ८. **अयं श्लोकपादो** ग॥ ९.**सम्पूर्णश्लोकस्तु भाण्डागारितः** ग॥ १०. **एनं श्लोकपादं** ग॥ ११. **च श्लोकपादं** ग॥ १२. सुट्ठु **दिट्ठं** ञ॥ १३. **वीतरागत्वेनेति** क॥ १४. **निर्धारितः** गपुस्तकं विना॥ १५. **म्हि** ज ञ॥ १६. **गिहे** झ ञ॥ १७. **पविट्ठे** ज॥ १८. **मे** झ ञ॥

**वक्खित्तचित्तेण न सुट्टु[1] णायं, सकुंडलं वा वयणं न व त्ति॥२३१॥**

**फलोदयेण** इत्यादि। सुगमम्, पूर्ववत्॥२३१॥ तदनन्तरं **शौद्धोदनिशिष्यक** आह–

[नि०] **मालाविहारम्मि मए[2]ऽज्ज दिट्ठा, उवासिया कंचणभूसियंगी।**
**वक्खित्तचित्तेण ण सुट्टु नायं, सकुंडलं वा वयणं न व त्ति॥२३२॥**

**मालाविहार०** इत्यादि। पूर्ववत्॥२३२॥ एवमनया दिशा सर्वेऽपि तीर्थिका वाच्याः। '[3]आर्हतः तु पुनः न कश्चिदागतः' इति राजा अभाणि। मन्त्रिणा तु '**आर्हत**क्षुल्लकोऽपि एवम्भूतपरिणाम इत्येवं सम्प्रत्यय एषां स्याद्' इत्यतो भिक्षार्थं प्रविष्टः प्रत्युषसि एव क्षुल्लकः समानीतः। तेनापि गाथापादं गृहीत्वा[4] बभाषे, तद्यथा–

[नि०] **खंतस्स दंतस्स जिइंदियस्स, अज्झप्पजोगे[5] गयमाणसस्स।**
**किं मज्झ एएण विचिंतिएण 'सकुंडलं वा वयणं ण व?' त्ति॥२३३॥**

**खंतस्से**त्यादि। अत्र च क्षान्त्यादिकं अपरिज्ञाने कारणं उपन्यस्तम्, न पुनः व्याक्षेपः इत्यतो [6]गाथासंवादात् क्षान्ति-दम-जितेन्द्रियत्वा-ऽध्यात्मयोगाधिगतेश्च कारणाद् राज्ञो धर्मं प्रति भावोल्लासोऽभूत्। क्षुल्लकेन च धर्मप्रश्नोत्तरकालं पूर्वगृहीतशुष्केतरकर्दमगोलकद्वयं भित्तौ निक्षिप्य गमनमारेभे। पुनः गच्छन् राज्ञा उक्तः–'किमिति भवान् धर्मं पृष्टोऽपि न कथयति ?'। स च अवोचत्– 'हे मुग्ध ! ननु कथित एव धर्मो भवतः शुष्केतरगोलकदृष्टान्तेन'। एतदेव गाथाद्वयेनाह–

[नि०] **उल्लो सुक्को[7] य दो छूढा, गोलया मट्टियामया।**
**दो वि [8]आवडिया कुड्डे, जो [9]उल्लो सो तत्थ लग्गती॥२३४॥**

[नि०] **एवं लग्गंति दुम्मेहा, जे नरा कामलालसा।**
**विरत्ता उ [10]ण लग्गंति, जहा से सुक्कगोलए[11]॥२३५॥**

॥ चतुर्थे द्वितीयः ॥

**उल्लो सुक्को** गाहा **एवं लग्गंति** गाहा। अयमत्र भावार्थः– ये हि अङ्ग-प्रत्यङ्ग-

टि० १. सुट्टु दिट्ठं ञ॥ २. मालाविहारे मयि अज्ज दिट्ठा ञ॥ ३. आर्हतः क्षुल्लको० खपुस्तकं विना॥ ४. ०त्वा गाथा बभाषे घ ङ च। ०त्वा श्लोकः बभाषे ग॥ ५. ०योगे गय० ञ। ०जोगेसु सा(स)माहियस्स ख॥ ६. श्लोकसंवादात् ग॥ ७. सुक्खो क-छपुस्तके विना॥ ८. यावडिया झ॥ ९. उल्लो सो य लग्गती ख। तुल्लो सो तत्थ लग्गती छ। उल्लो सोऽत्थ लग्गई झ ठ। उल्लो तत्थ लग्गती ञ विना॥ १०. ण रज्जंति ख॥ ११. ०गोलओ ॥२३५॥ चतुर्थे द्वितीयः झ। ०गोलए ॥२३५॥ चतु०ऽध्य० द्वि०उद्दे०निर्युक्तिः ॥ठ॥

निरीक्षणव्यासङ्गात् कामिनीनां मुखं न पश्यन्ति तदभावे तु पश्यन्ति ते कामगृध्नुतया सार्द्राः [१]सार्द्रतया च संसारपङ्के कर्मकर्दमे वा लगन्ति। ये तु पुनः क्षान्त्यादिगुणोपेताः संसारसुख-पराङ्मुखाः काष्ठमुनयः ते शुष्कगोलकसन्निभा न क्वचिल्लगन्तीति गाथाद्वया[२]र्थः॥२३४-२३५॥

॥ इति सम्यक्त्वाध्ययने द्वितीयोद्देशकः समाप्तः॥ छ ॥

टि० १. सार्द्रत्वाच्च संसार० ख च॥ २.०र्थः॥ छ॥ समाप्तश्चायं सम्यक्त्वाध्ययनद्वितीयोद्देशकः ॥छ॥ ख च॥

## ।। तृतीय उद्देशकः ।।

उक्तो द्वितीयोद्देशकः। साम्प्रतं तृतीय आरभ्यते । अस्य च अयमभिसम्बन्धः– इह अनन्तरोद्देशके परमतव्युदासद्वारेण सम्यक्त्वमविचलं प्रतिपादयता[1] तत्सहचरितं ज्ञानं तत्फलभूता च विरतिरभिहिता, सत्यपि चास्मिंस्त्रये न पूर्वोपात्तकर्मणो निरवद्यतपोऽनुष्ठानमन्तरेण क्षयो भवतीति, अतस्तदधुना प्रतिपाद्यत इति। अनेन सम्बन्धेन आयातस्य अस्य उद्देशकस्य आदिसूत्रम्–

[सू०] **उवेहेणं बहिता य लोकं ।**
**से सव्वलोकंसि जे केइ विण्णू ।**

[2]**उवेहेणमि**त्यादि। यः अयं अनन्तरं प्रतिपादितः पाषण्डिलोकः **एनं**[3] धर्माद् **बहिः** व्यवस्थितं **उपेक्षस्व**, तदनुष्ठानं माऽनुमंस्थाः। **च**शब्दः अनुक्तसमुच्चयार्थः, [4]तदुपदेशं अभिगमन-पर्युपासन-दान-संस्तवादिकं [5]च मा कृथा इति। यः पाषण्डिलोकोपेक्षकः स कं गुणं अवाप्नुयात्? इत्याह–

**से सव्वलोए** इत्यादि। यः पाषण्डिलोकं अनार्यवचनं अवगम्य तदुपेक्षां विधत्ते **स सर्वस्मिन्**[6] **लोके ये केचिद् विद्वांसः** तेभ्योऽग्रणीः विद्वत्तम इति। स्यात्– लोके केचन विद्वांसः सन्ति येभ्यो अधिकः स्यात्? इत्यत आह–

**अणुवियि पास णिक्खित्तदंडा जे केइ सत्ता पलियं चयंति णरा मुतच्चा धम्मविदु त्ति अंजू आरंभजं दुक्खमिणं ति णच्चा।**

**अणुवीइ** इत्यादि। ये केचन लोके **निक्षिप्तदण्डाः** निश्चयेन क्षिप्तः– निक्षिप्तः परित्यक्तः काय-मनो-वाङ्मयः प्राण्युपघातकारी दण्डो यैः ते विद्वांसो भवन्त्येव, एतद् [7]**अनुविचिन्त्य**=पर्यालोच्य **पश्य**=अवगच्छ। के च उपरतदण्डाः? इत्यत आह–

**जे केइ** इत्यादि। **ये केचन** अवगतधर्माणः **सत्त्वाः** = प्राणिनः, **पलितम्** इति कर्म, तत् **त्यजन्ति**, ये च उपरतदण्डा भूत्वा अष्टप्रकारं कर्म घ्नन्ति ते विद्वांसः इत्येतद् अनुविचिन्त्य अक्षिनिमीलनेन पर्यालोच्य पश्य विवेकिन्या मत्या अवधारय। के पुनः[8] अशेषकर्मक्षयं कुर्वन्ति? इत्यत आह–

---

टि० १. **प्रतिपादितम् तत्सह०** ख।। २. **उवेह इत्यादि** क च। **उवेहि इत्यादि** ग। **उवेहे०इत्यादि** ख ।। ३.**एवं** क ग।। ४.**तदुपदेशगमन०** क।। ५.च इति ख-गप्रत्योर्न।। ६.**०न् मनुष्यलोके ये** ख ग च।। ७. **अनुचिन्त्य** चपुस्तकं विना।। ८.**पुनः शेषकर्म०** च।।

[1]**नरा** इत्यादि। **नराः**=मनुष्याः, त एव अशेषकर्मक्षयाय अलम्, नान्ये। तेऽपि न सर्वे, अपि तु **मृतार्चा** मृता इव संस्काराभावाद् अर्चा=शरीरं येषां ते तथा, निष्प्रतिकर्मशरीरा इत्यर्थः । यदि वा **अर्चा** = तेजः, स च क्रोधः, स च कषायोपलक्षणार्थः, ततश्च अयमर्थः– मृता विनष्टा अर्चा कषायरूपा येषां ते=**मृतार्चाः**, [2]अकषायिण इत्यर्थः। किञ्च– धर्मं श्रुत-चारित्राख्यं विदन्तीति **धर्मविदः, इति** हेतौ, यत एव धर्मविदोऽत एव **ऋजवः**=कौटिल्यरहिताः। स्यादेतत्–किं आलम्ब्य तद् विधेयम्? इत्यत आह– **आरंभजमित्यादि**। सावद्यक्रियानुष्ठानं आरम्भः, तस्माज्जातम्=**आरम्भजम्**, किं तत्?– **दुःखम्, इदम्** इति सकलप्राणिप्रत्यक्षम्, तथा हि– कृषिसेवा-वाणिज्याद्यारम्भप्रवृत्तो यत् शारीर-मानसं दुःखमनुभवति तद् वाचां अगोचर इति अतः प्रत्यक्षाभिधायिना इदमा उक्तम्, **इतिः** उपप्रदर्शने, इत्येतद् अनुभवसिद्धं दुःखं **ज्ञात्वा** मृतार्चा [3]धर्मविद ऋजवश्च भवन्तीति। एतच्च समस्तवेदिनो भाषन्तः इति दर्शयति–

**एवमाहु सम्मत्तदंसिणो। ते सव्वे पावादिया दुक्खस्स कुसला परिण्णमुदाहरंति इति कम्मं परिण्णाय सव्वसो ॥१४०॥**

**एवमित्यादि**। **एवं** पूर्वोक्तप्रकारेण **आहुः**=उक्तवन्तः, के एवमाहुः? **समत्वदर्शिनः** सम्यक्त्वदर्शिनः समस्तदर्शिनो वा, यद् उद्देशकादेः आरभ्य उक्तं तदेवं ऊचु इत्यर्थः । [4]कस्मात् ते एवं ऊचुः? इत्याह–

**ते सव्वे** इत्यादि। यस्मात् **ते सर्वे**ऽपि सर्वविदः **प्रावादिकाः** प्रकर्षेण [5]आ–मर्यादया वदितुं शीलं येषां ते प्रावादिनः, त एव प्रावादिकाः, यथावस्थितार्थस्य [6]प्रतिपादनाय वावदूकाः, **दुःखस्य** शारीर-मानसलक्षणस्य तदुपादानस्य वा कर्मणः **कुशलाः**=निपुणाः, तदपनोदोपायवेदिनः सन्तः ते सर्वेऽपि ज्ञपरिज्ञय परिज्ञाय हेयार्थस्य प्रत्याख्यान**परिज्ञां उदाहरन्ति । इतिः** उपप्रदर्शने, इत्येवं पूर्वोक्तया नीत्या कर्मबन्ध-उदय-सत्कर्मताविधानतः **परिज्ञाय सर्वशः**=सर्वैः प्रकारैः कुशलाः प्रत्याख्यानपरिज्ञामुदाहरन्ति। यदि वा मूलोत्तरप्रकृतिप्रकारैः सर्वैः परिज्ञाय इति मूलप्रकारा अष्टौ, उत्तरप्रकृतिप्रकारा अष्टपञ्चाशदुत्तरं शतम्। अथवा प्रकृति-स्थिति-अनुभाव-प्रदेशप्रकारैः। यदि वा उदयप्रकारैः बन्ध-सत्कर्मता-कार्यभूतैः आगामिबन्ध-सत्कर्मताकारणैश्च कर्म परिज्ञाय इति। ते चामी उदयप्रकाराः,

टि० १. नरे ग विना॥ २. **निष्कषायिण इति यावत्** ख। **अकषायिण इति यावत्** च॥ ३. **धर्मवेदिनः** ख॥ ४. **कस्मात् तदूचुः** क ग। **कस्मात् ते ऊचुः** घ च। ङप्रतौ पाठभङ्गः॥ ५. **आ** इति ख-गप्रत्योरेव॥ ६. **प्रवचनाय** ख॥

तद्यथा–

मूलप्रकृतीनां त्रीणि उदयस्थानानि– अष्टविधं सप्तविधं चतुर्विधमिति। तत्र अष्टा अपि कर्मप्रकृतीः यौगपद्येन वेदयतोऽष्टविधम्, तच्च कालतः अनादिकं अपर्यवसितं अभव्यानाम्, भव्यानां तु अनादिसपर्यवसितं सादिसपर्यवसितं चेति। मोहनीयोपशमे क्षये वा सप्तविधम्। घातिक्षये चतुर्विधमिति। साम्प्रतं उत्तरप्रकृतीनां उदयस्थानानि उच्यन्ते–

तत्र ज्ञानावरणीया-ऽन्तराययोः पञ्चप्रकारं एकमुदयस्थानम्। दर्शनावरणीयस्य द्वे– दर्शनचतुष्कस्य उदयात् चत्वारि, अन्यतरनिद्रया सह पञ्च। वेदनीयस्य सामान्येन एकं उदयस्थानं सातमसातं वेति, विरोधाद् यौगपद्योदयाभावः।

मोहनीयस्य सामान्येन नव उदयस्थानानि, तद्यथा– दश १० नव ९ अष्टौ ८ सप्त ७ षड् ६ पञ्च ५ चत्वारि ४ द्वे २ एकं १ चेति । तत्र दश– मिथ्यात्वं अनन्तानुबन्धी क्रोधोऽप्रत्याख्यानः प्रत्याख्यानावरणः सञ्ज्वलनश्च इति एतत् क्रोधचतुष्टयं, एवं मानादि-चतुष्टयमपि योज्यम्, अन्यतरो वेदः हास्य-रतियुग्मं अरति-शोकयुग्मं वा भयं जुगुप्सा चेति, भय-जुगुप्सयोः अन्यतराभावे नव ९, द्वयाभावे अष्टौ ८, अनन्तानुबन्ध्यभावे सप्त ७, मिथ्यात्वाभावे षट् ६, अप्रत्याख्यानोदयाभावे पञ्च ५, प्रत्याख्यानावरणाभावे चत्वारि ४, परिवर्तमानयुगलाभावे सञ्ज्वलना-ऽन्यतरवेदोदये सति द्वे २, वेदाभावे एकमिति १।

आयुषोऽपि एकमेव उदयस्थानम्– चतुर्णां आयुषां अन्यतरदिति।

नाम्नो द्वादश उदयस्थानानि, तद्यथा– विंशतिः २० एकविंशतिः २१ चतुर्विंशतिः २४ पञ्चविंशतिः २५ षड्विंशतिः २६ सप्तविंशतिः २७ अष्टाविंशतिः २८ एकोनत्रिंशत् २९ त्रिंशत् ३० एकत्रिंशत् ३१ नव ९ अष्टौ ८ चेति । तत्र संसारस्थानां सयोगिनां जीवानां दश उदयस्थानानि नाम्नो भवन्ति, अयोगिनां तु चरमद्वयमिति। अत्र च द्वादश ध्रुवोदयाः कर्मप्रकृतयः, तद्यथा– तैजस-कार्मणशरीरे वर्ण-गन्ध-रस-स्पर्शचतुष्टयं अगुरुलघु स्थिरं अस्थिरं शुभं अशुभं निर्माणमिति। तत्र विंशतिः अतीर्थकरकेवलिनः समुद्घातगतस्य कार्मण-शरीरयोगिनो भवति, तद्यथा– मनुष्यगतिः १ पञ्चेन्द्रियजातिः २ त्रसं ३ बादरं ४ पर्याप्तकं ५ सुभगम् ६ आदेयं ७ यशःकीर्तिरिति ८ ध्रुवोदयसहिता विंशतिः २०। एकविंशत्यादीनि तु उदयस्थानानि एकत्रिंशत्पर्यन्तानि जीव-गुणस्थानभेदादनेकभेदानि भवन्ति, तानि च इह ग्रन्थगौरवभयात् प्रत्येकं नोच्यन्त इति, अत एकैकभेदावेदनं क्रियते– तत्रैकविंशतिः गतिः १ जातिः २ आनुपूर्वी ३ त्रसं ४ बादरं ५ पर्याप्ता-ऽपर्याप्तयोः अन्यतरत् ६ सुभग-दुर्भगयोः अन्यतरत् ७ आदेया-ऽनादेययोः अन्यतरत् ८ यशःकीर्ति-

टि० १. ०गुणस्थानोदयभेदा० ख ॥

अयशःकीर्त्योः अन्यतरत् ९ एताश्च नव ध्रुवोदयसहिता एकविंशतिः २१। चतुर्विंशतिस्तु तिर्यग्गतिः १ एकेन्द्रियजातिः २ औदारिकं ३ हुण्डसंस्थानं ४ उपघातं ५ प्रत्येक-साधारणयोरन्यतरत् ६ स्थावरं ७ सूक्ष्म-बादरयोः अन्यतरत् ८ दुर्भगम् ९ अनादेयम् १० अपर्याप्तकं ११ यशःकीर्ति-अयशःकीर्त्योरन्यतरदिति १२। तत्रैव अपर्याप्तकापनयने पर्याप्तक-पराघाताभ्यां प्रक्षिप्ताभ्यां पञ्चविंशतिः २५। षड्विंशतिस्तु या असौ सयोगिकेवलिनो विंशतिः अभिहिता सैव औदारिकशरीरा-ऽङ्गोपाङ्गद्वया-ऽन्यतरसंस्थाना-ऽऽद्यसंहनन-उपघात-प्रत्येकसहिता वेदितव्या मिश्रकाययोगे वर्तमानस्य २६। [1]सैव तीर्थकरनामसहिता केवलिसमुद्घातवतो मिश्रकाययोगिन एव सप्तविंशतिः २७। सैव प्रशस्तविहायोगतिसमन्विता अष्टाविंशतिः २८। तत्र तीर्थकरनामापनयने उच्छ्वास-सुस्वर[2]-पराघातप्रक्षेपे सति त्रिंशद् भवति ३०। तत्र स्वरे निरुद्धे एकोनत्रिंशत् २९। सैव त्रिंशत् तीर्थकरनामसहिता एकत्रिंशत् ३१। नवोदयस्तु मनुष्यगतिः १ पञ्चेन्द्रियजातिः २ त्रसं ३ बादरं ४ पर्याप्तकं ५ सुभगम् ६ आदेयं ७ यशःकीर्तिः ८ तीर्थकरमिति ९, एता अयोगितीर्थकरकेवलिनः। एता एव तीर्थकरनामरहिता अष्टाविति ८।

गोत्रस्यैकमेव सामान्येन उदयस्थानम्– उच्च-नीचयोः अन्यतरत्, [3]यौगपद्येन उदयभावो नास्ति, विरोधादिति।

तदेवमुदयभेदः अनेकप्रकारतां कर्मणः परिज्ञाय प्रत्याख्यानपरिज्ञामुदाहरन्तीति॥१४०॥ यदि नाम [4]कर्मपरिज्ञामुदाहरन्ति ततः किं कार्यम्? इत्याह–

**[सू०] इह आणाकंखी पंडिते अणिहे एगमप्पाणं सपेहाए धुणे सरीरं, कसेहि अप्पाणं, जरेहि अप्पाणं।**

**इहे**त्यादि। इह=अस्मिन् प्रवचने, आज्ञां आकाङ्क्षितुं शीलमस्य इति **आज्ञाकाङ्क्षी** सर्वज्ञोपदेशानुष्ठायी, यश्च एवम्भूतः **स पण्डितः**=विदितवेद्यः **अस्निहो** भवति, स्निह्यते= श्लिष्यते अष्टप्रकारेण कर्मणा इति स्निहः, न स्निहः=अस्निहः। यदि वा स्निह्यतीति स्निहः रागवान्, यो न तथा सोऽस्निहः, उपलक्षणार्थत्वात् च अस्य राग-द्वेषरहित इत्यर्थः। अथवा निश्चयेन हन्यत इति निहतः भावरिपुभिः इन्द्रिय-कषाय-कर्मभिः, यो न तथा सो **अनिहतः**।

टि० १. **सैव पराघात-उच्छ्वास-प्रशस्तविहायोगति-सुस्वरप्रकृतिषु प्रक्षिप्तास्वेकत्रिंशत्। सैव अतीर्थकरस्य त्रिंशत्। तस्यैव व (च) स्वरे निरुद्धे एकोनत्रिंशत्। उच्छ्वासे निरुद्धे अष्टाविंशतिरिति। नवोदयस्तु** ग॥ २. ०र-**यशःकीर्तिप्रक्षेपे** क ख॥ ३. **यौगपद्येन उदयाभावो विरोधादिति** ख ग च॥ ४. **कर्मप्रतिज्ञा०** ख। **कर्म प्रति परिज्ञा०** च॥

**इह** प्रवचने **आज्ञाकाङ्क्षी पण्डितो** भावरिपुभिः **अनिहतः**, नान्यत्र, यश्च अनिहतः स परमार्थतः कर्मणः परिज्ञाता। यश्च एवम्भूतः स किं कुर्यात् ? इत्याह–

**एगमप्पाणमि**त्यादि। सः अनिहतः अस्निहो वा **आत्मानं एकं** धन-धान्य-हिरण्य-पुत्र-कलत्र-शरीरादिव्यतिरिक्तं **प्रेक्ष्य**=पर्यालोच्य **धुनीयात् शरीरकम्** सम्भावनायां लिङ्, सर्वस्मादात्मानं व्यतिरिक्तं पश्यतः सम्भाव्यत एव एतच्छरीरविधूननमिति। तच्च कुर्वता संसारस्वभावैकत्वभावना एवंरूपा भावयितव्या–

**''संसार एवायमनर्थसारः, कः कस्य कोऽत्र स्वजनः परो वा?।**
**सर्वे भ्रमन्तः स्वजनाः परे च, भवन्ति भूत्वा न भवन्ति भूयः॥''**
**''विचिन्त्यमेतद्भवताऽहमेको, न मेऽस्ति कश्चित् पुरतो न पश्चात्।**
**स्वकर्मभिर्भ्रान्तिरियं ममैव, अहं पुरस्तादहमेव पश्चात्॥''**
**''सदैकोऽहं न मे कश्चिद्, नाहमन्यस्य कस्यतिचित्।**
**न तं पश्यामि यस्याहं, नासौ भावीति यो मम॥''**
तथा– **''एकः प्रकुरुते कर्म, भुनक्त्येकश्च तत्फलम्।**
[१]**जायत्येको व्रजत्येकः, एको याति भवान्तरम्॥''** [                ]इत्यादि।

किञ्च– '[२]**कसेहि अप्पाणं जरेहि अप्पाणं**' परव्यतिरिक्त आत्मा=शरीरं, तत् कष्टतपश्चरणादिना कृशं कुरु। यदि वा **कष**= 'कस्मै कर्मणे अलम्' इत्येवं पर्यालोचय, यत् शक्नोषि तत्र [३]नियोजयेः इत्यर्थः। तथा **जर**=शरीरकं जरीकुरु तपसा तथा कुरु यथा [४]जराजीर्णमिव प्रतिभासते, विकृतिपरित्यागद्वारेण आत्मानं निःसारतां [५]आपादयेः इत्यर्थः। किमर्थं एतत्? इति चेद्, आह–

**जहा जुन्नाइं कट्ठाइं हव्ववाहो पमत्थति एवं अत्तसमाहिते अणिहे ॥१४१॥**

**जहा** इत्यादि। **यथा जीर्णानि**=निःसाराणि **काष्ठानि हव्यवाहः**=हुतभुक् [६]**प्रमथ्नाति**= शीघ्रं भस्मसात् करोति। दृष्टान्तं प्रदर्श्य [७]दार्ष्टान्तिकमाह–

**एवं अत्तसमाहिए। एवं** अनन्तरोक्तदृष्टान्तप्रकारेण आत्मना समाहितः= **आत्म-समाहितः**, ज्ञान-दर्शन-चारित्रोपयोगेन [८]सदा उपयुक्त इत्यर्थः, आत्मा वा समाहितः अस्य

टि० १. जायते एयते चैक, एको घ। जायते अयते चैक, एको ङ॥ २. कस्से अप्पाणं ख। कसे अप्पाणं जरे अप्पाणं ग॥ ३. नियोजयेदित्यर्थः घ-ङपुस्तके ऋते॥ ४. जराजीर्णमिति ख ङ॥ ५. आपादयेदित्यर्थः क ग। आपादयेत्यर्थः ख च॥ ६. प्राश्नाति ख॥ ७. दार्ष्टान्तिकं करोति–एवमंतसमाहिए ख॥ ८. सदोपयोग क॥

इति **आत्मसमाहितः**, सदा शुभव्यापारवान् इत्यर्थः, आहिताग्न्यादिदर्शनाद् आर्षत्वाद् वा निष्ठान्तस्य परनिपातः, यदि वा प्राकृते पूर्वोत्तरनिपातो अतन्त्रः, समाहितात्म इत्यर्थः। [1]**अस्निहः** =स्नेहरहितः सन् तपोऽग्निना कर्मकाष्ठं दहतीति भावार्थः॥१४१॥

एतदेव दृष्टान्त-दार्ष्टान्तिकगतमर्थं [2]**निर्युक्तिकारो** गाथया उपसञ्जिघृक्षुः आह–

**नि०]** **जह खलु [3]झुसिरं [4]कट्ठं सुचिरं सुक्खं लहुं डहइ अग्गी।**
**तह खलु खवेंति कम्मं सम्मं [5]चरणट्ठिया [6]साहू॥२३६॥**

**॥ सम्मत्तस्स निज्जुत्ती समत्ता ॥**

**जह खलु झुसिरं** गाहा। गतार्था॥२३६॥ अत्र च अस्निहपदेन रागनिवृत्तिं विधाय द्वेषनिवृत्तिं विधित्सुराह–

**सू०] विगिंच कोहं अविकंपमाणे इमं निरुद्धाउयं सपेहाए।**

**विगिंच कोहमि**त्यादि। कारणे अकारणे वा अतिक्रूराध्यवसायः=**क्रोधः**, [7]तं **परित्यज**। तस्य च कार्यं कम्पनम्, तत्प्रतिषेधं दर्शयति– **अविकम्पमानः**। किं विगणय्य एतत् कुर्यात्? इत्याह–

**इममि**त्यादि। **इदं** मनुष्यत्वं **निरुद्धायुष्कं** निरुद्धं=[8]परिगणितं आयुष्कं **सम्प्रेक्ष्य**= पर्यालोच्य क्रोधादिपरित्यागं विदध्यात्। किञ्च–

**दुक्खं च जाण अदुवाऽऽगमेस्सं।**
**पुढो फासाइं च फासे।**
**लोयं च पास विप्फंदमाणं।**

**दुक्खमि**त्यादि। [9]क्रोधाग्निना दन्दह्यमानस्य यद् मानसं **दुःखमु**त्पद्यते तद् **जानीहि,** तज्जनितकर्मविपाकापादितं **चागामि दुःखं** सम्प्रेक्ष्य क्रोधादिकं प्रत्याख्यानपरिज्ञया जानीहि, [10]परित्यजेः इत्यर्थः। आगामिदुःखस्वरूपमाह–

**पुढो** इत्यादि। **पृथक्** सप्तनरकपृथिवीसम्भवशीतोष्णवेदनाकुम्भीपाकादियातनास्थानेषु

टि० १. अस्नेहः ख च॥ २. निर्युक्तिगाथयोप० ख॥ ३. सुसिरं क छ॥ ४. कट्ठं सुक्कं सुचिरं लहुं ञ॥ ५. चरणे ठिआ ख। चरणे ठिया ज झ ञ। ६. साहू ॥२३६॥ क्ख॥ क। साहू॥ २३६॥ छ॥ चतुर्थे तृतीयः॥ चतुर्थाध्ययननिर्युक्तिः॥ झ। ञ। साहू॥ २३६॥ च०ऽध्य०उ०३ निर्यु०॥ चतुर्थोद्देशकस्य नास्ति॥ समाप्ता च०ऽध्य०निर्युक्तिः॥ठ॥ ७. तं त्यजेत् क। तं त्यज ग॥ ८. परिगलित० च॥ ९. क्रोधादिना घ ङ च॥ १०. परित्यजेदित्यर्थः ख ग च॥ ११. स्पर्शदुःखानि ख॥

**स्पर्शान्**[११]=दुःखानि, **चः** समुच्चये, न केवलं क्रोधाध्मातः तस्मिन्नेव क्षणे दुःखं अनुभवति आगामीनि पृथग् दुःखानि च **स्पृशेत्**=अनुभवेत्। तेन च अतिदुःखेन अपरोऽपि लोको दुःखितः इत्येतदाह–

**लोयं च** इत्यादि। न केवलं क्रोधादिविपाकाद् आत्मा दुःखानि अनुभवति **लोकं च** शारीर-मानसदुःखापन्नं **विस्पन्दमानम्**=अस्वतन्त्रं इतश्च इतश्च दुःखप्रतीकाराय धावन्तं **पश्य**=विवेकचक्षुषा अवलोकय। ये तु एवं न ते किम्भूता भवन्ति? इत्यत[१] आह–

**जे णिव्वुडा पावेहिं कम्मेहिं अणिदाणा ते वियाहिता।**
**तम्हाऽतिविज्जो णो पडिसंजलेज्जासि त्ति बेमि ॥१४२॥**

**॥ सम्मत्तस्स तइओ उद्देसओ सम्मत्तो॥**

**जे निव्वुडा** इत्यादि। **ये** तीर्थकरोपदेशवासितान्तःकरणा विषय-कषायाग्न्युपशमात् **निर्वृताः**=शीतीभूता **पापेषु कर्मसु अनिदानाः**=निदानरहिताः ते परमसुखास्पदतया **व्याख्याताः**, औपशमिकसुखभाक्त्वेन प्रसिद्धा इत्यर्थः। यत एवं ततः किम्? इत्याह–

**तम्हा** इत्यादि। यस्माद् राग-द्वेषाभिभूतो दुःखभाग् भवति **तस्मात् अतिविद्वान्**= विदितागमसद्भावः सन् **प्रतिसञ्ज्वलेः**=क्रोधाग्निना[२] नात्मानं दीपयेः, कषायोपशमं कुरु[३] इत्यर्थः, **इतिः** अधिकारपरिसमाप्तौ, **ब्रवीमि** इति पूर्ववत्॥१४२॥

**॥ सम्यक्त्वाध्ययने तृतीयोद्देशकटीका समाप्ता[४]॥छ॥**

---

टि० १. इत्याह ख। अत आह ग॥ २. क्रोधाग्निनाऽऽत्मानं नोद्दीपयेः ख च॥ ३. कुर्वीतेत्यर्थः ख-चपुस्तके विना॥ ४. परिसमाप्ता ख च। समाप्तेति घ ङ॥

## ॥ चतुर्थ उद्देशकः ॥

उक्तः तृतीयोद्देशकः। साम्प्रतं चतुर्थ आरभ्यते। अस्य च अयमभिसम्बन्धः– इह अनन्तरोद्देशके निरवद्यं तपः अभिहितम्, तच्च अविकलं सत्संयमव्यवस्थितस्य भवतीति, अतः संयमप्रतिपादनाय चतुर्थोद्देशक इति। अनेन सम्बन्धेन आयातस्य अस्य उद्देशकस्य आदिसूत्रम्–

**[सू०] आवीलए पवीलए णिप्पीलए जहित्ता पुव्वसंजोगं हिच्चा उवसमं।**

**आवीलए** इत्यादि। आङ् ईषदर्थे, ईषत् पीडयेत् अविकृष्टेन तपसा शरीरकं= **आपीडयेत्,** एतच्च प्रथमप्रव्रज्यावसरे। तत ऊर्ध्वमधीतागमः परिणतार्थसद्भावः [1]सन् प्रकर्षेण विकृष्टतपसा पीडयेत्=**प्रपीडयेत्**। पुनः अध्यापिताऽन्तेवासिवर्गः [2]सङ्क्रामितार्थसारः शरीरं [3]तित्यक्षुः मासा-ऽर्धमासक्षपणादिभिः शरीरं निश्चयेन पीडयेद्=**निष्पीडयेत्**। स्यात्– कर्मक्षयार्थं तपः अनुष्ठीयते, स च पूजा-लाभ-ख्यात्यर्थेन तपसा न भवति अतो निरर्थक एव शरीरपीडनोपदेश इति, अतोऽन्यथा व्याख्यायते–

कर्म एव कार्मणं शरीरं वा आपीडयेत् प्रपीडयेद् निष्पीडयेत्, [4]अत्रापि ईषदर्थादिका प्रकर्षगतिः अवसेया। यदि वा आपीडयेत् कर्म अपूर्वकरणादिकेषु सम्यग्दृष्ट्यादिषु गुणस्थानकेषु, ततः अपूर्वकरणा-ऽनिवृत्तिबादरयोः प्रपीडयेत् सूक्ष्मसम्परायावस्थायां तु निष्पीडयेत्। अथवा आपीडनं उपशमश्रेण्याम्, प्रपीडनं क्षपकश्रेण्याम्, निष्पीडनं तु शैलेश्यवस्थायामिति। किं कृत्वा एतत् कुर्यात्? इत्याह–

[5]**जहित्ता** इत्यादि। पूर्वः संयोगः=**पूर्वसंयोगः** धन-धान्य-हिरण्य-पुत्र-कलत्रादिकृतः, तं **त्यक्त्वा**। यदि वा पूर्वः– असंयमः अनादिभवाभ्यासात् तेन संयोगः=**पूर्वसंयोगः**, तं **त्यक्त्वा, आवीलये**दित्यादि सम्बन्धः। किञ्च–

[6]**हिच्चा** इत्यादि। **"हि गतौ"** [पा०धा०१२५८] इत्यस्मात् पूर्वकाले [7]क्त्वा **हित्वा**=गत्वा, किं तत्?– **उपशमं** इन्द्रिय-नोइन्द्रियजयरूपं संयमं वा गत्वा प्रतिपद्य, **आपीडयेद्** इति वर्तते। इदमुक्तं भवति– असंयमं त्यक्त्वा संयमं प्रतिपद्य तपश्चरणादिना आत्मानं कर्म वा आपीडयेत् प्रपीडयेद् निष्पीडयेदिति। यतः कर्माऽऽपीडनार्थं उपशम-प्रतिपत्तिः तत्प्रतिपत्तौ च अविमनस्कता इत्याह–

---

टि० १. **स च प्रकर्षेण** ख ॥ २. **सङ्क्रमिता०** क॥ ३. **तितिक्षु०** ङ॥ ४. **तत्रापि०** घ॥ ५. **चइत्ता** क॥ ६. **हेच्चा** ख॥ ७. **कत्वा गत्वा हित्वा** ख॥

**तम्हा अविमणे वीरे सारए समिए सहिते सदा जते।**

**तम्हा** इत्यादि। यस्मात् कर्मक्षयाय असंयमपरित्यागः, तत्परित्यागे चावश्यम्भावी संयमः, तत्र च न चित्तवैमनस्यमिति, **तस्माद् अविमनाः**– विगतं भोग-कषायादिषु अरतौ वा मनो यस्य सः=विमनाः, यो न तथा सो **अविमनाः**, कोऽसौ?– **वीरः** कर्मविदारण-समर्थः। अविमनस्कत्वात् च यत् स्यात् तद् आह–

**सारए** इत्यादि। सुष्ठु आ–जीवनमर्यादया संयमानुष्ठाने रतः=**स्वारतः**, पञ्चभिः समितिभिः **समितः**, सह हितेन=**सहितो** ज्ञानादिसमन्वितो वा सहितः, **सदा**=सर्वकालं सकृदारोपितसंयमभारः सन् तत्र **यतेत**=यत्नवान् भवेदिति। किमर्थं[1] पौनःपुण्येन संयमानुष्ठानं प्रति उपदेशो दीयते? इत्याह–

**दुरणुचरो मग्गो वीराणं अणियट्टगामीणं।**
**विगिंच मंस-सोणितं।**

**दुरनुचरो** इत्यादि। दुःखेन अनुचर्यत इति **दुरनुचरः**, कोऽसौ?– **मार्गः**= संयमानुष्ठानविधिः, केषां?– **वीराणाम्**[2]=अप्रमत्तयतीनाम्, किम्भूतानाम्? इत्याह– **अणियट्ट०** इत्यादि। **अनिवर्तः**=मोक्षः, तत्र गन्तुं शीलं येषां ते तथा, तेषामिति। यथा च[3] तन्मार्गानुचरणं कृतं भवति तद् दर्शयति–

**विगिंच** इत्यादि। **मांस-शोणितं** दर्पकारि विकृष्टतपोऽनुष्ठानादिना **विवेचय**= पृथक्कुरु, तद्ध्रासं विधेहीति यावत्, एवं वीराणां मार्गानुचरणं कृतं भवतीति भावः। यश्च एवम्भूतः स कं गुणं अवाप्नुयात्? इत्याह–

**एस पुरिसे दविए वीरे आयाणिज्जे वियाहिते जे धुणाति समुस्सयं वसित्ता बंभचेरंसि ॥१४३॥**

**एस** इत्यादि। **एषः** मांस-शोणितयोः अपनेता, पुरि शयनात्=**पुरुषः**, द्रवः=संयमः, स विद्यते यस्य असौ=**द्रविकः** मत्वर्थीयष्ठन्, द्रव्यभूतो वा मुक्तिगमनयोग्यत्वात्, [4]कर्मरिपुविदारणसहिष्णुत्वाद् **वीर** इति। मांस-शोणितापचयप्रतिपादनात्[5] च तदुत्तरेषामपि मेदआदीनां अपचयः उक्त एव द्रष्टव्यः, तद्भावभावित्वात् तेषामिति। किञ्च–

**आयाणिज्जे** इत्यादि। स वीराणां मार्गं प्रतिपन्नः मांस-शोणितयोः अपनेता मुमुक्षूणां

टि०१. पुनः पौन० इति खप्रतौ विना।। २. **धीराणाम्** च॥ ३. वा ग॥ ४. **कर्मरिपुविदारणः** च ॥ ५. **शोणितापनयापादनाच्च** ग॥

**आदानीयः**=ग्राह्य आदेयवचनश्च **व्याख्यात** इति। कश्च एवम्भूतः? इत्याह–

**जे धुणाइ** इत्यादि। **ब्रह्मचर्ये**=संयमे मदनपरित्यागे **वा उषित्वा यः समुच्छ्रयं**= शरीरं कर्मोपचयं वा तपश्चरणादिना **धुनाति**=कृशीकरोति स आदानीय इति विविधमाख्यातः =**व्याख्यात** इति सम्बन्धः ॥१४३॥

उक्ता अप्रमत्ताः। तद्विधर्मिणः तु प्रमत्तान् अभिधित्सुः आह–

**[सू०] णेत्तेहिं पलिछिण्णेहिं आताणसोतगढिते बाले अव्वोच्छिण्णबंधणे अणभिक्कंतसंजोए।**

**तमंसि अविजाणओ आणाए लंभो णत्थि त्ति बेमि॥१४४॥**

**णेत्तेहिं**[1] इत्यादि। नयन्ति अर्थदेशं अर्थक्रियासमर्थं अर्थं[2] वा आविर्भावयन्तीति **नेत्राणि** चक्षुरादीनि इन्द्रियाणि, तैः **परिच्छिन्नैः**[3] यथास्वविषयग्रहणं प्रति निरुद्धैः सद्भिः आदानीयोऽपि भूत्वा उषित्वा ब्रह्मचर्ये पुनः मोहोदयाद् **आदानश्रोतोगृद्धः** आदीयते =सावद्यानुष्ठानेन स्वीक्रियते इति **आदानं** कर्म संसारबीजभूतम्, तस्य **श्रोतांसि** इन्द्रियविषया[4] मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगा वा, तेषु **गृद्धः**=अध्युपपन्नः स्यात्। कोऽसौ?– **बालः** अज्ञो राग-द्वेष-महा-मोहाभिभूतान्तःकरणः। यश्च आदानश्रोतोगृद्धः स किम्भूतः स्यात्? इत्याह–

**अव्वोच्छिन्नबंधणे** इत्यादि। **अव्यवच्छिन्नं** जन्मशतानुवृत्ति **बन्धनं** अष्टप्रकारं कर्म यस्य स तथा। किञ्च–**अणभिक्कन्त०** इत्यादि। अनभिक्रान्तः[5]–अनतिलङ्घित. संयोगः– धन-धान्य-हिरण्य-पुत्र-कलत्रादिकृतः असंयमसंयोगो वा येन असौ=**अनभिक्रान्तसंयोगः**[6]।

तस्य च एवम्भूतस्य इन्द्रियानुकूल्यरूपे मोहात्मके वा **तमसि** वर्तमानस्य आत्महितं मोक्षोपायं वा **अविजानतः आज्ञायाः**=तीर्थकरोपदेशस्य **लाभो**[7] **नास्ति इति** एतदहं **ब्रवीमि** तीर्थकरवचनोपलब्धसद्भाव इति। यदि वा **आज्ञा**=बोधिः सम्यक्त्वम्, **अस्तिशब्दश्च**[8] निपातः त्रिकालविषयी, तेन अयमर्थः– तस्य अनभिक्रान्तसंयोगस्य भावतमसि वर्तमानस्य बोधिलाभो नासीत् नास्ति न भावीति॥१४४॥ एतदेवाह–

**[सू०] जस्स णत्थि पुरे पच्छा मज्झे तस्स कुओ सिया?।**

**जस्स णत्थि** इत्यादि। **यस्य** कस्यचिद् अविशेषितस्य कर्मादानश्रोतोगृद्धस्य बालस्य

टि० १. णित्तेहिं ग। णेत्तेहि घ। णेतेहिं ङ॥ २. ०अर्थं आविर्भाव० ङ ऋते॥ ३. पलिच्छिन्नैः क॥ ४. इन्द्रिय-मिथ्यात्वा० क। इन्द्रिय-विषय-मिथ्यात्वा० घ ङ॥ ५. ०न्तः नातिलङ्घितः ख॥ ६. अनतिलङ्घितः ख॥ ७. लम्भा क॥ ८. ०शब्दश्चायं निपात० क-गप्रती ऋते॥

अव्यवच्छिन्नबन्धनस्य अनभिक्रान्तसंयोगस्य अज्ञानतमसि वर्तमानस्य **पुरा**=पूर्वजन्मनि बोधिलाभो **नास्ति** सम्यक्त्वं नासीत्, **पश्चाद**पि एष्येऽपि जन्मनि न भावि, **मध्ये** मध्यजन्मनि **तस्य कुतः स्यात्** ? इति। एतदुक्तं भवति– यस्यैव पूर्वं बोधिलाभः संवृत्तो भविष्यति वा तस्यैव वर्तमानकाले भवति, येन हि सम्यक्त्वं [१]आस्वादितं पुनः मिथ्यात्वोदयात् तत् प्रच्यवते [२]तस्य अपार्धपुद्गलावर्तेनापि कालेन अवश्यं [३]तत्सद्भावात् । न हि अयं सम्भवोऽस्ति– प्रच्युतसम्यक्त्वस्य पुनः असम्भव एवेति।

अथवा निरुद्धेन्द्रियः अपि आदानश्रोतोगृद्ध इत्युक्तः। तद्विपर्ययभूतस्य तु अतिक्रान्त-सुखस्मरणं अकुर्वतः आगामि च दिव्याङ्गनाभोगं अनभिकाङ्क्षतो वर्तमानसुखाभिष्वङ्गोऽपि नैव स्यादिति एतद् दर्शयितुमाह–

**जस्स नत्थि** इत्यादि। **यस्य** भोगविपाकवेदिनः पूर्वभुक्तानुस्मृतिः **नास्ति**, नापि पाश्चात्यकालभोगाभिलाषिता विद्यते, **तस्य** व्याधिचिकित्सारूपान् भोगान् भावयतः **मध्ये** वर्तमानकाले **कुतो** भोगेच्छा **स्यात्**?, मोहनीयोपशमात् नैव स्याद् इत्यर्थः। यस्य तु त्रिकालविषया भोगेच्छा निवृत्ता स किम्भूतः स्यात्? इत्याह–

**से हु पन्नाणमंते बुद्धे आरंभोवरए।**
**सम्ममेतं ति पासहा।**

**से हु** इत्यादि। हुः यस्मादर्थे, यस्माद् निवृत्तभोगाभिलाषः तस्मात् **स प्रज्ञानवान्** प्रकृष्टं ज्ञानं=प्रज्ञानं जीवा-ऽजीवादिपरिच्छेत्तृ, तद् विद्यते यस्य असौ=प्रज्ञानवान्; यत एव प्रज्ञानवान् अत एव **बुद्धः**=अवगततत्त्वः; यत एवम्भूतः अत एवाह–'**आरंभोवरए**' सावद्यानुष्ठानम् =आरम्भः, तस्मादुपरतः=**आरम्भोपरतः**। एतत् च आरम्भोपरमणं शोभनमिति दर्शयन्नाह–

[४]**सम्ममि**त्यादि। यदिदं सावद्यारम्भोपरमणं **सम्यग् एतत्**=शोभनमेतत्, सम्यक्त्व-कार्यत्वाद् वा [५]**सम्यक्त्वमेतदिति** एवं **पश्यत** एवं गृह्णीत यूयमिति । किमिति आरम्भोपरमणं सम्यक्? [६]इति चेद्, आह–

**जेण बंधं वहं घोरं परितावं च दारुणं।**

**जेण** इत्यादि। **येन** कारणेन सावद्यारम्भप्रवृत्तो **बन्धं** निगडादिभिः, **वधं** कशादिभिः, **घोरं** प्राणसंशयरूपं, **परितापं** शारीर-मानसं, **दारुणं** असह्यं अवाप्नोति अत आरम्भोपरमणं

---

टि० १. आसादितं ख च॥ २. तस्योपार्ध० कआदर्शमृते॥ ३. तद्भावात् क॥ ४. सममित्यादि च॥ ५. सम्यक्त्वमिति ख॥ ६. इति तदाह क॥

सम्यग्भूतं कुर्यात्। किं कृत्वा ? इत्याह–

**पलिछिंदिय बाहिरगं च सोतं णिक्कम्मदंसी इह मच्चिएहिं ।**

**पलिच्छिंदि०** इत्यादि। [1]**परिच्छिन्द्य**=अपनीय, किं तत् ?– **श्रोतः** पापोपादानम्, तच्च धन-धान्य-हिरण्य-पुत्र-कलत्रादिरूपं हिंसाद्याश्रवद्वारात्मकं वा, **च**शब्दाद् आन्तरं च राग-द्वेषात्मकं[2] विषयपिपासारूपं चेति। किञ्च–

**निक्कम्मदंसी** इत्यादि। निष्क्रान्तः कर्मणो=निष्कर्मा मोक्षः संवरो वा, तं द्रष्टुं शीलमस्य इति **निष्कर्मदर्शी। इह** इति संसारे **मर्त्येषु** मध्ये य एव निष्कर्मदर्शी स एव बाह्या-ऽभ्यन्तरश्रोतसः छेत्ता इति। स्यात्– [3]किमभिसन्धाय स बाह्या-ऽभ्यन्तरसंयोगस्य छेत्तानिष्कर्मदर्शी वा भवेत् ? इत्यत आह–

**कम्मुणा सफलं दट्ठुं ततो णिज्जाति वेदवी॥१४५॥**

**कम्मुणा** इत्यादि। मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैः क्रियन्ते बध्यन्ते इति **कर्माणि** ज्ञानावरणीयादीनि, तेषां **सफलत्वं दृष्ट्वा, स** वा निष्कर्मदर्शी [4]वेदविद् वा**कर्मणां फलं दृष्ट्वा,** तेषां च फलम्– ज्ञानावरणीयस्य ज्ञानावृतिः, दर्शनावरणस्यदर्शनाच्छादनम्, वेदनीयस्य विपाकोदयजनिता वेदनेत्यादि।

ननु च न सर्वेषां कर्मणां [5]विपाकोदयमिच्छन्ति प्रदेशानुभवस्यापि सद्भावात्, तपसा च [6]क्षयोपपत्तेः [7]इत्यतः कथं कर्मणां सफलत्वम्? नैष दोषः, नात्र प्रकारकात्स्न्यं अभिप्रेतम्, अपि तु द्रव्यकात्स्न्यम्, तच्च अस्ति एव, तथा हि– यद्यपि [8]प्रतिबन्धव्यक्ति न विपाकोदयः तथापि अष्टानामपि कर्मणां सामान्येन सोऽस्ति एव इति।

अतः कर्मणां सफलत्वम्[9]उपलभ्य **ततः**=तस्मात् कर्मणः तदुपादानाद् आश्रवाद् वा निश्चयेन याति=**निर्याति** निर्गच्छति, तन्न विधत्ते इति यावत्। कोऽसौ?– **वेदवित्** वेद्यते सकलं चरा–ऽचरं अनेन इति वेदः आगमः, तं वेत्तीति वेदवित्, सर्वज्ञोपदेशवर्तीत्यर्थः ॥१४५॥ न [10]केवलस्य ममैव अयमभिप्रायः, सर्वेषामेव तीर्थकराणां अयमाशय इति दर्शयितुमाह– **जे खलु भो** [11]**वीरा** इत्यादि। यदि वा उक्तः सम्यग्वादो निरवद्यं तपश्चारित्रच। अधुना तत्फलमुच्यते–

---

टि० १. परिच्छिन्द्य क ग ऋते॥ २. ०कं च विषयपिपासा इत्यादि।किञ्च ख॥ ३. किमभिसन्ध्य स ग विना॥ ४. वेदविद्वान् कर्मणां ख ग॥ ५. ०विपाकोदयः प्रदेशा० ख ग॥ ६. क्षयोपपत्तेः कथं ख॥ ७. ०इत्येतत् कथं क॥ ८. प्रतिषेधं व्यनक्ति न विपाको० ख॥ ९. ०मुपलभ्यते तस्मात् घ ङ॥ १०. केवलं ममैवा० घ ङ॥ ११. धीरा च।

**सू०] जे खलु भो वीरा समिता सहिता सदा जता संथडदंसिणो आतोवरता अहा तहा लोगं उवेहमाणा पाईणं पडीणं दाहिणं उदीणं इति सच्चंसि परिविचिट्ठिंसु ।**

[1]**जे खलु** इत्यादि। **खलुशब्दः** वाक्यालङ्कारे, **ये** केचन अतीता-ऽनागत-वर्तमानाः, **भो** इति आमन्त्रणे, **वीराः** कर्मविदारणसहिष्णवः, [2]**समिताः** समितिभिः, **सहिताः** ज्ञानादिभिः, **सदा** [3]**यताः** सत्संयमेन, '[4]**संथडदंसिणो**' त्ति निरन्तरदर्शिनः शुभा-ऽशुभस्य, **आत्मोपरताः** पापकर्मभ्यः, **यथा तथा** अवस्थितं **लोकं** चतुर्दशरज्ज्वात्मकं लोकं कर्मलोकं वा **उपेक्षमाणाः**=पश्यन्तः [5]सर्वासु प्राच्यादिषु दिक्षु व्यवस्थिता इत्येवंप्रकाराः, **सत्यम्** इति [6]ऋतं तपः संयमो वा, तत्र [7]**परिचितस्थिरे** तस्थुः स्थितवन्तः। उपलक्षणार्थत्वात् त्रिकाल[8]विषयता द्रष्टव्या, तत्र अतीते काले अनन्ता अपि सत्ये तस्थुः वर्तमाने पञ्चदशसु कर्मभूमिषु सङ्ख्येयाः तिष्ठन्ति, अनागते अनन्ता अपि स्थास्यन्ति ।

**साहिस्सामो णाणं वीराणं समिताणं सहिताणं सदा जताणं संथडदंसीणं आतोवरताणं अहा तहा लोकमुवेहमाणाणं– किमत्थि उवधी पासगस्स, ण विज्जति ?, णत्थि त्ति बेमि ॥१४६॥**

॥ **चउत्थमज्झयणं सम्मत्तं** ॥

तेषां च अतीता-ऽनागत-वर्तमानानां सत्यवतां यद् **ज्ञानं**=योऽभिप्रायः तदह **कथयिष्यामि** भवताम्, शृणुत यूयम्। किम्भूतानां तेषां? [9]**वीराणामि**त्यादीनि विशेषणानि गतार्थानि। किम्भूतं ज्ञानम्? इति[10] चेद्, आह–

**किं** प्रश्ने, **अस्ति**=विद्यते, कोऽसौ?– **उपाधिः** कर्मजनितं विशेषणम्, तद्यथा– नारकः तैर्यग्यो[11]नः सुखी दुःखी सुभगो दुर्भगः पर्याप्तकोऽपर्याप्तक इत्यादि, आहोस्विद् **न विद्यते ?** इति [12]परमतमाशङ्क्य ते ऊचुः– **पश्यकस्य** सम्यग्वादादिकमर्थं पूर्वोपात्तं पश्यतीति पश्यः, स एव पश्यकः, [13]तस्य कर्मजनितोपाधिः **न विद्यते, इति** तदनुसारेण

टि० १. जे य खलु ख॥ २. समितिभिः समिताः ग॥ ३. यतास्तत्सम्भवे च संथड० ख॥ ४. संघड० घ ङ॥ ५. सर्वासु दिक्षु प्राच्यादिषु व्यव० ख॥ ६. व्रतं क घ ङ॥ ७. परिचिते स्थिरे स्थित० घ। परिचिते तस्थुः स्थिरे स्थित० ङ॥ ८. ०विषयतो द्रष्टव्याः, ख॥ ९. धीगणा० च॥ १०. इति तदाह क॥ ११. ०नः सुभगो दुर्भगः सुखी दुःखी पर्या० ख ग॥ १२. परमाशङ्क्य च ॥ १३. तदस्य ख॥

अहमपि **ब्रवीमि,** न स्वमनीषिकया इति॥१४६॥

गतः सूत्रानुगमः। तद्गतौ च समाप्तः चतुर्थोद्देशकः नयविचारातिदेशात्।

*॥समाप्तं सम्यक्त्वाध्ययनं [1]चतुर्थमिति॥छ ॥*

॥ ग्रन्थाग्रम् ६२० ॥

टि० १. **चतुर्थमिति** इति खपुस्तके नास्ति॥

# परिशिष्टानि


| | | पृष्ठाङ्क |
|---|---|---|
| १. | आचाराङ्गचूर्णि-वृत्तिगतव्याख्यावैषम्यम् | १-१५ |
| २. | कथानकानि | १६-२० |
| ३. | शास्त्रान्तरैः सह तुलना | २१-३० |
| ४. | शस्त्रपरिज्ञाध्ययनान्तर्गतपञ्चमवनस्पत्युद्देशकगत-कतिचिद्वृक्षाणां चातुर्वर्णीयछायाचित्राणि | ३१-७० |
| ५. | शीलाङ्काचार्यकृतकृतिविषयकसमालोचना<br>-ले० अमृतलाल मोहनलाल भोजक | ७१-७४ |
| ६. | सम्पादनोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च | ७५-७७ |

# १. आचाराङ्गचूर्णि-वृत्तिगतव्याख्यावैषम्यम्

## प्रथमं शस्त्रपरिज्ञाध्ययनम्

### प्रथम उद्देशकः

*** आचा०नि०गा०७, पृ०८**

**[ नि० ] ......आइण्णाऽऽजाइ आमोक्खो ॥७॥**

**[ चू० ]** इयाणिं **आयाति—** तत्थ दव्वे जहा आयातो देवदत्तो, अहवा जातिस्सरकहा(सु) सुव्वति—'अमुग-भवाओ इमं भवं आयातो', भावे गुरुपरंपरएणं।

**[ वृ० ]** इदानीं **आजातिः—** आजायन्ते तस्यां इति आजातिः । साऽपि चतुर्धा । व्यतिरिक्ता मनुष्यादिजातिः । भावाजातिस्तु ज्ञानाद्याचारप्रसूतिः अयमेव ग्रन्थ इति ।

*** आचा०नि०गा०१९, पृ०१५**

**[ नि० ] एक्का मणुस्सजाई रज्जुप्पत्तीय दो कया उसहे ।**
**निण्णेव सिप्पवणिए सावगधम्मम्मि चत्तारि ॥१९॥**

**[ चू० ]** **'एगा मणुस्सजाई'** गाहा । एत्थ **उसभसामिस्स** पुव्वभव-जम्मण-अहिसेय-(चक्क)वट्टि-रायाभिसेगो त्ति । तत्थ जे रायअस्सिता ते **खत्तिया** जाया, अणस्सिता गिहपइणो जाया । जया अग्गी उप्पण्णो ततो पागभावस्स[?स्सि]ता सिप्पिया **वाणियगा** जाया । तेहिं तेहिं सिप्पवाणिज्जेहिं वित्ति विसंतीति **वइस्सा** उप्पन्ना । भट्टारगे पव्वइए **भरहे** अभिसित्ते सावगधम्मे उप्पण्णे **बंभणा** जाया । अणस्सिता बंभणा जाया **'माहण'** त्ति । उज्जुगसभावा धम्मपिया य जं किंचि हणंतं पिच्छंति तं निवारेंति—'मा हण, भो ! मा हण'; एवं ते जणेणं सुकम्मनिव्वत्तितसन्ना बंभणा[?माहणा] जाया । जे पुण अणस्सिया असिप्पिणो असावगा य ते 'वयं खला' इति काउं तेसु तेसु पओयणेसु सोयमाणा हिंसा-चोरियादिसु दुज्झमाणा सोग-द्रोहणसीला **सुद्दा** संवुत्ता ॥१९॥

**[ वृ० ]** **एक्का** इत्यादि । यावद् **नाभेयो** भगवान् नाद्यापि राजलक्ष्मीं अध्यास्ते तावद् **एकैव मनुष्यजातिः** । तस्यैव **राज्योत्पत्तौ** भगवन्तमेव आश्रित्य ये स्थिताः ते क्षत्रियाः, शेषाश्च शोचनाद् रोदनाच्च शूद्राः । पुनः अग्न्युत्पत्तौ अयस्कारादिशिल्पवाणिज्यवृत्त्या वेशनाद् वैश्याः । भगवतो ज्ञानोत्पत्तौ **भरत**काकणीलाञ्छनात् श्रावका एव ब्राह्मणा जज्ञिरे, एते शुद्धाः, त्रयश्चान्ये गाथान्तरितगाथया प्रदर्शयिष्यन्ते ॥१९॥

*** आचा०नि०गा०३७, पृ०२०**

**[ नि० ] दव्वं जाणण पच्चक्खाणे......**

**[ चू० ]** दव्वपरिण्णा दुविहा—जाणणापरिण्णा पच्चक्खाणपरिण्णा य । तत्थ जा सा दव्वजाणणापरि(ण्णा) सा दुविहा—आगमओ नोआगमओ य । आगमओ—जस्स णं परिण्ण त्ति पदं० । णोआगमतो दुविहा—जाणगसरीर० भवियसरीर० ।

**[ वृ० ]** तत्र द्रव्यपरिज्ञा द्विधा- ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च । ज्ञपरिज्ञा आगम-नोआगमभेदाद् द्विधा । आगमतो ज्ञाता अनुपयुक्तः । नोआगमतः त्रिधा । तत्र व्यतिरिक्ता दव्यज्ञपरिज्ञा यो यद् द्रव्यं जानीते

सचित्तादि सा परिच्छेद्यद्रव्यप्राधान्याद् द्रव्यज्ञपरिज्ञा इति ।

**∗ आचा०सू०१, पृ०२९**

[ **चू०** ] तत्थ असन्निदिसाओ आगयाणं णत्थि एतं विन्नाणं–**'अन्नतरीतो दिसातो'**।

[ **वृ०** ] तत्र असञ्ज्ञिनां नैषो अवबोधो अस्ति, सञ्ज्ञिनामपि केषाञ्चिद् भवति केषाञ्चिद् न इति यथा– 'अहममुष्या दिशः समागत इह' इति ।

## द्वितीयः पृथिव्युद्देशकः

**∗ आचा०सू०१०, पृ०६५**

**[ सू० ] अट्टे लोए परिजुण्णे.....**

[ **चू०** ] निच्छितं नियतं वा ऊणो = **परिजूणो**, सव्वतो वा ऊणो । सो चउव्विहो, दव्वपरिव(?)जूणो– दरिद्दो जो वाऽईदव्वं अभिलसमाणो वि न लभइ, तिसिओ पाणियं, बुभुक्षितो असणं, आउरो भेसज्जं एवमादि । भावपरिव(?)जूणो नाणादीहिं ।

[ **वृ०** ] **परिद्यूनो** नाम परिपेलवो निस्सारः औपशमिकादिप्रशस्तभावहीनो अव्यभिचारिमोक्षसाधनहीनो वेति ।

**∗ आचा०सू०१३, पृ०६८**

**[ सू० ] तत्थ खलु भगवता.....**

[ **चू०** ] खलु विसेसणे,

[ **वृ०** ] खलुशब्दः वाक्यालङ्कारे,

**∗ आचा०सू०१४, पृ०६९**

**[ सू० ] .....एस खलु गंथे,.....**

[ **चू०** ] **खलु** विसेसणे,

[ **वृ०** ] **खलुः** अवधारणे,

**∗ आचा०सू०१७, पृ०७२**

**[ सू० ] तं परिण्णाय.....**

[ **चू०** ] **'तमि'ति** तं जहा उद्दिट्ठं पुढविक्कायसमारंभं,

[ **वृ०** ] **तं** पृथिवीकायसमारम्भे बन्धं,

## तृतीयोऽप्कायोद्देशकः

**∗ आचा०सू०१९, पृ०७९**

**[ सू० ] .....से जहा वि अणगारे....**

[ **चू०** ] **अवि** संभ[?भा]वणे, अवि भवति अवि ण भवति, सो जहा भवति जहा य ण भवति तहा इहं पि बेमि ।

[ **वृ०** ] **अपिः** समुच्चये, यथा च अनगारो न भवति तथा च ब्रवीमि **अणगारा मो त्ति एगे**

**पवदमाणे**त्यादिना इति ।

*** आचा०सू०२६, पृ०८५**

**[सू०] इहं च खलु.....**

[चू०] **खलु** विसेसणे ।

[वृ०] **खलु**शब्देऽवधारणे ।

*** आचा०सू०२६, पृ०८५**

**[सू०] इहं च खलु.....**

[चू०] **च**सद्दा उदगणिस्सिता य[?ये] पूतरगादि ते (ण) खेत्तसंभवा ।

[वृ०] **च**शब्दात् तदाश्रिताश्च पूतरक-छेदनक-लोद्दणक-भ्रमरक-मत्स्यादयो जीवा **व्याख्याताः** ।

*** आचा०सू०२८, पृ०८८**

**[सू०] एत्थ वि तेसिं णो णिकरणाए ॥२८॥**

[चू०] '**एत्थ वि तेसिं णो णितरणा**'। जइ वि ण्हाण-पियण-धोवणादिसु परिमियाऽऽरंभं करेंति तहा वि ते अविरया । साहूणं उदगाऽऽरंभविरताणं जहाऽकरणं भवति (तेण) सव्वप्रकारेण विरता भवंति ॥२८॥

[वृ०] **एतस्मिन्नपि** प्रस्तुते स्वागमानुसारेण अभ्युपगमे सति '**कप्पइ णे कप्पइ णे पाउं, अदुवा विभूसाए**' त्ति एवंरूपे, **तेषां** अयमागमो यद्बलाद् अप्कायपरिभोगे ते प्रवृत्ताः स स्याद्वादयुक्तिभिरभ्याहतः सन् **नो निकरणाए** त्ति नो निश्चयं कर्तुं समर्थो भवति । न केवलं तेषां युक्तयो न निश्चयाय अलम्, अपि तु आगमोऽपीति **अपि**शब्दः ।

## चतुर्थः तेजस्कायोद्देशकः

*** आचा०सू०३३, पृ०१००**

**[सू०] तं परिण्णाय.....**

[चू०] **तं** ति छज्जीवनिकाया अग्गिं वा ।

[वृ०] **तम्** अग्निकायविषयं समारम्भं दण्डफलं वा,

*** आचा०सू०३७, पृ०१०२**

**[सू०] .....आहच्च संपयंति य ।**

[चू०] **आहच्च** णाम कताइ पतंति

[वृ०] **आहत्य**=उपेत्य स्वत एव, यदि वा अत्यर्थं कदाचिद् वा अग्निशिखायां **सम्पतन्ति च** ।

*** आचा०सू०३७, पृ०१०३**

**[सू०] .....अगणिं च खलु पुट्ठा.....**

[ चू० ] **खलु पूरणे,**

[ वृ० ] **खलु**शब्दोऽवधारणे,

## पञ्चमो वनस्पत्युद्देशकः

*** आचा०सू०४०, पृ०११६**

[ सू० ] **तं णो करिस्सामि.....**

[ चू० ] **'तदि'ति तं भयं,**

[ वृ० ] **तं** वनस्पत्यारम्भं;

*** आचा०सू०४०, पृ०११६**

[ सू० ] **.....एसोवरते, एत्थोवरए, एस अणगारे त्ति पवुच्चति ॥४०॥**

[ चू० ] **एत्थोवरए** त्ति वणस्सइकायसमारंभे, **एसोवरए** त्ति गुरुसमीवं धम्मं वा उवेच्चेव रतो = **उवरतो**, स एव अणगारो भवति, सेसा दव्वअणगारा ॥४०॥

[ वृ० ] **एसोवरए** त्ति । **एष** एव सर्वस्मादारम्भाद् वनस्पतिविषया**दुपरतो** यो यथावत् ज्ञात्वा आरम्भं न करोतीति । स पुनरेवंविधनिवृत्तिभाक् किं **शाक्या**दिष्वपि सम्भवति उत न ?, इहैव प्रवचने इति दर्शयति– **एत्थोवरए** त्ति । **एतस्मिन्ने**व जैनेन्द्रे प्रवचने परमार्थत **उपरतः**, नान्यत्र । यथाप्रतिज्ञातनिरवद्यानुष्ठायित्वाद् उपरतव्यपदेशभाग् भवति, न शेषा**ः शाक्या**दयः, तद्विपरीतत्वाद् ।

*** आचा०सू०४१, पृ०११९**

[ सू० ] **सद्देसु यावि ।**

[ चू० ] चग्गहणा सेसविसएहि वि ।

[ वृ० ] रूप-शब्दविषयग्रहणाच्च शेषा अपि गन्ध-रस-स्पर्शा गृहीताः भवन्ति, एकग्रहणे तज्जातीयानां ग्रहणात्, आद्यन्तग्रहणाद् वा तन्मध्यग्रहणमवसेयमिति ।

*** आचा०सू०४१, पृ०१२०**

[ सू० ] **एस लोगे वियाहिते ।**

[ चू० ] **एस** असंजतलोए वियाहिते ।

[ वृ० ] **एष** इति रूप-रस-गन्ध-स्पर्श-शब्दविषयाख्यो **लोको व्याख्यातः** ।

*** आचा०सू०४५, पृ०१२३**

[ सू० ] **इमं पि विप्परिणामधम्मयं, एयं पि विप्परिणामधम्मयं ॥४५॥**

[ चू० ] **विपरिणामधम्मं** ति भावंतरसंकमणं, सो णिसेगादि-बाल-मज्झिम-वी[?थे]रियाणि; एवं वणस्सई वि बीयंकुरादिकमेण भवति तहा मूल-कंद-खंधितया ।

[ वृ० ] तथा यथा **इदं** मनुष्यशरीरं विविधः परिणामः तत्तद्रोगसम्पर्कात् पाण्डुत्व-उदरवृद्धि-शोफ-कृशत्वा-ऽङ्गुलि-नासिकाप्रवेशादिरूपो बालादिरूपो वा तथा रसायन-स्नेहाद्युपयोगाद् विशिष्टकान्ति-

बलोपचयादिरूपो **विपरिणाम:, तद्धर्मकं**=तत्स्वभावकं तथा **एतदपि** वनस्पतिशरीरं तथाविधरोगोद्भवात् पुष्प-फल-पत्र-त्वगाद्यन्यथाभवनात् तथा-विधदौहृदप्रदानेन पुष्प-फलाद्युपचयाद् **विपरिणामधर्मकम्** ।

## सप्तमो वायूद्देशकः

*** आचा०सू०६२, पृ १४६**

[ सू० ] **आरंभमाणा विणयं वयंति**

**[ चू० ]** विविधो णयो=**विणओ**, सो णाणादि तं,

**[ वृ० ]** कर्माष्टकविनयनाद् **विनयः**=संयमः,

*** आचा०सू०६२ —**

[ सू० ] **पावं कम्मं णो अण्णेसिं ।**

[ चू० ] '**णो अण्णेसिं**'ति तं पावं कम्मं णो अण्णं कुज्जा वा कारविज्जा वा ।

[ वृ० ] एवमेतत् पापमष्टादशभेदं **नान्वेषयेत्**=न कुर्यात् स्वयम्, न चान्यं कारयेत्, न कुर्वाणमन्यमनुमोदेत ।

## द्वितीयमध्ययनं लोकविजयः

### प्रथम उद्देशकः

*** आचा०नि०गा०१७३, पृ०१५४**

**[ नि० ] .......अदढत्तं बीयगम्मि.....**

**[ चू० ]** बितिए दढधितिस्स गुणा भण्णति, तं जहा– '**खणंसि मुत्ते**' [आचा०सू०६९] एवमादि; अदढधितिस्स दोसा, तं जहा–'**अणाणाए पुट्ठा नियट्टंति मंदा मोहेण पाउया**' [आचा०सू०७] ।

[ वृ० ] '**अदढत्तं बीयगम्मि**' त्ति **द्वितीयो**द्देशके **अद्दढत्वं** संयमे न कार्यमिति शेष, विषय-कषायादौ चाद्दढत्वं कार्यमिति; वक्ष्यति च–**अरइं आउट्टे मेहावी** [सू०६९] ।

*** आचा०नि०गा०१७६, पृ०१५६**

**[ चू० ]** विजय, विचारणा, मग्गणा एगट्ठा ।

[ वृ० ] विजयः अभिभवः पराभवः पराजय इति पर्यायाः ।

*** आचा०नि०गा०१८२, पृ०१६१**

**[ नि० ] .......सिद्धी णिब्भय.....**

**[ चू० ] फलगुणो** णाम तव-संजमादिसव्वकिरियाओ इहलोइयाओ फलनिमित्तं आरभंति । ताओ सम्मत्ता-दिविरहियाओ अणेगंतियाओ अणच्चंतियाओ य अगुण एव द्दष्टव्यो । सम्मत्ततव-संजमकिरियाओ एगंतियाओ अच्चंतियाओ य सिद्धीसुहअव्वाबाहफला इति ।

**[ वृ० ]** फलं च क्रियाया भवति, तस्याश्च क्रियायाः सम्यग्दर्शन-ज्ञान-चारित्ररहिताया ऐहिका-ऽऽमुष्मिकार्थं प्रवृत्ताया अनात्यन्तिकः अनैकान्तिको भवन् फलगुणोऽपि अगुण एव भवति । सम्यग्दर्शन-ज्ञान-

चारित्रक्रियायास्तु एकान्तिका-ऽऽत्यन्तिका-ऽनाबाधसुखाख्य**सिद्धि**फलगुणो अवाप्यते ।

*** आचा०नि०गा०१८५, पृ०१६५**

**[ नि० ] .......खेत्तऽद्धा.....**

**[ चू० ] खेत्तद्धाणं–** गामादीणं णिविट्ठाणं उव[?व्व] सिताण वि ट्ठाणं दीसति ।

**[ वृ० ] क्षेत्रस्थानं भरता**दि ऊर्ध्वा-ऽधः-तिर्यग्लोकादि वेति, यत्र वा क्षेत्रे स्थानं व्याख्यायत इति ।

*** आचा०नि०गा०१८५, पृ०१६६**

**[ नि० ] संजम पग्गह जोहे.....**

**[ चू० ]** लोइयं पंचविहं–राय-जुवराय-सेणावइ-महत्तर-अमच्चकुमारा ।

**[ वृ० ]** लौकिकं तावत् पञ्चविधम्, तद्यथा–राजा युवराजो महत्तरोऽमात्यः कुमारश्च इति ।

*** आचा०सू०६३, पृ०१८५**

**[ सू० ] इति से गुणट्ठी.....**

**[ चू० ] इति** उवप्रदरिसणे,

**[ वृ० ] इति** हेतौ,

*** आचा०सू०६३, पृ०१८६**

**[ सू० ] सहि-सयण-संगंथ-संथुता मे.....**

**[ चू० ] सयणा** = पुव्व-पच्छासंथुता, **संगंथो** = छिन्नयुद्धो, **संयु[?थु]त्ता** = साहवासा दिट्ठा भट्ठा य ।

**[ वृ० ] स्वजनः**=पितृव्यादिः, **सङ्ग्रन्थः**=स्वजनस्यापि स्वजनः पितृव्यपुत्र-शालादिः, **संस्तुतः** भूयो भूयो दर्शनेन परिचितः, अथवा पूर्वसंस्तुतो माता-पित्रादिरभिहितः, पश्चात्संस्तुतः शालकादिः, स इह ग्राह्यः ।

*** आचा०सू०६५, पृ०१९८**

**[ सू० ] .....अंतरं च खलु.....**

**[ चू० ] 'अंतरं च खलु'** ति । **अंतरं** विरहो, छिद्दं । जहा कोइ सधणो पुरिसो पंथं वच्चंतो चोरेहिं चारियं अप्पाणं जाणित्ता तेसिं सुत्त-मत्त-पमत्ताणं अंतरं लद्धुं णिस्सरति, इहरहा तेसिं मुहे पडिइ; एवं माणुसस्स खेत्त-कालाईणि लद्धुं, अहवा नाणावरणीयं अंतरं लद्धुं जति ण परक्कमति तो पुणरवि संसारे पडइ । **च** पूरणे, **खलु** विसेसणे, किं विसेसेइ ?–मणुस्सेसुं तं अंतरं भवति, ण अण्णत्थ । **इमं** ति तव संजमं च, सम्मं पेहाए (=**सपेहाए** ), धी, बुद्धी, पेमी[?हा], प[?म]तीति (एगट्ठा), मुहुत्ते वि = **मुहुत्तमवि णो पमायए,** किमु चिरकालं ? । अंतोमुहुत्तिओ उवओगो, तेण समतो ण भणितो, इहरा समयमवि ण पमातए ।

**[ वृ० ] अंतरं चे**त्यादि । **अन्तरम्** इति अवसरः, तच्च आर्यक्षेत्र-सुकुलोत्पत्ति-बोधिलाभ-सर्वविरत्यादिकम्, **चः** समुच्चये, **खलुः** अवधारणे, **'इममि'**ति अनेन इदमाह–विनेयः तपः-संयमादौ अवसीदन् प्रत्यक्षभावापन्नं आर्यक्षेत्रादिकं अन्तरमवसरं उपदर्श्य अभिधीयते–'तव अयं एवम्भूतोऽवसरोऽनादौ संसारे पुनरतीव सुदुर्लभ एवेति; अतस्तमवसरं **सम्प्रेक्ष्य**=पर्यालोच्य **धीरः** सन् **मुहूर्तमप्येकं नो**

**प्रमादयेत्**=न प्रमादवशगो भूयादि'ति ।

*** आचा०सू०६६, पृ०१९९**

**[ सू० ] .....भेत्ता लुंपित्ता विलुंपित्ता......**

[ चू० ] लुंपित्ता कसादीहि, मारणे पहारे य **लुंपणा**सद्दो,(एत्थ) पहारे वट्टति ।

[ वृ० ] लुम्पयिता ग्रन्थिच्छेदादिभिः ।

**द्वितीय उद्देशकः**

*** आचा०सू०७१, पृ०२०९**

**[ सू० ] .....जे जणा पारगामिणो.....**

[ चू० ] '**जे पारगामिणो**' पंचविहआयारगुणं पसत्थगुणमूलं पारं वा गच्छंति, **पारगामिणो** वा एते ।

[ वृ० ] पारः=मोक्षः संसारार्णवतटवृत्तित्वात् तत्कारणानि ज्ञान-दर्शन-चारित्राण्यपि पार इति । भवति हि तादर्थ्यात् ताच्छब्द्यं यथा—तन्दुलान् वर्षति पर्जन्यः । अतस्तं पारं ज्ञान-दर्शन-चारित्राख्यं गन्तुं शीलं येषां ते **पारगामिनः**,

*** आचा०सू०७१, पृ०२१०**

**[ सू० ] .....लोभमलोभेणं दुगुंछमाणो.....**

[ चू० ] **दुगुंछा** नाम पडिगारो ।

[ वृ० ] **जुगुप्समानः**=निन्दन् परिहरन्

*** आचा०सू०७३, पृ०२११**

**[ सू० ] .....से पेच्चबले.....**

[ चू० ] **से पेच्चब( ले )**—(पेच्च)लोगणिमित्तं धिज्जाइये पोग्गलेणं भुंजावेंति, जण्णा य जयंति एवमादि ।

[ वृ० ] **तत् प्रेत्यबलं** मे भविष्यती'ति बस्त्यादिकं उपहन्ति ।

**तृतीय उद्देशकः**

*** आचा०सू०७५, पृ०२१८**

**[ सू० ] .....णो पीहए.....**

[ चू० ] **पीहणं** णाम (म)दनभिलासकयं पेम्मं ।

[ वृ० ] जात्यादीनां मदस्थानानां अन्यतमदपि **नो ईहेतापि**=नाभिलषेदपि ।

*** आचा०सू०७६, पृ०२२१-२२**

**[ सू० ] .....खुज्जत्तं वडभत्तं.....**

[ चू० ] **वडभो** त्ति जस्स वडभं प[?पि]ट्ठीए णिग्गतं, । **सामो** = कुट्ठी, **सबलत्तं**—सिति ।

[ वृ० ] **वडभत्वं** विनिर्गतपृ[3]ष्ठीवडभलक्षणम्, **श्यामत्वं** कृ[4]ष्णलक्षणम्, **शबलत्वं** [5]श्वित्रलक्षणं सहजं

पश्चाद्भावि वा ।

**∗ आचा०सू०७७, पृ०२२२**

**[ सू० ] .....जाती-मरणं अणुपरियट्टमाणे ।**

**[ चू० ]** **'जाइ-मरणं'** ति जणणं (=जाति), जातिमेव मरणं, जं भणितं–जायमाणो मरणमाणो य ।

**[ वृ० ]** तथा **जाति**श्च **मरणं** च समाहारद्वन्द्वः,

**∗ आचा०सू०७९, पृ०२२६**

**[ सू० ] .....अभिजुंजियाणं संसिंचियाणं.....**

**[ चू० ]** अभिमुहं जं[?जुं]जिय = **'अभिजं[ ?जुं ] जिय**, जं भणितं–अभिभूय, तं जहा–बंध-रुंध-तासणा-कसप्पहारादिएहिं वाहित्ता तेहिं तेहिं कम्मेहिं णिजुंजइ ।

**[ वृ० ]** **अभियुज्य**=योजयित्वा अभियोगं ग्राहयित्वा, व्यापारयित्वा इत्युक्तं भवति ।

**∗ आचा०सू०७९, पृ०२२६**

**[ सू० ] .....तं पि से एगदा.....**

**[ चू० ]** **तमि**ति तं विप्परिसिट्ठं,

**[ वृ० ]** **तदपि** समुद्रोत्तरण-रोहणखनन-बिलप्रवेश-रसेन्द्रमर्दन-राजावलगन-कृषीवलादिकाभिः क्रियाभिः स्व-परोपतापकारिणीभिः स्वोपभोगाय उपार्जितं ।

**∗ आचा०सू०७९, पृ०२२७-२२८**

**[ सू० ] अणोहंतरा एते.....**

**[ चू० ]** तं भावोघं कुतित्थिया ण अलं तारेंति तेण **अणोहंतरा, एते** इति जे उद्दिट्ठा कूरकम्माणो । **'णो य ओहं तरित्तए'** त्ति **स**[?न] **य** सयमवि कम्मगुरुगत्ता अणुवायतो य **ओहं ( त )रित्तए** ।

**[ वृ० ]** तं ओघं ज्ञान-दर्शन-चारित्रबोहित्थस्थाः तरन्तीति ओघन्तराः, न ओघन्तराः=**अनोघन्तराः**, तरतेश्छान्दसत्वात् खच्, खित्त्वाद् मुमागमः, **एते** कुतीर्थिकाः पार्श्वस्थादयो वा ज्ञानादियानविकलाः । यद्यपि तेऽपि ओघतरणाय उद्यताः तथापि सम्यगुपायाभावाद् न ओघतरणसमर्था भवन्तीति । आह च– **नो य ओहं तरित्तए** । **न च**=नैव **ओघं**=भावौघं **तरितुं** समर्थाः, संसारौघ-तरणप्रत्यला न भवन्तीत्यर्थः ।

**∗ आचा०सू०७९( २ ), पृ०२२८**

**[ सू० ] आयाणिज्जं च आदाय.....**

**[ चू० ]** संसारभीतेहिं गिण्हियव्वं = **आदाणियं,** किं च तं ?–पंचविहो आयारो ।

**[ वृ० ]** आदीयन्ते=गृह्यन्ते सर्वभावा अनेन इति **आदानीयं** श्रुतं ।

## चतुर्थः उद्देशकः

**∗ आचा०सू०८३, पृ०२३८**

[ सू० ] **.....जे जणा मोहपाउडा.....**

[ चू० ] मोहो संगो विग्घो वक्खोडो, अहवा दंसणमोह-चरित्त**मोहेण पाउडा** ।

[ वृ० ] **मोहेन** =अज्ञानेन मिथ्यात्वोदयेन ।

*** आचा०सू०८४, पृ०२३४-५**

**[ सू० ] से दुक्खाए मोहाए माराए णरगाए नरगतिरिक्खाए ।**

[ चू० ] ताणि य अस्सियंतो '**से दुक्खाए' स** इति सो त्थीवसगो बालो, **दुक्खाए** त्ति संसारदुक्खस्स आयतणं भवति, **दुक्खाए मोहाए** त्ति मोहणिज्जकम्मं वड्ढेइ, अहवा **मोहाए** विसयासत्तो कज्जं अकज्जं वा ण याणति ।

[ वृ० ] तेषां **से** इति एतत् स्त्रीप्रव्यथनं आयतनभणनं वा **दुःखाय** भवति शारीर-मानसासातवेदनीयोदयाय जायते । किञ्च– **मोहाए** मोहनीयकर्मबन्धनाय अज्ञानाय वेति, तथा **माराए**=मरणाय, ततोऽपि **नरगाए** नरकाय=नरकगमनार्थम्, पुनरपि **'नरग-तिरिक्खाए'** ततोऽपि नरकादुद्वृत्य तिरश्चि एतत् प्रभवति तिर्यग्योन्यर्थं तत् स्त्रीप्रव्यथनं भोगायतनवदनं वा सर्वत्र सम्बन्धनीयम् ।

*** आचा०सू०८६, पृ०२३७**

**[ सू० ] जे ण णिव्विज्जति आदाणाए ।**

[ चू० ] **जे ण णिव्विज्जति आदाणाए'** । णिव्वेदो णाम अप्पणिंदा । अलब्भमाणे णिव्विदंति अप्पाणं–'किं मम एताए दुल्लभलाभाए पव्वज्जाए गहियाए ?'। अहवा 'अण्णे लभंति, अहं ण लभामि वराओ'।

[ वृ० ] **यो न निर्विद्यते**=न खिद्यते न जुगुप्सते, कस्मै ? **आदानाय** आदीयते=गृह्यते अवाप्यते आत्मस्वतत्त्वं अशेषावारककर्मक्षयाविर्भूतसमस्तवस्तुग्राहिज्ञाना-ऽबाधसुखरूपं येन तद् आदानं संयमानुष्ठानं, तस्मै न जुगुप्सते ।

## पञ्चम उद्देशकः

*** आचा०सू०८७, पृ०२४०**

[ सू० ] .....पुढो पहेणाए.....

[ चू० ] **पुढो पहेणाए** त्ति **पिहु** वित्थारे, अणेगप्पगारप्पधेहत्थे[?०प्पधेयत्थे],

[ वृ० ] **पुढो पहेणाए** इत्यादि, **पृथक्** पृथक् पुत्रादिभ्यः,

*** आचा०सू०८८, पृ०२४२**

**[ सू० ] सव्वामगंधं परिण्णाय.....**

[ चू० ] **आम**गहणा उग्गमकोडी; **गंध**ग्रहणा विसोधिकोडी गहिता ।

[ वृ० ] आमं अपरिशुद्धम्; गन्धग्रहणेन तु पूतिः गृह्यते ।

ननु च पूतिद्रव्यस्यापि अशुद्धत्वाद् आमशब्देनैव उपादानात् किमर्थं भेदेन उपादानमिति ? सत्यम्, अशुद्धसामान्याद् गृह्यते, किन्तु पूतिग्रहणेन इह आधाकर्माद्यविशुद्धकोटिः उपात्ता, तस्याश्च गुरुतरत्वात् प्राधान्यख्यापनार्थं पुनरुपादानम् । ततश्च अयमर्थः–गन्धग्रहणेन आधाकर्म १, औद्देशिकत्रिकं २, पूतिकर्म ३,

मिश्रजातं ४, बादरप्राभृतिका ५, अध्यवपूरकश्च ६, एते षडुद्गमदोषा अविशुद्धकोट्यन्तर्गता गृहीताः; शेषास्तु विशुद्धकोट्यन्तर्भूता आमग्रहणेन उपात्ता द्रष्टव्या इति।

*** आचा०सू०८८, पृ०२८३**

**[ सू० ] .....खणयण्णे विणयण्णे.....**

**[ चू० ]** **'खणण्णो'** णाम णिव्वावारता। ण रूवंति, पीसति, कंडेति वा जेण अणेसणा भवति। अण्णेण वा कोउएण आगमणेण वा वाउला। **'विणयण्णो'** णाम देवत-गुरु समीवे व जहा तहा परगिहं पविसइ। भणियं च–**दवदवस्स न चरेज्जा०'** [ ]। ण य अतिभूमिं गच्छेज्जा, ण दीणो ण गच्छि[व्वि?]तो, ण इत्थीणं इंदियाणि आलोएज्जा, ण गुज्झथाणाइं आभरणादीणि य चिरं निरिक्खए, ण मिहु(ण)कहासु उवधारणं देज्जा, एवमादि विणयण्णे।

**[ वृ० ]** **'खणयन्ने'** क्षण एव **क्षणकः** अवसरो भिक्षार्थं उपसर्पणादिकः, तं जानातीति; तथा **'विणयन्ने'** **विनयः** ज्ञान-दर्शन-चारित्रौपचारिकरूपः, तं जानातीति।

*** आचा०सू०८९, पृ०२४९**

**[ सू० ] जहेत्थ कुसले णोवलिंपिज्जासि.....**

**[ चू० ]** **जहित्थ कुसले** आमलेवेण वा गंधलेवेण वा आहार-उवगरण-सेज्जा-संथारगादि उप्पायंतो, अतिरित्तोवहिलेवेण वा परिकम्मण-अव[?वि]हि-परिहरण-मुच्छालेवेण विभूसालेवेण वा **ण लिंपिज्जासि**।

**[ वृ० ]** अस्मिन्नार्यप्रवेदिते मार्गे आत्मानं पापेन कर्मणा **नोपलिम्पयेदिति**।

*** आचा०सू०९०, पृ०२५०**

**[ सू० ] .....से सोयति जूरति.....**

**[ चू० ]** **जूरति** त्ति इच्छितअत्थअलाभेण तव्वियोगेण वा सरीरेण जूरति, **तप्पतित्ति** काय-वाय-मणेहि त्ति तिहि तप्पति।

**[ वृ० ]** तथा **'जूरइ'** त्ति हृदयेन खिद्यते, तद्यथा–

> **"प्रथमतरमथेदं चिन्तनीयं तवासीद्,**
> **बहुजनदयितेन प्रेम कृत्वा जनेन।**
> **हतहृदय ! निराश ! क्लीब ! सन्तप्यसे किं ?,**
> **न हि जड ! गततोये सेतुबन्धाः क्रियन्ते॥"** [ ] इत्येवमादि।

तथा **'तिप्पइ'** त्ति **"तिपृ तेपृ क्षरणार्थौ"**[पा०धा०१/३६२-३६३] **तेपते**=क्षरति सञ्चलति मर्यादातो भ्रश्यति निर्मर्यादो भवतीति यावत्।

*** आचा०सू०९२, पृ०२५३**

**[ सू० ] .....मा य हु लाल.....**

**[ चू० ]** **च** पूरणे,

[ वृ० ] **चः** समुच्चये,

**∗ आचा०सू०९४, पृ०२५७**

**[ सू० ] तेइच्छं पंडिए.....**

**[ चू० ]** चिगिच्छापंडितो = विज्जो । भिसं वतमाणो = **पवतमाणो** ।

[ वृ० ] काम**चिकित्सां पण्डितः**=पण्डिताभिमानी **प्रवदन्** अपरव्याधिचिकित्सामिव उपदिशन्नपरः तीर्थिको जीवोपमर्दे वर्तते ।

## षष्ठः उद्देशकः

**∗ आचा०सू०९७, पृ०२६२**

**[ सू० ] वंता लोगसण्ण.....**

[ चू० ] **'वंता लोगसण्णं' वमित्ता** = विहाय अवकिरित्ता, असंजय**लोयस्स सण्णा** = हिंसादिकिरियापवित्ति मिच्छादंसणअभिग्गहा वा ।

[ वृ० ] **वान्त्वा**=उद्गीर्य **लोकस्य**=प्राणिगणस्य **सञ्ज्ञा** दशप्रकारा, अतस्ताम् ।

**∗ आचा०सू०१०१, पृ०२६६**

**[ सू० ] .....पवेदितं इह माणवाणं.....**

[ चू० ] **पवेतितं** तित्थगर-गणहरेहिं, **इहेति** इह माणुस्से पवयणे वा,

[ वृ० ] **प्रवेदितं**= तीर्थकृद्भिः आवेदितं, **इह**=अस्मिन् संसारे,

**∗ आचा०सू०१०१, पृ०२६६**

**[ सू० ] .....इति कम्मं परिण्णाय.....**

[ चू० ] **इति** उवपदरिसणे,

[ वृ० ] **इतिः** पूर्वप्रक्रान्तपरामर्शकः,

**∗ आचा०सू०१०३, पृ०२६९**

**[ सू० ] .....जे बद्धे पडिमोयए, उड्ढं अहं तिरियं दिसासु,....**

[ चू० ] एवं से जहाभणितकहणाविधिजुत्तो **'उड्ढं अहे तिरियं०'** । पन्नवगदिसं पडुच्च **उड्ढं** वा, **अहे** वा, **तिरियं** वा, **दिसासु**, विदिसासु य । **'( से ) सव्वतो'—स** इति पुव्वभणितो कहगो । **सव्वतो** । उड्ढं, अहे, तिरियं दिसासु ण तस्स कम्मासवो कतोयि वि भवति ।

[ वृ० ] आचार्यादिः वा यथोक्तधर्मकथाविधिज्ञ इति । क्व पुनः व्यवस्थितान् जन्तून् मोचयति ? इत्याह—**उड्ढं** इत्यादि । **ऊर्ध्वं** ज्योतिष्कादीन्, **अधः** भवनपत्यादीन्, **तिर्यग्दिक्षु** मनुष्यादीनिति ।

प्रथमं परिशिष्टम्

## तृतीयमध्ययनं शीतोष्णीयम्

### प्रथम उद्देशकः

*** निर्यु०गा०२०२, पृ०२७४**

[ नि० ] **भावे उ पुग्गलगुणो जीवस्स गुणो अणेगविहो ॥**

[ **चू०** ] पसत्थभावुण्हं अप्पसत्थभावुण्हं च । पसत्थभावुण्हं–खाइयो भावो, जेण अट्ठविहं कम्मं डज्झति ।

[ **वृ०** ] क्षायिकोऽपि शीत एव, क्षायिकसम्यक्त्व-चारित्रादिरूपत्वात्; अथवा अशेषकर्मदाहान्यथानुपपत्तेः उष्णः ।

*** निर्यु०गा०२११, पृ०२७८**

[ नि० ] **सीउण्हफास.....**

[ **चू०** ] **सीतस्स** य **उसिणस्स** य **फासो**; अहवा '**फासो**' दंसमसगफासो गहितो ।

[ **वृ०** ] शीतं च उष्णं च=**शीतोष्णे**, तयोः **स्पर्शः**, तम् सहते इति सम्बन्धः, शीतस्पर्शोष्णस्पर्शजनित-वेदनामनुभवन् नार्तध्यानोपगतो भवतीति यावत् ।

*** आचा०सू०१०६, पृ०२८१**

[ सू० ] **समयं लोगस्स जाणित्ता.....**

[ **चू०** ] दव्वसमे माणारोहिता तुला; भावसमे आतोवमेण सव्वजीवेसु अहिंसओ । अहवा 'जं इच्छसि अत्तणए तं इच्छ परे वि जणे' एत्तिल्लयं जिणसासणए ।

[ **वृ०** ] **समयः**=आचारोऽनुष्ठानं, तं **लोकस्य**=असुमद्व्रातस्य **ज्ञात्वा अत्र शस्त्रोपरतो** भवेद् इति उत्तरसूत्रेण सम्बन्धः । 'लोको हि भोगाभिलाषितया प्राण्युपमर्दादि-कषायहेतुकं कर्म्म उपादाय नरकादियातनास्थानेषु उत्पद्यते; ततः कथञ्चिद्उद्वृत्त्य अवाप्य च अशेषक्लेशव्रातघ्नं धर्मकारणमार्यक्षेत्रादौ मनुष्यजन्म पुनरपि महामोहमोहितमतिः तत् तद् आरभते येन येनाऽधोऽधो व्रजति, संसारान्नोन्मज्जतीति अयं लोकाचारः, तं ज्ञात्वा ।

*** आचा०सू०१०८, पृ०२८५**

[ सू० ] **मायी पमायी पुणरेति गब्भं ।**

[ **चू०** ] मायी पमाती य=**मायिप्पमाति**, अहवा **मायी** णियमा **पमादी**

[ **वृ०** ] मध्यग्रहणाच्च आद्यन्तयोः ग्रहणम्, तेन क्रोधादिकषायवान् मद्यादिप्रमादवान् ।

*** आचा०सू०१०९, पृ०२८६**

[ सू० ] **जे पज्जवजातसत्थस्स खेतण्णे.....**

[ **चू०** ] तत्थ पज्जवा दव्वाणि चेव, भणितं च—

'**कइविहा णं भंते ! पज्जवा पण्णत्ता ?**''

[ व्या०**प्रज्ञा**०२५।५।७४७, प्रज्ञा० सू०५।४३८ ]

[ **वृ०** ] शब्दादीनां विषयाणां पर्यवाः=विशेषाः ।

[ **चू०** ] तेसिं च विसयाणं अराग-दोसा सत्थं, **जो** तस्स विसयपज्जवसत्थस्स **खेयण्णो** ।

**[ वृ० ]** अनुष्ठानं तत् पर्यवजातशस्त्रं तस्य, **यः पर्यवजातशस्त्रस्य खेदज्ञः** = निपुणः ।

**∗ आचा०सू०११०, पृ०२८७**

**[ सू० ] कम्मुणा उवाधि जायते ।**

**[ चू० ] 'कम्मुणा उवहि'** । उवही तिविहो– आतोवही, कम्मोवही, सरीरोवही। (तत्थ) अप्पा दुप्पउत्तो (आय)उवधी, ततो कम्मोवही भवति, ततो सरीरोवही भवति, सरीरोवहीओ य ववहरिज्जति, तं जहा–नेरईयसरीरो, ववहारेण उ नेरईओ एवमादि, तहा बाल-कुमाराति ।

**[ वृ० ] कम्मुणा** इत्यादि । उपाधीयते=व्यपदिश्यते येनेति उपाधिः विशेषणं, स **उपाधिः कर्मणा** ज्ञानावरणीयादिना **जायते**; तद्यथा– मति-श्रुता-ऽवधि-मनःपर्यायवान् मन्द-मतिस्तीक्ष्णो वेत्यादि; चक्षुर्दर्शनी अचक्षुर्दर्शनी निद्रालुरित्यादि; सुखी दुःखी वेति; मिथ्यादृष्टिः सम्यग्दृष्टिः सम्यग्मिथ्यादृष्टिः स्त्री पुमान् नपुंसकः कषायीत्यादि; सोपक्रमा-युष्को निरुपक्रमायुष्कोऽल्पायुरित्यादि; नारकस्तिर्यग्योनिरेकेन्द्रियो द्वीन्द्रियः पर्याप्तको-ऽपर्याप्तकः सुभगो दुर्भग इत्यादि; उच्चैर्गोत्रो नीचैर्गोत्रो वेति; कृपणस्त्यागी निरुपभोगो निर्वीर्य इत्येवं कर्मणा संसारी व्यपदिश्यते ।

**∗ आचा०सू०१११, पृ०२९०**

**[ सू० ] कम्ममूलं च जं छणं,**

**[ चू० ] च** पूरणे,

**[ वृ० ] चः** समुच्चये,

### द्वितीयः उद्देशकः

**∗ आचा०सू०११६, पृ०२९५**

**[ सू० ] .....समिते सहिते सदा जते.....**

**[ चू० ] सता**=णिच्चं, स तहिं चेव समितिमातियेसु **'जते'** त्ति जते ।

**[ वृ० ] सदा यतः**=अप्रमादी ।

**∗ आचा०सू०११७, पृ०२९८**

**[ सू० ] एत्थोवरए मेहावी.....**

**[ चू० ] 'एत्थोवरते'** त्ति सच्चपडिपक्खे अलिए सच्चाधिट्ठितवताण वा पडिपक्खे **उवरतो**= णिव्वितो ।

**[ वृ० ] अत्र**=अस्मिन् संयमे भगवद्वचसि वा, **उप** = सामीप्येन **रतः**= व्यवस्थितः ।

**∗ आचा०सू०११९, पृ०२९९**

**[ सू० ] तम्हा तं बिइयं.....**

**[ चू० ] बितियं** णाम पुणो पुणो, **तमिति** तं विसयसुहं असंजमं वा, **आसेवणं**=करणं ।

**[ वृ० ] तद् द्वितीयं** मृषावादमसंयमं वा **नासेवेत** ।

### तृतीय उद्देशकः

**∗ आचा०सू०१२२, पृ०३०२**

**[ सू० ] संधिं लोगस्स जाणित्ता.....**

**[ चू० ]** अहवा साहणं=**संधी**, जं भणितं--कारणं, णाणादीणि णिव्वाणसाहणाणि, लोकतीति **लोगो**,

(**जाणित्ता**=) णच्चा उवलब्धा य नाणादितियं, '**आततो बहिता**' जह अप्पणो अप्पियं दुक्खं; एवं बहिद्धा वि अप्पवतिरित्ताणं—

"**जह मम ण पियं दुक्खं०**" [ **दशवै०नि०२।१५४,अनु०द्वा०१२९** ]।

[ **वृ०** ] यदि वा सन्धानं=**सन्धिः**, स च भावसन्धिः ज्ञान-दर्शन-चारित्राध्यवसायस्य कर्मोदयात् त्रुट्यतः पुनः सन्धानं=मीलनम्, एतत् क्षायोपशमिकादिभाव**लोकस्य** विभक्तिपरिणामाद् वा **लोके** ज्ञान-दर्शन-चारित्रार्हे भाव**सन्धिं ज्ञात्वा** तदक्षूणप्रतिपालनाय विधेयमिति । यदि वा **सन्धिः**=अवसरो धर्मानुष्ठानस्य, तं **ज्ञात्वा लोकस्य**=भूतग्रामस्य दुःखोत्पादनानुष्ठानं न कुर्यात् । सर्वत्र आत्मौपम्यं समाचरेद् ।

*** आचा०सू०१२४, पृ०३०७**

[ **सू०** ] **.....णियच्छंति तथागता उ।**

[ **चू०** ] **तु** विसेसणे, किं विसेसेति ? जहेव **उसभा**दितित्थगरा गता तहा **वद्धमाणो** वि गतो=**तधागतो**। तस्सिस्सा वि तहा गच्छंती तु ।

[ **वृ०** ] तुशब्दो विशेषमाह यथा—मोहोदयाद् एके पूर्वमागामि वा अभिलषन्ति; सर्वज्ञास्तु नैवमिति ।

*** आचा०सू०१२६, पृ०३१०**

[ **सू०** ] **.....अत्ताणमेव अभिणिगिज्झ.....**

[ **चू०** ] **अप्पाणं** मोक्खअभिमुहं अधियं गिज्झ =**अधिगिज्झ, एवं** अवधारणे, **दुक्खं**=कम्मं,

[ **वृ०** ] हे जीव ! **आत्मानमेव अभिनिगृह्य**=धर्मध्यानाद् बहिः-विषयाभिष्वङ्गाय निःसरन्तमवरुध्य, ततः **एवम्** अनेन प्रकारेण **दुःखात्** सकाशाद् आत्मानं **प्रमोक्ष्यसि**।

*** आचा०सू०१२७, पृ०३१०**

[ **सू०** ] **.....सेयं समणुपस्सति**।

[ **चू०** ] **सेय** इति पसंसे अत्थे, सयंति तमिति **सेओ**, जं भणितं—मोक्खो ।

[ **वृ०** ] **श्रेयः** पुण्यमात्महितं वा ।

## चतुर्थमध्ययनं सम्यक्त्वम्

### प्रथम उद्देशकः

*** आचा०सू०१३२, पृ०३२९**

[ **सू०** ] **खेतण्णेहिं पवेदिते।**

[ **चू०** ] खित्तं=आगासं, खित्तं जाणतीति **खित्तण्णो**, तं तु आहारभूतं दव्व-काल-भावाणं अमुत्तं च पवुच्चति। मुत्ता-ऽमुत्ताणि खित्तं च जाणंतो पाएण दव्वादीणि जाणइ।

[ **वृ०** ] **खेदज्ञैः** =जन्तुदुःखपरिच्छेत्तृभिः,

### द्वितीय उद्देशकः

*** आचा०सू०१३४, पृ०३३६**

[ **सू०** ] **अहासच्चमिणं ति बेमि।**

[ चू० ] इदमिति सुयधम्मं चरित्तधम्मं च,

[ वृ० ] इदं यद् मया कथितं कथ्यमानं च,

*** आचा०सू०१३५, पृ०३३८**

[ सू० ] **इहमेगेसिं तत्थ तत्थ संथवो भवति।**

[ चू० ] इहेति इह मानुष्ये मिच्छत्तलोगे वा,

[ वृ० ] इह=अस्मिन् चतुर्दशरज्ज्वात्मके लोके,

*** आचा०सू०१३७, पृ०३४१**

[ सू० ] **तत्थ जे ते आरिया ते एवं वदासी–**

[ चू० ] जे ते **आयरिया** समणा य माहणा य ते एवमाइक्खंति एवं भासंति। कतरे ते? नाण-दंसण-चरित्तआयरिया।

[ वृ० ] ये ते **आर्याः** देश-भाषा-चारित्रार्याः।

### तृतीय उद्देशकः

*** आचा०सू०१४२, पृ०३५१**

[ सू० ] **विगिंच कोहं अविकंपमाणे इमं निरुद्धाउयं सपेहाए।**

[ चू० ] **'अविकंपमाण'** ति मंदर इव वातवेगेण तहा मिच्छादरिसणवातवेगेण सम्मदरिसणातो अविकंपमाणो विसय-कसायवातेहिं चरित्ताओ।

[ वृ० ] अतिक्रूराध्यवसायः=**क्रोधः**, तं **परित्यज**। तस्य च कार्यं कम्पनम्, तत्प्रतिषेधं दर्शयति– **अविकम्पमानः**।

### चतुर्थ उद्देशकः

*** आचा०सू०१४३, पृ०३५४**

[ सू० ] **एस पुरिसे दविए वीरे.....**

[ चू० ] **दवियो**=राग-दोसविमुक्को,

[ वृ० ] द्रवः=संयमः, स विद्यते यस्य असौ=**द्रविकः** मत्वर्थीयष्ठन्, द्रव्यभूतो वा मुक्तिगमनयोग्यत्वात्,

*** आचा०सू०१४५, पृ०३५६**

[ सू० ] **से हु पन्नाणमंते बुद्धे आरंभोवरए।**

[ चू० ] हु पादपूरणे,

[ वृ० ] हुः यस्मादर्थे,

*** आचा०सू०१४७, पृ०३५८**

[ सू० ] **जे खलु भो वीरा.....**

[ चू० ] **खलु** विसेसणे,

[ वृ० ] **खलुशब्दः** वाक्यालङ्कारे,

## २. कथानकानि

***आचा०सू०४१** -: **अपथ्याम्रफलभोजिराजा** :-

तथा अपथ्यमाम्रफलं **भुक्त्वा** अभ्यवहृत्य **राजा** नृपतिः **राज्यं** पृथिवीपतित्वं **तुः** अवधारणे भिन्नक्रमश्च । तेन हारयेदेव । सम्भवत्येव अस्याऽपथ्यभोजिनो राज्यहरणमित्यक्षरार्थः । भावार्थस्तु वृद्धसम्प्रदायादवसेयः । स चायम्–

जहा कस्सइ रन्नो अंबाजिन्नेण विसूइया जाया । सा तस्स वेज्जेहिं महया किच्छेण विचिकिच्छिया भणिओ य–जइ पुणो अंबाणि खायसि तो विणस्ससि । तस्स य पियाणि अईव अंबाणि । तेण सदेसे सव्वे उच्छाइया अंबया । अन्नया आसवाहणियाए निग्गओ सह अमच्चेण अस्सेण अवहरिओ । अस्सो दूरं गन्तूण परिस्संतो ठिओ । एगम्मि वणसंडे चूयच्छायाए अमच्चेण वारिज्जमाणो वि निविट्ठो । तस्स य हेट्ठे अंबाणि पडियाणि । सो ताणि परामुसइ । पच्छा अग्घाइ । पच्छा चक्खिउं निट्ठुहइ । अमच्चो वारेइ । पच्छा भक्खेउं मओ । इति सूत्रगर्भार्थः ॥७।११॥''

— **उत्तराध्ययनस्य** सप्तमेऽध्ययने सुखबोधावृत्तौ ॥

***आचा०सू०४१** -: **खन्तपुत्र** :-

एगो खंतो सपुत्तो पव्वइयो । सो य चेल्लओ तस्स अतीव इट्ठो । सीदमाणो य भणइ-खंत ! न सक्केमि अणुवाहणो हिंडिउं । अणुकंपाए खंतेण दिण्णा उवहणाओ । ताहे भण्णइ-उवरितला सीतेणं फुट्टंति । खल्लया से कयातो । पुणो भणइ-सीसं मे अतीव डज्झइ । ताहे सीसदुवारिया से अणुन्नाया । ताहे भणइ- न सक्केमि हिंडिउं, तो से पडिस्सए ठियस्स आणेइ । एवं न तरामि खंता ! भूमिए सुविउं, ताहे संथारो से अणुण्णातो । पुणो भणइ-न तरामि खंतो ! लोयं काउं । तो खुरेण पकज्जिओ । ताहे भणइ-अण्हाणगं न सक्केमि । तओ से फासुगपाणएण कप्पो आयरियपाउग्गं च जुयलं घेप्पइ । एवं जं जं भणइ तं तं खंतओ तस्स नेहपडिबद्धो अणुयाणइ । एवं काले गच्छमाणे पभणितं-ण तरामि अविरतियाए विणा अच्छिउं खंत ! ति । ताहे खंतो भणइ-सढोऽतोऽजोगो त्ति काऊण पडिस्सयाओ निप्फेडिओ । कम्मं न याणइ । अयाणंतो खणसंखडीए सण्णिकाउं अज्जिण्णेण मओ । विसयवसट्टो मरिउं महिसो आयातो वाहिज्जई य । खंतो वि सामण्णपरियागं पालेऊण आउक्खए कालगओ देवेसु उववण्णो ओहिं पउंजइ । ओहिणा आभोगेउं तं चेल्लगं तेण पुव्वनेहेणं तेसिं गोहाण हत्थाओ किणइ । वेउव्विए भंडीए जोएइ । वाहेइ य गुरुगं, तं अतरेंतो वोढुं तोत्तएण वहिउं भणइ-न तरामि खंता ! भिक्खं हिंडिउं, एवं भूमिए सयणं लोयं काउं, एवं ताणि सव्वाणि वयणाणि उच्चरेइ जाव अविरइयाए विणा न तरामि खंत ! त्ति । ताहे एवं भणंतस्स तस्स महिसस्स इमं चित्तं जातं-कहिं एरिसं वुत्तं सुयं वत्ति, ताहे ईहावूहमग्गणगवेसणं करेइ । एवं चिंतयंतस्स जातीसरणं समुप्पण्णं । देवेण ओही पउतो संबुद्धो । पच्छा भतं पच्चक्खाइय देवलोगं गतो ।

—**दशवैकालिक-जिन०चूर्णौ** अध्य०२,पृ०७८-९ ॥

*आचा०सू०१०२ -: दारुवनचरित्तम् :-

**व्यालुप्तशिश्नो हर** इत्यतेत् पुनरेवं किल **दारुवना**भिधाने तपोवने तापसाः परिवसन्ति स्म । तदुटजेषु च भिक्षार्थं **महेश्वरो** गृहितसमस्तस्वकीयालङ्कारो घण्टाटङ्कार-तुम्बरूझङ्काररमुखरित-दिक्‌चक्रवालः समागच्छति (स्म) । तापसीश्च स्वदर्शनजनितकामविकाराः परिभुङ्क्ते स्म । ततोऽन्यदा ऋषिभिर्विज्ञातव्यतिकरैः कोपातिरेकाच्छापेन तल्लिङ्गस्य छेदः कृतः । तत्र निखिलजनानां तच्छेदोऽभवत् प्रजानुत्पत्तिश्च । ततो देवैरकाल एव संहारो मा भूदिति तापसाः प्रसाधिताः । ते च लिङ्गं तथैव चक्रुरुक्तवन्तश्चेदम्-पूर्वकाले सदा स्तब्धमासीत्, इतस्तु भोगार्थित्व एव स्तब्धीभविष्यतीति । ततो जना अपि लिङ्गवन्तो जाताः प्रजोत्पत्तिश्चेति ।

—**अष्टकप्रकरणवृत्तौ** गा०१।२ ॥

*आचा०सू०१०२ -: भल्लिगृहोपाख्यानम् :-

**'भल्लिघरकहणं'**—एगो साधू **भरुकच्छा दक्खिणापहं** सत्थेण यातो य **भागवएण** पुच्छितो—'किमेयं भल्लिघरं ?'ति । तेण साहुणा **दारवति**दाहातो आरब्भ जहा **वासुदेवो** य पयातो जहा य कूरचारगभंजणं कोसंबारण्णपवेसो, जहा **जरकुमारागमो**, जहा य **जरकुमारेणं** भल्लिणा हओ य । एवं **भल्लिघरुप्पत्ती** सव्वा कहिया ।

—**निशीथचूर्णौ** गा०२३४३॥

*आचा०सू०१०७ -: शब्दादिविषयविपाकदृष्टान्ताः :-

१. **श्रोत्रेन्द्रिये पुष्पशालदृष्टान्तः** :-

**वसंतपुरे** णयरे **पुप्फसालो** नाम गंधव्विओ, सो अइसुस्सरो विरूवो य, तेण जणो हयहियओ कओ, तंमि णयरे सत्थवाहो दिसायत्तं गएल्लओ, **भद्दा** य से भारिया, तीए केणवि कारणेण दासीओ पयट्टियाओ, ताओ सुणंतीओ अच्छंति, कालं न याणंति, चिरेण आगयाओ अंबाडियाओ भणंति— मा भट्टिणी ! रूसेह, जं अज्ज अम्हाहिं सुयं तं पसूणवि लोभणिज्जं, किमंग पुण सकण्णाणं ?, कहंति ?, ताहिं से कहियं सा हियएण चिंतेइ-कहमहं पेच्छिज्जामि ? । अन्नया तत्थ णयरदेवयाए जत्ता जाया, सव्वं च णयरं गयं, सावि गया, लोगोवि पणमिऊणं पडिएइ पहायदेसकालो य वट्टइ, सोवि गाइऊण परिस्संतो परिसरे सुत्तो, सा य सत्थवाही दासीए समं आगया, पणिवइत्ता देउलं पयाहिणं करेइ, चेडीहिं दाइओ एस सोत्ति, सा संभंता, तओ गया, पेच्छइ विरूवं दंतुरं, भणइ-दिट्ठं से रूवेणं चेव गेयं, तीए निच्छूढं, चेतियं चऽणेण, कुसीलएहिं से कहियं, तस्स अमरिसो जाओ, तो से घरमूले पच्चूसकालसमए गाइउमारद्धो पउत्थवइयानिबद्धं, जह आपुच्छइ जहा तत्थ चिंतेइ जहा लेहे विसज्जइ जहा आगओ घरं

पविसइ, सा चिंतेइ-सभूयं वट्टइ ताए अब्भुट्ठेमित्ति आगासतलगाओ अप्पा मुक्को, सा मया, एवं सोइंदियं दुक्खाय भवइ ॥

२. **घ्राणेन्द्रिये गन्धप्रियदृष्टान्तः** :-

कुमारो गंधप्पिओ, सो य अणवरयं णावाकडएग खेल्लइ, माइसवत्तीए तस्स मंजूसाए विसं छोढूण णईए पवाहियं, तेण रमंतेण दिट्ठा, उत्तारिया, उग्घाडिऊण पलोइउं पवत्तो, पडिमंजूसाईएहिं गंधेहिं समुग्गको दिट्ठो, सोऽणेण उग्घाडिऊण जिंघिओ मओ य । एवं दुक्खाय घाणिंदियन्ति ॥

३. **जिह्वेन्द्रिये सौदासदृष्टान्तः** :-

**सोदासो** राया मंसप्पिओ, आमाघाओ, सूयस्स मंसं वीरालेण गहियं, सोयरिएसु मग्गियं, न लद्धं, डिंभरूवं मारियं, सुसंहियं, पुच्छइ, कहियं, पुरिसा से दिन्ना-मारेहत्ति, नयरेण नाओ भिच्चेहि य रक्खसोत्ति महुं पाएत्ता अडवीए पवेसितो, चच्चरे ठिओ गयं गहाय दिणे २ माणुस्सं मारेइ, केइ भणंति-विरहे जणं मारेति, तेणंतेणं सत्थो जाइ, तेण सुत्तेण न जाणिओ, साहू य आवस्सयं करेन्ता फिडिया, ते दट्ठूणं ओलग्गइ, तवेण न सक्केइ अल्लिइउं, चिंतइ, धम्मकहणं, पव्वज्जा । अन्ने भणंति- सो भणइ वच्चंते-ठाह, साहू भणइ-अम्हे ठिया तुमं चेव ठाहि, चिंतेइ, संबुद्धो, साइसया आयरिया, ते ओहिनाणी, केत्तियाणमेवं होहि ।

४. **स्पर्शेन्द्रिये सत्यकिदृष्टान्तः** :-

को **महेसरो** त्ति ?, तस्सेव **चेडगस्स** धूया **सुजेट्ठा** वेरग्गा पव्वइया, सा उवस्सयस्संतो आयावेइ, इओ य **पेढालगो** नाम परिव्वायओ विज्जासिद्धो विज्जाउ दाउकामो पुरिसं मग्गइ, जइ बंभचारिणीए पुत्तो होज्जा तो समत्थो होज्जा, तं आयावेंतीं दट्ठूणं धूमिगावामोहं काऊण विज्जाविवज्जासो तत्थ सेरित्तु काले जाए गब्भे अतिसयणाणीहिं कहियं-न एयाए कामविकारो जाओ, सड्ढयकुले वड्ढाविओ, समोसरणं गओ साहुणीहिं सह, तत्थ य **कालसंदीवो** वंदित्ता सामिं पुच्छइ- कओ मे भयं ?, सामिणा भणियं-एयाओ **सच्चतीओ**, ताहे तस्स मूलं गओ, अवण्णाए भणइ-अरे तुमं ममं मारेहिसित्ति पाएसु बला पाडिओ, संवड्ढिओ, परिव्वायगेण तेण संजतीणं हिओ, विज्जाओ सिक्खाविओ, महारोहिणिं च साहेइ, इमं सत्तमं भवं, पंचसु मारिओ, छट्ठे छम्मासावसेसाउएण नेच्छिया, अह साहेत्तुमारद्धो अणाहमडए चितियं काऊण उज्जालेत्ता अल्लचंमं वियडित्ता वामेण अंगुट्ठएण ताव चंकमइ जाव कट्ठाणि जलंति, एत्थंतरे **कालसंदीवो** आगओ कट्ठाणि छुब्भइ, सत्तरत्ते गए देवया सयं उवट्ठिया-मा विग्घं करेहि, अहं एयस्स सिज्झिउकामा, सिद्धा भणइ-एगं अंगं परिच्चय जेण पविसामि सरीरं, तेण निलाडेण पडिच्छिया, तेण अइयया, तत्थं बिलं जायं, देवयाए से तुट्ठाए तइयं अच्छि कयं तेण **पेढालो** मारिओ, कीस णेणं मम माया रायधूयत्ति विद्धंसिया, तेण से **रुद्दो** नामं जायं, पच्छा **कालसंदीवं** आभोएइ, दिट्ठो, पलाओ, मग्गओ लग्गइ, एवं हेट्ठा उवरिं च नासइ, **कालसंदीवेण** तिन्नि पुराणि विउव्विता, सामिपायमूले अच्छइ, ताणि देवयाणि

पहओ, ताहे ताणि भणंति-अम्हे विज्जाओ, सो भट्टारगपायमूलं गओत्ति तत्थ गओ, एक्कमेक्कं खामिओ, अण्णे भणंति-**लवणे** महापायाले मारिओ, पच्छा सो विज्जाचक्कवट्टी तिसंझं सव्वतित्थगरे वंदित्ता णट्टं च दाइत्ता पच्छा अभिरमइ, तेण **इंदेण** नामं कयं **महेसरो**त्ति, सोवि किर धिज्जाइयाण पओसमावण्णो धिज्जाइयकन्नगाण सयं २ विणासेइ, अन्नेसु अंतेउरेसु अभिरमइ, तस्स य भणंति दो सीसा-**नंदीसरो नंदी** य, एवं **पुप्फएण** विमाणेण अभिरमइ, एवं कालो वच्चइ, अन्नया उज्जेणीए **पज्जोयस्स** अंतेउरे **सिवं** मोत्तूणं सेसाओ विद्धंसेइ, पज्जोओ चिंतेइ- को उवाओ होज्जा जेण एसो विणासेज्जा ?, तत्थेगा **उमा** नाम गणिया रुवस्सिणी, सा किर धूवग्गहणं गेण्हइ जाहे तेणंतेण एइ, एवं वच्चइ काले उइण्णो, ताए दोण्णि पुप्फाणि वियसियं मउलियं च, मउलियं पणामियं, **महेसरेण** वियसियस्स हत्थो पसारिओ, सा मउलं पणामेइ एयस्स तुज्झे अरहसित्ति, कहं ?, ताहे भणइ-एरिसिओ कण्णाओ ममं ताव पेच्छइ, तीए सह संवसइ हियहियओ कओ, एवं वच्चइ कालो, सा पुच्छइ-काए वेलाए देवयाओ ओसरंति ?, तेण सिट्ठं -जाहे मेहुणं सेवामि, तीए रण्णो सिट्ठं मा ममं मारेहित्ति, पुरिसेहिं अंगस्स उवरिं जोगा दरिसिया, एवं रक्खामो, ते य **पज्जोएण** भणिया -सह एयाए मारेह मा य दुरारद्धं करेहिह, ताहे मणुस्सा पच्छण्णं गया, तेहिं संसट्ठो मारिओ सह तीए, ताहे **नंदीसरो** ताहिं विज्जाहिं अहिट्ठिओ आगासे सिलं विउव्वित्ता भणइ-हा दास ! मओ सित्ति, ताहे सनगरो राया उल्लपडसाडगो खमाहि एगावराहं ति, सो भणइ-एयस्स जइ तव्वत्थं अच्चेह तो मुयामि, एवं च णयरे २ एवं अवाउडियं ठावेह त्ति तो मुयामि, तो पडिवण्णो, ताहे आययणाणि कारावियाणि, एसा **महेसरस्स** उप्पत्ति ।

—**आवश्यकनिर्युक्तिशिष्यहितावृत्तौ** पृ०३९८-४०२, पृ०६८५-६८७ ॥

***आचा०सू०१३२** **—: इन्द्रनागदृष्टान्तः :—**

**वसंतपुरं** नगरं, तत्थ सिट्ठिघरं मारिए उच्छादितं, **इंदणागो** नाम दारओ, सो छुट्टो,छुहितो गिलाणो पाणितं मग्गति, जाव सव्वाणि मत्ताणि पेच्छाति, बारंपि लोगेण कंटियाहिं ढक्कियं, ताहे सो सुणइयच्छिद्देण णिग्गंतूण तंमि णगरे कप्परेण भिक्खं हिंडति, लोगो से देइ सदेसभूतपुव्वोत्तिकाउं, एवं सो संवड्ढइ । इतो य एगो सत्थवाहो **रायगिहं** जाउकामो घोसणं घोसावेति, तेण सुतं, सत्थेण समं पत्थितो, तत्थ तेण सत्थे कूरो लद्धो, सो जिमितो, ण जिण्णो, बितियदिवसे अच्छति, सत्थवाहेण दिट्ठो, चिंतेति-णूणं एस उववासिओ, सो य अव्वत्तलिंगो, बितियदिवसे हिंडंतस्स सेट्ठिणा बहुं णिद्धं च दिण्णं, सो तेण दुवे दिवसा अज्जिण्णएण अच्छति, सत्थवाहो जाणति-एस छट्ठण्णकालिओ, तस्स सद्धा जाता, सो ततियदिवसे हिंडंतो सत्थवाहेण सद्दावितो, कीसऽसि कल्लं णागतो ?, तुण्हिक्को अच्छति, जाणइ, जधा-छट्ठं कतेल्लयं, ताहे से दिण्णं, तेणवि अण्णेवि दो दिवसे अच्छावितो, लोगोवि परिणतो, अण्णस्स णिमंतेतस्सवि ण गेण्हति, अण्णे भणंति- एसो एगपिंडिओ, तेण तं अट्ठापदं लब्धं, वाणिएण भणितो-मा अण्णस्स खणं गेण्हेज्जासि, जाव णगरं गम्मति ताव अहं देमि, गता णगरं, तेण से णिवघरे मढो कतो, ताधे सीसं मुंडावेति कासायाणि य चीवराणि गेण्हति, ताधे विक्खातो जणे जातो, ताधे तस्सवि घरे णेच्छति, ताधे जद्दिवसं से पारणयं तद्दिवसं से लोगो आणेइ भत्तं, एगस्स पडिच्छति, ततो लोगो ण याणति-कस्स पडिच्छित्तंति

?, ताधे लोगेण जाणणाणिमित्तं भेरी कता, जो देति सो ताडेति, ताहे लोगो पविसति, एवं वच्चति कालो । सामी य समोसरितो, ताहे साधू संदिसावेत्ता भणिता–मुहुत्तं अच्छह, अणेसणा, तंमि जिमिते भणिता–ओयरह, **गोतमो** य भणितो–मम वयणेणं भणेज्जासि– भो अणेगपिंडिया ! एगपिंडितो ते दट्ठुमिच्छति, ताहे **गोतमसामिणा** भणितो रुट्ठो, तुब्भे अणेगाणि पिंडसताणि आहारेह, अहं एगं पिंडं भुंजामि, तो अहं चेव एगपिंडिओ, मुहुत्तन्तरस्स उवसंतो चिंतेति–ण एते मुसं वदंति, किह होज्जा ? लद्धा सुती, होमि अणेगपिंडितो, जद्दिवसं मम पारणयं तद्दिवसं अणेगाणि पिंडसताणि कीरंति, एते पुण अकतमकारितं भुंजंति, तं सच्चं भणंति, चिन्तंतेण जाती सरिता, पत्तेयबुद्धो जातो, अज्झयणं भासति इंदणागेण अरहता वुत्तं सिद्धो य ।

–**आवश्यकनिर्युक्तिशिष्यहितावृत्तौ** गा०८४६ पृ०३५२-३५३ ॥

## ३. शास्त्रान्तरैः सह तुलना

**✳ आचा०नि०२२-२७ वर्ण-वर्णान्तरोत्पत्तिः**

महर्षिवेदव्यासविरचिते **महाभारते**ऽपि वर्णान्तरोत्पत्तिः इत्थमेव प्रदर्शिता, तद् यथा–

परं शवाद् ब्राह्मणस्यैव पुत्रः, शूद्रापुत्रं **पारशवं** तमाहुः ।
शुश्रूषकः स्वस्य कुलस्य स स्यात्, स्वचारित्रं नित्यमथो न जह्यात् ॥ ५ ॥
तिस्रः क्षत्रियसम्बन्धाद् द्वयोरात्मास्य जायते ।
हीनवर्णास्तृतीयायां शूद्रा **उग्रा** इति स्मृतिः॥ ७ ॥
विप्रायां क्षत्रियो बाह्यं **सूतं** स्तोमक्रियापरम् ।
वैश्यो **वैदेहकं** चापि मौद्गल्यमपवर्जितम् ॥ १० ॥
शूद्रश्**चाण्डालम**त्युग्रं वध्यघ्नं बाह्यवासिनाम् ।
ब्राह्मण्यां सम्प्रजायन्त इत्येते कुलपांसनः ।
एते मतिमतां श्रेष्ठ वर्णसंकरजाः प्रभो ॥११ ॥
बन्दी तु जायते वैश्यान्**मागधो** वाक्यजीवनः ।
शूद्रान्**निषादो** मत्स्यघ्नः क्षत्रियायां व्यतिक्रमात् ॥ १२ ॥
शूद्रादा**योगव**श्चापि वैश्यायां ग्राम्यधर्मिणः ।
ब्राह्मणैरप्रतिग्राह्यस्तक्षा स्वधनजीवनः ॥ १३ ॥ **[ महाभा० शान्ति०४८।५-१३ ]**

एतस्मिन्नेवाध्यायेऽग्रे वर्णान्तरेभ्यो सञ्जाता पञ्चदश वर्णसङ्करा जातयः प्रदर्शिताः, तास्तु तत एवावगन्तव्याः । इदमत्रवधेयम्–**बुक्कस**वर्णान्तरः अत्र 'पुल्कस'शब्देन दर्शितः तथा **अम्बष्ठ**वर्णः स्पष्टतया न दर्शितस्तथापि अर्थत उक्त एव, यतः तत्रैव **महाभारते शान्तिपर्वणि** उक्तं—

क्षत्रियातिरथाम्बष्ठा उग्रा वैदेहकास्तथा ।
श्वपाकाः पुल्कसाः स्तेना निषादाः सूत-मागधाः ॥
अयोगाः करणा व्रात्याश्चाण्डालाश्च नराधिप ।
एते चतुर्भ्यो वर्णेभ्यो जायन्ते वै परस्परात् ॥

**[महाभा० शान्ति० २९६।८-९]**

**✳ आचा०सू०२ सो हं**

"सोऽहमस्मीत्यग्रे व्याहरत्"—बृहदारण्यकोपनिषद् १।४।१ ।
"योऽसावसौपुरुषः सोऽहमस्मि" बृहदारण्यकोपनिषद् ५।१५।११,ईशावास्योपनिषद् १६ ।
"सोऽहमस्मि स एवाहमस्मि"—छान्दोग्योपनिषद् ४।११।१, ४।१२।१, ४।१३।१ ।
"त्वामात्मासि यस्त्वमसि सोऽहमस्मि तमाह कोऽहमस्मीति"—कौशीतकी उपनिषद् १।६ ।
"अहं सः सोऽहमस्मि"—नृसिंहोत्तरतापनी उपनिषद् ९ ।

**✳ आचा०सू०६ विरूवरूवे फासे.....**

"मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । २।१४ । ....बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम् । ५।२१। .....स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तर भ्रुवोः । ५।२७।" —भगवद्गीता । "कतमो

पनावुसो, फस्सो, **कतमो** फस्ससमुदयो, कतमो फस्सनिरोधो, कतमो फस्सनिरोधगामिनी पटिपदा । छयिमे, आवुसो, फस्सकाया-- चक्खुसम्फस्सो, सोतसम्फस्सो, घानसम्फस्सो, जिव्हासम्फस्सो, कायसम्फस्सो, मनोसम्फस्सो । सळायतनसमुदया फस्ससमुदायो, सळायतनिरोधा फस्सनिरोधो, अयमेव आरियो अट्ठङ्गिको मग्गो फस्सनिरोधगामिनी पटिपदा ।" इति पालित्रिपिटकान्तर्गते मज्झिमनिकाये सम्मादिट्ठिसुत्ते पृ० ७० ।

"वेदना चायं, भिक्खवे, किंनिदाना किंसमुदया किंजातिका किंपभवा ?, वेदना फस्सनिदाना फस्ससमुदया फस्सजातिका फस्सपभवा" इति मज्झिमनिकाये चूळसीहनादसुत्ते पृ० १५, महातण्हासङ्खयसुत्ते पृ० ३२१ ।

*** आचा०सू०२६ भगवता वर्द्धमानस्वामिना शस्त्रानुपहताचित्तोदकग्रहणं नानुज्ञापितम्**

**सगड-द्दह-समभोमे, अवि य विसेसेण विरहियतरागं ।**
**तह वि खलु अणाइन्नं, एसऽणुधम्मो पवयणस्स ॥९९७॥**

**सगड-द्दह** गाहा । **सगडे** त्ति जया सामी **वितिभयं** गओ **उद्दायण** पव्वावओ ततिया अंतरा अडवीए साहुणो छुभिया । तेहिं सत्थो आवासिय(?)तो दिट्ठो । तत्थ तिलसगडाणि बहूणि ते य तिला भगवं जाणति ॥

**वक्कंतजोणि थंडिल, अतसा दिन्ना ठिई अवि छुहाए ।**
**तह वि न गेण्हिंसु जिणो, मा हु पसंगो असत्थहए ॥९९८॥**

**वक्कंतजोणि** गाहा । सव्वे वक्कंतजोणिया थंडिले य ठिया असंसत्ता गिहत्थेहिं य दिन्ना 'गिण्हह भट्टारया !' । अवि ते साहुणो छुहाए ठितिचागं करेताइय तह वि सामी ण गेण्हिंसु, 'असत्थहत'त्ति काउं 'मा पसंगो होहिति'त्ति । उक्तं च –

"प्रमाणानि प्रमाणस्थैः" [ ] श्लोकः ॥

इयाणिं **दह** त्ति दारं –

**एमेव य निज्जीवे, दहम्मि तसमज्जिए दए दिन्ने ।**
**समभोम्मे य अवि ठिती, जिमिता सन्ना न याऽणुन्ना ॥९९९॥**

**एमेव य** पुव्वद्धं । **एमेव य** त्ति ततिया चेव द्रहो निज्जीवो तसवज्जिओ थंडिल्ले य ठिओ (गिहत्थे)हि दिण्णं च तं दगं । अवि तत्थ केइ साहु ठितिक्खयं करेज्जा, न य सामी अणुजाणेज्जा ।

**समभोमो** त्ति । अन्नया कयाति सामी ततियपोरिसीए जिमियमेत्तेहिं सीसेहिं समं एगं अडविं पवन्नो । ते य साहुणो सन्नाडा । तत्थ य समा भूमी बिलादिवज्जिया, **अवि य विसेसेण विरहियतरागं** (त)सादीहिं तं थंडिलं, तहा वि सामी न भणइ जहा 'वोसिरह' । एस अणुधम्मो नाम एवं आयरियव्वं । असत्थहयं न कप्पइ ॥

**–बृहत्कल्पचूर्णौ ॥**

**सगड-द्दह-समभोमे, अवि य विसेसेण विरहियतरागं ।**
**तह वि खलु अणाइन्नं, एसऽणुधम्मो पवयणस्स ॥११७॥**

यदा भगवान् श्रीमन्महावीरस्वामी **राजगृहनगराद् उदायननरेन्द्र**प्रव्राजनार्थं **सिन्धुसौवीर**देशवतंसं **वीतभयं** नगरं प्रस्थितस्तदा किलाऽपान्तराले बहवः साधवः क्षुधार्त्तास्तृषार्दिताः संज्ञाबाधिताश्च बभूवुः । यत्र च भगवानावासितस्तत्र तिलभृतानि शकटानि पानीयपूर्णश्च ह्रदः 'समभौमं च' गर्ता-बिलादिवर्जितं स्थण्डिलमभवत् । **अपि च विशेषेण** तत् तिलोदकस्थण्डिलजातं **'विरहिततरं'** अतिशयेनाऽऽगन्तुकैस्तदुत्थैश्च

जीवैर्वर्जितमित्यर्थः तथापि खलु भगवता 'अनाचीर्णं' नानुज्ञातम् । **एषोऽनुधर्मः 'प्रवचनस्य'** तीर्थस्य, सर्वैरपि प्रवचनमध्यमध्यासीनैरशस्त्रोपहतपरिहारलक्षण एष एव धर्मोऽनुगन्तव्य इति भावः ॥९९७॥

अथैतदेव विवृणोति—

**वक्कंतजोणि थंडिल, अतसा दिन्ना ठिई अवि छुहाए ।**
**तह वि न गेण्हिंसु जिणो, मा हु पसंगो असत्थहए ॥९९८॥**

यत्र भगवानावासितस्तत्र बहूनि तिलशकटान्यावासितान्यासन् । तेषु च तिलाः **'व्युत्क्रान्तयोनिकाः'** अशस्त्रोपहता अप्यायुःक्षयेणाचित्तीभूताः । ते च यद्यस्थण्डिले स्थिता भवेयुस्ततो न कल्पेरन्नित्यत आह— स्थण्डिले स्थिताः । एवंविधा अपि त्रसैः संसक्ता भविष्यन्तीत्याह—'अत्रसाः' तदुद्भवा-ऽऽगन्तुकत्रसविरहिताः । तिलशकटस्वामिमिश्च गृहस्थैर्दत्ताः, एतेन चादत्तादानदोषोऽपि तेषु नास्तीत्युक्तं भवति । अपि च ते साधवः क्षुधा पिडिता आयुषः स्थितिक्षयमकार्षुः तथापि **'जिनः'** वर्द्धमानस्वामी नाऽग्रहीत्, 'मा भूदशस्त्रहते प्रसङ्गः, 'तीर्थकरेणापि गृहीतम्' इति मदीयमालम्बनं कृत्वा मत्सन्तानवर्त्तिनः शिष्या अशस्त्रोपहतं मा ग्रहिषुः' इति भावात्, व्यवहारनयबलीयस्त्वख्यापनाय भगवता न गृहीता इति हृदयम्; युक्तियुक्तं चैतत् प्रमाणस्थपुरुषाणाम् । यत उक्तम्—

"प्रमाणानि प्रमाणस्थैः, रक्षणीयानी यत्नतः ।
विषिदन्ति प्रमाणानि, प्रमाणस्थैर्विसंस्थुलैः ॥" [ ] ॥९९८॥

**एमेव य निज्जीवे, दहम्मि तसवज्जिए दए दिन्ने ।**
**समभोम्मे य अवि ठिती, जिमिता सन्ना न याऽणुन्ना ॥९९९॥**

**एवमेव** च हृदे **'निर्जीवे'** यथायुष्कक्षयादचित्तीभूतेऽचित्तपृथिव्यां च स्थिते **त्रसवर्जिते** च **'दके'** पानीये हृदस्वामिना च दत्ते तृषार्दितानां च साधूनां स्थितिक्षयकरणेऽपि भगवान्नानुजानीते स्म 'मा भूत् प्रसङ्गः' इति । तथा स्वामी तृतीयपौरुष्यां जिमितमात्रैः साधुभिः सार्धमेकामटवीं प्रपन्नः, **"सन्न"**त्ति संज्ञाया आबाधा, यद्वा **"आसन्न"**त्ति भावासन्नता साधूनां समजनि, तत्र च **समभौमं** गर्त्ता-गोष्पद-बिलादिवर्जितं यथास्थितिक्षयव्युत्क्रान्तयोनिकपृथिवीकं त्रसप्राणविरहितं स्थण्डिलं वर्त्तते, अपरं च शस्त्रोपहतं स्थण्डिलं नास्ति न वा प्राप्यते, अपि च ते साधवः संज्ञाबाधिताः स्थितिक्षयं कुर्वन्ति तथापि भगवान् नानुज्ञां करोति यथा 'अत्र व्युत्सृजत' इति, 'मा भूदशस्त्रहते प्रसङ्गः' इति । एष अनुधर्मः प्रवचनस्येति सर्वत्र योज्यम् ॥९९९॥

**—बृहत्कल्पवृत्तौ** ॥

## ✳ आचा०सू०३२ 'खेत्तण्णे'

"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः **क्षेत्रज्ञ** इति तद्विदः ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्र-क्षेत्रज्ञयोर्ज्ञानं यत् तज्ज्ञानं मतं मम ॥ १३।१-२॥" —भगवद्गीता ।

"अखेत्तञ्ञू अकुसलो" इति पालित्रिपिटकान्तर्गते अंगुत्तरनिकाये नवकनिपाते, चतुर्थे भागे पृ० ५७ ।
"अखेत्तञ्ञू अगोचरञ्ञू" इति विसुद्धिमग्गटीकायां प्रथमे भागे पृ० ३२६ ॥

## ✳ आचा०सू०६४ इन्द्रियस्वरूपनिरूपणम्

**निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥१७॥**

निर्वृत्तीन्द्रियमुपकरणेन्द्रियं च द्विविधं द्रव्येन्द्रियम् । निर्वृत्तिरङ्गोपाङ्गनामनिर्वर्तितानीन्द्रियद्वाराणि, कर्मविशेषसंस्कृताः शरीरप्रदेशाः । निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्तनेत्यर्थः । उपकरणं बाह्यमभ्यन्तरं च । निर्वर्तितस्यानुपघातानुग्रहाभ्यामुपकारीति ॥१७॥

**लब्ध्युपयोगौ भावेन्द्रियम् ॥१८॥**

लब्धिरुपयोगश्च भावेन्द्रियं भवति । लब्धिर्नाम गतिजात्यादिनामकर्मजनिता तदावरणीय-कर्मक्षयोपशमजनिता चेन्द्रियाश्रयकर्मोदयनिर्वृत्ता च जीवस्य भवति । ....... ॥१८॥

**उपयोगः स्पर्शादिषु ॥१९॥**

स्पर्शादिषु मतिज्ञानोपयोग इत्यर्थः । उक्तमेतदुपयोगो लक्षणम् । उपयोगः प्रणिधानम् । आयोगस्तद्भावः परिणाम इत्यर्थः । एषां च सत्यां निर्वृत्तावुपकरणोपयोगौ भवतः । सत्यां च लब्धौ निर्वृत्त्युपकरणोपयोगा भवन्ति । निर्वृत्त्यादीनामेकतराभावे विषयालोचनं न भवति ॥१९॥

**—तत्त्वार्थभाष्ये ।**

**निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥१७॥**

निर्वृत्त्युपकरणे पुद्गलमये द्रव्येन्द्रियमिति सूत्रसमुदायार्थः । अवयवार्थं त्वाह—'निर्वृत्तीन्द्रिय'-मित्यादिना, निर्वर्त्तनं निर्वृत्तिः— प्रतिविशिष्टसंस्थानोपपत्तिः सैवेन्द्रियं निर्वृत्तीन्द्रियं, उपक्रियतेऽनेनेत्युपकरणं एतदेवेन्द्रियं,चःसमुच्चये, द्विविधमेतद्द्रव्येन्द्रियं भावेन्द्रियोपकरणत्वात् द्रव्यात्मकत्वाच्चेति, निर्वृत्तेर्लक्षणमाह— 'निर्वृत्ति'रित्यादिना, **'निर्वृत्तिः अंगोपाङ्गनामकर्म्मनिर्वर्त्तितानी**ति इहाङ्गोपाङ्गनाम-औदारिकादिशरीर-त्रयाङ्गोपाङ्गनिर्वर्त्तकं यदुदयादङ्गोपाङ्गान्युत्पद्यन्ते शिरोऽङ्गुल्यादीनि, निर्म्माणनाम चात्र वर्द्धकिसंस्थानीयं कर्णशष्कुल्याद्यवयवसन्निवेशविशेषरचनायामाहितनैपुण्यमित्याचार्याः । तदित्थमंगोपाङ्गनाम्ना प्रतिविशिष्टेन कर्म्मणा निर्वत्तितानि–जनितानि । तानि कानीत्याह–**'इन्द्रियद्वाराणि'** इन्द्रियविवराणि, भावेन्द्रियावधानद्वाराणीति भावः । एतानि च नानासंस्थानादीनि, तथा चागमः–

"फासिंदिए णं भंते ! किंसठिए पण्णत्ते ?, गोयमा ! नानासंठाणसंठिए पण्णत्ते, जिब्भिंदिए णं किंसंठिए पण्णत्ते ?, गोयमा ! खुरप्पसंठिए, घाणिंदिए णं भंते ! किंसंठिए पन्नत्ते ? गोअमा ! अतिमुत्तयचंपयसंठिए, एवं चक्खुरिंदिए णं भंते ! किंसंठिए पण्णत्ते ?, गोयमा ! मसूरयचंदसंठिए पण्णत्ते, सोइंदिए णं किंसंठिए पण्णत्ते ?, गोयमा ! कलंबुआपुप्फसंठिए पण्णत्ते" [ ] ।

अभ्यन्तरां निर्वृत्तिमङ्गीकृत्य सर्वाण्यमूनि सूत्राण्यधीतानि । बाह्या पुनर्निर्वृत्तिश्चित्राकारत्वान्नोपनिबद्धुं शक्या, अथ (पशु) मनुष्यादीनां बाह्यश्रोत्रादिभेदादिति । इममेव अतिक्रान्तभाष्यार्थं पर्यायान्तरेण स्पष्टयन्नाह— **'कर्म्मे'**त्यादि, **कर्मविशेषसंस्कृताः** इति कर्म्मविशेषो नामकर्म्म, तस्यापि अङ्गोपाङ्गनाम निर्माणकर्म्म च, आभ्यां संस्कृता–विशिष्टावयवरचनया निर्वर्त्तिताः शरीरप्रदेशाः औदारिकादीनां त्रयाणां प्रतिविशिष्टा देशाः कर्णशष्कुल्यादय इति, मुग्धमतिमोहव्यपोहायाह–**'निर्म्माणे'**त्यादि, निर्म्माणनाम चाङ्गोपाङ्गं च निर्माणनामाङ्गोपाङ्गे, ते प्रत्ययः–कारणं यस्याः सा तथाविधा, मूलगुणनिर्वर्त्तनेत्यर्थः, निगमनमेतत्, नोत्तरगुणनिर्वर्त्तना, सा हि कर्णवेधयोः प्रलम्बतापादनं चक्षुर्नासिकयोरञ्जनस्याभ्यामुपकारः ब्राह्म्यादियोगात् जिह्वायाः स्पर्शस्य गन्धदिभिर्विमलत्वकरणमिति, **'इत्यर्थः'** इत्येवमर्थो यस्यां प्रवचनज्ञैराख्यात इति ।

व्याख्याता निर्वृत्तिः । अधुनोपकरणमाह–

**'उपकरणं बाह्यमभ्यन्तरं च'** उपक्रियतेऽनेन निर्वृत्तीन्द्रियमित्युपकरणं, बाह्यकरणं शष्कुल्यादीति, तत्र

अभ्यन्तरं खड्गस्थानीयाया निर्वृत्तेस्तद्धाराशक्तिकल्पं स्वच्छतरपुद्गलजालनिष्पादितं तदभिन्नदेशमेवेति । यदधिकृत्याह-'**निर्वर्तितस्ये**'त्यादि, **निर्वर्तितस्य**-निष्पादितस्य स्वावयवविभागेन, निर्वृत्तीन्द्रियस्येति गम्यते, **अनुपघातानुग्रहाभ्यामुपकारी**ति यदनुपहत्या उपग्रहेण चोपकरोति तदुपकरणेन्द्रियमिति तथा हि- निवृत्तौ सत्यामपि शक्त्युपघाते न विषयग्रहः, बाह्योपकरणघाते च नियमतः शक्त्युपघात इति तत्प्राधान्यतो बाह्यमभ्यन्तरं चेत्याह ॥ इत्थं द्रव्येन्द्रियमभिधायैतत्प्रतिबद्धमेव भावेन्द्रियमाह—

**लब्ध्युपयोगौ भावेन्द्रियमिति ॥१८॥**

लब्धिः-स्पर्शनादीन्द्रियावरणकर्म्मक्षयोपशमः उपयोगः-प्रणिधानं, एतदुभयं भावेन्द्रियमात्मपरिणतिलक्षणमिति सूत्रसमुदायार्थः । अवयवार्थं त्वाह वृत्तिकारः-**लब्धिरुपयोगश्च** एतद्द्वयं **भावेन्द्रियं भवति**, आत्मपरिणतिरूपत्वात् । तत्र'**लब्धिर्नामे**'त्यादि, लाभो लब्धिः प्राप्तिरित्यनर्थान्तरं, **नामे**ति वाक्यालङ्कारार्थः, **गतिजात्यादिनामकर्म्मजनिते**ति गति-जाती आदिर्यस्य तद्गतिजात्यादि, गतिजात्यादि च तन्नामकर्म चेति विग्रहः, तेन जनिता-निर्वर्त्तिता, मनुष्यादेर्भावात्, मनुष्यगतिपंचेन्द्रियजात्यङ्गोपाङ्गादिनामजनितेत्यर्थः, प्रत्यासन्नतरान्तर-कारणाभिधित्सयाऽऽह-'**क्षयोपशमजनिता चे**'ति सामर्थ्यात् मतिज्ञानदर्शनावरणक्षयोपशमनिर्वर्त्तिता च । ननु च क्षयोपशम एव लब्धिरुक्ता तत्तेन जनिता काऽन्येयम् ?, उच्यते, तत्फलभूता ज्ञानशक्तिरूपैव प्रज्ञा कारणे कार्योपचारं कृत्वा क्षयोपशम उक्त इत्यदोषः । आसन्नतरं कारणमाह-**इन्द्रियाश्रयकर्म्मोदयनिर्वृत्ता च जीवस्य भवती**'ति इन्द्रियाण्याश्रयः- अवकाशो येषां कर्मणां तानीन्द्रियाश्रयाणि-निर्माणाङ्गोपाङ्गादीनि **तदुदयेन** तद्विपाकेन **निर्वृत्ता**-जनिता वेति । **जीवस्यात्मनो लब्धिर्भवती**ति स्वच्छदर्प्पणतलप्रतिबिम्बदृष्टान्तेन, स्वच्छे हि दर्प्पणतले प्रतिबिम्बोदयो भवति न मलीमसे, तथा निर्माणाङ्गोपाङ्गदेरत्यन्तविमलतद्योग्यपुद्गलद्रव्य-निर्मापितानीन्द्रियाणि तस्याः क्षयोपशमलब्धेः अनुलम्बनमुपयच्छंति-कारणतां बिभ्रतीति..... ॥१८॥

उक्ता लब्धिः । अधुनोपयोगमाह—

**उपयोगः स्पर्शादिष्विति ॥१९॥**

**उपयोगो** ज्ञानादिव्यापारः **स्पर्शादिविषयः** इति सूत्रसमुदायार्थः । अवयवार्थमाह—'**स्पर्शादिष्वि**'त्यादि, स्पर्शादिषु पञ्चसु विषयेसु '**मतिज्ञानोपयोगो**' मतिज्ञानव्यापारः उपयोगः, इत्येवमर्थो यस्य प्रवचनज्ञैराख्यातः, उपयोगः स्पर्शादिषु परमाणोरपि भवति, स च भावेन्द्रियाधिकारात्तस्य चाजीवलक्षणत्वात् नेहाधिक्रियत इत्याह-'**उक्तमेत**'दित्यादि, अभिहितमेतत् प्राग **उपयोगः**- चैतन्यपरिणामो **लक्षणं**-वैशेषिकं जीवस्य, जीवलिङ्गं चेन्द्रियमिति परमाणूपयोगोप्रसंगः, अत एवाह-**उपयोगो**-ज्ञानादिरूपश्चैतन्यपरिणामः, अयं चावध्यादिरूपोऽपि भवतीत्याह-**प्रणिधानं**-अवहितमनस्कत्वं, एतदपि भावनापेक्षयाऽवध्यादिसाधारणमेवेत्याह-**आयोगः** स्वविषयमर्यादया स्पर्शादिष्वेव, एवमप्यधिकरणवत्त्वमवध्युपयोगस्येत्यत आह-**तद्भावः**, उपयोगो-लाञ्छनं जीवस्य स्पर्शाद्युपलम्भभावात्, '**परिणाम इत्यर्थः**' परिणमनं परिणामः-तत्तदुपयोगाधिकरणस्यैव तथाभाव इति योऽर्थः, उपयोगप्रवृत्तौ क्रममाह-'**एषां चे**'त्यादिना, **एषां चेति** व्याख्यातस्वरूपाणां निर्वृत्त्युपकरणलब्ध्युपयोगेन्द्रयाणां प्रवृत्तावयं क्रमः-यदुत **सत्यां निर्वृत्तौ** तु उक्तलक्षणायां **उपकरणोपयोगौ भवतः**—उक्तलक्षणावेव, निर्वृत्त्याश्रयत्वादुपकरणस्य तत्प्रभवत्वात् श्रोत्राद्युपयोगस्येति, **सत्यां च लब्धौ** श्रोत्रादिक्षयोपशमरूपायां **निर्वृत्त्युपकरणोपयोगा भवन्ति,** कर्म्मविशेषसंस्कृतप्रदेशभावे कर्णशष्कुल्यादिभावात्, तदभावे अभावात्, तथा चाह-**निर्वृत्त्यादीनामेकतराभावे विषयालोचनं न भवति** ॥१९॥

**-तत्त्वार्थहारिभद्रीयवृत्तौ** ।

**निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ १७ ॥**

'तत्र **निर्वृत्त्युपकरणे द्रव्येन्द्रियम्**' **तत्रे**त्यनेन भाष्यकारः सूत्रं सम्बन्धयति, **तत्र** द्वितये द्रव्येन्द्रियं तावन्निर्धार्यते, स्वरूपभेदाभ्यां निर्वर्तनं निर्वृत्तिः प्रतिविशिष्टसंस्थानोत्पादः, उपक्रियतेऽनेनेत्युपकरणं निर्वृत्तिरेवेन्द्रियं **निर्वृत्तीन्द्रियम्, उपकरणेन्द्रियमप्ये**वम् । उभयमेतत् पुद्गलपरिणामरूपमपि सदिन्द्रियव्यपदेशमश्नुते भावेन्द्रियोपयोगकारणत्वात्, यस्मात् हि तत्साचिव्यं भावस्यैवोपलिङ्गने समायाति आत्मभावपरिणामस्य भाविनो यत् सहायतया क्षमं द्रव्यं तदिह द्रव्येन्द्रियं प्रस्थदारूवदेषितव्यम् । तत्र निर्वृत्त्युपकरणयोः स्वरूपमाविष्करोति भाष्येणैव-**निर्वृत्तिरङ्गोपाङ्गनामे**त्यादिना । निर्माणनामकर्मान्तर्गतः कर्मभेदो वर्धकिस्थानीयः कर्णशष्कुल्याद्य-वयवसन्निवेशविशेषरचनायामाहितनैपुणः, तथौदारिकादिशरीरत्रयाङ्गोपाङ्गनाकर्मभेदो यदुदयादङ्गान्युपाङ्गानि च निष्पद्यन्ते शिरोऽङ्गुल्यादीनि, एतत् कर्मद्वयमुभयरूपं द्रव्येन्द्रियप्रसाधनाय यतते । भाष्यभावना चैवं कार्या । निर्वृत्तिः किंरूपेत्यत आह-

**अङ्गे**ति । **अङ्गोपाङ्ग**नाम्ना प्रतिविशिष्टेन कर्मभेदेन **निर्वर्त्तितानि**-जनितानि-घटितानि **इन्द्रियद्वाराणि**-इन्द्रियविवराणि, इन्द्रियशब्देन चात्र भावेन्द्रियमुपयोगरूपं विवक्षितं तस्येन्द्रियस्य द्वाराण्यवधानप्रदानमार्गाश्चित्राः शष्कुल्यादिरूपा बहिरुपलभ्यमानाकारा निर्वृत्तिरेका, अपरा त्वभ्यन्तरनिर्वृत्तिः, नानाकारं कायेन्द्रियमसङ्-ख्येयभेदत्वादस्य चान्तर्बहिर्भेदो निर्वृत्तेर्न कश्चित् प्रायः, प्रदीर्घत्र्यस्रसंस्थितं कर्णाटकायुधं क्षुरप्रस्तदाकारं रसनेन्द्रियम् । अतिमुक्तकपुष्पदलचन्द्रकाकारं किञ्चित् सकेसरवृत्ताकारमध्यविनतं घ्राणेन्द्रियम् । किञ्चित् समुन्नतमध्यपरिमण्डलाकारं धान्यमसूरवच्चक्षुरिन्द्रियम्, पाथेयभाण्डकयवनालिकाकारं श्रोत्रेन्द्रियं नालिककुसुमाकृति चावसेयम् । तत्राद्यं स्वकायपरिमाणं द्रव्यमनश्च शेषाण्यङ्गुलासङ्ख्येयभागप्रमाणनि सर्वजीवानाम् । तथा चागमः-

"फासिंदिए णं भंते ! किंसंठिए पण्णत्ते ? गोयमा ! नाणासंठाणसंठिए, जिब्भिन्दिए णं भंते ! किंसंठिए पण्णत्ते ? गोयमा ! खुरप्पसंठिए, घाणिन्दिए णं भंते ! किंसंठिए पण्णत्ते ? गोयमा ! अतिमुत्तयचंदकसंठिए, चक्खुरिन्दिए णं भंते ! किंसंठिए पण्णत्ते ? गोयमा ! मसूरयचंदसंठिए पण्णत्ते, सोइंदिए णं भंते ! किंसंठिए पण्णत्ते ? गोयमा ! कलंबुयापुप्फसंठिए पण्णत्ते" (प्रज्ञा० सू० १९१)

अभ्यन्तरां निर्वृत्तिमङ्गीकृत्य सर्वाण्यमूनि सूत्राण्यधीतानि । बाह्या पुनर्निर्वृत्तिश्चित्राकारत्वान्नोपनिबद्धुं शक्या, यथा मनुष्यस्य श्रोतं भ्रूसमं नेत्रयोरुभयपार्श्वतः, अश्वस्य मस्तके नेत्रयोरुपरिष्टात् तीक्ष्णाग्रमित्यादिभेदाद् बहुविधाकाराः । इममेव चातिक्रान्तभाष्यार्थं पर्यायान्तरेण स्पष्टयति भाष्यकरः-**कर्मविशेषसंस्कृताः शरीरप्रदेशाः** । अथवाङ्गोपाङ्गनामैवोपात्तमतीतभाष्ये न तु निर्माणकर्म तदुपादानायेदमुच्यते-

**कर्मविशेष** इत्यादि । कर्मविशेषो नामकर्म तस्यापि विशेष अङ्गोपाङ्गनामनिर्माणकर्म च आभ्यां कर्मविशेषाभ्यां संस्कृता विशिष्टावयवरचनया निष्पादिता-निर्वर्त्तिताः औदारिकादिशरीराणां त्रयाणां प्रदेशाः-प्रतिविशिष्टा देशाः कर्णशष्कुल्यादयः प्रदेशाः । कर्मविशेषाभिधानश्रवणादतिसम्प्रमुग्धबुद्धेर्व्यामोहस्तदवस्थ एव चेतसीत्यतस्तदवबोधार्थं भूयोऽप्याह-**निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्त्त**नेत्यर्थः । कर्मविशेषं नामग्राहमाचष्टे-निर्माणनाम च अङ्गोपाङ्गे च निर्माणनामाङ्गोपाङ्गे, मध्यव्यस्थितो नामशब्द उभयं विशेष्यतया क्षिपति, ते कर्मणी प्रत्ययः कारणं-निमितं यस्य निर्वृत्तेः सा निर्माणनामाङ्गोपाङ्गप्रत्यया, मूलगुणनिर्वर्त्तना उत्तरगुणनिर्वर्त्तनापेक्षयोच्यते । उत्तरगुणनिर्वर्त्तना हि श्रवणयोर्वेधः प्रलम्बतापादनं चक्षुर्नासिकयोरञ्जननस्याभ्यामुपस्कारः तथा भेषजप्रदानाज्जिह्वाया जाड्यापनयः स्पर्शनस्य विविधचूर्णगन्धवासप्रघर्षात् तदिति विमलत्वकरणम्, एवंविधानेकविशेषनिरपेक्षा यथोत्पन्नोपवर्तिनी औदारिकादिप्रायोग्यद्रव्यवर्गणा मूलकारणव्यवस्थितगुणनिर्वर्त्तनोच्यते ।

इतिशब्द एवशब्दार्थः, एवमेषोऽर्थः प्रवचविद्भिराख्यात इति ॥ सम्प्रत्युपकरणेन्द्रियस्वरूपमाख्यातुमाह—

**उपकरणं बाह्यमभ्यन्तरं च निर्वर्त्तितस्यानुपघातानुग्रहाभ्यामुपकारी**ति । निर्वृत्तौ सत्यां कृपाणस्थानीयायामुपकरणेन्द्रियमवश्यमपेक्षितव्यम्, तच्च स्वविषयग्रहणशक्तियुक्तं खड्गस्येव धारा छेदनसमर्था तच्छक्तिरूपमिन्द्रियान्तरं निर्वृत्तौ सत्यपि शक्त्युपघातैर्विषयं न गृह्णाति तस्मान्निर्वृत्तेः श्रवणादिसंज्ञके द्रव्येन्द्रिये तद्भावादात्मनोऽनुपघातानुग्रहाभ्यां यदुपकारि तदुपकरणेन्द्रियं भवति, तच्च बहिर्वर्ति अन्तर्वर्ति च, निर्वृत्तिद्रव्येन्द्रियापेक्षयाऽस्यापि द्वैविध्यमावेद्यते । तत्र निर्वृत्तिद्रव्येन्द्रियं तत्रोपकरणेन्द्रियमपि न भिन्नदेशवर्ति तस्येति कथयति तस्याः स्वविषयग्रहणशक्तेर्निर्वृत्तिमध्यवर्तिनीत्वात् । एतदेव स्फुटयति-**निर्वर्त्तितस्य**-निष्पादितस्य स्वावयवविभागेन यदनुपहत्यात अनुग्रहे चोपकरोति ग्रहणमात्मनः स्वच्छतरपुद्गलजालनिर्मापितं तदुपकरणेन्द्रियमध्यवस्यन्ति विद्वांसः, आगमे तु नास्ति कश्चिदन्तर्बहिर्भेद उपकरणस्येत्याचार्यस्यैव कुतोऽपि सम्प्रदाय इति । एवमेतदुभयं द्रव्येन्द्रियमभिधीयते तद्भावेऽप्यग्रहणात् उपकरणत्वान्निमित्तत्वाच्चेति । निर्वृत्तेरादावभिधा जन्मक्रमप्रतिपादनार्थं तद्भावे ह्युपकरणसद्भावाच्छस्त्रशक्तिवदिति ॥१७॥

अथ भावेन्द्रियं किमित्यत्रोच्यते—

**लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८ ॥**

**लब्ध्युपयोगौ भावेन्द्रियम्** । **लब्धिः** प्रतिस्वमिन्द्रियावरणकर्मक्षयोपशमः, स्वविषयव्यापारः प्रणिधानं वीर्यमुपयोगः, एतदुभयं भावेन्द्रियमात्मपरिणतिलक्षणं भवति । अत्राचार्यो लब्धिस्वरुपनिर्वर्णनायाह-**लब्धिर्नामे**त्यादि भाष्यम् । लाभो लब्धिः प्राप्तिः । **नाम**शब्दो वाक्यालङ्कारार्थः । अथवा लब्धिरिति यदेतन्नामाभिधानं तस्यायमर्थः **गतिजात्यादिनामकर्मजनिता** लब्धिरुच्यते । गतिजाती आदिर्यस्य तद् गतिजात्यादि, गतिजात्यादि च तन्नामकर्म च गतिजात्यादिनामकर्म, तेन जनिता-निर्वर्त्तिता, मनुष्यगतिनामोदयान्मनुष्यस्तथा पञ्चेन्द्रियजातिनामोदयात् पञ्चेन्द्रिय इत्यतो मनुष्यत्वपञ्चेन्द्रियत्वादिलाभे प्रतिस्वं तदावरणकर्मक्षयोपशमो निर्वर्त्यते, तस्य क्षयोपशमस्य गतिजातिप्रभृतिनामकर्मकारणत्वान्निर्दिष्टमाचार्येण । आदि-ग्रहणेन यत् तदत्र नान्तरीयकं शरीरादिक्षयोपशमलब्धेर्नामान्तःपाति तत् सकलमादीयते । अपरे त्वायुष्कमपि तदाश्रयत्वात् कारणमाचक्षते क्षयोपशमस्य, एवं विदूरवर्ति कारणमपदिश्याधुना प्रत्यासन्नतरकारणान्तरमाविष्करोति-**तदावरणीयकर्मक्षयोपशमजनिता चे**ति । तस्याः खलु रूपादिग्रहणपरिणतेरावरणीयमावारकमाच्छादकं, बाहुलकात् कर्तरि व्युत्पत्तिः, तदावरणीयं च तत् कर्म च तदावरणीयकर्म, मतिज्ञानदर्शनावरणकर्मेत्यर्थः, तस्योभयस्य क्षयोपशमोऽभिहितलक्षणस्त**ज्जनिता** च तन्निष्पादिता चेत्यर्थः । चशब्दः पूर्वकं कारणं समुच्चिनोति ॥

ननु च क्षयोपशम एव लब्धिरुक्ता तेन जनितान्या का भवेल्लब्धिः? । उच्यते—मतिज्ञानदर्शनावरण-क्षयोपशमावस्थानिर्वृत्तौ यो ज्ञानसद्भावः क्षायोपशमिकः सोऽत्र लब्धिरुच्यते, कथं कृत्वोक्तं प्राक् क्षयोपशमो लब्धिरिति कारणे कार्योपचारमालम्ब्य नड्वलोदकं पादरोगवदित्यभिहितमतो न दोषाय । अन्ये पुनराहुः—अन्तरायकर्मक्षयोपशमापेक्षा इन्द्रियविषयोपभोगज्ञानशक्तिर्लब्धिरुच्यते । पुनः प्रत्यासन्नतमकारणनिर्दिदिक्षया भाष्यकृत प्रतनुते ग्रन्थम्-**इन्द्रियाश्रयकर्मोदयानिर्वृत्ता च जीवस्य भवती**ति । इन्द्रियाण्याश्रयोऽवकाशो येषां कर्मणां तानीन्द्रियाश्रयाणि कर्माणि यावन्ति कानिचिन्निर्माणाङ्गोपाङ्गादीनि यैर्विना तानि न निष्पद्यन्ते तदुदयेन-तद्विपाकेन निर्वृत्ता-जनितात्मनो लब्धिरुद्भवति, स्वच्छे हि दपर्णतले प्रतिबिम्बोदयो भवति, न मलीमसे, तथा निर्माणाङ्गोपाङ्गदिभिरत्यन्तविमलतद्योग्यपुद्गलद्रव्यनिर्मापितानीन्द्रियाणि तस्याः क्षयोपशमलब्धेरतुलं बलमुपयच्छन्ति, कारणतां बिभ्रतीति । सैषा लब्धिः कारणत्रयापेक्षा पञ्चप्रकारा भवति ।

उक्ता लब्धिः, अधुनोपयोग उच्यते-यदि लब्धिनिर्वृत्त्युपकरणक्रमेणोपयोगस्ततोऽतीन्द्रियोपयोगाभावो

निर्वृत्त्याद्यपेक्षाभावात् । एतदुक्तं भवति–अवध्यादीनामतीन्द्रियत्वादत्यन्ताभाव एव विशेषो वाच्यः ? । उच्यते–न खलु सर्व उपयोगो लब्धिनिर्वृत्त्युपकरणेन्द्रियकृतः, किं तर्हि स एवैकस्त्रितयनिमित्त इत्यत आह–

**उपयोगः स्पर्शादिषु ॥ १९ ॥**

**उपयोगः स्पर्शादिषु** । स्पर्शरसगन्धवर्णशब्देषु ग्रहणरूपो व्यापार उपयोगो गृह्यते स्पर्शनेन्द्रियादिनिमित्तो नावध्याद्युपयोगः । अमुमेवार्थं स्पष्टयन् भाष्यकृदाह–**स्पर्शादिषु मतिज्ञानोपयोग** इत्यर्थः । स्पर्शादिविषयो मतिज्ञानव्यापारः प्रतिनियतविषयानुभवनमुपलम्भनमिति, अनेन शेषज्ञानव्युदासमादर्शयति मतिज्ञानोपयोग एव लब्धिनिर्वृत्त्युपकरणापेक्षः प्रवर्तते न शेष इति । अत्रोपयोगसामान्यमित्यपह्नुतावधानश्चोदयति –स्पर्शादिविषयो य उपयोगपरिसमाप्तिव्यापार इत्युक्तम् । एतच्च परमाणुद्व्यणुकादिष्वपि दृष्टम्, परमाणुरपि हि सर्वात्मनोपयुज्यते द्व्यणुकादिस्कन्धपरिणामे, ततश्च सोऽप्युपयोगलक्षणं प्राप्नोतीत्यत आह भाष्यकारः **–उक्तमेतदुपयोगो लक्षणमिति** । अथवा भाष्यकारः स्वयमेवोपयोगविशेषव्याख्यामातितनिषुराह–**उक्तमेतदि**त्यादि । अभिहितमेतदुपयोगश्चैतन्यपरिणामो जीवस्य वैशेषिकं लक्षणं कः परमाण्वादिष्वेव प्रसङ्गोऽत्यन्तासम्बन्ध एव । तमेवोपयोगं पर्यायतः कथयति चैतन्यलक्षणं विशेषव्याख्यानदर्शनद्वारेण **उपयोग** इत्यादि । उपयोगस्तु द्विविधा चेतना–संविज्ञानलक्षणा, अनुभवनलक्षणा च, तत्र घटाद्युपलब्धिः संविज्ञानलक्षणा, सुखदुःखादि–संवेदनानुभवनलक्षणा एतदुभयमुपयोगग्रहणाद् गृह्यते । **प्रणिधानम**वहितमनस्कत्वम्, एतदुत्कीर्तयति–स्पष्टो हि मतिज्ञानोपयोगो मानसोपयोगावश्यम्भावी द्रव्येन्द्रियाद्यपेक्षश्च नावध्याद्युपयोगस्तथेति **आयोग** इति । स्वविषयमर्यादया स्पर्शादिभेदनिर्भासो ज्ञानोदयः स्पर्शनेन्द्रियादिजन्माभिधीयते **तद्भाव** इति । उपयोगलाञ्छनो जन्तुस्तच्छब्देनामृश्यते तस्य भावः स्पर्शनादिद्वारजन्मज्ञानमात्मनो भूतिरुद्भव इति यावत्, **परिणामो**ऽप्यात्मन एव तद्भावलक्षणो नार्थान्तरप्रादुर्भावलक्षणः, स्पर्शनादिनिमित्तज्ञानस्यात्मपरिणरूपत्वादित्यर्थः ॥

सम्प्रति प्रवृत्तौ क्रमनियममापादयन्नाह–**एषामि**त्यादि भाष्यम् । **एषामि**ति व्याख्यातस्वरूपाणां निर्वृत्त्युपकरणलब्ध्युपयोगेन्द्रियाणामायं प्रवृत्तिक्रमो यदुत निर्वृत्तिः प्राक् तस्यां सत्यामुपकरणमुपयोगश्च भवति निर्वृत्याश्रयत्वादुपकरणस्य तद्द्वारजन्मत्वाच्चोपयोगस्य । एतच्च निर्वृत्त्यादित्रयं लब्धीन्द्रियपूर्वकं दर्शयति–श्रोत्रादिक्षयोपशमलब्धौ सत्यां निर्वृत्ति शष्कुल्यादिका भवति, यस्य तु लब्धिर्नास्त्येवंप्रकारा न खलु तस्य प्राणिनः शष्कुल्यादयोऽवयवा निर्वर्तन्ते तस्माल्लब्ध्यादयश्चत्वारोऽपि समुदिताः शब्दादिविषयपरिच्छेदमापादयन्त इन्द्रियव्यपदेशमश्नुवते । एकेनाप्यवयवेन विकलमिन्द्रयं नोच्यते, न च स्वविषयग्रहणसमर्थं भवति, अमुमर्थं भाष्येण दर्शयति—**निर्वृत्त्यादीनामि**ति सूत्रोपन्यस्तक्रममङ्गीकृत्योच्यते निर्वृत्त्युपकरणलब्ध्युपयोगानामन्यतमाभावे एकेनाप्यङ्गेन विकले सति समुदाये न जातुचित् शब्दादिविषयस्वरूपावबोधो भवत्यात्मनः, विकलकरणत्वात् ।

**—तत्त्वार्थसिद्धसेनीयवृत्तौ ।**

## निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ १७ ॥

निर्वर्त्यते इति निर्वृत्तिः । केन निर्वर्त्यते ? कर्मणा । सा द्विविधा; बाह्याभ्यन्तरभेदात् । उत्सेधाङ्गुलासंख्येयभागप्रमितानां शुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थितानां वृत्तिराभ्यान्तरा निर्वृत्तिः । तेष्वात्मप्रदेशेष्वन्द्रियव्यपदेशभाक्षु यः प्रतिनियतसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः सा बाह्या निर्वृत्तिः । येन निर्वृत्तेरुपकारः क्रियते तदुपकरणम् । पूर्ववत्तदपि द्विविधम् । तत्राभ्यन्तरं कृष्णशुक्लमण्डलं, बाह्यमक्षिपत्रपक्ष्मद्वयादि । एवं शेषेष्वपीन्द्रियेषु ज्ञेयम् ।

भावेन्द्रियमुच्यते–

**लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८ ॥**

लम्भनं लब्धिः । का पुनरसौ ? ज्ञानावरणकर्मक्षयोपशमविशेषः । यत्संनिधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते तन्निमित्त आत्मनः परिणाम उपयोगः । तदुभये भावेन्द्रियम् ।

**—तत्त्वार्थसर्वार्थसिद्धौ ।**

**निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ १७ ॥**

निर्वर्त्यते इति निर्वृत्तिः, सा द्वेधा बाह्याभ्यंतरभेदात् । तत्र विशुद्धात्मप्रदेशवृत्तिरभ्यंतरा तस्यामेव कर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो ब्राह्या । उपक्रियतेऽनेनेत्युपकरणं । तदपि द्विविधं ब्राह्याभ्यंतरभेदात् । तत्र बाह्यं पक्षपुटादि, कृष्णसारमंडलाद्यभ्यंतरं ।.......

कानि पुनर्भावेंद्रियाणीत्याह;—

**लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८ ॥**

इंद्रियनिर्वृत्तिहेतुः क्षयोपशमविशेषो लब्धिः तन्निमित्तः परिणामविशेष उपयोगः लब्धिश्चोपयोगश्च लब्ध्युपयोगौ भावेंद्रियमिति जात्यपेक्षयैकवचनं । —

**—तत्त्वार्थश्लोकवार्त्तिके ।**

**निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ १७ ॥**

**निर्वर्त्यत इति निर्वृत्तिः ।१।** कर्मणा या निर्वर्त्यत निष्पाद्यते सा निर्वृत्तिरित्युपदिश्यते ।

**सा द्वेधा बाह्याभ्यंतरभेदात् ।२।** सा निर्वृत्तिर्द्वेधा । कुतः ? बाह्याभ्यंतरभेदात् । तत्र-

**विशुद्धात्मप्रदेशवृत्तिरभ्यंतरा ।३।** उत्सेधाङ्गुलस्याऽसंख्येयभागप्रमितानां विशुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानमानवमानावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः ।

**तत्र नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो बाह्या ।४।** तेष्वात्मप्रदेशेष्विन्द्रियव्यपदेशभाक् यः प्रतिनियतसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः स बाह्या निर्वृत्तिः ।

**उपक्रियतेऽनेनेत्युपकरणं ।५।** येन निर्वृत्तिरुपकारः क्रियते तदुपकरणम् ।

**तद् द्विविधं पूर्ववत् ।६।** तदुपकरणं द्विविधं पूर्ववत् बाह्याभ्यंतरभेदात् । तत्राभ्यन्तरं शुक्लकृष्णमण्डलम्, बाह्यमक्षिपत्रपक्ष्मद्वयादि । एवं शेषेष्वपीन्द्रियेषु ज्ञेयम् ।

भावेन्द्रियमुच्यते—

**लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८ ॥**

लब्धिरिति कोऽयं शब्दः ? लाभो लब्धिः । यद्येवं षित्वादङ्प्राप्नोति; "**अनुबन्धकृतमनित्यम्**"[ ]इति न भवति यथा "**वर्णानुपलब्धौ चातदर्थगतैः**"[पात० महा०प्रत्याहा०५] इत्येवमादिषु । अथवा "**स्त्रियां क्तिः, लभादिभ्यश्च**"[श०च०२।३।८०,८१] इति क्तिर्भवति, इष्टाश्चाबादयः इति । अथ कोऽस्यार्थः ?

**इन्द्रियनिर्वृत्तिहेतुः क्षयोपशमविशेषो लब्धिः ।१।** यत्सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते स ज्ञानावरणक्षयोपशमविशेषो लब्धिरिति विज्ञायते ।

**तन्निमित्तः परिणामविशेष उपयोगः ।२।** तदुक्तं निमित्तं प्रतीत्य उत्पद्यमान आत्मनः परिणाम उपयोग इत्युपदिश्यते । तदेतदुभयं भावेन्द्रियमिति ।

**—तत्त्वार्थराजवार्त्तिके ॥**

**✳ आचा०सू०८८ 'मातण्णे'**

''कथं मात्रज्ञो भवति ? इह श्राद्धा ब्राह्मणगृहपतयो व्यर्थे प्रचारयन्ति यदुत चीवरपिण्डपात-शयनासनग्लानप्रत्ययभैषज्यपरिष्कारैः, तत्र प्रतिग्रहणे मात्रां जानाति, एवं मात्रज्ञो भवति'' इति बौद्धाचार्येण **असङ्गेन** विरचितायां **श्रावकभूमौ** पृ०१६२ ।

**✳ आचा०सू०९१,९२,१०३ 'अहेभागं....., जहा अंतो..... उड्ढं अहं.....'**

''पुनः च परं, भिक्खे, भिक्खु इममेव कायं उद्धं पादतला, अधो केसमत्थका, तचपरियन्तं, पूरं नानप्पकारस्स असुचिनो पच्चवेक्खति—'अत्थि इमस्मिं काये केसा लोमा नखा दन्ता तचो मंसं न्हारु अट्ठि अट्ठिमिञ्जं वक्कं हदयं यकनं किलोमकं पिहकं पप्फासं अन्तं अन्तगुणं उदरियं करीसं पित्तं सेम्हं पुब्बो लोहितं सेदो भेदो अस्सु बसा खेळो सिङ्घाणिका लसिका मुत्तं ति । सेय्यथापि भिक्खवे उभतोमुखा पुतोळि पूरा नानाविहितस्स धञ्ञस्स, सेय्यथीदं सालीनं वीहीनं मुग्गानं मासानं तिलानं तण्डुलानं । तमेनं चक्खुमा पुरिसो मुञ्चित्वा पच्चवेक्खेय्य—' इमे साली इमे वीही इमे मुग्गा इमे मासा इमे तिला इमे तण्डुला' ति । एवमेव खो, भिक्खवे, भिक्खु इममेव कायं उद्धं पादतला, अधो केसमत्थका, तचपरियन्तं पूरं नानाप्पकारस्स असुचिनो पच्चवेक्खति—'अत्थि अमस्मिं काये केसा लोभा.....पे०.....मुत्तं त्ति । इति अज्झत्तं वा काये कायानुपस्सी विहरति...पे०... एवं पि खो, भिक्खे, भिक्खु काये कायानुपस्सी विहरति ।...पुन च परं, भिक्खवे, भिक्खु सेय्यथापि पस्सेय्य सरीरं सीवथिकाय छड्डितं अट्ठिसङ्खलिकं समंसलोहितं न्हारुसम्बन्धं...पे०...अट्ठिसङ्खलिकं निम्मंसलोहिमक्खितं न्हारुसम्बन्धं...पे०...अट्ठिसङ्खलिकं अपगतमंसलोहितं न्हारुसम्बन्धं...पे०...अट्ठिकानि अपगतसम्बन्धानि दिसा विदिसा विक्खित्तानि... अट्ठिकानि सेतानि सङ्खवण्णपटिभागानि...पे०...अट्ठिकानि पुञ्जकितानि तेरोवस्सिकानि ...पे०...अट्ठिकानि पूतीनि चुण्णकजातानि । सो इममेव कायं उपसंहरति— 'अयं पि खो कायो एवंधम्मो एवंभावी एवंअनतीतो' ति । इति अज्झत्तं वा काये काये कायानुपस्सी विहरति बहिद्धा वा काये कायानुपस्सी विहरति, अज्झत्तबहिद्धा वा काये कायानुपस्सी विहरति, समुदयधम्मानुपस्सी वा कायस्मिं विहरति, वयधम्मानुपस्सी वा कायस्मि विहरति, समुदयवयधम्मानुपस्सी वा कायस्मिं विहरति । ... एवं पि खो, भिक्खे, भिक्खु कायानुपस्सी विहरति ।'' इति पालित्रिपिटकान्तर्गते **मज्झिमनिकाये** सतिपट्ठाणसुत्ते कायानुपस्सनायाम् पृ०७८-८१ ।

''**इममेवं कायं** ति इमं चतुमहाभूतिकं पूतिकायं । **उद्धं पादतला** ति पादतलत उपरि, **अधो केसमत्थका** ति केसग्गतो हेट्ठा, **तचपरियन्तं** ति तिरियं तचपरिच्छिन्नं, **पूरं नानाप्पकारस्स असुचिनो पच्चवेक्खतीति** नानप्पकारकेसादिअसुचिभरितो अयं कायो ति पस्सति'' इत्यादि ग्रन्थेन अस्य विशेषतः स्पष्टीकरणं **विसुद्धिमग्गे** अट्ठमे परिच्छेदे अनुस्सतिकम्मट्ठाननिद्देसे कायगतासतिकथायां द्रष्टव्यम् ।

''वुत्तं हेतं— 'पथवीकसिणमेको सञ्जानाति उद्धं अधो तिरियं अद्वयं अप्पमाणं''[ ] ति आदि । तत्थ **उद्धं** ति उपरि गगनतलाभिमुखं, अधो ति हेट्ठा भूमितलाभिमुखं, तिरियं ति खेत्तमण्डलमिव समन्ता परिच्छिन्दितं । एकच्चो हि उद्धमेव कसिणं वड्ढेति, एकच्चो अधो, एकच्चो समन्ततो । तेन तेन वा कारणेन एवं पसारेति, आलोकमिव दिब्बचक्खुना रूपदस्सनकामो । तेन वुत्तं-उद्धं अधो तिरियं ति ।'' इति **विसुद्धिमग्गे** पञ्चमे परिच्छेदे सेसकसिणनिद्देसे ।

## ४. शस्त्रपरिज्ञाध्ययनान्तर्गतपञ्चमवनस्पत्युद्देशकगत– कतिचिद्वृक्षाणां चातुर्वर्णीयछायाचित्राणि

**बादरवनस्पतिः**

प्रत्येकबादरवनस्पतिः | साधारणबादरवनस्पतिः

१.वृक्षाः | २.गुच्छाः | ३.गुल्मानि | ४.लताः | ५.वल्लयः | ६.पर्वगाः

७.तृणानि ८.वलयानि ९.हरितानि १०.औषध्यः ११.जलरुहाः १२.कुहणाः

एकास्थिकाः बहुबीजकाः

---

**एकास्थिका–**

**१. पीचुमन्द–**







લીમડો नीम Neem Tree, Margosa

---

**२. आम्र–**





આંબો

**आम**

Mango Tree

३. कोशाम्ब–





કોસુંભ

**कोसम्भ**

Ceylo oak

४. शाल–





રાળનું ઝાડ

**साल, राल**

Common Sal

५. अङ्कोल–







અંકોલ

**अंकोल**

Alangy

६. पीलु-





પીલુ

**पीलु छोटा**

Toothbrush Tree





७. शल्लकी-



ધૂપેડો, ચંદુસ



सलई



Indian Olibanum

८. उदुम्बर-

बहुबीजकाः-





ઉબરડો

गूलर

Country fig

९. कपित्थ-





કોઠું

**कैथ**

Wood apple

१०. अस्थिसंहारी, अस्थिक-



હાડસાંકળ



हडसंघारी



Vitis Quadrangularis wall

११. तिन्दुक-





ટીંબરુ

तेंदु

Guab Persiman

१२. बिल्व, शांडिल्य, महाकपित्थ-



બીલી વૃક્ષ



बेल, बिल



Bael fruit, Bengal Quince

१३ आमलक-





આંબળા

आंवला

Indian Goose Berry

## १४. पनस-





ફણસનું વૃક્ષ

**कटहल**

Indian Jack fruit

## १५. दाडिम







દાડમ

**अनार, दाडिम**

Pome Granate

## १६. मातुलिंग, बीजपुर-







બીજોરાનું વૃક્ષ

**बीजौरा नीबू**

Citron

१७. वृन्ताक-

गुच्छाः-





રીંગણાં

बैंगन

Brinjal, Eggplant

१८. कार्पासी-







કપાસ

कपास

Cotton plant

१९. जपा-







જાસુદ

जवाकुसुम

Shoe flower

२०. आढकी, तुवरी-



તુવેર



तूरदाल



Pigeon pea, Red gram

२१. तुलसी-



તુલસી

तुलसी

Holy Basil

२२. कुस्तुम्भरी-



કોથમીર, લીલા ધાણા



धनिया



Coriander fruit

२३. पिप्पली-



લીંડીપીપર



पिप्पली



Long pepper

२४. नीली, रंजिनी-



ગળીનો છોડ

नील( लील ), गुली

Indigo

२५. मल्लिका, नवमालिका-

गुल्मानि-




મોગરો



मोगरा, डोलर



Arabian Jasmine

२६. सैरेयक-





સફેદ કાંટાસરિયો

सफेद कटसरैया

Barleria Cristata linn

२७. कोरण्टक-







પીળો કાંટાસરિયો

पीला कटसरैया

Barleria prionitis

२८. बन्धुजीवक-







બપોરિયાનું ઝાડ

दुपहरिया

Pentapetes phoeniceac

२९. बाण–



નીલપુષ્પવાળો કાંટાસરિયો

नीलपुष्पवाला कटसरैया

Barleria Strigosa

३०. कणवीर–



કરેણ



कनेर



Sweet Scented oleander

३१. सिन्दुवार–





નગોળના ફૂલ

सम्हालू, मेउडी

Five leaved Chaste

३२. विचकिल-





મીંઢળનું ઝાડ

**मदनका पेड**

Randia Dametorum

---

३३. चेतीका, जातिपुष्प-





ચમેલી

**चमेली पुष्प**

Spanish Jasmine

---

३४. यूथिका -





જૂઈ

**जुही**

Pearl Jasmine

३५. पद्मलता–





પદ્મવેલ

**पद्मलता**

---

३६. नागलता–







નાગરવેલ

**पान**

Betal Leaf

---

३७. अशोक–





અશોક

**अशोक**

Ashoka Tree

३८. चम्पक-



પીળો ચંપો

**पीला चंपा**

golden champa

३९. चूतलता-





આંબા ઉપરની વેલ

**आमगुल**

Elaeagnus
Lolifolia

४०. वासन्ती-



કુંદલતા

**वासंती**

Jasminum

Arboresecns

Roxb

४१. अतिमुक्ता, माधवीलता-



માધવીલતા



माधवी



Clustered Hiptage

४२. कुन्द-





મોગરો

कुंद

Jasminum

४३. कुष्माण्डी -





કોળું

कुम्हडा, पेठा

Great Pumpkin

४४. कालिन्दक-





તરબૂચ, કલિંગર

तरबूजा

Water Melon

४५. त्रपुषी कर्कटी-





કાકડી

ककडी

Cucumber

४६. अलाबु, तुम्बिनी-





દૂધીનો વેલો

लौकी, तुम्बी

Sweetor White Gourd

४७. वालुंकी-





કાકડી

ककडी

Cucumber

४८. पटोली-







પરવળનો વેલો

परवल

Trichosanthes Dioica Roxb

४९. इक्षु-

पर्वगाः-







શેરડીનું વૃક્ષ

गन्ना

Sugar cane

५०. वीरण -





વાળો

वीरन, वाला

Khas Khas grass

५१. शर,मुञ्जः-



મુંજનું ઘાસ

भद्रमुंज

Saceharum Munja Roxb

५२. वेतस, वेत्र-



નેતરની વેલ



वेंत



Cane

५३. वंश-



વાંસ बांस Thorny Bamboo

५४. देवनल, नल-



નળનો છોડ नरसल Lobelia

५५. वेणु-



વાંસ बांस Thorny Bamboo

तृणानि-

५६. कुश-



કુશ कुश Eragrostis

५७. दर्भ-



દર્ભ, દાભડો डाभ Desmostachya

५८. अर्जुन-



સાજડ, સાદડ, અર્જુન अर्जुन, काहु Arjuna

५९. सुरभि, शल्लकी-





શાલેડું, ધૂપડો

सालई,सलई

Baswellia Serrata

६०. क्रुरुविन्द-







મોથ, નાગરમોથ

मोथा

Nut grass

६१. तालवृक्ष-

वलयानिः-







તાડ વૃક્ષ

ताडका पेड

The Palmyra Palm

६२. तमाल, तेजपत्र-





તમાલપત્ર

**तमालपत्र, तेजपत्ता**

Indian Cinnamon

६३. तक्कली, अरणी, अग्निमन्थ-



અરણીનું વૃક્ષ

**अरनी**

Pomelo

६४. सरल-






સુરુ, દેવદાર

**चीड,धुपसरल**

Long Leaved Pine

६५. केतकी-



કેતકી,

**जंगली अनास**

Agave vivipara

६६. कदली-



કેળ



केल



Banana Plant

## हरितानिः-

६७. तन्दुलीयक -





તાંદળજો

**चौलाइ, चौराइ**

Prickly Amaranth

## ६८. वस्तुल, वास्तुक–





ટાંકો

बथुआ

White Goose Foot

## ६९. मार्ज्जार–



લાલ ચિત્રક



लाल चित्रक



Rose Coloured lead wort

## ७०. पादिका–



સુગંધી પાનડી

पाचोली

Pogostemonpatchouli Hook

## ७१. चिल्लिका–





ચીલની ભાજી, ચંદનબટવો

**चिल्ली**

Purple Qujfoot

## ७२. पालकी –







પાલકની ભાજી

**पालक का शाक**

Spinage Spsinach

## ७३. तन्दुल, शालि–

**औषध्यः–**





ડાંગર

**चावल**

Rice Tree Plant

७४. गोधूम, सुमन–





ઘઉંનો છોડ

गेहुँ

Wheat

---

७५. यव–






જવ

जव

Barley

---

७६. मसूर–







મસૂર દાળ

मसूर दाल

Lentil

७७. तिल-





તલ तील gingelli

७८. मुद्ग-




મગનો છોડ

मूंग

Green gram

७९. माष-




અડદ

उरद

Black gram

## ૮૦. निष्पाव-



વાલોળનો વેલો, વાલ



सेम, सेम्बी



Flat Bean

---

## ૮૧. कुलत्थ-






કળથી

**कुलथी**

Horse gram

---

## ૮૨. अतसी-





અળસી

**अलसी**

Linseed

## ८३. कुसुम्भ-



કસુંબી



कुसुभ



Bastered Safron, Safflower

## ८४. कोद्रव-



કોદરો



कोदव



Panctured Paspalum

## ८५. कंगु-





કાંગ, કંગુ

कंगुनी

Setaria italica

८६. शैवाल-

जलरूहाः-







શેવાળ

सेवार

Moss

८७. कलम्बुका-



નાડાની ભાજી, નાડાની વેલ

कलमी शाक

Swamp Cabbage

८८. पा[ ? ह]ठा-





જળકુંભી

पाठा, जलकुंभी

The Wester lettuce

८९. कशेरुक-



કશેરુ कसेरु Scirpus Kysoor Roxb

९०. उत्पल-



કાળું કમળ कमल Lotus

९१. कमल,पद्म-





કમળ

कमल

Lotus

९२. कुमुद-



સફેદ કમળ



कमल



Water Lily

१३. पुण्डरीक, श्वेत कमल-







સફેદ કમળ श्वेत कमल White Lotus

१४. कुहुण-

कुहणाः-



કુહગ Knot grass

१५. उद्देहलिका, दारुहरिद्रा-





દારૂ હળદર

दारु हल्दी

Indian berberry

९६. सर्पकच्छत्रा–








બિલાડીના ટોપ

भुइंछत्ता

Mushrom

---

साधारणाः–

९७. लोही, रोहिणी–





રોહિણી

रोहन

Red Wood Tree

---

९८ . निहु, वजकण्टक–







ત્રિધારિયો છોડ

तिधारा थूहर

Triangular Spurge

९९. अश्वकर्णी -





શાલ વૃક્ષ

Sal Tree

१००. सिंहकर्णी -





અરડૂસી

अडूसा, बाकस

Malabar Nut

१०१. आर्द्रक, श्रृंगबेर -




આદુ

अदरख

Fresh ginger

१०२. आलुक, मालुका-





બટેટા

आलू

Potato

१०३. मूलक-





મૂળા

मूली

Radish

१०४. सूरण, अर्शोघ्न-







સૂરણકંદ

सूरन, जमीकंद

Amorphophallus Campanulatus

१०५. काकोली-



કાકોલી

काकोली

Rorcoea procera,
Luvunga Scandens

---

१०६. क्षीरकाकोली-







ક્ષીરકાકોલી

Lilion Polyphyllam

---

१०७. कर्पूर -

प्रकीर्णकाः-







કપૂર

कपूर, कापूर

Camphor

१०८. करञ्ज, पाटल -




કાંચકા, કાંકચ

**करंजवा, कांटा करंज**

Fever Plant

१०९. लवली-





વિલાયતી આમળાં, હરફા રેવડી

**हरफाशेरी**

Phyllanthus Distichus

११०. लवङ्ग-




લવિંગ

**लौंग**

Cloves

१११. केतकी-



કેવડાનું ઝાડ

केतकी

Pandanus fascicularis

१२. चन्दन-







સુખડ

सफेद चन्दन

Sandal Wood

११३. अगरु-







અગરુ

अगर

Eagle wood

## १९४. कंकोल, कक्कोलक-







કંકોલ

**कबाबचीनी, शीतलचीनी**

Cubeba pepper

---

## १९५. एला-







એલચી

**ईलायची**

Lesser Cardamom

---

## १९६. जातिपत्र, जातिफल-





જાવંત્રી, જાયફળ

**जावित्री, जायपत्री**

Mace

## ११७. काश्मीर, कुंकुम केसर–







કેસર

**केसर**

Saffron

## ११८. मांसी, जटामांसी–



જટામાંસી

**जटामांसी, बालछड**

Spikenard, Indian Nard

## ११९. स्पृष्ट प्ररोहिका–





લજામણીનો છોડ

**लाजवंती**

Sensitive Plant

१२०.खदिर-





ખેરનું ઝાડ

**खेर वृक्ष**

Catechu Tree

१२१. तालीस-





તાલીસ પત્ર

**तालीस पत्र**

Silver Fir

१२२. पलाश-



ખાખરો

**टेसुका पेड**

Bastari Peak

## ५. शीलाङ्काचार्यकृतकृतिविषयकसमालोचना

**– ले०अमृतलाल मोहनलाल भोजक**

"शीलांक वा शीलाचार्य के सम्बन्धमें भारतीय एवं पाश्चात्य विद्वानोंने कुछ आनुमानिक विचार प्रदर्शित किये हैं । उन्ही नामके एक विद्वान् द्वारा रचित प्रस्तुत ग्रन्थ का सम्पादन करते समय उपर्युक्त पूर्वभूमिका के आधार पर जो बातें ज्ञात हुई है उनका निर्देश करना यहाँ उपयुक्त होगा ।

इस समय शीलांक अथवा शीलाचार्यने निम्न ग्रन्थों की रचना की है- ऐसे उल्लेख मिलते हैं—

| ग्रन्थ | कर्ता |
|---|---|
| १. विशेषावश्यकभाष्यवृत्ति | शीलांक-कोट्याचार्य(निर्देश: प्रभावक चरित्र) |
| २. आचारांग-सूत्रकृतांगटीका | शीलाचार्य-तत्त्वादित्य-शीलांक |
| ३. चउपन्नमहापुरिसचरिय | शीलाचार्य-विमलमति-शीलांक |
| ४. जीवसमासप्रकरणवृत्ति | शीलांक |
| ५. पूजाविधिप्रकरण(?) | शीलाचार्य (निर्देश: बृहट्टिप्पनिका) |
| ६. अज्ञात-अप्राप्य देशीशब्दकोश अथवा देशीशब्दकोशकी वृत्ति | शीलांक (निर्देश: हेमचन्द्र) |
| ७. एकादशांगवृत्ति | शीलांक (निर्देश: प्रभावक चरित्र) |

८. इनके अतिरिक्त विनयचन्द्रीय (विक्रमकी १३वी शती) काव्यशिक्षामें शीलांकका निर्देश है ।

१. इनमेंसे विशेषावश्यकभाष्यके के टीकाकार कोट्यचार्यका नाम शीलांक भी है- ऐसा विधान करनेवाले विद्वानोंमें से सबने इस विधान के आधार के रूपमें प्रभावकचरित्र[१] के अतिरिक्त दूसरे किसी ग्रन्थ का प्रमाण नहीं दिया । उसमें विशेषावश्यकभाष्य की वृत्ति के रचयिता शीलांक को ही एकादशांगवृत्तिकार भी कहा है । उसमें ऐसा भी उल्लेख आता है कि ग्यारह अंगोकी वृत्तियों में से केवल आचारांग एवं सूत्रकृतांगकी वृत्तियों के अतिरिक्त शेष नौ अंगोकी वृत्तियोंके नष्ट होने पर शासन देवताने अभयदेवसूरिको उन अंगो की टीका लिखने के लिए प्रेरित किया । प्रभावकचरित्रकारका शासनदेवतावाला यह निर्देश या तो किसी निर्मूल दन्तकथाके उपर आधारित है या फिर स्वयं उनकी अपनी ही कल्पना है । अभयदेवसूरिके समयमें शीलांक अथवा अन्य किसी विद्वान्की अवशिष्ट नौ अंगो पर वृत्ति होती तो "अर्थरूपी रत्नके साररूप देवता द्वारा अधिष्ठित तथा विद्या एवं क्रिया से बलवान् होने पर भी किसी पूर्वपुरूषने जिसका उन्मुद्रण (व्याख्या या टीका)नहीं किया वैसे स्थानांगका व्याख्यामूलक अनुयोग आरंभ किया जाता है[२] ।" इस प्रकार अभयदेवसूरि स्वयं अपनी स्थानांगवृत्ति के प्रारम्भ में न लिखते । इससे तो यही सिद्ध होता है कि

---

**टि०** १.(વાચકવર્ગને સરળતા રહે તે માટે અમે અહીં અમારા તરફથી તે નિર્દેશ રજૂ કરીએ છીએ.) श्री शीलांकः पुरा कोट्याचार्यनाम्ना प्रसिद्धिभूः । वृत्तिमेकादशाङ्ग्या स विदधे धौतकल्मषः ॥ – प्रभावकचरित्र, भा०१, पृ०१६४ २."विविधार्थरत्नसारस्य, देवताधिष्ठितस्य, विद्या-क्रियावलवतापि पूर्वपुरुषेण कुतोऽपि कारणादनुन्मुद्रितस्य स्थानाङ्गस्योमुद्रणमियानुयोगः प्राधान्यते ॥" –स्थानाङ्गटीकाके प्रारम्भमें ।

शीलांक एकादशांगवृत्तिकार नहीं थे, अपितु आचारांग एवं सूत्रकृतांगके ही वृत्तिकार थे । अतएव प्रभावकचरित्रकारका उपर्युक्त उल्लेख निर्मूल प्रमाणित होता हो, तो प्रभावकचरित्रमें इसी स्थानपर शीलांकका दूसरा नाम कोट्याचार्य दिया है वह भी विशेष सार्थक प्रतीत नहीं होता । कहने का तात्पर्य यह है कि विशेषावश्यकभाष्यकी वृत्ति के रचयिता कोट्याचार्य का दूसरा नाम शीलांक नहीं है । पूज्यपाद आगमोद्धारक आचार्य श्री सागरानंदसूरिजीने स्वसम्पादित कोट्याचार्यकृत विशेषावश्यक भाष्यकी वृत्ति की प्रस्तावनामें यह बात स्पष्ट की है ।

२. आचारांग-सूत्रकृतांगके वृत्तिकार शीलाचार्यने अपने नामका निर्देश आचारांग प्रथम श्रुतस्कन्धकी वृत्ति, द्वितीय श्रुतस्कन्धकी वृत्ति तथा सूत्राकृतांगकी वृत्ति के अन्तमें किया है । इन तीनों स्थानो पर आचार्यने अपना नाम शीलाचार्य लिखा है तथा आचारांग प्रथम श्रुतस्कन्धकी वृत्ति के अन्तमें **'निर्वृत्तिकुलीनशीलाचार्येण तत्त्वादित्यापरनाम्ना वाहरिसाधुसहायेन कृता टीका परिसमाप्तेति'** लिखकर अपना दूसरा नाम तत्त्वादित्य भी सूचित किया है । गुप्त या शकसंवत् के विषयमें निश्चय न हो सकने से तथा दूसरे विशेष प्रमाणों के अभाव में भिन्न भिन्न समय के आचार्योंको एक ही व्यक्ति मानने के अनुमान होते रहे है, परन्तु अन्तिम निर्णय अभी तक नहीं हो पाया है । आचारांग प्रथम श्रुतस्कन्धकी टीका के अन्तमें ग्रन्थकारने रचनासमय गुप्त संवत् ७७२ लिखा है । जबकि द्वितीय श्रुतस्कन्धकी टीका के अन्तमें शकसंवत ७८४ और प्रत्यनतर में ७९८ लिखा है । 'यहाँ गुप्तसंवत् एवं शकसंवत् को एक मानकर शकको गुप्त लिखा गया है वस्तुतः दोनों संवत् शकसंवत के अर्थ में होने चाहिए' —ऐसी डॉ. **फ्लीट** आदि विद्वानों की कल्पना युक्तिसंगत प्रतीत होती है । इस दृष्टि से यदि प्रथम श्रुतस्कन्धकी वृत्ति के अन्तमें दिये गये गुप्तसंवत् को शकसंवत् ही मान लें, तो वि.सं. ९०७ में प्रथम श्रुतस्कन्धकी और वि.सं. ९१९ में द्वितीय श्रुतस्कन्धकी टीका लिखी गई होगी । **बृहट्टिप्पनिका**में **चउपन्नमहापुरिसचरिय**का रचनासमय वि.सं.९२५ दिया है । इस तरह दोनों शीलाचार्योंने, समकालीन होने के कारण, अपनी अलग-अलग पहचानके लिए दूसरा नाम भी दिया होगा, ऐसा अनुमान सर्वथा असंगत नहीं लगता । इन दोनोंकी समकालीनता का और अभिन्नता का मुख्य आधार दोनों ग्रन्थोंके रचनासमयको ही कहा जा सकता है, किन्तु वस्तुतः ये दोनों भिन्न ही हैं । 'विमलांक' विमलसूरि, 'भवविरहांक' हरिभद्रसूरि तथा 'दाक्षिण्यचिह्न' उद्योतनसूरि इत्यादि विद्वानोंने अपने अपरनाम सूचित किये ही हैं, यद्यपि उनके समकालीन उस-उस नामके अन्य विद्वान् ज्ञात नहीं हो सके हैं । यहाँ तो हमें इतना ही सूचित करना है कि आचारांगटीकाकार और चउपन्नहापुरिसचरियके कर्ता शीलाचार्य अपने अपरनाम भिन्न-भिन्न सूचित करते हैं, और इसीलिए वे समकालीन होने पर भी एक नहीं हैं ।

पुरातत्त्वाचार्य मुनीश्री **जिनविजयजी** ने **जीतकल्पसूत्र**की अपनी प्रस्तावनामें डॉ.**फ्लीट**[1], डॉ. **पिटर्सन**, डॉ. **लोयमान** तथा डॉ. **हर्मन जेकोबी** के मन्तव्यों का अनुवाद करते हुए **कुवलयमाला**कार **उद्योतनसूरि** के गुरु [2]तत्त्वाचार्य एवं आचारांग-सूत्रकृतांग के वृत्तिकार शीलाचार्य-तत्त्वादित्य एक ही हैं

---

**टि०** १. डॉ. फ्लीटने आचारांगसूत्रटीका के रचना-स्थान गंभूताको खम्भात कहा है, किन्तु यह ठीक प्रतीत नहीं होगा । महेसाणा-पाटन रेल-मार्ग पर आनेवाले धीणोज स्टेशन से तीन-चार कोस दूर आये हुए गांभू नामक गाँवका प्राचीन नाम गंभूता था । इसके सूचक प्राचीन प्रमाण भी उपलब्ध होते हैं । २. (અમે વાચકવર્ગની સુગમતા માટે પ્રસ્તુત ઉલ્લેખ રજૂ કરીએ છીએ.) तस्स य आयारधरो **तत्तायरिओ** त्ति नाम सारगुणे । आसि तवतेजनिज्जिय पावतमोहो दिणयरोव्व ॥ जो दुसमसलिलपवाहवेगहीरन्तगुणसहस्साण । सीलांग विडलसालो लग्गाण खंभोव्व निक्कंपो ॥ -कुवलयमालाप्रशस्ति, गा०८-९, रचना समय शक संवत्-७०० ॥

ऐसी कल्पना की है। इसी प्रकार इसी प्रस्तावना के अन्तमें (परिशिष्टमें) आचारांग-सूत्रकृतांगके टीकाकार शीलाचार्य एवं प्रस्तुत ग्रन्थ चउपन्नमहापुरिसचरियके कर्ता एक हैं एसा भी अनुमान किया है। उन्हें प्रसतुत ग्रन्थकी प्रति उस समय प्राप्त नही हुई थी, अतः ऐसी कल्पना करना उनके लिए स्वाभाविक था; परन्तु मैने उपर असंदिग्धरूपसे सूचित किया ही है कि समकालीन होने पर भी ये दोनों शीलाचार्य एक नहीं किन्तु भिन्न हैं।

आगमोद्धारक आचार्य श्री **सागरानंदसूरिजीने विशेषावश्यकभाष्यवृत्ति** की प्रस्तावनामें आचारांग के टीकाकार शीलाचार्यके तत्त्वादित्य नामको(जो सभी प्रतियोंमें उपलब्ध होता है) कविकृत मानकर उन्हें तथा चउपन्न के कर्ता शीलाचार्य को अभिन्न बतलाया है, किन्तु यह विधान संगत प्रतीत नहीं होता। दोनों आचार्योंकी भिन्नताका निषेध करनेके लिये तत्त्वाचार्य के नामके लिए 'कविकृत' विशेषणका प्रयोग करके उसे प्रक्षिप्त माननेका उनका आशय हो या न हो, परन्तु उससे इतना तो फलित होता ही है कि उन्हें आचारांग-सूत्रकृतांगवृत्तिकार शीलाचार्य का दूसरा नाम तत्त्वादित्य स्वीकार्य नहीं है। उनके इस विधानसे कोई ऐसा भी समझ सकता है कि वह नाम स्वयं ग्रंथकारने नहीं लिखा है ऐसा श्री सागरानंदसूरिजीका मानना है। परन्तु जो नाम आचारांगकी उपलब्ध प्रातीनतम प्रतियोंमें लिरपवाद रूपसे उपलब्ध होता है उसका बिना किसी आधारके निषेध करना उचित नहीं है। किसी भी विद्वान्ने अन्य विद्वान्के ग्रन्थमें अपरनाम कल्पित करके जोड़ दिया हो ऐसा कभी नहीं हुआ। इतना ही नहीं, ऐसा दुस्साहस किसने और किस हेतुसे किया होगा इसका उत्तर जिसका कोई आधार नहीं ऐसे 'कविकृत' शब्दप्रयोगसे नहीं मिलता। मुनिश्री जिनविजयजीको तो चउपन्नमहापुरिसचरियकी प्रति नहीं मिली थी, अतः उन्होंने दोनोंके एकत्वका अनुमान किया था; परन्तु श्री सागरानंदसूरिजीको तो चउपन्न के कर्ता शीलाचार्यका 'विमलमति' नाम मिला है, फीर भी दोनोंकी भिन्नताके बदले एकके अपरनामको व्यर्थ मानकर उनका एकीभाव उन्होंने क्यों किया होगा यह हमारी समझ में नहीं आता।

श्री **मोहनलाल दलीचन्द देसाईने** जीतकल्पसूत्रकी उपर्युक्त प्रस्तावना का अनुसरण करके आचारांग के टीकाकार तथा चउपन्न के रचयिताको एक माना है[१]। इसके विषयमें तो कुछ विशेष लिखने का नहीं है। किं तु जीतकल्पसूत्रकी प्रस्तावना में कोट्याचार्य शीलांक, अणहिल्लपुरके स्थापक वनराजके विद्यागुरु शीलगुणसूरि, आचारांग के टीकाकार शीलाचार्य और चउपन्न के रचयिता शीलाचार्य के एक होने के जो अनिश्चित अनुमान किये है(जो उसी प्रस्तावनामें किये गये परिशिष्टके आधार पर असंगत और अनिर्णीत कहे जा सकते है)उनके आधार पर वनराजके गुरु शीलगुणसूरि और दोनों शीलाचार्योंको एक जानकर श्री देसाईने उनकी स्तुति के रूपमें **मुनिरत्नसूरि**कृत **अममस्वामिचरित्र**का जो श्लोक उद्धृत किया है वह भी शीलगुणसूरि या शीलाचार्यकी स्तुतिरूपमें नहीं है, किन्तु उससे तो श्रीहेमचन्द्राचार्यकी स्तुति की गई है। वह श्लोक इस प्रकार है—

**गुरुर्गुर्जरराजस्य चातुर्विद्यैकसृष्टिकृत्। त्रिषष्टिनरसद्वृत्तकविर्वाचां न गोचरः॥**

इसमें आये हुए 'गुर्जरराज' शब्दका अर्थ कुमारपाल के बदले वनराज उसके विद्यागुरु शीलगुणसूरिका तथा त्रिषष्टिशलकापुरुषचरित्रके बदले चउपन्नमहापुरिसचरियकी कल्पना करके शीलाचार्यका ऐक्य सूचित करनेका आशय मालूम पडता है, परन्तु 'चातुर्विद्यैकसृष्टिकृत्' विशेषण जितना हेमचन्द्राचार्यके लिए उपयुक्त लगता है उतना शीलगुणसूरि या शीलाचायके लिए उपयुक्त प्रतीत नहीं होता। इसके अलावा

---

**टि०** १.देखो 'जैन साहित्य का संक्षिप्त इतिहास' पृ०१८०-८१।

त्रिषष्टिशलाकापुरुषचरित्रके निर्देशका आशय भी इसमें स्पष्ट अवगत होता है । सम्भावनाओं को विधान मानकर किया गया निर्णय कैसा असंगत होता है यह जाननेके लिए उपर्युक्त श्लोकका श्रीदेसाईकृत अर्थ एक उदाहरणरूप है ।

प्रस्तुत विचारके सन्दर्भमें एक बात विशेष सूचक है; अन्तमें इसका निर्देश करना मुझे आवश्यक प्रतीत होता है । आचारांग एवं सूत्रकृतांगके टीकाकार अपना नाम तत्त्वादित्य एवं शीलाचार्य सूचित करते हैं, किन्तु कहीं कहीं प्रत्यंतररूपसे शीलांकका भी निर्देश मिलता है । इस परसे यह संभावना होती है कि उनका मूल नाम शीलाचार्य होगा किन्तु बादमें शीलाचार्य का और शीलांकाचार्यका एकीकरण हो जाने के कारण वे शीलांक नामसे भी प्रसिद्ध हुए ।

३. चउपन्नमहापुरिसचरियके कर्ता शीलाचार्यका परिचय दिया जा चुका है ।

४. **जीवसमासवृत्ति**में ग्रन्थकार अपना नाम शीलांक सूचित करते है । इसमें अतिरिक्त अन्य कोई जानकारी इसमें उपलब्ध न होनेसे ग्रन्थके साद्यन्त अवलोकनके अनन्तर ही कुछ कहा जा सकता है । सरसरी निगाहसे मैं सारा ग्रन्थ देख तो चुका हूँ, परन्तु उसके आधारपर किसी निर्णयपर आना इस समय कठिन है ।

५. शीलाचार्यरचित पूजाविधिविषयक कोई कृति का जो निर्देश बृहट्टिपनिकामें आता है वह इस प्रकार है– '**श्रीशान्तिवेतालीयपर्वपंजिका स्नपनविध्यादिवाच्या श्री शीलाचार्यीया ।**' इस उल्लेख परसे ज्ञात होता है कि इस कृतिका विषय पूजाविधि रहा होगा । अब तक इसकी एक भी प्रति उपलब्ध नहीं हुई, अतः नाममात्रका उल्लेख करनेवाले उपर्युक्त उल्लेखके आधार पर इतनी मात्र संभावना की जा सकती है कि स्नपनविधि आदि विषयक कोई ग्रन्थ शीलाचार्यका था जिस पर वादिवेताल शान्त्याचार्यने पंजिका लिखी थी ।

६. **हेमचन्द्रीय देशीनाममाला**की टीकामें निर्दिष्ट शीलांक चउपन्नके शीलांक होने चाहिए ऐसे अनुमानका निर्देश मैंने उपर किया ही है ।

७. प्रभावकचरित्रमें निर्दिष्ट शीलांकके बारमें पहले कहा जा चुका है ।

८. लगभग १३वी शतीकें आचार्य **विनयचन्द्र**ने अपनी **काव्यशिक्षा**के अन्तमें **व्यास** आदि ब्राह्मण ग्रन्थकारोंके नामोंके साथ जैन ग्रन्थकारोंका भी नामनिर्देश किया है । उसमें शीलांकका नाम भी आता है । **काव्यशिक्षाका** वह पाठ इस प्रकार है—

**भद्रबाहुर्हरिभद्रः शीलांकः शाकटायनः । उमास्वातिः प्र........।।**[१] (आगेका पत्र उपलब्ध नहीं)

इसमें केवल नामका ही निर्देश होनेसे लेखकको कौनसे शीलांक अभिप्रेत हैं यह जानना कठिन है, तथापि काव्यशास्त्रमें स्मृत शीलांक ऐसे होने चाहिए जो व्याकरण, काव्य, कोश, चरित्र आदिके रचयिताके रूपमें ख्यातनाम हो । यह तर्क हमें ऐसी सम्भावनाकी ओर ले जाता है कि लेखकको शीलांक पदसे शायद चउप्पन्नके रचयिता शीलांक अभिप्रेत हो ।"

---

**टि०** १. देखो 'पत्तनस्थजैनभाण्डागारीयसूचि' (ओरिएण्टल इन्स्टिटयूट, बड़ौदा प्रकाशित) पृ.५० ।

## ६. सम्पादनोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च

| सञ्ज्ञा | ग्रन्थनाम | प्रकाशकादि |
|---|---|---|
| अनु०द्वा० | अनुयोगद्वारसूत्रम् | श्री महावीर जैन विद्यालय,मुंबई |
| आचा०द्वि०श्रु०स्कन्ध | आचाराङ्गद्वितीयश्रुतस्कन्धः | |
| आचा०नि० | आचाराङ्गनिर्युक्तिः | आगमोदयसमितिः |
| आचा०शु० | आचाराङ्गशुद्धिपत्रकम् | मोतीलाल बनारसीदास, दिल्ली |
| आव०चू० | आवश्यकचूर्णिः | ऋषभदेव केसरीमल, रतलाम |
| आव०नि० | आवश्यकनिर्युक्तिः | आगमोदयसमितिः |
| आव०संग्रहणि | आवश्यकनिर्युक्तिसंग्रहणि | आगमोदयसमितिः |
| उत्तरा० | उत्तराध्ययनसूत्रम् | भंद्रकर प्रकाशन, अमदावाद |
| उत्तरा०नि० | उत्तराध्ययननिर्युक्तिः | आगमोदयसमितिः |
| ऋग्वेद | | |
| ओघनि०भा० | ओघनिर्युक्तिभाष्यम् | आगमोदयसमितिः |
| ओघनि०वृ० | ओघनिर्युक्तिवृतिः | आगमोदयसमितिः |
| कातन्त्र०धा० | कातन्त्रधातुपाठः | |
| जीवसमा० | जीवसमासप्रकरणम् | |
| जीवाभि० | जीवाभिगमोपाङ्गसूत्रम् | |
| ज्ञाताधर्म० | ज्ञाताधर्मकथाङ्गसूत्रम् | जिनशासन आराधना ट्रस्ट |
| तत्त्वार्थ० | तत्त्वार्थधिगमसूत्रम् | देवचंद लालचंद पुस्तकोद्धारफंड, सुरत |
| तन्दु०वैचा०प्रकी० | तन्दुलवैचारिकप्रकीर्णकम् | महावीर जैन विद्यालय, मुंबई |
| त्रिपुरता०उप० | त्रिपुरतापिन्युपनिषद् | |
| दशवै० | दशवैकालिकसूत्रम् | महावीर जैन विद्यालय, मुंबई |
| दशवै०नि० | दशवैकालिकनिर्युक्तिः | आगमोदयसमितिः |
| धर्मसङ्ग्रहणि | | |
| निशी०भा० | निशीथभाष्यम् | सन्मति ज्ञानपीठ, आगरा |
| नीतिशतक | | |

## षष्ठम् परिशिष्टम्

| सञ्ज्ञा | ग्रन्थनाम | प्रकाशकादि |
|---|---|---|
| पञ्चक०भा० | पञ्चकल्पभाष्यम् | |
| पञ्चसं० | पञ्चसङ्ग्रहः | |
| पा० | पाणिनीव्याकरणम् | गोपालकृष्ण ट्रस्ट, जूनागढ |
| पा०धा० | पाणिनीधातुपाठः | |
| पा०व्या० | पाणिनीव्याकरणम् | गोपालकृष्ण ट्रस्ट, जूनागढ |
| प्रज्ञा०सू० | प्रज्ञापनासूत्रम् | महावीर जैन विद्यालय, मुंबई |
| प्रव०सारो० | प्रवचनसारोद्धारः | |
| प्रशम० | प्रशमरतिप्रकरणम् | |
| प्राची०शतककर्म० | प्राचीनशतककर्मग्रन्थः | |
| बृ०क०भा० | बृहत्कल्पभाष्यम् | जैन आत्मानन्द सभा, भावनगर |
| बृ०स्व०स्तो० | बृहत्स्वयम्भूस्तोत्रम् | |
| बृहत्सं० | बृहत्सङ्ग्रहणि | |
| ब्रह्मबिन्द०उप० | ब्रह्मबिन्दूपनिषद् | |
| मनुस्मृ० | मनुस्मृतिः | चौखम्भा संस्कृत संस्थान, वाराणसी |
| मनुस्मृति | मनुस्मृतिः | चौखम्भा संस्कृत संस्थान, वाराणसी |
| महानिशी० | महानिशीथसूत्रम् | |
| महाभा० | महाभारतः | |
| मी०श्लो०वा० | मीमांसाश्लोकवार्त्तिकम् | |
| विशे०आ०भा० | विशेषावश्यकभाष्यम् | दिव्यदर्शन ट्रस्ट, कलिकुंड |
| विशेषाव०भा० | विशेषावश्यकभाष्यम् | दिव्यदर्शन ट्रस्ट, कलिकुंड |
| व्यव०भा० | व्यवहारभाष्यम् | जैन विश्वभारती, लाडनू |
| व्या०प्रज्ञ० | व्याख्याप्रज्ञप्तिसूत्रम् | आगमोदयसमितिः |
| संस्ता०प्रकी० | संस्तारकप्रकीर्णकम् | महावीर जैन विद्यालय, मुंबई |
| सन्मति० | सन्मतितर्कप्रकरणम् | |
| सिद्ध०द्वात्रिं०द्वात्रिं० | सिद्धसेनीयद्वात्रिंशद्द्वात्रिंशिका | |

## ग्रन्थसूचिः सङ्केतविवरणं च

| | | |
|---|---|---|
| सूत्रकृ०नि० | सूत्रकृताङ्गनिर्युक्तिः | आगमोदयसमितिः |
| स्था०सू० | स्थानाङ्गसूत्रम् | सिद्ध-भुवन-मनोहर ट्रस्ट, अमदावाद |

## -: सङ्केतविवरणम् :-

| | |
|---|---|
| अ० | अध्ययनम् |
| उ० | उद्देशकः |
| टि० | टिप्पणम् |
| नि० | निर्युक्तिः |
| पं० | पङ्क्तिः |
| पृ० | पृष्ठम् |
| वि०टि० | विशेषटिप्पणम् |
| श्रु० | श्रुतस्कन्धः |
| सू० | सूत्रम् |





जाए सद्धाए णिक्खंतो
तमेव अणुपालिया
- अध्य०१

જે શ્રદ્ધાથી તે પ્રવ્રજ્યા
ગ્રહણ કરી છે. તેને તું
જાળવી રાખ.

खणं जाणाहि पंडिते !
- अध्य०२

હે પંડિત !
તું અવસરને ઓળખ.

Created by : *Kirit B. Vadecha*
© 23737600 / 98200 73336

## जे आसवा ते परिस्सवा
## जे परिस्सवा ते आसवा

- आचाराङ्ग सूत्र

તત્ત્વદષ્ટિ જીવ
કર્મબંધના સ્થાનમાં પણ નિર્જરા કરે.
જ્યારે,
ભોગદષ્ટિ જીવ
કર્મનિર્જરાના સ્થાનમાં પણ કર્મબંધ કરે.
એક જ માર્ગે
ઉન્માર્ગ તરફ પણ જવાય છે અને
સન્માર્ગ તરફ પણ.
નિર્ણય માર્ગયાત્રીએ કરવાનો છે.
માટે જ કહ્યું છે
**'તું કૌરવ તું પાંડવ મનવા !**
**તું રાવણ તું રામ**
**જીવનના આ કુરુક્ષેત્ર પર**
**પળ પળનો સંગ્રામ.'**